SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

....

....

....

Fumigated DEC 1993

But thought nor word can seize eternal truth

GAEKWAD'S ORIENTAL SERIES

Published under the Authority of the
Government of His Highness the
Maharaja Gaekwad of Baroda.

PARAS'URĀMAKALPASŪTRA

PART I

Volume XXII

परशुरामकल्पसूत्रम्

रामेश्वरकृतवृत्तिसहितम्

PARAS'URĀMAKALPASŪTRA

WITH RAMES'WARA'S COMMENTARY

EDITED BY

A. MAHADEVA SASTRI, B.A.

DIRECTOR, ADYAR LIBRARY, ADYAR, MADRAS

Author of the Vedic Law of Marriage, etc., the English translation of Sankara-charya's Commentary on the Bhagavad-Gita and Taittiriya Upanishad. Late Editor of the Mysore Government Oriental Library Sanskrit Series, Editor of the Adyar Library Series

BARODA

CENTRAL LIBRARY

1923

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras and published by Newton Mohun Dutt, Curator of Libraries, Baroda State, on behalf of the Government of His Highness the Maharaja Gaekwad, at the Central Library, Baroda.

PREFACE

In writing this preface, I am tempted to refer to a few reminiscences of my visit to Baroda in 1909—an incident which has much to do with my undertaking to edit this work for Gaekwad's Oriental Series. I was invited to visit Baroda by H. H. the Gaekwad through H. H. the Maharajah of Mysore in whose Government I was then serving as Curator, Government Oriental Library, Mysore, and Superintendent of studies in Maharajah's Samskrit College, Mysore. The invitation was the direct outcome of my presentation to His Highness the Gaekwar of my pamphlets on questions of social reform such as marriage and caste. During my seven weeks' stay at Baroda I discussed, in His Highness' presence, the questions of caste reform with Baroda Pandits and delivered public lectures on the same. I was greatly struck with His Highness' keen personal interest in the subjects discussed and his encouragement in our private talks of free expression of my considered opinions. His appreciation of the value of our ancient learning has since materialised in the addition of the Samskrit Section to the Central Library, which as the result of the labour of my friend Pandit R. Anantakrishna Sastri bids fair to be one of the best collections in India. His Highness' kind remembrance of me was evinced on several subsequent occasions; and when I retired from Mysore Government service in 1916 I was invited by His Highness to take charge of the Samskrit Section of the Library. But as I had, on the invitation of the President of the Theosophical Society, already settled as the Director of the Adyar Library at the Headquarters of the Theosophical Society,

I could not accept His Highness' kind offer. But I have all along felt that Baroda and His Highness have a claim on my services, so that when I was invited to take some share in the editorial work in connection with the Gaekwad's Oriental Series I could not peremptorily decline, though I had then on my hands as much work as I had time to do. At first I was asked to edit Parasurāma-Kalpa-Sūtra and Nityotsava-Paddhati, for which presumably I was held qualified because I had edited already Shri Shankarāchārya's Saundarya-Laharī with Lakshmīdhara's Commentary published in the Mysore Government Oriental Library Series.

About five years have elapsed between my promise to edit this work and its performance; and this delay requires some explanation. It was in the latter part of 1917 that at the request of my friend Pandit R. Anantakrishna Sāstri of the Baroda Central Library, I undertook to edit Parasurāma-Kalpa-Sūtra and Nityotsava for the Gaekwad's Oriental Series. I had, however, soon after to regretfully give it up owing to some pressing work I then had in hand. Thereupon Sir John Woodroffe who had for several years been making a special study of the subject was approached as one qualified for the work; but, as he was just then going on leave to Europe, he could only promise to take up the work after his return to India.

The work was again pressed on me and accepted. There was some delay even after this. I could not at once proceed with the edition of the Sūtra as no good edition of the Sūtra could be prepared with the materials then available. These consisted of a few indifferent manuscript copies of the Sūtra which showed much divergence and two complete and a few fragmentary copies of Nityotsava. This latter again is a Paddhati based on the Sūtra, but not a succinct gloss or commentary of the Sūtra. By good chance, however, I soon got a copy of Ramesvara's Vṛitti on the Sūtra, which was so full and informing that it was found worth

while publishing it along with the Sūtra. But this copy of the Vṛitti was far from correct, so that other copies were searched for; and a continued search of two years was crowned with the discovery of other manuscript copies, a careful collation of which enabled me to prepare a satisfactory edition of the Sūtra and Vṛitti. By the time the Sūtra with Vṛitti was edited, the edition of Nityotsava became an easy affair; and good copies also of the latter have been secured in the meanwhile.

This edition of the Parasurāma-Kalpa-Sūtra with Vṛitti is based on the following manuscripts:

1. The copy belonging to the Adyar Library transcribed in Devanagari from a Telugu manuscript copy belonging to late Mr. Jagga Rao of Vizagapatam. This is cited as अ.

2. The copy mentioned above was sent to Baroda for collation with the excellent MS. copy belonging to Pandit Dhanvantram of Karnali. The noteworthy readings of this copy were noted in the Adyar copy, and they are cited as those of ब. For the marking of the variants I am indebted to the kind services of Mr. G. K. Srigondekar, M.A., Samskrit Librarian, Baroda Central Library, who worked at it assiduously for eight hours a day.

3. A complete Devanagari copy belonging to the Baroda Library containing 302 leaves. This copy was found to be fairly good giving correct readings where other copies were found faulty. This is cited as ब १.

4. A copy in grantha character in three volumes made from a manuscript deposited in the Madras Government Oriental MSS. Library. The owner of this transcript Mr. M. V. Sreenivasa Iyer of Triplicane (Madras) collated it with another MS. copy and has noted in it variations from that other copy; and his copy is thus equivalent to two distinct copies of the work. This transcript is cited as श्री.

5. Portions of a copy of Ramesvara-Vṛitti was got from the Benares Government Samskrit College Library for collation.

But by the side of the others this copy was found superfluous and it did not offer correct readings where there were any doubts. It is referred to as ब २.

There were besides many copies of the mere text of the Kalpa-Sūtra available for collation of the Sūtra. But, as their various readings are represented by the copies of the Vṛitti, it was not found necessary to note any variations in their readings. As to the copies of the Vṛitti used for this edition, none of them is quite correct, but, fortunately, owing to the variety in the copies and collations secured, no difficulty has been found in determining the correct text.

While the work was in progress Mr. R. Anantakrishna Sastri sent me a manuscript containing what purports to be an extension to the Sūtra by eight Khandas from 11th to 18th. This portion is printed as an appendix at the end. It does not seem to be a genuine portion of the Sūtra. Ramesvara's Vṛitti closes with the tenth Khanda and regards it as the concluding portion. The manuscript is very incorrect, and in some places the meaning is quite unintelligible. This portion is added simply to show that there is such an alleged extension of the Sūtra.

The Kalpa-Sūtra is a digest of Sri-Vidyā, a system of Divine Mother's worship compiled by one Parasurāma from the several systems of the same which prevailed in his day. This, however, is only one of the many forms now in vogue, though it is tersest and perhaps the best arranged one of them all. It seems very hard to make out in what sense the author can be identified with Parasurāma of the Rāmāyana as is done in the colophons of the several sections of the Sūtra.

The commentary on the Sūtra is of a recent age, hardly more than a hundred years old. The work is said to have been written in 1753 of the Saka era which corresponds to 1831 A.D. Without this commentary it would not be easy to make out the meaning of the Sūtra, especially for those who are not quite

familiar with the technicalities of the cult. The commentator traverses many points of doctrine and practice as stated in the Nityotsava of Umānandanātha, remarking more than once that the latter does not rightly understand the meaning of the Sūtra, and that being unlearned in the principles of Mīmāmsā (the science of exegesis) he embodies in his system many things not warranted by the authority of the Sūtra which he professes to follow closely. Both of them, however, acknowledge their allegiance to the authority of Bhāskara-rāya, Umānandanātha having been his direct pupil, while Ramesvara was his pupil's pupil.

Later on, another scholar named Lakshmana Ranade thought that both the writers mentioned above failed to grasp the true meaning of the Sūtra and wrote in 1888 A.D. a commentary of his own. In this work he quotes a passage from Tripurārahasya showing the origin of the Parasurāma-Kalpa-Sūtra. It runs as follows:

[नारदं प्रति सुमेधोक्तिः]

आदौ श्रीदत्तगुरुणा शिष्याणां हितकाम्यया ।
स्वनाम्ना सहिता चक्रे त्रिपुरोपास्तिपद्धतिः ॥ १ ॥
अष्टादशसहस्राणि ग्रन्थतोऽभूच्च संहिता ।
अधीत्य तां जामदग्न्यः विस्तृतां सागरोपमाम् ॥ २ ॥
गम्भीरगूढतात्पर्यां मन्दानां तत्र वै गतिम् ।
मत्वा सुदुर्लभां भूयः संक्षिप्य विशदाशयम् ॥ ३ ॥
निर्ममे सूत्रजालं वै पञ्चाशत्खण्डमण्डितम् ।
तद्गुरोर्यज्जामदग्न्यादधीतं सूत्रमण्डलम् ॥ ४ ॥
अधीत्य संहितां चापि तत्पश्चाद्गुरुनामतः ।
सूत्रजाले संहितायाः प्रतिबिम्बात्मकेऽभवत् ॥ ५ ॥
ग्रन्थतः षट्सहस्रं तु सूत्रं तदपि संस्थितम् ।
संहितार्थस्य संक्षेपात्मकं सूत्रमुदाहृतम् ॥ ६ ॥
संहितासूत्रयोः सारं संगृहीतं मया मुने ।
तद्दत्तरामसंवादात्मकमेव पुरा कृतम् ॥ ७ ॥

Lakshmana himself paraphrases this passage with a few additions of his own in the following terms.

"In the Upāsanā-Kānda of the Veda the Upāsanā or the contemplative worship is treated of in all its details. These details were compiled by Siva in six classes of works known as Āgama, Rahasya, Samhitā, Yāmala, Arnava and Tantra, each class being devoted to a distinct Devata or form of the Supreme. Bhārgava Rāma, son of Jamadagni, saw them too vast and asked his revered master, Blessed Dattātreya who combined the Trinity in Himself, to abridge the system. Accordingly, seeing that the Upāsanā of Tripurā was the highest of all forms of worship and that its effect included the effects of all other forms of worship, composed Datta-Samhitā comprising eighteen thousand verses, in which the worship of Tripurā was laid down in all its details in a succinct form. From Him Bhārgava Rāma learnt the Samhitā. But, finding that it was still too vast in extent and that its meaning was still too deep for the average devotee to understand, Rāma abridged the system still further and presented it in an intelligible form. This abridgment contained six thousand Sūtras in fifty *Khāndas* or sections. Rāma's pupil, again, Sumedha of the Harita family who studied this Sūtra from his master, found the work almost as vast as Datta-Samhitā, and so made an abridgment of the Samhitā and Sūtrā, in the shape of another work of Sūtras, taking the form of a dialogue between Datta and Rāma. It is this abridgment that has come down to us as the Parasurāma-Kalpa-Sūtra comprising ten Khandas. Though the work is not apparently in the form of a dialogue, still, it may be inferred from the concluding passage of the work that it is a dialogue between the master and his pupil."

Lakshmana then proceeds to show the necessity for his own work:

"Finding this Sūtra too deep in its meaning for ordinary students to understand, Umānandanātha, a disciple of the

Blessed Bhāskararāya, composed in 1775 A.D. the work *Nityotsava* laying down clearly and methodically the system of worship taught in the Sūtra. A later scholar, Rāmesvara Sāstri, a disciple of a disciple (*prasishya*) of Sri Bhāskararāya, thought that Nityotsava failed to represent the Sūtra's true meaning and wrote in 1831 A.D. a succinct gloss (*Vritti*) of the Sūtra, by name Saubhāgya-sudhodaya. This latter work too failing to bring out the true meaning of the Sūtra, I proceed to write this commentary, *Sūtra-tattva-vimarsinī*, to explain the true meaning of the Sūtra."

Of course these commentators try to show, by applying exegetic rules to the interpretation of the texts, that their own conclusions are correct. It is, however, of little practical use to enter into the merits of these contentions, especially in these matters of transcendental nature, in which tradition, as handed down from masters to pupils, should govern the actual practice. The same texts may be easily interpreted so as to support conflicting views.

A. MAHADEVA SASTRI

विषयसूचिका

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
प्रथमः खण्डः—दीक्षाविधिः		
वृत्तिभूमिका		१
दीक्षाधिकारः	१	२
तन्त्राप्रामाण्यशङ्कानिरासः		३
सर्वतन्त्राणां वेदबाह्यत्वशङ्कानिरासः		७
शुद्धचित्तस्यैव सुन्दरीविद्याऽधिकारः		१२
भक्तिस्वरूपम्		१२
उपासनस्य भक्तिसाधनत्वम्		१३
उपासनाधिकारस्य स्वान्तःकरणैकवेद्यत्वम्		१५
कल्पसूत्रस्य वैदिकैर्व्याख्येयत्वम्		१५
तन्त्रानुष्ठानस्य कलिवर्ज्यत्वशङ्कानिरासः		१६
दीक्षायाः प्रथमसोपानत्वम्		१७
त्रैपुरसिद्धान्तस्य परमशिवकर्तृकत्वम्	२	१८
वेदस्य पौरुषेयत्वसमर्थनम्		१९
तन्त्रप्रणयने प्रयोजनविशेषः		२०
त्रैपुरसिद्धान्तप्रतिपादनम्	३	२१
षट्त्रिंशत्तत्त्वानि	४	२२
तत्त्वसङ्ख्यानिर्णयः		२६
जीवेश्वरस्वरूपम्	५	२८
पुरुषार्थस्वरूपम्	६	२९
मन्त्रगुणवर्णनम्	७	३०

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
सप्तकोटिमहामन्त्राः शिववक्त्राद्विनिर्गताः	८	३०
मन्त्रसिद्धौ सहकारिकारणानि	९	३१
जपरूपोपास्तिफलम्		३३
अर्चनरूपोपास्तिविधिः	१२	३३
उपासकधर्माः—भावनादार्ढ्यम्	१३	३४
सर्वदर्शनानिन्दा	१४	३५
कस्याप्यगणनम्	१५	३५
सच्छिद्रे रहस्यकथनम्	१६	३६
सदा विद्यानुसंधानम्	१७	३६
सततं शिवतासमावेशः	१८	३७
कामादीनां वर्जनम्	१९	३८
एकगुरूपास्तिः	२०	३८
एकगुरूपास्तिविध्यर्थविचारः		३८
सर्वत्र निष्परिग्रहता	२१	४२
फलत्यागपूर्वककर्म	२२	४३
नित्यकर्मालोपः	२३	४४
सर्वत्र निर्भयता	२५	४५
सर्वसारभूतो धर्मः स्वस्य शिवाग्नौ होमः	२६	४५
भावनाफलं आत्मलाभः	२७	४७
सिद्धान्तोपसंहारः	२९	४८
एषा विद्या अतिगुप्ता	३०	४८
दीक्षाविधिः	३१	४९
दीक्षास्वरूपतत्फलनिरूपणम्		५०
दीक्षासंकल्पप्रकारविचारः		५२
तान्त्रिकसंकल्पाङ्गभूतः अष्टाङ्गोल्लेखः		५३
तन्त्रान्तरोपसंहारविचारः		५६
दीक्षात्रयम्	३२	६०
शांभवी दीक्षा	३५	६५
शाक्ती दीक्षा	३६	६५

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
मान्त्री दीक्षा	३७	६६
मातृकायन्त्रम्	३८	६८
शिष्यनामनिर्देशः	४०	७४
गुरुपादुकामन्त्रदानम्	४१	७५
आचारानुशासनादि	४२	७५
शिष्यस्य अशेषमन्त्राधिकारित्वम्	४३	७६

द्वितीयः खण्डः—गणनायकपद्धतिः

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
गणनायकोपास्तिविधिः	१	७७
प्रातःकृत्यं ध्यानादि तर्पणान्तम्	२	७८
यागगृहप्रवेशादि विघ्नेश्वरध्यानान्तम्	४	८३
निबन्धोक्तनिर्मूलधर्मप्रदर्शनम्		८३
संकल्पावश्यकता		८५
आयुधस्थाननियमः		८७
अर्घ्यस्थापनम्	५	८८
अर्घ्यसंस्कारः	६	९०
पीठशक्ति-धर्माद्यष्टक-महागणपति-पञ्चावरण-पूजाविधिः	७	९१
पञ्चावरणीपूजा	८	९२
गणनाथस्य पुनरुपतर्पणादिः	९	९३
गणपत्युद्वासनम्	१०	९५

तृतीयः खण्डः—श्रीक्रमः

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
ललिताधिकारः	१	९७
गणनायकोपास्तेः प्रधानकर्मत्वम्		९७
ललितानामनिर्वचनम्		९९
ब्राह्ममुहूर्तकर्तव्यध्यानादि	२	१००
स्नानसन्ध्याकर्म	४	१०१

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
यागमन्दिरप्रवेशादि	६	१०४
सर्वमन्त्रेषु त्रितारीसंयोगविधिः	८	१०५
श्रीचक्रस्वरूपं तत्साधनद्रव्यं च	९	१०६
श्रीचक्रे द्वाररहितचतुरश्रत्रयलेखनसमर्थनम्		१०६
श्रीचक्रे पञ्चवृत्तलेखनसमर्थनम्		१०८
मन्दिरार्चनम्	१०	११२
दीपदानं चक्राभ्यर्चनं च	११	११४
आत्मशुद्धिहेतु शोषणादि	१२	११५
प्राणायामः	१३	११६
विघ्नकरभूतोत्सारणं, वज्रकवचन्यासश्च	१४	११६
करशुद्धिन्यासः	१५	११६
आत्मरक्षान्यासः	१६	११७
चतुरासनन्यासः	१७	११७
बालाषडङ्गन्यासः	१९	११९
वशिन्यादियोगिनीन्यासः	२०	११९
मूलमन्त्रन्यासः	२१	१२१
पात्रासादनं, सामान्यार्घ्यविधानम्	२२	१२१
विशेषार्घ्यविधिः (अर्घ्यशोधनम्)	२३	१२३
द्विपात्रविधेः मुख्यत्वसमर्थनम्		१३०
कुलद्रव्यस्वीकारविधिसमर्थनम्		१४१
दक्षिणवामाचारविवेकः		१५२
अजितेन्द्रियस्य कौलमार्गे अनधिकारः		१५२

चतुर्थः खण्डः—ललिताक्रमः

श्रीचक्रे परचित्यावाहनम्	१	१५४
चतुष्षष्ट्युपचारविधिः	४	१५८
नवमुद्राप्रदर्शनम्	६	१६४
त्रिधा संतर्पणम्	७	१६४
षडङ्गपूजनम्	८	१६६

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
नित्यापूजनम्	९	१६८
ओघत्रयपूजनम्	१०	१७२

पञ्चमः खण्डः—ललितानवावरणपूजा

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
प्रथमावरणव्यष्टिपूजा	१	१७३
प्रथमावरणसमष्टिपूजा	२	१७८
द्वितीयावरणपूजा	४	१८०
तृतीयावरणपूजा	५	१८१
चतुर्थावरणपूजा	६	१८२
पञ्चमावरणपूजा	७	१८२
षष्ठावरणपूजा	८	१८३
सप्तमावरणपूजा	९	१८३
आयुधपूजा	१०	१८४
अष्टमावरणपूजा	११	१८९
कामेश्वर्यादीनां मूलदेव्यभिन्नत्वम्	१२	१९०
नवमावरणपूजा	१४	१९१
धूपादिदानम्	१५	१९२
त्रिखण्डादिमुद्राणां स्वरूपम्		१९३
कामकलाध्यानम्	१६	१९७
बलिदानम्	१८	१९९
प्रदक्षिणादि	२०	२००
शक्तिपूजा	२१	२०२
हविश्शेषप्रतिपत्तिः	२२	२०३
देवीविसर्जनम्	२३	२१५

षष्ठः खण्डः—श्यामाक्रमः

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
श्यामोपास्तिविधिः	१	२१६
पराशक्तेः स्वरूपं उपास्यत्वं च		२१६

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
श्यामाया उपास्यतोपपत्तिः	२	२२०
प्रातःकृत्यं सन्ध्याऽन्तम्	३	२२१
यागगृहप्रवेशादि प्राणायामान्तं कृत्यम्	६	२२३
षडङ्गादिन्यासपञ्चकम्	११	२२५
मन्दिरार्चनम्	१४	२२६
श्यामाक्रममन्त्रेषु बीजविशेषयोगः	१५	२२७
कर्तृगुणविशेषविधिः	१६	२२८
श्यामाचक्रलेखनप्रकारः	१७	२२८
सामान्यार्घ्यविधिः	१८	२२८
विशेषार्घ्यविधिः	१९	२३०
चक्रदेवीपूजा	२०	२३२
आवरणपूजा	२१	२३३
आवरणबहिर्भूतदेवतायजनम्	३०	२३६
श्यामाविद्याऽऽचार्यपूजा	३१	२३७
गुरुपादुकापूजा	३२	२३७
देव्याः पुनःपूजा	३३	२३७
बलिदानम्	३४	२३८
सुवासिनीपूजादि	३६	२३९
श्यामापूजाऽवधिः	३७	२३९
श्यामामनुजापिधर्माः	३८	२४०
ललितोपासकधर्माः	३९	२४०

सप्तमः खण्डः—वाराहीक्रमः

कोलमुखीवरिवस्याविधिः	१	२४२
महारात्रे अनाहतध्वनेरनुसन्धानम्	२	२४३
शिवादिगुरुनमस्कारः	३	२४३
वाराहीक्रममन्त्रेषु बीजविशेषयोगः	४	२४३
भूतशुद्धिः	५	२४४
एकचत्वारिंशत्स्थानेषु द्वितारीन्यासः	७	२४४

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
अङ्गुलिन्यासः	८	२४५
षडङ्गन्यासः	९	२४६
आत्मालंकरणम्	१०	२४६
अर्घ्यशोधनम्	११	२४६
अनन्तरकर्तव्यन्यासाः	१२	२४७
मूलमन्त्रस्य एकपञ्चाशत्पदवत्त्वनिरूपणम्		२४९
देवीध्यानम्	१४	२५२
चक्रनिर्माणप्रकारः	१५	२५२
चक्रपूजा	१६	२५२
मूर्तिकल्पनम्	२०	२५४
आवाहनादिमुद्राबन्धनम्	२१	२५५
देव्यङ्गन्यासः	२२	२५६
षोडशोपचारार्पणम्	२३	२५६
देवीध्यानम्	२४	२५६
देवीतर्पणम्	२५	२५६
आवरणपूजा	२६	२५७
देव्याः पुनःपूजा	३३	२६०
बलिदानप्रकारः	३४	२६१
गुरुसंतोषणम्	३५	२६२
शक्तिवटुकपूजा	३६	२६२
मन्त्रसाधनम्	३७	२६३
पुरश्चरणप्रकारः		२६३
मन्त्रसिद्धिचिह्नानि		२७०
शुभाशुभस्वप्नाः		२७२
अशुभस्वप्नशान्तिः		२७३
मनुजापिशयनधर्माः		२७४
हविष्यपदार्थगणनम्		२७५
जपकालिकनैमित्तिकक्रियाः		२७६
एतद्धर्माणां श्रीविद्यापुरश्चरणेऽपि ग्राह्यत्वम्		२७६

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
कादिहादिभेदेन श्रीविद्योपास्तिभेदः		२७७
पञ्चदश्यादिविद्यासु मन्त्रशोधनानपेक्षा		२७८
पूजाशेषकृत्यम्		२७८

अष्टमः खण्डः—परा-क्रमः

पराया उपास्यत्वम्	१	२७९
परापद्धतिप्रारंभः	३	२८०
उषःकृत्यम्	४	२८०
स्नानादिकृत्यम्	५	२८०
आसनविधिः	६	२८१
देशिकयजनम्	७	२८२
विघ्नोत्सारणम्	८	२८२
अङ्गन्यासः	९	२८२
चिदग्नौ सर्वतत्त्वविलापनम्	१०	२८३
अर्घ्यसादनम्	११	२८३
परामन्त्रेषु योजनीयो बीजविशेषः	१३	२८४
षडङ्गन्यासविशेषः	१४	२८४
षडङ्गदेवीपूजा	१५	२८४
सुधादेवीपूजा	१६	२८४
तत्त्वकदम्बस्य हृत्पद्मानयनम्	१७	२८५
पराचक्रनिर्माणम्	१८	२८५
देव्या आवाहनम्	१९	२८६
देवीध्यानम्	२०	२८६
देवीपूजा	२१	२८६
देव्यामखिलतत्त्वहोमभावनम्	२२	२८७
गुरवे अर्घ्यनिवेदनम्	२३	२८७
चिदग्नेरुद्दीपनम्	२४	२८८
ओघत्रयाभ्यर्चनम्	२५	२८८

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
बलिनिवेदनम्	२७	२८८
हविश्शेषस्वीकारः	२८	२८९

नवमः खण्डः—होमविधिः

होमाधिकारः	१	२८९
कुण्डस्थण्डिलनिर्माणम्	२	२९०
सामान्योदकेनावोक्षणम्	३	२९०
रेखासु ब्रह्मादिदेवतार्चनम्	४	२९०
कुण्डाभ्यर्चनम्	६	२९१
अग्निचक्रनिर्माणादि	७	२९१
वागीश्वरीवागीश्वरपूजा	८	२९२
संविदग्निपातनम्	९	२९२
इन्धनैराच्छादनम्	१०	२९३
उपस्थानम्	११	२९३
उत्थापनम्	१२	२९३
प्रज्वालनम्	१३	२९४
अग्नेः पुंसवनादिसंस्कारः	१४	२९४
परिषेचनादि	१५	२९४
अग्निध्यानम्	१६	२९५
अग्निचक्रे देवतास्थापनम्	१७	२९५
सप्तजिह्वाहोमः	१८	२९६
अग्नेराहुतित्रयम्	१९	२९६
इष्टदेवताऽऽवाहनादि	२०	२९६
चक्रदेवीनामाहुतयः	२१	२९७
प्रधानदेवताऽऽहुतयः	२२	२९७
काम्यहोमविधिः	२३	२९७
बलिदानम्	२५	३००
महाव्याहृतिहोमः	२६	३००
ब्रह्मार्पणाहुतिः	२७	३००

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
अग्निदेवतयोरुद्वासनम्	२८	३०१
भस्मधारणम्	२९	३०१

दशमः खण्डः—सर्वसाधारणक्रमः

सामान्यक्रमाधिकारः	१	३०१
श्यामाङ्गानां केषांचिदतिदेशः	२	३०२
सर्वसाधारणन्यासः	३	३०२
चक्रनिर्माणम्	४	३०३
षडावरणीपूजा	५	३०३
सर्वमन्त्रयोज्यबीजानि	६	३०३
आवाहनादिमन्त्राः	७	३०३
रश्मिमालाविनियोगः	८	३०४
गायत्र्यादि प्रथमं रश्मिपञ्चकम्	१०	३०५
चाक्षुष्मतीविद्याऽऽदि द्वितीयं रश्मिपञ्चकम्	११	३०६
महागणपतिविद्याऽऽदि तृतीयं रश्मिपञ्चकम्	१७	३०८
शिवादिविद्याऽऽदि चतुर्थं रश्मिपञ्चकम्	२३	३१०
अङ्गोपाङ्गप्रत्यङ्गपादुकायुक्ता श्रीविद्या	२९	३१२
अङ्गादियुक्ता श्यामाविद्या	३५	३१५
अङ्गादियुक्ता वाराहीविद्या	४१	३१७
श्रीपूर्तिविद्या	४७	३१९
महापादुका	४८	३२०
रश्मिमालाध्यातृप्रशंसा	५०	३२१
जपविघ्ननिवारकमन्त्राः	५१	३२१
ललिताऽऽदिजपकालाः	५५	३२२
श्रीनित्यपूजायां मपञ्चकप्रतिनिधिग्रहणे हेतवः	५६	३२३
सर्वभूताविरोधादयः उपासकधर्माः	५७	३२४
आदिमस्वीकारे ग्राह्याग्राह्यद्रव्यविवेकः	६१	३२७
आदिमप्रतिनिधिः		३२८
द्वितीयतृतीयसंपादनप्रकारः	६३	३२९

विषयः	सूत्रसङ्ख्या	पुटसङ्ख्या
द्वितीयप्रकृतिः		३२९
तृतीयप्रकृतिः		३३०
चतुर्थद्रव्यम्		३३१
प्रथमादीनां मण्डलादन्यत्र ग्रहणप्रकारः		३३१
पञ्चमप्रकारः		३३२
अवशिष्टकुलाचारधर्माः	६४	३३३
पञ्चपर्वसु नैमित्तिकी पूजा	६७	३३५
आरम्भादयः सप्तोल्लासाः	६८	३३६
अवशिष्टा उपासकधर्माः	६९	३३८
तन्त्रान्तरात् ग्राह्यधर्मपरिगणनम्		३४२
अन्त्येष्टिविधिः		३४४
कौलश्राद्धविधिः		३४८
अन्त्येष्टिकौलश्राद्धयोरावश्यकत्वम्		३५१
प्रायश्चित्तविधिः		३५१
कुलमार्गनिष्ठप्रशंसा	८२	३६३
अध्येतृप्रशंसा	८३	३६४
खण्डादिपरिपठनम्	८४	३६५
ग्रन्थकर्तृप्रशंसा	८५	३६६
व्याख्यानरचनकालः		३६६
अनुबन्धः—परशुरामकल्पसूत्रपरिशिष्टम्		३६९
व्याख्यानोदाहृतग्रन्थग्रन्थकर्तृसूची		३८७

शुद्धाशुद्धपत्रिका

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९६	४	श्यादि	श्र्यादि
११८	१०	न मो न्तो	न मोऽन्तो
१२१	२०	प्रुड्भिः	प्रुड्भिः
१४४	६	आसवमेव तेन ।	आसवमेव । तेन
१६६	११	इति वाक्ये—	इति—वाक्ये
,,	१६	७	८
१६७	२४	यार्म	योर्म
१६९	२३	(अं) च्कौं	च्कौं
१७१	१४	अं च्कौ	च्कौ
१९१	५	हसौं	हसौः
२००	१०	वल्यो	वलयो
२३३	१९	सूत्र	सूत्रं
२९३	२	एतान्	एवामात

ॐ

श्रीमहात्रिपुरसुन्दर्यै नमः

परशुरामकल्पसूत्रम्

रामेश्वरकृतवृत्तिसहितम्

प्रथमः खण्डः—दीक्षाविधिः

वृत्तिभूमिका

श्रीवल्लभापयोधरसंलिप्तालेपरञ्जितोरस्कम् ।
वन्दे गजेन्द्रवदनं बालसहस्रांशुकोटिसच्छायम् ॥
या परशिवे स्फुरत्ता पूर्णाऽहन्तापदेन संश्लिष्टा ।
द्वैतं भावं प्राप्ता पश्चादम्बां परामिमां कलये ॥
या पञ्चप्रेतसंस्था परशिवनिलया शक्तयः कामबुद्धि-
कर्माद्या यन्मयूखाः समुदयपरिरक्षाऽन्तकर्त्र्यो बभूवुः ।
या पश्यन्त्यादिरूपा सकलजनवचोजालमाविष्करोति
सा मे वाग्देवतेयं विलसतु वदने चित्तमालिन्यहन्त्री ॥
श्रीमद्यशोवदम्बाभासुरवामाङ्कमज्ञताऽद्रिपविम् ।
मम विधिसुषिरसरोरुहकल्पितनिलयं नमामि नाथेन्द्रम् ॥
यो भृगुवंशे भूत्वा क्षत्रं जघ्ने त्रिसप्तकृत्वस्तम् ।
षष्ठं श्रीमद्विष्णोरवतारं नौमि वीरेन्द्रम् ॥

सुब्रह्मण्यं च पितरं गुरुवाम्बां च मातरम् ।
प्रणमामि फलावाप्त्यै तावेव शरणं मम ॥
विचार्य नानातन्त्रादीन् मीमांसान्यायविस्तरम् ।
नानादेशसमानीतपुस्तकैः परिशोध्य च ॥
जामदग्न्येन रचितं कल्पसूत्रं यथामति ।
विस्तारयति गूढार्थं श्रीविद्योपास्तिसिद्धये ॥
रामेश्वरः श्रीललिताप्रेरितः काश्यपोद्भवः ॥

दीक्षाऽधिकारः

इह खलु श्रीभगवान् श्रीपरशुरामः आधुनिकेषु मन्दमतिषु कृपालुः श्रीशिवनिर्मितान्यसंख्यानि तन्त्राणि पर्यालोड्य सर्वाण्युपसंहृत्य तुरीयपुरुषार्थसाधनं लघुमध्वानं दर्शयन् प्रतिजानीते—

अथातो दीक्षां व्याख्यास्यामः ॥ १ ॥

अत्र अथशब्दः मङ्गळद्योतकः,

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गळिकावुभौ ॥

इति स्मरणात् । अतः शब्दश्च आनन्तर्यद्योतकः । आनन्तर्यस्यावध्यपेक्षायां समीपवर्तित्वात् मङ्गळाचरणं नानातन्त्रपरिशोधनं वा अवधित्वेन अन्वेति । यद्वा— 'अथातः' इति मिलित्वा आरम्भद्योतकः, "अथातो दर्शपूर्णमासौ व्याख्यास्यामः" इत्यापस्तम्बसूत्रभाष्ये "अथातश्शब्दोऽयं प्रकरणारम्भे प्रायः प्रयुज्यते वृद्धैः । क्वचिदानन्तर्येऽपि, यथा—'इमे भृगवो व्याख्याताः अथातोङ्गिरसाम्' इत्यादौ । तथा न पुनरिहानन्तर्यमर्थः, पूर्वप्रवृत्तस्य कस्य चिदनन्तरस्यानुपलंभात्" इति लेखात् । दीक्षापदार्थं सूत्रकारोऽग्रे विवेचयिष्यति । व्याख्या पदार्थश्च निगूढाभिप्रायकशब्दस्य विविच्य कथनम् । प्रकृते गूढार्थानां तन्त्राणां उपसंहारेण विविच्य कथनं कल्पसूत्रे इति लक्षणसमन्वयः । दीक्षाविषयज्ञानानुकूलशब्द-

प्रयोगकर्ताऽहमिति फलितोऽर्थः । व्याख्यास्यामः इति बहुवचनं उपासनाप्रवर्तकाचार्यानन्यानपि संग्रहीतुम् । यथा लोके गुरुतरकार्यनिर्माणे "वयं कुर्मः" इत्यन्येऽपि संगृह्यन्ते तथा । एतेन दीक्षाव्याख्यानं अतिकठिनमिति सूचितम् । यद्वा—"अस्मदो द्वयोश्च" एकत्वे द्वित्वे च विवक्षिते अस्मदो बहुवचनं स्यादिति तदर्थः । तथा च अस्मच्छब्दस्य कर्तृवाचकस्य बहुवचनान्तत्वात् तत्समानवचनत्वोपपत्तये व्याख्यास्यामः इति बहुवचनम् ॥

तन्त्राप्रामाण्यशंकानिरासः

ननु कल्पसूत्रव्याख्यानं वैदिकानामयुक्तं, तस्य तन्त्रेषु परिगणितत्वेन, तन्त्राणां केवललोभैकमूलत्वेनाप्रामाण्यात् । तदुक्तं वार्तिके भट्टपादैः—

"लोभादिकारणं चात्र बह्वेवान्यत् प्रतीयते ।
यस्मिन् सन्निहिते दृष्टे नास्ति मूलान्तरानुमा ॥
शाक्यादयश्च सर्वत्र कुर्वाणा धर्मदेशनाम् ।
हेतुजालविनिर्मुक्तां न कदाचन कुर्वते ॥
न च तैर्वेदमूलत्वमुच्यते गौतमादिवत् ।
हेतवश्चाभिधीयन्ते ये धर्माद् दूरतः स्थिताः ॥
एत एव च ते येषां वाङ्मात्रेणापि नार्चनम् ।
पाषण्डिनोऽपि कर्मस्था हैतुकाश्चैत एव हि ॥

इति ।" "एवं यान्यन्यानि त्रयीविद्भिः न परिगृहीतानि किंचित्तन्मिश्रकञ्चुकच्छायापतितानि लोकोपसंग्रहलाभपूजाख्यातिप्रयोजनपराणि त्रयीविपरीतासंबद्धदृष्टलोभादिप्रत्यक्षानुमानोपमानार्थापत्तियुक्तिमूलोपनिबद्धानि सांख्ययोगपाञ्चरात्रशाक्यग्रन्थपरिगृहीतधर्माधर्मनिबन्धनानि विषचिकित्सावशीकरणोच्चाटनोन्मादनादिसमर्थनानि कादाचित्कसिद्धिदर्शनबलेन अहिंसासत्यवचनदमदानदयाऽऽदि श्रुतिस्मृतिसंवादिस्तोकार्थगन्धवासितजीविकाप्रायार्थान्तरोपदेशीनि, यानि म्लेच्छाचारमिश्रकभोजनाचरणनिबन्धनानि, तेषामेवैतच्छ्रुतिविरोधहेतुदर्शनाभ्यामनपेक्षणीयत्वं प्रतिपाद्यते" इति च ग्रन्थेन । एवं श्रीसूतसंहितायां ब्रह्मगीताद्वितीयाध्यायेऽपि—

वेदमार्गमिमं मुक्त्वा मार्गमन्यं समाश्रितः ।
हस्तस्थं पायसं त्यक्त्वा लिहेत् कूर्परमात्मनः ॥
विना वेदेन जन्तूनां मुक्तिर्मार्गान्तरेण चेत् ।
तमस्यपि विनाऽऽलोकं ते पश्यन्ति घटादिकम् ॥
तस्माद्वेदोदितो ह्यर्थः सत्यं सत्यं मयोदितम् ।
अन्येन वेदितो ह्यर्थः न सत्यः परमार्थतः ॥ इति ॥
तत्र तत्रैव तर्कांश्च प्रवदन्ति यथाबलम् ।
सर्वे वादाः श्रुतिस्मृत्योर्विरुद्धा इति मे मतिः ॥ इति ॥

यज्ञवैभवखण्डे एकचत्वारिंशेऽध्याये—

बहुनाऽत्र किमुक्तेन श्रुतिस्मृत्युदितं विना ।
यत्किंचिदपि कुर्वाणः पातकी स्यान्न संशयः ॥

इति वैदिकान्यमार्गनिन्दा श्रूयते । अग्निपुराणेऽपि वेदराशिना साकं नारकिणां संवादे—

तन्त्रदीक्षामनुप्राप्ताः लोभोपहतचेतसा ।
त्यक्त्वा वैदिकमध्वानं तेन दह्यामहे वयम् ॥ इति ॥

पद्मपुराणे पुष्करमाहात्म्ये—

ये च पाषण्डिनो लोके तान्त्रिका नास्तिकाश्च ये ।
तैर्दुष्प्रापमिदं तीर्थम् . . . . ॥

इति तान्त्रिकपुरुषनिन्दया तन्त्रस्याश्रद्धेयत्वं स्पष्टम् । एवमन्येष्वपि बहुपुराणेषु तन्त्रनिन्दायाः बहुळमुपलंभात् । मपञ्चकादरविधायकशास्त्रस्य लोभैकमूलत्वं सुस्पष्टम् । वैसर्जनीयवासोग्रहणशास्त्रस्य लोभैकमूलत्वं साधितम् । किमु मपञ्चकसेवकस्य लोभमूलत्वे प्रतिरोधः । तस्मात् इदं शास्त्रं आस्तिकैः न व्याख्येयं इति चेत्—मैवम् । किं भट्टपादानां पुराणानि पाद्मादीनि प्रमाणत्वेन अभिमतानि न वा? यदि प्रमाणत्वेन अभिमतानि तर्हि तेषु तन्त्रप्रामाण्यं बहुशः अधिकारिविशेषविषये श्रूयते । तथा हि सूतसंहितायां ब्रह्मगीताद्वितीयाध्याये—

तथाऽपि स्वप्नदृष्टं हि वस्तु स्वर्गनिवासिनः ।
सूचकं हि भवत्येव जाग्रत्सत्यार्थसिद्धये ॥
तथैव मार्गात् संभ्रान्ता अपि वेदोदितस्य तु ।
अर्थस्य प्राप्तिसिद्ध्यर्था भवन्त्येव न संशयः ॥
तस्माद्वेदेतरा मार्गा नैव त्याज्या निरूपणे ॥ इति ॥

सूतसंहितायां शिवमाहात्म्यखण्डे पञ्चमाध्याये—

पूजा शक्तेः परायास्तु द्विविधा परिकीर्तिता ।
बाह्याभ्यन्तरभेदेन बाह्या च द्विविधा मता ॥
वैदिकी तान्त्रिकी चेति द्विजेन्द्रास्तान्त्रिकी तु सा ।
तान्त्रिकस्यैव नान्यस्य वैदिकी वैदिकस्य हि ॥
इत्थं समस्तदेवानां पूजा विप्रा व्यवस्थिता ॥ इति ॥

एवं सूतसंहितायां मुक्तिखण्डे—

पाञ्चरात्रादितन्त्राणां वेदमूलत्वमास्तिके ।
न हि स्वतन्त्रास्ते तेन भ्रान्तिमूला निरूपणे ॥
तथाऽपि योंऽशो मार्गाणां वेदेन न विरुध्यते ।
सोंऽशः प्रमाणमित्युक्तं केषांचिदधिकारिणाम् ॥ इति,
तान्त्रिकाणामहं देवि लभ्योऽस्मि व्यवधानतः ।
लभ्यो वेदैकनिष्ठानामहमव्यवधानतः ॥ इति च ॥

एवं तत्रैव यज्ञवैभवखण्डे विंशेऽध्याये—

शैवागमोदितो धर्मो द्विधा पूर्वमुदीरितः ।
अधःस्रोतोद्भवस्त्वेक ऊर्ध्वस्रोतोद्भवोऽपरः ॥
अधःस्रोतोद्भवाद्धर्मादूर्ध्वस्रोतोद्भवो वरः ।
कामिकादिप्रभेदेन स भिन्नोऽनेकधा द्विजाः ॥
अधःस्रोतोद्भवो धर्मो बहुधा भेदितस्तथा ।
ऊर्ध्वस्रोतोद्भवाद्धर्मात् स्मार्ता धर्मा महत्तराः ॥ इति,

तत्रैव द्वाविंशेऽध्याये—

तस्मान्मार्गान्तराणां तु प्रामाण्यं वेदवित्तमाः ।
मुक्तेरन्यत्र नात्रैव क्रमेणैवात्र मानता ॥
अतो वेदान्तमार्गस्थो महादेवोऽचिरेण तु ।
मुक्तिं ददाति नान्यत्र स्थितः सोऽपि क्रमेण तु ॥
ददाति परमां मुक्तिं इत्येषा शाश्वती श्रुतिः ॥ इति ॥

तत्रैव—

अतो वेदस्थितो मर्त्यो नान्यमार्गं समाश्रयेत् ।
अतोऽधिकारिभेदेन मार्गा मानं न संशयः ॥

तत्रैवैकस्मिन् परिवृत्ते तत्रत्यश्लोकाः—

ईश्वरस्य स्वरूपे च बन्धहेतौ तथैव च ।
जगतः कारणे मुक्तौ ज्ञानादौ च तथैव च ॥
मार्गाणां ये विरुद्धांशा वेदान्तेन विचक्षणाः ।
तेऽपि मन्दमतीनां च महामोहावृतात्मनाम् ॥
वाञ्छामात्रानुगुण्येन प्रवृत्ता न यथाऽर्थतः ।
दर्शयित्वा तृणं मर्त्यो धावन्तीं गां यथाऽग्रहीत् ॥
दर्शयित्वा तथा क्षुद्रमिष्टं पूर्वं महेश्वरः ।
पश्चात् पाकानुगुण्येन ददाति ज्ञानमुत्तमम् ॥
तस्मादुक्तेन मार्गेण शिवेन कथिता अमी ।
मार्गा मानं न चामानं मृषावादी कथं शिवः ॥ इति ॥

तथा ब्रह्माण्डपुराणे—

स्वमातृजारवद् गोप्या विद्यैषेत्यागमा जगुः ॥

इत्यागमानां प्रमाणत्वेनोपन्यासः । तथा ब्रह्मोत्तरखण्डे प्रदोषमाहात्म्ये प्रदोषपूजा तान्त्रिकसरण्या ब्राह्मणराजपुत्रयोरुपदिष्टा । तेन च फलप्राप्तिरिति इतिहासः सुस्पष्टं प्रतीयते । श्रीमद्भागवते गजेन्द्रस्तुतौ "सर्वागमाम्नायमहार्णवाय" इति । आगमाः पाञ्चरात्रादितन्त्राणि इति श्रीधरस्वामिव्याख्या । तथा ब्रह्मस्तुतौ

रूपं तथैतत्पुरुषर्षभेज्यं श्रेयोऽर्थिभिर्वैदिकतान्त्रिकेण ॥ इति ॥

तथ। एकादशस्कन्धे करभोजनोपदेशे द्वारपूजाविधाने कलिपूजायां च वचनानि यथा—

यजन्ते वेदतन्त्राभ्यां परं जिज्ञासवो नृप ।
नानातन्त्रविधानेन कलावपि तथा शृणु ॥ इति ॥

नानातन्त्रविधानेनेति कलौ तन्त्रमार्गप्राधान्यं दर्शयतीति श्रीधरस्वामिव्याख्यानम् । एवं एकादशस्कन्धे उद्धवोपदेशेऽपि—

वैदिकैस्तान्त्रिकाभिश्च इति मे द्विविधो मखः ॥

इति वैदिकतान्त्रिकभेदेन द्विप्रकारपूजा श्रीभगवतोपदिष्टा सर्वैरुपलभ्यते । श्रीमहाभारते अर्जुनस्तुतौ—

आम्नायागमवेद्याय शुद्धबुद्धाय ते नमः ॥ इति ॥

एवमादीनि तन्त्रप्रामाण्यप्रतिपादकवचनानि सहस्रश उपलभ्यन्ते । ग्रन्थविस्तरभयान्नेह प्रपञ्च्यन्ते । एवं योगमार्गप्रामाण्यव्यवस्थापकानि वचनानि श्रीमन्महाभारते भगवद्गीतासु मोक्षधर्मादौ च असकृच्छ्रूयन्ते । तथा भागवते काशीखण्डादिनिखिलपुराणेषु च पदेपदे उपलभ्यन्ते । एवं सति भट्टपादाः कथं सांख्ययोगतन्त्राणामप्रामाण्यं ब्रूयुः । न वा पुराणानामप्रामाण्यमिति शक्यते वक्तुम्,

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इति विद्यासु परिगणनात्, "यदथर्वाङ्गिरसो ब्राह्मणानीतिहासान् पुराणानि" इति वेदेऽपि पुराणस्य प्रमाणमध्यपरिगणनात् । एवं उक्तवचनकलापैः एवंविधैरन्यैश्च तन्त्राणां सिद्धे प्रामाण्ये अप्रामाण्यं ब्रह्मणाऽपि व्यवस्थापयितुं न शक्यम् ॥

सर्वतन्त्राणां वेदबाह्यत्वशंकानिरासः

ननु भवत्वधिकारिविशेषे वेदभ्रष्टे पुरुषे स्त्रीशूद्राणां संकरेषु च तन्त्राणां प्रामाण्यं, न वैदिके । न च वैदिकातिरिक्ते तन्त्रस्य अधिकारसंकोचकप्रमाणाभाव इति वक्तुं शक्यम् । पूर्वं सूतसंहितावचनस्य "तान्त्रिकस्यैव नान्यस्य वैदिकी वैदिकस्य हि" इति लिखितस्य सत्त्वात् । एवं सूतसंहितायामेव मुक्तिखण्डे—

अत्यन्तगळितानां तु प्राणिनां वेदमार्गतः ।
पाञ्चरात्रादयो मार्गाः कालेनैवोपकारकाः ॥ इति ॥

तत्रैव सूतगीतायाम्—

श्रुतिपथगळितानां मानुषाणां तु तन्त्रं
गुरुगुरुरखिलेशः सर्ववित् प्राह शंभुः ।
श्रुतिपथनिरतानां तत्र नैवास्ति किंचित्
हितकरमिह सर्वं पुष्कलं सत्यमुक्तम् ॥

इति प्रमाणान्तरवचनात् । तस्मात् प्रमाणान्यपि तन्त्राणि वेदमार्गगळितस्यैव न वैदिकस्येति चेत्—

न। यच्च श्रुतिपथगळितानामिति सूतगीतावचनं तत्रत्यं तन्त्रपदं तन्त्रविशेषपरम्। तच्च तन्त्रं शैवागम इति प्रसिद्धम्, दक्षिणदेशे च भाषया जङ्गम इति प्रसिद्धैरनुष्ठितम् । कथमिदमेवेति ज्ञापकमिति चेत्, अस्ति ज्ञापकं पूर्वोक्तवचनसमीप एव—

श्रुतिपथगळितानां सर्वतन्त्रेषु लिङ्गं
कथितमखिलदुःखध्वंसकं तत्र धार्यम् ।
श्रुतिपथनिरतानां तत् सदा नैव धार्यम् ॥ इति ॥

तत्र लिङ्गधारणं शैवागमेन बहुफलसाधनमिति प्रतिपादितम् । तत्संप्रदायानुवर्तिनो लिङ्गं दक्षिणबाहौ गळे वा धारयन्ति इत्याचारोऽप्युपलभ्यते । तथा चास्मिन् वचने "श्रुतिपथगळितानां सर्वतन्त्रेषु" इत्युत्तरं "प्रतिपादितं" इति शेषः । एवं च, यस्मिन् तन्त्रे लिङ्गधारणं प्रतिपादितं तत्तन्त्रं श्रुतिभ्रष्टानामित्यत्र लिङ्गम् । यथा "छागस्य वपाया मेदसः" इति मन्त्रलिङ्गेन पशुशब्दसंकोचः तथा । किंच, श्रीमदध्यात्मरामायणे श्रीलक्ष्मणप्रश्नः—

ब्रह्मक्षत्रादिवर्णानामाश्रमाणां च मोक्षदम् ।
स्त्रीशूद्राणां च राजेन्द्र सुलभं मुक्तिसाधनम् ॥
तव भक्ताय मे भ्रात्रे ब्रूहि लोकोपकारकम् ॥ इति ॥

तदुत्तरं 'श्रीराम उवाच' इत्यारभ्य

दशावरणपूजां वै ह्यागमोक्तां प्रकारयेत् ।
होमं कुर्यात् प्रयत्नेन विधिना तन्त्रकोविदः ।
[1]आगमोक्तेन मार्गेण कुण्डेनागमवित्तमः ॥ इति ॥

एवं ब्राह्मणादीनां वर्णानां ब्रह्मचर्यादीनामाश्रमाणां च मोक्षोपायप्रश्ने आगमोक्त-पूजा कर्तव्येति तदुत्तरं अनन्यगतिकं वैदिकेऽपि तान्त्रिकं यत् प्रतिपादयति तन्मात्सर्यशून्येन तत्त्वबुभुत्सुना त्यक्तुमशक्यम् । न हि चैत्रः कुशलो वा इति प्रश्ने मैत्रः कुशलः इति प्रामाणिकः सन् ब्रूयात् । तस्मात् श्रीरामोत्तरं ब्राह्मणादिविषयम् । न ह्यवैदिको ब्राह्मणः क्षत्रियश्च लोके प्रसिद्धः । न च—ब्राह्मणः क्षत्रियो वा ब्रह्महत्याऽऽदिमहापातकेन पातित्यं गतः वेदमार्गभ्रष्टः—तत्र ब्राह्मणत्वं वेदमार्गगळितत्वं उभयं चास्तीति स एव तन्त्रोदितेष्वधिकारीति वाच्यम्; ब्रह्मक्षत्रादिकल्याणप्रश्ने तदुत्तररूपपूजाविधाने—

स्वगृह्योक्तप्रकारेण द्विजत्वं प्राप्य मानवः ।
प्रातः स्नानं प्रकुर्वीत प्रथमं देहशुद्धये ।
वेदतन्त्रोदितैर्मन्त्रैर्मृल्लेपनविधानतः ॥

इति द्वन्द्वसमासेन एकस्यैव पुरुषस्य वैदिकमन्त्रसहिततान्त्रिकमन्त्राणां स्नानकरणत्वं विधीयते । तथा च वेदबाह्यमुद्दिश्य तन्त्रसामान्यानुष्ठानविधिः इति स्वीकृत्य श्रीरामवाक्यप्रामाण्यनिर्वाहो गीर्वाणगुरूणामप्यशक्य एव । एवं श्रीभागवते एकादश-स्कन्धे उद्धवोपदेशे—

उभाभ्यां वेदतन्त्राभ्यां मह्यं तूभयसिद्धये ॥ इति ॥

उपसंहारे तत्रैव—

एवं क्रियायोगपथैः पुमान् वैदिकतान्त्रिकैः ।
अर्चन्नुभयतस्सिद्धिं मत्तो विन्दत्यभीप्सिताम् ॥ इति ॥

[1] 'अगस्त्योक्तेन' इति क्वचित्.

तस्मात् श्रुतिपथगळितानामिति वचनं जङ्गमादिलिङ्गधारिपरम् । एवं मुक्तिखण्डस्थपूर्वोक्तात्यन्तगळितानामिति वचने "पाञ्चरात्रादयो मार्गाः" इति आदिपदेन शैवागमस्य जङ्गमपरिगृहीतस्य ग्रहणं, न ज्ञानार्णवकल्पसूत्रादीनाम्, तस्मिन् वेदभ्रष्टाधिकारिकत्वस्य कॢप्तत्वेन तेन सहैकवाक्यत्वात् । यच्च शिवमाहात्म्यखण्डे "पूजा शक्तेः परायास्तु" इत्यारभ्य

वैदिकी तान्त्रिकी चेति द्विजेन्द्रास्तान्त्रिकी तु सा ।
तान्त्रिकस्यैव नान्यस्य वैदिकी वैदिकस्य हि ॥

इति वचनं, तस्य अयमभिप्रायः—वैदिकः स्वगृह्योक्तोपनयनादिसंस्कृतः । तान्त्रिकः तन्त्रोदीरितकुण्डमण्टपादिपुरस्सरं दीक्षासंस्कृतः । न तान्त्रिको नाम श्रुतिपथगळितः, तस्य पूर्वमेव निरस्तत्वात् । तथा च अनेन वचनेन उपनयनादिनिमित्ते वैदिकस्नानपूजाऽऽदिनैमित्तिकम् । तन्त्रदीक्षानिमित्ते नैमित्तिकं तान्त्रिकस्नानपूजाऽऽदि विधीयते । यत्रैकं निमित्तं तत्रैकं केवलवैदिके । शूद्रादौ केवलतान्त्रिकम् । यत्र उभयं तत्र उभयानुष्ठाने न किमपि बाधकम् । अस्यैवार्थः स्पष्टीकृतः त्रिपुरार्णवे—

त्रैवर्णिकैर्वैदिकान्ते तान्त्रिकं क्रियतेऽखिलम् ॥ इति ॥

इममेवार्थं संक्षेपेण श्रीरामोऽप्याह—वेदतन्त्रोदितैर्मन्त्रैरिति । तस्मात् सर्वतन्त्रानुष्ठानं वेदबाह्यपरमिति सिद्धान्तो वचनान्तरानवलोकनव्यामोहविलासरूप एव । पाञ्चरात्रादीनां तु श्रुतिपथगळितमुद्दिश्यैव प्रवृत्तिः, तन्नाम गृहीत्वा आहत्य विधानात् । एवमेव कापालमपि—

पाञ्चरात्रे च कापाले तथा कालामुखेऽपि च ।
अधिकारो वैदिकानां नास्ति नास्ति मुनीश्वराः ॥

इत्यगस्त्यसंहितावचनात् । तथा च निर्णीत एवार्थे भट्टपादानामभिप्रायः । अत एव पाञ्चरात्रस्यैव तन्त्रमध्ये पृथक् नाम गृहीतम् । न तु सर्वतन्त्राणां ग्रहणं कृतं, तत्रैव वेदविरुद्धानां स्मृतिविरुद्धानां च धर्माणां भूरिश उपलभ्यमानत्वात् । न हि शाक्यादिवत् शाक्तादितन्त्रेषु वेदविरुद्धमनुष्ठानमीषदप्युपलभ्यते । यानि तु "वेदमार्गमिमं त्यक्त्वा" इत्यादिवचनानि तानि वैदिकस्य वैदिकमार्गं सर्वथा त्यक्त्वा केवलतन्त्रमार्गाश्रयणे तन्निन्दापराणि, मुक्त्वाविनेत्यादिश्रवणात् । यद्वा—

पूर्वं वेदमार्गं विनिन्द्य "तस्माद्वेदोदितो ह्यर्थः सत्यं सत्यं न संशयः" इति सर्वेण निन्दाप्रशंसारूपविशिष्टार्थवादेन मिळित्वा वेदमार्गाचरणं कर्तव्यं इत्येकविधिकल्पने लाघवम् । पूर्वपक्षे निन्दया तान्त्रिककर्मणः समुच्चयः, "तस्माद्वेदोदित" इति स्तुत्या वैदिककर्मणो विधिः कल्प्यः इति गौरवं स्यात् । पूर्वोक्ताग्निपुराणवचनं पाद्मं च तन्त्रविशेषपरं, पूर्वोक्तयुक्तेः । अत एव "तन्त्रेषु दीक्षितः" इत्यादिवचनानि निन्दारूपाणि वैदिकप्रशंसापराणि इति श्रीविद्यारण्यस्वामिभिरपि तत्रैव व्याख्यातम् । एवमेव भट्टपादैः योगस्य निरस्तप्रामाण्यस्यापि विषयान्तरं सुधीभिरूह्यम् । अप्रकृतत्वात् ग्रन्थविस्तरभयान्नेह लिख्यते । भट्टपादोक्त्यपेक्षया पुराणानां तन्त्राणां च प्रामाण्यं वरिष्ठम् । अतो दुर्बलप्रमाणस्य प्रबलप्रमाणानुसारेण संकोचो युक्त एव । अन्यथा तस्मिन्नेव अधिकरणे "अष्टाचत्वारिंशद्वर्षाणि ब्राह्मणो ब्रह्मचर्यं चरेत्" इति स्मृतिः, "जातपुत्रः कृष्णकेशोऽग्नीनादधीत" इति श्रुतिः, अनयोर्विरोधः, इत्थम्—नह्यष्टाचत्वारिंशद्वर्षानन्तरं विवाहे जातपुत्रः कृष्णकेशश्च पुरुषः प्रसिद्धोऽग्न्याधानाधिकारी । अतो द्वयोर्विरोधे प्रबलश्रुत्यनुसारेण स्मृतिस्थब्राह्मणपदं अन्धादिपरम् । तस्याग्निमश्रौतकर्मानधिकारित्वेन श्रुत्यविरोध इति तैरेव प्रतिपादितो ग्रन्थो विरुध्येत । तस्माद्वैदिकानां शाक्तगाणेशादितन्त्रप्रतिपादितकर्मस्वधिकार इति भट्टपादानामस्त्यभिप्राय इति पूर्वयुक्तिभिः सिद्धम् । एतेन भट्टोजिदीक्षितलिखिततन्त्रप्रामाण्यखण्डनमपि पराहतं ऊह्यं सूरिभिः । पुराणवचनानामपि व्यवस्थोक्तैव । यच्चोक्तं दृष्टैकप्रयोजनकत्वं मपञ्चकस्वीकारविधायकशास्त्रस्य लोभमूलतया प्रणीतत्वं चेति, तच्च "अग्नीषोमीयं पशुमालभेत" इति, "सुराग्रहा गृह्यन्ते" इत्यत्रापि वेदे तुल्यम् । नहि इदं प्रमाणं इति श्रद्धामुत्सृज्य प्रामाण्यव्यवस्थां कर्तुं ब्रह्मापि समर्थः । अतो वैदिकानां पूर्वसंस्कारवशात् उत्पन्नो 'वेदः प्रमाणं' इति श्रद्धाविशेष एव प्रामाण्यव्यवस्थापकः प्रथमः । ततश्च तदविरुद्धानामेव तन्मूलकतया प्रामाण्यं, तद्विरुद्धं तु वैदिकस्य अप्रमाणमेव । किंच—श्रीसुन्दरीतन्त्राणि तु यथा तैत्तिरीयशाखाशेषभूतानि बोधायनापस्तम्बादिषट्सूत्राणि प्रमाणं तथा सुन्दरीतापिनीपञ्चकभावनाकौळोपनिषच्छेषाणि तद्व्याख्यानरूपाणि न स्वकपोलकल्पितानि । अतोऽपि वेदव्याख्यानरूपत्वान्निःशङ्कं वैदिकैः परिगृहीतव्यानि । मपञ्चकादिसेवनस्य यथा वेदाविरुद्धता तथा उपरिष्टात् वक्ष्यामः ॥

शुद्धचित्तस्यैव सुन्दरीविद्याऽधिकारः

वैदिकैर्ग्राह्यत्वेऽपि न सर्वेषां वैदिकानामत्राधिकारः । यथा ब्रह्मस्वरूपस्य उपनिषद्भागरूपवेदप्रतिपाद्यत्वेऽपि तज्जिज्ञासायां न सर्वेषामधिकारः, किंतु साधनचतुष्टयसंपन्नानां वैदिकानामेवाधिकारः, तथाऽत्र केषां चिदेवाधिकारः । तथा हि ब्राह्मणस्य उपनयनाद्यारभ्य प्रथमभूमिका स्वाध्यायाध्ययनम् । तदनन्तरं "स्थाणुरयं भारहारः किलाभूत्" इति अनर्थज्ञे निन्दां, "योऽर्थज्ञ इत् सकलं भद्रमश्नुते" इत्यर्थज्ञाने फलं च श्रुत्वा अर्थज्ञानसिद्ध्यर्थं काव्यनिगमनिरुक्तव्याकरण-न्यायानधीत्य पूर्वमीमांसाऽऽद्यभ्यस्य वेदार्थं ज्ञात्वा "न ज्ञानमात्रेण कृतार्थतामियात्" इति स्मृत्या अर्थं ज्ञात्वा कर्माननुष्ठातरि निन्दां श्रुत्वा अनुष्ठानभूमिकामारूढो निखिलस्मृतिश्रुत्युदितं कर्म बहुजन्मस्वनुतिष्ठन् तैः कर्मभिः परिशुद्धचित्तः संसारे नात्यन्तमासक्तो नाप्यत्यन्तमनासक्तश्च यदा भवति तदा भक्तिभूमिकाऽऽरोहणयोग्यो भवति । तदुक्तं भागवते—

न निर्विण्णो न चासक्तो भक्तियोगोऽस्य सिद्धिदः ॥ इति ॥

यदा न निर्विण्णः न चासक्तः, भक्तियोगः तदा सिद्धिदः इत्यर्थः । तादृशभक्ति-भूमिकामनारुह्य न कदाऽपि परमपुरुषार्थलाभः । तदुक्तं श्रीमद्भागवते—

अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसी ।
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ इति ॥

भक्तिस्वरूपम्

तत्र भक्तिर्नाम आराध्यत्वप्रकारकज्ञानविशेषोऽनाहार्यः स्वाभाविकः इति नैय्यायिकाः । भक्तिर्नाम भगवद्विषयिणी अन्तःकरणस्य तदाकारतया परिणामात्मिका वृत्तिः । तत्र प्रमाणम्—

या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥

इति भगवद्विषयप्रीतियाच्ञायां प्रह्लादं प्रति श्रीभगवद्वाक्यम्—

भक्तिर्मयि तवास्त्येव भूयोऽप्येवं भविष्यति ॥

इति भक्तिप्राप्तिर्भविष्यतीति वरदानेन स्मृतिर्ममास्त्विति भक्तियाच्ञैवेति ज्ञायते । न हि घटं याचतः पटदानं युक्तम् । तस्मात् अनुस्यूतभगवत्स्मृतिः भक्तिः, सैव निरुपाधिकी प्रीतिरित्यपि व्यवह्रियते इति पौराणिकाः ।

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।

इति श्रीभगवद्वचनमपि अखण्डश्रीभगवत्स्मृतिपरम् । युक्तं चैतत्, श्रीभागवते अस्यैवार्थस्योक्तत्वात् । तथाहि—

देवानां गुणलिङ्गानां आनुश्रविककर्मणाम् ।
सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ।
भक्तिर्भागवती सैव . . . . ॥ इति ॥

गुणाः विषयाः लिङ्ग्यन्ते ज्ञायन्ते यैस्तेषां इन्द्रियाधिष्ठातृदेवानां सत्वमूर्तौ हरावेव या वृत्तिः अनिमित्ता निष्कामा स्वाभाविकी अयत्नसाध्या सा भक्तिरित्यर्थः । अनुश्रवो वेदः तदुदितं कर्म आनुश्रविकं कर्म येषामिति देवविशेषणम् । एतेन भक्तौ प्रयोजकं आनुश्रविकं कर्मेति सूचितम् । अतो भगवदाकारा मनोवृत्तिरेव भक्तिरिति सिद्धम् । एवं—"अथातो भक्तिजिज्ञासा", "सा पराऽनुरक्तिरीश्वरे", इति शाण्डिल्यसूत्रम् ॥

उपासनस्य भक्तिसाधनत्वम्

एतादृशभक्तिभूमिकामारुरुक्षुः तत्साधनीभूतां भगवदुपास्तिं कुर्यात् । उपास्तिर्नाम—भगवदुद्देशेन निष्कामं सर्ववस्तुत्यागः, भगवत्कथाश्रवणं, भगवन्मन्त्रजपः, भगवन्नामस्तोत्रकीर्तनमित्येतदन्यतमम् । एतस्य भक्तिहेतुत्वं श्रीमद्भागवते—

पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम् ।
श्रद्धाऽमृतकथायां मे शश्वन्मदनुकीर्तने ।
परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ।
आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ।
मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ।

इष्टं दत्तं हुतं जप्तं मदर्थं यद् व्रतं कृतम् ।
एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ।
मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥ इति ॥

भक्तिसाधनत्वादेवोपास्तौ श्रीभास्कररायैः सेतुबन्धे—"भक्तिर्द्विविधा, गौणी मुख्या चेति । तत्राद्या सगुणब्रह्मणः ध्यानार्चनजपनामकीर्तनादिरूपा संभवत्समुच्चायिका । परभक्तिस्तु एतज्जन्यानुरागविशेषरूपा" इति कथितम् । एतादृशी भक्तिश्च सगुणब्रह्मण्येव संभवति । एतादृशं सगुणब्रह्म स्वोपासकानुरागानुसारेण रामकृष्णादिनानास्वरूपं लभते । तत्तत्स्वरूपभक्तिसाधनान्येव प्रतिपाद्यन्ते तन्त्रेषु पुराणेषु च । तन्मूलभूताः श्रुतयः उपनिषत्संज्ञकाश्चोपलभ्यन्ते नृसिंहतापिनीरामतापिन्यादिरूपाः, सुन्दरीविषये त्रिपुरोपनिषद्भावनोपनिषदित्यादयः । तत्प्रतिपाद्यपरब्रह्मणः शाब्दनिश्चये जाते सति तदा संसारे नात्यन्तमासक्तिः नाप्यत्यन्तमनासक्तिर्भवति । स च भक्तिसाधनोपास्तावधिकारी । एतादृशाधिकारप्राप्तिश्च भक्तिभूमिकाऽऽरुरुक्षुत्वं च नाल्पपुण्येन, किन्तु अनेककोटिजन्मसाधितसुकृतलभ्यम् । तत्रापि सुन्दरीभक्तिस्ततोऽपि दूरतरा । तदुक्तं ब्रह्माण्डपुराणे—

यस्यान्यदेवतानामकीर्तनं जन्मकोटिषु ।
तस्यैव भवति श्रद्धा श्रीदेवीनामकीर्तने ।
चरमे जन्मनि यथा श्रीविद्योपासको भवेत् ॥ इति ॥

स्थलान्तरेऽपि—

यस्य नो पश्चिमं जन्म यदि वा शंकरः स्वयम् ।
तेनैव लभ्यते विद्या श्रीमत्पञ्चदशाक्षरी ।
मोक्षैकहेतुर्विद्या च श्रीविद्या नात्र संशयः ॥ इति ॥

श्रुतिरपि—

अश्रुतासः श्रुतासश्च । यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्षन्ते । इन्द्रमग्निं च ये विदुः । सिकता इव संयन्ति । रश्मिभिस्समुदीरिताः । अस्माल्लोकादमुष्माच्च । ऋषिभिरदात् पृश्निभिः ॥

इति तैत्तिरीयारण्यके ।

उपासनाधिकारस्य स्वान्तःकरणैकवेद्यत्वम्

एतादृशभक्तिभूमिकाऽधिकारः स्वान्तःकरणैकवेद्यः न परेषां प्रत्यक्षः, न वा दशाविशेषेण वा वयोविशेषेण वा अनुमातुं शक्यः, तेषां व्यभिचारस्य दर्शनात्, प्रह्लादध्रुवादीनां बाल्य एव ईदृशभूमिकाप्राप्तिदर्शनात् । क्वचिद्धेत्वाभासेनानुमितिः १ सा प्रमाऽपि भवितुमर्हति कदाचित् । यथा अगस्त्यसंहितायां विरूपाक्षं प्रति तत्कन्याप्रश्ने ब्राह्मणवाक्यम्—

अयि पुण्यनिधे पुत्रि प्राक्तनैः पुण्यसंचयैः ।
त्रिवर्षाऽपि समारूढा भक्तिभूमिं सुदुर्लभाम् ।
गौरीबीजं जगद्बीजं मत्तः प्राप्नुहि सुव्रते ॥

इत्यनुमित्यैव कन्यकाभूमिज्ञानात् । मन्थानभैरवतन्त्रेऽपि अनुमानं कर्तव्यमिति विधिरस्ति—

एकद्वित्रिचतुःपञ्चवर्षाण्यालोच्य योग्यताम् ।
भक्तियुक्तान् गुणांश्चापि क्रमाद्वर्णे ससंकरे ।
पश्चादुक्तक्रमेणैव वदेद्विद्यामनन्यधीः ॥ इति ॥

तथाऽप्यनुमितेः विसंवादिप्रवृत्तेः कदाचित्संभवात् दीक्षाग्रहणे यः प्रवर्तते सः स्वाधिकारं सम्यग्विचार्यैव प्रवृत्तिं कुर्यात् । अन्यथा अनधिकारी सन् यदि प्रवर्तेत तर्हि शूद्रेण वेदाध्ययने कृते यत्फलं तदेव अस्यापि स्यात्, अनधिकार्यनुष्ठितत्वस्य तुल्यत्वात् । अतोऽधिकारं स्वचेतसा विचार्य निरुक्तभूमिकामारोढुं यो योग्यः स एव ब्राह्मणः क्षत्रियः वैश्यः शूद्रः संकरजातीयः स्त्री यो वा को वा संसारे न निर्विण्णः न चासक्तः जितेन्द्रियः स एव अधिकारी, न श्रुतिपथगळितः अधिकारी इति सिद्धम् ॥

कल्पसूत्रस्य वैदिकैर्व्याख्येयत्वम्

अत एव श्रीशंकरभगवत्पादानां तन्त्रानुसारिप्रपञ्चसारनामकनिबन्धनिर्माणमपि साधु संगच्छते । न च वेदपथगळितोपरि यथा कृपया शिवेन तन्त्राणि निर्मितानि तथा तदुपरि कृपयैव भगवत्पादैः निर्मितमिति वक्तुं शक्यते, नेदं साधकमिति

वाच्यम् । भगवत्पादानां वैदिक एव पक्षपातो न तदन्यस्मिन् । तथाऽसति बुद्धादिशास्त्रानुसार्यपि निबन्धरचनं स्यात् । किं च स्वकृतमानसपूजायाम्—

मन्त्रांस्तान्त्रिकवैदिकान् परिपठन् सानन्दमत्यादरात्
स्नानं ते परिकल्पयामि जननि स्नेहात् त्वमङ्गीकुरु ॥

इति श्लोके तान्त्रिकवैदिकयोः समुच्चयलेखनेन तान्त्रिकत्वं वैदिकत्वमविरुद्धं तदभिप्रेतं सुस्पष्टम् । तस्मात् वैदिकैः इदं व्याख्येयं कल्पसूत्रम् ॥

तन्त्रानुष्ठानस्य कलिवर्ज्यत्वशंकानिरासः

ननु ब्राह्मणानां भवतु तन्त्रे अधिकारः, तथाऽपि न कलियुगे । तदुक्तं ब्राह्मे कलिवर्ज्यगणनावसरे—

मन्त्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ।
महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे ॥

इत्येतेषां कलियुगे वर्ज्यत्वश्रवणात्, पूर्ववचनानि सर्वाणि कृतादिपरत्वेनोपसंहार्याणि । न च निषेधस्य प्राप्तिमुपजीव्यैव प्रवृत्तेः पूर्ववचनैः प्राप्तौ अनेन निषेधे तुल्यबलत्वेन "न तौ पशौ करोति" इति दाशमिकचरमपादन्यायतुल्यत्वेन विकल्प एव किं न स्यात् इति वाच्यम् । यदि निषेधो भवेत् तर्हि विकल्पो भवेत् । नायं निषेधः । किंतु "यजतिषु येयजामहं करोति नानूयाजेषु" इतिवत् । "दीक्षां कुर्वीत मतिमान्" इति वचनं कलौ "मन्त्रदीक्षा न कर्तव्या" इति वचनं तयोरेकवाक्यतायां क्रियमाणायां कलिभिन्ने कर्तव्यमिति पर्युदाससंभवेन विकल्पानवकाशात् इति चेत्—मैवम् । ब्राह्मे भूरिपुस्तकेषु 'मन्त्रदीक्षा च सर्वेषां' इति नोपलभ्यते । अतोऽल्पपुस्तकेषु उपलभ्यमान ईदृशपाठोऽप्रामाणिक एव । यदि च प्रामाणिक इत्याग्रहः तथाऽपि—लैङ्गे

कलावाराधनं शंभोरागमेनैव नान्यथा ॥ इति ॥

श्रीमद्भागवते "कलियुगे तन्त्रेणैव पूजा कर्तव्या" इति वचनं पूर्वत्रैवोदाहृतम्,

कलौ युगे महादेवि ब्राह्मणाद्यैः सुपूजिता ।

इति रहस्यार्णववचनम्, एवं रुद्रयामळादिबहुतन्त्रेषु कलौ कर्तव्यत्वोपलब्धेः—बहुवचनानुसारेण ब्राह्मपुराणस्थवचनं कलावतिसावधानेन इन्द्रियादीन् जित्वा कर्तव्यतां प्रतिपादयति। अत एव ब्राह्मवचनावसाने कलौ न कर्तव्यं इति नोक्तम्। किंतु "इमानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः निवर्तितानि" इति निवृत्तेः फलं लोकोपकार उक्तः। उपकारश्चेत्थम्। यः कश्चन जितेन्द्रियः इमे धर्माः अवश्यं कर्तव्याः इति शास्त्रे भारं निक्षिप्य प्रवृत्तश्चेत् अन्योऽपि रागान्धो रागं पुरस्कृत्य प्रवृत्तश्चेत् पतेदेवेति तदनुग्रहायैव त्यागः। [न] "नैकादश्यां भोजनं कार्यं" इतिवन्निषेधपरः। इममेवार्थं श्रीशिवः तन्त्रेषु प्रकटितवान्—परमानन्दतन्त्रे

> असिधाराव्रतसमो मनोनिग्रहहेतुकः।
> स्थिरचित्तस्य सुलभः सफलस्तूर्णसिद्धिदः।
> अन्यस्य विफलो दुःखहेतुः स्यात् परमेश्वरि॥ इति॥

त्रिपुरार्णवेऽपि

> इतो मद्यमितो मांसं भक्ष्यमुच्चावचं तथा।
> तरुण्यश्चारुवेषाढ्या मदारुणविलोचनाः।
> तत्र संयतचित्तत्वं सर्वथा ह्यतिदुष्करम्।
> भक्तिश्रद्धाविहीनस्य कथं स्यादेतदीश्वरि॥ इति॥

तस्मात् कलियुगेऽपि संयतेन्द्रियाणां दीक्षायां न किमपि बाधकम्॥

दीक्षायाः प्रथमसोपानत्वम्

ननु दीक्षां व्याख्यास्यामः इत्यनुचितं, यस्य व्याख्यानं प्रतिज्ञातं तस्यैवाग्रे कथनीयत्वेन दीक्षाभिन्नानां गणेशश्रीविद्योपास्त्यादीनां बहूनां कथनेन संदर्भविरोधात् इति चेत्—उच्यते। अत्र श्रीललिताभक्तिसाधनीभूतक्रियामात्रं अजहत्स्वार्थवृत्त्या अर्थः। अत्र दीक्षापदोच्चारणं च दीक्षायाः सर्वादित्वज्ञापनार्थम्। एतेन अदीक्षितेन उपास्तिर्न कार्येति तदभिप्रायः। अत एव परमानन्दतन्त्रे

> मुक्तिसौधस्य सोपानं प्रथमं दीक्षणं भवेत्॥ इति॥

अत एव हिरण्यकेशिसूत्रव्याख्याने—"यज्ञं व्याख्यास्यामः" इत्यत्र एतादृशानुपपत्त्यैव यज्ञशब्दे अजहत्स्वार्था वृत्तिरङ्गीकृता वैजयन्तीकृता ॥ १ ॥

त्रैपुरसिद्धान्तस्य परमशिवकर्तृकत्वम्

तत्र दीक्षायां तदङ्गत्वेन त्रैपुरसिद्धान्तं श्रावयेदित्यस्ति। तत्र को नाम त्रैपुरसिद्धान्तः? तस्य कुतः प्रामाण्यं? इत्याकाङ्क्षायां तत्रादौ तादृशसिद्धान्तस्य शिवोदितत्वेन प्रामाण्यं इति वक्तुं भूमिकां रचयति—

भगवान् परमशिवभट्टारकः श्रुत्याद्यष्टादशविद्याः सर्वाणि दर्शनानि लीलया तत्तदवस्थाऽऽपन्नः प्रणीय, संविन्मय्या भगवत्या भैरव्या स्वात्माभिन्नया पृष्टः पञ्चभिः मुखैः पञ्चाम्नायान् परमार्थ[1]सारभूतान् प्रणिनाय ॥ २ ॥

अत्र प्रतिपादितविद्यासु अप्रामाण्यशङ्कास्पर्शोऽपि मा भवतु इत्येतदर्थं भ ग वा निति।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इति स्मृतः॥

इत्येतादृशषड्गुणैश्वर्यसंपन्नो भ ग वा न्। ननु परमशिवः तत्त्वातीतः, तस्य विद्याकर्तृत्वं न संभवति उपाधिशून्यत्वात् इत्यत आह—भ ट्टा र क इति। राजेत्यर्थः, "राजा भट्टारको देवः" इति कोशात्। जगदीश्वरत्वरूपधर्मवान् मायोपाधिकः इति तदर्थः। यद्वा—भट्टारको जगद्रूपनाट्यरञ्जकः, भट्टारकशब्दस्य प्रसन्नराघवनाटके नाट्यरञ्जके, "रे भट्टारक" इति संबोधनात्, "राजा भट्टारकः" इत्यस्य नाट्यवर्गस्थत्वाच्च। तस्य यथा जगत्कर्तृत्वं तथा विद्याकर्तृत्वमपि संभवत्येव। यद्वा—ईश्वरस्य परमशिवस्य पूर्णत्वेन कर्तव्यवस्तुनोऽभावात् कथं विद्याकर्तृत्वं? अत आह—

[1] साररूपान्—ब.

भट्टारक इति । राजेत्यर्थः । यथा राज्ञः स्वस्य अनपेक्षितेऽपि परेषां हिताय कृतिर्दृश्यते तद्वत् । श्रुत्याद्यष्टादशविद्याः—श्रुतिः आदिः यासामिति तद्गुणसंविज्ञानबहुव्रीहिः । तथा च श्रुतयः चत्वारि, तदङ्गानि शिक्षा व्याकरणं कल्पः छन्दः ज्योतिषं निरुक्तं चेति षट्, मीमांसा, न्यायः, पुराणं, धर्मशास्त्रं, इति चतुर्दशविद्याः । आयुर्वेदः, धनुर्वेदः, गान्धर्वं, नीतिशास्त्रं, चेति चतस्रः । एवमष्टादशविद्याः । सर्वाणि दर्शनानि शाक्तदर्शनादीनि । दृश्यते अनेनेति दर्शनं ज्ञानसाधनं शास्त्रमित्यर्थः, शक्तिदर्शनशास्त्रमिति यावत् । एवमेवाग्रेऽपि । शैवदर्शनं वैष्णवदर्शनं ब्राह्मदर्शनं सौरदर्शनं बौद्धदर्शनं चेति षड् (?) दर्शनानि । लीलया अनायासेन तत्तदवस्थाऽऽपन्नः, ईश्वरावस्थाऽऽपन्नो वेदान्, पाणिनिव्यासादिस्वरूपान् गृहीत्वा व्याकरणपुराणादीनि प्रणीय निर्माय ॥

वेदस्य पौरुषेयत्वसमर्थनम्

ननु वेदस्य नित्यत्वेन अपौरुषेयत्वात् ईश्वरनिर्मितत्वं कथम्? न च तस्य नित्यत्वमेव असिद्धमिति शङ्क्यम्; "वाचा विरूपनित्यया" इति श्रुतेरिति चेत्—न । वेदास्तु ईश्वरेण निर्मिताः, "छन्दांसि जज्ञिरे तस्मात्" इति श्रुतेः,

अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् ।
आदिकर्ता[1] शिवः साक्षाच्छूलपाणिर्महेश्वरः ॥

इति स्मृतेः । वेदः पौरुषेयः वाक्यसमूहत्वात् भारतादिवत् इत्यनुमानस्यापि प्रमाणत्वात् । अत एव "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां" इति श्रुतौ ईशानत्वं कर्तृत्वरूपमेव । नच तस्य पौरुषेयत्वे पुरुषदोषाणां भ्रमप्रमादविप्रलिप्साकरणापाटवानां संभवात् अप्रामाण्यशङ्काऽऽस्पदत्वं स्यादिति वाच्यम्; ईश्वरे दोषसाधनानामविद्याऽऽदीनामभावेन दोषासंभवात् । एतेन तन्त्राणामपि नित्यत्वं प्रत्युक्तम् । "वाचा विरूपनित्यया" इत्यत्र नित्यत्वं दोषवत्पुरुषाप्रणीतत्वरूपं गौणं कल्प्यं उक्तप्रमाणकलापानुरोधेन । न च वैपरीत्ये किं विनिगमकं इति वाच्यम्; भूयोऽनुग्रहस्य न्याय्यत्वात् । तस्मात् सर्वा अपि विद्याः पुरुषप्रणीता एव ॥

[1] कविः स्या—अ.

तन्त्रप्रणयने प्रयोजनविशेषः

ननु अष्टादशसु विद्यासु सतीषु पुनराम्नायप्रणयनं व्यर्थं, अत आह— संविन्मय्येति । अयमभिप्रायः—पुरुषार्थः सुखं, तच्च नैसर्गिकं कृत्रिमं चेति । नैसर्गिकं मोक्षरूपम् । कृत्रिमं यस्तृतीयपुरुषार्थः कामः इत्युच्यते । उभयोः साधनं धर्मः । तस्यापि साधनमर्थः । एवं साक्षात् परंपरया वा पुरुषैरभिलषणीया अर्थाश्चत्वारः । तत्र कृत्रिमपुरुषार्थसाधनान्येव अष्टादशविद्याभिः प्राकट्येन प्रतिपादितानि । अकृत्रिमपुरुषार्थो यः तत्साधनं अकृत्रिमं स्पष्टं न प्रतिपादितम् । कृत्रिमोपदेशश्चाकिंचित्करो लोकानामिति जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुराम्नायविद्यां प्रणिनाय । यद्वा—निखिलवेदार्थानभिज्ञानां तत्रानधिकारिणां च मुक्त्युपायं निखिलवेदसारामाम्नायविद्यां प्रणिनाय । तत्रापि संवित् अपरिच्छिन्नं चैतन्यं, प्रकाश इति यावत्, तन्मय्या तदभिन्नया । एतेन विमर्शांशेन स्वात्मानं पृच्छतीत्यर्थः सिद्धः । तदुक्तं रत्नत्रयपरीक्षायामप्पयदीक्षितैः—

नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकं
धर्मो धर्मीति भेदद्वयमिति च पृथग्भूय मायावशेन ।
धर्मस्तत्रानुभूतिस्सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छाऽऽदिरूपा भवति गुणगणश्चाश्रयस्त्वेक एव ॥ इति ॥

ननु जीवानां अस्मदादीनामपि संविन्मयत्वं अस्त्येवेति श्रीभैरव्या जीवेभ्यः को विशेषः इत्यतः आह भगवत्येति विशेषणम् । भगवच्छब्दार्थश्च व्याख्यातः पूर्वम् । तथा च जीवादिवदाणवादिमलैरावृतज्ञाना सती न पृच्छति, किंतु सर्वज्ञाऽपि केनचिदभिप्रायेण गूढेन पृच्छतीति भगवच्छब्दो ज्ञापयति । तथा हि—शिवः प्रकाशरूपः स्वयमेव विमर्शो भूत्वा प्रश्नमवतारयति । तत्र प्रयोजनमिदं —विद्वान् समर्थोऽपि पुस्तकवाचनादिना संपन्नज्ञानो न कृतार्थो भवितुमर्हति, किं तु गुरूपदिष्टमार्गेणैवेति ज्ञापयितुं स्वस्वरूपान्तरं गृहीत्वा प्रश्नः । तदुक्तं स्वच्छन्दतन्त्रे—

गुरुशिष्यपदे स्थित्वा स्वयमेव सदाशिवः ।
प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत् ॥ इति ॥

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्येवकारोऽपि श्रुतौ अमुमेवार्थमाह। इममेवार्थं द्योतयितुं भगवत्या स्वात्माभिन्नयेति विशेषणद्वयम्। भैरव्या— भैरवीशब्दार्थश्च जगतो भरणाद्रमणात् प्रलये परमशिवकुक्षिस्थितस्य सृष्टिसमये वमनाच्च भैरवीति ज्ञेयम्। तया पृष्टः प्रश्नमवतारितः। इदं पूर्ववर्तिपरमशिवभट्टारक इत्यस्यैव विशेषणम्। पञ्चभिः मुखैः सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशानसंज्ञकैः पञ्चाम्नायान् पूर्वाम्नाय-दक्षिणाम्नाय-पश्चिमाम्नायोत्तराम्नायोर्ध्वाम्नायनामकान्। आम्नायशब्दो वेदे यद्यपि मुख्यः, "श्रुतिः स्त्री वेद आम्नायः" इति कोशात्। तथाऽपि आम्नायसारप्रतिपादकत्वात् अत्रापि आम्नायशब्दः उपचर्यते। एतेन केषांचित् तन्त्राणि वेदवत् स्वतन्त्रप्रमाणानीति मतमपास्तम्। परमार्थः अकृत्रिमस्तुरीयपुरुषार्थः तस्मिन् [1]सारभूतान् अभ्यर्हितान्। एतेन पुरुषस्य विशे[illegible] [illegible]भि[illegible] [illegible]ण्गित्वं अतिगोप्यत्वं च सूचितम्। निखिलवेदार्थं ग्रहीतुं अशक्तान् [illegible]या [illegible]वः तत्सारभूतमर्थं गृहीत्वा पञ्चाम्नायान् प्रणिनाय निर्ममे ॥ २ ॥

त्रैपुरसिद्धान्तप्रतिपादनम्

तत्राप्यक्षमान् मन्दतरान् प्रति परमकृपालुः श्रीपरशुरामः तत्रत्यानर्थान् संगृह्य वक्तुं प्रक्रमते—

तत्रायं सिद्धान्तः ॥ ३ ॥

तत्र पञ्चाम्नायेषु अयं वक्ष्यमाणः सिद्धान्तः विचार्यवादजनित-निर्णयविषयोऽर्थः ॥

एतदन्तेन ग्रन्थेन वक्ष्यमाणसिद्धान्तार्थस्य स्वकपोलकल्पितत्वप्रयुक्ताप्रामाण्य-शङ्का निरस्ता ॥

अयं भावः—यस्मिन् काले इदं विश्वं परशिवकुक्षिस्थं सूक्ष्मरूपेण तिष्ठति स एव प्रळयः। ईदृशप्रळयश्च शास्त्रैकवेद्यः। एवमेव सृष्टिरपि। तत्र प्रळयो नाम परब्रह्मणः केवलनिजस्वरूपेण अवस्थानं जीवस्य सुषुप्ताविव। तदानीं जीवराशिः तददृष्टं पञ्चभूतानि सर्वाणि वटबीजे वटवृक्ष इव सूक्ष्मरूपेण तिष्ठन्ति।

[1] साररूपान्—ब.

तदुक्तं शक्तिसूत्रभाष्ये—"परमशिवो जगत् कबळयन्नपि न सार्वात्म्येन, अपि त्वंशेन संस्कारात्मना तत् स्थापयति" इति। स एव संस्कारः ईश्वरसिसृक्षायां सहकारिभूतः, अन्यथा वैषम्यनैर्घृण्यापत्तेरनिवारणात्। एवं स्थिते लोके दम्पत्योः सामरस्ये विधिबिलस्थितशुक्लबिन्दोरंशः योनिं प्रविश्य रक्तबिन्दुना सह एकीभावं प्राप्नोति यदा तदा बाह्याभ्यन्तर[1]भानविहीनं केवलं ब्रह्मैव भासते। तस्य गर्भोत्पादकत्वं दृष्टम्। तथा सृष्टिप्राक्काले शिवशक्त्योर्योगोऽपि प्राण्यदृष्टवशात् भवति ॥ ३ ॥

षट्त्रिंशत्तत्वानि

तदेव प्रपञ्चयितुं तत्त्वजालं व्यष्टुमुपक्रमते—

षट्त्रिंशत्तत्त्वानि विश्वम् ॥ ४ ॥

तदित्थं—केवलनिजरूपेण अवस्थितस्य यदा "बहु स्यां प्रजायेय" इति इच्छाज्ञानक्रियाऽऽत्मिकाः शक्तयः ताभिर्योगे क्रमेण अर्थशब्दसृष्टी अङ्कुरच्छायावत् युगपद्भवतः। ननु इच्छाज्ञानक्रियाशक्तीनां सादित्वेन अनित्यत्वापत्तिरिति चेत्—इष्टापत्तिः। तत्त्रितयकारणीभूता सूक्ष्मरूपा शान्तानाम्नी, तस्या एव परशिवरूपाया नित्यत्वात्। तथा च तादृशसिसृक्षारूपोपाधिविशिष्टः परमशिव एव केवलशिवपदवाच्यो भवति। स एव तत्त्वानां मध्ये आदिमः।

सा पूर्वोदिता सिसृक्षा प्रपञ्चवासनारूपा शक्तिरिति द्वितीयं तत्त्वम्। तदुक्तं रत्नत्रयपरीक्षायाम्—

कर्तृत्वं तत्र धर्मी कलयति जगतां पञ्चसृष्ट्यादिकृत्ये
धर्मः पुंरूपमाद्यात् सकलजगदुपादानभावं बिभर्ति।
स्त्रीरूपं प्राप्य दिव्या भवति च महिषी स्वाश्रयस्यादिकर्तुः
प्रोक्तौ धर्मप्रभेदावपि निगमविदां धर्मिवद्ब्रह्मकोटी ॥ इति ॥

पूर्वोक्ततादृशजगतः अहन्तया यद्दर्शनं तदहमिति तादृशस्पष्टवृत्तिमान् सदाशिवपदवाच्यः तृतीयं तत्त्वम्।

[1] भाव—ब.

इदं जगदिति केवलं भेदविषयिणी या वृत्तिः तद्वान् ईश्वरपदवाच्यः तुरीयं तत्त्वम् ।

जगदहमेवेत्याकारिका या सदाशिवसंबन्धिनी वृत्तिः सा विद्यापदवाच्या पञ्चमं तत्त्वम् ।

इदं जगदित्याकारिका ईश्वरनिष्ठा भेदविषयिणी वृत्तिः मायापदवाच्या षष्ठं तत्त्वम् ।

पूर्वोक्तविद्यातिरोधानशक्तिमती तद्विरोधिनी अविद्यापदवाच्या सप्तमं तत्त्वम् ।

जीवनिष्ठं सर्वकर्तृत्वं यत्किंचित्कर्तृत्वेन संकुचितं तदेव कलापदवाच्यं अष्टमं तत्त्वम् ।

पूर्वोक्तरीत्या जीवनिष्ठा या नित्यतृप्तिः सैव केषुचिद्विषयेषु अतृप्त्या संकुचिता रागपदवाच्या नवमं तत्त्वम् ।

जीवनिष्ठा या नित्यता तस्या आच्छादने सति सैव नित्यता अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति षड्भावयोगात् संकुचिता कालपदवाच्या दशमं तत्त्वम् ।

परशिवजीवयोः अभेदात् यथा परशिवे सर्वस्वातन्त्र्यं तथा जीवेऽप्यस्ति, तस्य सर्वस्वातन्त्र्यस्य वि[पि]धानं पूर्वोक्ताविद्यया कृतं, तदेव कारणान्तरापेक्षं यत्कारणमपेक्षते तन्नियतिपदवाच्यं एकादशं तत्त्वम् ।

एतादृशनियतिकालरागकलाऽविद्याऽऽश्रयो जीवः द्वादशं तत्त्वम् ।

सत्वरजस्तमोगुणानां साम्यरूपा प्रकृतिः चित्तापरपर्याया त्रयोदशं तत्त्वम् ।

यदा सत्वतमसी अभिभूय रजःप्रधानं तन्मनःपदवाच्यं संकल्पहेतुश्चतुर्दशं तत्त्वम् ।

रजस्तमसी अभिभूय सत्वप्रधानमन्तःकरणं तद्बुद्धिपदवाच्यं निश्चयहेतुः पञ्चदशं तत्त्वम् ।

यदा रजस्सत्वे अभिभूय तमःप्रधानमन्तःकरणं तदहंकारपदवाच्यं विकल्पकारणं षोडशं तत्त्वम् ।

शब्दग्राहकमिन्द्रियं श्रोत्रं सप्तदशं तत्त्वम् ।

स्पर्शग्राहकमिन्द्रियं त्वगष्टादशं तत्त्वम् ।

रूपग्राहकमिन्द्रियं चक्षुरेकोनविंशं तत्त्वम् ।
रसग्राहकमिन्द्रियं रसनं विंशं तत्त्वम् ।
गन्धग्राहकमिन्द्रियं घ्राणं एकविंशं तत्त्वम् ।
व्यक्तवागुच्चारणानुकूलवागिन्द्रियं द्वाविंशं तत्त्वम् ।
ग्रहणत्यागानुकूलमिन्द्रियं पाणिः त्रयोविंशं तत्त्वम् ।
गमनानुकूलमिन्द्रियं पादः चतुर्विंशं तत्त्वम् ।
मलविसर्गजनकमिन्द्रियं पायुः पञ्चविंशं तत्त्वम् ।
मैथुनजनकमिन्द्रियं उपस्थः षड्विंशं तत्त्वम् ।
सूक्ष्माकाशरूपः शब्दः सप्तविंशं तत्त्वम् ।
सूक्ष्मवायुरूपः स्पर्शः अष्टाविंशं तत्त्वम् ।
सूक्ष्मतेजोरूपं रूपं एकोनत्रिंशं तत्त्वम् ।
सूक्ष्मजलरूपो रसः त्रिंशं तत्त्वम् ।
सूक्ष्मपृथ्वीरूपो गन्धः एकत्रिंशं तत्त्वम् ।
अवकाशात्मकाकाशः स्थूलः द्वात्रिंशं तत्त्वम् ।
सदागतिमत्त्वात्मकगुणवान् वायुः त्रयस्त्रिंशं तत्त्वम् ।
उष्णत्ववत्तेजः चतुस्त्रिंशं तत्त्वम् ।
द्रवत्ववज्जलं पञ्चत्रिंशं तत्त्वम् ।
काठिन्यगुणवती पृथ्वी षट्त्रिंशं चरमं तत्त्वम् ।
एतादृशतत्त्वसंघातो विश्वं जगदिति व्यवहारविषयाभिन्नम् । उक्तार्थे प्रमाणं परमानन्दतन्त्रे—

यत्काठिन्यं तद्धरा स्याद्द्रवो वै जलमुच्यते ।
उष्णं तेजस्संचलनं वायुर्व्योमावकाशकम् ॥
एतेषां सूक्ष्मरूपं तु अनुद्भिन्न[1]विभागकम् ।
गन्धस्पर्शौ रूपरसौ शब्दस्तन्मात्रकाणि वै ॥
पञ्चज्ञानेन्द्रियाण्येषां घ्राणं जिह्वा च लोचनम् ।
त्वक् श्रोत्रं चेति पञ्चानां ग्रहणव्याप्टतानि वै ॥

[1] विभावकम्—ब.

वचनादानगमनविसर्गानन्दपञ्चकम् ।
कर्मस्वधिष्ठानरूपमतस्तन्न पृथक्कृतम् ॥
वाक्पाणिपादपायूपस्थाख्यं तत्करणं भवेत् ।
सर्वदेहगतं चापि स्फुटव्यक्तेरुदाहृतम् ॥
मनस्संकल्पकरणं बुद्धिर्निश्चयकारिणी ।
विकल्पप्रतिबिम्बानां भूमिर्दर्पणवच्छिवे ॥
एतावदभिमानात्मा चाहंकार उदाहृतः ।
दुःखनिर्वृतिमोहाख्यरजस्सत्वतमोमयम् ॥
अन्तःकरणमित्युक्तं तत्तदाधिक्यसंभवम् ।
कारणानां गुणानां तु साम्यं प्रकृतिरुच्यते ॥
तद्भिन्नः पुरुषः प्रोक्तः पूर्णः संक्षिप्तशक्तिकः ।
चिदानन्दस्तथेच्छा च ज्ञानं तद्वत् क्रियाऽपि च ॥
परिपूर्णाश्शक्तयस्तु संकोचात्तु कलादिकाः ।
सर्वकर्तृत्वरूपा वै क्रियाशक्तिः कलाऽभवत् ॥
किंचित्कर्तृत्वरूपेण ज्ञानं सर्वज्ञता तथा ।
[1]बुद्धिस्तत्प्रतिबिम्बानां वस्तूनामेव [2]बोधकः ॥
संकोचनात्तु विद्याऽऽख्या सैवाविद्येति गीयते ।
इच्छा तु नित्यतृप्त्याख्या सैव संकोचशालिनी ॥
रागः क्वचिदतृप्त्याख्या क्वचिद्रञ्जनरूपिणी ।
प्रमाणं चिच्छक्तिर्नित्यसत्ताऽऽख्या कालः षड्भावयोगतः ॥
आनन्दशक्तिस्स्वातन्त्र्यं सार्वत्रिकमुदीरितम् ।
अन्यापेक्षणहेतोस्तु संकोचान्नियतिः स्मृता ॥
अखण्डरसमेतावदेतद्भेदननैपुणा ।
स्वतन्त्ररूपा त्वं देवि माया भैरववल्लभा ॥
भेदनेन स्वरूपस्य गोपनात्तत्त्वरूपिणी ।
स्वरूपभेदनं हित्वा चैक्यावगमनोद्यता ॥

[1] बुद्धित—ब.
[2] बोधतः—ब.

परमार्थप्रथारूपा शुद्धविद्येति शब्दिता ।
स्पष्टभेदप्रथान् भावान् स्वाभेदेनावभासयन् ॥
ईश्वरः कथितो देवि तानस्पष्टानहं त्विदम् ।
इति प्रबोधनात्मा तु सदाशिव इतीरितः ॥
स्वस्वरूपाभेदमयानहमित्येव पश्यती ।
प्रपञ्चवासनारूपा शक्तिरित्यभिधीयते ॥
निष्प्रपञ्चश्चिदेकात्मा शिवतत्त्वं समीरितम् ॥ इति ॥

एतेषां शिवादिक्षित्यन्तानां स्वरूपनिरूपणं मृगेन्द्रसंहितायां विस्तरेणास्ति, विस्तरभयादत्र न लिखितं, यावदुपयुक्तं तावदेव लिखितम् ॥

तत्वसंख्यानिर्णयः

ननु साङ्ख्यैः चतुर्विंशतितत्त्वानीति सिद्धान्तितं, कथं षट्त्रिंशत्तत्त्वानि? इति चेत्—उच्यते, चतुर्विंशत्यतिरिक्तानि पुरुषादिशिवान्तानि द्वादश तत्त्वानि न सन्ति प्रमाणाभावादिति तवोक्तिः, उत चतुर्विंशतितत्त्वेषु अन्तर्भूतानीति । नाद्यः, श्रीभगवतः परशुरामस्य उक्तेरेव प्रमाणत्वात्, "षट्त्रिंशत्तत्त्वप्रासादभूनाथाय नमो नमः" इति स्कान्दे श्रुतत्वात्, "षट्त्रिंशद्विधमेतद्धै तत्त्वचक्रं समीरितम्" इति परमानन्दतन्त्रे श्रुतत्वाच्च । न द्वितीयः, पुरुषादिशिवान्तानां पूर्वोक्तलक्षणरूपविरुद्ध-धर्मवतामन्तर्भावासंभवात् । न च "चतुर्विंशतितत्त्वानि पुरुषस्तु ततः परः" इति महाभारतवचनविरोधः इति वाच्यम्; अग्रिमद्वादशतत्त्वानामतिकठिनवेद्यत्वेन मन्द-मतीनां प्रकृत्यन्तसुगमवेद्यतत्त्वानामेव कथनीयतया तत्रैव विश्रामात्, एवं च अधिकारिभेदेन वचनद्वयस्यापि प्रामाण्यात् । एतेन—"सर्वत्र पञ्च भूतानि षष्ठं किंचिन्न विद्यते" इति वासिष्ठवचनमाश्रित्य पञ्चैव तत्त्वानीति वदन् परास्तः, तस्य अत्यन्तमन्दमतिपरत्वात् ॥

ननु विरुद्धधर्मवत्त्वं यदि तत्त्वविभागे प्रयोजकं तर्हि घटत्वपटत्वरूपविरुद्ध-धर्मवतोः घटपटयोरपि तत्त्वान्तरत्वापत्तिः इति चेत्—न । किं षट्त्रिंशत्तत्त्वातिरिक्तत्व-मापाद्यते? अथवा घटरूपतत्त्वापेक्षया पटतत्त्वमतिरिक्तं स्यादित्यापाद्यते? नाद्यः, यः क्षितेरसाधारणो धर्मः काठिन्यं तेन साकं घटत्वपटत्वयोः विरोधाभावेन

तदतिरिक्तत्वासिद्धेः । द्वितीये तु इष्टापत्तिरेव । एष एवार्थः उक्तः सूतसंहितायां तत्त्वलक्षणकथनपूर्वम्—

आप्रळयं यत्तिष्ठति सर्वेषां भोगदायि भूतानाम् ।
तत्तत्त्वमिति प्रोक्तं न शरीरघटादि तत्त्वमतः ॥ इति ॥

एतेन इयमाशङ्का सुतरां पराहता ॥

यद्यपि तन्त्रान्तरे प्रथमं त्रीण्येव तत्त्वानि—आत्मतत्त्वं, विद्यातत्त्वं, शिवतत्त्वं, चेति । तत्र आत्मतत्त्वं चतुर्विंशतिधा क्षित्यादिप्रकृत्यन्तम् । तदसाधारणो धर्मः केवलजडत्वम् । पुरुषमारभ्य मायाऽन्तं विद्यातत्त्वं सप्तधा । तल्लक्षणं च जडत्वप्रकाशकत्वोभयवत्त्वम् । तथाहि—यथा अयःपिण्डे वह्नितादात्म्यापन्ने जडेऽपि प्रकाशकत्वं, अयःपिण्डे जडत्वं च वह्नितादात्म्यानापन्नत्वदशायां स्पष्टम् । एवं वह्नौ अयःपिण्डतादात्म्यापन्नत्वदशायां जडत्वं प्रकाशकत्वं च स्पष्टम् । तथा पुरुषे प्रकाशरूपे तत्तादात्म्यापन्नेषु जडेषु नियत्यादिषु प्रकाशकत्वं पुरुषे च जडत्वम् । नियत्यादिषु जडत्वं पुरुषे प्रकाशकत्वं च स्पष्टम् । एवंरीत्या विद्यातत्त्वस्य मिश्रत्वम् । शुद्धविद्याऽऽदिशिवान्तं शिवतत्त्वं पञ्चधा । तदसाधारणो धर्मः केवलप्रकाशकत्वमित्यवान्तरविभागः कृतः । तथाऽपि तत्राप्युपसंहारवेळायां

षट्त्रिंशद्विधमेवं वै तत्त्वचक्रं महेश्वरि ॥

इति यो धर्मः उक्तः स एव अत्राप्युक्तः इति न तेन साकं विरोधः ॥

वस्तुतस्तु भागवते एकादशस्कन्धे द्वाविंशेऽध्याये

कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो ।
केचित् षड्विंशतिं प्राहुरपरे पञ्चविंशतिम् ॥
सप्तैके नव षट् चैके . . . .

इत्यारभ्य उद्धवप्रश्ने स्वमते अष्टाविंशतितत्त्वानि प्रतिपाद्य श्रीभगवान् सप्तादिविरुद्धसंख्यावादिनां मतानामुपपत्तिं कृत्वा

इति नानाप्रसंख्यानं तत्त्वानामृषिभिः कृतम् ।
सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनम् ॥

इत्युवाच । इदमेवात्र समाधानं द्रष्टव्यम् ॥ ४ ॥

जीवेश्वरस्वरूपम्

एवं तत्त्वानां विभागमुक्त्वा जीवेश्वरस्वरूपं वक्तुमारभते—

शरीर[1]कञ्चुकितः शिवो जीवो [2]निष्कञ्चुकः परशिवः॥

एवं षट्त्रिंशत्तत्त्वानामपि सामान्यरूपेण पुनर्द्विस्वभावत्वं—केषुचित् केवलदृश्यत्वं केषुचित् केवलद्रष्टृत्वमेव । आद्यं जडेषु, द्वितीयं केवलमिति ॥

ननु जीवस्य तत्त्वान्तःपातित्वात् परशिवस्यातथात्वात् द्वयोर्भेद आयातः । एवं सति कथमद्वैतसिद्धान्तः तान्त्रिकाणाम्? अत आह—शरीरेति । अयं भावः—सर्वस्वतन्त्रः परशिवः स्वस्य मायया दुर्घटया स्वनिष्ठं यदन्यानपेक्षत्वरूपं पूर्णं स्वातन्त्र्यं तदाच्छादयति । ततस्तिरोहितं यत्स्वातन्त्र्यं परिमितं स्वातन्त्र्यं तदाणवमलमुच्यते । आणवमलमेव अविद्येत्यप्युच्यते ॥

ननु पूर्णस्वातन्त्र्यं स्वीयं स्वयमेव कथमाच्छादयति इति चेत्—उच्यते । यथा सूर्यः स्वमयूखैरेव सृष्टैः मेघैः स्वयमावृतो भवति एवमेव स्वाविद्यया स्वस्यावरणे बाधकाभावात् । तथा च औपाधिको भेदो न वास्तवः । तथा च नाद्वैतहानिः इति भावः ॥

ननु अपरिच्छिन्नचित्स्वरूपपरशिवः कथं परिच्छिन्नेन आणवमलेन तिरोहित इति चेत्—इत्थम् । मायायाः सामर्थ्यमनिर्वचनीयम् । अतो न तत्र अघटितघटनायामपि कथंभावशङ्का अस्ति । अत एवोक्तम्—

दुर्घटैकविधायिन्यां मायायां किमसंभवि ॥ इति ॥

सुभगोदयेऽपि—

मायाविभिन्नबुद्धिर्निजांशभूतेषु निखिलभूतेषु ।
नित्यं तस्या निरंकुशविभवं वेलेव वारिधिं रुन्धे ॥ इति ॥

एवं आणवेन मलेन छन्नः तदा स्वयमणुर्देहपरिमितः सन् अन्यान् देहपरिमितान् अनन्तान् जीवान् स्वभिन्नत्वेन पश्यति । तन्मायिकं मलम् । एवं भेदप्रथारूपमायिकमलेन मलिनाः शुभाशुभकर्म अनुतिष्ठन्तः तज्जनितसंस्कारवन्तो भवन्ति ।

[1] कंचुकितो जी—अ.

[2] निष्कंचुकः शिवः—अ.

तदेतत् कार्मं मलम् । एतादृशत्रिविधमलं शरीरपदेनोच्यते । तद्रूपं यत् कञ्चुकं आच्छादनं तेन आवृतः शिव एव जीवः । तदुक्तं परमार्थसारे—

परमं यत्स्वातन्त्र्यं दुर्घटसंपादनं महेशस्य ।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत् ॥ इति ॥

सुभगोदयेऽपि—

स तथा परिमितमूर्तिस्संकोचितसमस्तशक्तिरेष पुमान् ।
रविरिव सन्ध्यारक्तस्संहृतरश्मिस्स्वभासनेऽप्यपटुः ॥ इति ॥

यद्वा—शरीरं त्रिविधं, स्थूलं, सूक्ष्मं, परं, चेति । आद्यं ध्यानश्लोकप्रतिपादितम् । द्वितीयं मन्त्ररूपम् । तृतीयं वासनाऽऽत्मकम् । एतैः शरीरैः कञ्चुकितः शिवः आद्यतत्त्वं सोऽपि जीव एवेत्यर्थः । तस्मिन्नेव जीवत्वमस्ति, का कथा अन्येष्विति भावः । एतेन शिवस्वरूपलाभोऽपि न परमपुरुषार्थ इति ध्वनितम् ॥

एतादृशजीवाः त्रिविधाः—शुद्धाः, अशुद्धाः, मिश्राश्च, इति । आद्याः शिवादिसदाशिवान्ताः, तेषां अज्ञानाभावात् । अशुद्धाः मनुष्यादयः । मिश्राः वसिष्ठादयः । एतादृशकञ्चुकरहितो यः सः तत्त्वातीतः परशिवः इत्यर्थः ॥ ५ ॥

पुरुषार्थस्वरूपम्

एवं जीवेश्वरयोः स्वरूपमुक्त्वा कः पुरुषार्थः इति तं निर्दिशति—

स्वविमर्शः पुरुषार्थः ॥ ६ ॥

स्वस्य परशिवस्वरूपस्य विमर्शः प्रत्यभिज्ञानं सोऽहमित्याकारकं—यथा कण्ठस्थं चामीकरं विस्मृत्य तदन्वेषणाय देशाद्देशं धावन् केनचित् उद्बुद्धसंस्कारः कण्ठस्थं पश्यति तथा विस्मृतस्वरूपज्ञानस्य पुनर्लाभः—पुरुषार्थः अकृत्रिमः इत्यर्थः । एतादृशपुरुषार्थलाभश्च न भगवत्कृपामृते भविष्यति । तदुक्तं भगवता श्रीकृष्णेन—

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति ॥

भगवत्प्रीतिश्च भगवदाराधनेनैव भवति । अतो भगवदाराधनं परंपरया मोक्षसाधनम् ॥ ६ ॥

मन्त्रगुणवर्णनम्

ननु योगादिनाऽपि ईदृशपुरुषार्थलाभो भवतीति शास्त्रं बहूपलभ्यते । किमुपासनाया आवश्यकत्वं वर्ण्यते इति चेत्—अस्त्युपासनाया आवश्यकता । योगादिभिः लभ्यमोक्षस्तु न पुनरावृत्तिरहितः । तदुक्तं स्वच्छन्दसंग्रहे—

मुक्तं च प्रतिबन्धात्तं पुनर्बध्नाति चेश्वरः ।
बद्धः संसरते भूयो यावद्देवं न विन्दति ॥ इति ॥

एवं स्थलान्तरेऽपि—

सांख्ययोगादिसंसिद्धान् श्रीकण्ठस्तदहर्मुखे ।
सृजत्येव पुनस्तेन न सदृङ्मुक्तिरीदृशी ॥ इति ॥

अतः उपासनाया एव मुख्योपायत्वे सिद्धे उपासनायां जपस्यापि सत्त्वात् तत्र मुख्यसाधनं मन्त्र इति तत्र उपासकस्य श्रद्धोत्पत्त्यै तद्वृत्तिगुणान् वर्णयति—

वर्णात्मका नित्याः शब्दाः ॥ ७ ॥

वर्णात्मकाः वर्णसमुदायरूपाः शब्दाः मन्त्राः नित्याः मूलाविद्यासमसत्ताकाः इत्यर्थः । न तु कालत्रयाबाध्यत्वं, अज्ञाननिवृत्तौ स्वस्वरूपातिरिक्तदेवतायाः तद्वाचकमन्त्राणां च असत्त्वात् । नच आनुपूर्वीविशेषविशिष्टवेदादीनां नित्यत्वस्य एककल्पस्थायित्वस्य वर्णितत्वेन अस्यापि तादृशत्वेन कथं ततोऽपि चिरस्थायित्वरूपं नित्यत्वं इति वाच्यम्; मन्त्राणां देवतासूक्ष्मशरीररूपत्वेन देवताशरीरस्य अविद्यासमकालत्वात् ॥ ७ ॥

अथवा—

सप्तकोटिमहामन्त्राः शिववक्त्राद्विनिर्गताः ।

इति स्कान्दात् मन्त्राणामपि सादित्वेन नाविद्यासमकालिकत्वं, तस्या अनादित्वात् । अत एव इतरसाधारणगुणत्वेन नानेन स्तुतिः संभवतीति अपरितोषेण मन्त्राणामसाधारणं गुणान्तरमाह—

मन्त्राणामचिन्त्यशक्तिता ॥ ८ ॥

मन्त्राणामिति षष्ठी सप्तम्यर्थे, मन्त्रेष्वित्यर्थः। न चिन्त्या अचिन्त्या शक्तिर्यत्र ते अचिन्त्यशक्तयः मन्त्राः, तेषां भावः तत्ता, अस्तीति शेषः। शक्तौ अचिन्त्यत्वं च तर्काविषयत्वम्। एतेन पूर्वोदितमाया अतर्क्या दुर्वारा, तथाऽपि तन्निवारणे समर्था ततोऽपि अधिकशक्तिका मन्त्रेषु लीलया ज्ञानावरकाविद्यानिवर्तकत्वशक्तिरस्तीति प्रतिपादितम्॥ ८॥

मन्त्रसिद्धौ सहकारिकारणानि

मन्त्रेण ईप्सितकार्ये जननीये सहकारिकारणान्याह—

संप्रदायविश्वासाभ्यां सर्वसिद्धिः॥ ९॥

संप्रदायः गुरुपरंपराऽऽचारानुसरणम्। विश्वासो मन्त्रेषु फलसाधनत्वविषयको निश्चयः। आभ्यां सहितमन्त्रेण सर्वसिद्धिः भवतीति शेषः। यद्यपि लोके एकेन दण्डेन एकव्यापारेण घट एव भवति न पटः। एवं तुरीवेमादिना पट एव न घट इति। एवं सर्वकारणेषु लोके नियतैककार्यजनकत्वं दृष्टम्। तथाऽपि मन्त्रेषु न तथा। एक एव मन्त्रः यद्यदीप्सितं तत्सर्वं जनयति इति ज्ञापयितुं सर्वपदम्। एतेन श्रोतृप्रवृत्तये मन्त्रवर्तिगुणोऽपि प्रतिपादितो भवति॥ ९॥

ननु कथं लोकविरुद्धार्थकं इदं वाक्यं प्रमाणं भवितुमर्हति इत्यत आह—

विश्वासभूयिष्ठं प्रामाण्यम्॥ १०॥

प्रामाण्यं संवादिप्रवृत्तिजनकतद्वतितत्प्रकारकज्ञानजनकत्वम्। सर्वसिद्धिरिति पूर्वोक्तवाक्यनिष्ठं विश्वासभूयिष्ठम्। अत्र विश्वासपदार्थश्च वाक्यप्रयोक्तरि आप्तत्वनिश्चयः। बहुशब्दात् अतिशयार्थे इष्ठन् प्रत्ययः। तत्र—पाणिनिसूत्रं "अतिशायने तमबिष्ठनौ"। अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः इति तदर्थः। एवं स्वार्थे इष्ठनि जाते "इष्ठस्य" इति बहोः परस्य इष्ठस्य लोपः स्यात्। "बहोर्लोपो भू च बहोः" इति इडागमो भूरादेशश्च इति तदर्थः। एवं भूरादेशे इडागमे च भूयिष्ठशब्देन अत्यन्तबहुत्वविशिष्टः पुरुषार्थः। पुरुषे विश्वासभूयिष्ठत्वं च स्वोत्तरोत्पन्नत्वस्वविषयविषयकत्वसंबन्धेन विश्वासविशिष्टशंकाऽनधिकरणत्वं, तदाश्रयपुरुषेण सममभेदान्वयस्य बाधितत्वात्। भूयिष्ठपदस्य भूयिष्ठाश्रयज्ञानविषये लक्षणा।

तस्य प्रामाण्ये अभेदान्वयः । अत्यन्तविश्वासवत्पुरुषैकवेद्यं एतच्छास्त्रप्रामाण्यमित्यर्थः । कुतर्कशालिनां शास्त्रप्रामाण्यं सर्वथा अगम्यमिति भावः । तदुक्तं भट्टपादैः—

शास्त्रैकगम्या ये ह्यर्था न तांस्तर्केण दूषयेत् ॥ इति ॥

केचित्तु—विश्वासस्य भूयिष्ठं बाहुल्यं यत्रेति बहुव्रीहिमाहुः । तच्चिन्त्यम् । भूयिष्ठपदस्य पाणिन्यनुशासनेन पुरुषपरत्वेन बाहुल्यरूपधर्मपरत्वायोगात् । यदि च धर्मे लक्षणा तदा मदाश्रितलक्षणापक्ष एव श्रेष्ठः । न सः । तथा सति बाहुल्ये एकत्र लक्षणायामपि धर्मस्यापि प्रामाण्येन समं अभेदान्वयासंभवात् बहुव्रीहौ अन्यपदार्थे लक्षणा वाच्या, बाहुल्यसंबन्धिप्रामाण्यमिति । संबन्धश्च स्वाश्रयवृत्तिज्ञानवेद्यत्वमेव वक्तव्यम् । तथा च मन्मततुल्यम् । एतदंशे धर्मे लक्षणाऽऽधिक्यं क्लिष्टव्यधिकरणबहुव्रीह्याश्रयणं च । तस्मादिदमेव व्याख्यानं वरम् ॥

ईदृशमेव श्रद्धाभूयस्त्वमिति सुस्पष्टमुवाच श्रीस्कन्दः—

अगस्त्य किं बहूक्तेन शृणु मे निश्चितं वचः ।
संशयो नात्र कर्तव्यः सन्दिग्धाद्धि फलं न हि ॥
यावन्ति मर्त्ये[1]तन्त्राणि मन्त्रजालान्यनेकशः ।
तावन्ति स्तवराजस्य कोट्यंशेन समानि न ॥ इति ॥ १० ॥

सहकार्यन्तरमाह—

गुरुमन्त्रदेवताऽऽत्ममनःपवनानां ऐक्यनिष्फालनादन्तरात्मवित्तिः ॥ ११ ॥

गुर्वादयः स्पष्टाः । पवनाः पञ्चप्राणाः । एतेषां ऐक्यनिष्फालनं भावनया एकत्वसंपादनम्, तेन अन्तरात्मनः प्रत्यगात्मनः वित्तिः वेदनं भवतीति शेषः । आत्मनो देवतायाश्च ऐक्यं उपाधिनिरासे स्पष्टम् । देवताया मन्त्रस्य चैक्यं वाच्यवाचकभावापन्नत्वेन । तथा गुरोरपि । मनःपवनयोरैक्यं विष्णुपुराणे दर्शितम्—

[1] स्तोत्राणि—श्री.

नभस्वान्मनसो नातिभिन्नोऽतस्तन्निरोधनात् मनो निश्चलतामेति ॥ इति ॥

यद्यपि ईदृशनिश्चयः उपासनावेळायां न भवितुमर्हति, तथाऽपि आहार्यं क्षणमात्रं कार्यमिदमुपासनायामङ्गम् ॥

जपरूपोपास्तिफलम्

यद्वा—संप्रदायविश्वाससहितमन्त्रकरणकोपास्तेः फलमाह—गुरुमन्त्रेति। ऐक्यनिष्फालनं ऐक्यनिर्णयः, तद्द्वारा प्रत्यगात्मज्ञानं भवतीति विशिष्टार्थः ॥

उमाऽऽनन्दनाथास्तु—गुरुमन्त्रेत्यस्य आरंभोल्लासे गुरुमन्त्रदेवताऽऽत्मनां ऐक्य-भावनं एकं साधनं, मनःपवनयोः एकयत्ननिरोद्धव्यत्वज्ञानं चापरं, द्वाभ्यां कार्य-सिद्धिः इति व्याचक्रुः। तच्चिन्त्यम्। निष्फालनादित्येकक्रियाया एकोऽर्थो भावना-रूपः एकयत्ननिरोद्धव्यत्वज्ञानरूपो वा बुध्येत नानेकः, "सकृदुच्चरितश्शब्दः सकृदेवार्थं गमयति" इति न्यायात्। अन्यथा हरिपदात् चतुर्दशानामप्यर्थानां युगपद्बोधप्रसङ्गात्। किंच—द्वन्द्वघटकीभूतपदार्थानां यदि भिन्नक्रिययाऽन्वयः, तदा "भिक्षामट, गां चानय" इतिवत् अन्वाचय एव स्यात्, "क्रियाभेदे अन्वाचयः" इति तल्लक्षणात्। एकक्रियायां युगपदन्वयित्वं हि द्वन्द्वलक्षणं, तन्निर्वाहस्तु सर्वथा कर्तुमशक्यः तन्मते। न च—"धवखदिरौ छिन्धि पश्य" इति प्रयोगो न स्यात् इति वाच्यम्; ईदृशप्रयोगोऽप्रामाणिक एव इति सर्वैर्व्यवस्थापितत्वात् ॥ ११ ॥

अर्चनरूपोपास्तिविधिः

एतावत्पर्यन्तं मन्त्रस्तुत्या तत्सहकारिकारणकथनेन च मन्त्रकरणकक्रिया-तद्विधिरुन्नेयः। तथा च तादृशी जपरूपैव। एवं जपरूपोपास्तिं निरूप्य पूजारू-पामुपास्तिं हि विधत्ते—

आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितं तस्याभिव्यञ्जकाः पञ्च मकाराः तैरर्चनं गुप्त्या प्राकट्यान्निरयः ॥ १२ ॥

यथा चिद्रूपं ब्रह्म एवं आनन्दरूपमपि, "विज्ञानमानन्दं ब्रह्म" इति श्रुतेः। यथा चिद्रूपमावृतमज्ञानेन न जानाति एवमानन्दस्वरूपमपि दुःखेनावृतं न जानाति। यदा कदाचित् भारादिरूपदुःखापगमे ब्रह्मण एव परिच्छिन्नं रूपं शरीरावच्छेदेन संप्रत्यपि जानाति तादृशानन्दः परिच्छिन्नो देहे देहावच्छेदेन व्यवस्थितः। तस्य अभिव्यञ्जकाः तद्विषयकसाक्षात्कारजनकाः पञ्च मकाराः। एतदन्तेन विधीयमानद्रव्यस्तुतिः अनुष्ठातृप्रवृत्तये। यत ईदृशाः श्रेष्ठाः पञ्च मकाराः अतः तैरर्चनं गुप्त्या अप्राकट्येन, कुर्वीतेति शेषः। गुप्तिद्रव्योभयविशिष्टार्चनरूपं कर्म अनेन विधीयते॥

ननु विशिष्टकर्मविधौ कर्मण एव स्तुतिरपेक्षिता विधेयस्यैव स्तुत्यत्वनियमादिति चेत्—न; विशिष्टविधौ विशेषणविधेराक्षिप्तत्वेन अस्यार्थवादस्य तच्छेषत्वसंभवात्, यथा "वायव्यं श्वेतमालभेत" इत्यत्र देवताविशिष्टकर्मविधावपि "वायुर्वै क्षेपिष्ठा" इत्यनेन देवतास्तुतिः, तद्वत्। कर्मणि गुप्तिश्च पशुवृत्तिज्ञानविषयतासामान्यज्ञानशून्यत्वम्। अस्य विशिष्टविधिरूपत्वात् गुप्तिः क्रत्वर्था। तस्यैव 'प्राकट्यान्निरयः' इति निन्दारूपा स्तुतिः। यथा—"यद् ग्राम्याणां पशूनां चर्मणा संभरेद् ग्राम्यान् पशूञ्छुचाऽर्पयेत्" इति निन्दारूपः सन् "कृष्णाजिनेन संभरति" इति स्तुतिशेषः, तथा तेन दैवात् प्राकट्ये क्रत्वङ्गलोपजनितं प्रायश्चित्तं, न नरकनिरासाय अन्यत् प्रायश्चित्तम्॥

प्राकट्यात् गुप्तिविपरीतात्। हेतौ पञ्चमी। निरयः नरकः इत्यर्थः॥

श्रीभासुरानन्दनाथपादास्तु—"दीक्षाऽन्तरवतां स्वधर्मप्रकटने क्रतुवैगुण्यमात्रं, इह तु तद्वैगुण्ये नरक एव, तथा च भगवान् परशुरामः 'प्राकट्यान्निरयः'" इत्यूचुः। तन्मते वाक्यभेदः, प्रकृतहान्यप्रकृतपुरुषार्थत्वकल्पनादिदोषपरिहारोपायमल्पमतिरहं न जाने॥ १२॥

उपासकधर्माः—भावनादार्ढ्यम्

एवमुपासनामुक्त्वा उपासकधर्मान् प्राह—

भावनादार्ढ्यादाज्ञासिद्धिः॥ १३॥

'अहमिदं जानामि' इत्येतादृशवृत्तिषु इदंपदार्थापेक्षया अहंतया भासमानं श्रेष्ठमिति विवेचनम्—सर्ववृत्तिषु इदमेव भा व ना पदार्थः । तस्य दा र्ढ्यं अशिथिलता । अनेन आ ज्ञा सि द्धिः निग्रहानुग्रहसामर्थ्यं भवतीति शेषः । भावनादार्ढ्यस्तुत्या सर्वदा ईदृशभावनाविधिरुन्नेयः ॥ १३ ॥

सर्वदर्शनानिन्दा

उपासकस्य नियमान्तरमाह—

सर्वदर्श[1]नानिन्दा ॥ १४ ॥

इतरदेवतोपासनाविधायकानि यानि द र्श ना नि शास्त्राणि तेषां नि न्दा न कर्तव्येत्यर्थः । तन्निन्दने तदधिकारिणां संशयोत्पत्त्या स्वावलम्बितदर्शनेष्वनाश्वासः । अस्मिन् शास्त्रे अनधिकारात् उभयभ्रष्टः छिन्नाभ्रमिव नश्येत् । इममेवार्थं श्रीकृष्णोऽप्याह—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ॥ इति ॥

"लोकान्न निन्द्यात्" इति श्रुतिरपि ॥

ननु परेषां बुद्धिभ्रंशजनितप्रत्यवायाभावोऽस्य फलमिति सिद्धम् । अयं पुरुषार्थः । कथं उपासकधर्माणां क्रतुसाद्गुण्यजनकानां मध्ये पाठ इति चेत्—उच्यते । अयमपि उपासनाजन्यसर्वात्मभावे उपयुज्यते । कथं? इति चेत् इत्थं—यदि छिन्नाभ्रवत् परेषां नाशे स्वस्योपेक्षा तदैव निन्दायां प्रवृत्तिः । तथा च परनाशे उपेक्षायां आत्मवत् सर्वभूतदर्शनं नागतं इति सर्वात्मतायाः असिद्धया उपासनाजन्यफलासिद्धिः । प्रयाजादिषु क्रत्वर्थत्वं इदमेव क्रतुसाध्यापूर्वसाधकत्वम् । प्रकृते उक्तरीत्या क्रत्वर्थत्वं सिद्धमिति न कोऽपि दोषः ॥ १४ ॥

कस्याप्यगणनम्

तृतीयं धर्ममाह—

अगणनं कस्यापि ॥ १५ ॥

[1] नानिन्दनम्—अ

स्वशास्त्रविरुद्धं यदि गीर्वाणगुरुर्वदेत्तर्हि स गुरुरिति गणनं न कर्तव्यम्। अत एव श्रुतिरपि—"न गणयेत् कमपि" इति ॥ १५ ॥

सच्छिष्ये रहस्यकथनम्

चतुर्थमाह—

सच्छिष्ये रहस्यकथनम् ॥ १६ ॥

कर्तव्यमिति शेषः। परिसंख्याविधिरयम्। "आत्मरहस्यं न वदेत्" इति निषेधस्यापवादोऽयं, न तु गुप्त्याऽर्चनं इत्यस्यापवादः, तथा सति शिष्यातिरिक्तेषु सामयिकेषु पूजाप्राकट्यानापत्तेः। अतः इदमात्मरहस्यं स्वसिद्धान्तरूपं सामयिकेषु शिष्यभिन्नेषु न कथयेत्। सच्छिष्ये कथयेदित्यर्थः। शिष्ये सत्त्वं प्रतिपादितं तन्त्रराजे—

सुन्दरः सुमुखः स्वच्छः श्रद्धावान् सुस्थिराशयः।
अलुब्धः स्थिरगात्रश्च प्रेक्ष्यकारी जितेन्द्रियः॥
आस्तिको दृढभक्तिश्च गुरौ मन्त्रेऽथ दैवते।
एवंविधो भवेच्छिष्यः इतरो दुःखकृद्गुरोः॥ इति ॥

आत्मपुराणेऽपि—

ब्रह्मविद्याऽतिसंखिन्ना ब्रह्मिष्ठं ब्राह्मणं ययौ।
गोपाय मां सदैव त्वं कुलजामिव योषितम्॥

इत्यारभ्य—

एवमाद्या येषु दोषास्तेभ्यो वर्जय मां सदा।
एवं हि कुर्वतो नित्यं कामधेनुरिवास्मि ते॥ इति ॥

असत्त्वलक्षणानि शिष्यदोषाः कुलार्णवात् विस्तरेण ज्ञेयाः॥ १६ ॥

सदा विद्याऽनुसंधानम

पञ्चमं धर्ममाह—

सदा विद्याऽनुसंहतिः ॥ १७ ॥

स दा सर्वकालं पूजादिविहितनित्यकर्मानुष्ठानकालव्यतिरिक्ते सर्वदेत्यर्थः । वि द्या याः स्वोपास्यदेवतावाचकमन्त्रस्य अ नु सं ह ति ः तत्प्रतिपादितार्थस्य अनुसंधानं, कर्तव्यमिति शेषः ।

यद्वा—स दा अ नु सं ह ति : मनसा जपः कार्यः इत्यर्थः । न च आसनादिनियमरहितस्य जपोऽयुक्तः इति शङ्कनीयम्; मानसे कस्यापि नियमस्याभावात् । तदुक्तं परमानन्दतन्त्रे—

> मानसेऽनन्तगुणितं नियमस्तत्र नैव तु ।
> गच्छन् शयान आसीनो भुक्तो वा यत्र कुत्र चित् ।
> अस्नातश्चापवित्रश्च न दोषस्तत्र विद्यते ॥

बृहद्वामकेश्वरत पि—

> सर्वकालं जपेद्विद्यां मनसा यस्तु केवलम् ।
> नियतो वाऽप्यनियतोऽप्यथ कुर्वंश्च नित्यकम् ।
> तथाऽपि तस्य शुद्धस्य तरसा संप्रसीदति ॥ इति ॥

यदि सदापदस्य संकोचो न स्यात्तर्हि नित्यकर्मानुष्ठानलोपापत्तिः । अतः "सर्वे हार्योजनं लिप्सन्ति" इत्यत्रेव संकोचः आवश्यकः ॥ १७ ॥

सततं शिवतासमावेशः

षष्ठं धर्ममाह—

सततं शिवतासमावेशः ॥ १८ ॥

स त तं अस्याप्यर्थः पूर्वसूत्रस्थसदाशब्दवत् । शि व ता याः स मा वे शः आविर्भावः, कर्तव्य इति शेषः । नित्यकर्मानुष्ठानव्यतिरिक्तकाले शिवोऽहमस्मीति भावयेत् इति तात्पर्यम् ॥

वस्तुतस्तु—पूर्वधर्मेण सहायं विकल्प्यते, अन्यथा उभयोर्भावनयोः युगपत्संपादनासंभवात् । पूजाऽऽदिव्यतिरिक्तकाले अन्यतरस्यानुष्ठानं इति भावः ॥

यद्वा—पूर्वधर्मो मन्दाधिकारिणः अयं मुख्याधिकारिणः ॥ १८ ॥

कामादीनां वर्जनम्

सप्तममाह—

कामक्रोधलोभमोहमदमात्सर्याविहितहिंसास्तेय-[1]लोकविद्विष्टवर्जनम् ॥ १९ ॥

कामः वैषयिकी इच्छा इदं मे भूयात् इत्याकारिका । क्रोधः तमस उद्रेकेण जनितोऽसौ अन्तःकरणधर्मः । लोभः, द्रव्यादिनिष्ठस्वत्वत्यागप्रतिबन्धकोऽत्यन्तमनुरागविशेषः । मोहः, कार्याकार्याविचारणम् । मदः, गर्वः । मात्सर्यं, द्वेषजनितो गुणिनि दोषारोपः । अविहितहिंसा, रागेण भक्षणार्थं पश्वादिवधः । स्तेयं, परानुमत्या परद्रव्यहरणम् । लोकविद्विष्टं, मातृबुद्ध्याऽपि एकान्ते परस्त्रीसंलापादि । एतेषां वर्जनं त्यागः, कर्तव्य इति शेषः ॥ १९ ॥

एकगुरूपास्तिः

अष्टमं धर्ममाह—

एकगुरूपास्तिरसंशयः ॥ २० ॥

न विद्यते संशयो यत्रेति विग्रहेण असंशयः इत्येकगुरूपास्तिविशेषणम् । भिन्नलिङ्गत्वमार्षम् ॥

अयं भावः—अनेकगुरूपास्तौ पूर्वगुरूक्तविरुद्धं यदि वदेत् तर्हि संशयो भवेदेव । एकगुरूपास्तौ न संशयो भवेत् । अतः एकगुरूपास्तिः कार्येति भावः । गुरूपास्तेः "संप्रदायविश्वासाभ्यां" इति पूर्वसूत्रेणैव प्राप्तौ पुनर्विधानं एकं गुरुमाश्रित्य न गुर्वन्तरमाश्रयेत् इति इतरगुर्वाश्रयनिवृत्तिफलकेयं परिसंख्या ॥

एकगुरूपास्तिविध्यर्थविचारः

ननु—न परिसंख्याऽऽश्रयणं युक्तं, दोषत्रयापत्तेः । किं तु उपास्यगुरुमनूद्यैकत्वमात्रं विधीयते, इतरनिवृत्तिस्तु अङ्गलोपभिया, एकत्वस्य अङ्गत्वेन, इतरगुरूपस्तौ तल्लोपापत्तेः । न च गुरुद्वयाद्याश्रयणेऽपि प्रत्येकं गुरुषु प्रत्येकमेकत्वमस्तीति

[1] लोकविरुद्धस्त्रीविद्वि—अ.

कथमङ्गलोपः इति वाच्यम्; एकत्वं हि न संख्यारूपं विधीयते, तस्य वस्तुमात्रसाधारण्येन अव्यावर्तकत्वात्, किंतु सजातीयद्वितीयरहितत्वं, गुर्वन्तराश्रयणे तल्लोपस्त्वनिवार्यः। अतो न गुर्वन्तराश्रयणमिति एकत्वविधिरेव श्रेष्ठः इति चेत्—

आस्तां वा एकत्वविधिः। इममेवार्थं श्रीशिवः तन्त्रेषु भङ्ग्यन्तरेण प्रकटितवान्। रुद्रयामळे—

न देयं परशिष्येभ्यो देयं शिष्येभ्य एव च ॥ इति ॥

कुलार्णवे—

लब्ध्वा कुलगुरुं सम्यक् न गुर्वन्तरमाश्रयेत् ॥

योगिनीतन्त्रेऽपि—

न देयं परशिष्येभ्यो नास्तिकाय कुलेश्वरि ॥ इति ॥

उपनिषद्यपि—"गुरुरेकः" इति। क्वचिच्छिष्यधर्मे इममेवार्थं प्राह। क्वचिद्गुरुधर्मे 'परशिष्याय न वदेत्' इति भङ्ग्यन्तरेण। द्वयोः एकगुरूपास्तिरूपफले एव पर्यवसानं भवति। अयमभिप्रायः एषां वचनानां प्रतिभाति—पूर्वोक्तरुद्रयामळकुलार्णवयोगिनीतन्त्रेषु स्वसंशयच्छेत्तरि गुरौ सतीत्यध्याहार्यम्। अन्यथा—

मधुलुब्धो यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत्।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ॥ इति ॥

तन्त्रान्तरे, शक्तिरहस्येऽपि—"कौलिके गुरवोऽनन्ताः" इति वचनानां, निरवकाशताऽऽपत्तेः। एतेन पूर्वगुरुः असर्वज्ञः स्वसंशयच्छेदनेऽसमर्थः, यद्वा समर्थः स्वस्य संशयमच्छित्त्वा मृतः, तादृशशिष्यः "मधुलुब्धः" इति वचनानुसारेण गुर्वन्तरमाश्रयेत्। तत्राप्यल्पज्ञेऽपि गुरौ जीवति तदनुमत्या गृह्णीयादन्योक्तम्। तदप्युक्तं कुलार्णवे—

मन्त्रागमादि चान्यत्र श्रुतं नाथे निवेदयेत् ॥
गुर्वाज्ञया तद्गृह्णीयात् तदनिष्टं विवर्जयेत् ॥ इति ॥

गुरावल्पतातारतम्यं निर्णेतुं स्वयमसमर्थश्चेत् यं परिगृह्णाति तन्मार्गत्यागो न कार्यः। तादृशनिर्णयसमर्थश्चेत् तस्मिन् सोपपत्तिकमर्थं रहसि संबोध्य तदनुमत्या

यथाशास्त्रमर्थं गृह्णीयात् । यदि जीवन्नपि गुरुः असूयाऽऽदिना नानुजानाति तमुल्लंघ्य शास्त्रीयं सप्रमाणं मार्गमनुसरेत् । तदुक्तं स्पष्टं त्रिपुरारहस्ये—

गुरूक्तं शास्त्रसंशुद्धं समालोच्य धिया बुधः ।
कुर्वीतोपासनं सम्यगन्यथा परिहीयते ॥ इति ॥

एतेऽर्थाः सर्वेऽपि "मधुलुब्धः" इति वचनेन ज्ञापिताः । "एकगुरूपास्तिः" इत्यस्य सूत्रस्य अस्मिन्नेवार्थे तात्पर्यं उक्तयुक्तिगणवशाद्वर्णनीयम् ॥

ये च श्रीभास्कररायाणां "अन्यायो न्यायः" इति कौलोपनिषच्छ्रुतिभाष्ये गुरुसंप्रदायः असाधुश्चेदपि ग्राह्यः इति लेखनाभिप्रायं वर्णयन्ति, ते तदभिप्रायतत्त्वं न विदुः । कोऽयमभिप्रायः इति चेत्—उच्यते । कौलिकाचारमध्ये स्वसिद्धान्तविरुद्धं यद्याचरेत् स्वगुरुः, अन्यश्च कौलिको दयापरवशः सन् बोधयेच्चेत् गुरौ निवेद्य जीवति गृह्णीयात् । यदि वावदूकोऽन्यः कौलमार्गं दूषयितुं प्रवृत्तः स्यात् स्वयं तत्खण्डने अपटुरपि तत्र प्रामाण्यबुद्धिं न त्यजेत् । अत एव कौलिकाचारं [न ?] दूषयेत् इत्येव लिखितम् । एवं गुरौ स्वस्य किंचिज्ज्ञत्वसंशयो नास्ति, किंतु बहुतन्त्रवेत्तृत्वं निश्चितं चिरवासेन । स च न जीवति । तदाचारविरुद्धं यदि तन्त्रे क्वचिदुपलब्धं वचनं, तदा आचारस्य दुर्बलत्वात्, तन्मूलभूतप्रमाणोपलब्धिपर्यन्तं तस्याननुष्ठानरूपमप्रामाण्यं श्रौतस्मार्तानुष्ठाने पूर्वमीमांसानुसारेण । कौलिके तु पूर्वोक्तनिश्चयदशायां शास्त्रविरुद्धोऽप्यनुष्ठेय एवेति विशेषः । न तु गुरौ मन्दमतित्वनिश्चये । तथा ईदृशोऽभिप्रायः तत्रैव 'सद्गुरुसंप्रदायैकलभ्यत्वेन' इत्यत्र गुरौ सत्त्वविशेषणेन ज्ञापितः । इदं तत्त्वं— गुरौ असर्वज्ञत्वानुमापको हेतुः प्रभूतशास्त्रविरुद्धाचारवत्त्वं, सर्वज्ञत्वानुमापकश्च सर्वांशेन शास्त्रानुमतत्वे सति तद्विरुद्धकाचित्कत्वम् ॥

ननु "सुन्दरः सुमुखः स्वच्छः [1]सुलक्षो बहुतन्त्रवित्" इति कादिमते गुरुलक्षणस्योक्तत्वात् बहुशः तन्त्रविरुद्धानुष्ठातारं कथं गुरुं शिष्यः कुर्यात् । न हि सेवार्थं वत्सरोषितस्य विदुषः अज्ञानं संभवति । कथमीदृशमुदाहरणं संभवद्युक्तिकमिति चेत्—न, पूर्वमज्ञतादशायां केवलश्रद्धोद्रेकेण दीक्षितस्य तादृशगुरुं स्वीकृतवतः पश्चादध्ययनादिसंपादितज्ञानस्य पूर्वोक्तहेतुना अनुमानसंभवात् । तादृशेन पूर्वाचारः

[1] सुलभो—इति क्वचित्

त्याज्य एव । यद्युत्पथं दैवात् प्रतिपन्नः तदा सद्गुरोरपि संप्रदाय उत्पथप्रतिपत्त्युत्तरकालीनः त्याज्य एव, अशास्त्रीयत्वनिर्णयात् । इत्यलं पल्लवितेन ॥

अमृतानन्दनाथास्तु—योगिनीतन्त्रव्याख्याने "न देयं परशिष्येभ्यः" इत्यस्य ये विद्याऽन्तरेषु पारंपर्यक्रमेण अधिगताशेषरहस्याशेषपरमार्थाः संप्राप्तपूर्णाभिषेकाश्च ते परशिष्याः । तेभ्यो न देयम् । कुलार्णववचनं चैतत्परम् । एतद्भिन्नेषु देयं, "मधुलुब्धो यथा भृङ्गः" इति वचनात् । ईदृशव्यवस्थायां मानं च पूर्णाभिषेककर्ता यो गुरुः तस्यैव पादुकेत्याहुः ॥

तन्न । पूर्णाभिषेककर्तरि गुरुत्वस्यैव ज्ञापकमिदं वचनम् । तर्हि "तस्यैव पादुका" इति भागो व्यर्थः । यदि गुरुत्वं गुरुपादुकामन्त्रे तन्नाम च विधीयते तदा यो दीक्षाकर्ता स गुरुः इत्येकं, तस्य नाम पादुकायां योज्यं इत्यपरं वाक्यम् । तथा च वाक्यभेदः, स इत्यस्य अध्याहारः गुरुत्वमात्रविधौ वचनान्तरेण गुरुनामपादुकामन्त्रे योज्यमित्यनेनैव सिद्धौ शेषवैयर्थ्यं दुर्वारं च । तस्मात् "मधुलुब्धः" इति वचनेन नानागुरुषु सिद्धेषु पादुकामन्त्रे सर्वेषां नाम्नां पक्षे प्राप्तौ नियामकमिदम् । तथा सति न परसमीहितसिद्धिः । प्रत्युत अनेन वचनेन नानागुरुप्राप्तिरेव ज्ञाप्यते । तस्मात् अस्मदुक्ता सरणिरेव साधीयसी ॥

दृश्यते चाधुनिकानां शास्त्रविरुद्धानामाचाराणां प्रामाण्यं पूर्वमीमांसाविदामपि, यथा आन्ध्राणां मातुलकन्यापरिणयः । तथा द्राविडसुवासिनीषु कञ्चुकधारणाभावः,

सकञ्चुकयतिं दृष्ट्वाऽकञ्चुकसुवासिनीम् ।
सकेशां विधवां दृष्ट्वा सचेलस्नानमाचरेत् ॥

इत्याङ्गिरसवचनविरुद्धः । अतो न किंचिद्बाधकम् ॥

यदि केवलं गुरौ विश्वसेच्चेत् तर्हि स तिष्ठन्नेव मूत्रपुरीषोत्सर्गं कुर्यात् चेत् तदा स्वस्यापि करणापत्तिः । यदि च बहुतन्त्रविदुषि क्वचिद्वचनं तद्विरुद्धं दृष्ट्वा तदाचारे अप्रामाण्यग्रहः, स किं तावदंशे स्वीक्रियते, उत सर्वांशे । नाद्यः, लोके क्वचिच्चैत्रादावज्ञाताप्रामाण्यग्रहाचारे कदाचिदप्रामाण्यग्रहे सर्वत्र अप्रामाण्यशङ्कया न विश्वसन्तीति दृष्टं लोके । तद्वदत्रापि सकृद्व्यभिचारे सर्वत्र शङ्कया अननुष्ठानापत्तिः । सा च शङ्का सर्वत्र मूलदर्शनमन्तरा नापैति । सर्वत्र मूलशोधनार्थं उद्युक्तश्चेत् तत्र संप्रदायानुसरणविधिः व्यर्थः स्यात् । न च यत्र पक्षद्वयरूपो विकल्पः तत्र स्वगुरु-

संप्रदायाचरणविधिः सार्थकः स्यात् इति वाच्यम्; एवमधिकारिभेदेन यदि पक्षद्वयं व्यवस्थितं तदा तन्त्रशास्त्रे विकल्पविषयत्वं सर्वथा न स्यात्। यथा विशेषार्घ्यपात्राधारे त्रिपदं चतुष्पदं अपदं वेति पक्षास्तत्र गुरुणा त्रिपदमेवानुष्ठितं, तथैव शिष्येणाप्यनुष्ठितम्। कदाचित् त्रिपदंगतं, चतुष्पदं लब्धं, तेन अनुष्ठानं न स्यात्, गुरुणा अननुष्ठितत्वात्। विकल्पस्य उच्छेद एव न स्यात्। एकपुरुषकर्तृके कर्मणि प्रयोगभेदेन पक्षद्वयसमावेश एव हि विकल्पः॥

किंच—गुरुवाक्ये विश्वासविधिर्व्यर्थः। शङ्कानिवृत्त्यर्थं मूलान्वेषणार्थं उद्युक्तस्य कथं किमिति गुरुवाक्ये अतिविश्वासः। तस्मात् गुरोर्योग्यतामनुमाय च सद्गुरुवाक्यं विश्वसेत्॥

उमाऽऽनन्दनाथास्तु "एकगुरूपास्तिः" इतिवाक्यं समाप्य "असंशयस्सर्वत्र" इति योजयित्वा गुरुवाक्ये शास्त्रादौ सर्वत्र असंशयः इति व्याचक्रुः। तन्न; "संप्रदायविश्वासाभ्यां सर्वसिद्धिः", "विश्वासभूयिष्ठं प्रामाण्यम्", इत्याभ्यामेव अस्यार्थस्य प्राप्तत्वेन पुनरुक्त्यापत्तेः॥ २०॥

सर्वत्र निष्परिग्रहता

नवमं धर्ममाह—

सर्वत्र निष्परिग्रहता॥ २१॥

सर्वत्र मपञ्चकादिषु निष्परिग्रहता निर्गतः परिग्रहः इच्छा यस्य सः निष्परिग्रहः तस्य भावः तत्ता। "पत्नीपरिजनादानमूलशापाः परिग्रहाः" इत्यमरः। अत्रादानस्य परिग्रहस्य मूलं इच्छैव। एतादृशकोशानुसारेण परिग्रहशब्दः इच्छावाचकः। मपञ्चकं मे भूयात् इतीच्छया न स्वीकार्यमित्यर्थः। अयमेवार्थो भागवते स्पष्टं प्रतिपादितः—

> यद्घ्राणभक्षो विहितस्सुरायास्तथा पशोरालभनं न हिंसा।
> एवं व्यवायः प्रजया न रत्यै इमं विशुद्धं नु विदुः स्वधर्मम्॥
> ये त्वनेवंविदः पुंसः स्तब्धाः सदभिमानिनः।
> पशून् द्रुह्यन्ति विस्रब्धाः प्रेत्य खादन्ति ते च तान्॥

इति घ्राणभक्षः शास्त्रेण कथितं कर्तव्यमिति भक्षणं, आलभनं देवतोद्देशेन त्यागबुद्ध्या पश्वादिहननम् ॥

यद्वा—सर्वत्र वस्तुमात्रे निष्परिग्रहता स्वीयबुद्धित्यागः, स संपादनीयः । सर्वत्र ममता त्याज्येति यावत् ॥

यच्च निद्योत्सवनिबन्धे स्वभोगबुद्ध्या धनं न संपादनीयमित्यर्थकथनं, तच्चतुर्थाध्याये द्रव्यार्जनं क्रत्वर्थमिति पूर्वपक्षीकृत्य द्रव्यार्जनं केवलपुरुषार्थ इति जैमिनिसिद्धान्तविरुद्धम् ॥ २१ ॥

फलत्यागपूर्वककर्म

दशमं धर्ममाह—

फलं त्यक्त्वा कर्मकरणम् ॥ २२ ॥

फलं पूर्वोक्तं कृत्रिमं तत्साधनं च धर्मार्थकामा इति यावत् । फलविषयिणी इच्छा फलपदस्यार्थः । तं त्यक्त्वा कर्मणः विहितस्य करणं भवतीति शेषः । काम्यं कर्म न कर्तव्यमित्यर्थः । काम्यं कर्म न कर्तव्यं इति वक्तव्ये फलं त्यक्त्वा कर्तव्यं इति कथनात् काम्यानामपि कर्मणामीश्वरार्पणबुद्ध्या अनुष्ठानं कर्तव्यमिति ज्ञायते ॥

ननु भगवद्गीतायां

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

इति सकामोपासना भगवता प्रतिपादिता, तद्विरोध इति चेत्—न "चतुर्विधा भजन्ते मां" इत्यनेन लोकस्वभावो दर्शितः । काम्यं कर्म न कर्तव्यं इति जगौ । अत एव

यश्च कर्मफलत्यागी स त्यागीत्यभिधीयते ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥

इति कामरहितकर्मणः स्तुतिः ॥ २२ ॥

नित्यकर्मालोपः

एकादशं धर्ममाह—

अनित्यकर्मलोपः ॥ २३ ॥

नित्यं च तत्कर्म च नित्यकर्म, स्नानसन्ध्यापूजाऽऽदि, तस्य लोपः अननुष्ठानं नित्यकर्मलोपः, न विद्यते नित्यकर्मलोपो यस्मिन्नुपासके स अनित्यकर्मलोपः। भवेदिति शेषः। नित्यकर्म अवश्यं कर्तव्यमित्यर्थः। नित्यकर्म कर्तव्यमिति वक्तव्ये व्यतिरेकमुखेन कथनं त्यागे न केवलं क्रतुवैगुण्यं, प्रत्यवायो निरयश्चेति ज्ञापयति ॥ २३ ॥

ननु नित्यकर्मसाधनीभूतमपञ्चकालाभे कथं कार्यं इत्याशङ्कायामाह—

मपञ्चकालाभेऽपि नित्यक्रमप्रत्यवमृष्टिः ॥ २४ ॥

मपञ्चकालाभे मुख्यं नास्तीति न कर्मलोपः। किं तु प्रतिनिधिनाऽपि नित्यक्रमः नित्यपूजा तस्याः प्रत्यवमृष्टिः अनुष्ठानं कर्तव्यमिति शेषः ॥

ननु षष्ठाध्याये दर्शपूर्णमासे व्रीहीणामभावे कर्मलोप इति पूर्वपक्षं कृत्वा तेषां दृष्टपुरोडाशनिष्पत्तिफलकत्वेन नीवारैरपि तत्संभवात् नित्यकर्मणि व्रीहिनियमलोपेऽपि नित्यकर्मणः किंचिदङ्गलोपसहिष्णुत्वात् नित्यनैमित्तिके प्रतिनिधिनाऽपि कार्ये इति सिद्धान्तितम्। तादृशन्यायमूलकतया श्रौतस्मार्तकर्मसु प्रतिनिधिप्रचारोऽपि दृश्यते। अत्रापि तादृशयुक्त्यैव प्रतिनिधिसिद्धौ वचनं व्यर्थमिति चेत्—

न। नित्यवन्न्यायेन नैमित्तिकेऽपि प्राप्तौ तत्र प्रतिनिधिना नैमित्तिकक्रमनिर्वृत्तिर्मा भवतु, एतदर्थकत्वात्। नचैवं सति अलाभे नित्यातिरिक्तं न कार्यमित्यायातम्। तथा सति श्रौतपरिसंख्यारूपत्वेन स्वार्थत्यागः, परार्थकल्पना, प्राप्तबाधः, इति दोषत्रयापत्तिः इति वाच्यम्; तन्त्ररत्ने पार्थसारथिना अभ्युदयेष्ट्यधिकरणे "त्रेधा तण्डुलान् विभजेत्" इति वाक्यवैयर्थ्यभिया प्रत्युद्देशं वाक्यपरिसमाप्तिरूपो वाक्यभेदोऽङ्गीकृतः। किमु तादृशभीत्या दोषत्रयाङ्गीकारे। अत एव अस्मत्परमगुरुभिः उत्तरचतुश्शतीसेतुबन्धे द्विशतोत्तरद्वितीयश्लोके नैमित्तिकप्रकरणे "चक्रपूजां विशेषेण योगिनीनां समाचरेत्" इति मूलस्थविशेषेणेतिपदस्य नित्यपूजा-

मपेक्ष्य योगिनीवीराधिक्यभक्ष्यभोज्याद्याधिक्यादिनेति प्रथमं व्याख्याय, तत्रापरितोषेण "विशेषद्रव्येण वेत्यर्थः । तेन नित्यपूजायां विशेषद्रव्यालाभेऽपि प्रतिनिधिना निर्वाहः सूचितः इति नित्यपूजायामेव अभ्यनुज्ञा, नत्वन्यत्र" इति व्याख्याय अस्मिन्नर्थे साधकत्वेन इदमेव वाक्यं दर्शितम् ॥ २४ ॥

सर्वत्र निर्भयता

द्वादशं गुणमाह—

निर्भयता [1]सर्वत्र ॥ २५ ॥

सर्वत्र सर्वतः मपञ्चकस्वीकारे कौलमार्गावलम्बने च नरकादिप्रतिपादकानि यानि शास्त्राणि तेभ्यः सर्वेभ्यः निर्गतं भयं यस्मात् स निर्भयः तस्य भावः तत्ता, संपादनीयेति शेषः । तानि सर्वाणि शास्त्राणि रागिणं भीषयन्ति, कामं भीषयन्तु, अहन्तु न रागी, किंतु शास्त्रेण प्रवर्तितो न मे भीतिरिति निर्धारणेन निर्भयता संपादनीयेति भावः ॥ २५ ॥

सर्वसारभूतो धर्मः स्वस्य शिवाग्नौ होमः

सकलसिद्धान्तसारभूतं धर्ममाह—

सर्वं वेद्यं हव्यं इन्द्रियाणि स्रुचः शक्तयो ज्वालाः स्वात्मा शिवः पावकः स्वयमेव होता ॥२६॥

इति भावयेदिति शेषः । अन्तःकरणवृत्तिभिरिति वेद्यमित्यस्यादौ पूरणीयम् । अन्तःकरणवृत्ति वेद्यं सर्वं हविष्ट्वेन भावयेत् । यथा अग्नौ प्रक्षिप्तं हविः तदाकारं भवति, एवं वृत्तिवेद्यानां सर्वेषां शिवरूपेऽग्नौ होमे सति शिवाकारसंपत्तेः तेषु हविष्ट्वेन भावनं युक्तम् ॥

तादृशहविषः आधारभूतहोमसाधनीभूतजुहूरेव स्रुक्पदेन गृह्यते, न ध्रुवाऽऽदयः, तेषां स्रुक्पदवाच्यत्वेऽपि होमसाधनत्वाभावेन होमभावनाप्रकरणे ध्रुवाऽऽदीनामयोग्यत्वात् । न च स्रुचः एकत्वेन बहुवचनमनुपपन्नं इति वाच्यम् ; इन्द्रियाणामनेकत्वेन

[1] सर्वतः—ब.

तद्विशेषणस्य तत्समानवचनकत्वार्थं बहुवचनम् । न च आरोप्यारोपस्थले न समानवचनत्वनियमः, अत एव नैषधे—

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम् ॥

इति भिन्नलिङ्गवचनकः प्रयोगः, तथा च बहुवचनस्यागतिरिति वाच्यम्; स्रुवे स्रुक्त्वमस्ति । "स्रुचः संमार्ष्टि" इत्युक्तपूर्वोक्तसमूहात् पृथक्कृत्य "स्रुवमग्रे" इति विधानात् होमसाधनत्वं चास्ति इति तमादाय बहुवचनोपपत्तिः । न च एवमपि द्वयं जातं, बहुत्वं कथं इति वाच्यम्; "स्रुग्भ्यां स्रुवाभ्यां वा पत्नीस्संयाजयन्ति" इति वाक्येन क्वचित्स्रुवद्वयस्य सत्त्वात् । यद्वा—"ध्रुवया समिष्टयजुर्जुहोति" इति ध्रुवाया अपि होमशेषत्वात् जुहूध्रुवास्रुवान् गृहीत्वा बहुवचनोपपत्तिः सुवचेत्यलं अप्रकृतविचारेण ॥

जुह्वाद्यन्यतमत्वेन इन्द्रियाणि दश भावयेत् । इन्द्रियाणां पूर्वोक्तहविराधारत्वेन युक्तं तद्भावनम् । शक्तयः स्वनिष्ठाः संकुचिताः याः इच्छाज्ञानक्रियाः शक्तयः ता एव ज्वालाः । अग्नौ होमकर्तुः ज्वाला हस्तादिदाहकत्वेन दुःखदा इति लोके स्पष्टम् । तद्वत् होतुः संकुचितपरमशिवस्यैमाः शक्तयो दुःखदा इति ज्वालात्वेन भावनं युक्तम् । एवं स्वसंकुचितचैतन्यरूपो जीवः तदभिन्नो यः शिवः शुद्धचैतन्यं तं होमाधारभूताग्नित्वेन भावयेत् । स्वाभिन्नेति विशेषणात् स्वशिवयोरप्यभेदं भावयेदिति भावनाऽन्तरं ज्ञापितम् । यद्यपि इयं भावना "सततं शिवतासमावेशः" इत्यनेनैव प्राप्ता, तथाऽपि सा शिवोऽहमिति भावना, अत्र पावकोऽहमिति शिवस्य पावकत्वेन भावनमिति वैलक्षण्यम् । पावके प्रकाशत्वं शिवेऽपि प्रकाशत्वमिति युक्तं तथा भावनम् । स्वयं परिच्छिन्नचिद्रूपो होता होमकर्तृत्वेन भावयेत् । अयमर्थः तन्त्रान्तरे मन्त्रविशेषे स्फुटः—

अन्तर्निरन्तरमनिन्धनमेधमाने
मोहान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकासभूम्नि
विश्वं जुहोमि वसुधाऽऽदिशिवावसानम् ॥ इति ॥

अत्रैवकारेण—कर्मान्तरे स्वस्यानुष्ठानासामर्थ्ये पुत्रप्रियादीन् कर्तृप्रतिनिधित्वेन योजयन्ति, तेन च तत्कर्मजं फलं भवतीति शास्त्रसिद्धम् । अस्मिन् यज्ञे प्रतिनिधिना अनुष्ठिते कर्मजन्यफलं स्वस्य न भवतीति सूचितम् ॥ २६ ॥

भावनाफलं आत्मलाभः

एवमनुष्ठितभावनायाः फलमाह—

निर्विषयचिद्विमृष्टिः फलम् ॥ २७ ॥

निर्विषयायाः निर्विकल्परूपायाः चितः विमृष्टिः फलम् । पूर्वोक्तभावनाया इति शेषः ॥ २७ ॥

ननु किमीदृशफललाभेनेत्यत आह—

आत्मलाभान्न परं विद्यते ॥ २८ ॥

आत्मलाभात् स्वरूपलाभात् परं श्रेष्ठं, फलं इति पूर्वसूत्रस्थं अनुषज्यते, न विद्यते नास्तीत्यर्थः । "पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः" इति, "तमेवं विद्वानमृत इह भवति" इति च श्रुतिः इममर्थं प्रतिपादयति । मोक्षः परमपुरुषार्थः इत्यत्र न कोऽपि विवादं करोति । अतस्तादृशभावनया परमपुरुषार्थलाभः इति भावः । पूर्वं "स्वविमर्शः पुरुषार्थः" इत्यनेन पुरुषार्थस्वरूपं प्रतिपादितं, अत्र स्तुतिरिति न पौनरुक्त्यम् ॥

एतावत्पर्यन्तं पञ्चाम्नायसिद्धान्तरूपश्रीपरशुरामोक्तयो विचार्य व्याख्याताः । केशवशर्मा कश्चित् तदभिप्रायज्ञानासमर्थः ता दूषयामि इति केवलेर्ष्यया युक्तिशून्यान् प्रलापानभाणीत् । सुधियां तद्दर्शनेनैव युक्तिरहितत्वज्ञानं भविष्यति । मन्दधियां शङ्कानिवृत्त्यर्थं मयैव तद्युक्तिषु केवलप्रलापरूपत्वं दर्शितं मत्कृतसिद्धान्तशिरोमणौ । ग्रन्थविस्तरभयान्नेह लिख्यते । ये तद्बुभुत्सवः ते तत एव जानन्तु ॥ २८ ॥

सिद्धान्तोपसंहारः

"अत्रायं सिद्धान्तः" इत्यारभ्य प्रक्रान्तमर्थं उपसंहरति—

सैषा शास्त्रशैली ॥ २९ ॥

सैषा पूर्वोक्ता शास्त्रशैली, शास्तीति शास्त्रं पञ्चाम्नायरूपं तस्य शैली रीतिः भवतीति शेषः ॥ २९ ॥

एषा विद्या अतिगुप्ता

एतादृशं शास्त्रं श्रोतृप्रवृत्तये प्रशंसति—

वेश्या इव प्रकटा वेदादिविद्याः
सर्वेषु दर्शनेषु गुप्तेयं विद्या ॥ ३० ॥

वेश्या इव प्रकटाः सुलभाः वेदादिविद्याः । आदिना स्मृत्यादिः । वेश्योपभोगो द्रव्यादिव्ययेन यथा सुलभः एवं वेदादिविद्यालाभः द्रव्यादिदानेन सुलभः इत्यर्थः । अध्ययनस्य लोभमूलता शास्त्रेणैव प्रतिपादिता "षण्णां तु कर्मणां मध्ये त्रीणि कर्माणि जीविका" इति । अस्याः मोक्षसाधनीभूतब्रह्मविद्यायास्तु न कोटिकनकव्ययेनापि लाभः, किंतु गुरुकृपैकलभ्यत्वम् ॥

ननु अधिकद्रव्यव्यये गुरुः कृपां किमिति न कुर्यादिति चेत्—न कुर्यादेव । येन गुरुणा ब्रह्मविद्या प्राप्ता तस्य कोटिसुवर्णं तृणादपि तुच्छतरम् । तस्मिन् लोभः कथं भवेत् ॥

ननु लोभेन प्रवृत्तिमान् भवतु, तथाऽपि परेच्छया विद्यादाने प्रवृत्तौ स्वस्य हान्यभावात् प्रवर्तताम्, तथा च पूर्वविद्या द्रव्यवतैव लभ्या, इयं तु निर्धनेनापि लब्धुं शक्येति प्रकटतरेति चेत्—न । विद्वान् परेच्छया प्रवर्तमानः स्वप्रवर्तितवस्तुनि कार्यसिद्धिं दृष्ट्वैव प्रवर्तेत, न विफले । प्रकृते इयं ब्रह्मविद्या मलिनान्तःकरणेषु प्रवर्तिता न केवलं विफला, प्रत्युत गुरोरपि विद्यां नाशयति । उदाहृता एतद्विषये यास्केन श्रुतिः—

विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि ।
असूयकायानृजवेऽयताय न मां ब्रूया वीर्यवती तथा स्याम् ॥

इति । अस्यार्थः सुस्पष्टः ॥

ब्रह्मविद्याऽतिसंखिन्ना ब्रह्मिष्ठं ब्राह्मणं ययौ ।
गोपाय मां सदैव त्वं कुलजामिव योषितम् ।
शेवधिस्त्वक्षयस्तेऽहं इह लोके परत्र च ।

इत्यारभ्य—

एवमाद्या येषु दोषास्तेभ्यो वर्जय मां सदा ।
एवं हि कुर्वतो नित्यं कामधेनुरिवास्मि ते ।
वन्ध्याऽन्यथा भविष्यामि लतेव फलवर्जिता ॥

इत्येवमादिवचनैः गुरोरेव अपात्रे विद्यादाने स्वविद्यानाशः श्रूयते । स कथं अपात्रे केवलपरेच्छया विद्यामुपदिशेत् । तादृशोपदेशपात्रं दुर्लभम् ॥

अतः सर्वदर्शनेषु मध्ये—इति निर्धारणे सप्तमी—इयं उक्ता विद्या गुप्ता दुर्लभेत्यर्थः ।

इदानींतनगुरवस्तु ब्रह्मविद्यायाः वणिग्वद्विक्रेतारः । तत्र न गुरुत्वं, नवा शिष्यस्य सन्तापहानिः । प्रत्युत सोऽपि द्रव्यसेवनरागप्रवृत्तः पतत्येव । इत्थं च द्वावपि पतनसाधनमेव कुरुतः, न मोक्षसाधनम् । तदुक्तं [1]कुलार्णवे—

गुरवो बहवः सन्ति शिष्यवित्तापहारकाः ।
[2]दुर्लभोऽयं गुरुर्देवि शिष्यसन्तापहारकः ॥

इत्यलं भूयसा ॥ २० ॥

दीक्षाविधिः

एतावत्पर्यन्तं सिद्धान्तमनूद्य उपासकेन प्रथमं कर्तव्यां क्रियामाह—

तत्र सर्वथा मतिमान् दीक्षेत ॥ ३ ॥

सप्तमी षष्ठ्यर्थे, प्रकृत्यर्थः श्रीविद्योपास्तिः, षष्ठ्यर्थः संबन्धः तदव्यवहित-पूर्ववृत्तित्वं, तस्य दीक्षापदार्थे आश्रयतया अन्वयः, तस्य करणत्वसंबन्धेन

[1] प्रबोधचन्द्रोदये—ब, ब १.
[2] गुरुस्तु विरलो लोके—ब, ब १.

भावनायामन्वयः, तथा च श्रीविद्योपासनाऽव्यवहितपूर्ववृत्तिदीक्षया इष्टं भावयेत् इति विशिष्टबोधः । अत एवोत्पत्तिविधिः । सर्वथा अवश्यं मतिमान् पूर्वोक्तभूमिका-[1]मारूढः । एतत्पदस्वारस्यादेव अयमधिकारविधिरपि । तादृशभूमिकां [2]आरूढस्यैव अधिकारो नान्यस्य इति सिद्धम् ॥

ननु एकस्मिन्नेव विधौ उत्पत्तिविधित्वं अधिकारविधित्वं उभयं कथमिति चेत्—न, "चित्रया यजेत पशुकामः" इत्यादौ तथा दृष्टत्वात् । न च उपासनायामेव तादृशभूमिका[3]ऽऽरूढस्याधिकार इति पूर्वं व्यवस्थितम् । न हि दीक्षा उपासना, कथमत्रापि तादृशाधिकारापेक्षा । यच्च उपासनायां दीक्षाया अङ्गत्वेन यः प्रधाने अधिक्रियते सोऽङ्ग इति न्यायप्राप्तार्थस्य अनुवाद एव मतिमान् इत्यनेन कृत इति समाधानम्, तन्न मनोरमम्, अनुवादस्य फलाभावेन वैय्यर्थ्यापत्तेः, दीक्षायाः स्वतन्त्रफलवत्त्वेन अनङ्गत्वाच्चेति । अनेनैव तादृशभूमिका[4]ऽऽरूढस्य दीक्षाऽधिकारो विधीयते । उपासनायां दीक्षितस्यैव अधिकारः इत्यग्रे वक्ष्यति । तथा सति उपासनायां पूर्वोक्तभूमिका[5]ऽऽरूढत्वमार्थिकम् ॥

दीक्षास्वरूपतत्फलनिरूपणम्

ननु दीक्षात्वं किम्? न तावदुपास्तियोग्यताजनकक्रियात्वं, उपास्तियोग्यता-जनकत्वस्य सत्त्वे प्रमाणाभावात् । न तावत् प्रत्यक्षं अलौकिके संभवति । नाप्यनुमानं, लिङ्गाभावात् । नापि "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इतिवच्छ्रुतिरस्ति यतस्तन्निरूपितं कारणत्वं स्यात् । न च "विनोपनयनं यद्वद्द्विजानां सर्वकर्मसु । न योग्यता तथाऽत्रापि विना दीक्षां भृगूद्वह ॥" इति त्रिपुरारहस्ये व्यतिरेकव्याप्तेः दण्डाभावे घटाभावः इतिवत् प्रतिपादनात् व्यतिरेकव्याप्तिमूलः कार्यकारणभावः सिध्यति इति वाच्यम्; दीक्षित उपासीत इत्युपासनाऽधिकारि-स्तावकत्वात् । तर्हि दीक्षायाः फलं किमिति चेत्—उच्यते । अनन्तकोटिजन्मसंचितं यत् पापरूपं मलं तन्नाशः । तदुक्तं [6]निशाटनाख्यागमव्याख्याने तन्त्रालोके—

[1] मारुरुक्षुः—अ. [2] आरुरुक्षोरेव—अ. [3] रुरुक्षोरधि—अ.
[4] रुरुक्षोः—अ. [5] रुरुक्षुत्व—अ.
[6] तन्त्रालोकव्याख्याने निशाटनाम्नि—अ.

दीक्षया गळितेऽप्यन्तरज्ञाने पौरुषात्मनि ।
धीगतस्यानिवृत्तत्वाद्विकल्पोऽपि हि संभवेत् ॥
देहान्त एव मोक्षः स्यात् पौरुषाज्ञानहानितः ।
बौद्धाज्ञाननिवृत्तौ तु विकल्पोन्मूलनात् ध्रुवम् ॥
तदैव मोक्ष इत्युक्तं धात्रा श्रीमन्निशाटने ॥ इति ॥

अस्यार्थः—पौरुषं बौद्धं चेति ज्ञानं द्विविधम् । तत्र पौरुषं ज्ञानं स्वस्वरूपात्मकम् । बौद्धं च यन्महावाक्यजन्यं चरमवृत्तिरूपं तत्त्वज्ञानमित्युच्यते । एतदावरणरूपमज्ञानमपि द्विविधम् । तत्र पौरुषं पुरुषनिष्ठपातकम् । बौद्धं भेदबुद्धिः । तत्र दीक्षया पौरुषाज्ञाननाशेऽपि बौद्धमलस्य शास्त्रज्ञानेनैव नाश्यत्वात् दीक्षाऽनन्तरमागमसिद्धान्तज्ञानसंपादने तदैव मोक्षः । यदि शास्त्रज्ञानं न संपादितं, केवलदीक्षैव जाता, तस्य देहान्ते मुक्तिरिति । न च बौद्धमलसत्त्वे देहान्ते कथं मुक्तिरिति शङ्कनीयम् , त्रिपुरारहस्ये

दीक्षावन्तस्तु देहान्ते प्राप्य लोकं परात् परम् ।
सदाशिवेन ते सम्यक् प्रबुद्धाः शिवरूपिणा ॥

इति तादृशशङ्कायाः निरस्तत्वात् । एवं श्रौताग्निष्टोमादिदीक्षाऽर्थवादेऽपि "पाप्मनोऽपहत्यै" इति श्रूयते । एवं पूर्वमीमांसायामपि दीक्षाया यागजन्यापूर्वोत्पत्तौ सस्याद्युत्पत्तौ कर्षणमिव स्थलस्य आत्मनः शोधकत्वमित्येव सिद्धान्तितम् । ब्रह्मोत्तरखण्डे प्रथमाध्याये—"राज्ञः पञ्चाक्षरमन्त्रस्य कर्णप्रवेशमात्रेण तच्छरीरादनन्ताः काकाः निर्गताः" इति लिङ्गं च । एवं परमानन्दतन्त्रे दीक्षानामनिरुक्तौ—

दीयते शिवसायुज्यं [1]दीर्यते पाशबन्धनम् ।
अतो दीक्षेति कथिता . . . . . .

इति च । एवं बहुप्रमाणानुसारेण व्यतिरेकव्याप्तिप्रतिपादकवचनस्य अर्थवादरूपत्वात् । तथाचास्य लक्षणस्यासंभव एव स्यात् ॥

[1] क्षीयते—व.

एतेन सौभाग्यानन्दसन्दोहे द्वादशोल्लासस्यावतरणं "अधुना तस्याः साङ्गोपासनयोग्यताप्रतिपादकदीक्षां पृच्छति" इति, तन्मुख्यार्थमनुसृत्य समर्थनमशक्यमेव इति चेत्—न ; मुक्तिसाधनीभूतपौरुषमलनिवृत्त्यर्थक्रियात्वस्यैवादुष्टलक्षणत्वात् ॥

न च प्रकृतलक्षणविचारस्य तदुपजीव्यकैमर्थ्यविचारस्य चानुष्ठानेऽनुपयोगात् केवलपाण्डित्यप्रकटिनी काकदन्तपरीक्षेयमिति वाच्यम् ; अस्त्यनुष्ठाने वैषम्यं,—यदि पूर्वोक्तयोग्यताजनकं तर्हि दीक्षासंकल्पे योग्यतासिद्ध्यर्थमिति, इतरपक्षे पापक्षयार्थमिति ॥

दीक्षासंकल्पप्रकारविचारः

यच्च नित्योत्सवनिबन्धे "श्रेयस्कामोऽहममुकविद्याग्रहणार्थममुकगुरोर्दीक्षां ग्रहीष्यामि" इति, तदत्यन्तानवधानलिखितम् । तथाहि—यच्च श्रेयस्काम इति पदं तदास्तां, कथंचित्पापनाशस्यापि श्रेयोरूपत्वात् । यच्च "अमुकविद्याग्रहणार्थं" इति तदत्यन्तमशुद्धं, दीक्षायाः पापक्षयैकसाधनत्वस्य व्यवस्थापितत्वात् । आस्तां वा वन्ध्यापुत्रवत् विद्याग्रहणार्थत्वं, तथाऽपि श्रेयस्काम इत्यनेनैव तल्लाभे इदं पदं व्यर्थमेव । न च श्रेयोविद्याग्रहणमुभयं फलं, अतः द्वयोरुल्लेखः इति वाच्यम् ; "सर्वेभ्यो दर्शपूर्णमासौ" इत्यत्र तयोः सर्वफलसाधनत्वेऽपि प्रयोगभेदेनैव भिन्नफलं नैकप्रयोगेण फलद्वयमिति चातुर्थिकन्यायविरुद्धस्य अनादरणीयत्वात् । अत एव तन्त्ररत्ने—"एकस्यैकजातीयव्यापारेण नियतैकजातीयैकफलजनकत्वं लोके दृष्टम् । तत्रैकजातीयजनकत्वं सर्वेभ्य इति वचनेन बाध्यतां, एकफलजनकत्वं केन बाध्यताम्" इति पार्थसारथिनोक्तम् । किंच दीक्षापदार्थः शक्तिप्रवेश-चरणविन्यास-मन्त्रोपदेशरूपः । तादृश्याः दीक्षायाः फलसाधनत्वं वा, तद्ग्रहणस्य वा । आद्ये संकल्पे फलसाधनीभूतक्रियामुत्पादयामीत्यर्थके फलासाधनक्रियावाचकं ग्रहीष्यामीति पदं व्यर्थम् । द्वितीये ग्रहणस्य साधनत्वं निर्मूलं, पूर्ववचनविरोधश्च । किं च—अमुकगुरोः इत्युच्चारणफलं दृष्टमदृष्टं वा तिथ्याद्युच्चारणवत् । नाद्यः, अयं मम गुरुर्भवतु इति स्वेच्छाप्रकाशादन्यत् दृष्टं फलं दुर्वचम् । तच्च तल्लिखितवरणेनैव भवितुमर्हति, किमेतदुच्चारणेन । नान्त्यः, "देशकालौ संकीर्त्य" इति वचनात् तेषां अपूर्वजनकत्वम् । न हि गुरुनामोच्चार्य इति वचनमस्ति, येनादृष्टं तेन भवेत् ।

किंच—तदभिमतं श्रेयोविद्याग्रहणरूपफलं स्वनिष्ठम्। तथा सति ग्रहीष्यामि इति परस्मैपदान्तप्रयोगः "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति पाणिन्यनुशासनविरुद्धः। एवं अनेकदोषग्रस्तत्वात् एवंसंकल्पस्त्वनादरणीयः। किंतु "पौरुषाज्ञाननिवृत्तये श्रीविद्यया दीक्षिष्ये" इति संकल्प एव श्रेयान्॥

तान्त्रिकसंकल्पाङ्गभूतः अष्टाङ्गोल्लेखः

[1]शिष्यसंकल्पे नाष्टाङ्गोल्लेखः, दीक्षाहीनत्वेन तान्त्रिकेऽनधिकारात्। अग्रे गुरुसंकल्पे तदुल्लेख आवश्यकः, शिष्यस्यापि दीक्षाऽनन्तरभाविकर्मण्युल्लेखः॥

ननु अष्टाङ्गस्य सूत्रे अनुक्तत्वात् किमिति तद्ग्रहणमिति चेत्—सत्यम्। यद्यपि नास्ति ग्रहणं, तथाऽपि श्रौतस्मार्तादिनिखिलकर्मसु आदौ संकल्प अव्यभिचरितो दृष्टः। प्रकृतेऽपि तद्वत् संकल्प आवश्यकः। संकल्पस्यावश्यकता मूले अधिकतरं गाणनायकीयसपर्यायामुच्यते। संकल्पो नाम विद्यमानदेशकालोल्लेखनपूर्वकफलोल्लेखनसहितप्रकृतकर्मानुष्ठानविषयिणी प्रतिज्ञा। तदुक्तं रहस्यार्णवे—

> यत्र देशे साधकस्तु स्थितस्तद्देशमुच्चरन्।
> उल्लिख्य तत्कालमपि प्रतिज्ञा कर्मणस्तु या।
> फलमुद्दिश्याहमिति संकल्पो जलहस्ततः॥ इति॥

तत्र कालस्य पञ्चाङ्गतः अष्टाङ्गस्य अश्वप्रतिग्रहन्यायेन संनिकृष्टत्वात् अष्टाङ्गोल्लेखनं सूत्रानुयायिनामावश्यकम्। अतः अष्टाङ्गं तत्साधनप्रकारश्च उच्यते॥

तत्र अष्टाङ्गानि—१–युगं, २–परिवृत्तिः, ३–वर्षः, ४–मासः, ५–दिवसः, ६–नित्या, ७–वारः, ८–घटिकोदयः, इति। तन्त्रशास्त्रे युगानि ३६, एकस्य युगस्य परिवृत्तयः ३६, एकस्याः परिवृत्तेः वर्षाः ३६, एकवर्षस्य मासाः १६, एकमासस्य दिवसाः ३६, नित्याः ३०, वाराः ९, घटिकोदयः ५,। एवमष्टाङ्गसिद्धावुपायः कथ्यते॥

तत्रादौ शालीवाहनशकसाधनोपायः कथ्यते। इभाक्षिः २८, षष्टिः ६०, गुणितः १६८०, इभाम्यङ्केन ३८ संयुतः।

[1] अष्टाङ्गनिरूपणमिदं केषुचिदाकरेषु नोपलभ्यते.

नर्मदोत्तरभागेऽथ तस्या दक्षिणभागके ।
अङ्कवेद ४८ युतः कार्य इभाक्षिः षष्टिभिर्हतः ॥
प्रभवादिगताब्दानां संख्यया योजयेत् पुनः ।
वर्तमाना शालिवाहशकसंख्या समीरिता ॥
प्रभवाद्यक्षयान्तानां भवेत् परिवृतिस्तु या ।
वर्तमाना तदीयेयं संख्याऽष्टाविंशतिः स्मृता ॥

इतः परिवृतिसंख्यां दृष्ट्वा च तां गुणेत् । षष्टिभिस्तु शके ज्ञाते न यतेदीदृशश्रीमें वर्तमानशालिवाहनशकसंख्या नन्दाद्रिक्ष्माग्नि—३१७९—संयुक्ता गतकल्यब्दगणः यथा शके—१७५५ अस्मिन् ३१७९ एतद्योगे गतकल्यब्दगणः—४९३४ । एवंगत-कल्यब्दगणं साधयित्वा तस्मात् अहर्गणसिद्ध्यर्थं उपायः क्रियते । गतकल्यब्दगणे नगनवेभवेदैः—४८९७ ऊनिते शिष्यते योऽङ्कः एकादिदशान्तः तत्संख्याकं अङ्कजालं ध्रुवकाङ्कजाले विघट्यादिदिनान्ते योजयेत् । एकादशशेषे प्रथमदशमाङ्कजालद्वयं ध्रुवके योजयेत् । एकविंशतिशेषे प्रथमं विंशं च ध्रुवके योजयेत् । एवमेकत्रिंशतमारभ्य एकोनषष्टिपर्यन्तं ज्ञेयम् । तद्रहस्यमित्थम्—नगनवेभवेदैरूनिते कल्यब्दगणे यः शेषः तस्मिन् षष्ट्या भक्ते शेषाङ्कैः लेखनसमये यदि द्वौ तर्हि तत्समसंख्याकं अङ्कजालं ध्रुवके योजयित्वा विघटिकादिषष्ट्या भक्तं लब्धमुपर्युपरि योजयेत् । स च तद्वर्षसंबन्धिमेष-संक्रान्त्यहर्गणः । एवंगतकल्यब्दगणेऽनेनोनितैकोनपञ्चाशच्छेषपर्यन्तं षष्ट्या भागो नास्तीति यदा गतकल्यब्दः एतत्संख्याकस्तदा नगनवेभवेदन्यूने षष्टिसंख्या शिष्टा षष्ट्या भक्ते शेषः शून्यं तदा शून्याङ्कजालं ध्रुवके योजयेत् । स मेषसंक्रान्त्यहर्गणः । योज्यानि अङ्कजालानि लिखन्ति । प्रथमं द्वितीयं तृतीयं चतुर्थं पञ्चमं षष्ठं सप्तमं अष्टमं नवमं दशमं विंशं त्रिंशं चत्वारिंशं [1]पञ्चाशत् शून्यं ध्रुवकाङ्कजालं इति सिद्धान्तजालानि । यदा गतकल्यब्दगणः इभबाणाङ्कवेदसंख्याको भवति तदा वर्षगणः शैलाङ्के-भवेदैरूनितः कार्यः । ततो यच्छेषे षष्ट्या भक्ते यल्लब्धं तेन गुणितं यच्छून्याङ्कजालं तत्पूर्वध्रुवकाङ्कजाले योजयित्वा ध्रुवकं संस्कृत्य पश्चात् प्रथमाद्यङ्कजालं पूर्ववद्योजयित्वा अहर्गणं साधयेत् । इभेष्वङ्कवेदन्यूने गतकल्यब्दगणे उक्तध्रुवकसंस्कारो नास्ति । एवमहर्गणं साधयित्वा गणं नवभिर्विभज्य शेषोऽतीतवासरः तस्य यल्लब्धं तच्चतुर्भिर्विभज्य

[1] पञ्चाशत् इत्येतन्नास्ति—अ.

तल्लब्धं पृथक् संस्थाप्य तच्छेषं नवभिर्विगुण्य तत्र गतवारसंख्यां योजयेत् । एवं सति सा संख्या गतदिवसस्य ज्ञेया । पूर्वस्थापितलब्धे षोडशभिर्भक्ते शेषो गतमाससंख्या भवति । तल्लब्धे षट्त्रिंशता विभक्ते शेषो गतवत्सरसंख्या । तल्लब्धं पञ्चाशद्युतं षट्त्रिंशद्भक्तं शेषं गतपरिवृत्तिसंख्या । लब्धं गतयुगसंख्या । एवं मेषसंक्रान्तिकालीनाहर्गणे साधिते तदुत्तरं मध्ये यदाकदाचिदहर्गणसाधनेच्छायां तदुपाय उच्यते । तत्र मेषमारभ्य यस्मिन् दिने अहर्गणनेच्छा तदव्यवहितपूर्वं संक्रान्तिः या तदीयां वक्ष्यमाणां संख्यां अहर्गणे योजयित्वा तत्संक्रान्तिमारभ्य इष्टदिनपर्यन्तमतिक्रान्ता यावन्तो दिवसाः तावत्संख्यां योजयेत् । इष्टदिनाहर्गणं भवति । तत्र—वृषे, मिथुने, कर्के, सिंहे, कन्यायां, तुलायां, वृश्चिके, धनुषि, मकरे, कुंभे, मीने । इतः परं युगादिघटिकान्तानां नामोच्यते । युगपरिवृत्तिवर्षाणां षट्त्रिंशतां क्रमेण आदिक्षान्तानां वर्णानां नामानि यथा प्रथमं अकारात्मकयुगं अयुगं कयुगं द्वितीयं एवमग्रेऽपि परिवृत्तिवर्षेषु ज्ञेयम् । मासानां षोडशानां क्रमेण षोडशस्वराः नामानि । षट्त्रिंशद्दिवसेषु युगपत् षट्त्रिंशदकारादिक्षकारान्ताः वर्णाः सानुस्वाराः शिवाद्यवनिपर्यन्तं षट्त्रिंशत्तत्त्वानि च मिळित्वा क्रमेण नामानि । यथा—अं शिवतत्त्वदिवस इति । चरमस्वररहिता अकाराद्यनुस्वारान्ताः अनुलोमविलोमेन त्रिंशद्वर्णाः । कामेश्वर्यादिचित्रान्ताः पञ्चदश नित्याः अनुलोमविलोमाश्च मिलित्वा त्रिंशत् । नित्यानाम यथा—अं कामेश्वरीनित्यायामिति । वाराणां नवानां क्रमेण अकचटतपयशषाः इति वर्णाः नव । प्रकाशानन्दनाथ-विमर्शानन्दनाथ-आनन्दानन्दनाथ-ज्ञानानन्दनाथ-सत्यानन्दनाथ-पूर्णानन्दनाथ-स्वभावानन्दनाथ-प्रतिभानन्दनाथ-सुभगानन्दनाथेति नवनाथाः । वारवर्णा ये नव तद्युक्तनवनाथाः क्रमेण नववाराः । यथा—अं प्रकाशानन्दनाथवासर इति । उदयघटिकानां पञ्चानां नाम क्रमेण—अएचतय इति पञ्च वर्णाः ज्ञेयाः । एवमष्टाङ्गोल्लेखः तान्त्रिककर्मादावावश्यकः । देशस्य तन्त्रे अनुक्तत्वात् स्मार्तस्यैवोल्लेखः ॥

केचित्तु तान्त्रिकोऽष्टाङ्गो न सहज इति शास्त्रप्रसिद्धकालस्य समुच्चयमिच्छन्ति "देशकालौ समुल्लिख्य चाष्टाङ्गस्थितिरेव च" इति परमानन्दतन्त्रानुसारेण । तन्न; देशकालावित्यत्र कालः कीदृशः इत्याकांक्षापूरकं तन्त्रस्थाष्टाङ्गपदं, न तु समुच्चयविधायकं, एवकारस्वारस्यात् ॥

तन्त्रान्तरोपसंहारविचारः

एवमग्रे अमुकगोत्रो अमुकशाखाऽध्यायी अमुकशर्मादिरहं चतुर्विधपुरुषार्थ-सिद्ध्यर्थं स्वेष्टानुग्रहाय अमुकगोत्रं अमुकशाखाऽध्यायिनं अमुकशर्माणं त्वां गुरुत्वेन वृणे इति संकल्पः किं कल्पसूत्रानुसारेण—

बह्वल्पं वा स्वगृह्योक्तं यस्य यावत् प्रकीर्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥

इतिवचनमनुसृत्य तन्त्रान्तरानुपसंहारेण अयं प्रयोगः, किं सर्वतन्त्रमुपसंहृत्य, किं स्वेच्छया । नाद्यः, सूत्रे वरणस्य अनुक्तत्वात् । द्वितीये तन्त्रान्तरे प्रतिमाब्रह्मादि-वरणचरुनिर्माणतद्दक्षणादित्यागोऽनुचितः । तृतीयश्च स्वकपोलकल्पितोऽश्रद्धेय एव । किंच तन्त्रान्तरे—

कर्तुं कारयितुं चैव दीक्षाकर्म महेश्वरि ।
आचार्यत्वेन त्वां वृणे इति पादसमीपतः ॥

इति वरणे करिष्यमाणेऽपि दीक्षाकर्मणि आचार्यं वृणे इत्येव वक्तव्यमिति वदति । सर्वत्र श्रौते स्मार्ते च ऋत्विग्वरणे—"अस्मिन्नग्न्याधानेऽध्वर्युं त्वां वृणे", "अस्मिन्नुद्यापनाख्ये कर्मणि आचार्यं त्वामहं वृणे", इत्याचारो दृश्यते । इह तु कर्मनाम त्यक्त्वा फलवाचकं पुरुषार्थसिद्ध्यर्थं अनुग्रहार्थं चेति वरणवाक्ये लिखितम् । तदतीव चित्रम् । तस्मात् सूत्रानुसारिभिः वरणं न कार्यम् । न च वरणाभावे गुरुणा अवृतेन कर्म कथं कार्यं इति वाच्यम्; त्वं मम दीक्षां कुरु इति लौकिकवरणेनापि तत्संभवात् । न हि वयं सर्वथा निराकुर्मो वरणं, कर्माङ्ग-मित्येव ब्रूमः ॥

एवमेव पुण्याहवाचननान्दीश्राद्धे न कार्ये, अनुक्तत्वात् । न च तन्त्रान्तरोप-संहारो मा भवतु, तथाऽपि स्मृतिप्राप्तं पुण्याहवाचनं नान्दीश्राद्धं च अनिवार्यम्, अन्यथा—"क्षुते आचामेत्" इति प्राप्ताचमनमपि न स्यात् इति वाच्यम्; यदि पुण्याहवाचननान्दीश्राद्धे तान्त्रिके स्मृतिप्राप्ते एवानुवर्तेते, तर्हि तन्त्रान्तरे—

गणेशं पूज्य पुण्याहं वाच्य नान्दीमुखान् यजेत् ।

इति विधिः व्यर्थ एव स्यात् । तस्मात् स्मार्तपुण्याहादिधर्माः कर्माङ्गत्वेन नायान्ति इत्यत्र इदमेव ज्ञापकम् । यच्च "क्षुते आचामेत्", "न कलञ्जं भक्षयेत्", इति पुरुषार्थं तच्च प्राप्तमपरिहार्यम् ॥

न च एवं शिष्यगुरुलक्षणधर्माणामपि प्राप्तिः न स्यात् इति वाच्यम्; अस्ति तस्य प्राप्त्यवकाशः । तत्र येन विना आकांक्षा न पूर्यते तच्च तन्त्रान्तरस्थमपि गृहीत्वा आकांक्षां पूरयेत् । शाब्दबोधे आकांक्षा द्विविधा, उत्थिता उत्थाप्या चेति । यथा आद्या पचतीत्युक्ते कं पचति केन पचति कः पचतीति । द्वितीया स्तोकं पचतीति । तत्र स्तोकपदस्य वैयर्थ्यभिया कथं पचति इत्याकांक्षा उत्थाप्या । प्रथमस्थले स्वत उत्थितायाः शाब्दाकांक्षायाः शब्दमन्तराऽनिवृत्तेः अध्याहृतस्य स्थलान्तरस्थस्य वा शब्दस्य पूरणमावश्यकम् । तत्र अध्याहारात् वरं तन्त्रान्तरस्थशब्देनैव आकांक्षापूरणम् । एवं सति "मतिमान् दीक्षेत" इत्युक्ते मतिमत्त्वस्य केवलस्य अव्यावर्तकतया कीदृशं मतिमत्त्वं इत्याकांक्षा अवश्यमुदेति । उदिताकांक्षापूरकं तन्त्रान्तरोक्तशिष्यलक्षणवत्त्वमेव मतिमत्त्वं कल्प्यते । एवं गुरौ "सद्गुरुः क्रमं प्रवर्त्य" इत्यग्रिमसूत्रे उक्तत्वात्, सत्त्वं किं इत्याकांक्षापूरकतया गुरुलक्षणानि च योज्यानि । अत एव बोधायनाचार्याः—"तान्न मिथः संसादयेत्" इत्याहुः । अत्र भवस्वामी "तान् शालिकिशाखोक्तान् पक्षान् तदन्यशाखी न संसादयेत् एकप्रयोगे मेलनं न कुर्यात् । ब्राह्मणानां बहुत्वात् शाखानामनन्तत्वात् तदर्थस्य चासर्वज्ञेन उपसंहर्तुमशक्यत्वात् तावन्मात्रं सुखं बुद्ध्वा अनुष्ठाय सर्वे कर्मफलं प्राप्नुयुः इति कल्पसूत्राण्यारब्धानि आचार्यैः" इति । अस्यापवादस्तत्रैव "अविशेषोक्तैः विशेषोक्ताश्च शेषत्वेन संबध्यन्ते" इति । अत्र भवस्वामी—"अविशेषोक्तैः विशेषोक्ताः सामान्यत उक्तस्य गुणविशेषाः अन्यसूत्रोक्ता अपि शेषत्वेन अङ्गत्वेन संबध्यन्त इति" । "तान्न मिथः संसादयेत्" इत्यस्योदाहरणं यथा बौधायने सोमाभिषवार्थं केवलवसतीवरीग्रहणम् । सूत्रान्तरे वसतीवरीणां एकधानानामपि समुच्चयः । तदनुसारेण बौधायनानामेकधानाप्राप्तौ तान्न मिथः संसादयेत् इति । एवं बौधायने केवलं शाखाछेदनमात्रमुक्तम् । अन्यसूत्रे शाखाछेदनमाहरणं च समन्त्रकम् । तानपि न संसादयेत् । अनया दिशा अन्यान्यप्युदाहार्याणि । एतदपवादोदाहरणं यथा बौधायने पलाशशाखैव सान्नाय्ये विहिता, तस्यास्तत्सूत्रिणा-

मलाभे सूत्रान्तरोक्तशमीशाखा ग्राह्येति । तत्र मूलम्—उक्तालाभे कीदृशी शाखा ग्राह्येति उत्थिताकांक्षावत्त्वात् तत्पूरकं सूत्रान्तरं शमीशाखाविधायकम् । एवं बौधायने—"अग्नीनन्वादधाति" इत्यविशेषेण विहितम् । कथमन्वाधानं कर्तव्यमिति विशेषाकांक्षायां "अपरेण गार्हपत्यमुपस्थं कृत्वा" इति "ऊर्ध्वज्ञुरासीनोऽन्वाहार्यपचनं" इति सूत्रान्तरोक्तधर्माः शेषत्वेनान्वेतुमर्हन्ति । न तथा पूर्वोक्तैकधरनाऽऽकांक्षाऽस्ति । अतो न समुच्चयः ॥

एतेन एतत्सूत्रानुसारिभिरपि तन्त्रान्तरोक्तं पात्रत्रयं पात्रचतुष्टयं वा सादनीयमिति यदब्रुवन् तदसाध्विति स्फुटम् । यद्यविशेषेण पात्रासादनं कुर्यादित्येव स्यात् तदा कति पात्राणि कथमासादयेत् इति विशेषाकांक्षा उदेति । तदा तदपवादशास्त्रप्रवृत्तिरपि स्यात् । नचैवमिहास्ति येन तथा स्यात् ॥

एतेन निबन्धे सामयिकानां स्वस्य च तत्त्वशोधनार्थं देव्याः पश्चाद्भागे लौकिकं कलशं संस्थाप्य संस्कृतद्रव्यं किंचित् क्षिपेत् इति लेखोऽपि निर्मूलः, "शिष्टैः सार्धं चिदग्नौ हविःशेषं हुत्वा" इति विशेषार्घ्यशेषस्यैव प्रतिपत्तिकथनात् ॥

अत एव बौधायनाचार्याः शास्त्रसंकरं न कुर्यादित्युक्त्वा संकरकरणे प्रत्यवायमप्याहुः—

स्वशास्त्रे वर्तमानो यः परशास्त्रेण वर्तते ।
भ्रूणहत्यासमं तस्य स्वशास्त्रमवमन्यतः ॥ इति ॥

नचैवं पूर्वोक्तरीत्या अनुष्ठितिरुदासीनस्थले भवतु, यस्याकरणे शास्त्रान्तरे निन्दा बह्वी तस्यानुष्ठानं सर्वैः कार्यं इति वाच्यम् ; आतञ्चनप्रकरणे "[1]तद्यत्कलैः राक्षसम्" इति कलनिन्दां कृत्वा "दध्नाऽऽतनक्ति" इति शाखाऽन्तरे विहितम् । तदन्यशाखायां "ओषधयः पूतीकाः कलाः" इति कलैः आतञ्चनं विहितम् । एवं [2]पत्नीसंयाजासमिष्टयजुरनुष्ठाने बहुनिन्दा क्वचिच्छ्रूयते । बौधायनैर्निन्दा न कृता । तावतैव परनिन्दामनादृत्य समिष्टयजुरनुष्ठानं बौधायनानुयायिनः कुर्वन्ति शिष्टाः । तस्मात् परशास्त्रे निन्दा अकिञ्चित्करा ॥

[1] तद्व—अ. [2] पित्र्यायां समि—ब, ब१.

न च त्रिपुरारहस्ये—

तन्त्रानुक्तं सूचितं तु तथाऽन्येष्वपि दूषितम् ।
अकृतं यत्कर्म[1]राम विकल्पेन विवर्जितम् ।
तदन्यस्मादुपादेयमेष शास्त्रस्य निर्णयः ॥

इत्यस्याः गतिविरहं इति वाच्यम्; यस्याननुष्ठाने परशास्त्रे निन्दा स्वशास्त्रे च विकल्पः तस्य तत्र निन्दा यद्विषयं परशास्त्रे तदादर्तव्यं, तावता स्वशास्त्रहानिविरहात्। यथा आपस्तम्बसूत्रे वाजपेये अग्निचयननिन्दा, बौधायने न निन्दा कृता, किंतु चोदकशास्त्रेण उत्तरवेद्या सह विकल्पितम् । तत्र स्वशास्त्रस्य उत्तरवेद्यनुष्ठानेऽपि हान्यभावात् निषेधोऽप्यनुग्राह्यः—उत्तरवेदिरेवानुष्ठेया न चयनमिति ॥

तथा अत्रापि तादृशस्थले अनुष्ठानार्थं इदं वचनम्, न नित्यवच्छ्रुतस्य शास्त्रस्य बाधार्थम् । एतद्वचनस्य गत्यन्तरं श्रीविद्याप्रकरणे विस्तरेण वक्ष्यामः ॥

अस्तु वा—

निषिद्धं वर्जयेत्तन्त्रान्तरे किंचिन्महेश्वरि ।
यतस्तदेकशास्त्रं वै मन्त्रैक्याद्देवतैक्यतः ।
तस्मात् स्वशास्त्रे यत्किंचिन्निषिद्धं परिवर्जयेत् ।
अन्यत्स्वतन्त्रानुक्तं तु समर्थ उपसंहरेत् ।
स्वतन्त्रेणाविरुद्धं तु यावदन्यत् समाचरेत् ।
तावदभ्युदयाधिक्यं भवेत्तस्य तु निश्चितम् ।
आकांक्षितं चाप्यन्यस्मादाहरेदेव किंचन ॥

इति तन्त्रान्तरवचनानुसारेण पुण्याहवाचनादीनां उपसंहारे फलाधिक्यम् । अननुष्ठाने अवैगुण्यमिति रहस्यम् ॥

पात्राधिक्यं च स्वशास्त्रविरुद्धं हेयमेव, वस्तुतो लिखिततन्त्रवचसां अग्रे पात्रासादनप्रकरणे वक्ष्यमाणरीत्या गतिसंभवात् अनुपपत्तिलेशाभावात् । एकप्रयोगे यत्सूचितं आकांक्षितं कर्मसामान्ये अव्यभिचरितसंबन्धं च [तत्] अन्यस्मात् ग्राह्यं नान्यदिति राद्धान्तः । एतद्रीतत्याग्रे स्पष्टीकरिष्यामः ॥

[1] डामरिवि—अ, अ १.

इत्थं च यः पुरुषः सर्वतन्त्राण्युपसंहृत्य यावदङ्गेष्वियत्तां संपाद्य एकरूपं प्रयोगविधिं निर्माय अनुष्ठातुं समर्थः तस्य सर्वज्ञस्य तादृशकर्मणः श्रेयोऽधिक्यं भविष्यत्येव । यस्त्वेतादृशेऽसमर्थः स त्वाकांक्षितादिमात्रं तन्त्रान्तरात् गृहीत्वा स्वशास्त्रमात्रानुष्ठानेन कृतार्थो भविष्यत्येव । न तु तन्त्रान्तरस्थानां केषां चिदुपसंहारः केषां चिदनुपसंहारः इत्यर्धजरतीयन्यायो युक्तः । निबन्धकारो न्यायगन्धमजानन् स्वेच्छया कानिचिदुपसंहरन् कानिचित् परित्यजन् देवानांप्रिय इति मन्तव्य इत्यलमतिलेखनेन ॥

सर्वथेत्यनेन दीक्षां विना नात्यन्तिकी मुक्तिः इति सूचितम् । तत्र स्पष्टं प्रमाणं त्रिपुरारहस्यस्थं पूर्वमेव लिखितम् ॥ ३१ ॥

दीक्षात्रयम्

एवं दीक्षां विधाय तत्र अवान्तरभेदवतीषु तासु एककालसंबन्धं विधातुं आदौ तां विभज्य विभागप्रयोजकं धर्मं च प्रदर्श्य तासु तिसृष्वपि एककालसंबन्धरूपं गुणं विधत्ते—

दीक्षास्तिस्रः शाक्ती शांभवी मान्त्री चेति । तत्र शाक्ती शक्तिप्रवेशनात् शाम्भवी चरणविन्या-सात् मान्त्री मन्त्रोपदिष्टया सर्वाश्च कुर्यात् ॥ ३२ ॥

चेतीत्यन्तेन विभागं कृत्वा तासां नामकथनम् । तत्र तासु मध्ये शाक्तीत्यस्यार्थं विवृणोति शक्तिप्रवेशनात् । जातेति शेषः । यद्वा— शक्तिप्रवेशनात् इति हेतौ पञ्चमी । शक्तिप्रवेशनाद्या दीक्षा शक्तिप्रवेशहेतुकेत्यर्थः । एवमेवाग्रेऽपि । प्रवेशनादिति स्वार्थे ल्युट् । शक्तिप्रवेशनं नाम अग्रे 'तदमृतक्षाळितं' इत्यारभ्य 'पाशान् दग्ध्वा' इत्यन्तप्रतिपादिता क्रिया । चरणविन्यासो नाम शिष्यशिरसि गुरुकर्तृकं कामेश्वरीकामेश्वरयोः रक्तशुक्लचरणभावनम् । मन्त्रोपदेशस्तु स्पष्टः, शिष्यमात्रश्रावणविषयगुरुकर्तृकशब्दोच्चारणरूपः । सर्वाः पूर्वोक्ताः । तिस्रश्चेत्यनेन एककालसंबन्धः तासु बोध्यते । च शब्दः साहित्यवाची । साहित्यं

च एककालसंबद्धत्वरूपम् । तथा च सर्वाः दीक्षाः सह कुर्यादिति फलितोऽर्थः ॥३२॥

परेषां मतमाह—

एकैकां वेत्येके ॥ ३३ ॥

वीप्सया त्रयाणां समुच्चयः, कालभेदमात्रमिति ज्ञापितम् । वा कारेण मध्ये चिरकालव्यवधानं कार्यं, न तु दिवसत्रय इति सूचितम् ॥ ३३ ॥

इतः परं गुरुकर्तृकां क्रियामाह—

सद्गुरुः क्रमं प्रवर्त्य साङ्गं हुत्वा तरुणोल्लासवान् शिष्यमाहूय वाससा मुखं बद्ध्वा गणपति-ललिता-श्यामा - वार्ताळी - परा - पात्रबिन्दुभिस्तमवोक्ष्य सिद्धान्तं श्रावयित्वा ॥ ३४ ॥

साङ्गं आङ्गैः सहितं क्रमं प्रधानदेवतापूजां प्रवर्त्य कृत्वा । अत्र अङ्गानि गणपतिश्यामावार्ताळीपराः । प्रधानं च ललिता । अत्र अङ्गपदेन अङ्गक्रमो लक्ष्यते । अङ्गक्रमसहितं प्रधानक्रममित्यर्थः ॥

ननु इदं कथं ज्ञातमिति चेत्—शृणु । अत्रैव द्वितीयखण्डारम्भे "इत्थं सद्गुरोराहितदीक्षः महाविद्याऽऽराधनप्रत्यूहापोहाय गाणनायकीं पद्धतिमामृशेत्" इत्यत्र विघ्नापोहाय यत्क्रियते तत्प्रधानं [अङ्गं] लोके दृष्टम् । यथा राजदर्शनार्थमुद्युक्तस्य मध्ये द्वारपालैः निरोधे कृते सति तदुपासनं राजदर्शनाङ्गमिति । नच प्राणिमात्रस्य विघ्नशंकासत्त्वात्, विघ्ननाशको गणपतिरिति घण्टाघोषात्, विघ्नपरिहारार्थं यथा कर्ममात्रे गणपत्याराधनं तथा अत्रापि प्राप्तमेवेति, इदं वचनं व्यर्थमिति वाच्यम्; विनायकस्तवपाठेनापि क्वचिद्विघ्ननाशप्रतिपादनात् आराधनस्य पक्षे प्राप्तौ श्रीविद्योपास्तिविघ्ननिरासोऽनेनैव कार्य इति नियमविधिसंभवात् । एवं तृतीयखण्डादौ "एवं गणपतिमिष्ट्वा विधूतसमस्तविघ्नव्यतिकरः शक्तिचक्रैकनायिकायाः श्रीललितायाः क्रममारभेत्" इति क्त्वाप्रत्ययेनापि "अग्निं चित्वा सौत्रामण्या यजेत" इतिवत् ललितोपास्त्यङ्गत्वं स्पष्टम् । न च अग्निं चित्वेति वाक्ये पूर्वकर्मणः प्रधानत्वं,

उत्तरकर्मणोऽङ्गत्वं, तद्वदत्रोत्तरमनुष्ठीयमानललितोपास्तेः गणपत्याराधनाङ्गत्वापत्तिः इति वाच्यम्; न हि क्त्वाप्रत्ययेनैव पूर्ववर्तिनः चयनस्य प्राधान्यनिर्णयः, किं तु "प्रजाकामश्चिन्वीत," "पशुकामश्चिन्वीत" इति फलवत्त्वात् चितेः प्रधानत्वं, तत्सन्निधौ अफलसौत्रामणेः "फलवत्सन्निधावफलं तदङ्गं" इति न्यायेन सौत्रामण्या अङ्गत्वम्। तथा ललितोपास्तेः मुक्तिफलकत्वश्रुत्या विघ्नोपास्तिद्वारा श्रीललितोपासनायाः यत्फलं तदेव तस्येत्यङ्गत्वं क्लृप्तम्। अत एव "रेवतीषु वारवन्तीयं साम कृत्वा पशुकामो ह्येतेन यजेत" इत्यत्र वारवन्तीयसाम्नो न प्राधान्यम्। न च "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इतिवत् केवलपौर्वापर्यविधिरेव किं न स्यात् इति वाच्यम्; तत्र "सोमेन यजेत" इत्यनेन सोमस्य, दर्शपूर्णमासयोः यदाग्नेयादिवाक्यैः उत्पन्नत्वात् केवलक्रममात्रविधायकत्वम्, प्रकृते च ललिताक्रमोत्पत्तिवाक्यान्तराभावात क्रमविशिष्टकर्मविधानात्। किं च तत्र द्वयोः स्वतन्त्रफलवत्त्वेन, अत्र तथात्वाभावाच्च, न क्रममात्रविधायकत्वं, न वा अङ्गाङ्गिभावहानिः॥

एतेन "इत्थं सङ्गीतमातृकामिष्ट्वा कोलमुखीं विधिवद्वरिवस्येत" इत्यत्रापि परस्पराङ्गाङ्गिभावापत्तिरिति निरस्ता, उभयोरपि राजदर्शनरूपफलकत्त्वेन स्वतन्त्रफलाभावात्॥

न च एवं सति सौत्रामणिवत् प्रतिप्रयोगमावृत्त्यापत्तिः इति वाच्यम्; न हि वयं प्रधानाङ्गमिति ब्रूमः, किंतु ललिताक्रमारम्भाङ्गं अन्वारंभणीयावत्। अत एव तस्मिन् वाक्ये 'ललिताक्रममारभेत्' इति श्रुतम्। स्वकर्तृकोपास्तिक्रियाध्वंसानधिकरणक्षणसंबन्धिक्रमं निर्वर्तयिष्य इति संकल्प एव आरंभपदार्थः। अयं सकृदेव। अतो नावृत्त्यापत्तिः॥

एतेन ब्राह्मे मुहूर्ते गणपत्युपासनाङ्गत्वेन हृदयकमले गणेशध्यानं ललितोपास्तौ तस्या ध्यानं चैककाले प्राप्तं विरुद्धमिति शंकाऽपि निरस्ता॥

एवं श्यामाया अप्यङ्गत्वं श्यामोपास्तिखण्डे "तस्याः प्रधानसचिवपदं श्यामा" इत्यनेन, कोलमुख्याश्च तत्सपर्याखण्डे "महाराज्याः दण्डनायिकास्थानीया" इत्यनेन, परायाश्च "सिंहासनविद्यायाः हृदयं" इत्यनेन च सुस्पष्टम्॥

तस्मादिमा अङ्गदेवताः। तासां क्रमसहितं प्रधानदेवतायाः क्रमं कृत्वा इत्यर्थः फलितः॥

यद्यपि प्रधानदेवतोपास्तौ इमाः अङ्गदेवता इति अङ्गपदेन व्यवहारो भवतु। प्रकृतपूजायां पञ्चापि समप्रधानानि। अन्यत्र कृप्ताङ्गत्वं गृहीत्वा तेनैव रूपेण गणपत्यादीन् बोधयित्वा सहशब्देन सर्वेषां तन्त्रानुष्ठानमात्रं विधीयते। तन्त्रे सति देवताक्रमः पाठक्रम एव। अग्रे वक्ष्यमाणयावदङ्गकलापो नामातिदेशेन प्राप्तः। तत्राङ्गानां येषां तन्त्रं संभवति तेषां तथैवानुष्ठानम्। येषां विरुद्धधर्माणां न संभवति तेषां पदार्थानुसमयेन। येषां च पदार्थानुसमयो न संभवति तेषां काण्डानुसमयेन। यथायथं बुद्धिमता हि कार्यं, ग्रन्थविस्तरभयान्नेह लिख्यते॥

क्रमं प्रवर्त्येत्यनेनैव होमस्य प्राप्तौ हुत्वा इति होमोत्तरकालस्य शिष्याह्वानाङ्गता-सिद्ध्यर्थम्॥

यद्यप्यग्रे क्रमावसरे होमस्य वैकल्पिकत्वात् अत्रापि विकल्पेन प्राप्तौ नित्यत्वद्योतनाय हुत्वेत्यपि वक्तुं शक्यम्; तथाऽपि अग्रे "गणपति-ललिता-श्यामा-वार्ताळी-परा-पात्रबिन्दुभिः तमवोक्ष्य" इति वचनात् क्रमसमाप्तिर्नास्तीति सिद्धम्। तर्हि कदा शिष्याह्वानं कार्यमिति कालाकांक्षासत्त्वात् तद्विधानमेवोचितं, न तूभयविधिः, वाक्यभेदप्रसङ्गात्। होमस्याकरणपक्षेऽपि तदुपलक्षितकालोत्तरत्वं संभवति, "वत्सैरमावास्यायां" इतिवत्॥

एतेन निबन्धे विशेषपात्रविसर्जनान्ते शिष्यमाहूयेति निरस्तः। सर्वेषां विशेषार्घ्यपात्रोद्वासनेन तच्छेषाभावेन पात्रपञ्चकसामान्यार्घ्योदकबिन्दुभिः तमवोक्ष्येति स्वलेखनस्यैव सन्दर्भविरुद्धत्वाच्च॥

वस्तुतस्तु हुत्वेति स्वात्मनि हविश्शेषं हुत्वेत्यर्थः स्वरसः। अत एव तादृशा-हुतिजनित तरुणोल्लासवान् इति वक्ष्यमाणः स्वरसः। तरुणोल्लासोऽवस्थाविशेषः। तस्य विवरणं चरमखण्डव्याख्याने स्पष्टम्॥

शिष्यमाहूय इत्यनेन तावत्पर्यन्तं शिष्यस्यान्तःप्रवेशो नास्तीति ज्ञापितम्। तन्नाम संबुद्ध्यन्तमुच्चार्य एहीति वदेत्। यथा प्रवर्ग्ये गवामाह्वानं कर्माङ्गं इदमपि तथा कर्माङ्गम्। तेनोपायान्तरेण आगमनविषयं स्वाभिप्रायं न प्रकटयेत् इत्यर्थः॥

एतेन निबन्धे वरणानन्तरं तदैव सशिष्यो विविक्तं दीक्षाप्रदेशमासाद्येति लेखः परास्तः; समीपवर्तिशिष्यस्य आह्वानासंभवात्। नच अदृष्टार्थं आह्वानं इति वाच्यम्; दृष्टे संभवति अदृष्टकल्पनाया अन्याय्यत्वात्॥

शेषं स्पष्टम् ॥

अत्र पात्रपदेन विशेषार्घ्यपात्रं ग्राह्यम् । कथमेतदिति चेत्—इत्थम् । यदि सामान्यार्घ्यपात्रमेव स्यात् तस्य प्रणीतावत् तन्त्रसिद्धेः तस्य सर्वसंबन्धिन एकत्वात् सामान्यार्घ्यबिन्दुभिरिति लघु सूत्रितं स्यात् । नच त्वत्पक्षेऽपि विशेषार्घ्यपात्राणां बिन्दुभिरिति लघुसूत्रसंभवात् गणपतिललितेत्यादिप्रयासो व्यर्थ इति वाच्यम् ; एवं सति विधेयसंख्यावाचकबहुत्वस्य त्रित्वे कपिञ्जलाधिकरणन्यायेन पर्यवसानात् पञ्चपात्राणामलाभ एव । नच एवमपि पञ्चविशेषार्घ्यपात्रैरिति लघुसूत्रं संभवति इति वाच्यम् ; न वयं सूत्रे अक्षराधिक्यं न्यूनत्वं वा हेतुत्वेनोपदिशामः, किं तु सामान्यार्घ्यपक्षे तस्यैकत्वात् पराऽऽन्तं व्यर्थम् । विशेषार्घ्यपक्षे पञ्चपात्रलाभायेति सार्थकम् । अक्षराधिक्यं च स्वतन्त्रेच्छेपु नियन्तुमशक्यम् ॥

वस्तुतस्तु न प्रणीतावत्तन्त्रं, सामान्यपात्रस्य गणपतिललिताऽऽदिषु सामान्यार्घ्यसंस्कारस्य एकरूपत्वाभावात्, भिन्नधर्मयोः तन्त्रासंभवात् । न च भिन्नधर्माणां प्रधानानां कथं तन्त्रमिति शंक्यम् । प्रधानानां सहानुष्ठानं तन्त्रं, न तु सकृदनुष्ठानम् । इह तु सकृदनुष्ठानमुक्तं अयुक्तमेव, सहानुष्ठानं तु भवत्येव । अतो नेदं गमकं पात्रपदेन विशेषार्घ्यग्रहणे, किंतु हुत्वा तरुणोल्लासवानित्युक्त्वा पश्चात् पात्रबिन्दुभिरित्युक्तत्वात् होमसाधनीभूतद्रव्यं बुद्धिस्थं पात्रपदेन लक्ष्यते, नत्वबुद्धिस्थं सामान्यार्घ्यद्रव्यम् । किंच बिन्दुशब्दो मुख्यद्रव्ये तान्त्रिकाणां संकेतसिद्धः, "बिन्दुतर्पणसंतुष्टा" इति ललितासहस्रनाम्नि व्यवहारात् । अत एव बिन्दुशब्दोऽपि गमकः । इत्थं च विशेषार्घ्यग्रहणे इदमेव ज्ञापकम् ॥

तं शिष्यं अवोक्ष्य प्रोक्ष्य । इदं शिष्यसंस्काररूपत्वात् गुरुकर्म । शेषं सुगमम् ॥

एतेन निबन्धे गणपत्यादिमूलमुच्चारयन् पात्रपंचकसामान्यार्घ्योदकबिन्दुभिः तमवोक्ष्य इति पङ्क्तिर्या तत्र मूलमुच्चारयन्निति स्वकपोलकल्पिता सर्वा निर्मूला ॥

सिद्धान्तं सिद्धान्तप्रतिपादकवाक्यसमूहं पूर्वोक्तं श्रावयित्वा । इदं श्रावणं अदृष्टार्थं "कूलीर्वाचयति" इतिवत्, नाऽर्थज्ञानार्थम्, अतिगहनस्यार्थस्य तावता कालेन बोधासंभवात् । तस्मात् पूर्वोक्तवाक्यानि दीक्षाऽपूर्वसहकार्यपूर्वजनकत्वेन श्रावयेत् ॥ ३४ ॥

शाम्भवीदीक्षा

अथ शांभवीदीक्षामाह—

तच्छिरसि रक्तशुक्लचरणं भावयित्वा तदमृत-क्षाळितं सर्वशरीरमलं कुर्यात् ॥ ३५ ॥

त च्छि र सि शिष्यस्य शिरसि । र क्त शु क्ल च र णं—रक्तं कामेश्वर्याः रजस्स्वभावात् । तदुक्तं—"रक्तचरणां ध्यायेत् परामम्बिकाम्" इति । श्यामारहस्येऽपि—

रक्तं तु चरणं देव्या रजोरूपं प्रकीर्तितम् ।
शुक्लं च तदधिष्ठानचरणं सात्विकं भवेत् ॥ इति ॥

एतेन शुक्लचरणमपि व्याख्यातम् । प्राण्यङ्गत्वादेकवद्भावः । भा व यि त्वा ध्यात्वा त द मृ तं चरणसंबन्धि यदमृतं उदकं तेन क्षा ळि तं नाशितं सर्वपातकं यस्य । ईदृशं शिष्यं कुर्यादित्यर्थः । यद्यप्यन्यपदार्थस्य शिष्यस्य करणं न संभवति, तथाऽपि "सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामतः" इति न्यायेन शिष्यविशेषणस्य पापनाशस्य करणं संभवतीति भावः । तस्य स र्वं यावच्छ री रं गन्धवस्त्रभूषणकुसुमादिभिः गुरुः अ लं कु र्या त् भूषयेत् ॥ ३५ ॥

शाक्तीदीक्षा

शाक्तीं दीक्षामाह—

तस्यामूलमाब्रह्मबिलं प्रज्वलन्तीं प्रकाशलहरीं ज्वलदनलनिभां ध्यात्वा तद्रश्मिभिस्तस्य पापपाशान् दग्ध्वा ॥ ३६ ॥

त स्य शिष्यस्य मूलं पायूपस्थमध्यवर्तिचतुर्दळकमलाधारदेशः तन्मर्यादेति आ मू ल म् । एवं अधोमर्यादामुक्त्वा ऊर्ध्वमर्यादामाह—ब्रह्मबिलं सहस्रदळकमलाधार-भूतं मर्यादा अस्येति आ ब्र ह्म बि लं, प्र ज्व ल न्तीं, अत एव प्र का शा नां ल ह र्यः ऊर्मयो यस्यां तादृशीं, अत एव ज्वालायुक्तो योऽनलोऽग्निः तन्निभां तदुपमां ध्या त्वा,

संविदमिति शेषः। ज्वलदनलनिभत्वादेव पापपाशदाहकत्वमुपपन्नम्। पापपाशस्य दाह एव न भावनं अत एव दग्ध्वेति ॥

यद्यपि अत्रत्यपाठक्रममनुसृत्य आदौ शांभवी ततः शाक्तीति प्रतिभाति, तथाऽप्युपक्रमे दीक्षाविभागवेळायां शाक्ती शांभवी मान्त्री चेति चोक्तत्वात् उपक्रमानुसारेण उपसंहारोऽन्यथा नेयः वेदोपक्रमाधिकरणन्यायेन। अत एव तत्पाशदाहानन्तरं तद्भस्मरूपमलस्य सत्त्वात् चरणनिर्गतजलेन तत्क्षाळनरूपार्थवत्त्वादर्थक्रमोऽप्युपपन्नः। तथाचादौ शाक्तीं दीक्षां संपाद्य पश्चाच्छांभवीं कुर्यादिति सिद्धम् ॥

"गुरुः क्रमं प्रवर्त्य" इत्यारभ्य "सिद्धान्तं श्रावयित्वा" इत्येतदन्तोऽङ्गकलापोऽनयोरेव प्रकरणसन्निधिभ्यां, शुन्धनमन्त्रस्येव सान्नाय्ये, इति केचित्। तन्न। तथा सति तृतीयायां दीक्षायां उत्तरत्र "प्रथमसिक्तान् द्वितीयखण्डाग्रान् ग्रासयित्वा" इति विहितं, तदनुपपन्नम्, साङ्गक्रमविधेः तदनङ्गत्वेन तत्र क्रमप्राप्त्यभावेन प्रथमद्वितीययोरभावात्। न च असंस्कृतं लौकिकं ग्रहीतुं शक्यम्। तस्मात् लिङ्गेन सन्निधिं बाधित्वा त्रयाणां अङ्गम्। इत्थं च यदा एकैकां वेति पक्षानुसरणं तदा तृतीयदीक्षायां पूर्वोक्तान्यङ्गान्यनुष्ठेयानि ॥

एतेन निबन्धे "अमृतक्षरणेन बाह्यमाभ्यन्तरं च मलं दूरीकुर्यात्, अथ शिष्यस्यामूलाधारमित्यारभ्य तत्किरणैः तस्य पाशान् दहेत्" इत्यस्य द्वितीयत्वं लिखितं निरस्तम्। पूर्वदीक्षयैव बाह्याभ्यन्तरमलदूरीकरणे अस्मिन् मलस्याभावेन उत्तरदीक्षया दाहासंभवाच्च। न च पूर्वदीक्षया दूरीकृतं मलं बहिस्तिष्ठति तस्योत्तरदीक्षया दाह इति वाच्यम्; शरीरे विभाविताग्निना शरीरस्थमलस्यैव नाशो भवेत् न दूरीकृतस्य। तस्मादस्मत्सरणिरेव साध्वीति युक्तमुत्पश्यामः ॥ ३६ ॥

मान्त्री दीक्षा

मान्त्रीदीक्षाप्रयोगं वक्तुमुपक्रमते—

त्रिकटुत्रिफलाचतुर्जाततक्कोलमदयन्तीसहदेवीदूर्वाभस्ममृत्तिकाचन्दनकुङ्कुमरोचनाकर्पूरवासित -

जलपूर्णं [1]वस्त्रयुगवेष्टितं नूतनकलशं बाला-षडङ्गेनाऽभ्यर्च्य श्रीश्यामावार्ताळीचक्राणि निक्षिप्य तिसृणामावरणमन्त्रैरभ्यर्च्य संरक्ष्यास्त्रेण प्रदर्श्य धेनुयोनी ॥ ३७ ॥

त्रिकटुः पिप्पलीशुण्ठीमरीच्यः । त्रिफलाः हरीतकीधात्रीविभीतक्यः । तदुक्तं वैद्यसारे—

शुण्ठीमरीचिपिप्पल्यः प्रोक्तास्त्रिकटुसंज्ञकाः ।
त्रिफलेति समाख्याता पथ्याधात्रीविभीतकैः ॥ इति ॥

चतुर्जातं उशीरैलालवङ्गनागकेसराणि । तदुक्तं मदनमहार्णवे—

लवङ्गमेलोशीरं च त्रिसुगन्धं प्रकीर्तितम् ।
नागकेसरसंयुक्तं चतुर्जातं प्रचक्षते ॥ इति ॥

तक्कोलः—मरीचिसदृशः ताम्बूलेन सह भक्ष्यः शैत्योपचारहेतुः वस्तुविशेषः । मदयन्ती सहदेवी वैद्यके प्रसिद्धे आरण्यके । दूर्वाभस्ममृत्तिकाः प्रसिद्धाः ॥

यत्तु मृत्तिकापदेन निबन्धे सप्तमृत्तिकाग्रहणं तन्निर्मूलम् । यदि मृत्तिकापदेन सर्वत्र सप्तमृत्तिकाग्रहणं, तर्हि मूलनक्षत्रजननशान्तौ—"सप्तमृद्भिः समायुक्तं पञ्चपल्लवसंयुतम्" इत्यत्र सप्तग्रहणं व्यर्थम् । एवं "स्नानार्थं मृदमाहरेत्" इत्यत्रापि तथाऽऽपत्तिश्च ॥

एतैर्युक्तमिति जलेन साकं मध्यमपदलोपसमासः, वासितमित्यनेन दूर्वाऽऽदीनामन्वयासंभवात् । चन्दनं प्रसिद्धम् । कुङ्कुमं काश्मीरम् । रोचना गोरोचनम् । कर्पूरं प्रसिद्धम् । एतैर्वासितं यज्जलं तेन पूर्णं, वस्त्रयुगेन वेष्टितं नूतनं अभुक्तं कलशं बालाषडङ्गेन ऐं हृदयाय नमः इति क्रमेण बीजत्रयंद्विरावृत्त्या अग्रे वक्ष्यमाणरीत्या अग्नीशासुरवायुकोणेषु मध्ये पूर्वादिदिक्षु च क्रमेण । अत्र षडङ्गनाम्ना उक्तधर्मातिदेशः । श्रीश्च श्यामा च वार्ताळी चेति तासां चक्राणि निक्षिप्य

[1] नवीनवासो—अ, श्री.

स्थापयित्वेत्यर्थः । कुत्रेत्याकांक्षायां समीपवर्तित्वात् कलश एव । तत्रापि न पूर्णपात्राद्युपरि, निक्षिप्येति स्वारस्यात्, किं तु जल एव ॥

यद्यपि उद्धरणस्यानुक्तत्वात् योग्यताबलाच्च कलशसमीपदेशे इत्यपि वक्तुं शक्यम्; तथाऽपि पूजायां भूमौ चक्रस्थापनं विना पूजाऽसंभवेनार्थापत्त्याऽतिदेशेन वा स्थापनस्य प्राप्तत्वेन क्षिप्त्वेत्यस्य वैय्यर्थ्यभिया जले प्रक्षेप आवश्यकः ॥

न च यत्र क्वचन स्थापनं अर्थापत्त्यादिना प्राप्तं न कलशसमीपदेशे, तदर्थं तत् इति वाच्यम्; कलशसमीपदेशापेक्षया कलशस्यैव आधारत्वकल्पने लाघवात् ॥

किं च कलशसमीपस्थचक्रपूजा न कलशसंस्कारो भवितुमर्हति, तदसंयुक्तत्वात् । अत्र पूर्वं षडङ्गैरभ्यर्च्येति कलशसंस्कारः । संरक्ष्यास्त्रेणेत्यादिरपि तथा । उभयतः सन्दष्टं कथं तत्संस्कारभिन्नं विजातीयं भवेत् । ततो जल एव चक्राणां क्षेपः, तत्रैव पूजनं, पूजाऽऽरम्भसमय एव जले प्रक्षेपः । तेन आवाहनोत्तरं कथं चक्रचालनमिति शंकाऽनवकाशः ॥

यद्वा—कलशे क्षिप्त्वेति वचनं "विसर्जनपर्यन्तं न चालयेत्" इत्यस्य बाधकं भवितुमर्हति । युक्तश्चायमेव पक्षः । अन्यथा साङ्गं क्रमं निर्वर्त्येत्यस्य समीप एव कलशे निक्षिप्येति वदेत् ॥

तिसृणां ललिताऽऽदीनां आवरणमन्त्रैरित्यनेन केवलपञ्चोपचारपूजाव्यावृत्तिः । अभ्यर्च्य पूजयित्वा ॥

इदं पूजनं अपूर्वं अनेन विधीयते । पूजनोत्तरं उद्धरणं आर्थिकम् । पूजनं तु कुलद्रव्येणैव तत्तद्विशेषार्घ्यपात्रस्थेन कुसुमाक्षतैश्च, अपूर्वपूजामात्रविधानात् । तावन्मात्रं कृत्वा चक्रोद्धरणं कार्यम् । जलादुद्धृतचक्राणामुपरि गन्धपुष्पाक्षतनिक्षेपो न्यायसिद्धः ॥

अस्त्रेण फट् इति मन्त्रेण संरक्ष्य रक्षोभूतपिशाचानां दुराधर्षं कृत्वा । धेनुयोनिमुद्रे प्रसिद्धे, ते प्रदर्श्य तदुपरि कृत्वा ॥ ३७ ॥

मातृकायन्त्रम्

[1]मातृकायन्त्रमाह—

शिवयुक्सौवर्णकर्णिके स्वरद्वन्द्वजुष्टकिञ्जल्काष्टके कचटतपयशळाक्षरवर्गाष्टयुक्ताष्टदळे दिगष्ट-

[1] तदनन्तरकृत्यमाह—अ, श्री.

कस्थित ठं वं चतुरश्रे मातृकायन्त्रे शिष्यं निवेश्य तेन कुम्भाम्भसा तिसृभिः विद्याभिः स्नपयेत् ॥ ३८॥

शिवो हकारः तेन युक्तः सौवर्णः सौ इति वर्णः स कर्णिकायां कमलमध्यदेशे यस्य एतादृशे। अत्र पूर्वोक्तवर्णोपरि विसर्गोऽपि योजनीयः, "व्योमेन्द्वौरसनार्णकर्णिकं" इति श्रीशंकरभगवत्पादैः उक्तत्वात्। इमानि सर्वाणि कमलविशेषणानि। स्वराः अकारादिविसर्गान्ताः षोडश तेषां द्वंद्वं द्वयं द्वयं तेन जुष्टं युक्तं किञ्जल्काष्टकं पत्रयुगमध्यवर्तिदेशविशेषः यस्येति बहुव्रीहिः। कश्च चश्च टश्च तश्च पश्च यश्च शश्च ळश्च इति द्वन्द्वः, द्वन्द्वान्ते श्रूयमाणं प्रत्येकं संबध्यते इति न्यायेन वर्गपदं सर्वैः संबध्यते। तथा च कवर्गमारभ्य पवर्गपर्यन्तं पंचपंचवर्णाः यवर्गश्चत्वारः शवर्गोऽपि तथा ळक्ष इति ळवर्गः एवं अष्टवर्गैर्युक्तानि अष्टदळानि यस्येति बहुव्रीहिः। एकैकदळे एकैकं वर्गं लिखेत् इति फलितार्थः॥

केसरेषु दळेषु च वर्णलेखने क्रमाकांक्षायां प्राच्यादिक्रम एव धर्तव्यः। यद्यपि दळकेसरयोः द्वयोरपि प्राची न संभवति, तथाऽपि पद्मकुण्डलेखनप्रकारेण लेखने कर्णिकायाः प्राची, तदनुसारेणैव दळेषु वर्णलेखनक्रमोऽनुसन्धेयः॥

दिशां यदष्टकं प्राच्यादीशानदिगन्तं तेषु स्थितौ वकारठकारौ यस्मिन् ईदृशं चतुरश्रं यस्मिन्निति बहुव्रीहिः। ईदृशे मातृकासंज्ञके यन्त्रे शिष्यं निवेश्य स्थापयित्वा॥

तदित्थं—पद्मकुण्डवदष्टदलं पद्मं विलिख्य तद्बहिर्द्वाररहितं चतुरश्रं विलिख्य कर्णिकायां ह्सौः इति विलिख्य प्रागादिकेसरेषु अ आ इति क्रमेण स्वरद्वयमेकैककेसरे स्वरमेकं विलिख्य पत्रान्तः पूर्वोक्तस्थाने काद्यष्टवर्गान् प्रत्येकं एकैकस्यान्तः एकैकं वर्गं विलिख्य तद्बहिश्चतुरश्रे प्रागादिदिगष्टके वं ठं इति लिखेदिति समुदितार्थः। तदुक्तं भगवत्पादैः—

व्योमेन्द्वौरसनार्णकर्णिकमचां द्वन्द्वैः स्फुरत्केसरं
पत्रान्तर्गतपञ्चवर्गयशळार्णादित्रिवर्गं क्रमात्।
आशास्वश्रिषु लान्तलाङ्गलियुजा क्षोणीपुरेणावृतं
वर्णाब्जं शिरसि स्थितं विषगदप्रध्वंसि मृत्युञ्जयम्॥ इति॥

व्योम हकारः, इन्दुः सकारः, औ स्वरूपं, रसनार्णं विसर्गः, लान्तो वकारः, लाङ्गलि ठकारः, शेषं स्पष्टम् ॥

तिसृभिः श्रीश्यामावार्ताळीविद्याभिः स्नपयेत्, सर्वाङ्गे जलसंयोगो यथा भवति तथा कुर्यात् । तेनेति विशेषणात् उदकान्तरमपर्याप्तौ न ग्राह्यमिति सूचितम् । अयमेव पूर्णाभिषेक इत्युच्यते ॥ ३८ ॥

मान्त्रीं दीक्षामुपसंहरति—

सदुकूलं सालेपं साभरणं समालं सुप्रसन्नं शिष्यं पार्श्वे निवेश्य मातृकां तदङ्गे विन्यस्य विमुक्तमुखकर्पटस्य तस्य हस्ते त्रीन् प्रथमसिक्तान् चन्दनोक्षितान् द्वितीयखण्डान् पुष्पखण्डान्निक्षिप्य तत्त्वमन्त्रैर्ग्रासयित्वा दक्षिणकर्णे बालामुपदिश्य पश्चादिष्टमनुं वदेत् ॥ ३९ ॥

सदुकूलमित्यादि पार्श्वे निवेश्येत्यन्तः स्पष्टार्थः । बहिर्मातृकान्यासः स्वाङ्गे तन्त्रान्तरोक्तो यथा क्रियते तद्वच्छिष्याङ्गे विन्यस्य विमुक्तमुखकर्पटस्य पूर्वं मुखं येन बद्धं विमुक्तं मुखवस्त्रं यस्य तस्य हस्ते ॥

इदं दीक्षात्रयस्य तन्त्रपक्षे । केचिन्मतानुसारेण क्रमिकदीक्षापक्षे तत्तद्दीक्षाऽन्ते विसर्गः ॥

यद्वा—सूत्रकारस्य तन्त्रदीक्षाया एव अभिमतत्वात् तन्त्रपक्षे एव मुखबन्धनम् ॥

प्रथमसिक्तान् अत्र प्रथमं असंस्कृतं, "आज्येन यूपमनक्ति" इतिवत् । एवमेव द्वितीयं, "जाघन्या पत्नीः संयाजयन्ति" इतिवत् ॥

वस्तुतस्तु—क्रमस्य पूर्वं विधानात् तच्छेषस्य संस्कृतस्य विद्यमानत्वात्, प्रायणीयस्य निष्कासे उदयनीयमभिनिर्वपति इतिवत् उपयोक्ष्यमाणसंस्कारार्थं तावत्कालं पात्रविसर्जनमकृत्वा स्थापितत्वात् संस्कृतप्रथमसिक्तद्वितीयखण्डानामेव दानं, न त्वसंस्कृतस्य ॥

बहुवचनेनैव कपिञ्जलन्यायेन त्रित्वलाभे त्रीनिति पुनर्विशेषणात् सकृदेव त्रयाणां न निक्षेपः, किन्त्वेकैकमिति, "द्वौ परिधी परिदधाति" इतिवत् ॥

तत्त्वमन्त्रैः आत्मतत्त्वं शोधयामि नमः स्वाहा, विद्यातत्त्वं शोधयामि नमः स्वाहा, शिवतत्त्वं शोधयामि नमः स्वाहा, इति त्रिभिः । ग्रासयित्वेति णिजन्त-श्रवणात् आचार्यानुज्ञाऽनन्तरं भक्षणम् । बालां त्र्यक्षरीम् । उपदिश्येत्यन्तमङ्गम् । इष्टमनुं पञ्चदशीषोडशीरूपं वदेत्, उपदिशेदित्यर्थः ॥

ननु नायं षोडश्या उपदेशविधिः, मनुं इत्येकवचनेन केवलपञ्चदश्या एव विधिः । न च वैपरीत्ये किं विनिगमकं इति वाच्यम्; बालोपदेशानन्तरं पञ्चदश्या एव प्रसक्तत्वेन एकवचनेन तस्यैव ग्रहणात्[1] । किं च अस्मिन् तन्त्रे यदि षोडश्युपदे-शोऽभिमतः स्यात् तर्हि तदुद्धारं कुर्यात् । यतोऽस्मिन्ननुद्धारः अत एवानभिमत इति चेत्—न । [2]न हि सर्वत्र विधेयविशेषणानां संख्यावाचकानां विवक्षायामपि प्रकृत्यर्थ एवान्वयः इति नियमः, तदवच्छेदकेनाप्यन्वयस्य दृष्टत्वात् । तथा च जात्यन्वितमेकवचनमुपपन्नम् । तथा सति कथं तदनुसारेण षोडशीनिवृत्तिः । अन्यथा "ब्राह्मणं न हन्यात्" इत्यत्र ब्राह्मणद्वयहननिषेधो न स्यात् । अस्तु वैकवचनविवक्षा । तथाऽपि न षोडशीनिवृत्तिः, वचनानुसारेण वरिष्ठाया एकस्याः षोडश्या उपदेशानन्तरं पश्चात् श्यामारश्मिमालाऽऽदिविद्योपदेशावसरे पञ्चदश्युपदेशे बाधकाभावात् । अनुद्धारादग्रहणमिति यत् तदपि न । पञ्चदश्या अपि अनुद्धारेण तस्या अप्युपदेशो न स्यात् ॥

न च मूलाधारे विभावनीयरश्मिपञ्चकमध्ये मादनशक्तीत्यनेन सोद्धृतेति वाच्यम्; सा पञ्चदशी न सर्वसाधारण्येनोद्धृता, किंतु रश्मिपञ्चकावयवरूपा । अत एव तत्र तस्याः महाविद्येत्युक्तम् । अन्यथा तस्या इत्यस्य सार्थक्यं ब्रह्मणाऽपि दुरुपपादम् । अतः पूर्वप्रतिपादिताङ्गोपाङ्गप्रत्यङ्गपादुकासहितविद्या एका । तदवयवभूता विद्या कथं प्रधानभूता भवेत् ॥

किं च—स्वतन्त्रे अनुद्धृतं न ग्राह्यं इति किं सूत्रकाराभिप्रायो निष्कास्यते, अथवा स्वतन्त्रे अनुद्धृतं न ग्राह्यं इति वचनान्तरेण निष्कास्यते ?

[1] 'न विनिगमनाविरहः' इत्यधिकः—व २.

[2] "नहि एकवचनानुसारेण तत्सिद्धिः" इत्यधिकः—व २.

नाद्यः, एतादृशाभिप्रायनिष्कासकलिङ्गस्य सूत्रे अभावात् । किंच—बालामन्त्रस्त्र्यक्षरो न कुत्राप्युद्धृतः स्वयं च बालामुपदिश्येति वदति । एतेनानुद्धृतोऽपि ग्राह्य इति सूत्रकाराभिप्रायः सुस्पष्टः । न च रश्मिमालासु श्रियोऽङ्गत्वेन नवार्णबालाया उद्धृतत्वेन बालामुपदिश्येत्युक्ते सैव ग्राह्या इति वाच्यम् । यदि नवाक्षरीविद्या बालापदेन विवक्षिता तर्हि अग्रे पञ्चदशनित्यामन्त्रोद्धारे "कुमारी कुलसुन्दरी" इति कुलसुन्दरीमन्त्रे कुमारीवर्णसादृश्यविधानेन तत्रापि नवार्णत्वप्रसङ्गः । इष्टापत्तौ दूषणं कुलसुन्दरी-मन्त्रोद्धारे वक्ष्यामः । एवं श्रीविद्यान्यासप्रकरणे बालाद्विरावृत्त्या क्लृप्तषडङ्ग इत्यत्र नवार्णाद्विरावृत्त्या षडङ्गन्यासस्तु सर्वसंप्रदायविरुद्धः । तस्मान्न नवार्णाऽत्र बाला, किं तु त्र्यक्षर्येव । अत एव रश्मिमालायां नवार्णमन्त्रे श्रियोऽङ्गं बालेत्येवोक्तं न तु बालेति । इतोऽप्यधिकयुक्तिकलापं रश्मिमालामन्त्रोद्धारे वक्ष्यामः । अतः स्यात् त्र्यक्षरी । त्र्यक्षरी बाला तु न क्वचनोद्धृता, किं तु तन्त्रान्तरे क्लृप्तं गृहीत्वैवोपदिश्येति व्यवहृतम् । अपि च तत्त्वमन्त्रैः ग्रासयित्वेति सूत्रितम् । मन्त्राश्च नोद्धृताः । एवं वाराहीप्रकरणे त्रयो गुणमन्त्राः इत्यादयो नोद्धृताः । तेन न सूत्रकारस्यायमभिप्राय इति सिद्धान्तः ॥

न द्वितीयः, तादृशशास्त्रस्य कुत्राप्यनुपलब्धेः ॥

किंच—एतद्दीक्षाऽवसाने शिष्योऽपि पूर्णतां भावयित्वेति विदितवेदितव्य इति अशेषमन्त्राधिकारीति शिष्यविशेषणत्रयं श्रूयते । तत्र पूर्णत्वं गुरोर्ग्राह्यशेषरहित-त्वम् । यदि पञ्चदश्यैव अशेषदीक्षापरिपूर्तिः तर्हि शेषस्य षोडशीग्रहणस्य सत्त्वात् पूर्णताभावनाविधानं कथम् । एवमेव विदितवेदितव्यत्वमनुपपन्नम् ॥

न च पञ्चदश्यैव सूत्रकारमते कृतार्थता पूर्णताऽस्तु तेनैव मोक्षसिद्धिरस्तु इति न काऽप्यनुपपत्तिः इति वाच्यम्; एवमप्यशेषमन्त्राधिकारीत्यत्र किं पञ्चदश्युपदेशेन षोडश्यामप्यधिकारः स्वीक्रियते, अथवा अशेषपदस्य षोडशीभिन्ने संकोचः क्रियते । नाद्यः, पञ्चदश्यपेक्षया षोडश्याः अल्पफलजनकत्वापत्तेः । यो गुरुकार्ये अधिकृतः स लघुकार्ये अधिकृतो भवति । यथा यो गङ्गातरणे अधिकृतः स कुल्यातरणे अधिकृतः । न तु विपरीतं लोके दृष्टम् । न द्वितीयः, संकोचे मानाभावात् ॥

तस्मात् एवं निष्पक्षपातेन विचार्यमाणे इष्टमन्त्रपदेन पञ्चदशीषोडश्योः ग्रहणे न किमपि बाधकं पश्यामः ॥

अस्तु वा परसंतोषाय पञ्चदशीदीक्षामात्रं सूत्रकाराभिप्रेतम् । तथाऽपि तद्दीक्षावान् अल्पदीक्षावान्, तन्मण्डले षोडशीदीक्षावता तन्त्रान्तरानुयायिना न प्रवेष्टव्यं सेवकगृहे राजप्रवेशवत् इति महेश्वरानन्दनाथा आहुः । तन्न । तथाहि—दीक्षायामल्पत्वं अल्पाक्षरमन्त्रत्वं वा किमल्पफलसाधनमन्त्रत्वम् । आद्ये श्रीविद्यादीक्षातो व्रारा‍द्याः, ततोऽपि श्यामादीक्षायाः वरिष्ठत्वापत्तिः । द्वितीये तन्त्रान्तरे षोडशीदीक्षायाः यत्फलं तदेव अस्यापि फलं श्रूयते, कृतकृत्यो विदितनिखिलवेदितव्यो जीवन्मुक्तो भवतीत्यादिपदैः प्रतीयते । तथाच तुल्यत्वान्न न्यूनदीक्षावत्त्वम् ॥

ननु तर्हि तन्त्रान्तरे पञ्चदशीदीक्षा न्यूनदीक्षा भवतीति श्रूयते । तस्य का गतिः इति चेत्—न ; यस्मिन् तन्त्रे षोडशीपञ्चदश्योः समुच्चयः तस्मित् तन्त्रे पञ्चदश्याः अपरिपूर्णफलत्वात् षोडशीदीक्षायास्तथात्वात् । तन्त्रानुसारिणावुभौ, तत्रैकः पञ्चदश्या दीक्षितः, एकः षोडश्या दीक्षितः, तस्याग्रे कर्तव्यशेषसत्त्वादपरिपूर्ण इति तस्य मण्डले गुरुदीक्षितेन न गन्तव्यमिति युक्तम् । इह तु तुल्यफलं प्रमाणेन सिद्धं, कथं गुरुत्वं लघुत्वम् । विचारयन्त्वनाग्रहेण ॥

नच कारणलाघवगौरवेण फललाघवगौरवमस्त्येव इति वाच्यम् ; तथा सति केवलवह्न्यर्थिनौ द्वौ । तत्रैकेन लोहपाषाणसंबन्धेन वह्निर्निर्मितः । एकेन अरणिनिर्मथनेन निर्मितः । तत्र पूर्वापेक्षया परस्य वह्निनिर्माणे कालाधिक्यं पुरुषाधिक्यं श्रमाधिक्यमिति बहुकारणगौरवमिति तदीयवह्नेरधिकदाहजनकत्वं स्यात् । एवं बौधायनसूत्रानुसारिदर्शपूर्णमासप्रयोगापेक्षया आपस्तम्बप्रयोगस्य द्विगुणत्वेन आपस्तम्बसूत्रानुयायिनां द्विगुणस्वर्गोत्पत्त्यापत्तिः । आपस्तम्बसूत्रानुसारिणो बौधायनसूत्रानुयायितो गुरुतरत्वापत्तिः । तस्मादधिकफलजनकत्वातिरिक्तं गुरुत्वं दीक्षायां दुर्वचम् ॥

प्रकृते तदभावात् कथं लघुदीक्षावत्त्वं सूत्रानुयायिनः, गुरुसाधने तुल्यफलत्वेऽपि प्रवृत्तिः । स्वपूर्वगुरुपरंपराऽऽगतसाधनमन्तरा तदधिकारिणः फलं न भवतीति शास्त्रेणैव, न फलाधिक्येच्छया । "अतिरात्रे षोडशिनं गृह्णाति", "नातिरात्रे षोडशिनं गृह्णाति", इत्यादौ फलतारतम्यव्यवस्थापनं च तादृशशास्त्राभावादधिकारिभेदेन व्यवस्थासंभवाद्युक्तम् । तस्मादत्र न न्यूनाधिकदीक्षाभाव इति । सुधीभिः शेषमूह्यम् ॥

अयं पक्षः परतुष्टये अंगीकृत्य चालितः । वस्तुतस्तु इष्टमन्त्रपदेन षोडशीग्रहणे बाधकाभाव उक्तः प्राक् ॥

नच उषःकालक्रियायां कादिं हादिं वा मूलविद्यां मनसा दशवारमावर्त्येत्यत्र कादिं हादिं वेति विद्याविशेषणं अत्र षोडश्यभावे लिङ्गं इति वाच्यम्; ताभ्यां विशेषणाभ्यां उषःकालक्रियासन्निधौ पठिताभ्यां तदङ्गत्वेन षोडशी निवर्ततां कामं, तथाऽपि सर्वत्र षोडशीं निवर्तयितुं तयोः का शक्तिः । आरामगमनकाले अश्वमानय इति राज्ञो वाक्येन आरामगमनसाधनशिबिकाऽऽदियानबाधेऽपि अश्वपदघटितं वाक्यं सदा यानान्तरं न बाधितुं समर्थं भवति ॥

तस्मात् षोडश्युपदेशः आवश्यकः सूत्रानुयायिनामपि । इतोऽप्यधिकं सुधीभिराग्रहं परित्यज्य विचार्यम् । धर्मतत्त्वविवेचने स्वमतपक्षपातो नरकायैव भवेत् इत्यलं भूयसा ॥ ३९ ॥

शिष्यनामनिर्देशः

गुरुकर्तृकं कर्मशेषं वदति—

ततस्तस्य शिरसि स्वचरणं निक्षिप्य सर्वान् मन्त्रान् सकृद्वा क्रमेण वा यथाऽधिकारमुपदिश्य स्वाङ्गेषु किमप्यङ्गं शिष्यं स्पर्शयित्वा तदङ्गमातृकावर्णादि द्व्यक्षरं त्र्यक्षरं चतुरक्षरं वा आनन्दनाथशब्दान्तं तस्य नाम दिशेत् ॥ ४० ॥

ततः इत्यनेन वक्ष्यमाणानां धर्माणां उत्तराङ्गत्वं सूचितम् । स्वस्य गुरोः चरणं "अनादेशे दक्षिणं प्रतीयात्" इति परिभाषया दक्षिणचरणमेव न्यसेत् । सर्वान् मन्त्रान् प्रकरणेन सर्वपदसंकोचे "सर्वे हारियोजनं लिप्सन्ति" इतिवत् श्रीविद्याऽङ्गभूतान् गणपति-श्यामा-वार्ताळी-परा-पञ्चदशी-नित्या-रश्मिमाला-मन्त्रादीन् सर्वान् । सकृद्वा इत्यत्र वाकार एवकारार्थः । तदानीमेवेत्यर्थः । क्रमेण वा तत्तदुपासनवेळायां वा । यथाऽधिकारं इत्यनेन व्यवस्थितविकल्पः सूचितः । भक्तिश्रद्धाऽऽधिक्यवतः तदानीमेव, किंचिन्न्यूनतद्वतः क्रमेणेति । स्वाङ्गेषु इत्यत्र अङ्गपदं शरीरावयवपरम् । स्पर्शं कुर्वित्याज्ञां दद्यात् । ततः शिष्यो यमवयवं स्पृशेत् तत्र मातृकान्यासे यो

वर्णः स आदिः यस्मिन् ईदृशम् । इदं नामविशेषणम् । यथा शिरस्स्पर्शे तत्र मातृकावर्ण अकारः स आदिर्यस्य अमृतानन्दनाथ इति । एवमेव सर्वत्र योज्यम् । द्व्यक्षरं वेत्यादिः स्पष्टार्थः । आनन्दनाथशब्दान्तं स्पष्टम् । तस्य शिष्यस्य नाम दिशेत् स्थापयेत् ॥ ४० ॥

गुरुपादुकामन्त्रदानम्

विस्मृतं पुनराह—

बालोपदिष्टेः पूर्वमात्मनः पादुकां षट्तारयुक्तां दद्यात् ॥ ४१ ॥

द्वितीयशकलग्रासानन्तरं बालोपदिष्टेः पूर्वं आत्मनः पादुकां आत्मनः गुरोः दीक्षाकाले दत्तं यन्नाम तद्घटितपादुकाऽन्तं मन्त्रं षट्तारयुक्तं तस्मै उपदिशेत् । षट् ताराश्च कुलार्णवे—

वाग्भवं च परा श्रीश्च काळीबीजं ततः प्रिये ।
भुवनेशी मन्मथं च षट् ताराश्च प्रकीर्तिताः ॥ इति ॥

अमुकानन्दनाथश्रीपादुकां पूजयामीति ॥

एतेन निबन्धस्थपादुकामन्त्रः सूत्रानवलोकनकल्पितः परास्तः ॥

यद्यप्यत्र पाठक्रमेण अत्रैवोपदेशः प्राप्तः, तथाऽपि "आश्विनो दशमो गृह्यते" इतिवत् श्रौतक्रमेण तस्य बाधो युक्तः ॥ ४१ ॥

आचारानुशासनादि

आचाराननुशिष्य, हार्दचैतन्यमामृश्य, विद्यात्रयेण तदङ्गं त्रिः परिमृज्य परिरभ्य मूर्धन्यवघ्राय स्वात्मरूपं कुर्यात् ॥ ४२ ॥

आचारान् दशमखण्डे वक्ष्यमाणान् अनुशिष्य शिक्षयित्वा हार्दं हृदयाकाशसंबन्धि चैतन्यं, तमिति शेषः, शिष्यं आमृश्य ध्यात्वा, स्वहृदयस्थ-

चैतन्याभिन्नं शिष्यं भावयित्वेत्यर्थः । विद्यात्रयेण श्री-श्यामा-वार्ताळीविद्याभिः । विद्यात्रयं एकदा पठित्वा परिमार्जनं प्रथमं, ततो द्विः तूष्णीं, त्रिः प्रोक्षति इतिवत्, न तु त्रिभिस्त्रिवारम् । तथा सति तिसृभिर्विद्याभिरित्येव वदेत् । विद्यात्रयेणेतिकरणे एकत्ववैशिष्ट्यं प्रतीयते । तस्मान्न तथा । परिमार्जनं नाम स्वहस्तेन शिष्यस्य सर्वशरीरस्पर्शः । परिरभ्य आलिङ्ग्य, मूर्धन्यवघ्राय स्वात्मरूपं कुर्यात्, स्वस्य यथा आत्मा मोक्षप्रतिबन्धकपौरुषमलरहितः तथा तं कुर्यात् ॥ ४२ ॥

शिष्यस्य अशेषमन्त्राधिकारित्वम्

सद्गुरुरित्यारभ्य एतदन्तं गुरुकर्तृकं कर्म, इतः परं शिष्यकर्तृकक्रिया भवति—

शिष्योऽपि पूर्णतां भावयित्वा कृतार्थस्तं गुरुं यथाशक्ति वित्तैरुपचर्य विदितवेदितव्योऽशेषमन्त्राधिकारी भवेदिति शिवम् ॥ ४३ ॥

इति श्रीरेणुकागर्भसंभूत-दुष्टक्षत्रियकुलान्तक-श्रीभार्गवोपाध्याय-जामदग्न्य-महादेवप्रधानशिष्य-महाकौळाचार्य-श्रीमत्परशुरामकृतौ कल्पसूत्रे दीक्षाविधिर्नाम प्रथमः खण्डः

पूर्णता पूर्वमेव व्याख्याता । अत एव कृतोऽर्थो मोक्षसाधनं येन स तादृशः । तं इति कालवाची, तं कालं, अस्मिन्नेव काल इत्यर्थः, गुरुविशेषणत्वे वैयर्थ्यात् । यद्वा—"गुरोर्गुरौ समीपस्थे प्रगुरोरेव पूजनम्" इति वचनेन कदाचित् सपर्याया अन्ययोगप्राप्तौ तन्मा भूत् इति ज्ञापयितुं तमिति । यथाशक्ति वित्तैः "लक्षं लक्षपतिर्दद्याद्दरिद्रस्तु वराटिकाम्" इति रीत्या उपचर्य सन्तोष्य । विदितं ज्ञातं वेदितव्यं ज्ञातुं योग्यं येन सः सर्वज्ञः इत्यर्थः । अशेषमन्त्राणां सौरवैष्णवादिसप्तकोटिमन्त्रेषु अधिकारी भवेत् इति । एतेन एतदुपदेशेन सर्वमन्त्रोपदेशो जातः, पुस्तकादिवाचननिषेधो नास्तीत्यर्थः । तदुक्तं तन्त्रान्तरे—

यस्य नो पश्चिमं जन्म [1]तुष्टो येन च सद्गुरुः ।
तेनैव लभ्यते विद्या [2]साक्षाच्छ्रीषोडशाक्षरी ॥

[1] यदि वा शंकरः स्वयम्—अ.

[2] श्रीमत्पञ्चदशाक्षरी—अ.

अत्र सर्वे महामन्त्राः बीजान्तर्वृक्षगात्रवत् ।
संस्थितास्तु महेशानि तस्माच्छ्रेष्ठतरा भवेत् ॥ इति ॥

यच्चोपक्रान्तं दीक्षाप्रकरणं तत्समाप्तं इति ज्ञापकः शिव शब्दः ॥ ४३ ॥

इति श्रीरामेश्वररचितायां सौभाग्योदयनाम्नि परशुरामसूत्रवृत्तौ प्रथमखण्डात्मकं दीक्षाप्रकरणं समाप्तम्

इति प्रथमः खण्डः

द्वितीयः खण्डः—गणनायकपद्धतिः

गणनायकोपास्तिविधिः

पूर्वखण्डे दीक्षाविधिं परिसमाप्य श्रीललितोपास्तिप्रकरणं विवक्षुः तदुपास्तेः पूर्वाङ्गभूतां श्रीमहागणपत्युपास्तिं वक्तुं प्रक्रमते—

इत्थं सद्गुरोराहितदीक्षः महाविद्याऽऽराधनप्रत्यूहापोहाय गाणनायकीं पद्धतिमामृशेत् ॥ १ ॥

इत्थं पूर्वोक्तप्रकारेण सद्गुरोः शास्त्रोक्तलक्षणसहितगुरोः सकाशात् आहिता प्राप्ता दीक्षा येन ईदृशः । एतेन ईदृशदीक्षावत एव श्रीविद्योपास्तावधिकारो नान्यस्य इति सूचितम् । महाविद्या पञ्चदशी षोडशी वा । तस्या आराधनं जपः । यद्वा—महाविद्या श्रीललिता, महाविद्यावाच्यत्वात्, वाच्यवाचकयोरभेदात्, तस्या आराधनं फलप्राप्त्यन्तं पूजनं, तदुत्पत्तिप्रतिबन्धकीभूताः ये प्रत्यूहाः विघ्नाः—"विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः—तेषां अपोहाय नाशाय गाणनायकीं गणेशसंबन्धिनीं पद्धतिं मार्गं—"सरणिः पद्धतिः पद्या वर्तन्येकपदीति च" इत्यमरः—उपासनासरणिमित्यर्थः । आमृशेत् स्वीकुर्यात् । अस्याः श्रीललितोपास्त्यङ्गत्वं यथा स्यात् तथोक्तं प्राक् ॥ १ ॥

प्रातःकृत्यं ध्यानादि तर्पणान्तम्

एवं गणनायकोपास्तेः आवश्यकतामुक्त्वा तदुपासनाप्रकारं प्रपञ्चयति—

ब्राह्मे मुहूर्[1]ते उत्थाय द्वादशान्ते सहस्रदळकमलकर्णिकामध्यनिविष्टगुरुचरणयुगळविगळदमृतरसविसरपरिप्लुताखिलाङ्गो हृदयकमलमध्ये ज्वलन्तमुदयदरुणकोटिपाटलमशेषदोषनिर्वेषभूतमनेकपाननं नियमितपवनमनोगतिर्ध्यात्वा तत्प्रभापटलपाटलीकृततनुः बहिर्निर्गत्य मुक्तमलमूत्रो दन्तधावनस्नानवस्त्रपरिधानसूर्यार्घ्यदानानि विधाय उद्यदादित्य[2]वर्तिने महागणपतये तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्तिः प्रचोदयात् इत्यर्घ्यं दत्वा नित्यकृत्यं विधाय चतुरावृत्तितर्पणं कुर्यात् ।

आयुरारोग्यमैश्वर्यं बलं पुष्टिर्महद्यशः ।
कवित्वं भुक्तिमुक्ती च चतुरावृत्तितर्पणात् ॥ २ ॥

ब्राह्मे मुहूर्ते उषःकाले उत्थाय, शयनादिति शेषः । [3]द्वादशान्ते— ललाटोर्ध्वं कपालोर्ध्वावसानं द्वादशान्तपदवाच्यं, तस्मिन् । तदुक्तं स्वच्छन्दसंग्रहे—

द्वादशान्तं ललाटोर्ध्वं ललाटोर्ध्वावसानकम् ॥ इति ॥

यद्वा—द्वादशान्ते स्थूलशरीरे सुषुम्नानाडीमाश्रित्य द्वात्रिंशत्पद्मानि सन्ति । तेषु सहस्रदळकमले द्वे, सर्वाधः अकुलनामकमेकमूर्ध्वमुखं, सर्वोर्ध्वं द्वादशान्तनामकमधो-

[1] र्ते चोत्था—व.

[2] मण्डलव—अ.

[3] एतदादि 'यद्वा' इत्यन्तं व. कोशे नास्ति.

मुखमपरम् । अत्र प्रमाणं सविस्तरं योगिनीतन्त्रस्योत्तरचतुश्शतीव्याख्याने सेतुबन्धे अस्मत्परमगुरुकृते द्रष्टव्यम् । ग्रन्थविस्तरभयान्नेह लिखितम् । इदं च कमले विशेषणं अभेदसंबन्धेन । यद्यपि द्वादशान्त इति सप्तम्यन्तस्य समासघटकीभूतकमलेन साकं अन्वयो न संभवति समासघटकपदसापेक्षत्वरूपासामर्थ्यात् कमलस्य समास-प्रयोजकसामर्थ्याभावेन समासानुपपत्तेः । अन्यथा ऋद्धस्य राजमातङ्गा इति प्रयोगापत्तेः । तथाऽपि द्वादशान्त इत्यपि समासान्तं, ऋद्धराजमातङ्गा इतिवत् । सप्तमीलोपाभावः छान्दसः । द्वादशान्तसंज्ञकं यत्कमलं त त्क र्णि का म ध्य नि वि ष्ट-गु रु च र ण यु ग लं द्वन्द्वं तस्मात् वि ग ळ त् स्रवद्यत् अ मृ तं तस्य र स स्य यो विसरः विस्तारः तेन प रि प्लु तं क्लिन्नं अ खि ला ङ्गं यस्य, एवं भूत्वेति शेषः । भूत्वेतिं पूर्वोक्तं नियमितपवनमनोगतिरिति च ध्यानकर्तृविशेषणं, कर्तृपरिच्छेदकतया ध्यानाङ्गं, "अभिक्रामं जुहोति" इतिवत् । नि य मि ता प व न म न सो र्ग तिः येन, प्राणान् मनश्चाचलं कृत्वेत्यर्थः । मनःपवननिरोधमन्तरा ऐकाग्र्यं न संभवति । ऐकाग्र्यमन्तरा ध्यानं च न संभवति । अतस्तयोरावश्यकतेति भावः । हृ द य क म ल म ध्ये अनाहते ज्व ल न्त मित्यनेन स्वशरीरस्थपापदाहकर्तृत्वं सूचितम् । उ द य द रु ण को टि-पा ट ल मित्यनेन अभूतोपमानेन ब्रह्माण्डमध्ये एतदुपममन्यन्नास्तीति सूचितम् । अ शे ष दो ष नि र्वे षं अशेषाणां स्वकीयदोषाणां निर्वेषः—निर्गतो वेषः स्वरूपं येषां ते निर्वेषाः स्वरूपशून्याः नष्टाः इत्यर्थः, भावप्रधानो निर्देशः, इत्थं च—निर्वेषत्वं ध्वंसो यस्मादिति व्युत्पत्त्या स्वशरीरस्थनिखिलदोषनाशकमिति फलितोऽर्थः । अ ने क पो द्विपः गजः तस्य आ न नं यस्येति ईदृशं ध्यात्वा त स्य देवस्य प्र भा याः प ट ले न समूहेन पा ट ली कृतः । अभूततद्भावे च्विः । श्वेतरक्तत्वं संपादिता तनुः स्वकीयशरीरं येन । "श्वेतरक्तस्तु पाटलः" इत्यमरः । एतेन स्वतनौ यावत्पर्यन्तं पाटलत्वं संभवति तावत्पर्यन्तं ध्यायेदित्यर्थः । एतावत्पर्यन्तं शयनस्थलकृत्यं, अग्रे ब हि र्नि र्ग त्ये त्युक्तत्वात् । इदं बहिर्निर्गमनं स्मृतिप्राप्तम् । मलमूत्रविसर्गश्चानेन अनूद्यते । अत्र द न्त धा व नं वि धा येति सामान्यविधौ सत्यां कथं विधानं इत्याकांक्षायाः, स्मार्तापेक्षया तान्त्रिकधर्माणां अश्वप्रतिग्रहन्यायेन सन्निकृष्टत्वात्, तन्त्रान्तरोक्तानामेव धर्माणां ग्रहणं न तु स्मार्तानाम् । स्नानादिसूर्यार्घ्यान्तानां तन्त्रान्तरात् श्रीक्रमस्य सन्निकृष्टत्वात् तत एव कथंभावाकांक्षा पूरणीया ॥

निबन्धकारास्तु गणपतिपद्धतौ मन्त्रेषु त्रितारीयोगे कर्तव्ये श्रीमायाकामबीजानां योगमुक्त्वा तत्र प्रमाणं श्रीविद्याऽर्णवतन्त्रं दर्शयामासुः। तच्चिन्त्यम्। तथा हि श्रीक्रमे सर्वत्र मन्त्रादौ त्रितारीति श्यामाक्रमे मन्त्राणामादौ कुमारीयोग इति वाराहीक्रमे वाचमुच्चार्य ग्लौं इति च पद्धतावस्यां सर्वे मनवो जप्या इति पराक्रमे सर्वेऽपि पराक्रममनवः सौवर्णपूर्विकाः कार्याः इति सूत्रे पठितत्वात् गणपतिक्रमे अपठिष्यतः सूत्रकारस्य अत्र मन्त्रेषु बीजयोग एव नास्तीति सुस्पष्टं प्रतीयते। तथा सति कथं विद्याऽर्णवतन्त्रानुसरणम्। अथवा श्रीक्रमे वाङ्मायाकमलानां योगस्य वक्ष्यमाणत्वेन श्येनयागे द्रुतनवनीतवत् तस्य सर्वाङ्गत्वात् अस्यापि श्रीविद्याऽङ्गत्वेन प्राप्तौ तं बाधित्वा तन्त्रान्तरानुसरणस्य निर्युक्तिकत्वात्,

स्वशास्त्रे वर्तमानो यः परशास्त्रेण वर्तते।
भ्रूणहत्यासमं तस्य स्वशास्त्र[1]मवमन्यतः॥

इति स्मृतेश्च॥

उद्यदादित्यवर्तिने महागणपतये इति दत्वा इत्यस्य संप्रदानत्वेनान्वेति। उद्यदादित्यवर्तिने इत्यनेन तादृशसूर्ये [2]ध्यानं अग्रे सपर्याप्रकरणे वक्ष्यमाणरीत्या कार्यमिति सूचितम्॥

निबन्धे त्रिरर्घ्यदानमुक्तम्। तत्र मूलं मृग्यम्। अर्घ्यमित्येकवचनान्तेन विधेयपदेनैकत्वस्य स्पष्टत्वात्। नाप्यभ्यासः, तद्बोधकपदाभावात्। नापि श्रीक्रमोक्तस्यातिदेशः, सूर्यार्घ्यान्तस्यैव वचनेनातिदिष्टत्वात्, तदग्रिमधर्माणामतिदेशे प्रमाणाभावात्॥

नित्यकृत्यं अग्निहोत्रहोमादि विधाय। एतेन अग्रे वक्ष्यमाणचतुरावृत्तितर्पणं सन्निधानादर्घ्याङ्गमिति भ्रमो निरस्तः। प्रकरणेनोपास्त्यङ्गमेवेति सूचितम्॥

अयं चतुरावृत्तितर्पणोत्पत्तिविधिः। तत्र चतुरावृत्तितर्पणमिति कर्मनामधेयं, न तु गुणविधिः, चतुरावृत्तेरग्रे वक्ष्यमाणत्वात्। तथा च "अग्निहोत्रं जुहोति" इत्यत्रेव विभक्तिविपरिणामेन तृतीयान्तार्थत्वं लक्षणया, तस्य धात्वर्थे भावनायां करणत्वेन अन्वयः। चतस्र आवृत्तयोऽभ्यासा यादृशक्रियाऽवयवक्रियासु तच्चतुरावृत्तितर्पणम्। यद्यपि प्रथमतर्पणे द्वादशावृत्तिरस्ति न चतुरावृत्तिः, तथाऽपि सृष्टिन्यायेन भूमात्वमनुसृत्य

[1] मतिवर्ततः—अ, श्री.

[2] अर्घ्यदानं—अ, श्री.

अचतुरावृत्तितर्पणेऽपि चतुरावृत्तितर्पणमिति व्यवहारः । अत्र साध्याकांक्षायां कमियोगाभावात् नायुरारोग्यादि साध्यत्वेनान्वेति । किंतु श्रीगणपत्युपास्त्युपकार एव । अन्यथा "समिधो यजत्यस्मिन् लोके प्रतितिष्ठति" इति श्रुत्या प्रयाजानामपि प्रतिष्ठाऽऽदिफलापत्तेः । अतः आयुरारोग्यमित्यर्थवादः ॥

तथा च आयुरारोग्यादिप्राप्तये इति न लिखित्वा गणपतिप्रीतये इति संकल्पं निबन्धकारो यल्लिलेख तत् साधु । परं तु नद्यादावित्यारभ्य पञ्चोपचारानाचर्य इत्यन्तप्रापकं प्रमाणं मृग्यम् । स्वबुद्धिरचितमश्रद्धेयमेवेति दिक् ॥ २ ॥

तदेव स्पष्टं विशिनष्टि—

प्रथमं द्वादशवारं मूलमन्त्रेण तर्पयित्वा मन्त्राष्टाविंशतिवर्णान् स्वाहाऽन्तानेकैकं चतुर्वारं मूलं च चतुर्वारं तर्पयित्वा पुनः श्रीश्रीपतिगिरिजागिरिजापतिरतिरतिपतिमहीमहीपतिमहालक्ष्मीमहालक्ष्मीपतिऋद्ध्यामोदसमृद्धिप्रमोदकान्तिसुमुखमदनावतीदुर्मुखमदद्रवाऽविघ्नद्राविणीविघ्नकर्तृवसुधाराशंखनिधिवसुमतीपद्मनिधित्रयोदशमिथुनेष्वेकैकां देवतां चतुर्वारं मूलं चतुर्वारं च तर्पयेत्, एवं चतुश्चत्वारिंशदधिकचतुश्शततर्पणानि भवन्ति ॥ ३ ॥

मूलमुच्चार्य तर्पयामि इति मन्त्रेण तर्पणम् । एवमेव अग्रे सर्वत्र मूलस्थले संयोज्यम् । चतुरावृत्तितर्पणमित्यत्र न क्रियाऽऽवृत्तिः विधीयते, किं तु मन्त्रावृत्तिरेव । यद्यपि द्वादशवारमिति द्वितीयाऽन्तं स्तोकं पचतीतिवत् क्रियाविशेषणं भवितुमर्हति, तथा च क्रियाऽभ्यास एव सिद्धः, तथाऽप्यस्मिन्नग्रे चतुश्चत्वारिंशदधिकचतुश्शततर्पणानि भवन्ति इति सूत्रस्थसंख्यया कर्मभेदे सिद्धे न क्रियाऽभ्यासो भवितुमर्हति । अतः द्वादशवारमित्यनन्तरं आवृत्तेनेति पूरणीयम् । अत एवाग्रे मूलं चतुर्वारं एकैकं चतुर्वारमित्यनेन मन्त्राभ्यास एव स्पष्टः श्रूयते । यदि

क्रियाऽभ्यासः स्यात्तदा सकृदेव मन्त्रपठनं प्रसज्येत । तच्च अग्रिमसंख्याऽनुरोधेन निरस्तम् । यद्वा—द्रव्यपृथक्त्वेन क्रियाऽऽवृत्तावपि मन्त्रावृत्तिर्भविष्यति, तथाऽप्यग्रे मन्त्रावृत्तेः स्पष्टत्वात् तत्सहचरिते अत्रापि मन्त्रावृत्तिरेव । चतुर्वारमित्यनन्तरं उच्चार्येति शेषः । स्वाहाऽन्त इत्यनेन प्रतिवर्णमन्त्रे स्वाहाकारघटकत्वं सूचितम् । अवयविनो विशिष्टमन्त्रस्य गणपतिदेवताकत्वे तदवयवानामपि तद्देवताकत्वं स्पष्टम् । अतः स्वाहाऽन्ते तर्पयामीत्यपि योज्यम् । तथा च मूलस्यैकवर्णः, तत्र बिन्दुयोगोऽपि शिष्टसंप्रदायात्, ततः स्वाहाकारः, ततस्तर्पयामीति पूर्वोक्तम् । एवं चतुर्वारं, ततो मूलेन चतुर्वारम् । एवं सर्वेषु वर्णेषूह्यम् । पूर्वं द्वादशवारं तर्पयित्वेति एको गणः सूचितः । तदुत्तरं चतुर्वारं तर्पयित्वेत्यन्ततर्पणं एको गणः सूचितः । अस्मिन् सूत्रे पुनरित्यनेन त्रयोदशमिथुनतर्पणं अन्यो गणः सूचितः । गणत्रयसूचनफलं च—एकैकगणस्य एकैकापूर्वजनकत्वात् तन्मध्ये एकस्य विस्मरणे पुनः तद्गणमारभ्यैव अनुष्ठानं न सकलादिमारभ्य । यथा मन्त्रैकदेशे वर्णलोपे तन्मन्त्रस्यादिमारभ्यावर्तनं तद्वत् । श्रीश्रीपती त्येकं, गिरिजागिरिजापती त्येकं मिथुनं, एवंरीत्या एकं स्त्रीलिङ्गान्तं एकं पुलिङ्गान्तं मिथुनं ज्ञेयम् । मदद्रवोत्तरं न विद्यन्ते विघ्नाः यस्येति व्युत्पत्त्या अविघ्न इति पुलिङ्गः । शेषं स्पष्टम् । एवं त्रयोदशमिथुनेषु एकैकां देवतां द्वितीयान्तमुच्चार्य तर्पयामीति योजयेत् । इत्थं चोक्तरीत्या एकदेवतायाश्चतुर्वारं तर्पणं, ततो मूलेन चतुर्वारं कार्यं पूर्ववत् । एवमुक्तप्रकारेण क्रमेण निरुक्तसंख्याकानि तर्पणानि भवन्ति । तदित्थं मूलतर्पणानि २२८ वर्णतर्पणानि ११२ मिथुनतर्पणानि १०४ आहत्य पूर्वोक्तसंख्याकानि ४४४ चतुश्चत्वारिंशदुत्तरचतुश्शततर्पणानि भवन्तीत्यर्थः ॥ ३ ॥

यागगृहप्रवेशादि विघ्नेश्वरध्यानान्तम

एवं तर्पणक्रममुक्त्वा पूजाविधिं वक्तुमुपक्रमते—

अथ यागविधिः—गृहमागत्य स्थण्डिलमुपलिप्य द्वारदेश उभयपार्श्वयोर्भद्रकाल्यै भैरवाय द्वारोर्ध्वे लम्बोदराय नम इति अन्तः प्रविश्य आसनमन्त्रेण

आसने स्थित्वा प्राणानायम्य षडङ्गानि विन्यस्य मूलेन व्यापकं कृत्वा स्वात्मनि देवं सिद्धलक्ष्मी-समाश्लिष्टपार्श्वं अर्धेन्दुशेखरमारक्तवर्णं मातुलुङ्ग-गदापुण्ड्रेक्षुकार्मुकशूलसुदर्शनशंखपाशोत्पलधान्य-मञ्जरीनिजदन्ताञ्चलरत्नकलशपरिष्कृतपाण्येकादशकं प्रभिन्नकटमानन्दपूर्णमशेषविघ्नध्वंसनिघ्नं विघ्नेश्वरं ध्यात्वा ॥ ४ ॥

अथ—अधिकारान्तरवाक्यमिदम् । एतेन तर्पणप्रकरणं समाप्तम् । तथा च प्रकरणेन तर्पणोपासनयोः अङ्गाङ्गिभावः सूचितः । तेन दीक्षाऽङ्गक्रमे तर्पणस्य नातिदेशः । उच्यते इति शेषः । गृहमागत्येत्यनेन तर्पणं नद्यादौ गृहाद्बहिः कार्यमिति सूचितम् । स्थण्डिलं यागदेशं उपलिप्य गोमयेनेति शेषः ॥

स्थलशुद्धिः प्रमाणान्तरप्राप्ता अनूद्यते । अनेन क्रमो न विवक्षितः । यदि चानुवादे फलाभावात् वैय्यर्थ्यभिया क्रमप्राप्त्यर्थमत्र पाठः इत्युच्यते, तदा द्वारपूजा-ऽव्यवहितप्रागेवोपलेपः कार्यः ॥

उभयपार्श्वयोरित्यत्रानादेशाद्दक्षिणं प्रथमं पश्चाद्वामम् । दक्षवामौ द्वाराद्बहिर्निर्गमनवेळायां यौ तौ ग्राह्यौ, तत्रैव तथा व्यवहारात्, न तु प्रवेशवेळायाम् । नमः इत्युत्तरं यजेदिति शेषः । मन्त्रलिङ्गावगता देवता । अन्तः प्रविश्येत्यनेनैव द्वारपूजा बहिः स्थित्वैव कार्या इति सिद्धम् । आसनमन्त्रेणेत्यनेन श्यामाप्रकरण-पठितो मन्त्रो ज्ञेयः, सन्निकृष्टत्वात् । अत एव न तन्त्रान्तरस्थं ग्राह्यम् ॥

निबन्धोक्तनिर्मूलधर्मप्रदर्शनम्

यत्तु निबन्धे दीपानभितः प्रज्वाल्येति, ताम्बूलभक्षणं, बालातृतीयबीजेनासन-प्रोक्षणं लिखितं तं प्रति अयं प्रश्नः—एतत्प्रापकं प्रमाणं तन्त्रान्तरं, किं वा एतत्तन्त्रे दीपप्रज्वलनादिकमग्रे श्रीक्रमे उक्तं, बालातृतीयबीजेनासनप्रोक्षणं परापद्धतावुक्तं, तेषां सर्वेषां प्रापकमतिदेशशास्त्रं वा । नाद्यः, तस्य पूर्वमेव निरस्तत्वात् । द्वितीये,

अतिदेशस्त्रिविधः—वचनातिदेशः, नामातिदेशः, आकांक्षया आनुमानिकातिदेशः। तन्मध्ये कीदृशोऽतिदेशः। न वचनं—"समानमितरच्छचेनेन" इतिवत् 'शेषं श्रीक्रमेण समं' इतिवचनं अस्ति। अतो नाद्यः। एवं "मासमग्निहोत्रं जुहोति" इतिवत् "श्रीक्रमं कुर्यात्" इति तन्नाम्ना व्यवहारो न ह्यस्ति। अतो न द्वितीयः। तृतीयोऽतिदेशो यथा—"सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः"। इत्युक्ते कर्मियोगात् ब्रह्मवर्चसं किं कुर्यादिति कर्माकाङ्क्षापूरकम्। ततः केन कुर्यात् इत्याकाङ्क्षायां धात्वर्थः करणत्वेन अन्वेति। कथं कुर्यात् इत्याकांक्षापरिपूरकतया अङ्गकलापो न पठितः। तत आकांक्षाशामकं ओषधीद्रव्यकत्वेन व्यक्तलिङ्गकत्वेन सादृश्यात् दर्शपूर्णमासवदिति पदं कल्प्यते—सौर्यं चरुं दर्शपूर्णमासवत् निर्वपेत् इति वाक्यम्। ततश्च दर्शपूर्णमासधर्माः प्राप्नुवन्ति। नह्यत्र तथाऽऽकांक्षाऽस्ति, साङ्गप्रधानस्यात्र पाठात्॥

किं च—यद्यतिदेशेनैव धर्मप्राप्तिः तर्हि श्रीक्रमे "पीठमनुना आसने समुपविष्टः" इति वचनेन आसनमन्त्रस्य कॢप्तत्वात् अतिदेशेनैव प्राप्तौ पुनर्विधानं व्यर्थं सत् गृहमेधीयाज्यभागन्यायेन यावदुक्तं कर्तव्यं नातोऽधिकमिति स्पष्टीकरोति। इत्थं च कथमेतदतिरिक्तानां प्राप्तिर्भवेत्। किंच—श्रीक्रमाद्धर्मप्राप्तिरतिदेशेन भवति, तत् किं यावदङ्गानां भवतीत्युच्यते, आहोस्वित् यत्किंचिद्धर्माणाम्। आद्ये चतुर्नवतिमन्त्रैः अभिमन्त्रणाभावः केन सिद्धः। न हि "नार्षेयं वृणीते न होतारम्" इतिवत् सूत्रे चतुर्नवतिमन्त्रैरभिमन्त्रणं न कर्तव्यमित्यस्ति, येन तन्निवार्यते। [1]यश्च यत्किंचिद्धर्मातिदेश इति पक्षः स च देवानांप्रियाणामेव प्रियो भवितुमर्हति न पण्डितानाम्॥

तस्मात् पूर्वोक्तधर्मप्रापकं सर्षपमात्रमपि प्रमाणं न पश्यामः। एवमत्रत्याः केचन निर्मूलं श्रीक्रमे लिखिताः। एवं श्यामाक्रमोक्ताः निष्प्रमाणाः श्रीक्रमे अन्यत्र च प्रक्षिप्ताः। न हि प्रमाणरहितो धर्मो भवितुमर्हति। अतो मीमांसागन्धानभिज्ञेन केवलसंस्कृतभाषाऽभिज्ञेन स्वेच्छया सांकर्यं प्रापितो यो निबन्धः तमाश्रित्य सुधियोऽप्यनुतिष्ठन्ति। अत्र केऽपि परिशोधनं न कुर्वन्ति। अत्र कलियुगशक्तिरेव बीजं नान्यदिति युक्तमुत्पश्यामः। तस्मात् तत्रत्यानि नानुष्ठेयानि। यावदुक्तं कर्तव्यम्।

[1] मन्मते तु, प्रकृतिविकृतिभावाभावात् यावदुक्तं कर्तव्यमिति, अत्र तदुक्त्यभावात् चतुर्नवतिमन्त्रैरनभिमन्त्रणं युक्तम्। तव मते संदर्भविरुद्धम्" इत्यधिकः पाठः—ब २.

यत्रान्यतो ग्राह्यं सूचितं यथाऽऽसनमन्त्रेणेति तद् ग्राह्यं, न केनचिदविचार्य लिखितं प्रमाणम्। प्रमाणाभावात् तदनुष्ठाने नापूर्वं भवेत्। यदि भवेत् तर्हि अग्निहोत्रे दर्शपूर्णमासधर्मातिदेशः, दर्शपूर्णमासयोः ज्योतिष्टोमधर्मातिदेशोऽपि भवेत्। तस्मादप्रमाणं स्वेच्छया संकीर्णो निबन्धोऽश्रद्धेयः इत्यलमतिविस्तरेण॥

किं च—एकक्रियायाः प्रकृतिरेका शास्त्रे दृष्टा, न हि नानाप्रकृतिका एका विकृतिर्दृष्टा श्रुतपूर्वा वा आसीत्। अयं निबन्धकारः कांश्चिद्धर्मान् पराप्रकरणस्थान् सौरित्यनेन आसनप्रोक्षणादिरूपान् ताम्बूलभक्षणादिरूपान् [1]श्रीविद्याप्रकरणस्थांश्च, इत्येवं नानाप्रकरणस्थान् एकत्र अतिदिशन् कथं धर्मतत्त्वज्ञो भवेत्॥

न च यथा ज्योतिष्टोमस्य ये धर्माः तेषां द्वादशाहे अतिदेशः, ततः अतिदिष्टतत्प्रकरणस्थधर्मयोर्द्वयोः यथा द्विरात्रादावतिदेशः, तद्वत् मूलप्रकृतिः श्रीविद्या, ततोऽतिदेशेन प्राप्ताः परायां ताम्बूलादयः, तत्सहितः योऽसावासनप्रोक्षणरूपो विशेषधर्मः स सर्वोऽपि द्विरात्रादिस्थानापन्ने गणपतावतिदिश्यताम्। तथा सति न नानाप्रकृतिकत्वं इति वाच्यम्। यदि श्रीप्रकृतिका परा, तर्हि भूषणधारणस्य अतिदेशेनैव प्राप्तौ तत्प्रकरणे भूषितविग्रह इति व्यर्थम्। एवं वामपार्ष्णिघातादिकं बहुतरं व्यर्थम्। अतो न प्रकृतिविकृतिभावस्तयोः संभवति। अतो येषां प्रत्यक्षवचनमस्ति यथाऽत्रैव सूर्यार्घ्यान्तविधिः, एवं पराप्रकरणे श्यामावत् सामान्यविशेषार्घ्ये साध(द?)येदित्यादि, यत्र चाकांक्षाऽपरिपूर्तिः सर्वथा, तादृशस्थल एव अन्यधर्मस्पर्शः, अन्यत्र [2]न युक्तमिति राद्धान्तः। अनयैव दिशा निबन्धे निर्मूलसंकीर्णधर्माणां परित्यागोऽन्यत्र द्रष्टव्यः॥

प्राणायामः श्वासनिरोधः, तं कुंभकरेचकादियुक्तं विधाय। प्राणायामे मन्त्रो मूलम्॥

संकल्पावश्यकता

ततः संकल्पमपि सामान्यशास्त्रेण प्राप्तं कुर्यात्। श्रीविद्योपास्तौ निर्विघ्नतासिद्ध्यर्थं महागणपतिक्रमं निर्वर्तयिष्ये इति संकल्पः। न च संकल्पस्य सूत्रे अनुक्तत्वात् कथं ग्रहणं इति शङ्कनीयम्। शुचित्वमुपवीतं अव्यभिचारेण यथा

[1] 'तन्त्रान्तरे' इत्यधिकः—व.

[2] यावदुक्तं कर्तव्यमिति रा—व२.

कर्मसामान्येन संबद्धं एवमेव संकल्पोऽपि। एतदनुगुणानि वचनानि च सन्ति। यथा—

अनाचम्य कृतं यच्च यच्च संकल्पवर्जितम्।
राक्षसं तद्भवेत् कर्म . . . . ॥

इति दानधर्मे महाभारतवचनम्।

आदौ सङ्कल्प उद्दिष्टः पश्चात्तस्य समर्पणम्।
अकुर्वन् साधकः कर्मफलं प्राप्नोत्यनिश्चितम्॥

इति रुद्रयामळवचनाच्च। तथैव शिष्टाचारोऽपि। अतः सः आवश्यकः इति गाणनायक्याः सपर्याया अपि श्रीविद्याऽङ्गत्वादावश्यक एव संकल्पः। अष्टाङ्गोल्लेखनं च—

अवश्यं तान्त्रिकं कालमुल्लिखेदन्यथा शिवे।
बहिर्मुखं तु तत्कर्म भवेद्भस्महुतं यथा॥

इति यामळवचनादष्टाङ्गोल्लेखनमावश्यकम्। एवमेव श्यामाऽऽदौ ज्ञेयम्॥

ततः षडङ्गानि मूलमन्त्रषडङ्गानि हृदयादिस्थानेषु विन्यस्य स्थापयित्वा सकलमूलेन करतलाभ्यां सर्वाङ्गे विन्यसेत्। इदमेव व्यापककरणम्। तदुक्तं परमानन्दतन्त्रे—

तलाभ्यां निखिलाङ्गस्य स्पर्शनं व्यापकं भवेत्॥

अत्र निबन्धोक्तं "रक्तद्वादशशक्ति[1]युक्ताय" इत्यारभ्य "मातृकान्यासं विदध्यात्" इत्यन्तं अश्रद्धेयम्॥

स्वात्मनि स्वहृदये। आत्मशब्दो मनसि प्रसिद्धः। मनोहृदययोरैक्यात् तदर्थत्वम्। आद्यविशेषणचतुष्टयार्थः स्पष्टः। मातुलुङ्गं फलविशेषः। गदा आयुधविशेषः। पुण्ड्रेक्षुः नानारेखायुक्तेक्षुः, [2]अनेकवर्ण इति यावत्। तद्रूप कार्मुकश्चापः। शूल; आयुधविशेषः। सुदर्शनं चक्रम्। शंखपाशौ प्रसिद्धौ। उत्पलं कमलम्। शेषाणि प्रसिद्धानि। एवं मातुलुङ्गादिरत्नकलशान्तैः परिष्कृतं पाण्येकादशकं यस्येदृशम्॥

[1] नाथाय—व.

[2] अनेकरूप इति—व२.

यद्यपि श्रीमहागणपतिमूर्तेः दश भुजाः प्रसिद्धाः, अत्रैकादशेति विरुद्धं, तथाऽपि पाणिपदेन शुण्डादण्डोऽप्यत्र ग्राह्यः, तत्र पाण्यपरपर्यायेण करः हस्तः इति व्यवहारात्, करी हस्तीति सर्वलोकप्रसिद्धेः। इत्थं च दश भुजाः, एकादशः शुण्डादण्डः इति तदभिप्रायेण सूत्रकृता भगवता पाण्येकादशकमित्युक्तम् ॥

आयुधस्थाननियमः

अत्र आयुधानां दक्षवामादिनियमो नोक्तः, तथाऽपि सामान्यपरिभाषया आयुधस्थानानि योज्यानि। तदुक्तं रुद्रयामळे—

आयुधानां तु ते ध्यानं ब्रवीमि शृणु शाङ्करि।
खड्गबाणाङ्कुशगदाज्ञानशूलभुसुण्ढिकाः॥
भल्लो दण्डो वज्रशक्ती परिघप्रासतोमराः।
मालामुसलपरशुमुखा दक्षकरस्थिताः॥
पाशशङ्खं चापफलं चर्मखट्वाङ्गपुस्तकम्।
घण्टाडमरुमुण्डं च वामहस्ते सुसंस्थितम्॥
वराभये शङ्खचक्रं पुष्पपात्रं द्वयस्थितम्।
[1]अनुक्ते वामदक्षेधःप्रादक्षिण्यक्रमान्नरैः॥
योज्यानि सर्वायुधानि ज्ञेयानि परमेश्वरि।
[2]चक्रशङ्खौ तथाऽभीतिवरौ संमुखसंस्थितौ॥ इति॥

अस्यार्थः—

आयुधस्थानानुक्तौ खड्गादिपरश्वन्ता दक्षकरे नियताः। पाशादिमुण्डान्ताः वामे नियताः। शङ्खादिपात्रान्ताः इच्छया उभयत्रापि। पाशाङ्कुशादियुग्मपञ्चकं संमुखे। यत्सङ्ख्याकदक्षकरे युग्मान्यतरं तत्सङ्ख्याकवामकर एवापरम्। वामोर्ध्वादारभ्य दक्षोर्ध्वक्रमे प्रदक्षिणक्रमः, विपरीते त्वप्रदक्षिणक्रमः। द्वयोर्विकल्प इत्यर्थः। प्रकृते गणपत्यायुधे न प्रदक्षिणाप्रदक्षिणक्रमौ संभवतः। तथा हि—मातुलुङ्गचापशङ्खधान्यमञ्जरीणां उक्तवचनानुसारेण वामकरसंबन्ध आवश्यकः। गदाशूलचक्रोत्पलदन्तानां

[1] अनुक्तेपु वामदक्षप्रादक्षिण्येतरक्रमैः। युक्त्या सर्वत्रायुधानि—अ, ब १.

[2] "पाशाङ्कुशौ धनुर्बाणखड्गचर्माणि शंकरि" इत्यधिकः ब. कोशे.

दक्षसंबन्धस्तथा । अतः सूत्रपाठक्रमानुरोधेन रुद्रयामळवचनानुरोधेन च वक्ष्यमाणद्वन्द्वानां संमुखतैव युक्ता । मातुलुङ्गगदे चापशूलौ शङ्खचक्रे पाशोत्पले धान्यमञ्जरी निजदन्तौ, अमीषां द्वन्द्वानां मध्ये प्रथमं प्रथमं वामोर्ध्वकरे द्वितीयं दक्षोर्ध्वकरे । अनेन क्रमेण अधोऽधो योज्यम् । एवं युग्मपञ्चकैः दशभुजेषु व्यावृत्तेषु कलशं परिशिष्टे शुण्डादण्डे ज्ञेयम् । यद्यपि यामळवचने दन्तस्थानं नोक्तं, तथाऽपि परिशेषात् दक्षाधः । धान्यमञ्जरी फलान्तर्भूता, अतो वामभागनियमः ॥

प्रभिन्नः प्रस्रवन् कटो गण्डो यस्य तम् । "गण्डः कटो मदो दानं" इत्यमरः । आनन्दपूर्णं पूर्णानन्दं इत्यर्थः । अशेषा ये विघ्नजनिताः ध्वंसाः अनिष्टकलापाः तेषां निघ्नं नाशकं विघ्नेश्वरं उक्तगुणविशिष्टं ध्यायेत् ॥ ४ ॥

अर्घ्यस्थापनम्

एवं ध्यानान्तमुक्त्वा ततोऽर्घ्यस्थापनविधिं वक्तुमारभते—

पुरतो मूलसप्ताभिमन्त्रितेन गन्धाक्षतपुष्पपूजितेन शुद्धेन वारिणा त्रिकोणषट्कोणवृत्तचतुरश्राणि विधाय तस्मिन् पुष्पाणि विकीर्य वह्नीशासुरवायुषु मध्ये दिक्षु च षडङ्गानि विन्यस्य अग्निमण्डलाय दशकलाऽऽत्मने अर्घ्यपात्राधाराय नमः सूर्यमण्डलाय द्वादशकलाऽऽत्मने अर्घ्यपात्राय नमः सोममण्डलाय षोडशकलाऽऽत्मने अर्घ्यामृताय नम इति शुद्धजलमापूर्य अस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य [1]धेनुयोनि[2]मुद्रां प्रदर्शयेत् ॥ ५ ॥

पुरत इत्यस्य कस्येत्याकांक्षायां योग्यत्वात् स्वस्येति शेषः । एतेन दक्षवामभागयोः व्यत्यासः । मूलेन सप्तत्वं आवृत्त्या संपादनीयम् तैः अभिमन्त्रितेन

[1] धेनुमुद्रां प्रदर्श्य यो—अ, श्री.

[2] मुद्रे—व १.

गन्धपुष्पाक्षतैः पूजितेन शुद्धेन पवित्रेण पटपूतेन वारिणा त्रिकोणषट्कोणवृत्तचतुरश्राणि विधाय निर्माय तस्मिन् निर्मितत्रिकोणादिसंघात्मके मण्डले विकीर्य क्षिप्त्वा । वह्न्यादिशब्दाः तत्तद्दिग्लक्षणाः । मध्ये पूर्वादि दिक्षु च षडङ्गानि मूलषडङ्गानि । विदिक्ष्विति लघुसूत्रे कर्तव्ये वह्नीशेति गुरुसूत्रं क्रमविशेषलाभार्थम् । अत्र॰ यद्यपि वाक्येन अग्निमण्डलाय नमः इत्यारभ्य शुद्धजलमापूर्येत्यन्तेन आपूरणशेषत्वं सर्वस्य प्रतीयते, तथाऽपि "सूक्तवाकेन प्रस्तरं प्रहरति" इतिवत् लिङ्गेन विभज्यैव मन्त्राणां त्रयाणां आधाराय नमः पात्राय नमः अमृताय नमः इत्यन्तानां आधारस्थापनपात्रस्थापनजलपूरणेषु प्रत्येकं शेषत्वं वाच्यम्; वाक्यात् लिङ्गस्य प्रबलत्वात् । वस्तुतस्तु—"अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्" इति जैमिनिसूत्रोक्तवाक्यलक्षणाभावात् न वाक्यविरोधोऽपि । क्वचित् पुस्तके अर्घ्यपात्राय नमः इत्येतदुत्तरं "इत्याधारपात्रे धृत्वा" इति पाठः । तदा न विवादः । शुद्धजलं पूर्वोक्तम् । अत्र द्वितीया तृतीयाऽर्थे, सक्तुवत्, दृष्टफलसंभवात् । यद्वा—"स्रुचः संमार्ष्टि" इतिवत् गुणकर्म, आपूरणक्रियया जलं संस्कुर्यादिति । तथा च अस्मिन् पक्षे द्वितीयैव यथाश्रुता । अस्त्रेण अस्त्रमुद्रया संरक्ष्य रक्षोभूतादियागविघ्नकर्तृदुराधर्षं कृत्वा । यद्वा—अस्त्रेण फट् इति मन्त्रेण पूर्ववत् कृत्वा । कवचेन हुं इति मन्त्रेण अवकुण्ठ्य अन्यत्र गमनशक्तिरहितं कृत्वा ॥

निबन्धकारस्तु मन्त्रमुद्राद्वयं अस्त्रपदेनोवाच । तन्न, "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति न्यायात्, आवृत्तौ वाक्यभेदप्रसङ्गात् ॥

अत एव पूर्वविलक्षणत्वात् धेनुयोनिमुद्रां प्रदर्शयेत् इत्युक्तम् । एतेन न ते मुद्रे पूर्वतने, मन्त्र इति स्पष्टम् । मुद्रां इत्येकवचनमार्षम् । धेनुसहितयोनिरिति मध्यमपदलोपी समासो वा कार्यः ॥ ५ ॥

अर्घ्यसंस्कारः

एवं मुद्राप्रदर्शनान्तमुक्त्वा सूत्रान्तरेण संस्कारशेषानाह—

[1]सप्तवारमभिमन्त्र्य तज्जलविप्रुड्भिरात्मानं पूजोपकरणानि च संप्रोक्ष्य तज्जलेन पूर्वोक्तं मण्डलं

[1] मूलेनस—श्री.

परिकल्प्य तद्वदादिमं [1]संयोज्य तत्रोपादिमं [2]मध्यमं च निक्षिप्य वह्न्यर्केन्दुकलाः अभ्यर्च्य वक्रतुण्डगायत्र्या गणानां त्वेत्यनया ऋचा चाभिमन्त्र्य अस्त्रादिरक्षणं कृत्वा तद्बिन्दुभिस्त्रिशः शिरसि गुरुपादुकामाराधयेत् ॥ ६ ॥

मूलेनेति सप्तवारमित्यस्यादिः। क्वचित्तथैव प्राठः। तज्जलेन सामान्यार्घ्योदकेन पूर्वोक्तं त्रिकोणादिरूपं मण्डलं संस्कृतदेशविशेषम्। तद्वत् सामान्यार्घ्योदकवत्। आदिमं प्रथमं संयोज्येत्यनेन तदन्ता क्रिया तद्वदित्यतिदिश्यते। तेन आधारपात्रस्थापनयोरपि लाभः। क्वचित् संशोध्येति पाठः। [3]चकारेण चतुर्थपञ्चमयोर्ग्रहणम्। पूर्वस्मादत्र यो विशेषस्तमाह—वह्नीति। आधारे वह्निकलाः धूम्रार्चिरादयः, पात्रे सूर्यकलाः तपिन्यादयः, अमृते अमृतादयश्चन्द्रकलाः चतुर्थ्यन्ततत्तन्नामभिः प्रागादिप्रादक्षिण्येन वृत्ताकारं यजेत्। दिङ्नियमो वृत्ताकारनियमश्च यः तन्मूलं परमानन्दतन्त्रे अष्टमोल्लासे द्रष्टव्यम्। आधारस्थापनोत्तरं तत्र दशवह्निकलाः संपूज्य ततः पात्रं स्थापयेत्। एवमन्यत्रापि। वक्रतुण्डगायत्र्या—"तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्।" इत्यनया। "गणानां त्वा" इतीयमृक् प्रसिद्धा। क्वचित्पाठे समग्रपाठोऽपि दृश्यते। अभिमन्त्रणं नाम मन्त्रपठनकाले संस्कार्यद्रव्यस्पर्शः। अस्त्रादीत्यादिपदेन कवचम्। ते उभे पूर्वं व्याख्याते। रक्षणमिति अवकुण्ठनस्याप्युपलक्षणम्। तथा च अस्त्रमन्त्रेण संरक्ष्य अवकुण्ठ्य कवचमन्त्रेणेत्यर्थः। यद्यपि "तद्वदादिमं संयोज्य" इत्यनेनैव अस्त्रादीनां प्राप्तिसंभवे पुनर्विधानं व्यर्थम्; तथाऽपि पूर्वं धेनुयोनिमुद्रे स्थिते तन्निवृत्त्यर्थं पुनःकथनं ज्ञेयम्। तद्बिन्दुभिः संस्कृतप्रथमबिन्दुभिः त्रिशः त्रिवारं शिरसि विधिबिले गुरुपादुकामाराधयेत्। आराधनं नाम गुरुपादुकोद्देशेन

[1] संशोध्य—अ.

[2] 'मध्यमं' इति नास्ति—ब २.

[3] आदिमोपादिमयोरेव ग्रहणात् अत्र चतुर्थपञ्चमयोर्निवृत्तिः। यद्वा—"योग्यैः सह मपञ्चकमुररीकृत्य" इति अग्रे मपञ्चकस्वीकारलिङ्गात् चकारेण आवश्यकम्। युक्तश्चायमेव पक्षः।—इति ब२ कोशे.

द्रव्यत्यागः । तस्याहवनीयादिवत् देशनियमः शिरसि । बिन्दुभिरित्यनेन द्रव्यमाननियमः । सावरणगणपतिपूजा[1]यामपि नियमोऽनेन क्रियते ॥ ६ ॥

पीठशक्ति-धर्माद्यष्टक-महागणपति-पञ्चावरण-पूजाविधिः

पीठनियमपूर्वकं यन्त्रोद्धारादिकमाह—

पुरतो रक्तचन्दननिर्मिते पीठे महागणपतिप्रतिमायां वा चतुरश्राष्टदळषट्कोणत्रिकोणमये चक्रे वा तीव्रायै ज्वालिन्यै नन्दायै भोगदायै कामरूपिण्यै उग्रायै तेजोवत्यै सत्यायै विघ्ननाशिन्यै ऋं धर्माय ॠं ज्ञानाय ऌं वैराग्याय ॡं ऐश्वर्याय ऋं अधर्माय ॠं अज्ञानाय ऌं अवैराग्याय ॡं अनैश्वर्याय नम इति पीठशक्तीर्धर्माद्यष्टकं चाभ्यर्च्य मूलमुच्चार्य महागणपतिमावाहयामीत्यावाह्य पञ्चधोपचर्य [2]दशधा संतर्प्य मूलेन मिथुनाङ्गब्राह्म्यादीन्द्रादिरूपपञ्चावरणपूजां कुर्यात् ॥ ७ ॥

पुरत इति पीठे इत्यन्तं मूर्त्याधारनियामकम् । वाकारद्वयं समविकल्पद्योतकम् । चतुरश्रं सर्वस्मात् बहिः तदन्तः अष्टदलं तदन्तः षट्कोणं तदन्तः त्रिकोणं इति क्रमो ज्ञेयः । तीव्रादिषु पीठशक्तिरिति संकेतात् आसां श्रीगणपत्याधारभूतपीठे रक्तचन्दननिर्मिते पूजनमिति ज्ञायते । तत्र क्रमानुक्तौ प्रागादिष्वष्टदिक्षु मध्ये च नवशक्तयः पूज्याः । धर्मादीनां चतुष्टयं वायव्यादिविदिक्षु अधर्मादिचतुष्टयं पश्चिमादिप्रादक्षिण्येन पीठ एव समर्चयेत्, पीठशक्तीः धर्माद्यष्टकं चेति द्वयोरेकदेशस्य श्रुतत्वात् । धर्मादीनां दिङ्नियमः वायुकोणतः । परमानन्दतन्त्रे—

[1] या देशनि—ब.

[2] दशधोपतर्प्य—ब२.

धर्मं ज्ञानं च वैराग्यमैश्वर्यं पश्चिमादितः ।
अधर्मादिचतुष्कं च . . . . . ॥ इति ॥

पञ्चधा पञ्चप्रकारैः गन्धपुष्पधूपदीपनैवेद्यरूपैः उपचर्य पूजयित्वा । अत्र मन्त्राः— लं पृथिव्यात्मने गन्धं कल्पयामि, हं आकाशात्मने पुष्पं कल्पयामि, यं वाय्वात्मने धूपं कल्पयामि, रं अग्न्यात्मने दीपं कल्पयामि, वं अमृतात्मने अमृतनैवेद्यं कल्पयामि । अत्र प्रमाणं परमानन्दतन्त्रे—

गन्धं पुष्पं च धूपं च दीपं नैवेद्यकं प्रिये ।
भूतपञ्चकबीजेन पृथिव्याद्यात्मकं परम् ।
क्रमेण पञ्चभिर्देवि मानसे त्वेवमर्चयेत् ॥ इति ॥

मूलेन दशधा दशवारम् । सन्तर्प्येत्यत्र तर्पणसाधनद्रव्यं विशेषार्घ्यपात्रस्थम् । तत्प्रकारश्च कथं कार्य इत्याकांक्षितत्वात् सन्निकृष्टत्वात् श्यामाक्रमे वक्ष्यमाणधर्म एव ग्राह्यः । एवमावरणपूजायामपि इतिकर्तव्यताऽऽकांक्षायां तत एव ग्राह्यम् । तर्पणे तु मूलमुक्त्वा श्रीमहागणपतिं तर्पयामीति मन्त्रशेषः । प्रतितर्पणं मन्त्रावृत्तिः, द्रव्यपृथक्त्वात् । अत एव हिरण्यकेशिसूत्रे "द्रव्यपृथक्त्वेऽभ्यावर्तते" इति ॥

यत्तु निबन्धे तर्पणमन्त्रे पूजयामीति मन्त्रशेषलेखनं तदशुद्धम् । यदि तर्पणपूजनयोरभेदः तर्ह्यग्रेऽपि पञ्चावरणतर्पणं कुर्यादित्येव वदेत्, न पूजां कुर्यादिति वदेत् । यतो धातुभेदेनोच्चारणं अतोऽर्थभेदोऽप्यावश्यकः । अर्थभेदे पूजालिङ्गकमन्त्रस्य तर्पणानङ्गत्वं स्पष्टम् । एवं निबन्धे प्रधानदेवपूजोत्तरं षडङ्गौघत्रयपूजा चोक्ता । तत्र मूलं यदि तन्त्रान्तरं तस्यात्र प्रवेशो नास्तीति पूर्वमेवोक्तम् । अतस्तन्न कार्यम् ॥

मिथुनानां आवरणद्वयं, अङ्गदेवताः तृतीयावरणं, ब्राह्म्याद्याः चतुर्थावरणं, इन्द्राद्याः पञ्चमावरणं, एवं पञ्चावरणपूजां कुर्यात् ॥ ७ ॥

पञ्चावरणीपूजा

[1]तत्र प्रधानदेवतातर्पणदेशमाह—

[1] तदेव सविस्तरं प्रपञ्चयति—अ.

त्रिकोणे देवः तस्य षडश्रस्यान्तराळे श्रीश्रीपत्यादिचतुर्मिथुनानि अङ्गानि च ऋद्ध्यामोदादिषण्मिथुनानि षडश्रे मिथुनद्वयं षडश्रोभयपार्श्वयोस्तत्सन्धिष्वङ्गानि ब्राह्म्याद्या अष्टदळे चतुरश्राष्टदिक्ष्विन्द्राद्याः पूज्याः सर्वत्र देवतानामसु श्रीपूर्वं पादुकामुच्चार्य पूजयामीत्यष्टाक्षरं योजयेत् ॥ ८ ॥

त्रिकोणे देवः तर्प्यः इति शेषः । तत् त्रिकोणं षडश्रं च तयोरन्तराळे अनुक्तत्वात् प्रागादिदिक्षु चतुरावृत्तितर्पणपाठक्रमानुरोधेन श्रीश्रीपतिप्रभृति मिथुनचतुष्टयं पूज्यम् । एतावत् प्रथमावरणम् । ऋद्ध्यामोद मिथुनमारभ्य षण्मिथुनानि षडश्रकोणेषु । एतदुत्तरवृत्ति मिथुनद्वयं षडश्रपार्श्वद्वये इति द्वितीयावरणम् । षट्कोणयन्त्रे रेखोपरि रेखा यत्र गच्छति स तत्सन्धिः । तत्र ईदृशाः सन्धयः षट् सन्ति, तादृशसन्धिषु । क्रमस्यानुक्तत्वात् अग्नीशासुरवायुकोणक्रमस्योक्तस्यासंभवात्, प्रागपवर्गता उत्तरापवर्गता यथा स्यात् तथा, क्रममनादृत्य, षडङ्गानि यजेत् । इति तृतीयावरणम् । अष्टदळे क्रमाकांक्षायां श्रीविद्याऽर्णवोक्तः । आद्यचतसृणां पश्चिमादिप्रादक्षिण्येन अग्रिमाणां वायव्यादिविदिक्षु प्रादक्षिण्येन पूज्या ब्राह्म्याद्यष्टमातरः इति चतुर्थावरणम् । चतुरश्रे प्रागाद्यष्टदिक्षु तत्तद्दिक्पतीन् यजेत् । अत्र मन्त्राकांक्षासत्वात् सन्निकृष्टश्यामाक्रमोक्तदिक्पालमन्त्रा ग्राह्याः । अथवा—वक्ष्यमाणाष्टाक्षरीयुक्तनाममन्त्रेणैव । इति पञ्चमावरणम् । अनुष्ठाने उपयुक्तां सर्वसाधारणीं कांचित् परिभाषामाह—सर्वत्रेति । सर्वत्र पूजासामान्ये देवतानामसु नाममन्त्रेषु । घटकत्वं सप्तम्यर्थः । श्रीपूर्वं प्रथमं श्रीपदमुच्चार्य ततः पादुकां इति ततः पूजयामि इति । तथा च श्रीपादुकां पूजयामीति योज्यमिति यावत् ॥ ८ ॥

गणनाथस्य पुनरुपतर्पणादिः

एवं पञ्चावरणीमिष्ट्वा पुनर्देवं गणनाथं दशधोपतर्प्य षोडशोपचारैरुपचर्य प्रणवमायाऽन्ते सर्वविघ्न-

क्रुद्धयः सर्वभूतेभ्यो हुं स्वाहा इति त्रिः पठित्वा बलिं दत्वा गणपतिबुद्ध्यैकं वटुकं सिद्धलक्ष्मीबुद्ध्यैकां शक्तिं चाहूय गन्धपुष्पाक्षतैरभ्यर्च्यादिमोपादिम-मध्यमान् दत्वा मम निर्विघ्नं मन्त्रसिद्धिर्भूयादित्यनु-ग्रहं कारयित्वा नमस्कृत्य यथाशक्ति जपेत् ॥ ९ ॥

एवं उक्तप्रकारेण पञ्चानामावरणानां आवरणदेवतानां समूहः पञ्चावरणी, "द्विगोः" इति ङीप्, तां इष्ट्वा पूजयित्वा । [1]पुनरित्यनेन पञ्चावरणान्तःपातित्वं सूचितम् । दशधा दशवारम् । तर्पणप्रकारश्च पूर्वमेव व्याख्यातः । षोडशोपचाराश्च परमानन्दतन्त्रे परिगणिताः । यथा—

> पाद्यमर्घ्यं चाचमनं स्नानं वस्त्रं च भूषणम् ।
> गन्धं पुष्पं धूपदीपौ नैवेद्यं चापि वीटिकाम् ।
> नीराजनं चाञ्जलिं च परिक्रामं नतिं शिवे ।
> गणयेदुपचारान् वै प्रत्येकं षोडशेश्वरि ॥ इति ॥

अग्रे सूत्रोक्तषोडशोपचारा वा ॥

अत्र पूजाऽङ्गत्वेन पद्धतौ होम उक्तः, स निर्मूलः ॥

प्रणवः प्रसिद्धः, माया ह्रीं, एतयोः अन्ते अग्रे, स्वाहाऽन्तं शेषं पठेत् । अयं बलिदानमन्त्रः । इमं मन्त्रं त्रिः पठित्वा ततो बलिदानं कुर्यात् । बलिद्रव्य-माकांक्षितं श्रीक्रमोक्तं ग्राह्यम् । देशाकांक्षायां श्रीक्रमोक्तं स्ववामभागतः । गणपतिबुद्ध्या इत्यस्य अभ्यर्च्य इत्यनेनान्वयः । गणपतिस्वरूपं भावयित्वेति यावत् । पाठक्रमं बाधित्वा अर्थक्रमेण आदौ आवाहनं पश्चात् भावनं ततोऽर्चनं, एवमग्रेऽपि । अत्र द्वयोरप्याह्वानादिकं पदार्थानुसमयेन नत्वञ्जनादिवत् काण्डानु-समयेन, तद्वत् अत्र बाधकाभावात्, सर्वेषां तुल्यप्रधानसन्निकर्षसंभवाच्च । आदिमं

[1] पुनरित्यनेन यथापूर्वोक्तपञ्चावरणपूजाया इव एवं पञ्चावरणीमिष्ट्वेत्येव अनुवादः । तद्वत् अयमपि अनुवाद एव । क्रममात्रविधिरिति भ्रमो निरस्तः । दशधा—व२.

स्पष्टं, उपादिमं द्वितीयं, मध्यमं तृतीयं च दत्वा । अयं प्रतिपत्तिसंस्कारः मध्यमानिति द्वितीयाश्रुतेः । दानेन द्रव्यं संस्कुर्यात् इति तदर्थः । तथा च आवरणपूजोत्तरं द्रव्यदोषे एतस्य निवृत्तिरेव । अनुग्रहं कारयित्वा तयोरनुग्रहो यथा भवेत् तथा तत्संतोषं स्वयं संपादयेत् इति भावः । नमः इत्यारभ्य जपेत् इत्यन्तः स्पष्टार्थः ॥

यच्च निबन्धे जपानन्तरं वटुकसुवासिनीपूजनकथनं तत्सूत्रविरुद्धमित्यनेन स्पष्टीकृतम् ॥ ९ ॥

गणपत्युद्वासनम्

यद्यग्निकार्यसंपत्तिः बलेः पूर्वं विधिवत् संस्कृतेऽग्नौ स्वाहाऽन्तैः श्रीश्रीपत्यादिविघ्नकर्तृपर्यन्तैः मन्त्रैर्हुत्वा पुनरागत्य देवं त्रिवारं संतर्प्य योग्यैस्सह मपञ्चकमुररीकृत्य महागणपतिमात्मन्युद्वास्य सिद्धसङ्कल्पः सुखी विहरेत् इति शिवम् ॥ १० ॥

इति दुष्टक्षत्रियकुलान्तक-रेणुकागर्भसंभूत-महादेवप्रधानशिष्य-परशुराम-श्रीभार्गव-महोपाध्याय-श्रीमत्कुलाचार्यविरचितकल्पसूत्रे गणपतिप्रकरणं द्वितीयखण्डात्मकं समाप्तम्

यदीत्यनेन होमस्य कृताकृतत्वं सूचितम् । बलेः पूर्वं इत्यनेन [1]क्रमशेषः सूचितः । विधिवत् इति—अग्रे वक्ष्यमाणविधिनेत्यर्थः । श्रीश्रीपतिभ्यां स्वाहेति मन्त्रस्वरूपम् ॥

यच्च निबन्धे श्रियै स्वाहा श्रीपतये स्वाहा इति मन्त्रविभागं लिलेख तं प्रत्ययं प्रश्नः—मिथुनमेका देवता, उत देवताद्वयम्? आद्ये मन्त्रद्वयविभागोऽनुचितः । द्वितीये आवरणपूजायां श्रीश्रीपतिश्रीपादुकां पूजयामीति निबन्धे समष्टिमन्त्रलेखोऽनुचितः । तस्मात् सन्दर्भविरुद्धमुपेक्ष्यम् । न च तव मते चतुरावृत्तितर्पणेऽपि समष्टिमन्त्रापत्तिः इति

[1] देशः सू—ब २,

वाच्यम्; तत्र मिथुनेष्वेकैकां देवतां चतुर्वारमिति वर्तते, न मिथुनानि तर्पयित्वेति। पूजाप्रकरणे केवलमिथुनानि पूजयेदित्येव। तेन मिथुनस्य देवतात्वं स्पष्टम्। एवं होमस्थलेऽपि श्रीश्रीपत्यादीत्यनेन मिथुनस्यैकदेवतात्वं स्पष्टम्। अन्यथा श्र्यादिविघ्नकर्तृपर्यन्तैरित्येव वदेत्, श्रीपतिग्रहणं व्यर्थम्। न च विघ्नकर्तृपर्यन्तैरित्यत्र एकदेवताग्रहणं प्रत्येकस्य देवतात्वे किमिति ज्ञापकं न भवेत् इति वाच्यम्। यदीदं मन्त्रस्वरूपज्ञापकं भवेत् अत्रापि विघ्नकर्त्रन्तैरित्यनेनैव श्रीश्रीपत्यादीनां लाभे श्रीश्रीपत्यादीति व्यर्थं सत् मन्त्रस्वरूपज्ञापकं सत् सार्थकम्। विघ्नकर्तृपर्यन्तैरिति अग्रिममिथुननिवर्तकं सत् सार्थकमिति सर्वं समञ्जसम्। तस्मात् चतुरावृत्तितर्पणे पूर्वोक्तयुक्त्या चतुश्चत्वारिंशदधिकचतुश्शततर्पणसंख्यापरिपूर्तये च प्रत्येकं [1]देवतात्वम्। पूजायां होमे चोक्तज्ञापकेन व्यासज्यवृत्त्येव देवतात्वम्। अतो मन्त्रस्वरूपमस्मदुक्तमेव। विघ्नकर्तृपर्यन्तैरित्यनेन अग्रिममिथुनपरिसंख्या॥

हुत्वा इत्यत्र द्रव्याकांक्षायां "अनादिष्ट आज्यं भवति" इति परिभाषया आज्यमेव। कामनाविशेषे तु द्रव्यविशेषो मोदकाऽऽदिः। पुनरागत्य इत्यनेन पूजाप्रदेशादन्यो होमप्रदेश इति सूचितः। शेषं पूर्ववत्। योग्यैः संप्रदायाभिज्ञैः सह। एतद्विशेषणस्वरसार्थं वितत्य स्पष्टीकरिष्यामः उपरिष्टात् श्रीक्रमे। मपञ्चकमुररीकृत्य स्वीकृत्य श्रीक्रमे वक्ष्यमाणेन विधिना। अत्र सहशब्दश्च न योग्याभावेऽप्यवश्यं संपादनीयमिति तदभावे अङ्गलोपजनितं प्रायश्चित्तं वा प्रापयति, किं तु विद्यमाने साहित्यं अविद्यमाने केवलं स्वयमेव, "सह शाखया प्रस्तरं प्रहरति" इतिवत्। अत्र गणपत्युपासनामर्यादाऽनुक्तेः श्यामाऽऽदिवत्। जपसंख्यायाश्चानुक्तेः तन्त्रान्तरं शरणीकार्यम्। तत्र तन्त्रान्तरवचनं, तन्त्रसारे—

ध्यायेन्मन्त्रं जपेन्मन्त्रं चतुर्लक्षं समाहितः।
चतुस्सहस्रसंयुक्तं चत्वारिंशत्सहस्रकम्।
दशांशं जुहुयात् द्रव्यैरष्टभिर्मोदकादिभिः॥ इति॥

उद्वासनमुद्रया उद्वास्य। सिद्धसंकल्पः सिद्धकार्यः। सुखी विहरेत् इति प्रतिपादितकर्मणः न केवलं प्रत्यूहनाशः, किन्त्विदमपि फलमिति दर्शितम्। एतेन

[1] देवतात्वेऽपि पूजायां—व२.

श्रीविद्योपास्त्यनौपयिकानङ्गस्वतन्त्रगणनायकोपास्त्या यद्यदपेक्षितं तत् सिध्यतीति कृतसङ्कल्पेति पदेन सूचितम् । शिवं इति पूर्ववत् प्रकरणसमाप्तिद्योतकम् ॥

इति श्रीरामेश्वरनिर्मितायां सौभाग्योदयनाम्नि परशुरामसूत्रवृत्तौ गणनायकपद्धतिर्नाम द्वितीयखण्डः समाप्तः ॥

तृतीयः खण्डः—श्रीक्रमः

ललिताऽधिकारः

नित्यौघत्रयमिलितामष्टावरणाङ्गषट्कसंवीताम् ।
चिन्तयतां तत्कृपया वाचो निर्यान्त्ययत्नतो वदनात् ॥

एवं पूर्वखण्डेन श्रीललितोपास्त्यङ्गभूतं गणपत्युपासनमुक्त्वा श्रीपरदेवताया ललितायाः क्रमं वक्तुमुपक्रमते—

एवं गणपतिमिष्ट्वा विधूतसमस्तविघ्नव्यतिकरः शक्तिचक्रैकनायिकायाः श्रीललितायाः क्रममारभेत ॥ १ ॥

एवमिति विघ्नव्यतिकर इत्यन्तेन ग्रन्थेन पूर्वं कंचित्कालं गणपत्याराधनं कृत्वा पश्चात् श्रीललितोपास्त्यारम्भ इति सूचितम् । एवं पूर्वोक्तप्रकारेण इष्ट्वा उपास्य विधूता निरस्ता समस्ताः संपूर्णाः विघ्नानां व्यतिकराः सङ्घाताः येन ॥

गणनायकोपास्तेः प्रधानकर्मत्वम्

इदं अधिकारिविशेषणम् । अयं उत्पत्तिविधिः । पूर्वविशेषणस्वारस्यात् अधिकारविधिरपि । यद्वा—नाधिकारिविशेषणमिदम्, तथा सति गणपतेरुपासनायाः अग्रिमोपासनाङ्गत्वापत्तेः । न चेष्टापत्तिः । तार्तीयश्रुतिलिङ्गादीनि अङ्गत्वसाधकानि षट् प्रमाणानि । तन्मध्ये तृतीयवाक्यप्रमाणसिद्धं अङ्गत्वम्, तद्बाधकलिङ्गश्रुत्योरभावेन

प्रमाणसिद्धाङ्गत्वापह्नवस्य कर्तुमशक्यत्वात् । किं तु गणपत्युपास्त्युत्तरवृत्तित्वरूपक्रम-विशिष्टललितोपास्तिरनेन विधीयते । यद्वा—पूर्वोपास्तिरूपगुणविशिष्टक्रमविशेषविशिष्टो वा अयमारम्भः । तत्काललिलितोपास्तिः अनेन विधीयते । विधूतसमस्तविघ्नव्यतिकर इति पूर्वोक्तफलस्यानुवादकम् । एवं चारम्भो नाम संकल्पविशेषः "दर्शपूर्णमासावारप्स्ये" इतिवत् । ललिताक्रममारभेत इत्यनेन यावज्जीवं वर्तिष्ये इति संकल्पः सिद्धः । तदङ्गं गणपत्याराधनम् । एतद्गुणकसङ्कल्पश्च श्रीललितोपास्तौ प्रयाजादिवदारादुपकारकः प्रधानकर्म, "यैस्तु द्रव्यं न चिकीर्ष्यते" इति जैमिनिसूत्रोक्तलक्षण-सत्त्वात् । न च अधिकारिविशेषणत्वे संप्रत्युक्तविशिष्टविधिरूपत्वे वा अनुष्ठाने को विशेष इति वाच्यम् । यद्यधिकारिविशेषणं तर्हि प्रमादादिना गणपत्युपास्तिमकृत्वा ललितोपास्त्यारंभे अनधिकारिणा अन्धादिना अनुष्ठितदर्शपूर्णमासवत् तावत्पर्यन्तकृतस्य कर्मणोऽफलत्वेन यदा सावधानता तदा ललितोपास्तिं त्यक्त्वा गणपत्युपास्तिं संपाद्य संपन्नाधिकारः ततः श्रीविद्योपास्तिं कुर्यात् । विशिष्टविधिपक्षे गणपत्युपास्तेरारम्भाङ्गत्वेन आरम्भस्य च ललितोपास्त्यङ्गत्वेन विस्मृत्यारम्भे जाते सति अङ्गलोपजनितदोषपरिहाराय किंचिद्विहितं प्रायश्चित्तम्, नाङ्गानुसारेण प्रधानावृत्तिः । न च अत्यन्तमङ्गलोपाद्वरं तस्यानुष्ठानं प्रधानस्याङ्गाननुरोधित्वान्मा भवत्वावृत्तिः, अङ्गं तु केवलमनुष्ठीयतां इति वाच्यम् । प्रधानपूर्वाङ्गानां यावतां प्रधानेन अपूर्वे जननीये सहकारित्वं, काम्ये प्रधानेनापूर्वे जननीये सहकारिणोऽभावात् अनन्तरं प्रधानस्य नष्टत्वेन केवलाङ्गानुष्ठाने तदपि व्यर्थम् । नित्ये तु यावज्जीवं कर्तव्यं इत्यङ्गलोपरहितं च कर्तव्यं इत्युक्ते अशक्यानुष्ठानरूपत्वेन शास्त्रस्य अप्रामाण्यापत्तिभिया सकलाङ्गं इत्यस्य यावच्छक्ययावज्ज्ञातसकलाङ्गमिति वाक्यसंकोचो युक्तः । तथा च यथाशक्ति-यावज्ज्ञातैरेवाङ्गैः सहितप्रधानेन अपूर्वोत्पत्तिः कल्प्यत इति क्लृप्तं षष्ठे । तथा च ललितोपास्तेर्नित्यत्वेन अज्ञातयत्किंचिदङ्गलोपेऽपि प्रधानेनेतराङ्गसहितेन अपूर्वजननात् पुनरङ्गानुष्ठानस्य व्यर्थत्वात् न गणपत्युपास्तिरूपस्याङ्गस्याज्ञातस्य पुनरनुष्ठानम् । यदि विघ्ननिरासार्थं किंचिदनुष्ठेयं तर्हि विनायकस्तवपाठादिकं तन्मन्त्रजप एव वा कार्यः । एवंप्रकारानुष्ठानभेदोऽस्ति इति तद्विचारः कृतः । इतोऽधिकं सुधियो विचारयन्तु ॥

शक्तिचक्रैकनायिकायाः शक्तिचक्राणि श्रीचक्रावयवनवचक्राणां मध्ये त्रिकोणादीनि पञ्चचक्राणि । तदुक्तं ब्रह्माण्डपुराणे—

चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ॥
त्रिकोणमष्टकोणं च दशकोणद्वयं तथा ।
चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥ इति ॥

तेषां एका मुख्या नायिका या तस्याः । यद्वा—शक्तयः सधवाः स्त्रियः, तासां चक्रं समूहः, तेषां मध्ये एका अद्वितीया चेयं [1]नायिका जगन्नियन्त्री । न च 'न निर्धारणे' इति षष्ठीसमासनिषेधात् कथमयमर्थः इति वाच्यम् ; षष्ठीसमासनिषेधेऽपि पुरुषोत्तम इतिवत् सप्तमीसमासे बाधकाभावात् । यद्वा—तत्तद्वस्तुनिष्ठतत्तत्कार्यनिर्वाहिकाः शक्तयः, तासां समूहस्यैका अद्वितीया नायिका प्रेरिका । तदुक्तं श्रीदेवीभागवते—

शिवाद्यवनिपर्यन्ते शक्तयः कार्यसाधकाः ।
मयैव प्रेरिता विद्धि ताः सर्वा मुनिसत्तम ॥ इति ॥

यद्वा—शक्तयः श्यामावार्ताळीप्रभृतयः ता एव चक्रं परिवारः, "चक्रं सेव्यं नृपः सेव्यः" इत्यभियुक्तप्रयोगात् । तासामेकनायिका अद्वितीयनियन्त्री इत्यर्थः । एतेन श्रीविद्यायाः प्राधान्यं सूचितम् । शक्तिचक्रैकनायिकेति ललितायाः गुणः । तथा च विशिष्टस्य देवतात्वं, उत्पत्तिवाक्ये श्रूयमाणगुणविशिष्टस्य देवतात्वात्, "यदग्नये पवमानाय अग्नये पावकाय" इत्यादिवत् उत्पत्तिवाक्ये श्रुतदेवतायाः सर्वत्रोच्चारणमिति नियमात् । इत्थं च यत्र देवतानामकीर्तनमावश्यकं तत्र गुणविशिष्टस्यैव कीर्तनम् ; यथा संध्याजपादौ सन्ध्यापूजाऽऽदौ, शक्तिचक्रैकनायिकायाः श्रीललितायाः प्रीतये अमुककर्म करिष्ये इति । एवं निवेदने । अन्यथा पवमानेष्टौ "अग्नये जुष्टं निर्वपामि" इत्येव स्यात् । तस्मात् गुणविशिष्टदेवतायोजनं मन्त्रेष्वत्र कार्यम् । क्रमं पूजां उपासनां वा आरभेत् ॥

ललितानामनिर्वचनम्

ललितानामनिर्वचनं पद्मपुराणे—

[1] नाथा श्रेष्ठा । न च—ब.

लोकानतीत्य ललते ललिता तेन चोच्यते । इति ॥

अत्र चकारद्योत्यं निरुक्त्यन्तरं दर्शयामासुरस्मत्परमेष्ठिगुरवः सहस्रनामभाष्ये—ललितं शृङ्गारभावजन्यः क्रियाविशेषः, तद्वती ललिता । तेन शृङ्गाररसप्रधानेयं मूर्तिरिति ध्वनितम् ॥ १ ॥

ब्राह्ममुहूर्तकर्तव्यध्यानादि

[1]ततो गुरुध्यानादीनुपदिशति सूत्रद्वयेन—

ब्राह्मे मुहूर्ते ब्राह्मणो मुक्तस्वापः पापविलापाय परमशिवरूपं गुरुमभिमृश्य ॥ २ ॥

ब्राह्मो मुहूर्तः—दिवसं षष्टिघटिकाऽऽत्मकं त्रिंशता विभज्य अष्टाविंशो मुहूर्तः स ब्राह्मः । तदुक्तं देवीभागवते—

अष्टाविंशतिमो यश्च मुहूर्तो ब्रह्मनामकः ।
तस्मिन्नुत्थाय मतिमांश्चिन्तयेदात्मनो हितम् ॥ इति ॥

तस्मिन् ब्राह्मणः मुक्तस्वापः निद्रां त्यक्त्वा । तस्मिन् समये निद्रात्यागस्य सामान्यतः स्मृतिप्राप्तत्वेऽपि क्रत्वर्थत्वेन अप्राप्तमनेन विधीयते । दर्शपूर्णमासप्रकरणे "नानृतं वदेत्" इतिवत् क्रत्वर्थत्वम् । तस्मिन्निद्राऽभावे प्राशस्त्यं च त्रिपुरारहस्ये—

द्विमुहूर्तावशेषे तु सूर्यस्योदयनं प्रति ।
उषःकालः समाख्यातः साधकानां शुभावहः ॥
तत्काले यो यमर्थं वै चिन्तयेन्निश्चलान्तरः ।
तदस्य जायते राम कालवेलास्वभावतः ॥
यस्तु कल्पद्रुमप्रख्ये कालेऽस्मिन्नावबुध्यते ।
बुद्ध्वा वा स्वं हितं नैव चिन्तयत्यतिमूढधीः ॥
सर्वैः स्वार्थैः परिभ्रष्टः पङ्के गौरिव सीदति ॥ इति ॥

[1] "इतः परं ललितोपासकेन अनुदिनं कर्तव्याः क्रिया आह" इति ब. कोशे.

ईदृशे काल उत्थाय सर्वपापक्षयाय—तादर्थ्ये चतुर्थी । शिव एव गुरुः न ततोऽन्यः इति अभिमृश्य मनसि ध्यात्वा ॥ २ ॥

मूलादिविधिबिलपर्यन्तं तटित्कोटिकडारां तरुणदिवाकरपिञ्जरां ज्वलन्तीं मूलसंविदं ध्यात्वा तद्रश्मिनिहतकश्मलजालः कादिं हादिं वा मूलविद्यां मनसा दशवारमावर्त्य ॥ ३ ॥

मूलं आधारचक्रं तदादि तदारभ्य विधिबिलपर्यन्तं, एतस्य ज्वलन्तीमित्यनेनान्वयः । तटित्कोटयो विद्युत्कोटयः तद्वत् कडारां कपिशां तरुणदिवाकरः नभोमध्यवर्ती सूर्यः तद्वत् पिञ्जरां अत एव ज्वलन्तीं मूलसंविदं निर्विषयचितं ध्यात्वा तद्रश्मिभिः चिद्रूपज्वालारश्मिभिः निहतानि परिहतानि कश्मलानां जालानि समूहाः येन ईदृशः सन् कादिं कामोपासितां हादिं लोपामुद्रोपासितां वा विद्यां पञ्चदशीं मनसा क्रमविशिष्टान् वर्णान् ध्यात्वा ॥

अत्र निबन्धे स्वगुरुपादुकोच्चारः पञ्चमुद्राभिः नमनं अन्ये च स्वकपोलकल्पिताः श्लोकाश्च लिखिताः । ते सूत्रानभिमता अनादरणीयाः । एवं दन्तधावने मन्त्राः, विंशतिगण्डूषनियमः, सर्वेऽपि निष्प्रमाणास्त्याज्याः ॥ ३ ॥

स्नानसंध्याकर्म

ततः स्नानसन्ध्ये वदति—

स्नानकर्मणि प्राप्ते [1]मूलेन दत्वा त्रिः सलिलाञ्जलीन् त्रिस्तदभिमन्त्रिताः पीत्वाऽपस्त्रिस्सन्तर्प्य त्रिः प्रोक्ष्यात्मानं परिधाय [2]वाससी [3]ह्रां ह्रीं ह्रूं सः इत्युक्त्वा मार्ताण्डभैरवाय प्रकाशशक्तिसहिताय स्वाहेति त्रिस्सवित्रे दत्वार्घ्यः ॥ ४ ॥

[1] मूलेन मूर्धनि दत्वा—ब.

[2] "मूलेन" इत्यधिकः—ब२.

[3] गृहमागत्य दीर्घत्रयान्वितो हंस इत्युक्त्वा, इत्यधिकः त. कोशे.

स्नानकर्मणि प्राप्ते स्नानावसरे । एतेन वैदिकस्नानोत्तरत्वं अस्य सूचितम् । अयमेवार्थः स्पष्टमुक्तः त्रिपुरार्णवे—

त्रैवर्णिकैर्वैदिकाऽन्ते तान्त्रिकं क्रियतेऽखिलम् ॥ इति ॥

अत्र प्रत्यञ्जलि मन्त्रावृत्तिः । अञ्जलीन् इति बहुवचनेन द्रव्यभेदे सिद्धे क्रियाया आवृत्तिरपि, द्रव्यभेदे मन्त्रावृत्तेरेकादशे व्यवस्थापितत्वात् । दत्वा इत्यस्य कुत्रेत्याकांक्षायां स्नानरूपतया योग्यत्वात् स्वशिरसीति पूरणीयम् । मूलेन इति मूलमुच्चारयन्निति तदर्थः । त्रिः तदभिमन्त्रिताः मूलाभिमन्त्रिताः । त्रिरित्यस्य अभिमन्त्रिता इत्यनेनान्वयः सन्निहितत्वात्, न पीत्वेत्यनेन विप्रकृष्टत्वात् । तेन मूलत्रिवाराभिमन्त्रितानां अपां सकृदेव प्राशनम् । त्रिः सन्तर्प्य मूलमुच्चार्य शक्तिचक्रैकनायिकां श्रीललितां तर्पयामीति मन्त्रस्य सकृत्पाठः, क्रियाऽभ्यासरूपत्वात् । चतुरावृत्तितर्पणे तु मन्त्रावृत्तिरेव न क्रियाऽऽवृत्तिः इति पूर्वमेव व्यवस्थापितम् । न हि द्रव्यभेदप्रापकं शास्त्रमस्ति, तस्मात् सकृदेव मन्त्रः । प्रोक्षणेऽप्येवमेव । आत्मानं इति शरीरवाचकं, मुख्यार्थस्य प्रोक्षणजनितसंस्कारासंभवात् । तर्पणप्रोक्षणयोः मन्त्रानुक्तेः मूलेनेति योजयेत् । तदुक्तं त्रिपुरार्णवे—

मन्त्रानुक्तौ मूलमन्त्रं योजयेत् परमेश्वरि ॥ इति ॥

न 'मूलेन दत्वा' इत्यस्मादनुषङ्गः, तथा सति 'तदभिमन्त्रिताः' इत्यत्राप्यनुषङ्गे तत्पदवैय्यर्थ्यात् । अतोऽध्याहार एव । [1]वस्त्रपरिधानं स्मृतिप्राप्तमनूद्यते । तत्फलं स्नानकर्मपरिसमाप्तिज्ञानं ज्ञेयम् । [2]इत्युक्त्वा इत्येतावदपहाय स्वाहाऽन्तोऽर्घ्यदानमन्त्रः । यद्यपि मन्त्रलिङ्गेनैव देवतालाभे सवित्र इति व्यर्थम् । तथाऽपि दत्ताऽर्घ्य इत्यत्र दानपदार्थः स्वस्वत्वध्वंसपूर्वकदेवतोद्देश्यकद्रव्यत्यागः । स च अमुकदेवताया इदं न ममेति रूपः । तत्र मन्त्रलिङ्गेन मार्ताण्डभैरवायेदं न ममेति सिद्धः । "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इतिवत् तं बाधितुं चतुर्थ्यन्तं सवित्रे इति । अत्रापि सकृद्दत्तद्रव्यस्य पुनर्दानासंभवात् अपरार्घ्ये द्रव्यान्तरत्वं सिद्धम् । तथा च द्रव्यपृथक्त्वात् मन्त्रावृत्तिः, यथा नानावीजेष्ववहननमन्त्रः ॥ ४ ॥

[1] 'मूलेन, मूलमुच्चारयन् इति तदर्थः' इत्यधिकः—व २.

[2] वैदिकसंध्योत्तरं तान्त्रिकसंध्यां करिष्ये इति संकल्प्य—इत्यधिकः ब. कोशे.

ततः श्रीचक्रभावनं सवितृमण्डले देव्यै अर्घ्यदानं च विधीयते—

तन्मण्डलमध्ये नवयोनिचक्रमनुचिन्त्य वाचमुच्चार्य त्रिपुरसुन्दरि विद्महे काममुच्चार्य पीठकामिनि धीमहि शक्तिमुच्चार्य तन्नः क्लिन्ना प्रचोदयादिति त्रिर्महेश्यै दत्तार्घ्यः शतमष्टोत्तरमामृश्य मनुं मौनमालम्ब्य ॥ ५ ॥

तस्य सवितृमण्डलस्य दृश्यमानवर्तुलाकारस्य मध्ये नवयोनयः चतस्रः पराङ्मुखाः पञ्च स्वाभिमुखा योनयो यस्मिन् तत् नवयोनिचक्रं श्रीचक्रमित्यर्थः । तदुक्तं कामिकागमे—"नवयोनिः श्रीचक्रमिति" । सुन्दरीहृदयेऽपि—"नवयोनिः श्रीचक्रं विश्वस्योत्पत्तिकारणं प्रोक्तम्" इति । शेषं स्पष्टम् । वाचं प्रथमकूटं, "श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा" इति प्रमाणात् । प्रथमकूटानन्तरं विद्महे इत्यन्तं पठेत् । ततः कामं मध्यकूटं, तदुक्तं चिद्गगनचन्द्रिकायाम्—

शक्तिवाग्भवयोर्मध्ये कामराजस्तु विश्रुतः ।
रक्तशुक्लप्रभामिश्रः . . . . . . इति ॥

तदुच्चार्य पीठकामिनि धीमहि इति पठेत् । शक्तिं शक्तिकूटं तृतीयं उच्चार्य पठित्वा, "शक्तिकूटैकताऽऽपन्नकट्यधोभागधारिणी" इति सहस्रनामपाठात् । ततः प्रचोदयादित्यन्तं पठेत् । इदं त्रिपुरागायत्रीत्यप्युच्यते । शेषं पूर्ववत् । आमृश्य जपित्वा । शेषं स्पष्टम् ॥

अत्र निबन्धकारोक्तं—स्नाने जले हस्तमात्रमण्डलकरणमारभ्य वं इति बीजेन सप्तवारमभिमन्त्रणान्तं सन्ध्यायां त्रिरात्मानं प्रोक्षयेत्यन्तं—तन्त्रान्तरस्थं एतत्तन्त्रानुसारिणा न स्प्रष्टव्यम् । यदि स्पृश्यते तन्त्रान्तरं, तर्हि सन्ध्यात्रयं पारायणक्रमश्च केन हेतुना त्यक्तः । तन्मूलं प्रामाणिकश्चेद्वदतु ॥ ५ ॥

यागमन्दिरप्रवेशादि

ततो यागमन्दिरप्रवेशादीन् वदति—

यागमन्दिरं गत्वा क्लृप्ताकल्पस्सङ्कल्पाकल्पो वा पीठमनुना आसने समुपविष्टः ॥ ६ ॥

यागमन्दिरं पूजास्थानं गत्वा। एतेन सन्ध्या बहिर्जले नद्यादाविति सिद्धम्। क्लृप्ताः धृताः आकल्पाः भूषणानि येनेदृशः। इदं भूषणधारणं पूजाकर्तुरङ्गम्। अतो लोके पूजाकर्तुर्धार्याणि यानि भूषणानि तान्यवश्यं धार्याणि। इदं च श्रीमतां संभवति। एवं सति दरिद्रस्य अङ्गभूतभूषणासमर्थस्य अन्धादिवदनधिकारः प्रसक्तः। अत आह—संकल्पाकल्पो वेति। सङ्कल्पेन मानसक्रियया कल्पित आकल्पो येनेदृशो वा। मनसा निर्मितभूषणधारणकर्तेति यावत्। तथा च दरिद्रस्याप्यस्त्यधिकार इति भावः। भूषणानि पद्मरागप्रचुराणि, भूषणविशेषनियमस्य तन्त्रान्तरस्थस्यापि ग्रहणमभिमतम्॥

यत्तु निबन्धे द्वारपूजायां ताम्बूलभक्षणमुक्तं तत् सूत्रकारानभिमतम्। यद्वा— यागमन्दिरे क्रियाविधानात् अर्थसिद्धे गमने पुनर्यागमन्दिरं गत्वेति व्यर्थं सत् गणपतिक्रमस्थान्तःप्रविश्येत्यर्थकशब्दकथनात् तदन्तधर्मातिदेशं ज्ञापयति। अत एव वाराहीक्रमे नायं शब्दः। तेन श्रीक्रमे श्यामाक्रमे द्वारपूजाऽस्तु। तथाऽपि श्रीक्रमे ताम्बूलभक्षणं निर्मूलमेव॥

पीठमनुनेति पूर्वं व्याख्यातम्। समुपविष्ट इत्यत्र समित्युपसर्गेण आ समाप्ति एकासनेन स्थेयं इति ज्ञापयति। अत एव येनासनेन समाप्तिपर्यन्त-मवस्थाने स्वस्य श्रमो न स्यात् तेन पद्माद्यन्यतमेनासनेन स्थेयमित्यर्थः॥

निबन्धे बालातृतीयबीजेन द्वादशवारमभिमन्त्रणं मूलमन्त्रेण प्रोक्षणं उक्तम्। तत् सूत्रानभिमतं ज्ञेयम्॥ ६॥

एतत्सपर्योपयोगिनीं त्रितारीमाह—

त्रितारीमुच्चार्य रक्तद्वादशशक्तियुक्ताय दीपना-थाय नम इति भूमौ मुञ्चेत् पुष्पाञ्जलिम्॥ ७॥

त्रितारीं वक्ष्यमाणामुक्त्वा नम इत्यन्तमुच्चरेत्। अयं दीपनाथार्हणमनुः। अनेन भूमौ पुष्पाञ्जलिं दद्यात्। पुष्पाणामञ्जलिगृहीतानां प्रचयः पुष्पाञ्जलिः। तदुक्तं अगस्त्यसंहितायां सोमवारविधिप्रकरणे—

संश्लिष्टहस्तद्वयमध्यवर्ती प्रसूनपुञ्जः कुसुमाञ्जलिः स्यात् ॥ इति ॥ ॥ ७ ॥

सर्वमन्त्रेषु त्रितारीसंयोगविधिः

सर्वमन्त्रोपयुक्तां कांचित् परिभाषामाह—

सर्वेषां मन्त्राणामादौ त्रितारीसंयोगः । त्रितारी वाङ्मायाकमलाः ॥ ८ ॥

अत्र सर्वशब्दस्य प्रकरणेन संकोचं कृत्वा श्रीविद्योपास्त्यङ्गभूतानामेतदुत्तर-पठितानां इत्यर्थः । तेनैतत्पूर्वमन्त्रेषु त्रितारीयोगो नास्तीति सिद्धम् । अत एव सेतुबन्धे—"यागमन्दिरप्रवेशोत्तरं कल्पसूत्रे त्रितारीयोगपाठात् ततः प्राक् मन्त्रेषु न तद्योग इति मन्तव्यं" इति स्थितम् । आदा वित्यनेन अन्तव्यावृत्तिः । योग इति वक्तव्ये स मित्युपसर्गेण त्रितार्युच्चारः स्पष्टमभूत् । ततो यत्किंचिदङ्गमन्त्रपाठ-समये मध्ये यदि करणापाटवादिदोषेण एको वर्णो लुप्तः तदा पुनर्मन्त्रः पठनीयः तत्रापि पुनः त्रितारीयोगः सूचितः । यद्वा—त्रितारीपाठानन्तरं केनचित् प्रतिबन्धेन मन्त्रपाठे यदि क्षणविलम्बः तादृशस्थले पुनस्त्रितार्युच्चारोऽविलम्बेनोच्चारणरूपो ज्ञाप्यते । यद्यप्यनेनैव दीपनाथार्हणमन्त्रे त्रितारीयोगप्राप्तौ तत्र त्रितारीमुच्चार्येति व्यर्थम् । तथाऽपि तत्र त्रितारीमुक्त्वेति तन्मन्त्रघटकत्वं त्रितार्या ज्ञापयति । इयं परिभाषा च त्रितारीयोगेन मन्त्राणां संस्कारं वदति इति न वैय्यर्थ्यम् ॥

यत्तु निबन्धे दीपनाथार्हणोत्तरं गणपतिनमनं गुरुनमनं अङ्गुष्ठादिकनिष्ठान्त-व्यापकमिति प्राणप्रतिष्ठा च, तत्सर्वं तन्त्रान्तरस्थं अन्यप्रकरणस्थं श्रीविद्याप्रयोगे न स्प्रष्टव्यम् ॥

अत्र त्रितारी केत्याकाङ्क्षायामाह—त्रि ता री ति । वा क् सबिन्दुः द्वादशस्वरः । मा या तुरीयोष्मसहितद्वितीयान्तस्थोत्तरसबिन्दुस्तुर्यस्वरः । क म ला प्रथमोष्मसहितद्वितीयान्तस्थोपरि सबिन्दुस्तुर्यस्वरः । एते त्रितारीपदवाच्या भवन्तीति शेषः । वागादीनामुक्तार्थत्वे प्रमाणमग्रे वक्ष्यामः ॥ ८ ॥

श्रीचक्रस्वरूपं तत्साधनद्रव्यं च

इतः परं श्रीचक्रस्वरूपं तत्साधनद्रव्यं चाह—

पुरतः पञ्चशक्तिचतुःश्रीकण्ठमेळनरूपं भूसदन त्रयवलित्रयभूपपत्रदिक्पत्रभुवनारद्रुहिणारविधिकोण-दिक्कोणत्रिकोणबिन्दुचक्रमयं महाचक्रराजं सिन्दूर-कुङ्कुम[1]लिखितं चामीकरकलधौतपञ्चलोहरत्नस्फटि-काद्युत्कीर्णं वा निवेश्य ॥ ९ ॥

पुरत इत्यस्य निवेश्येत्यनेन साकमन्वयः । पञ्चशक्तयः शक्तिचक्राणि, चतुःश्रीकण्ठाः चत्वारि शिवचक्राणि, एषां मेळनरूपं अभिन्नस्वरूपम् । एतेन विशेषणेन एतादृशस्वरूपज्ञानं पूजाऽऽदावावश्यकमिति सूचितम् । एतन्मेळनप्रकारः, पूजाकाले ईदृशज्ञानस्यावश्यकता चोक्ता ब्रह्माण्डपुराणे—

त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदळाम्बुजम् ।
दशारयोः षोडशारं भूगृहं भुवनाश्रके ॥
शैवानामपि शाक्तानां चक्राणां च परस्परम् ।
अविनाभावसंबन्धं यो जानाति स चक्रवित् ॥
एवं विभागमज्ञात्वा श्रीचक्रं योऽर्चयेत् सकृत् ।
न तत्फलमवाप्नोति ललिताऽम्बा न तुष्यति ॥ इति ॥

अयमेवार्थस्तन्त्रेषु बहु प्रतिपादितः । ग्रन्थविस्तरभयान्नेह तत्रत्यवचनानि लिखितानि । भूसदनत्रयं परितः चतुरश्ररेखात्रयम् । चतुरश्रे भूसदनशक्तिग्राहकं प्रमाणं तु—

तद्बाह्ये वृत्तमालिख्य तद्बाह्ये चतुरश्रकम् ।

इति तन्त्रान्तरवचनम् । अस्मत्परमेष्ठिगुरुभिरपि सेतुबन्धे लिखितं 'भूगृहं नाम चतुरश्रं'' इति ॥

श्रीचक्रे द्वाररहितचतुरश्रत्रयलेखनसमर्थनम्

ननु तन्त्रान्तरवचने चतुरश्रकमित्येकवचनेन एकमेव चतुरश्रमिति प्रतीयते, इह चतुरश्रत्रयमित्युक्तम्, द्वयोर्विरोधे कथमेतदिति चेत्—न; तत्तत्तन्त्रानुसा-

[1] मिलितं—अ.

रिपुरुषभेदेन व्यवस्थितविकल्पसंभवात् । एवं सूत्रानुयायिनां श्रीचक्रे भूपुरं द्वाररहितं, अनुक्तत्वात् ॥

ननु त्रिपुरार्णवे "वृत्तं ततो भूपुराणां त्रितयं द्वारशोभितं" इत्युक्तत्वात्, एवं नित्यातन्त्रे "एवं त्रिभूसदनकं चतुर्द्वारविभूषितं" इति, वामकेश्वरतन्त्रे "परिवेषं भूपुरं च चतुर्द्वारोपशोभितं" इति, एवमादितन्त्रानुसारेण अत्रापि द्वारतात्पर्यं कल्प्यतां इति चेत्—न "वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रमेतदुदितं परदेवतायाः" इति यामळवचने, एवमन्येष्वपि तन्त्रेषु, द्वाररहितभूपुरश्रवणेन विकल्पस्य दुर्निवारत्वात् । न चैवं द्वाररहितभूपुरस्य केनापि निबन्धकारेणालिखितत्वादिदमश्रद्धेयं इति वाच्यम्; सौन्दर्यलहर्यां "त्रयश्चत्वारिंशत्" इति श्लोके द्वारानुक्तेः भगवत्पादानामस्मदुक्तपक्षस्यैवाभिमतत्वात् । एवं प्रपञ्चसारसङ्ग्रहे श्रीविद्यारण्यस्वामिभिरपि द्वाररहितमपि श्रीचक्रे चतुरश्रमुपलभ्यते क्वचिदिति ग्रन्थेन अस्मदनुमतमेव लिखितम् । एवमतिचिरन्तनशिङ्गभूपालपद्धतावपि तथाऽस्ति । इदमन्वेषितुं प्रवृत्तौ अन्यान्यपि निबन्धान्तरवाक्यानि मिलिष्यन्ति । एतावदलमिति न विशेषयत्नः कृतः ॥

इत्थं चाहं सूत्रानुयायीति विशेषाभिमानवता नित्योत्सवनिबन्धकारेण श्रीचक्रलेखनप्रकारकथनावसरे "चतुर्द्वारं भूपुरं समुद्भावयेत्" इति यतो लिखितं अत एव तेन सूत्रं न परिशोधितम् । गतानुगतिकलोकानुसारेण लिखितमिति स्फुटम् ॥

किंच निबन्धकारः श्रीभास्कररायाणां शिष्य इति स्वनिबन्ध एव लिलेख । श्रीभास्कररायोक्तसेतुबन्धे "प्रतिदिशं रेखात्रययुक्तं द्वारसामान्याभाववत्" इति तृतीयः पक्षः । कल्पसूत्रमस्मिन् पक्षे अनुकूलमिति लिखितम् ॥

किंच सर्वेषां मन्त्राणां आदौ त्रितारीसंयोग इति कल्पसूत्रस्य यागमन्दिरप्रवेशोत्तरमेव पाठात् ततः प्राक्तनमन्त्रेषु न तद्योग इति सेतुबन्धे स्थिते अयं मुधःकारी रश्मिमालामन्त्रेषु सन्ध्यावन्दने च त्रितारीं योजयामास । तथा द्वारचतुष्टयं च योजयामास । एवं सति गुरुमतमपि यः अजानन् स्वेच्छया लिखति स कीदृश उपासकः, कीदृशो वा गुरुशिष्यभावः, तं न विद्मः ॥

यदि च सेतुबन्धे प्रथमं द्वारसामान्याभावं विलिख्य अग्रे तत्त्वं विचार्य अग्रे तत्रैव "द्वारसामान्याभावपक्षस्तु द्वारप्रतिषेधपर्युदासान्यतरमन्तरेण यामळकल्पसूत्रादौ

द्वारानुक्तिमात्रेण कल्प्यमानः साहसमात्रं" इति लिखितत्वात् कथं गुरुमतानभिज्ञते-त्युच्यते,—तदा आस्तां द्वारविषये गुरुमताभिज्ञता । रश्मिमालामन्त्रेषु सन्ध्यामन्त्रेषु च त्रितारीयोजने गुरुमतानभिज्ञता वज्रलेपायिता । एतेनायं निबन्धः सर्वतन्त्रस्वतन्त्र-श्रीभास्कररायैः परिशोधित इत्यैतिह्यमपि निर्मूलमिति स्फुटं युक्तमुत्पश्यामः ॥

व लि त्र यं वृत्तत्रयम् । अत्र बहवः—षोडशदळस्य अष्टदळस्य द्वे कर्णिकावृत्ते, तयोर्बहिः एकं वृत्तं, एवं च वृत्तत्रयं, न पद्मद्वयस्य बहिर्वृत्तत्रयम् । यत्तु "वलित्रयं" इति कल्पसूत्रम्, "वृत्तत्रयं च धरणीसदनत्रयं च" इति यामळवचनं, "ज्येष्ठारूपं चतुष्कोणं वामारूपं भ्रमित्रयं" इति योगिनीतन्त्रवचनम्, सर्वं उक्तवृत्तत्रयपरमेवे-त्याहुः ॥

श्रीचक्रे पञ्चवृत्तलेखनसमर्थनम्

अत्र अस्मत्परमेष्ठिगुरवः सेतुबन्धे वक्ष्यमाणप्रकारान्तरेण श्रीचक्रलेखनावसरे—

बहिः पद्मद्वयं कुर्यादष्टषोडशकच्छदम् ।
गुणवृत्तं ततः कुर्याच्चतुरश्रं च तद्बहिः ॥

इति वामकेश्वरतन्त्रवचने ततःपदस्वारस्येन पद्मद्वयाद्बहिरेव त्रीणि वृत्तानि, तदनुसारेण परिशेषं भूपुरं चेति । अत्रैकवचनमविवक्षितम् । एवं च पञ्च वृत्तानि । अत एव ज्ञानार्णवे—

एतद्बाह्ये महेशानि वृत्तं पूर्णेन्दुसंनिभम् ।
तद्युतं कुरु मीनाक्षि वसुपत्रं मनोहरम् ॥
तथा षोडशपत्रं तु विलिखेत् सुरवन्दिते ।
तद्बाह्ये देवदेवेशि त्रिवृत्तं मातृकाऽन्वितम् ॥

इत्यत्र तद्बाह्य इतिपदेन कर्णिकावृत्तादतिरिक्तं वृत्तत्रयं सुस्पष्टमुक्तम् ॥

तद्व्याख्यातारोऽन्ये आग्रहेण तद्बाह्ये इति श्लोकार्धं स्वपुस्तक उपरि लिखि-तत्वात् अक्षरलेखनप्रकारस्य कस्मिंश्चित्तन्त्रे अलेखनात् अकस्मान्मातृकाऽन्वितत्वोक्ते-रसङ्गतत्वात् बहुषु पुस्तकेषु अनुपलब्धेश्च प्रक्षिप्तमिति परमतमनूद्य तदुपरि यदि प्रक्षिप्तं तर्हि तृतीयवृत्तविधायकवचनाभावात् वृत्तद्वयापत्तेरिति दूषितत्वात् संहितायां तन्त्रान्तरे च बहिर्वृत्तत्रयं सुस्पष्टमस्तीति लिखितत्वात् पञ्चवृत्तानीति (सेतुबन्धे) व्यवस्थापयामासुः ॥

अत्र महेश्वरानन्दनाथाः—"तद्बाह्ये वृत्तमालिख्य तद्बाह्ये चतुरश्रकम्" इति परमानन्दतन्त्रे वृत्तमित्येकवचनात्, "वृत्तं ततो भूपुराणां" इति, "वृत्तं त्रिभूसदनकं" इति, "परिवेषं भूपुरं च" इति, "सुवृत्तं परमेशानि" इति त्रिपुरार्णव-नित्या-वामकेश्वरतन्त्र-दक्षिणामूर्तिसंहितासु एकवचनबलात् कर्णिकावृत्तद्वयेनैव सह त्रिवृत्तमिति व्यवस्थाप्य ततः सेतुबन्धमतमनूद्य तद्दूषणे सेतुबन्ध एव वामकेश्वरतन्त्रज्ञानार्णववचनयोः बहुषु पुस्तकेष्वनुपलंभादिति श्रीभास्कररायलेखं हेतुत्वेनोपन्यस्य सेतुबन्धं दूषयामासुः ॥

अयं प्रकारोऽसिद्धः । सेतुबन्धे तैः सिद्धान्तावसरे बहुषु पुस्तकेष्वनुपलंभादिति नोक्तः । किंतु वादिमतानुवादवेळायां उपन्यस्तः । स च वादिनो लेखः । तेन हेतुना श्रीभास्कररायमतं कथं निरस्तम् । रायैश्च प्रत्युत मत्पुस्तकमध्यलेखात् प्रमाणमेवेति प्रतिबन्ध्युत्तरं वृत्तद्वयापत्तिश्चेति दूषणद्वयं दत्तम् । किं च वामकेश्वरतन्त्र-वचने न कोऽपि विवादं लिलेख । एवं सति तत्रापि निर्मूल ईदृशो दोषारोपः केवलं स्वपाण्डित्यप्रकटनार्थ एव । अतो वामकेश्वरतन्त्रवचनस्य वृत्तत्रयप्रापकस्य ज्ञानार्णवस्य च गतिमकल्पयित्वा न वृत्तपञ्चकनिवृत्तिर्भविष्यति ॥

यदि च निरुक्तैकवचनबलादेव यामळकवचनेन अष्टदळषोडशदळेति पृथगुक्त्वा तदुत्तरं श्रूयमाणवृत्तत्रयेतिपदे त्रयमित्यस्य समुदायानुवादकत्वरूपवैय्यर्थ्यमङ्गीकृत्य, एवं वामारूपं भ्रमित्रयमित्यत्र अष्टदळषोडशदळावयवस्य भ्रमेरेव वामारूपत्वकल्पनायासः क्रियते । तर्हि तद्बाह्य चतुरश्रकमित्यत्राप्येकवचनं तुल्यम् । तदुपोद्बलकानि वचनानि—वामकेश्वरतन्त्रे "परिवेषं भूपुरं च" इति, तत्रैव षष्ठपटले "वामारूपं चतुष्कोणं इति, पूर्वतन्त्रे च "गुणवृत्तं ततः कुर्याच्चतुरश्रं च तद्बहिः" इति, दक्षिणामूर्तिसंहितायां—"सुवृत्तं परमेशानि ततो भूबिम्बमालिखेत्" इत्यादिवचनानि। एवं वचनेषु सत्सु एकवचने निर्भरवतः अत्र परमानन्दतन्त्रटिप्पण्यां "चतुरश्रं चतुरश्रत्रयं[1]" इति महेश्वरानन्दनाथलेखः सन्दर्भविरुद्ध एव ॥

यदि च "भूपुराणां त्रितयं द्वारशोभितं" इत्यादितन्त्रवचनैरेकवचनं तत्रत्यमविवक्षितमित्युच्यते, तर्हि वृत्तमित्यत्रैकवचनेन कोऽपराधोऽनुष्ठितः । एवं बहुष्वेकवचनं लोके वेदे च प्रयुज्यमानं बहूपलभ्यते । लोके, "गृहे धान्यमस्ति",

1 "तच्चतुरश्रत्रयं त्रिभिरङ्गुलैः" इत्यधिकः—ब२.

"संपन्नो व्रीहिः", "इति हेतुस्तदुद्भवे" इति ईदृशस्थले जात्येकवचनमिति वदन्ति शिष्टाः। "ब्राह्मणो मम दैवतं" इति पुराणप्रयोगः। श्रुतौ बहुपत्नीकदर्शपूर्णमासे "पत्नीं संनह्य", "गृहं संमार्ष्टि", इत्येवमादीनि बहूनि सन्ति। तद्वदुपपत्तेः नैकवचनस्य सर्वथा गत्यभावः॥

न च—उक्तस्थलेषु बाधकवशादेकवचनस्य लक्षणां बहुत्वे कल्पयित्वा एकवचनं निर्वाह्यम्। प्रकृतेऽपि तद्वत्पक्षाश्रयणे वामकेश्वरतन्त्रस्थस्य "गुणवृत्तं ततः" इत्यत्र तत इत्यस्यैव लक्षणायां तात्पर्यग्राहकता वाच्या। सा च न संभवति। ततःपदघटितवामकेश्वरतन्त्रस्य "तद्बाह्ये वृत्तं" इति परमानन्दतन्त्रस्यैकवचनघटितस्य तुल्यबलत्वेन एकवचनानुसारेण तत इत्यस्यैव लक्षणापक्षं अविवक्षापक्षं वाऽऽश्रित्यैकवचनविवक्षैव किमिति न क्रियते। द्वयोर्मध्ये अन्यतरस्य अन्यथानयने कार्ये तत इति पदस्वारस्येनैकवचनमविवक्षितं न विपरीतमित्यत्र नियामकाभावात्—इति वाच्यम्। प्रत्ययार्थप्रातिपदिकार्थयोर्मध्ये एकानुसारेण अपरस्यान्यथानयने प्राप्ते प्रातिपदिकस्य प्रबलत्वेन तदनुसारेण वचनप्रत्ययार्थस्यैवान्यथा नयनम्। तदुक्तं श्रीविद्यारण्यस्वामिभिः—

त्रिरनूक्तिर्ऋचो धर्मः स्थानधर्मोऽथ नाग्रिमः।
स्त्रीलिङ्गत्वान्न तत्प्रातिपदिकप्रबलत्वतः॥

इति प्रातिपदिकप्राबल्यसाधकयुक्तयोऽपि बह्व्यः सन्ति। ग्रन्थविस्तरभयादभियुक्तोक्तिक्लृप्तैव लिखिता। तस्मात् प्रातिपदिकीभूतततइत्यनुसारेण एकवचनमेव अन्यथा नेयम्। तथा च सुधिया आग्रहं परित्यज्य केवलतत्त्वबुभुत्सुना विचार्यमाणे सर्वतन्त्रेष्वपि वचनमात्रस्याविवक्षां कृत्वा श्रीयन्त्रे पञ्चवृत्तान्यभिमतानीति सिध्येदिति। प्रकृतमनुसरामः॥

भूपपत्रमिति—भूपा इति षोडशसंख्यायाः सङ्केतः। षोडश पत्राणि यस्मिंस्तत्। दिक्पत्रं—दिगित्यष्टसंख्यायाः संज्ञा, तावन्ति पत्राणि यस्मिंस्तत्। भुवनारं—भुवनमिति चतुर्दशसंख्यायाः संज्ञा, तावदरं तावत्कोणम्। द्रुहिणारं द्रुहिण इति दशसंख्यायाः संज्ञा, श्रीभागवतादौ सृष्टिनिमित्तानां दशप्रजापतीनां कर्दमादीनां प्रसिद्धत्वात्। तावदरं दशकोणमित्यर्थः। एतेन विधिकोणमिति च व्याख्यातप्रायम्। दिक्पदं च व्याख्यातम्। त्रिकोणबिन्दू स्पष्टौ। मयमित्यनेन

समष्ट्येकरूपत्वं ज्ञापितम् । महाचक्रराजं—चक्रराजमिति श्रीचक्रस्य नाम, तत्र महत्त्वं पूज्यत्वं, "मह पूजायां" इत्यनुशासनात् । तथा च ब्रह्मविष्णुरुद्रादिसकलपूज्यमित्यर्थः । सिन्दूरं प्रसिद्धं, कुङ्कुमं काश्मीरं, एतदन्यतरेण । यद्वा—द्वन्द्वसमासेन साहित्यप्रतीतेः सिन्दूरसहितकुङ्कुमेन लिखितम् ॥

नव्यास्तु—यदा भूमौ प्रस्तारो लिख्यते तदा कुङ्कुमरजोभिः पूरणं, मेरुप्रस्तारश्चेत् सिन्दूररजोभिरिति व्यवस्थामाहुः । तत्र मूलं चिन्त्यम् ॥

लेखनप्रकारस्य अस्मत्परमेष्ठिगुरुकृतसेतुबन्धे सविस्तरमुक्तत्वान्नात्र लिख्यते । एतावत्पर्यन्तं पूजासमये नित्ययन्त्रनिर्माणप्रकारः उक्तः । इदानीं सिद्धयन्त्रेऽपि पूजाप्रकारं यन्त्रनिर्माणद्रव्यनियमं चाह—चामीकरेत्यादिना । चामीकरं सुवर्णं कलधौतं रौप्यम् । यद्यपि कलधौतपदं सुवर्णवाचकमपि भवति । "कलधौतं रौप्यहेम्नोः" इति कोशात्, तथाऽपि सुवर्णस्य पूर्वमुक्तत्वाद्रौप्यमेव । पञ्चलोहं, तल्लक्षणमुक्तं तन्त्रसारे बृहत्पाञ्चरात्रे च—

रौप्यं नृपगुणं प्रोक्तं दिक्संख्यो हेमभागकः ।
ताम्रं द्वादशभागः स्याल्लोहभागस्य पञ्चकम् ।
आरकूटस्य षड्भागाः पञ्चलोहं प्रकीर्तितम् ॥ इति ॥

आरकूटं पित्तलं, शेषं स्पष्टम् । रत्नानि मरकतादीनि, तेषु उत्कीर्णं पूर्वोक्तशास्त्रेण निर्मितम् । आदिपदात् ताम्रपटादिकं परमानन्दतन्त्रोक्तं ग्राह्यम् । इदमपि पूर्वोक्तचक्रराजे विशेषणम् । ईदृशं चक्रराजं पुरतो निवेश्य ॥

अत्र पूजनं मुख्यम् । एतस्यालाभे तन्त्रान्तरोक्तप्रतिनिधिस्वीकारोऽपि कार्यः । तदुक्तं परमानन्दतन्त्रे—

आदर्शे चैकगुणितं पुस्तके द्विगुणं फलम् ।
प्रतिमायां चतुर्धा स्यात् सालग्रामेषु षोडश ॥
शिवनाभे शतगुणं पूजनात् पुरुषार्थकम् ।
सहस्रधा नार्मदे तु फलं देवि प्रचक्षते ॥
कुण्डल्यां लक्षगुणितं देवतादर्शनं भवेत् ।
चक्रराजे तु या पूजा साऽनन्तफलदायिनी ॥ इति ॥

इमानि तु पठितक्रमे उत्तरोत्तराभावे पूर्वपूर्वं ग्राह्यम् । एतादृशार्थतात्पर्यग्राहकमेव फलतारतम्यश्रवणम् । कुण्डली शेषकुण्डली । पुस्तकं कुलशास्त्रपुस्तकम् । प्रतिमा ध्यानश्लोकस्थाकारा । शेषं स्पष्टम् ॥

यन्त्रप्रतिष्ठा सूत्रे अनुक्तत्वात् न कर्तव्या सूत्रानुयायिभिः । एवं प्राणप्रतिष्ठाऽपि न कार्या सूत्रानुयायिभिः, अनुक्तत्वात् अनाकाङ्क्षितत्वाच्च । वस्तुतस्तु— यन्त्रप्रतिष्ठायाः पूजाप्रयोगबहिर्भूतत्वात् अधिकाभ्युदयेच्छायां तन्त्रान्तरोक्तमनुष्ठेयं, यथा सहस्रनामपाठादि । तत्करणे अभ्युदयः अकरणेऽपि न हानिः सूत्रानुयायिनाम् । यथा वा यज्ञोपवीतसंस्कारो बौधायनसूत्रे पठितः । अन्यसूत्रापठितत्वात् "बह्वल्पं वा" इति सूत्रात् अननुष्ठाने न हानिरिति द्रविडान्ध्रदेशीयाः यज्ञोपवीतस्य न संस्कारं कुर्वन्ति । महाराष्ट्रदेशीयैस्तु करणे अभ्युदयं मत्वा संस्कारः क्रियते । तद्वत् चक्रराजे संस्कारे अभ्युदयः, अकरणे सूत्रानुयायिनां न हानिः ॥ ९ ॥

मन्दिरार्चनम्

ततो मन्दिराद्यर्चनक्रममाह—

तत्र महाचक्रे अमृताम्भोनिधये रत्नद्वीपाय नानावृक्षमहोद्यानाय [1]कल्पवृक्षवाटिकायै सन्तानवाटिकायै हरिचन्दनवाटिकायै मन्दारवाटिकायै पारिजातवाटिकायै कदम्बवाटिकायै पुष्यरागरत्नप्राकाराय पद्मरागरत्नप्राकाराय [2]गोमेधरत्नप्राकाराय वज्ररत्नप्राकाराय वैडूर्यरत्नप्राकाराय इन्द्रनीलरत्नप्राकाराय मुक्तारत्नप्राकाराय मरकतरत्नप्राकाराय विद्रुमरत्नप्राकाराय माणिक्यमण्डपाय सहस्रस्तम्भमण्डपाय अमृतवापिकायै आनन्दवापिकायै विमर्श-

[1] कल्पवाटिका—ब२, श्री,

[2] गोमेद—ब२.

वापिकायै बालातपोद्गाराय चन्द्रिकोद्गाराय महाशृङ्गारपरिघायै महापद्माटव्यै चिन्तामणिगृहराजाय पूर्वाम्नायमयपूर्वद्वाराय दक्षिणाम्नायमयदक्षिणद्वाराय पश्चिमाम्नायमयपश्चिमद्वारायोत्तराम्नायमयोत्तरद्वाराय रत्नप्रदीपवलयाय मणिमयमहासिंहासनाय ब्रह्ममयैकमञ्चपादाय विष्णुमयैकमञ्चपादाय रुद्रमयैकमञ्चपादाय ईश्वरमयैकमञ्चपादाय सदाशिवमयैकमञ्चफलकाय हंसतूलतल्पाय हंसतूलमहोपधानाय कौसुम्भास्तरणाय महावितानकाय महायवनिकायै नम इति चतुश्चत्वारिं[1]शन्मन्त्रैस्तत्तदखिलं भावयित्वा अर्चयित्वा ॥ १० ॥

तत्र यागमन्दिरे स्थिते इति शेषः । इदं च महाचक्रे इत्यस्य विशेषणम् । यद्वा—तत्रेति लिखितार्थकं [illegible]सूत्रे, पुरतो निवेश्येत्यन्वितम् । महाचक्रे इति "भावयित्वा अर्चयित्वा" इति अग्रिमेणान्वितम् । अमृताम्भोनिधिः अमृतसमुद्रः । रत्नमयो द्वीपः वासयोग्यदेश उन्नतभूमिरिति यावत् । उद्यानं क्रीडावनं, "पुमानाक्रीड उद्यानं" इत्यमरः । वृक्षवाटिका उपवनं, "गेहोपवने वृक्षवाटिका" इत्यमरः । कल्पादीनि सुरतरुनामानि ।

पञ्चैते देवतरवो मन्दारः पारिजातकः ।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ इत्यमरः ॥

कदम्बः प्रसिद्धः । पुष्यरागादिविद्रुमान्ता नवरत्नभेदाः तेषां प्राकारः परितः गृहाद्बहिर्निर्मिता भित्तिः । माणिक्यं पद्मरागं, तस्य मण्डपः । वापी दीर्घिका । उद्गारो लोहितवर्णं समाह्लादकं वस्तु । तदुक्तं त्र्यक्षरकोशे—"उद्गारो लोहिते वर्णे समाह्लादनवस्तुनि" इति । रत्नमयाः प्रदीपाः तेषां वलयम् । हंसतूलं पक्षिविशे-

[1] शन्मन्दिरमन्त्रै—बर.

षस्य पक्षाधःस्थितरोममालाऽऽकृतिसूक्ष्मपक्षाः महाराष्ट्रभाषायां परा इति प्रसिद्धम्। म हो-प धा नं महाराष्ट्रभाषायां लोड्ड इति प्रसिद्धम्। कौ सुं भा स्त र णं रक्तवर्णं तल्पोपरि तन्मालिन्याभावार्थं सूक्ष्मं वस्त्रं पात्यते। तत् महाराष्ट्रभाषायां पलंगपूस इति प्रसिद्धम्। वि ता नं ऊर्ध्वदेशान्मृत्तिकादिपातप्रतिबन्धकमुपरि बध्यमानं वस्त्रम्। यवनिका महाराष्ट्रभाषायां पड्दा इति प्रसिद्धम्। शेषं प्रसिद्धम्। एवं चतुर्थ्यन्तैः सर्वैः न म इति योगः, "या ते अग्नेऽयाशया" इतिवत्। एतैः च तु श्च त्वा रिं श न्म न्त्रैः मन्त्रवाच्यानर्थान् आदौ श्रीचक्रे परिभाव्य तेषां पूजनं कुर्यात्। एकस्य ध्यानं ततोऽर्चनं, ततोऽपरस्य ध्यानं ततः तस्यार्चनमिति क्रमः त त्त दि ति पदस्वारस्यात् लब्धः। अन्यथा न्यायतः पदार्थानुसमयेन ध्यानं पूजनं च प्राप्तं, तत्तदिति वीप्सया तद्बाधो ज्ञेयः ॥ १० ॥

दीपदानं चक्राभ्यर्चनं च

गन्धपुष्पादिस्थापनस्थानादिकमाह—

गन्धपुष्पाक्षतादींश्च दक्षिणभागे दीपानभितो दत्वा मूलेन चक्रमभ्यर्च्य मूलत्रिखण्डैः प्रथमत्र्यश्रे ॥ ११ ॥

अ क्ष ता दी त्यत्र आदिपदेन प्रथमद्वितीयादिग्रहणम्। एतस्य द त्वे त्यनेनान्वयः। तत्र दानं न यत्किंचिद्देवतोद्देशेन त्यागः। किंतु "यज्ञायुधानि संभरति" इतिवत् पूजासामग्र्याः एकत्र संपादनम्। एतस्य फलं तत्तदर्पणवेळायां तस्य तस्य शीघ्रलाभः। दी पा नाम भि तः पार्श्वद्वये दानं स्थापनमदृष्टार्थम्। दत्वेत्यस्य च कारेण आवृत्तिर्ज्ञापिता, प्रत्युद्देश्यं वाक्यपरिसमाप्त्यर्थमावृत्तेरावश्यकत्वात्। अतो न ददातेरर्थभेदो दोषजनकः। नच दाधातोरयमर्थः केन प्रमाणेनेति वाच्यम्, रजकस्य वस्त्रं ददाति, संवाहकस्य चरणौ ददाति, शत्रवे भयं ददाति, इत्यादौ योग्यतया अर्थकल्पनावत् अत्रापि योग्यार्थकल्पनात्। अ भि त इत्यनेन एकस्मिन् पार्श्वे यावन्तो दीपाः तावन्त एव अपरपार्श्वे इति ज्ञाप्यते। अस्य फलं अन्धकारनिवृत्तिः। एतेन पूजागृहे अन्धकारसामान्याभावः कार्य इत्यर्थः। एकस्मिन् पार्श्वे अधिकदीपस्थापने तत्पृष्ठतः तच्छायारूपान्धकारः पतिष्यति। अभितस्तुल्यप्रज्वालने न कुत्राप्यन्धकार

इत्यर्थः । पार्श्वद्वयनियमो दृष्टार्थः । चक्रं नवचक्रात्मकं समष्टिचक्रं मूलेन पञ्चदश्या अभ्यर्च्य । अत्र पुष्पाक्षतक्षेपणमेवाभ्यर्चनम् । त्रिखण्डैः वाग्भवकामराजशक्तिभिः प्रथमं चक्रनिर्माणसमये प्रथमस्य चक्रस्य त्रीणि यान्यश्राणि तानि द्विगुत्वादेकवद्भावः । न बहुव्रीहिः । तत्पक्षे त्रिकोणात्मकैकचक्रे एकदेशे पूजने मन्त्रत्रयस्यानाकांक्षितत्वात् "भगो॰ वां विभजतु" इतिवद्विकल्पापत्तेः । न च "चतुर्भिरभ्रिमादत्ते" इतिवत् समुच्चयोऽस्त्विति वाच्यम्; तथाऽपि बहुव्रीहिपक्षे अन्यपदार्थे लक्षणाकल्पनं दोषः । द्विगुपक्षे तु कोणत्रये कूटत्रयं युक्तम् । अभ्यर्च्य इत्यस्य पूर्वस्मादनुवृत्तिः । क्रमस्यानुक्तत्वात् स्वाग्रादिप्रादक्षिण्येन ॥ ११ ॥

आत्मशुद्धिहेतु शोषणादि

ततः शोषणादीनात्मशुद्धिहेतूनाह—

वाय्वग्निसलिलवर्णयुक्प्राणायामैः शोषणं संदहनमाप्लावनं च विधाय ॥ १२ ॥

वायुवर्णः—यं, अग्निवर्णः—रं, सलिलवर्णः—वं । वायौ शोषकताशक्तिः लोकप्रसिद्धा । अतस्तद्वर्णेऽपि साऽस्ति । अतः तेन शोषणं जलांशनाशनं, एवमेव अग्निवर्णेन संदहनं भस्मीकरणं, तथैव तद्भस्मनः उदकवर्णेन पिण्डीकरणं आप्लावनं, विधाय कृत्वा । चकारात् तन्त्रान्तरोक्तं श्यामाप्रकरणस्थं वा लं इति पार्थिवबीजेन काठिन्यसंपादनं शांभवशरीरोत्पत्तिश्च ग्राह्या । यद्वा—समीपवृत्तित्वात् श्यामाप्रकरणस्थमेव ग्राह्यम् । शोषणादिक्रियाणां कर्माकाङ्क्षायां दृश्यमानं स्थूलशरीरं लिङ्गशरीरं वा कर्म तन्त्रान्तरप्रसिद्धं ग्राह्यम् । वर्णयुक्प्राणायामैरित्युक्त्या यमित्युच्चरन् प्राणानातमितोर्नियच्छेत्, ततः शरीरशोषणं भावयेत्, यश्च श्यामाप्रकरणे "वायुं पिङ्गळया आकृष्य" इत्यभ्यासः कृतः तस्यार्थस्य प्राणायामैरित्यनेन ज्ञापितत्वात् । एवमेवाग्रेऽपि ॥

यत्तु निबन्धे सङ्कोचशरीरं शोषयेदित्यादिवाराहीप्रकरणस्था मन्त्रा लिखिताः ते निर्मूला हेयाः, असूत्रितत्वात् । परं तु श्यामाप्रकरणस्थं कठिनत्वसंपादनं शांभवशरीरोत्पत्तिः [1]चकारसूचितार्थापत्तिप्रमाणसिद्धा अनुष्ठेया ॥ १२ ॥

[1] सूत्रकार—श्री.

प्राणायामः

ततः प्राणायामविधिमाह—

त्रिः प्राणानायम्य ॥ १३ ॥

प्राणायामस्तु श्यामाप्रकरणे वक्ष्यमाणप्रकारेण ज्ञेयः ॥ १३ ॥

विघ्नकरभूतोत्सारणम्, वज्रकवचन्यासश्च

तदुत्तरं विघ्नकृद्भूतोत्सारणं कार्यमिति तदाह—

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया । इति वामपादपार्ष्णिघातकरास्फोटसमुदञ्चितवक्त्रैस्तालत्रयं दत्वा देव्यहंभावयुक्तः स्वशरीरे वज्रकवचन्यासजालं विदधीत ॥ १४ ॥

अपसर्पन्तु इति मन्त्रेण पार्ष्ण्या पादपृष्ठभागेन भुवो घातः ताडनं, करयोः आस्फोटः संघर्षः, समुदञ्चितं तिर्यक्कृतं वक्त्रं मुखं, एभिः सहेति शेषः । तालत्रयं अधोमुखाभ्यां दक्षमध्यमातर्जनीभ्यां वामकरतले सशब्दं त्रिरभिघातः, तं दत्वा उत्पाद्य । अहं उपास्यदेव्यभिन्न इति भावयित्वा । स्वशरीरे इत्यनेन देवताशरीरव्यावृत्तिः । वज्रकवचं अभेद्यकवचरूपं न्यासजालं न्याससमूहं वक्ष्यमाणं विदधीत कुर्यात् ॥ १४ ॥

करशुद्धिन्यासः

किं तन्न्यासजालं इत्याकांक्षायां आदौ करशुद्धिन्यासमाह—

बिन्दुयुक्श्रीकण्ठानन्ततार्तीयैः मध्यमादितलपर्यन्तं कृतकरशुद्धिः ॥ १५ ॥

श्रीकण्ठः शिवः अकारः योगिनीतन्त्रे पञ्चदश्यां श्रीकण्ठदशकमित्यवर्णगणनात् । अनन्तः दीर्घाकारः, तन्त्रसारे आं ह्रीं क्रों इति मन्त्रस्य "अनन्तो बिन्दुसंयुक्तो मायाब्रह्माग्नितारवान्" इत्युद्धारात् । बिन्दुयुजौ च तौ श्रीकण्ठानन्तौ चेति समासः । तार्तीयः बालातृतीयः सौः इति । एवं च अं आं सौः अनेन मन्त्रेण मध्यमामारभ्य तलपर्यन्तं कृता करशुद्धिः येन । मध्यमाऽनामाकनिष्ठाङ्गुष्ठतर्जनीकरतलकरपृष्ठेषु न्यसेदित्यर्थः । अयं करशुद्धिन्यासः ॥ १५ ॥

आत्मरक्षान्यासः

आत्मरक्षान्यासमाह—

कुमारीमुच्चार्य महात्रिपुरसुन्दरीपद[1]मात्मानं रक्ष रक्षेति हृदये अञ्जलिं दत्वा ॥ १६ ॥

कुमारीं बालां उच्चार्य पदमिति वर्णद्वयमपहाय रक्षरक्षेत्यन्तं पठन् हृदये अञ्जलिं दद्यात् । अयमात्मरक्षान्यासः ॥ १६ ॥

चतुरासनन्यासः

चतुरासनन्यासमाह—

मायाकामशक्तीरुच्चार्य देव्यात्मासनाय नम इति स्वस्यासनं दत्वा ॥ १७ ॥

माया ह्रीं इति स्पष्टं बहुस्थले प्रसिद्धम् । कामः क्लीमिति । तदुक्तं देवीभागवते—

क्लीबेति मुनिपुत्रस्तमाजुहाव तदन्तिके ।
सुदर्शनस्तु तच्छ्रुत्वा दधाराद्याक्षरं स्फुटम् ॥
अनुस्वारयुतं तच्च प्रोवाच च पुनःपुनः ।
बीजं वै कामराजाख्यं गृहीतं मनसा तदा ॥ इति ॥

[1] मम्रृतचैतन्यमात्मानं—त.

शक्तिः सौरिति, "शक्तिः परा तृतीया च" इति कोशात्। यद्यपि कामशक्तिपदेन त्रिपुरागायत्रीवत् पञ्चदशीद्वितीयतृतीयकूटग्रहणमपि ग्रहीतुं शक्यते, तदर्थेऽपि प्रमाणस्य दर्शितत्वात्। तथाऽपि

> मादनं [1]शक्तिसंयुक्तं चतुर्थस्वरसंयुतम्।
> ऊर्ध्वे मध्येन्दुबिन्द्वाढ्यं कामराजं समुद्धृतम्।
> शान्तान्तं कादिसंयुक्तमैकारान्तान्तयोजितम्॥

इति योगिनीतन्त्रे एतन्मन्त्रोद्धारादयमेवार्थः। मादनं ककारः। [2]शक्तिः लकारः। चतुर्थस्वरः ईकारः। शान्तान्तं सकारः। कादिर्विसर्गः। ऐकारान्तान्तमौकारः। उच्चार्येति त्यक्त्वा नमोन्तो मनुः। इत्थं च ह्रीं क्लीं सौः देव्यात्मासनाय नमः इति मन्त्रेण स्वस्यासनं दत्वेति, आसने पुष्पाक्षतान् क्षिपेत्॥ १७॥

ततः सूत्रद्वयेन चक्रासनादिमन्त्रानुद्धरति—

शिवयुग्बालामुच्चार्य श्रीचक्रासनाय नमः शिवभृगुयुग्बालामुच्चार्य सर्वमन्त्रासनाय नमो भुवनामदनौ ब्लेमुच्चार्य साध्यसिद्धासनाय नम इति चक्रमन्त्रदेवताऽऽसनं त्रिभिर्मन्त्रैश्चक्रे कृत्वा॥ १८॥

शिवो हकारः, "हश्शिवो गगनं [3]प्राणः" इति कोशात्। तेन युक्ता बाला। अत्र बालापदेन बालावर्णः, तेन बालावर्णमुद्दिश्य हवर्णयोगो विधीयते। तथा च बालावर्णाङ्गं हकार इति सिद्धम्। एवं च "प्रतिप्रधानमङ्गावृत्तिः" इति न्यायात् वर्णत्रयेऽपि हकारयोगः। तत्रापि स्वरान्ते व्यञ्जनस्यादृष्टत्वादादावेव योज्यम्। इत्थं हैं हक्लीं हसौः श्रीचक्रासनाय नमः इत्येको मन्त्रः। शिवभृगुयुक्—शिवो हकारः, भृगुः सकारः, सकाराधिकारे "जगद्बीजं शक्तिनामा सोऽहं वेगवती भृगुः" इति नन्दनकोशात्। एतदुभययुक्ता बाला ह्सैं ह्स्क्लीं ह्स्सौः सर्वमन्त्रासनाय नमः इति द्वितीयो मन्त्रः। भुवना भुवनेश्वरी, तस्या मन्त्रो मायाबीजरूप एवोद्धृतः,

[1] शकसं—ब२. [2] शकः—ब२. [3] हंसः—ब२.

देवीभागवते—"शिवमायाऽग्निबिन्दुमान्" इतिवचनात्। शिवो हकारः। माया ईकारः। अग्निः रेफः। बिन्दुः प्रसिद्धः। एषां योगे ह्रीमिति भवति, "भुवनेशी च लज्जा च ह्रल्लेखा कुलदेवता" इति कोशात्। प्रकृतेऽपि स एव मदनो व्याख्यातः। तथा च ह्रीं क्लीं ब्लें साध्यसिद्धासनाय नमः इति तृतीयो मन्त्रः। एवं त्रिभिर्मन्त्रैः क्रमेण चक्रमन्त्रदेवताऽऽसनानि चक्रे कल्पयित्वा। अयं चतुरासनन्यास इति कथ्यते ॥ १८ ॥

बालाषडङ्गन्यासः

ततः बालाषडङ्गमाह—

बालाद्विरावृत्त्या त्रिद्व्येकदशत्रिद्विसङ्ख्याऽङ्गुळिविन्यासैः कृतषडङ्गः ॥ १९ ॥

बालाद्विरावृत्त्या षड्वर्णैः हृदयादिषडङ्गानि क्रमेण त्र्याद्यङ्गुलिभिः कृतानि विन्यस्तानि षडङ्गानि येन ईदृशः। अयमेवार्थः स्पष्टमुक्तो दक्षिणामूर्तिसंहितायाम्—

कनिष्ठाङ्गुष्ठरहितैः त्रिभिस्तु हृदि विन्यसेत्।
मध्यमानामिकाभ्यां तु न्यसेच्छिरसि मन्त्रवित् ॥
शिखाऽङ्गुष्ठेन विन्यस्य दशभिः कवचं न्यसेत्।
हृदुक्तैर्नेत्रविन्यासं विन्यसेत् परमेश्वरि ॥
तर्जनीमध्यमाभ्यां तु ततोऽस्त्रं विन्यसेत् प्रिये ॥ इति ॥

इति बालाषडङ्गन्यासः ॥ १९ ॥

वशिन्यादियोगिनीन्यासः

अथ वशिन्यादियोगिनीन्यासमाह—

सबिन्दूनचो ब्लूमुच्चार्य वशिनीवाग्देवतायै नम इति शिरसि। सर्वत्र वर्गाणां बिन्दुयोगः। कवर्ग

कल्हीं च निगद्य कामेश्वरीवाग्देवतायै नमः इति ललाटे चुं गदित्वा न्व्लीं मोदिनीवाग्देवतायै नम इति भ्रूमध्ये टुं भणित्वा य्ल्रूं विमलावाग्देवतायै नम इति कण्ठे तुं च प्रोच्य ज्म्रीं अरुणावाग्देवतायै नम इति हृदि पुं च ह्स्ल्व्यूं उच्चार्य जयिनीवाग्देवतायै नम इति नाभौ यादिचतुष्कं झ्म्र्यूं उच्चार्य सर्वेश्वरीवाग्देवतायै नम इति लिङ्गे, शादिषट्कं क्ष्म्रीं आख्याय कौळिनीवाग्देवतायै नम इति मूले ॥ २० ॥

सबिन्दूनचो बिन्दुयुक्ताः अकारादिविसर्गान्ताः तानुच्चार्य नम इत्यन्तो वशिनीमन्त्रः । तथा च अं आं . . . अं अः र्ब्लूं वशिनीवाग्देवतायै नमः इति शिरसि न्यसेत् । नन्वेवं सर्वेषु बिन्दुयोगकथनादन्यत्र नेत्यत आह—सर्वत्रेति । स्पष्टोऽर्थः । कवर्गमिति । कवर्गः प्रसिद्धः सबिन्दुः । कल्हीं इत्यत्र केवलव्यञ्जनमात्रग्रहणम् । "समुदायेषु विद्यमाना वर्णाः तदवयवेषु दृश्यन्ते" इति न्यायात् । गृहीतश्चायं पक्षः सेतुबन्धे श्रीभास्कररायैः "अधस्तान्नाभसं बीजं" इत्यस्य व्याख्यानावसरे "नाभसो हंससमुदायः तदेकदेशः केवलहकार एव ग्राह्यः" इति व्याख्यानपङ्क्तौ । अत्रापि तथा ग्रहणे बीजं "त्रयोविंशदक्षरोऽसौ कामेश्वरीमन्त्रः" इति सेतुबन्धलेख एव । ककारलकारयोरवर्णविशिष्टयोर्ग्रहणे द्वितारीयुक्तपादुकां पूजयामीति घटिते ह्रीं श्रीं कं क्ल्हीं कामेश्वरीवाग्देवताकामेश्वरीपादुकां पूजयामीति मन्त्रे पञ्चविंशतिवर्णत्वात् । तस्मात् केवलव्यञ्जनमात्रग्रहणम् । व्यञ्जनानां न वर्णत्वमिति विस्तार उक्तो वरिवस्यारहस्ये पञ्चदशीवर्णपरिगणने । तथा च कं खं गं घं ङं क्ल्हीं कामेश्वरीवाग्देवतायै नमः इति ललाटे न्यसेत् । चुं चवर्ग—चुमित्यस्योदित्त्वात् तेन सवर्णग्रहणशास्त्रस्य "अणुदित्सवर्णस्य चाप्रत्ययः" इति शास्त्रस्य सत्त्वात् चवर्गग्रहणम् । चवर्गं नमइत्यन्तं मन्त्रं पठित्वा भ्रूमध्ये न्यसेत् । टुं टवर्गं पूर्ववत् ।

शेषं स्पष्टम् । हसलवर्णेषु व्यञ्जनमात्रग्रहणं पूर्ववत् । यः आदिः यस्य चतुष्कस्य इति तद्गुणसंविज्ञानबहुव्रीहिः । इत्थंच यं रं लं वं इति । शादिषट्कमित्यत्रापि समासः पूर्ववत् ॥ २० ॥

मूलमन्त्रन्यासः

एवं वशिन्यादियोगिनीन्यासमुक्त्वा मूलमन्त्रन्यासादीन् वदति—

मूलविद्यापञ्चदशवर्णान् मूर्ध्नि मूले हृदि चक्षुस्त्रितये श्रुतिद्वयमुखभुजयुगळपृष्ठजानुयुगळनाभिषु विन्यस्य षोढा चक्रे न्यस्यान्यस्य वा ॥ २१ ॥

चक्षुस्त्रितयं भ्रूमध्येन सह ज्ञेयम् । श्रुतिद्वयं श्रोत्रद्वयम् । शेषस्थानानि स्पष्टानि । मूलपञ्चदशवर्णैः बिन्दुसहितैः नमोऽन्तैः क्रमेणोक्तपञ्चदशस्थानेषु न्यसेत् । षोढा षट्प्रकारः, गणेश-ग्रह-नक्षत्र-योगिनी-राशि-पीठभेदेन चक्रन्यासस्तन्त्रान्तरोक्तः । न्यस्यान्यस्य इत्यनेन कृताकृतत्वं सूचितम् ॥ २१ ॥

पात्रासादनम्, सामान्यार्घ्यविधानम्

एवं देवीरूपत्वसिद्धये न्यासानुक्त्वा ततोऽर्चनाङ्गभूतपात्रस्थापनविधिमुपदिशति—

शुद्धाम्भसा वामभागे त्रिकोणषट्कोणवृत्तचतुरश्रमण्डलं कृत्वा पुष्पैरभ्यर्च्य साधारं शङ्खं [1]प्रतिष्ठाप्य शुद्धजलमापूर्य आदिमबिन्दुं दत्वा षडङ्गेनाभ्यर्च्य विद्यया अभिमन्त्र्य तज्जलविप्रुड्भिः आत्मानं पूजोपकरणानि च संप्रोक्ष्य ॥ २२ ॥

शुद्धाम्भसा इत्यनेन गणपतिपद्धतौ कथितगन्धाक्षतकुसुमसमर्चितत्वं ज्ञापितम् । शुद्धेन पटपूतेनाम्भसा । स्ववामभागे त्रिकोणादिचतुरश्रान्तं नियम-

[1] संस्थाप्य—श्री.

विधिरूपत्वात् आकाङ्क्षावत्त्वात् श्यामाक्रमोक्तमत्स्यमुद्रया निर्गमनरीत्या कृत्वा पुष्पैरभ्यर्च्य । साधारमित्यस्य तत्रेत्यादिः ॥

आधारशङ्खयोः प्रतिष्ठापने शुद्धजलपूरणे च मन्त्राकांक्षायां सन्निहितत्वा-विशेषात् गणपतिप्रकरणस्थं श्यामाप्रकरणस्थं वेच्छया ग्राह्यम् । न तु आधारादिषु पावकादिकळापूजनं, अनुक्तत्वात् असूचितत्वात् अनाकाङ्क्षितत्वाच्च । वस्तुतस्तु—श्यामागणपत्यपेक्षया श्रीविद्याप्रकरणस्थविशेषार्घ्यपात्राधारादिमन्त्राणां सन्निहितत्वात त एव ग्राह्याः । तत्रापि यावदाकाङ्क्षितं ग्राह्यम्, न त्वनाकाङ्क्षितम् "पयसा मैत्रावरुणं श्रीणाति" इतिवत् ॥

आदिमबिन्दुसंयोगः शङ्खजलसंस्कारः । बिन्दुमित्यत्र विधेयगतसङ्ख्या विवक्षिता । तेन बिन्दुद्वयदानेन नादृष्टोत्पत्तिः । न च बिन्दुमित्यत्र द्वितीयाविभक्ति-श्रवणात् स एवोद्देश्यः किं न स्यादिति वाच्यम् । संस्कृतबिन्दोः विनियोगा-काङ्क्षायां विनियोगाश्रवणात् न बिन्दुसंस्कारः । किं तु जलसंस्कारः, जलस्याग्रे विनियोगश्रवणात् । तथा च संस्कार्यस्यैवोद्देश्यत्वनियमात् बिन्दुर्विधेयः । तद्गतसङ्ख्या विवक्षितैव । षडङ्गेन षडङ्गमन्त्रैः अग्नीशासुरवायुकोणेषु षडङ्गदेवता अभ्यर्च्य । अङ्गेनेत्यत्र एकवचनमार्षं, बहुत्वलक्षकं वा पाशाधिकरणन्यायेन, षण्मन्त्रेषु एकत्वान्वयासंभवात् ॥

वस्तुतस्तु—अङ्गमन्त्रवृत्तिसङ्ख्यायाः षट्पदेनैव बोधितत्वाद्वचनार्थोऽविवक्षित एव । तथा च औत्सर्गिकमेकवचनमेव युक्तम् । न च विशेषणवाचकषट्पदसमान-वचनकत्वहानिरिति वाच्यम्, षट्पदेन साकं समासाङ्गीकारेण अनुपपत्त्यभावात् । अनेनापि जलसंस्कार एव ॥

यद्वा—षडङ्गमन्त्रैः षडङ्गदेवताः तस्मिन्नेव शङ्खोदके कूटत्रयद्विरावृत्त्या क्रमेण हृदयाय नमः हृदयशक्तिश्रीपादुकां तर्पयामीत्यादिमन्त्रैस्तर्पयेत् । न च अभ्यर्च्येत्यस्य तर्पणार्थत्वे किं मानं इति वाच्यम् । "तर्पयेत्तत्र योगिनीः" इति वामकेश्वरतन्त्रात्, योगिनीपदस्य त्रिपुरसुन्दर्याः षडङ्गदेवता इति सेतुबन्धे व्याख्यानात् ॥

विद्यया पञ्चदश्या अभिमन्त्र्य अभिमन्त्रणेन संस्कृत्य, तज्जलं संस्कृतजलं, तस्य ये विप्रुषः बिन्दवः तैः आत्मानं स्वशरीरं पूजोपकरणानि गन्धपुष्प-प्रथमादीनि च संप्रोक्ष्य । अत्र कपिञ्जलाधिकरणन्यायेन विप्रुड्भिरित्यनेन

प्रोक्षणसाधनं बिन्दुत्रयमेवेति प्राप्तं न्यायं बाधितुं स मित्युपसर्गः । तथा च, यथा पूजोपकरणानि जलेन सम्यक् सिक्तानि तथा प्रोक्षयेदित्यर्थः ॥ २२ ॥

विशेषार्घ्यविधिः (अर्घ्यशोधनम्)

एवं सामान्या[1]र्घ्यैः तृप्तिं विधाय विशेषार्घ्यात्तृप्तिमाह—

तज्जलेन त्रिकोणषट्कोणवृत्तचतुरश्रमण्डलं कृत्वा मध्यं विद्यया विद्याखण्डैस्त्रिकोणं [2]बीजावृत्त्या षडश्रं संपूज्य वाचमुच्चार्य अग्निमण्डलाय दशकलाऽऽत्मने अर्घ्यपात्राधाराय नम इति प्रतिष्ठाप्य आधारं प्रपूज्य पावकीः कलाः ॥ २३ ॥

तज्जलेन सामान्यार्घ्योदकेन । शेषं पूर्ववत् । मध्यं त्रिकोणमध्यं, विद्यया समष्टिविद्यया, संपूज्येति सर्वत्रानुषज्यते । विद्याखण्डैः कूटत्रयेण त्रिकोणं त्रिकोणकोणत्रयम् । अस्योपपत्तिर्दर्शिता प्राक् । बीजावृत्त्या कूटत्रयद्विरावृत्त्या । कूटस्य बीजरूपत्वं श्रीषोडशाक्षर्याः षोडशार्णत्वोपपत्तये एकैककूटस्यैकैकबीजरूपत्वं इति सप्रमाणं वरिवस्यारहस्ये अस्मत्परमेष्ठिगुरुभिः प्रपञ्चितम् । ग्रन्थविस्तरभयान्नेह लिख्यते । क्रमस्यानुक्तत्वात् प्रागादिप्रादक्षिण्येन स्वाग्रादिप्रादक्षिण्येन वा । नमोऽन्तो मन्त्रः, "नमोऽन्तैः पादुकाऽन्तैर्वा" इति योगिनीतन्त्रवचनात् । वाचं ऐं इति । तदुक्तं देवीभागवते—

वाग्भवं कामराजं च मायाबीजं तृतीयकम् ।
चित्ते यस्य भवेत्तं तु न कश्चिद्बाधितुं क्षमः ॥

इत्युपक्रम्य वाग्भवं प्रथमबीजं स्तोतुं कथामुपक्रम्य

ऐ ऐ इति भयार्तेन दृष्ट्वा व्याघ्रादिकं वने ।
बिन्दुहीनमपि प्रोक्तं वाञ्छितं प्रददौ किल ॥ इति ॥

[1] र्घ्योत्पत्तिं विधाय विशेषार्घ्यविधिमाह—ब, ब२.

[2] बीजद्विरावृत्त्या—ग.

बिन्दुहीनस्य कैमुतिकन्यायेन फलहेतुत्वस्तुत्या सबिन्दुः ऐकारो वाग्भव इति सिध्यति। नित्यारहस्ये—"वाग्भवं प्रथमं देवि कामराजं द्वितीयकम्" इति बालामन्त्रोद्धाराच्च, "रविस्वरो बिन्दुयुक्तो वाग्भवं बीजमीरितम्" इति बीजकोशाच्च। आधारं कीदृशं इत्याकाङ्क्षासत्त्वात् तन्त्रान्तरोक्तं त्रिपदादि ग्राह्यम्। पावकीः वह्निसंबन्धिनीः कलाः चतुर्थ्यन्तनमोऽन्तैः तत्तन्नामभिः प्रागादिवृत्तरूपं यजेत्, "प्रागादिवृत्तरूपेण" इति परमानन्दतन्त्रवचनात्। सेतुबन्धे भास्कररायास्तु पश्चिमादिप्रादक्षिण्येन इत्यूचुः॥ २३॥

मदनादुपरि सूर्यमण्डलाय द्वादशकलाऽऽत्मने अर्घ्यपात्राय नम इति संविधाय पात्रं संस्पृश्य कलाः सौरीः सौः सोममण्डलाय षोडशकलाऽऽत्मने अर्घ्यामृताय नमः इति पूरयित्वा आदिमं दत्वोपादिममध्यमौ पूजयित्वा विधोः कलाषोडशकम्॥ २४॥

मदनस्तु चतुरासनन्यासे प्रपञ्चितः। शेषं स्पष्टम्। संस्पृश्येत्यस्मात् पूर्वं तत्रेत्यादिः। तत्र पात्रे सौरीः कलाः तपिन्यादीः संस्पृश्य पूजयित्वा। यद्यपि स्पृशिधातोः न पूजनमर्थः, तथाऽपि 'संपूज्य पावकीः कलाः', 'पूजयित्वा विधोः कलाः' इति वाक्यमध्यवृत्तित्वात्, "तत्र पात्रं प्रतिष्ठाप्य तत्र सूर्यकला यजेत्" इति योगिनीतन्त्रवचनाच्च पूजायामेव तात्पर्यं कल्प्यम्। आदिमं प्रथमं पूरयित्वा उपादिमं द्वितीयं मध्यमं तृतीयं, इदं चतुर्थपञ्चमयोरप्युपलक्षणम्। सिद्धान्तग्रन्थे प्रथमखण्डे "पञ्च मकाराः तैरर्चनं गुप्त्या" इत्युक्तम्। तत्रैव दत्वा स्थापयित्वा। विधोः कलाषोडशकं अमृतादिपूर्णामृतान्तम्॥ २४॥

तत्र विलिख्य त्र्यश्रमकथादिमयरेखं हळक्षयुगान्तस्थितहंसभास्वरं वाक्कामशक्तियुक्तकोणं हंसेनाराध्य बहिर्वृत्तषट्कोणं कृत्वा षडश्रं षडङ्गेन पुरोभागाद्यभ्यर्च्य मूलेन सप्तधा अभिमन्त्र्य

दत्तगन्धाक्षतपुष्पधूपदीपः तद्विप्रुड्भिः प्रोक्षितपूजाद्रव्यः सर्वं विद्यामयं कृत्वा तत्स्पृष्ट्वा चतुर्नवतिमन्त्रान् जपेत् ॥ २५ ॥

तत्र प्रथमद्रव्ये पूर्वोक्तक्रमेण पूजयित्वा। अकारादिविसर्गान्तषोडशस्वरैः पश्चिमादीशानान्तां एकां रेखां कुर्यात्। तत ईशानाद्याग्नेयान्तां कवर्गमारभ्य तान्तैः षोडशवर्णैः अपरां रेखां संपादयेत्। तत आग्नेयादिपश्चिमान्तां थादिसान्तैः षोडशभिः तृतीयरेखां संपादयेत्। एवं सति अश्च कश्च थश्च आदिर्येषां वर्णानां दीर्घाकारखकारदकारप्रभृतीनां तन्मयाः तदभिन्नाः रेखाः यस्मिन् त्रिकोणे तत् अकथादिमयरेखम्। इदं त्र्यश्रविशेषणम्। हश्च ळक्षयुगं च तयोः अन्तः मध्ये स्थितो यो हंसः इति वर्णसमुदायः तेन भास्वरं—द्रव्ये स्वदक्षभागे हं इति विलिख्य तदुत्तरतो हंस इति वर्णौ विलिख्य तदुत्तरतो ळक्षेति विलिखेत्। एवं चोक्तरूपं भवति। एवं वाक्कामशक्तयः बालाया वर्णत्रयम्। यद्वा—मूलकूटत्रयम्। प्रमाणं अर्थद्वयेऽपि पूर्वमेवोक्तम्। तद्युक्तानि कोणानि यस्मिंस्तत्। एतादृशविशेषणत्रयविशिष्टं त्रिकोणं विलिख्य। हंसेन हंस इति मन्त्रेण आराध्य पुष्पादिभिः पूजयित्वा। बहिः त्रिकोणात् वृत्तं षट्कोणं च कृत्वा। षडश्रं षट्कोणानि मूलषडङ्गमन्त्रैः पुरोभागादि स्वाभिमुखाग्रादिप्रादक्षिण्येन अभ्यर्च्य। मूलेन सप्तधा सप्तवारमावृत्तेन। तस्मिन् द्रव्ये दत्ताः अर्पिताः गन्धाक्षतपुष्पधूपदीपाः येन ईदृशः पूजको भवेदिति विशिष्टविधौ दानममीषां कार्यमिति विशेषणविधिरार्थिकः। विद्या परसंवित् तन्मयं तदभिन्नं कृत्वा भावयित्वा। तत् प्रथमादिकम्। चतुर्नवतिमन्त्रान् वक्ष्यमाणान् ॥ २५ ॥

तान् मन्त्रानाह—

त्रितारीनमस्संपुटिताः तेजस्त्रितयकळा अष्टत्रिंशत्। सृष्टिऋद्धिस्मृतिमेधाकान्तिलक्ष्मीद्युतिस्थिरास्थितिसिद्धयो ब्रह्मकला दश। जरा पालिनी शान्तिरीश्वरी रतिकामिके वरदा ह्लादिनी प्रीतिदी-

र्घा विष्णुकला दश। तीक्ष्णा रौद्री भया निद्रा तन्द्री क्षुधा क्रोधिनी क्रियोद्गारी मृत्यवो रुद्रकला दश। पीता श्वेताऽरुणाऽसिताश्चतस्र ईश्वरकलाः। निवृत्ति-प्रतिष्ठाविद्याशान्तीन्धिकादीपिकारेचिकामोचिकापरा-सूक्ष्मासूक्ष्मामृताज्ञानाज्ञानामृताप्यायिनीव्यापिनी-व्योमरूपाः षोडश सदाशिवकलाः॥ हꣳसश्शुचि-षद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृष-द्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ प्रतद्विष्णुस्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षि-यन्ति भुवनानि विश्वा॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥ तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते। विष्णोर्यत् परमं पदम्॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा॥ इत्येते पञ्चमन्त्राः॥ मूलविद्या चाहत्य चतुर्नवतिमन्त्राः॥ २६॥

त्रितारी पूर्वोक्ता। त्रितारी नम इत्यनयोर्मध्ये चतुर्नवतिमन्त्रान् पठेत्। तथा च द्वाभ्यां संपुटितो भवति। यथा लोके संपुटे करण्डे अन्तः किंचित् क्षिप्त्वा

आधारावयवोत्तरावयवमध्यवृत्तित्वं वस्तुनः संपाद्यते तद्वत् प्रथमं त्रितारी, पश्चाच्चतुर्नवतिमन्त्रेष्वेको मन्त्रः, ततो नम इति। एवं सति मन्त्रः द्वाभ्यां संपुटितो भवति। तेजस्त्रितयं वह्निसूर्यसोमाः तेषां कलाः धूम्रार्चिरादिपूर्णामृतान्ताः श्यामाक्रमे वक्ष्यमाणा अष्टत्रिंशत्। मन्त्रस्वरूपं तु ऐं ह्रीं श्रीं धूम्रार्चिषे नमः। एवं अग्रेऽपि ज्ञेयम्। सृष्टिऋद्धीत्यत्र सन्ध्यभावः आर्षः। यद्वा—"ऋत्यकः" इति पाक्षिकत्वादसन्धिः। शेषं स्पष्टम्। वह्निकलाः—१०। सूर्यकलाः—१२। चन्द्रकलाः—१६। ब्रह्मकलाः—१०। विष्णुकलाः—१०। रुद्रकलाः—१०। ईश्वरकलाः—४। सदाशिवकलाः—१६। इत्थं च कलाः सर्वाः—८८। यद्यपि हंसश्शुचिषत् इत्यारभ्य पुष्करस्रजा इत्यन्तं सप्त ऋचः सन्ति, तथाऽपि 'इत्येते पञ्चमन्त्राः' इत्युक्त्या चतुर्थपञ्चमौ मिळित्वा एको मन्त्रः, षष्ठसप्तमौ मिळित्वा एको मन्त्रः। एकलिङ्गत्वादुक्तयोरैक्यं युक्तं, नत्वन्यत्र। मूलविद्या पञ्चदशी। पूर्वकलाः ८८, उक्तमन्त्राः पञ्च, मूलविद्या च, आहत्य सर्वं मिळित्वा चतुर्नवतिमन्त्राः संपद्यन्ते। एतैरभिमन्त्रणेन द्रव्यं संस्कुर्यादिति फलितोऽर्थः॥ २६॥

अथ हैके पञ्चभिरखण्डाद्यैरभिमन्त्रणमामनन्ति॥ २७॥

अथेत्यनेन चतुर्नवतिमन्त्रोत्तरमेवेति क्रमविशेषः सूचितः। नात्र पाठक्रमः संभवति, स्वमताभावात्। अतः अथेत्यावश्यकम्। ह इति शब्दालङ्कारे। एके इत्यनेन पाक्षिकत्वं सूचितम्। अखण्डः आद्यः येषामिति तद्गुणसंविज्ञान-बहुव्रीहिः॥ २७॥

अखण्डाद्याः के? इत्याकाङ्क्षायामाह—

अखण्डैकरसानन्दकरे परसुधाऽऽत्मनि।
स्वच्छन्दस्फुरणामत्र निधेह्यकुलनायिके॥
अकुलस्थामृताकारे शुद्धज्ञानकरे परे।
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि॥

तद्रूपिण्यैकरस्यत्वं कृत्वा ह्येतत्स्वरूपिणि ।
भूत्वा परामृताकारा मयि चित्स्फुरणं कुरु ॥
इति तिस्रोऽनुष्टुभो विद्याः ॥ २८ ॥

वेदभाष्ये वैदिकमन्त्राणां अर्थस्य विवृतत्वात् तान् परित्यज्य केवलतान्त्रिक-सुबोधमन्त्राणां केषां चिदर्थं [1]प्रकटयामि । अ ख ण्डे ति—अखण्डेत्यादिमन्त्रत्रयं लिङ्गेन सुधादेवीप्रार्थनाङ्गं भवितुमर्हति । ततोऽपि बलवता अभिमन्त्रणोत्तरद्वितीयाश्रुत्या अभिमन्त्रणाङ्गम् । एतदनुसारेण परमानन्दतन्त्रे—"एतत्त्रयं त्रिबीजाढ्यं चतुर्धा तत्र वै जपेत्" इत्यत्र स्पृशन् इत्यध्याहार्यम् । तथा च अभिमन्त्रणाङ्गत्वं सिद्धम् । एवं च परमानन्दटिप्पण्यां अखण्डेत्यादि सुधादेवीप्रार्थनारूपमिति लेखः [2]प्रामादिक एव, लिङ्गाच्छ्रुतिबाधस्य केनाप्यनङ्गीकारात् । अद्य मन्त्रार्थस्तु—अकुलं नाम सहस्रदलकमलद्वयम् । सर्वकमलानामाधारभूतं ऊर्ध्वमुखमेकं पद्मं मूलाधारस्याधस्तिष्ठति । तदेकं अकुळपदवाच्यम् । "अकुळे विषुसंज्ञे च" इति योगिनीतन्त्रश्लोकव्याख्यानावसरे सर्वाधःस्थितसहस्रदळकमलोपर्यष्टदळं तदुपरि षड्दळं तदुपरि मूलाधारादि-चक्राणि तत्र मूलाधाराधःस्थितं षड्दळं कुलपद्मं तदधःस्थिते अष्टदळसहस्रदळे अकुले इति सेतुबन्धलेखात् । एवं ब्रह्मरन्ध्रस्थिताधोमुखसहस्रच्छदपद्ममपि अकुलम् । तदुक्तं त्रिपुरार्णवे—

सुषुम्नोर्ध्वे सुधारश्मिकोटिकान्तिसमप्रभम् ।
अधोमुखं गुरुस्थानं सहस्रदळशोभितम् ॥
अकुलं तद्विजानीयात् . . . . . . इति ॥

परमानन्दतन्त्रेऽपि—

साधकः प्रातरुत्थाय ब्रह्मरन्ध्रे निजं गुरुम् ।
पूर्वोक्ताकुलपद्मान्तर्द्वादशान्तसरोरुहे ॥ इति ॥

एवं द्वयोः सहस्रच्छदयोरकुलवाच्यत्वे सिद्धे प्रकृते ब्रह्मरन्ध्रस्थस्यैव ग्रहणम्, तस्यैवामृतस्रावित्वात् । प्रकृते अकुलं यद्ब्रह्मरन्ध्रस्थकमलं तस्य नायिका तदधिष्ठात्री

[1] प्रकटयति—अ.

[2] चिन्त्यः—ब२.

तत्सम्बोधने हे अकुलनायिके। अखण्डोऽविच्छिन्नः एकरसो दुःखासंभिन्नो य आनन्दः तं करोति व्यञ्जयतीति तादृशे। परा उत्कृष्टा या सुधा ब्रह्मरन्ध्रस्था अमरत्वकारिणी तदात्मनि तत्स्वरूपे अत्र द्रव्ये स्वच्छन्दा स्वतन्त्रा या चित् तस्याः स्फुरणां प्रकाशशक्तिं निधेहि स्थापय। हे परे श्रेष्ठे क्लिन्नमार्द्ररूपं तदस्मिन्नस्ति इति. क्लिन्नरूपिणि अस्मिन् वस्तुनि अमृतत्वं निधेहि संस्थापय संपादय। अकुलं व्याख्यातं तत्र विद्यमानं यत् अमृतं तस्य स्वरूपमिव स्वरूपं यस्याः द्रव्याभिमानिदेवतायाः। इदं परेत्यस्य विशेषणम्। शुद्धज्ञानकरे स्वरूपज्ञानाविर्भावकर्त्रि, इदमपि पराविशेषणम्। यत्तु सौभाग्यानन्दसन्दोहे परे इति सप्तम्यन्तं कृत्वा वस्तुविशेषणमित्युक्तम्, तन्न, दूरान्वयापत्तेः। तत् परब्रह्म तस्य यद्रूपं तद्वति परब्रह्मस्वरूपे इति यावत्। तद्रूपिणि विशेषार्घ्यरूपिणि मयि देहाभिमानिनि। परं यत् अमृतं आनन्दः तदाकारा भूत्वा ऐकरस्यं चित्तस्यैकाकारतां कृत्वा संपाद्य चित्स्फुरणं स्वस्वरूपप्रकाशं कुर्विति मन्त्रत्रयार्थः। अनुष्टुभः अनुष्टुप्छन्दस्का इत्यर्थः, "द्वात्रिंशदक्षराऽनुष्टुप्" इति श्रुतेः। विद्याः मन्त्राः। इदं विद्यात्रयं मिळित्वा एकापूर्वजनकं, पौर्णमासयागत्रिकवत्, अग्रिममन्त्रेषु अथो इति प्रक्रमान्तरसत्त्वात्, तन्त्रान्तरेऽपि एतत्त्रयमिति समष्टिविनियोगदर्शनाच्च। तेनैकमन्त्रलोपे पुनस्त्रितयपाठः, न तावन्मात्रम् ॥ २८ ॥

चतुर्थं अमृतेशीमन्त्रमाह—

अथो वाचं ब्लूं झ्रौमिति जूं सः इति चोक्त्वा अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहेति चतुर्थो मन्त्रः ॥ २९ ॥

वाचं ऐं। इतिद्वयं चोक्त्वेति च त्यक्त्वा शेषं मन्त्रस्वरूपम्। हे अमृते अस्मिन् द्रव्ये अमृतं स्रावय इति तदर्थः। शेषाण्यमृते इत्यस्य विशेषणानि। तदर्थः स्पष्टः ॥ २९ ॥

ततः पञ्चमं मन्त्रमुद्धरति—

वाग्भवो वदवद ततो वाग्वादिनि वाञ्मदनक्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरुयुगळं मादनं

शक्तिर्मोक्षं कुरुकुरु शब्दो हसचतुर्दशपञ्चदशापिण्डः सहचतुर्दशषोडशापिण्डश्चेति पञ्चमीयं विद्यैताभिः अभिमन्त्र्य ज्योतिर्मयं तदर्घ्यं विधाय ॥ ३० ॥

वाग्भवः ऐं। वाक् ऐं। मदनः क्लीं। कुरुयुगळं द्विवारं कुर्वित्युच्चार्य। मादनं क्लीं। शक्तिः सौः। चतुर्दश अचां चतुर्दशः औ। पञ्चदश अनुस्वारः। पिण्डः समुदायः। षोडशो विसर्गः। तथा च मन्त्रस्वरूपं—ऐं वदवद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरुकुरु क्लीं सौः मोक्षं कुरुकुरु ह्सौं स्हौः। इतीयं पञ्चमी विद्या। एताभिः पञ्चभिः अभिमन्त्र्य। ज्योतिर्मयं निर्दोषं तदर्घ्यं विधाय। एतेन तन्त्रान्तरोक्तशापविमोचनादिकं अनेनैव जातमिति सूचितम् ॥

ननु ज्योतिर्मयमित्यनेन अयमभिप्रायः कथं निष्पादित इति चेत्—उच्यते। ज्योतिरिति प्रकाशापरपर्यायः। प्राचुर्यार्थे मयट्। यस्मिन् प्रकाशे मलमिश्रत्वं तत्र प्रकाशप्राचुर्यं न संभवति यथोपरक्तदिवाकरादौ। मलनिर्गमे सति तत्रैव प्रकाशप्राचुर्यमनुभूयते। एवमेवादर्शे मुखप्रकाशके। तद्वदत्रापि द्रव्ये मानाशापादिमलोपहते ज्योतिर्मयत्वं न संभवति। प्रोक्तैकोनशतमन्त्रैरभिमन्त्रणे सति निरस्तनिखिलमलं सत् ज्योतिर्मयं भवति। तत एव ज्योतिर्मयं कृत्वेत्युक्तम्। एतेन तन्त्रान्तरोक्तशापविमोचनस्यापि समुच्चय इति केषांचिदुक्तिः अश्रद्धेयैव ॥

द्विपात्रविधेः मुख्यत्वसमर्थनम्

एवं ये महेश्वरानन्दनाथप्रभृतयः तन्त्रान्तरे नित्यपूजायां "पूर्ववत्तु त्रिपात्रकं" इति वचनात् सूत्रे न कर्तव्यमिति निषेधाभावात् सूत्रानुसारिभिरपि त्रिपात्रं कर्तव्यमित्यूचुः, तान् प्रति अयं प्रश्नः—सूत्रे न कर्तव्यमिति निषेधाभावेन त्रिपात्रत्वं साध्यते, उत तन्त्रान्तरे उक्तत्वात्, उत स्वसूत्रे निषेधाभावे सति तन्त्रान्तरे विद्यमानत्वेन वा, उत तन्त्रान्तरे द्विपात्रनिषेधश्रवणाद्वा। नाद्यः, "व्रीहिभिर्यजेत" इत्यत्र न गोधूमैरिति निषेधाभावात् गोधूमयोगेनाप्यपूर्वं स्यात्। न द्वितीयः, तथा सति परशुरामसूत्रोक्तसङ्गीतमातृकावाराह्याद्युपास्तेः श्रीविद्याऽङ्गत्वेन सौभाग्यानन्दसन्दोहे परेषामपि ईदृशाङ्गत्यागस्य निर्युक्तिकत्वापत्तिः। एतेन तृतीयपक्षोऽपि निरस्तः।

नापि चतुर्थः। तथा हि योऽयं "तस्मात् पात्रद्वयं देवि नैव कुर्यात् कदाचन" इति निषेधः, या च निन्दा—

आलस्येनान्यथा वाऽपि कृत्वा पात्रद्वयं शिवे।
पूजाफलेन हीनस्तु विक्रियां लभते नरः॥

इति, त्रिपात्रकमिति विधिशेषार्थवादः। अन्यथा त्रिपात्रविधिनैव द्विपात्रव्यावृत्तौ निषेधस्य निवृत्तिरूपफलाभावेन वैय्यर्थ्यापत्तेः। यदि च विधिना प्रवृत्तिमात्रं निषेधेन च तदितरनिवृत्तिरित्युच्यते तर्हि "एकादश प्रयाजान् यजति" इत्यत्र न द्वादश न दश इति वाक्याभावात् दशभिर्द्वादशभिश्च प्रयाजैरपूर्वं स्यात्। तस्माद्विधिनैव द्विपात्रनिवृत्तौ निषेधो व्यर्थः सन् तच्छेषोऽर्थवाद एव। अर्थवादस्य स्तुतिमात्रे तात्पर्यम्। न तस्मिन्निषेधरूपत्वमस्ति। कथं निषेधेन हेतुना तन्त्रान्तरे त्रिपात्रत्वसाधनम्॥

किं च— एतत्तन्त्रे कति पात्राणि? इत्याकांक्षायां स्वसूत्रे विशेषाश्रवणात् तन्त्रान्तरस्थं 'पूर्ववत्तु त्रिपात्रकं' इति वचनमेव आकाङ्क्षापूरकं सत् त्रिपात्रं साधयतीति परमतम्। तथा सति द्विपात्रप्राप्तेरेवाभावेन निषेधस्य दूरनिरस्तत्वात्॥

न च अर्थवाद इति वदतस्तव मते द्विपात्रप्राप्त्यभावेन न द्विपात्रं कुर्यादिति वाक्यस्य प्रामाण्यं कथं चिन्त्यते इति वाच्यम्। अर्थवादघटकनिषेधस्य प्राप्तिपूर्वकत्वमिति न नियमः, तस्य स्वार्थे तात्पर्याभावात्। अतोऽप्राप्तार्थनिषेधोऽपि निर्वहति; यथा— "नान्तरिक्षे न दिव्यग्निश्चेतव्यः" इति, "यदन्तरिक्षे चिन्वीत अन्तरिक्षꣳ शुचाऽर्पयेत्" इति। तादृशार्थस्य न स्वार्थे तात्पर्यम्, किं तु प्राशस्त्यमात्रे। तच्चाबाधितम्॥

न वा तन्त्रयोः परस्परं प्रकृतिविकृतिभावः सप्रमाणः, यतो वा प्राप्तं निषिध्येत। न ह्यप्राप्तनिषेधः स्वप्नेऽपि श्रुतः॥

किं च—परप्रीतये अर्थवादेऽपि आरोपितनिषेधत्वमस्तु। तथाऽपि न तेषां समीहितसिद्धिः। तथा हि कल्पसूत्रेण पात्रद्वयप्राप्तिः, परमानन्दतन्त्रेण तन्निषेधः, तथा सति तन्त्रयोः समबलत्वेन ग्रहणाग्रहणवद्विकल्प एव स्यात्। निषेधशास्त्रस्यैव स्वरुच्या प्राबल्याङ्गीकारे ग्रहणपक्षस्त्वत्यन्तं बाध्येत। विकल्प एव न स्यात्। द्विपात्रप्रयोगोऽ-

शास्त्रीयः इति वदतां महेश्वरानन्दनाथादीनां विकल्पो न हीष्टः । स च दुष्परिहारः ॥

न च—परशुरामसूत्रे न कण्ठरवेण द्विपात्रं कर्तव्यमित्युक्तम्, किं तु पात्रद्वयप्रयोगस्थपाठानुसारेण कल्प्यो विधिः । "तस्मात् पात्रद्वयं देवि नैव कुर्यात्" इति प्रत्यक्षो निषेधः । तथा च प्रत्यक्षेणानुमानिकं बाध्यते । ग्रहणाग्रहणस्थले उभयं प्रत्यक्षमिति विकल्पो युक्तः । प्रकृते न तथा, वैषम्यात्,—इति वाच्यम्। अग्नीषोमीयपशौ अध्रिगुप्रैषे "षड्विꣳशतिरस्य वङ्क्रयः" इति मन्त्रोऽस्ति । तत्र, वङ्क्रयः पार्श्वास्थीनि अस्य पशोः षड्विंशतिरिति तदर्थः । अयं मन्त्रः अश्वमेधे अग्नीषोमीयविकृतित्वात् अतिदेशेन प्राप्तः । तथा सति अश्वमेधे "चतुस्त्रिꣳशद्वाजिनो देवबन्धोः" इति मन्त्रान्तरमस्ति । तेन मन्त्रलिङ्गेन अश्वस्य पार्श्वास्थीनि चतुस्त्रिंशत् इति सिद्धम् । तत्सिद्धौ "षड्विꣳशतिरस्य वङ्क्रयः" इति मन्त्रे षड्विंशलिङ्गविरोधे तत्स्थाने "चतुस्त्रिꣳशदस्य वङ्क्रयः" इत्यूहः प्राप्तः । एवं सति अश्वमेधप्रकरणे पुनरेवं श्रूयते—"न चतुस्त्रिꣳशदिति ब्रूयात्, षड्विꣳशतिरित्येव ब्रूयात्" इति । अत्र चतुस्त्रिंशदित्यूहशास्त्रस्यानुमानिकत्वात् तं बाधित्वा न चतुस्त्रिंशत् इति निषेधो नित्यं प्रवर्तते इति पूर्वपक्षमुक्त्वा तदुत्तरं यत्रानुमानिको विधिः निषेधश्च प्रत्यक्षः तत्र द्वयोरपि समबलत्वमङ्गीकार्यम् । तथा हि—प्रबलदुर्बलभावो हि न वस्तुनि स्वाभाविकः कुत्र चिदस्ति, किं त्वाकाङ्क्षायां शीघ्रोपस्थितिविळम्बोपस्थितिप्रयुक्तः । यथा विकृतौ कर्मविशेषे प्रकृतितो वेद्यास्तरणं प्राप्तम् । तत्र केन वेद्यास्तरणं कार्यं इत्याकाङ्क्षायां साधनबोधकं पदं यदि न स्यात् तदा प्राकृतवेद्यास्तरणसाधनं स्मृत्वा कुशान् बुद्धौ आरोप्य पश्चात् प्रकृतिवत् कुशैरास्तरणं कर्तव्यमिति आनुमानिकशब्दकल्पनया आकाङ्क्षा पूरणीया । ततोऽपि झटिति "शरमयं बर्हिर्भवति" इति प्रत्यक्षवाक्येनोपस्थितशरैः आकाङ्क्षाशान्तौ बोधकशास्त्रस्य तदंशे आकाङ्क्षाविरहात् दुर्बलत्वम् । प्रकृते "न चतुस्त्रिꣳशदिति ब्रूयात्" इति निषेधस्य प्राप्तिसापेक्षत्वात् "चतुस्त्रिꣳशद्वाजिनः" इति लिङ्गेन पूर्वं विधिकल्पनानन्तरं विधिमनुसृत्य प्रवृत्तं पुरुषं निवर्तयितुं निषेधः पश्चात् प्रवृत्तः । [1]न कुशशास्त्रात् पूर्वं शरशास्त्रमिव निषेधः

[1] अतः यमुपजीव्य प्रवृत्तः तमत्यन्तं बाधितुमसमर्थस्सन् पक्षे बाधते । अत ईदृशस्थले—

विधिकल्पनात् पूर्वं प्रवृत्तिक्षमः। अत ईदृशस्थले आनुमानिकविधिप्रत्यक्षनिषेधयोः तुल्यबलत्वाद्विकल्प एवेति नवमे तुरीयपादे सिद्धान्तितं जैमिनितन्त्रे। प्रकृतेऽपि तथा तुल्यबलत्वाद्विकल्पो दुष्परिहारः॥

यदि च सूत्रे पात्रद्वयेतिकर्तव्यतासहितस्थापनकथनेन प्रयोगविधौ द्विपात्रविधिर्न कल्प्यते, तन्त्रान्तरानुसारेण पात्रद्वयकथनं तृतीयस्याप्युपलक्षकमिति कल्प्यते, तदा सर्वेष्वपि तन्त्रेषु त्रिपात्रप्रयोगस्यैव तन्त्राभिमतत्वेन द्विपात्रप्रवर्तकाभावेन द्विपात्रविधेः शशशृङ्गसमत्वेन तन्निषेधस्यापि तादृशत्वेन तेन हेतुना कथं त्वत्समीहितसिद्धिः। सेयं उभयतःपाशा रज्जुः। तस्मात् कल्पसूत्रयोगिनीतन्त्रानुसारिभिः द्विपात्रप्रयोगो निश्शङ्कमनुष्ठेयः॥

यत्तु परमानन्दतन्त्रटिप्पण्यां सौभाग्यानन्दसन्दोहसंज्ञिकायां एकोनविंशोल्लासे पञ्चदशश्लोकव्याख्यानावसरे—ननु परशुरामसूत्रवामकेश्वरादितन्त्रेषु प्रोक्तपात्रद्वयं विरुध्येत इति चेच्छृणु। अग्रिमोल्लासे अनुकल्पपूजायां पात्रद्वयस्य सुस्पष्टं वक्ष्यमाणत्वात् अनुकल्पपूजापरं परशुरामसूत्रादितन्त्रम्। अत एव तत्र शापमोचनमन्त्राणामभाव इति सुवचम्। अथवा—आत्मयोगाभ्यासिपरम्। अत एव त्रिपुरार्णवे "आत्मयोगपराणां तु [1]नाङ्गलोपेन हीयते" इति। अत एव श्रीभास्कररायैः एकपात्रादिसंक्षेपपूजनं अभ्यासशीलानामिति सेतुबन्धे निरूपितम्। अथवा परमापत्पक्षो वा। तदुक्तं तन्त्रे—

प्रत्यक्षयुग्मपात्रं वै कृत्वा शापमवाप्नुयात्।
कचिन्मयैवोपदिष्टः परमापत्तिकालिकः॥

—इति महेश्वरानन्दनाथाः पक्षत्रयमूचुः, तच्चिन्त्यम्॥

परशुरामसूत्रोक्तसरणिर्मुख्या न मिलति। तथा प्रतिनिधिस्वीकारपक्ष इति प्रथमपक्षे "तस्याभिव्यञ्जकाः पञ्चमकाराः तैरर्चनं गुप्त्या" इति, "तद्वदादिमं संशोध्य" इति "आदिमबिन्दुं दत्वा" इति "पूरयित्वा आदिमं" इति "मपञ्चकेन सन्तर्प्य" इति प्रभृतीनां शतावधिवाक्यानां सूत्रस्थानां कुण्डलप्रक्षेप एव स्यात्। किं च—"मपञ्चकालाभेऽपि नित्यक्रमप्रत्यवमृष्टिः" इति सूत्रेण नित्यपूजायां

[1] नाङ्गलोपो न बाधितः—श्री.

मपञ्चकस्य मुख्यत्वं सुस्फुटम् । एवं सति सूत्रमनुकल्पपरमिति लेखः पूर्वोत्तरसूत्रापरिशोधनमूलः प्रामादिक इति हेय एव ॥

किं च—एतत्पक्षस्य साधकतया शापमोचनाभावो हेतुत्वेनोपन्यस्तः । स तु अत्यन्तनिर्मूलकोऽसङ्गतश्च । तथाहि—शापविमोचनं नाम किं पूर्वं कृष्णं स्थितं यत् तस्यानन्तरक्रियया शुक्लत्वसंपादनरूपं दृष्टं फलं, किं वा संमार्गादिना स्रुक्स्रुवादिष्टं यागसाधनशरीरं उत्पद्यत इति । नाद्यः, शापमोचकमन्त्रसहस्रावृत्त्याऽपि पूर्वरूपपरावृत्त्यदर्शनात् । न द्वितीयः,

क्वचित्तन्त्रेषु विस्तारः क्वचित्तन्त्रेषु संग्रहः ।
एकं तन्त्रं समाश्रित्य सम्यक्कर्म कृतं तथा ॥
सर्वं तेन कृतं [1]रामे तच्च श्रीगुरुमार्गतः ॥

इति त्रिपुरारहस्यवचनेन

बह्वल्पं वा स्वगृह्योक्तं यस्य यावत् प्रकीर्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥

इति बोधायनस्मृतिप्रमाणेन च आदिमद्रव्ये यावदुक्तसंस्कारैरेव यागजनकस्वरूपलाभे शापविमोचनमन्त्राणां तत्राप्रयोजकत्वात् कथमनेन हेतुना सूत्रं प्रतिनिधिपरं सिध्येत् । किं च—मुख्याभावे प्रतिनिधिस्वीकारे मुख्यधर्मा यावन्तः प्रतिनिधौ प्रवर्तन्ते, यथा व्रीह्यभावे नीवारे यावद्व्रीहिधर्माः, यथा वा सोमाभावे पूतीकेषु यावत्सोमधर्माः, तत्र ऊहोऽपि नास्तीति साधितं जैमिनितन्त्रे । अनुतिष्ठन्ति च तथैव शिष्टाः । एवं सति प्रतिनिधौ शापविमोचनमन्त्राभावः केन वार्यते । इत्थं च वह्नावनुष्णत्ववदत्यन्तासिद्धहेतुं प्रयुञ्जानास्ते स्वाविद्वत्तां सुस्फुटं प्रकटयामासुः ॥

नापि द्वितीयः पक्षः साधुः । तथा हि—दीक्षाऽद्यारभ्य निखिलपरशुरामसूत्रप्रतिपादितं कर्म योगाभ्यासिपरं, उत पूजामात्रम् । नाद्यः, दीक्षातः प्राक् योगाभ्यासित्वं न संभवति । "अदीक्षितानां पुरतो नोच्चरेच्छिवपद्धतिम्" इति निषेधेन तान्त्रिकसिद्धान्तश्रवणाभावेन श्रवणमृते योगासंभवेन योगाभ्यासिनामियं

[1] राम—श्री, व२.

दीक्षेति वक्तुमशक्यत्वात् । द्वितीये—ईदृशाभ्यासी एतत्तन्त्रविहितपूजाकर्ता किमेतत्तन्त्रोक्तदीक्षावान् उत तन्त्रान्तरेण दीक्षितस्य कालेन स्वतन्त्रानुष्ठानेन परिपक्वचित्तस्यैव एतत्सूत्रोक्तपूजायामधिकारो वा । नाद्यः, दीक्षाऽव्यवहितोत्तरक्षणे न भवदभिमतध्यानसिद्धिः । अयमनुभूयते सर्वैः । इत्थं च सूत्रानुसारेण दीक्षां संपाद्य अयोगित्वेनैतत्तन्त्रोक्तपूजानधिकारात् तन्त्रान्तराश्रयणं पूजाऽर्थं कर्तव्यम् । तर्हि—

स्वशास्त्रे वर्तमानो यः परशास्त्रं निषेवते ।
भ्रूणहत्यामवाप्नोति स्वशास्त्रमवमन्यते ॥

इति निषेधोल्लङ्घनम् । किं च—दीक्षोत्तरं महाविद्याऽऽराधनप्रत्यूहापोहाय गाणनायकीं पद्धतिमामृशेत् इति सूत्रेण ललितोपास्तिविघ्ननाशसाधनत्वं गणपत्युपास्तेरुक्तम् । ललितोपास्त्यनन्तरं हि तत्साध्यश्चित्तपरिपाकः ततो निरुक्तयोगः । तदनन्तरं द्विपात्र-प्रयोगे अधिकारो वाच्यः । स न संभवति गणपत्युपास्तेः विघ्नसमानकालिकत्वेन तदानीं निरुक्तयोगाभावादपि गणपत्युपास्तौ द्विपात्रकथनात् तत्रावश्यं द्विपात्रप्रयोगोऽ-ङ्गीकार्यः । इत्थं च तत्र व्यभिचरिताधिकारस्य अन्यत्रापि कल्पनं केन प्रतिबद्धम्, सकृद्व्यभिचरितायाः स्त्रियः किमपरत्र वस्त्रावगुण्ठनेनेति न्यायात् ।

न च—यश्चायोगी तेन गणपत्युपास्तिं त्यक्त्वा केवलललितोपास्तिरेव तन्त्रान्तरमनुसृत्य योगसिद्धिपर्यन्तं अनुष्ठेया न गणपत्युपास्तिः, अथवा गणपत्यु-पास्तावपि तन्त्रान्तरमाश्रीयतां—इति वाच्यम् । तथा सति "एवं गणपतिमिष्ट्वा विधूतसमस्तविघ्नव्यतिकरः शक्तिचक्रैकनायिकायाः श्रीललितायाः क्रममारभेत" इति सूत्रेऽपि अप्रामाण्यं वक्तव्यं स्यात् । सूत्रे गणपत्युपास्तिपाठवैय्यर्थ्यम्—न ललितोपास्तेः पूर्वमनुष्ठानं अयोगित्वेन तस्य तदाऽनधिकारात् । ललितोपास्त्या फलसिद्ध्यनन्तरमपि अप्रयोजकत्वात् अननुष्ठेयम् । एवं च वैय्यर्थ्यं दुर्निवारम् ॥

न च—द्विपात्रनिषेधस्य ललिताप्रकरणस्थत्वात् तत्रैवायोगिनामनधिकारः । अन्यत्रास्त्येव द्विपात्रप्रयोगेऽधिकारः निषेधाभावात् इति—वाच्यम्; श्रीललिताया महायागानुष्ठानावसरे निर्विघ्नतासिद्धये परशुरामसूत्रानुसारेण निखिलगणपत्युपास्तिं विधाय पात्रासादनकाले द्विपात्रप्रयोगं परित्यज्य त्रिपात्रप्रयोगमनुसरतां महेश्वरानन्द-नाथानां एतत्पक्षस्याननुमतत्वात् । नापि तन्त्रान्तरेण दीक्षितस्य स्वतन्त्रानुष्ठानेन

परिपक्वचित्तस्य सूत्रोक्तपूजायामधिकार इति द्वितीयः पक्षः। तथा सति सूत्रे दीक्षा-पाठवैय्यर्थ्यात्। एवमेतत्पक्षसाधकत्वेन त्रिपुरार्णववचनम् "आत्मयोगपराणां तु नाङ्गलोपेन हीयते" इत्यलिखत्। तदतीव मन्दम्। योगाभ्यासिनामङ्गलोपो न दोषायेति तदर्थः। योगिरूपाधिकारिविशेषं उद्दिश्य सूत्रोक्तद्विपात्रविधिरिति सिद्धान्तस्तदीयः। एवं च योगिप्रयोगे तृतीयपात्रस्य वैश्यकर्तृकदर्शपूर्णमाससम्बन्धि-सामिधेन्यां पाञ्चदश्यस्येवानङ्गत्वादङ्गलोप एव नास्ति। एवं सत्यङ्गलोपे दोषो नास्तीति स्वमतसाधकत्वेन हेतुकथनं वन्ध्यापुत्रस्य स्वकार्यसाधकत्वेन ग्रहणवदेव भवति। या चैतद्विषये एकपात्रादिसङ्क्षेपपूजनमभ्यासशीलानामिति सेतुबन्धलेखसम्मतिर्दर्शिता, साऽप्यसिद्धा। सेतुबन्धे ईदृशी पङ्क्तिः न कुत्राप्यस्ति। प्रत्युत द्विपात्रप्रयोग एव व्यवस्थापितः। तथा हि—पूर्वचतुश्शतीसम्बन्धिनः

हेमादिपात्रे साधारे स्थापयेदर्घ्यं[1]मञ्जसा।
रोचनाचन्द्रकाश्मीरलघुकस्तूरिकायुतम्॥
भावयेद्वह्निसूर्येन्दुभूतानि परमेश्वरि।
जपेच्च दशवारं तत्तर्पयेत्तेन योगिनीः॥

इति श्लोकद्वयस्य व्याख्यानावसरे इदं पूर्वतन्त्रस्थवचनं सामान्यार्घ्यपरं, उत्तरतन्त्रस्थं "श्रीचक्रस्यात्मनश्चैव मध्ये त्वर्घ्यं प्रतिष्ठयेत्" इति विशेषार्घ्यपरं, तदन्ते "तथैवार्घ्यं विशेषेण साधयेत् साधकोत्तमः" इति गुरुपात्रात्मपात्रान्यतरपरमिति प्राचीनव्याख्यां निरस्य पूर्वतन्त्रस्थवचनमेव विशेषार्घ्यपरमित्यपि मतान्तरं निरस्य पूर्वतन्त्रे सामान्यार्घ्य-विधिः उत्तरतन्त्रस्थेन श्रीचक्रस्यात्मनश्चेति वचनेन तस्यैव देशकालविधिः "तथैवार्घ्यं विशेषेण" इति पूर्वधर्मातिदेशसहितविशेषार्घ्यविधिरिति व्यवस्थाप्योपसंहारसमये "तस्मादेतत्तन्त्रानुसारेण द्वयोरेव स्थापनमिष्टं" इति द्विपात्रव्यवस्थामात्रं श्रीभास्कर-रायाश्चक्रुः। (सा च अस्माकमनुगुणा परेषामननुगुणा च)। योगिनामेवायं प्रयोगः इति नोचुः॥

यत्तु—सेतुबन्धे स्थलान्तरे तन्त्रान्तरेषु योगिनीतन्त्रस्योत्तरचतुश्शतीवदन्तर्याग-प्रपञ्चस्याभावात् तन्त्रराजस्याप्येतत्सापेक्षत्वादत्युत्तमं एतत्तन्त्रं, एतत्सापेक्षत्वं च

[1] मम्बुना—व.

तन्त्रराजे—" नित्याहृदयसंप्रोक्तस्फुटोपायेन भावयेत् " इति कथनात् । नित्याहृदय-मेतदुत्तरतन्त्रनाम । अत्र बहिर्यागाङ्गानामल्पानां कथनेऽपि अन्तरङ्गोपास्तिदार्ढ्य-शीलानां तावतैव परिपूर्तिसंभवात् इति कल्प्यत इति लिखितत्वात् । मतद्वयखण्डनपूर्वक-पूर्वलिखितैतत्तन्त्रानुसारेण द्वयोरेव स्थापनमिष्टं इति वाक्ये एतत्पदं उत्तरचतुश्शती-परम् । उत्तरचतुश्शत्यां तु शुद्धान्तःकरणस्यैवाधिकारात् तेषां प्रयोग एव पात्रद्वयमिति सिद्धान्तः समीहितः । एतदभिप्रायेणैवास्माकं सेतुबन्धसंमतिलेखोऽपीति—तदपि न । तथा सति उत्तरतन्त्रे सामान्यार्घ्योदकोत्पत्तिविध्यभावेन केवलमुत्तरचतुश्शती-तन्त्रेणैवानुतिष्ठतां विशेषार्घ्यपात्रस्यैवासादनं प्रसक्तं, न पात्रद्वयस्य । तथा चोपसंहारवाक्ये एतत्तन्त्रानुसारेण द्वयोः स्थापनमिष्टमिति वाक्यं विरुध्यत एव । तस्मादेतत्तन्त्रपदेन पूर्वोत्तरचतुश्शतीमेकीकृत्य समग्रतन्त्रानुयायिनामित्येवाभिप्रायः । अत एव सामान्यार्घ्यस्य पूर्वचतुश्शत्यामुत्पन्नस्य विनियोगोऽष्टमपटले वक्ष्यतीति सेतुबन्धलेखश्च सङ्गच्छते । एतेन पूर्वोत्तरतन्त्रोक्तमेकमेवेति स्पष्टम् । ईदृशी पूजा अपरिपक्वचित्तस्यापि प्राप्ता, तदनुसारेण पात्रद्वयं दुर्निवारम् ॥

यश्च बहिर्यागाङ्गानामल्पानां कथनेऽप्यन्तरङ्गोपास्तिशीलानां तावतैव परिपूर्तिरिति सेतुबन्धलेखः स नैतत्तन्त्रानुसरिपरः । किं तु तन्त्रराजानुसारेण पूर्वमुपास्तिं कुर्वतः कालेन चित्तशुद्धिपूर्वकभावनायां संपन्नायां " इत्थं कुर्वन् हि सततं मुच्यते नात्र संशयः " इति वचने साङ्गबहिर्यागस्य सततमित्यनेन तदुत्तरमपि यावज्जीवं साङ्गोपास्तिप्राप्तौ तद्बाधकमिदं " नित्याहृदयसंप्रोक्तस्फुटोपायेन भावयेत् " इति । नित्याहृदयमुत्तरचतुश्शती, तत्र प्रोक्तो यः स्फुटः उपायः बहिर्यागानुष्ठान-पूर्विका भावना, तां कुर्यादिति तदर्थः—तन्त्रराजे बहिर्यागाङ्गानां बहुत्वात् योगाभ्यासं चिकीर्षतां तदनुष्ठानपूर्वकयोगाभ्यासे कालाभावेन कानि हेयानि कानि संग्राह्याणि इति विचिकित्सायां योगमभ्यसिषोः यावज्जीवप्राप्ततन्त्रराजोक्तयावदङ्ग-कलापानुष्ठानं न कर्तव्यम् , किं तु उत्तरचतुश्शत्युक्ताल्पाङ्गकलापेनैव बहिर्यागं संपाद्य भावनां कुर्यात् , तावतैव तस्य परिपूर्तिरिति कल्प्यत इति तन्त्रराजानुयायिनः उत्तरचतुश्शतीधर्मप्राप्त्यभिप्रायकः । नैतावता निखिलं तन्त्रं योगाभ्यासिपरमिति ब्रह्मापि साधयितुं शक्नोति । तथा सति तन्त्रराजवचने नित्याहृदयेत्यनेन उत्तर-चतुश्शत्या एव योगाभ्यासिपरत्वकथनात् पूर्वचतुश्शतीपाठवैयर्थ्यात् । अतस्तन्त्रराज-

वचनेन परिपक्वचित्तानां योगाभ्यासदक्षाणां उत्तरचतुश्शत्युक्तमेकं पात्रं विशेषार्घ्यरूपं समष्टिमन्त्रेण पूजनम् । अपरिपक्वचित्तानां योगिनीतन्त्रानुसारिणां पूर्वोत्तरचतुश्शतीमेकीकृत्य द्विपात्रप्रयोग इति सेतुबन्धाभिप्रायतत्त्वम् । एवमेव सूत्रानुयायिनामित्यलं पल्लवितेन ॥

नापि परमापत्पक्षो वेति तृतीयः पक्षः । तथा हि तृतीयपक्षसाधकं यद्वचनं—

प्रत्यक्षे युग्मपात्रं वै कृत्वा शापमवाप्नुयात् ।
क्वचिन्मयैवोपदिष्टः परमापत्तिकालिकः ॥

इति लिखितं तत् किं "योपगुरेत्तं शतेन यातयात्" इतिवच्छापरूपानिष्टसाधनत्वं द्विपात्रे ज्ञापयति उत्तरार्धस्तच्छेषोऽर्थवादः, उत पूर्वार्धेनानिष्टसाधनत्वं उत्तरार्धेन आपत्तौ अभ्यनुज्ञा चेति द्वयमुच्यते, अथवा केवलमभ्यनुज्ञापर एव वा सर्वोऽपि श्लोकः । नाद्यः, उत्तरार्धस्य अर्थवादरूपस्य केवलस्तुतौ तात्पर्येणापत्तिकाले अभ्यनुज्ञापकत्वासंभवात् स्वोक्तपक्षासिद्धेः । किं च—द्विपात्रे अनिष्टसाधनत्वं प्रतिपादयन् द्विपात्रे प्रवृत्तं पुरुषं निवर्तयति इति वाच्यम् । तत्र द्विपात्रप्रयोगे प्रवृत्तिसाधनं रागो वा तन्त्रान्तरं वा । नाद्यः, त्रिपात्रं कर्तव्यमिति विधिसत्त्वे अङ्गलोपाद्भीतस्य श्रद्धावतः द्विपात्रे रागो न कदाऽपि संभवति । न द्वितीयः, विकल्पो दुष्परिहारः इति प्रागेव दत्तोत्तरत्वात् । एतेन द्वितीयपक्षः प्रत्युक्तः । तस्मात् अगत्या यस्मिंस्तन्त्रे इदं वचनं पठितं तत्र त्रिपात्रविधिः स्यादेव । तच्छेषः पूर्वार्धोऽर्थवादः । उत्तरार्धेन त्रिपात्रविधितन्त्रानुयायिनां परमापत्तौ स्वान्यतन्त्रोक्तद्विपात्रप्रयोगग्रहणमभ्यनुज्ञातम् ।

अनृतं न वदेद्विद्वाननृतं धर्मनाशनम् ।
प्राणसंशय आपन्ने त्वनृतं नैव दुष्यति ॥

इतिवत् तृतीयपक्ष एव साधुः । अयमेवार्थः स्पष्टीकृतो बोधायनाचार्यैः—

स्वशास्त्रे विद्यमाने यः परशास्त्रेण वर्तते ।
भ्रूणहत्यासमं तस्य स्वशास्त्रमवमन्यतः ॥
आर्षेयस्य स्वशास्त्रस्य प्रदेशास्तद्गु[परशास्त्रगु]णैस्सह ।
कर्मणां प्रविचारा[र्या]र्थमापत्सु च समाप्नुयात् ॥ इति ॥

अस्योदाहरणं भवस्वामिना दर्शितम् । यथा तृतीयसवने "सौम्यं तन्त्रं तूष्णीं" इति शालिकिशाखायाम्, "दर्शपूर्णमासवत् सर्वं" इति शाखाऽन्तरे । स्वस्वशाखिभिः यथोक्तमनुष्ठेयम् । आपत्तौ तु सर्वैरपि तूष्णीमिति । इत्थं च त्र्या[द्व्या]दिपात्राणामापत्काले अभ्यनुज्ञापकं शास्त्रं कथं आ[अना]पन्नपरमिति व्यवस्थापयेत् । तस्मान्न किंचिदेतत् । परशुरामसूत्रयोगिनीतन्त्रानुसारिभिः निःशङ्कं द्विपात्रासादनमेव कर्तव्यम् ॥

ननु तन्त्रान्तरस्थद्विपात्रदूषकवचनानां विधिशेषार्थपरत्वं व्यवस्थाप्य सूत्रानुसारिभिः द्विपात्रप्रयोग एव कार्यः तन्त्रान्तरस्पर्शो न कार्यः इति प्रतिज्ञायां "तन्त्रानुक्तं सूचितं च तथाऽन्येष्वपि दूषितम्" अन्यतन्त्रात् ग्राह्यं इति विध्युदाहरणं किमिति चेत्—शृणु । अस्यैव वचनस्याव्यवहितपूर्वं,

क्वचित्तन्त्रेषु विस्तारः क्वचित्तन्त्रेषु संग्रहः ।
एकं तन्त्रं समाश्रित्य सम्यक्कर्मकृते तथा ।
सर्वं तेन कृतं राम तच्च श्रीगुरुमार्गतः ॥

इत्यनेन पूजाऽङ्गानां पूजाऽनङ्गभूतानां यावत्कर्मणां स्वतन्त्रानुक्तानां निवृत्तौ कथितायां "तन्त्रानुक्तं सूचितं च" इत्यनेन केषांचित्पूजाऽङ्गानां ग्रहणम्, "तथाऽन्येष्वपि दूषितं" इत्यनेन पूजाऽनङ्गभूतानां केषांचिदकरणे अतिनिन्दा, श्रूयते । यथा सहस्रनामपाठः । तस्याननुष्ठाने—

अकीर्तयन्निदं स्तोत्रं कथं भक्तो भविष्यति ।
अपठन्नामसाहस्रं प्रीणयेद्यो महेश्वरीम् ॥
स चक्षुषा विना रूपं पश्येदेव विमूढधीः ।
रहस्यनामसाहस्रं मुक्त्वा यः सिद्धिकामुकः ॥
स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति ॥

इत्यादिवचनैः अपाठेऽपि निन्दा श्रूयते । तत्तन्त्रान्तरस्थमवश्यं ग्राह्यम् । अत्रैव त्रिपुरारहस्यवचनाभिप्रायः । "स्वतन्त्रेणाविरुद्धं तु यावदन्यत् समाचरेत्" इति पूर्वलिखिततन्त्रान्तरवचनस्याप्यत्रैव तात्पर्यम्, न तु एकप्रयोगाङ्गेषु तन्त्रान्तराश्रयणम् । प्रयोगाङ्गेषु सूचितं आकाङ्क्षितं च मुक्त्वा तन्त्रान्तरस्थस्य ईषदपि प्रवेशो नास्तीति परमसिद्धान्तः । अत एव श्रीभागवतेऽपि—

यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात् पृथक् ।
स्वभावविहितो धर्मः कस्य नेष्टः प्रशान्तये ॥

इति इममेवार्थमाह । अस्य श्लोकस्य "स्वधर्मानुष्ठानानन्तरं धर्मभूयस्त्वार्थमपि परधर्मो नानुष्ठेयः अनुपयोगादित्याह—स्वभावेति" इति श्रीधरस्वाम्यवतरणम् । एतेन श्लोको व्याख्यातः ॥ ३० ॥

तत्पात्रस्थबिन्दुभिः करणीयकृत्यमाह—

तद्बिन्दुभिस्त्रिशः शिरसि गुरुपादुकामिष्ट्वा आर्द्रं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि योऽहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वाहेति तद्बिन्दुमात्मनः कुण्डलिन्यां जुहुयात् ॥ ३१ ॥

तद्बिन्दुभिः विशेषार्घ्यबिन्दुभिः त्रिशः त्रिवारं शिरसि द्वादशान्तस्थाने गुरुपादुकामिष्ट्वा गुरुपादुकोद्देशेन द्रव्यदानं कृत्वा आर्द्रं ज्वलति इति स्वाहान्तेन मन्त्रेण तद्बिन्दुं गुरुपादुकायागशेषबिन्दुमित्यर्थः, सर्वनाम्नां सन्निहित-परत्वेन पादुकादत्तशेषस्यैव सन्निहितत्वात्, "तदीयं शेषमादाय जपन् योगं समाचरेत्" इति योगिनीतन्त्रवचनाच्च । आत्मनः स्वस्य कुण्डलिन्यां चिद्वह्नौ । कुण्डलिनीस्वरूपमुक्तं तन्त्रान्तरे—

विशदे कर्णिकायां च ध्यात्वाऽऽधारेऽथ लोहिते ।
कर्णिकाकुलकुण्डान्तस्सार्धत्रिवलयाकृतिम् ॥
प्रसुप्तसर्पसदृशीं बिसतन्तुतनीयसीम् ।
ध्यात्वा कुण्डलिनीशक्तिम् . . . . . ॥ इति ॥

जुहुयात् इत्यनेन अस्मिन् कर्मणि होमबुद्धिः दृढा कार्या, न तु पानबुद्धिरिति सूचिता । बिन्दुमित्यनेन होमद्रव्यस्यात्यल्पत्वं सूचितम् । बिन्दुमिति द्वितीयया प्रतिपत्तिसंस्कारोऽपि सूचितः । गुरुपादुकायै दत्तशेषं होमेन संस्कुर्यादित्यर्थः । तेन शेषाभावे न होमः ॥

कुलद्रव्यस्वीकारविधिसमर्थनम्

ननु सकलश्रुतिस्मृतिपुराणेषु सुरापानस्य पञ्चमहापातकेषु गणितत्वात् कथं तन्त्रोक्तद्रव्यसेवनं सुखाय भवितुमर्हति । एवं येषु तन्त्रेषु द्रव्यसेवनं विहितं तेष्वेव तन्त्रेषु निषेधो बहुळमुपलभ्यते । यथा कुलार्णवे—

सुरादर्शनमात्रेण कुर्यात् सूर्यावलोकनम् ।
तत्समाघ्राणमात्रेण प्राणायामत्रयं चरेत् ॥
आजानुभ्यां भवेत् स्नानमानाभ्युपवसेच्छिवे ।
ऊर्ध्वं नाभेस्त्रिरात्रं स्यान्मद्यस्य स्पर्शने विधिः ॥
सुरापाने कामकृते ज्वलन्तीं तां विनिक्षिपेत् ।
मुखे तया विनिर्दग्धः ततः शुद्धिमवाप्नुयात् ॥
मद्यपानजदोषस्य प्रायश्चित्तमितीरितम् ॥ इति ॥

त्रिपुरार्णवेऽपि—

कामान्मोहाद्यदि सुरां पिबेत् सकृदपि द्विजः ।
विद्वानपि च संत्याज्यः तन्त्रज्ञैरविचारितम् ॥ इति ॥

देवीयामळेऽपि—

आघ्राणं दर्शनं चैव सुरायास्संत्यजेद्बुधः ॥ इति ॥

दर्शनमेव त्यजेत् किमु पानत्यागे इति तदर्थः । एवं अन्यतन्त्रवचनान्यपि बहूनि सन्ति । ग्रन्थविस्तरभयान्नेह लिख्यन्ते । तस्मात् कुलद्रव्यस्वीकारशास्त्रमश्रद्धेयमिति चेत्—न, रागप्राप्तसुरापाननिवर्तकान्येव अमूनि वचनानि । क्रत्वर्थप्रवृत्तिरिष्टैव, अन्यथा "न ब्राह्मणं हन्यात्" इति निषेधेन "ब्रह्मणे ब्राह्मणमालभते" इति श्रुतेरप्रामाण्यापत्तेः । अयमेवार्थः स्पष्टमुक्तः श्रीभागवते—

यद्घ्राणभक्षो विहितः सुरायाः तथा पशोरालभनं न हिंसा ।
एवं व्यवायः प्रजया न रत्यै इमं विशुद्धं नु विदुः स्वधर्मम् ॥
ये त्वनेवंविदः पुंसः स्तब्धास्सदभिमानिनः ।
पशून् द्रुह्यन्ति विस्रब्धाः प्रेत्य खादन्ति ते च तान् ॥

इति ग्रन्थेन । तस्मात् निरवकाशविशेषद्रव्यस्वीकारविधेः क्रत्वर्थत्वकल्पनात् निषेधस्य च केवलपुरुषार्थत्वेन एकार्थत्वाभावात् । अत एवैतदभिप्रायसूचकमेव कामादिति त्रिपुरार्णवे, कुलार्णवे च कामकृते इति, पदं पठितम् । एवं तन्त्रान्तरे—

दोषोऽन्यत्र वरारोहे यज्ञे दोषो न विद्यते ।
अश्वमेधादियज्ञेषु वाजिहत्या यथा भवेत् ॥

इति सदृष्टान्तमुक्तार्थमेव द्रढयति ॥

अत्र ताराभक्तिसुधार्णवे "एवं च वीरस्यापि ब्राह्मणस्य क्षीरमेव अन्यस्य तदपि न" इति भावशोधनप्रकरणे उक्त्वा एवमेतदग्रे स्थलान्तरे उक्ताया एव प्रतिज्ञाया दृढीकरणार्थं बहुविचारः कृतो नृसिंहाचार्यैः । तथा हि—

वीक्षणप्रोक्षणध्यानमन्त्रमुद्राविभूषितम् ।
द्रव्यं तर्पणयोग्यं स्याद्देवताप्रीतिकारकम् ॥

तर्पणमत्र पानमेव । इदं तु ब्राह्मणेतरविषयम्, ब्राह्मणस्य तदुपादाननिषेधात् ॥

ननु—

ब्राह्मणैस्तु सदा पेयं क्षत्रियैस्तु रणागमे ।
वैश्यैर्धनप्रयोगे च शूद्रैस्तु न कदाचन ॥

इति कुलार्णवे,

सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।

इति समयाचारतन्त्रे,

सत्ये क्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टजैः ।
त्रेतायां पूजिता देवी घृतेन सर्वजातिभिः ॥
मधुभिः सर्ववर्णैस्तु पूजिता द्वापरे युगे ।
पूजनीया कलौ देवी केवलैरासवैः शुभैः ॥

इति यामळे चोक्तत्वात् कथं ब्राह्मणस्यानधिकार इति चेत्—उच्यते । "विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैः" इति लघुस्तवे,

"वर्णानुक्रमभेदेन द्रव्यभेदा भवन्ति वै" इति ज्ञानार्णवे, "द्रव्येण सात्विकेनैव ब्राह्मणः पूजयेच्छिवाम्" इति तत्रैवोक्तम् । तथा आसवभेदमुक्त्वा

एवं दद्यात् क्षत्रियोऽपि पैष्टीं तु न कदाचन ।
नारिकेळोदकं कांस्ये ताम्रे गव्यं तथा मधु ॥
राजन्यवैश्ययो[1]र्दानं न द्विजस्य कदाचन ।
एवं प्रदानमात्रेण [2]हीनायुर्ब्राह्मणो भवेत् ॥

इति महाकालसंहितायाम्,

क्षीरेण ब्राह्मणैस्तर्प्या घृतेन नृपवंशजैः ।
माक्षिकैर्वैश्यवर्णैस्तु आसवैः शूद्रजातिभिः ॥

इति भैरवीतन्त्रे,

यत्रावश्यं विनिर्दिष्टं मदिरादानपूजनम् ।
ब्राह्मणस्ताम्रपात्रे तु मधु मद्यं प्रकल्पयेत् ॥

इति कुलचूडामणौ,

ब्राह्मणो मदिरां [3]दत्वा ब्राह्मण्यादेव हीयते ।
स्वगात्ररुधिरं दत्वा स्वात्महत्यामवाप्नुयात् ॥

इति हंसमाहेश्वरतन्त्रे, कलिधर्मप्रकरणे गृह्यपरिशिष्टे हरिनाथोपाध्यायैः सौत्रामण्यां सुराग्रहणनिषेधस्योक्तत्वात्, "ब्राह्मणैस्तु सदाऽपेया" इत्यकारप्रश्लेषात् ब्राह्मणस्य सदा निषेधः । क्षत्रियस्य सङ्ग्रामकाले, विकलस्य सङ्ग्रामासंभवात् । वैश्यस्य धनप्रयोगकाले, अन्यथा विकलधिया विंशतिदाने कर्तव्ये शतादिदानापत्तेः । शूद्रैर्नैव कदाचन अपेया तेन सर्वदैव पेयेत्यर्थः । एवं च "पूजनीया कलौ देवि केवलैरासवैः" इत्यत्र अनुषज्यमानसर्ववर्णशब्दश्च ब्राह्मणेतरविषय इत्यवधातव्यम् ॥

अथ—

क्षीरं वृक्षसमुद्भूतमाज्यं वल्कलसंभवम् ।
मधु पुष्परसोद्भूतं आसवं तण्डुलोद्भवम् ॥

[1] देयं ब्राह्मणस्य—श्री. [2] हीनो भवति ब्राह्मणः—श्री. [3] पीत्वा—श्री.

इति भैरवीतन्त्रे क्षीरादिपदानां आसवविशेषपरिभाषणात् ब्राह्मणस्यापि तत्राधिकारः प्रतीयते इति चेत्—अत्र प्रतिभाति । क्षीरादीनां कथं भैरवकल्पमित्यत्रेदं वचनम् । तेन क्षीरं वृक्षसमुद्भूतं वार्क्षं मैरेयमित्यर्थः । एवमग्रेऽपि । अन्यथा क्षीरवृक्षपदादेर्वैपरीत्येन प्रयोगापत्तेः, "अनुवादमनुक्त्वा तु न विधेयमुदीरयेत्" इति न्यायात् । तण्डुलोद्भवस्त्वोदनः । तेन शूद्रस्याप्योदनस्थाने आसवमेव तेन । पृथग्गोदनं, ब्राह्मणादिभिः आसवं च, न देयमित्यर्थः । लिखितवचनात् आमं, "शूद्रहस्तेन पक्वान्नं पक्वमुच्छिष्टमुच्यते" इत्यादिस्मृतेश्च ॥

नच—शुक्रशापस्य ब्राह्मणविषयत्वेन सुरायां तदुद्धारविधानानुपपत्तिः इति वाच्यम्, शूद्रमात्रस्य सदाऽधिकारे शास्त्रसिद्धे शुक्रशापविमोचनस्यादृष्टार्थत्वात् ॥

किं च—"'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यादौ लिङ्गापेक्षया श्रुतेरिव शापविमोचनकल्प्यमैरेयदानविधानापेक्षया 'ब्राह्मणो मदिरां दत्वा' इत्यादि निषेधविधेः श्रौतस्य बलवत्त्वं युक्तिसाम्यात्" इत्यन्तेन लेखेन ब्राह्मणेतरपरमिति प्रतिज्ञां दृढीचक्रुः नृसिंहपण्डिताः ॥

तदतीव मन्दम् । तथाहि—द्रव्येण सात्विकेनेति ज्ञानार्णववचनं स्वसाधकत्वेन लिखितम् । तदत्यन्तमपरिशोधनमूलम् । सात्विकद्रव्यं नाम व्रीह्यादिवत् [न] लोकप्रसिद्धं किंचिदस्ति । अतः किं तत्सात्विकद्रव्यं इत्याकाङ्क्षायां प्रकृतिप्रत्यययोः व्याकरणस्मृतिवत् शास्त्रैकगम्या सात्विकपदशक्तिः । तच्छास्त्रं त्रिपुरार्णवे—

गौडी माध्वी च पैष्टी च त्रिविधं द्रव्यमीरितम् ।
ऐक्षवक्षौद्रजाताऽऽद्या गौडी स्यात् सात्विकी स्मृता ॥
मधूककुसुमद्राक्षातालवृक्षादिसंभवा ।
माध्वीति कीर्तिता तज्ज्ञैः राजसी सा भवेच्छिवे ॥
पिष्टतण्डुलजाता या तामसी पैष्टिकी स्मृता ।
सात्विकी ब्राह्मणे ख्याता राजसी नृपवैश्ययोः ॥ इति ॥

एवं सति शास्त्रे ब्राह्मणेतरपरमिति प्रतिज्ञा अज्ञानमूलेति ध्रुवं प्रतीमः । तथा महाकालसंहितास्थं जानीयात् "नारिकेळोदकं कांस्ये" इति । राजन्यवैश्यकर्तृकप्रयोगे मुख्यद्रव्यप्रतिनिधिनियमं विधाय ब्राह्मणकर्तृके प्रयोगे उक्तद्रव्यपरिसंख्यां कृत्वा

परिसंख्याशेषत्वेन "एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत्" इति निन्दया अर्थवादरूपया स्तौति। इदं वचनं भवत्साधकं कथं भवेत्॥

न च—क्षत्रियादिकर्तृकत्वेनैव ब्राह्मणादिकर्तृकत्वनिवृत्तिः, यथा गोधूमनिवृत्तिर्व्रीहिनियमेन, तथा च कथं ब्राह्मणकर्तृकप्रयोगे तस्य प्राप्तिः तन्निवृत्त्यर्था परिसंख्या वा कथं—इति वाच्यम्, दृष्टान्तवैषम्यात्। दर्शपूर्णमासयागः द्रव्यमन्तरा अनुपपन्नः इत्याक्षेपेण इतरद्रव्यादिवत् पक्षे व्रीहिप्राप्तौ व्रीहय एवेति नियम्यते। तावता दर्शपूर्णमासे द्रव्यान्तराकाङ्क्षाविरहादार्थिकी इतरनिवृत्तिः। प्रकृतौ राजन्यवैश्यकर्तृके प्रयोगे प्रतिनिधिनियमेन द्रव्याकांक्षाया विरहेऽपि ब्राह्मणकर्तृके द्रव्याकांक्षासत्त्वात् पक्षे अस्यापि प्राप्तौ परिसङ्ख्याया युक्तत्वात्, तस्मात् अनेन प्रतिज्ञासिद्धिः षण्डेनेव पुत्रोत्पत्तिः॥

यच्च "क्षीरेण ब्राह्मणैस्तर्प्या" इति भैरवीतन्त्रवचनं साधकत्वेन लिखितं तदपि बालप्रतारणामात्रं, भैरवीतन्त्र एव एतद्वचनसमीपे "क्षीरं वृक्षसमुद्भूतं" इत्यनेन क्षीरादिपदार्थनिर्णयात्। यत्तु "क्षीरं वृक्षसमुद्भूतं" इत्यस्य क्षीरं वृक्षसमुद्भूतकार्यकारीत्यर्थं कृत्वा वृक्षसमुद्भूतकार्यं तर्पणं क्षीरे प्रसिद्धे विधीयत इति, तदशुद्धम्। वृक्षसमुद्भवादिपदत्रयस्य किं द्रव्यसामान्यमर्थः, किं द्रव्यविशेषः। आद्ये वृक्षसमुद्भूतत्वरूपशक्यार्थप्रवृत्तिनिमित्तरूपस्य द्रव्यत्वावच्छिन्ने बाधाद्विशेषार्थे शक्तस्य सामान्ये लक्षणा। तथा सति श्रूयमाणशक्यार्थत्यागः वृक्षसमुद्भूतपदेनैव आज्यादिषु विधानसंभवे एकार्थानां तत्फलसंभवादिपदानां वैय्यर्थ्यं च। वृक्षसमुद्भवादिपदं द्रव्यविशेषपरमिति द्वितीयपक्षे द्रव्यविशेषस्य कार्यं क्षीरे विधीयते। तत्किं दृष्टं वा, किं वाऽदृष्टसाधनं शास्त्रीयं कार्यं विधीयते। आद्ये विधानवैय्यर्थ्यं, लोकत एव ज्ञातुं शक्यत्वात्। द्वितीये यथा "खलेवाली यूपो भवति" इत्यत्र "यूपे पशुं नियुञ्जीत" इत्यनेन शास्त्रेण कृतं यत्कार्यं तत्खलेवाल्यां विधीयते। तथा शास्त्रान्तरप्राप्तं विधीयते उत शास्त्रान्तरेण अप्राप्तं विधीयते। आद्ये क्षीरं वृक्षसमुद्भूतमित्यनेनैव वृक्षसमुद्भूतकार्यस्य क्षीरतर्पणादेर्लाभे क्षीरेण ब्राह्मणैस्तर्प्येति शास्त्रं व्यर्थम्। न हि "खलेवाली यूपो भवति" इति प्रोच्य "खलेवाल्यां पशुं नियुञ्जीत" इति पृथगुक्तं अप्राप्तकार्यस्य विधानं, तद्वत् वन्ध्यापुत्रादेरपि दम्पतिकार्यत्वेन विधानापत्तेः। मन्मते तु क्षीरेण ब्राह्मणैस्तर्प्येति तर्पणसाधनद्रव्यविधिः

क्षीरपदस्य प्रसिद्धार्थं बाधित्वा अर्थविशेषतात्पर्यग्राहकं "क्षीरं वृक्षसमुद्भूतं" इति वचनमिति न कस्याऽपि वैय्यर्थ्यम्। अन्योऽपि नानुपपत्तिगन्धः। यद्यपि विधायकत्वाभावेन वैय्यर्थ्यं कल्प्यम्। तथाऽपि "यदाग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं" इत्यष्टौ हवींषि चातुर्मास्ये विधाय पुनः "वैश्वदेवेन यजेत" इति समुदायस्य वैश्वदेव इति सङ्केतः कृतः। तेन "वसन्ते वैश्वदेवेन यजेत" इत्यत्र यागेन विश्वेदेवयागस्यैव वसन्ते प्राप्तौ तं बाधित्वा नवीनसङ्केतेन अष्टानां यागानां संपत्तिं कुर्वन् सार्थकं तद्वाक्यं इत्युक्तं जैमिनितन्त्रे। तथा सार्थकं भवितुमर्हति॥

न च—स्वेनैव क्षीरपदमत्यन्तरूढं प्रयुज्य रूढिशक्तिं परित्यक्तुं व्याख्याऽन्तरं कृतम्, एवं न कुत्रापि दृष्टं इति—वाच्यम्। काशीखण्डे—

अरुन्धतीं ध्रुवं चैव तथा सप्तर्षिमण्डलम्।
आसन्नमृत्युर्नो पश्येत् . . . .॥

इति प्रथममुक्त्वा "अरुन्धती नासिकाग्रं" इत्यादिना स्वेनैव व्याख्यातम्। एवं शतशः सन्ति, परं तु प्रयोजनाभावात् अधिकं न लिखितम्॥

अस्मिन् वचने चतुर्थचरणे "आसवं तण्डुलोद्भवं" इत्यत्र तण्डुलोद्भवमिति पिष्टोद्भवस्यापि उपलक्षकं वृहद्वामकेश्वरतन्त्रे—

क्षीरमाज्यं मधु तथा ह्यासवं च महेश्वरि।
वृक्षत्वक्पुष्पपिष्टोत्थं क्रमात् ज्ञेयं विचक्षणैः॥

इत्यत्र पैष्टेऽपि आसवसङ्केतस्य कृतत्वात्। एतेन परमते दण्डप्रक्षेपात्मको हेतुः क्षीरवृक्षपदादेः वैपरीत्येन प्रयोगापत्तेः इति, तत्साधकतया अनुवाद्यमनुक्त्वेति, लेखः, स सर्वोऽपि पराहतः, अर्थविशेषतात्पर्यग्राहकत्वेन वर्णनेन अत्र उद्देश्यविधेयभावगन्धस्याप्यभावात्। अत एव नामधेयपादे "उद्भिदा यजेत" इत्यत्र नामधेयस्याविधेयतया न स्वतः धर्मे प्रामाण्यम्, किंतु ऋत्विजां प्रयोगविधिस्मारकतया तद्द्वारेति स्थितमाकरे॥

अस्तु वा परप्रीतये अशास्त्रीयः वृक्षसमुद्भूतमुद्दिश्य क्षीरसंज्ञा विधीयते इत्यङ्गीकारः। तथाऽपि परप्रक्षिप्तदण्डः अस्मिन्मते असह्यः। यद्यत् प्रथमनिर्दिष्टं इति व्याप्तिसिद्धमूलो हि दण्डप्रक्षेपः, स त्वसिद्धः, "दध्ना जुहोति", "ये यजमानास्त

ऋत्विजः", "वायव्यं श्वेतमालभेत भूतिकामः", इत्यादौ शतशो व्यभिचारात् । तर्ह्यनुवाद्यमनुक्त्वेति प्रामाणिकोक्तेः का गतिरिति चेत्, असति बाधके प्रथमनिर्दिष्टमुद्देश्यं प्रायेण भवतीति तस्याभिप्रायः । प्रकृते क्षीरमुद्दिश्य वृक्षसमुद्भूतत्वविधाने वैय्यर्थ्यमेव बाधकम् । इदं कथं न ज्ञातं परेण । एवं "आसवं तण्डुलोद्भवं" इत्यत्र तण्डुलोद्भवशब्दस्य ओदनमर्थं ब्रुवन् तत्साधकतया "आमं शूद्रस्य पक्वान्नं" इति च लिखन् बालानामप्युपहास्यो बभूव । एतेन लघुस्तवरत्नस्य साधकत्वलेखो दूरीकृतः, क्षीरादीनां साङ्केतिकशब्दानां तत्र गृहीतत्वात् । यत्तु शुक्रशापविमोचनलिङ्गापेक्षया "ब्राह्मणो मदिरां दत्वा" इति प्रत्यक्षश्रुतेः प्राबल्यमिति कथनं, तदपि तुच्छम् । न हि "ब्राह्मणो मदिरां दत्वा ब्राह्मण्यादेव हीयते" इत्यत्र निषेधार्थे नञ् श्रुतिः विधिप्रत्ययरूपाऽस्ति । किं तु मदिरादाननिन्दया कल्प्यो विधिः । इत्थं च तस्य प्रत्यक्षश्रुतित्वं ब्रुवन् विद्वत्समाजे किमुत्तरं वदेदिति न विद्मः । इत्थं च शुक्रशापविमोचनसहितस्य "सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम्" इति कुलाचारस्थप्रत्यक्षस्वलिखितवचनस्य गतिं अकल्पयित्वा मुखेन ब्राह्मणेतरपरमिति प्रतिज्ञामात्रेण [1]परेषां मोहमुत्पादयन् तान्त्रिकबहिष्कृतो मन्तव्यः ॥

इत्थं च वचनानामियं व्यवस्था—'द्रव्येण सात्विकेन' इत्यत्र 'क्षीरेण ब्राह्मणैस्तर्प्या' इत्यस्य लघुस्तवस्थमहाकालसंहितावचनस्य व्यवस्था दर्शिता । तथा च यच्च भैरवीतन्त्रवचनं 'क्षीरेण ब्राह्मणैस्तर्प्या' इति, यच्च बृहद्वामकेश्वरतन्त्रे "क्रमेण ब्राह्मणाद्यैस्तु क्षीराज्य[2]माक्षिकासवैः" इति, यच्च लघुस्तववचनं, तेषां सामान्यरूपत्वात् यामळवचने "सत्ये क्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टजैः" इत्यत्रोपसंहारः । इत्थं च क्षीरादीनां भैरव्यादितन्त्रैः अविशेषेण सदा प्राप्तौ कालविशेषे कर्तृविशेषे क्षीरादिद्रव्यविशेष इति संकोचसंपादकं यामळवचनम् । यत्तु ज्ञानार्णवस्थं "द्रव्येण सात्त्विकेनैव ब्राह्मणः पूजयेच्छिवाम्" इति, "ऐक्षवक्षौद्रजातायाः" सात्त्विकद्रव्यस्य क्षीरपदवाच्यतया यामळवचनेन संकोचासंभवात् युगचतुष्टये प्राप्नुवद्ब्राह्मणकर्तृकप्रयोगे विकल्पः प्राप्नोति । एवं "राजसी नृपवैश्ययोः" इत्यनेन क्षत्रियवैश्यकर्तृकप्रयोगे

मधूककुसुमद्राक्षातालवृक्षादिसंभवा । माध्वीति कीर्तिता तज्ज्ञैः राजसी ॥

[1] सर्वेषां—श्री.

[2] मधुपिष्टजैः—श्री,

इति विवरणेन उक्तद्रव्यप्रकृतिकद्रव्यस्य सदा प्राप्तौ उक्तानाममीषां संघाते क्षीरादिसंज्ञाया अप्रवृत्तेः संभवत्क्षत्रियस्य वल्कलप्रकृतिकद्रव्यस्य कृतयुगे प्राप्तौ एतद्[?]द्राक्षादिप्रकृतिकस्यापि प्राप्तौ विकल्पः। शूद्रस्य वचनद्वये एकरूपत्वात् कृते न विकल्पः। एवं त्रेताऽऽदिषु यथायथं स्वयमूह्यम्। कलियुगे ब्राह्मणस्य ज्ञानार्णवत्रिपुरार्णववचनाभ्यां ऐक्षवमधुप्रकृतिकं प्राप्तं "पूजनीया कलौ सर्ववर्णैः केवलमासवैः" इति। एवं सति—

> कृते तु शूद्रैः संपूज्या प्रत्यक्षैरासवैः प्रिये।
> त्रेतायां वैश्यशूद्राभ्यां नृपाद्यैः द्वापरे युगे।
> कलौ युगे महादेवि ब्राह्मणाद्यैः प्रपूजिता॥

इति रहस्यार्णववचनं यद्युपतिष्ठते तदा कृतेतरवचनैः द्रव्येतरविशेषः सर्ववर्णेषु प्राप्तः, रहस्यार्णववचनेन शूद्रातिरिक्ते परिसंख्याऽपि प्राप्ता, तथा सति कृते त्रैवर्णिके विकल्पः प्रत्यक्षस्य द्रव्यस्य। यद्वा—रहस्यार्णवेऽपि कृतयुगसंबन्धिशूद्रकर्तृकप्रयोगे प्रत्यक्षासवं तण्डुलप्रकृतिकं विधीयते। तेन तन्त्रान्तरेण शूद्रस्य आसवप्राप्तौ वैयर्थ्यभिया परिसंख्यात्वकल्पनं अश्रद्धेयम्। तथा सति ब्राह्मणादिकर्तृकप्रयोगे द्रव्यस्य आकाङ्क्षितत्वात् अन्यस्मात् तन्त्रात् क्षीरादिकं ग्राह्यम्। न विकल्पः। एवमेव त्रेतायां रहस्यार्णववचनं शूद्रवैश्ययोरासवं विदधाति। तथा सति वैश्यस्य अनेन आसवं प्राप्तम्। यामळवचनेन घृतं प्राप्तम्। अत्र विकल्पः। एवं द्वापरे वैश्यक्षत्रिययोः आसवमधुविकल्पः उक्तवचनद्वयेन। कलियुगे तु उभयोः एकरूपतया विरोधाभावात् अविचार एव। युक्तश्चायमेव पक्षः, न परिसङ्ख्यापक्षः। इत्थं च "यत्रावश्यं विनिर्दिष्टं" इति कुलचूडामणिवचनं तस्मिन् 'मुख्यालाभे' इति पूरणीयम्। मुख्यालाभे ब्राह्मणेन तत्स्थाने ताम्रपात्रे मधु योजयेत् इति तदर्थः। एवं सति "ताम्रे गव्यं तथा मधु। राजन्यवैश्ययोरेवं न द्विजस्य कदाचन" इति महाकालसंहितावचनेन विरुध्यते। तथा तुल्यबलत्वाद्विकल्पो न परिहार्यः परमतेऽपि॥

यदपि [1]हंसमाहेश्वरतन्त्रवचनं "ब्राह्मणो मदिरां दत्वा ब्राह्मण्यादेव हीयते" इति तत् यदि तत्तन्त्रे क्षत्रियादीनां कुलद्रव्यविधिसमीपे स्यात् तर्हि तच्छेषोऽर्थवादः "अपशवो वा अन्ये गो अश्वेभ्यः" इतिवत्। यदि तत्समीपे न स्यात् तर्हि

[1] हंसपारमेश्वर—व१.

अजितेन्द्रियब्राह्मणपरम्, तस्य द्रव्यदाननिषेधस्याग्रे वक्ष्यमाणत्वात्। यच्च कुलार्णववचनम् “ब्राह्मणैस्तु सदाऽपेयं” इति तत्र अकारप्रश्लेषं कृत्वा योऽयं ब्राह्मणानां निषेधः कृतः स पुमर्थपर इति पराभिप्रायः । क्षत्रियस्य संग्रामकाले, विकलस्य संग्रामासंभवात् इत्यादिनिषेधहेतुलेखात् । स चास्माकमिष्ट एव । क्रत्वर्थातिरिक्तद्रव्यस्वीकारो ब्राह्मणस्य नास्तीति वयमपि ब्रूमः । यश्च हरिनाथोक्तः सौत्रामण्यां कलौ सुराग्रहनिषेधः सोऽप्यस्माकमनुमतः । न तावता कुलाचारेऽपि निषेधः संभवति । कलियुगसंबन्धिसौत्रामणिग्रहत्वं सुरानिषेधोद्देश्यताऽवच्छेदकं, तदनाक्रान्तत्वात् कुलाचारस्य कैमुतिकन्यायप्रवेशे अतिप्रसङ्गात् । तस्मात् परोक्तानां ब्राह्मणविषये बाधकानां गन्धस्याप्यभावेन साधकसन्दर्भस्य दर्शितत्वेन तन्त्रप्रामाण्यमङ्गीकुर्वतः ब्राह्मणादिकर्तृकपूजायां प्रथमादरः शास्त्रप्राप्तः । स तु ब्राह्मणाऽपि त्यक्तुमशक्यः । इत्थं च—

विना द्रव्याधिवासेन न स्मरेन्न जपेत् प्रियं ।
स्मरन्ति महादेवि तेषां दुःखं पदे पदे ॥
नासवेन विना मन्त्रं न मन्त्रेण विनाऽऽसवम् ॥

इति कुलार्णवे,

विनाऽलिपिशिताभ्यां च पूजनं निष्फलं भवेत् ।

इति समयाचारे,

विना हेतुकमास्वाद्य क्षोभयुक्तो महेश्वरि ।
न पूजां न जपं कुर्यान्न ध्यानं नच चिन्तनम् ॥

इति भावचूडामणौ,

विनाऽलिपिशिताभ्यां च यः कुर्यात् पूजनं मम ।
दुःख[1]सन्धाकरो भूत्वा योगिनीनां पशुर्भवेत् ॥

इति कालिकापुराणे

यः कुर्यादादिमद्रव्यविहीनं तव पूजनम् ।
तव क्रोधेन दग्धः सन् भस्मीभवति नान्यथा ॥

[1] संपादको—श्री.

इति समयाङ्कमातृकायां स्थितम्—ईदृशानि वचनान्यनुगृहीतानि भवन्ति । एवं च ब्राह्मणेतरपरमित्यत्यन्तमशुद्धमिति अकृत्रिमया स्वमत्या विचार्यमाणे प्रतिभाति । इतोऽधिकं निर्मत्सराः पण्डिताः विचारयन्तु । "इमां विज्ञाय सुधिया मदन्ति" इति त्रिपुरोपनिषत्सप्तममन्त्रभाष्येऽप्येवमेव स्थितम् ॥

यत्तु सौभाग्यानन्दसन्दोहे अस्मद्व्यवस्थापितार्थमेव प्रतिज्ञाय वैदिकमन्त्रैरभिमन्त्रणस्य विहितत्वात् शूद्रपूजापरत्वे तत्र तस्यानवकाशाद्विधेरनवकाशापत्तिहेतुना ब्राह्मणाधिकारः साधितः, स तु अतिशिथिलः । "वर्षासु रथकार आदधीत" इत्यत्र रूढिशक्त्या योगं बाधित्वा सङ्करजातेराधानाधिकारसिद्धौ तदनन्तरं तदुपयुक्तवेदाध्ययनमपि कल्प्यत इति षाष्ठन्यायेन शूद्रस्य युक्त्या अधिकारसिद्धौ वेदमन्त्रपाठे यावदुपयुक्ते अधिकारस्यानिवार्यत्वेन अनेन हेतुना स्वेप्सितासिद्धेः ॥

एतावत्पर्यन्तं ब्राह्मणे अधिकारव्यवस्था कृता । व्यवस्थितोऽप्ययमधिकारो न सर्वस्य, किं तु जितेन्द्रियस्य कामादिरहितस्यैव । अत एव परमानन्दतन्त्रे—

अयं तु परमः कौळमार्गः सम्यङ्महेश्वरि ।
असिधाराव्रतसमो मनोनिग्रहहेतुकः ॥
स्थिरचित्तस्य सुलभः सफलस्तूर्णसिद्धिदः ।
अन्यस्य विफलो दुःखहेतुः स्यात् परमेश्वरि ॥ इति ॥

त्रिपुरार्णवेऽपि—

अयं सर्वोत्तमो धर्मः शिवोक्तः सुखसिद्धिदः ।
जितेन्द्रियस्य सुलभो नान्यस्यानन्तजन्मभिः ॥
यदूर्ध्वरेतसां सर्वत्यागिनामनिकेतिनाम् ।
क्षणेन स्मृतमात्रेण मोहमुत्पादयत्यलम् ॥
तदेवात्र हि संसिद्धौ कारणं सर्वमीरितम् ।
इतो मद्यमितो मांसं भक्ष्यमुच्चावचं तथा ॥
तरुण्यश्चारुवेषाढ्या मदघूर्णितलोचनाः ।
तत्र संयतचित्तत्वं सर्वथा ह्यतिदुष्करम् ॥
भक्तिश्रद्धाविहीनस्य कथं स्यादेतदीश्वरि ॥ इति ॥

भावचूडामणौ—

तन्त्राणामतिगूढत्वात्तद्भावोऽप्यतिगोपितः ।
ब्राह्मणो वेदशास्त्रार्थतत्त्वज्ञो बुद्धिमान् वशी ॥
गूढतन्त्रार्थभावस्य निर्मन्थ्योद्धरणक्षमः ।
कौळमार्गेऽधिकारी स्यादितरो दुःखभाक् भवेत् ॥ इति ॥

कुलार्णवे—

अहो भुक्तं तु यन्मद्यं मोहयेत् त्रिदशानपि ।
तन्मैरेयं शिवं पीत्वा यो न विक्रियते नरः ॥
जपन् शिवपरो भूत्वा स मुक्तः स च कौलिकः ॥ इति ॥

भगवता परशुरामेणापि कौलाचारे मुख्यधर्मत्वेन "कामक्रोधलोभमोहमदमात्सर्याविहितहिंसास्तेयलोकविरुद्धलोकविद्विष्टवर्जनं" इति प्रतिपादितम् । तेन यथा आज्यावेक्षणाद्यङ्गानुसारेण चक्षुष्मत एव दर्शपूर्णमासयोरधिकारः नान्धानां, तथा कामक्रोधादिवर्जनाद्यङ्गानुसारेण जितेन्द्रियस्यैव अधिकारो नान्यस्येति सूत्रकृदभिप्रायः । एवमन्येष्वपि तन्त्रेषु बहूनि वचनान्युपलभ्यन्ते । तानि अनतिप्रयोजनत्वात् ग्रन्थविस्तरभयाच्च न लिखितानि ॥

संप्रति इदानींतनाः अजितेन्द्रियाः चपलजिह्वाः शिश्नोदरपरायणाः रागान्धतया आरोपितकौलिकताकाः केवलद्रव्यमात्रलोलुपाः लिखितवचनान्यनादृत्य स्वाधिकारमविचार्यैव स्वाभिप्रायसाधनानि "पीत्वा पीत्वा पुनः पीत्वा" इति, "आगळान्तं पिबेत् द्रव्यं" इत्यादिकुलार्णववचनान्येव पुरस्कृत्य तदभिप्रायमजानन्तो जानन्तो वा धूर्ताः सन्तः यथेच्छाऽऽचारं कुर्वन्ति । इहामुत्र न कुत्रापि शर्म लभन्ते । प्रत्युत महापातकजनितयातनां श्रीधर्मराजशासनात् लभन्त एव । नात्र सन्देहः । तादृशाः पतिताः, तन्त्रगोष्ठीषु न स्मर्तव्याः । अत एवैतादृशकौलिकानामुपहासोऽपि विस्तरेण कृतः प्रबोधचन्द्रोदये । तस्मात् जितेन्द्रियाणां भक्तिश्रद्धावतां विदुषां आरम्भे प्रतिपादितभक्तिभूमिकामारूढानामेव अत्राधिकारः, अन्येषां पतनायैव इत्यलं विस्तरेण । उक्ताधिकारिभिन्नानां विष्ण्वाद्युपासनं केवलवैदिकमार्गेणेति तत्त्वम् ॥

दक्षिणवामाचारविवेकः

अजितेन्द्रियैः कुलमार्गं प्रविश्य केवलोदकादिना पूजा कार्या । अयं दक्षिणो मार्गः । जितेन्द्रियैः प्रोक्तद्रव्येण सपर्याऽनुष्ठेया । अयं वामाचार इति कश्चित् । तत्तुच्छम्, वामाचारपदार्थस्यैव तेनाज्ञातत्वात् । तथा च त्रिकूटारहस्ये——

वामाचारं प्रवक्ष्यामि श्रीविद्यासाधनं प्रिये ।
यं विधाय कलौ शीघ्रं मान्त्रिकः सिद्धिभाक् भवेत् ॥
माला नृदन्तसंभूता पात्रं मानुषमुण्डकम् ।
आसनं सिंहचर्मादि कङ्कणं स्त्रीकचोद्भवम् ॥

इत्याद्युपक्रम्य विस्तरेण वर्णितम् । तन्मध्ये मुख्यद्रव्यनामापि नास्ति । तद्विस्तरस्तु "सव्यापसव्यमार्गस्था" इति ललितानामव्याख्यानावसरे अस्मत्परमेष्ठिगुरुभिः विस्तरेण प्रपञ्चितः । विशेषजिज्ञासुभिः ततोऽवगन्तव्यम् । तथा कालिकापुराणादपि । ग्रन्थविस्तरभयान्नेह तनोमि ॥

अजितेन्द्रियस्य कौलमार्गे अनधिकारः

यदपि परमानन्दतन्त्रटिप्पण्यां अजितेन्द्रियाणां गन्धोदकेन पूजनमुक्तम्; तदसत्, "मुख्यालाभे चानुकल्पो नान्यथा तु कदाचन" इति परमानन्दतन्त्रे विंशोल्लासवचनविरोधात्, मुख्येऽनधिकृतस्य प्रतिनिधावधिकारस्य शशविषाण-तुल्यत्वात् । तस्मादजितेन्द्रियाणां आपाततः उपासनेच्छायां अन्यमार्गेण अन्यदेवतोपासनं कृत्वा तेन परिपक्वान्तःकरणं दृढं विदित्वा पश्चात् कौळमाश्रयेत् । तदुक्तं कुलसारे—

अन्यासां देवतानां तु भूयोभूयो निषेवणात् ।
परिपक्वमनाः कौले लब्धप्रामाण्यको नरः ।
बाह्येन्द्रियाणि संयम्य प्रविशेदत्र नेतरः ॥ इति ॥

ब्रह्माण्डपुराणेऽपि—

यस्यान्यदेवतानामकीर्तनं जन्मकोटिषु ।
तस्यैव भवति श्रद्धा श्रीदेवीनामकीर्तने ।

चरमे जन्मनि यथा श्रीविद्योपासको भवेत् ।
नामसाहस्रपाठश्च तथा चरमजन्मनि ॥ इति ॥

यामलेऽपि—

श्रुतिस्मृतिप्रोक्तकर्मानुष्ठानाद्बहुजन्मसु ।
शोधितं च मनो ज्ञात्वा श्रीविद्योपासको भवेत् ॥ इति ॥

फेट्कारीतन्त्रेऽपि—

सर्वथा गोपनीयेयं विद्या स्यादजितेन्द्रिये ।
तेन वीर्यवती विद्या न विद्या स्यात् प्रकाशतः ॥
कुलपुष्पं कुलद्रव्यं कुलपूजां कुलं जपम् ।
नेदृशानां प्रवक्तव्यं यदीच्छेत् [1]प्रियमात्मनः ॥ इति ॥

अजितेन्द्रिये प्रवचनमपि निषिध्यते । किमु वक्तव्यं स्वीकारे । तस्मादजितेन्द्रियस्य कौळमार्गे नास्त्यधिकार इत्यलमतिविस्तरेण ॥ ३१ ॥

एतदर्घ्यशोधनमिति शिवम् ॥ ३१ ॥

इति . . . कल्पसूत्रे श्रीक्रमो नाम तृतीयः खण्डः

एतत् सामान्यार्घ्यशोधनोत्तरं 'तज्जलेन' इति मण्डलादिकरणमुक्तम्, तदारभ्य 'कुण्डलिन्यां जुहुयात्' इत्यन्तं कर्म अर्घ्यशोधनं अर्घ्यसंस्कारः । यद्यपि पूर्वोक्तसूत्रे कर्मकलापविधानादेव अर्घ्यसंस्कार इति ज्ञातुं शक्यते; तथाऽपि शापविमोचनादिकतिपयसंस्कार· पात्रान्तराणि च भ्रान्त्या केचन स्वीकुर्युः, तन्माभूत् इत्येतदर्थं परशुरामः परमकारुणिको भ्रान्तिनिरासाय इदं सूत्रं प्रणिनाय । एतत् उक्तं यत् तावदेव शोधनं नान्यदित्यर्थः । शिवमित्यनेन अर्घ्यप्रकरणसमाप्तिः सूचिता ॥

विशेषार्घ्यशोधने निबन्धे मण्डलपूजायां विधया मध्यपूजनं सूत्रे उक्तं तत्त्यक्तम् । अनुक्तं तुरीयस्वरलेखनं ह्रीं महालक्ष्मीश्वरीति मन्त्रं सुधादेवीपूजनादि

[1] सिद्धि—श्री.

गालिन्याः पुष्पं दत्वेत्यन्तं अनुक्तं संगृहीतम् । अत्र प्रमाणाभावात् केवलतद्बुद्ध्या रचितमसंग्राह्यम् ॥ ३२ ॥

इति . . . कल्पसूत्रवृत्तौ श्रीक्रमो नाम तृतीयः खण्डः ॥

चतुर्थः खण्डः—ललिताक्रमः

श्रीचक्रे परचित्यावाहनम्

हृदि स्थिताया देवतायाः श्रीचक्रे आवाहनप्रकारं दर्शयितुमुपक्रमते—

अथ हृच्चक्रस्थितामन्तस्सुषुम्नापद्माटवीनिर्भेदनकुशलां निरस्तमोहतिमिरां शिवदीपदीप्तिमाद्यां संविदं वहन्नासापुटेन निर्गमय्य लीलाऽऽकलितवपुषं तां त्रिखण्डमुद्राशिखण्डे कुसुमाञ्जलौ हस्ते समानीय ॥ १ ॥

अथेति क्रमविशेषद्योतकं, "अथ जिह्वाया अथ वक्षसः" इतिवत् । यद्वा—पूर्वप्रकरणविच्छेदद्योतकम् । हृच्चक्रं अनाहतं, तदेव दह्रमित्यपि व्यवह्रियते । तत्र स्थितां । शास्त्रे देवतानिवासस्थानं तदेव प्रसिद्धम् । तथा च श्रुतिः—"तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्" इति । स्कान्दपुराणेऽपि—"हृत्पुण्डरीकान्तरसन्निविष्टम्" इति । अतो देवताया निवासस्थानं हृच्चक्रम् । तत्र स्थिताया बाह्योपचारपूजनं न संभवति । अतः तत्र स्थानाद्बहिरानयनार्थं सार्वकालिकं स्थानं ज्ञापयितुमिदं विशेषणं ज्ञेयम् । सुषुम्नाऽपि मूलाधारादिब्रह्मरन्ध्रस्थसरोरुहान्तानां कमलानां गुंफनाधारभूतदण्डाकृतिरेको नाडीविशेषः । तदुक्तं विष्णुपुराणे—

मूलादिदेहचक्राणामाधाराऽसौ प्रकीर्तिता ।
या सुषुम्नेति सर्वत्र गीयते परमर्षिभिः ॥

इति । तस्यां यानि पद्मानि विशुद्ध्यादीनि तेषां अटवी दुर्गमं वर्त्म तस्य निर्भेदनं गमनागमनानुकूलवर्त्मसंपादनं तद्विषये कुशलाम् । अनेन विशेषणेन हृदयात् श्रीचक्रादौ आगमने पूजाऽनन्तरं पुनर्गमने प्रयासाभावः सूचितः । निरस्तेति—निरस्तः दूरीकृतः मोहोऽज्ञानं तदेव तिमिरं यया ताम् । एतद्विशेषणार्थं दृढीकर्तुं विशेषणान्तरमाह—शिवेति । शिवात्मको यो दीपः तस्य दीप्तिं प्रकाशरूपाम् । एतेन प्रकाशरूपत्वकथनेन पूर्वविशेषणेन प्रतिपादितं अज्ञानतिमिरनाशनं सूपपादमिति ध्वनितम् । किं च—यथा दीपप्रभयोरविनाभावसंबन्धः एवं शिवशक्त्योरप्यविनाभावः सूचितः । अयमेवार्थः स्पष्टमुक्तो ब्रह्माण्डपुराणे—

> त्रिकोणरूपिणी शक्तिः बिन्दुरूपः परः शिवः ।
> अविनाभावसंबन्धः तस्माद्बिन्दुत्रिकोणयोः ॥ इति ॥

श्रीदेवीभागवतेऽपि—

> यस्मिन् धर्मिणि यो धर्मोऽविनाभूतश्च तिष्ठति ।
> स धर्मी शिवरूपः स्याद्धर्मश्शक्तिस्वरूपधृक् ॥ इति ॥

अनयोर्वस्तुनोरौपाधिको भेदो न वास्तव इति तत्त्वनिरूपणे प्रपञ्चितं प्रागेव । आद्यां संविदं अपरिच्छिन्नसंविदं वहन् नासापुटेन, येन नासापुटेन अप्रयत्नेन श्वासो निर्गच्छति तेन मार्गेण निर्गमय्य, यथा निर्गमनं भवेत् तदनुकूलव्यापारं कुर्यात् । अत्र तादृशो व्यापारः हृदयस्थानात् उक्तमार्गेण निर्गमनभावनमेव । तदनन्तरव्यापारं विधत्ते—लीलेति । लीलया स्वेच्छामात्रेण आकलितं स्वीकृतं वपुः ध्यानश्लोकोक्तं यया । एतेन इतरशरीरवत् गर्भवासेन विना भक्तानुग्रहाय स्वीकृतमनोहरवपुष्ट्वं सूचितम् । उक्तं च गीतायाम्—

> यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
> अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ इति ॥

मार्कण्डेयपुराणेऽपि—

> एवं यदा यदा बाधा दानवोत्था भविष्यति ।
> तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥ इति ॥

तां अङ्गीकृतवपुषं त्रिखण्डमुद्रा त्रिखण्डा त्रीन् जन्ममृत्युजराः, यद्वा सत्वरजस्तमोगुणान्, खण्डयतीति त्रिखण्डा केवलमोक्षप्रदेत्यर्थः। यद्वा—त्रीणि खण्डानि कलाः इच्छाज्ञानक्रियाऽऽत्मिकाः तत्स्वरूपा त्रिखण्डा। तदुक्तं योगिनीतन्त्रे—

मुद्राऽऽख्या सा यदा संविदम्बिका त्रिकलामयी।
त्रिखण्डारूपमापन्ना सदा सन्निधिकारिणी।
सर्वस्य चक्रराजस्य व्यापिका परिकीर्तिता॥ इति॥

मुद्राशब्दार्थश्च विश्वस्य मोदनात् द्रावणाच्च मुद्रा। तदुक्तं योगिनीतन्त्रे—

चिदात्मभित्तौ विश्वस्य प्रकाशामर्शने यदा।
करोति स्वेच्छया पूर्णविचिकीर्षासमन्विता॥
क्रियाशक्तिस्तु विश्वस्य मोदनाद् द्रावणात्तथा।
मुद्रेति कथिता देवी ....॥ इति॥

अस्यार्थः—यदा चिच्छक्तिः स्वात्माभिन्नायां भित्तौ स्वेच्छया ईक्षणानन्तरं विकारान् पूर्णानिच्छन्ती प्रकाशामर्शने करोति। अयं भावः—जगतः षड्भावविकाराः अस्ति जायते वर्धते विपरिणमते अपक्षीयते नश्यति इति। तेषु द्वितीयो विकारः प्रकाशः, स्फुटीभाव इति तल्लक्षणात्। तृतीयो विकारः आमर्शनं, इदंतया हृदयंगमीभाव इति तल्लक्षणात्। इत्थं च त्रिपुरसुन्दर्याः स्वान्तस्स्थितसृष्टिसत्तापर्यालोचनोत्तरं विश्वस्य द्वितीयादिविकारविषयिणी इच्छोत्पद्यते। सेयं विचिकीर्षा। ततो विश्वस्य उत्पत्त्यभिवृद्धी क्रमेण करोति। ते एवैते पूर्वोक्तप्रकाशविमर्शने ईदृशेच्छाकृतिविशिष्टचित् क्रियाशक्तिरित्युच्यते। इयं क्रियाशक्तिः त्रिपुरसुन्दर्या क्रियमाणोत्पत्त्यभिवृद्धी अनुमोदते द्रावयति चेति मुद्रा सा। अनुमोदनं नाम स्वभिन्नकर्तृकक्रियाऽनुकूल्यम्। द्रावणं नाम घनस्य सङ्कुचितस्य प्रशिथिलावयवताऽऽपादनात्मकः प्रसरः। ईदृशक्रियाशक्तिरेव स्ववृत्तिमुद्रात्वसामानाधिकरण्येन ईक्षणादेर्मेलनेन त्रिकलामयी त्रिखण्डा भवति इति परमरहस्यार्थः। अतः सर्वश्रेष्ठेयं व्यापिका मुद्रेति तस्या आवाहने विनियोगः कृतः। एतादृशी या मुद्रा तस्या अदृष्टस्वरूपं प्रतिपादितम्। दृष्टस्वरूपं तु अङ्गुलीप्रग्रथनरूपं नानाविधं तन्त्रभेदेन दृश्यते। अस्मिन् न दृश्यते। अतो गुरुसंप्रदायावगतं तन्त्रार्थं चैकीकृत्याग्रे स्पष्टीक्रियते। ईदृशं यत्त्रिखण्डात्मकं

बाह्यस्वरूपं तेन शिखण्डिते ग्रथिते कुसुमयुक्ता अञ्जलिः यस्मिन् तस्मिन् हस्ते समानीय गृहीत्वा ॥ १ ॥

मायालक्ष्मीपरा उच्चार्य देवीनाम चामृतचैतन्य-मूर्तिं कल्पयामि नमः इति कल्पयित्वा ॥ २ ॥

माया ह्रीं, श्रीं इति लक्ष्मीशब्दार्थः, परा सौः । एतद्विषये प्रमाणानि पूर्वमेव दर्शितानि । एवं बीजत्रयमुच्चार्य देवीनाम शक्तिचक्रैकनायिकायाः ललितायाः इति षष्ठ्यन्तं, योग्यत्वात् । ततो नमोऽन्तमविकृतं पठेत् । एवं च आदौ साधारणपरिभाषाप्राप्ता त्रितारी ऐं ह्रीं श्रीं ह्रीं श्रीं सौः शक्तिचक्रैकनायिकायाः ललितायाः अमृतचैतन्यमूर्तिं कल्पयामि नमः इति त्रयस्त्रिंशद्वर्णो मन्त्रः । अनेन परदेवताया मूर्तिं कल्पयित्वा भावयित्वा ॥

अत्र पूर्वसूत्रे लीलाऽऽकलितवपुषः हस्ते आगतायाः पुनर्मूर्तिकल्पने वैय्यर्थ्यादतः प्रबलेनार्थक्रमेण पाठक्रमबाधः । तथाचायं क्रमः—प्रथमं केवलचितो मूर्तिकल्पनमनेन मन्त्रेण ततो मूर्तेः कल्पितायाः नासापुटमार्गेण निर्गमनं ततो हस्ते कुसुमगर्भेऽञ्जलौ समानयनमिति विवेकः ॥ २ ॥

हसरयुजं वाचं हसयुक्तां कलरीं हसरचतुर्दश-षोडशानप्युच्चार्य,

महापद्मवनान्तःस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

इति बैन्दवचक्रे पराचितिमावाह्य ॥ ३ ॥

पूर्वं न्यासप्रकरणे उक्तेन समुदायग्रहण इति न्यायेन हसेत्यादिषु केवलव्यञ्जनमात्रग्रहणं, संप्रदायात् । हश्च सश्च रश्च तैर्युतं वाचं ह्स्रैं इति । हश्च सश्च आभ्यां युक्तोऽयं ककारलकाररेफेकारबिन्दुसमुदायः ह्स्क्लरीं इति । तथा हश्च सश्च रश्च चतुर्दश औकारः स च षोडशो विसर्गः स च हसरचतुर्दशषोडशाः, ह्स्रौः

इति एतानुच्चार्य, परमेश्वरीत्यन्तं यथाश्रुतं पठित्वा, बिन्दुचक्रे परचितिमावाहयेत्। मन्त्रस्वरूपं तु प्रथमं त्रितारी ह्स्रैं ह्स्क्ल्रीं ह्स्रौः—

महापद्मवनान्तःस्थे कारणानन्दविग्रहे।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

इत्यष्टत्रिंशद्वर्णो मन्त्रः। महापद्मवनस्य योऽन्तःप्रदेशः तत्रस्थे। महापद्मस्वरूपमुक्तं ब्रह्माण्डपुराणे—

पद्माटवीस्थलं वक्ष्ये सावधानो मुने शृणु।
समे सुरत्नखचिते तत्र षड्योजनान्तरे।
परितः स्थलपद्मानि महाकाण्डानि सन्ति वै ॥

सेतुबन्धे तु—"महापद्मवनं सहस्रदळकमलसमुदायः" इत्युक्तम्। कारणानन्दः अपरिच्छिन्नानन्दः स एव विग्रहो यस्याः। यद्वा—कारणं प्रथमं, तस्मिन् जातः कारणः "तत्र जातः" इत्यण्। स चासावानन्दश्चेति। शेषं पूर्ववत्। शेषं स्पष्टम्। यद्वा—चैतन्यमहसो बहिर्निस्सारणं कृत्वा मन्त्रेण परिच्छिन्नां मूर्तिं कल्पयित्वा हस्ते समानीय मन्त्रेण पीठनिवेशनान्तं आवाहनपदार्थः, अवदानादिप्रदानान्तस्यैव बह्वीनां क्रियाणां एकपदार्थत्वे बाधकाभावात्। तेन यत्र दीक्षाऽऽदौ नानादेवतानां तन्त्रेण पूजनं तत्र समुदायस्यैकपदार्थत्वात् काण्डानुसमयः तावता सिद्धः। एतादृशावाहनैकदेशपीठनिवेशने साधनीभूतोऽयं मन्त्रः ॥

निबन्धकारस्तु ज्ञानार्णवोक्तं अन्तर्यागक्रमं आवाहनादिमुद्राश्च दर्शयामास। तदनादरणीयं, प्रमाणाभावात् ॥ ३ ॥

चतुष्षष्ट्युपचारविधिः

चतुष्षष्ट्युपचारान् कुर्यात्। सर्वे उपचारमन्त्राः त्रितारीपूर्वाः कल्पयामि नम इत्यन्ताः कर्तव्याः ॥ ४ ॥

चतुष्षष्टीत्यनेन एतत्तन्त्रानुयायिनां तन्त्रान्तरोक्तषोडशाद्यन्यतमपूजाव्यावृत्तिः ॥ ननु किमयं परिसंख्याविधिः उत नियमविधिः उत अपूर्वविधिः। नाद्यः,

केनापि प्रमाणेन नित्यमप्राप्तेः । पक्षेऽपि प्राप्त्यभावेन न द्वितीयः । तर्हि तृतीयः स्यादिति चेदिष्टापत्तिः । तथाऽपि सर्वांशे नापूर्वविधिः, उपचारांशे अपूर्वः चतुष्षष्ट्यंशे नियमः । उपचारविधौ उपचाराणामनन्तत्वेन तत्र नानासंख्याप्राप्तौ चतुष्षष्टिसंख्याया अपि पक्षे प्राप्तत्वात् । न च—एवमेकस्मिन्नियमापूर्वस्वीकारे विधिसाङ्कर्यं इति॰ वाच्यम्; इष्टापत्तेः, यदाग्नेयोऽष्टाकपाल इति वाक्ये अग्निपुरोडाशयोः पक्षे प्राप्तौ तदंशे नियमः, यागांशे अपूर्व इति दृष्टत्वात् । न च—चतुष्षष्ट्युपचारान् विधाय इत्यग्रिमसूत्रेण परिसंख्याविधिः अनेनोपचारविधिः इति वाच्यम्; तथा सति अस्मिन् सूत्रे चतुष्षष्टिपदवैय्यर्थ्यात् । न च—एवं सति चतुष्षष्टीत्यग्रिमवाक्यं व्यर्थं इति शङ्कनीयम्, चतुष्षष्ट्युपचाराननूद्य क्रमविशेषविधानात् । सर्वथा नोपचारस्य सङ्ख्याया विधायकं तत् । कुर्यादिति स्पष्टविध्यन्तं इदमेव सङ्ख्याविशिष्टोपचारविधायकम् ॥

यद्वा—पाठेनैव क्रमसिद्धौ अग्रिमेण चतुष्षष्ट्युपचारान् विधाय इत्यनेन क्रमविधानासंभवात् विहितानामेव 'इति चतुष्षष्ट्युपचारान् विधाय' इत्यनुवादकं उपसंहाररूपम् । अस्य फलं तु तन्त्रान्तरे चतुष्षष्ट्युपचारानन्तर्भूताः उक्तादन्ये केचन सन्ति, तैरर्चनं मा भूत्, किंतु प्रतिनिधिं कल्पयित्वा मन्त्रे श्रुतद्रव्यनाम्नैवार्पणमेतदर्थम् । इत्थं चोक्तोपचारादधिकैः संभवे सति पूजनं कर्तव्यम् । अत एव त्रिपुरार्णवे—

उक्तोपचारादधिकैः संभवे सति पूजयेत् ॥

इति वचनं उक्तन्यायगर्भमेव । नियमविधेरयोगव्यवच्छेदे तात्पर्यम्, नत्वन्ययोगव्यवच्छेदे । तेन चतुष्षष्ट्युपचारमध्ये एकस्याप्ययोगो मा भवत्वित्यत्रैव तात्पर्यम्, न त्वधिकव्यवच्छेदे । तस्मात् इतोऽधिकानां शिबिकागजाश्वनृत्यादीनां यावतां संभवः तावत्कल्पनं सूत्राविरुद्धं मन्तव्यम् ॥

अत्र उपचारपदार्थश्च कल्प्यमानद्रव्यजनितः सुखविशेषः तं कुर्यात् उत्पादयेत् इत्यर्थः ॥

न च नित्यतृप्तायां देवतायां कल्प्यमानद्रव्येण कीदृशी सुखोत्पत्तिः इति वाच्यम् । नित्यतृप्ते सुखोत्पत्तिः न भवतीति सत्यं, तथाऽपि परिच्छिन्नशरीरकल्पनवत्तच्छरीरे सुखकल्पनेन स्वात्मन्यदृष्टोत्पत्तिरेव, न तु कल्पितेन परदेवतायाः सुखोत्पत्तिः ।

अत एवोक्तं शिवमहिम्ने—"न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति" इति। अत एवोपचारमन्त्रे कल्पयामीत्येव क्रियापदं योजितम्। शेषं सुस्पष्टम् ॥ ४ ॥

त्रितारीमुच्चार्य पाद्यं कल्पयामि नम इति क्रमेण आभरणावरोपणं सुगन्धितैलाभ्यङ्गं मज्जनशाला-प्रवेशनं मज्जनमण्टपमणिपीठोपवेशनं दिव्यस्नानीयोद्वर्तनं उष्णोदकस्नानं कनककलशच्युतसकलतीर्थाभिषेकं धौतवस्त्रपरिमार्जनं अरुणदुकूलपरिधानं अरुण[1]कुचोत्तरीयमालेपमण्टपप्रवेशनमालेपमण्टप-मणिपीठोपवेशनं चन्दनागरुकुङ्कुम[2]संकुमृगमद-कर्पूरकस्तूरीगोरोचनादिदिव्यगन्धसर्वाङ्गीणविलेपनं केशभरस्य कालागरुधूपं मल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकुड्मलीपुन्नागकल्हारमुख्यसर्वर्तु-कुसुममालां भूषणमण्टपप्रवेशनं भूषणमण्टपमणिपीठोपवेशनं नवमणिमकुटं चन्द्रशकलं सीमन्तसिन्दूरं तिलकरत्नं कालाञ्जनं [3]पाळीयुगळं मणिकुण्डलयुगळं नासाभरणं अधरयावकं प्रथमभूषणं कनकचिन्ताकं पदकं महापदकं मुक्तावळिं एकावळिं छन्नवीरं केयूरयुगळचतुष्टयं वलयावळिं ऊर्मिकावळिं काञ्चीदाम कटिसूत्रं सौभाग्याभरणं पादकटकं रत्ननूपुरं पादाङ्गुलीयकं एककरे पाशं अन्यकरे अङ्कुशं इतरकरे पुण्ड्रेक्षुचापं अपरकरे पुष्पबाणान्

[1] दुकूलकु—श्री. [2] शिलारसमृग—श्री. [3] वाळी—श्री.

श्रीमन्माणिक्यपादुके स्वसमानवेषाभिरावरणदेवताभिः सह महाचक्राधिरोहणं कामेश्वराङ्कपर्यङ्कोपवेशनं अमृतासवचषकं आचमनीयं कर्पूरवीटिकां आनन्दोल्लासविलासहासं मङ्गळारार्तिकं छत्रं चामरयुगळं दर्पणं ताळवृन्तं गन्धं पुष्पं धूपं दीपं नैवेद्यं कल्पयामि नम इति चतुष्षष्ट्युपचारान् विधाय ॥ ५ ॥

अत्र सामान्यपरिभाषयैव त्रितारीसिद्धौ पुनर्विधानं दीपनाथमन्त्रवत् तदवयवत्वं ज्ञापयति । शेषं स्पष्टम् । मन्त्रस्य स्वरूपं तु ऐं ह्रीं श्रीं पाद्यं कल्पयामि नम इति । न ललिताया इति नामप्रवेशः, मानाभावात् ॥

निबन्धकारस्तु न्यायानभिज्ञः स्वेच्छाचारी च, तस्मात् नामप्रवेशं स्वेच्छया चक्रे । न च संप्रदानकारकस्याकाङ्क्षितत्वात् तद्वाचकपदाभावात् अबोधकत्वं स्यात् इति वाच्यम्; अध्याहारेणाकाङ्क्षाशान्तेः, अध्याहृतस्य पदस्य मन्त्रावयवत्वेन न्यायविद्भिरनङ्गीकारात्, अन्यथा "इषे त्वा छिनद्मि, ऊर्जे त्वा उन्मार्ज्मि" इति प्रयोगकाले पाठापत्तेः । अतो यावच्छ्रुतो मन्त्रः । यदि नाममन्त्रत्वं मत्वा नामप्रवेशः, तर्हि नाममन्त्रस्य नमोऽन्तत्वं चतुर्थ्यन्तत्वं लक्षणम् । अत्र द्वितीयाऽन्तकल्पयामिभ्यां मध्ये व्यवधानान्न संभवतीति तत्त्वम् । किं च सर्वत्रोपचारमन्त्राणां कल्पयामि नम इत्यनेनैव निर्वाहे त्रितारीमुच्चार्येति सूत्रं व्यर्थं सत् मन्त्रस्वरूपं प्रतिपादयति । यावदुक्तं पठनीयम् । उत्पत्तिवाक्ये ललितापदप्रयोगादिति निर्मूलललितापदप्रवेशे हेतुर्वक्तव्यः । तमजानन् केवलकाव्यपाठी निबन्धकारः सूत्रकारेण ललितापदस्य भूरिप्रयोगादिति हेतुविलेखनेन स्वीयमपाण्डित्यं प्रकाशितवान् ॥

क्रमेणेत्यनेन पाद्यमिति प्रातिपदिकस्थाने आभरणावरोपणादिपदोच्चारणं ज्ञापयति । स्नानीयोद्वर्तनं शरीरलग्नस्नेहवियोगसाधनं सुगन्धिचूर्णविशेषः । अत्र द्वितीयान्तानि सर्वाणि तत्तद्वस्तुजन्यसुखविशेषपराणि । कुचोत्तरीयं कञ्चुकम् । आलेपः सुगन्धिद्रव्यशरीरसंयोगः तज्जनको मण्टपः स्थानविशेषः । कुङ्कुमं काश्मीरम् । संकुः वृक्षविशेषः । तदुक्तं विश्वकोशे—"शङ्कुः कीले गरे शस्त्रे

सङ्ख्यापादपभेदयोः" इति सकारशकारयोर्नातिभेदात् "एकदेशविकृतमनन्यवत्" इति न्यायेन वृक्षविशेषः सुगन्धिः। मृगमदः कस्तूर्यवान्तरभेदः। यद्वा—ओतुविशेषावयवो मृगमदः महाराष्ट्रभाषया जव्वाजि इति प्रसिद्धः। कस्तूरी मृगनाभिः। आदिपदेन अन्यानि लोकप्रसिद्धानि सुगन्धिद्रव्याणि। सर्वाङ्गीणं सर्वाङ्गसंबन्धि। सर्वाङ्गशब्दात् संबन्धार्थे खप्रत्यये सर्वाङ्गीणं इति रूपं सिध्यति। तादृशं यत् विलेपनम्। अगरुः प्रसिद्धः। तन्मध्ये अत्युन्नतः कालागरुः। मल्लिकामालतीत्यादिना षड्तुसमुद्भवकुसुमानि। सीमन्तः केशपाशमध्यसरणिः तस्मिन् सिन्दूरम्। तिलकस्थाने रत्नम्। कालाञ्जनं अतिकृष्णाञ्जनं सौवीराञ्जनं वा। पाळी कर्णभूषणं, महाराष्ट्रभाषया बाळी इति प्रसिद्धम्। तस्या युगळं युग्मम्। अधरे ओष्ठे यावकं लाक्षारसं रक्तत्वसंपादकम्। प्रथमभूषणं मङ्गळसूत्रम्। कनकचिन्ताकं आन्ध्रपुरन्ध्रीभिः धृतो भूषणविशेषः कण्ठस्य आन्ध्रभाषया गोळकुत्तिकण्ट्र इति प्रसिद्धः। पदकं कण्ठभूषणं महाराष्ट्रभाषया तन्मणि इति प्रसिद्धम्। महापदकं कण्ठभूषणविशेषः महाराष्ट्रभाषया पेटया इति प्रसिद्धः। मुक्तावलिं महाराष्ट्रभाषया कण्ठा इति प्रसिद्धम्। एकावलिं सप्तविंशतिमौक्तिकरचिता माला नक्षत्रमाला इति प्रसिद्धा, "एकावल्येकयष्टिका सैव नक्षत्रमाला स्यात्" इत्यमरः। छन्नवीरं उभयतो वैकक्ष्यदामात्मकं भूषणं इति निबन्धे स्थितम्। केयूराणां अङ्गदानां युगळं युग्मं तस्य चतुष्टयं एकैकबाहौ द्वयं द्वयम्। वलयाः कङ्कणानि तेषामावलिं पङ्क्तिम्। ऊर्मिका अङ्गुळिभूषणं तस्य आवळिम्। कटिभूषणान्याह—काञ्चीति। सौभाग्याभरणं अधरे जघनालम्बी भूषणविशेष इति निबन्धे स्थितम्। पादकटकरत्ननूपुरपादाङ्गुळीयोत्तरमेकवचनमविवक्षितम्, तदर्थस्य बाधात्। आयुधान्याह—एकेति। पुण्ड्रेक्षुः चित्रवर्णेक्षुः। पुष्पमयाः बाणाः पुष्पबाणाः तान्। आयुधक्रम उक्तो दक्षिणामूर्तिसंहितायाम्—

> दक्षिणाधःकरे बाणान् वामाधस्तु शरासनम्।
> वामोर्ध्वे पाशमारक्तं दक्षोर्ध्वे तु सृणिं परम्॥ इति॥

महाचक्रं श्रीचक्रम्। कामेश्वराङ्क एव पर्यङ्कः, तत्रोपवेशनम्। अमृतरूपासवो मद्यं, तद्युक्तचषकम्। आचमनीयं स्पष्टम्। कर्पूरवीटिकालक्षणमुक्तं तन्त्रान्तरे—

एलालवङ्गकर्पूरकस्तूरीकेसरादिभिः ।
जातीफलदळैः पूगैः लाङ्गल्यूषणनागरैः ।
चूर्णैः खदिरसारैश्च युक्ता कर्पूरवीटिका ॥ इति ॥

लाङ्गली नारिकेळम् । ऊषणा पिप्पली । नागरं शुण्ठी । खदिरसारं महाराष्ट्रभाषया "कात्" इति प्रसिद्धम् । आ न न्द स्य उ ल्ला सः उदयः तेन वि ला सः आविर्भावः यस्येदृश हा स म् । लोकेऽपि आनन्दोदयज्ञापको हासः । अतो युक्तं ईदृशं विशेषणम् । म ङ्ग ळा रा र्तिं लक्षणं परमानन्दतन्त्रे—

तत आरार्तिकं कुर्यात्तद्विधानं शृणु प्रिये ।
लोहभिन्ने सुवर्णादिपात्रे सिन्दूररेणुभिः ॥
नानाविधैर्वर्णकैश्चाप्यष्टपत्रं [1]सकर्णिकम् ।
स्वस्तिकं वा प्रकल्प्याथ पिष्टजान् डमरुप्रभान् ॥
घृतपक्वान्नवसप्तपञ्चत्रितयमेव वा ।
सवर्तिकं घृतैः पूर्णं क्रमाद्विन्यस्य पात्रके ॥
प्रज्वाल्य मायया पश्चान्नवरत्नैश्च मन्त्रयेत् ।
चक्रमुद्रां प्रदर्श्याथ नवरत्नैश्च पूजयेत् ॥
आमस्तकं तु तत्पात्रमुद्धरेत् स्वयमुत्थितः ।
समस्तचक्रचक्रेशियुते देवि नवात्मिके ॥
आरार्तिकमिदं दिव्यं गृहाण मम सिद्धये ।
इति घण्टां वादयन् वै देव्या आपादमस्तकम् ॥
दक्षहस्तेन त्रिर्भ्राम्य पात्रं स्थाप्य नतिं चरेत् ।
एवमारार्तिकं कुर्यात् . . . . ॥ इति ॥

ता ळ वृ न्तं ताळव्यजनम् । शेषं स्पष्टम् । चतुष्षष्ट्युपचारमध्ये उक्तस्य अलाभे प्रतिनिधिद्रव्यनियम उक्तस्तन्त्रान्तरे—

तत्तद्द्रव्येणोपचारानभावे कुसुमाक्षतैः ।
मनसा भावयन् कुर्यात्तेन पूजाफलं लभेत् ॥ इति ॥

[1] मनोहरं—श्री. सुवर्णकं—ब२.

अक्षतपूजने विशेषो योगिनीतन्त्रे—

श्वेताक्षतैर्न पूज्या स्यात् त्रिपुरा परमेश्वरी ।
काश्मीरैः [1]कुङ्कुमैर्वाऽपि रक्तचन्दन[2]पङ्ककैः ।
रञ्जितान् शालिजान् शुद्धानखण्डानर्पयेत् बुधः ॥ इति ॥

इदं प्रतिनिधिकल्पनमपि गन्धपुष्पधूपदीपनैवेद्यव्यतिरिक्तविषयमेव । तदुक्तं योगिनीतन्त्रे—

उपचारानलाभे तु पुष्पाद्यैर्मनसा स्मरेत् ।
गन्धपुष्पधूपदीपनैवेद्यान्यन्महेश्वरि ।
गन्धादिपञ्चकाभावे पूजा व्यर्थैव [3]सर्वदा ॥ इति ॥

नवमुद्राप्रदर्शनम्

नवमुद्राश्च प्रदर्श्य ॥ ६ ॥

नवमुद्राः संक्षोभिण्यादियोन्यन्ता वक्ष्यमाणाः । चकारेण दशमीं त्रिखण्डां च प्रदर्श्य । देव्या इति शेषः ॥ ६ ॥

त्रिधा संतर्पणम्

मूलेन त्रिधा सन्तर्प्य ॥ ७ ॥

बिन्दाविति शेषः ॥

केचित्तु विशेषार्घ्य एव तत्संस्काररूपं—ततः किंचित् उद्धृत्य पात्रान्तरेण तत्रैव निक्षेपरूपं—तर्पणं विधीयते इत्यूचुः । तन्न, विशेषार्घ्यशोधनप्रकरणाभावेन तथात्वे प्रकृतहान्यप्रकृतकल्पनापत्तेः, एतदर्घ्यसंशोधनमिति पूर्वसूत्रविरोधाच्च । न च बिन्दाविति कथं ज्ञातमिति शंकनीयम्, मूलेनेति [4]तुरीयकूटश्रवणेन तज्ज्ञानसंभवात् । परं तु इयान् विशेषः—एतदतिरिक्ते पूजयित्वेति, अत्र सन्तर्प्येति श्रवणात्, अत्र तर्पणं,

[1] वा हरिद्रैर्वा—श्री.
[2] पङ्कजैः—श्री.
[3] सर्वथा—श्री, ब२.
[4] तृतीय—ब२.

अन्यत्र पूजनम् । अनुष्ठाने विशेषस्तु अत्र बिन्दुमात्रप्रक्षेपः, पूजनस्थले बिन्दुपुष्पाक्षतोभयप्रक्षेपः । किंच मूलेनेति तृतीयया इतरनैरपेक्ष्यश्रवणात्, श्रीपादुकेत्याद्यष्टाक्षर्याः पूजायामेव योजनविधानात्, "स्वाहा होमे तर्पणे च तर्पयामीति चोच्चरेत्" इति दक्षिणामूर्तिसंहितावचनेन मूलान्ते तर्पयामीत्येव योगः ॥

ननु तन्त्रान्तरे एकक्रियायामेव द्वयोः पदयोः प्रयोगः पर्यायेण दृश्यते, यथा "क्षीरेण ब्राह्मणैस्तर्प्या" इति "द्रव्येण सात्विकेनैव ब्राह्मणः पूजयेच्छिवाम्" इति, क्वचित् अस्मिन्नेवार्थे यजधातुरपि दृश्यते यथा—"सुराघटसहस्रेण यक्ष्ये त्वां परमेश्वरि" इति, तथा च तर्पणपूजनयजनानि पर्यायाणीति चेत्—न । नह्येकार्थे प्रयोगमात्रेण पर्यायता सिध्यति, लक्षणयाऽप्यन्यस्मिन्नर्थे प्रयोगसंभवात् । अन्यथा गङ्गातीरपदयोरपि तथात्वापत्तेः । अत एव "वायव्यं श्वेतमालभेत भूतिकामः" इत्यत्र धातोः स्पर्शार्थकत्वेऽपि द्रव्यदेवतायोगस्य यागमन्तराऽनुपपत्तेः आलभतिधातोः यागे लक्षणा कल्पिता । तथा अनुपपत्त्यभावेन अग्निहोत्रे श्रूयमाणस्य "वत्समालभेत" इत्यत्र धातोः यथाश्रुतार्थत्वमेवाङ्गीकृतम् । प्रकृतेऽपि सन्तर्प्येत्यत्र वायव्यादिवाक्यवत् बाधकाभावात् वत्समालभेत इतिवत् यथाश्रुतार्थत्वमेव युक्तम् ॥

ननु द्रव्यस्यात्राप्यनुक्तत्वात् तर्पणं पूजनं वा केन कार्यमिति चेत्—उच्यते । विहिततर्पणादिकं साधनमपेक्षते । संस्कृतं विशेषार्घ्यं च कार्यमपेक्षते । एवं साकांक्षयोस्तयोः नष्टाश्वदग्धरथन्यायेन विशेषार्घ्यं संस्कृत्य तेन देवतां यजेत् इति वाक्यैकवाक्यता कल्प्यते ॥

न च एवं सति सामान्यार्घ्यस्याऽपि तुल्यत्वेन तस्यापि पूजासाधनत्वापत्तिः इति वाच्यम्; तज्जलेन त्रिकोणेति विशेषार्घ्यमण्डलादौ श्रौतविनियोगेनास्य किं कार्यं इत्याकांक्षाविरहात् ॥

न च एवं "तद्बिन्दुभिः त्रिशः गुरुपादुकामिष्ट्वा" इति तृतीयया विशेषार्घ्यस्यापि विनियोगश्रवणात् उभयत्र तुल्यं इति वाच्यम्; एतदर्घ्यसंशोधनमिति तदग्रिमसूत्रेण तावत्पर्यन्तं विशेषार्घ्यसंस्कारस्यैवोक्तत्वेन बिन्दुभिरित्यादेरपि संस्कारान्तःपातित्वात्, किं च श्यामाक्रमे स्थितेन सर्वचक्रदेवताऽर्चनानि वामकराङ्गुष्ठानामिकासन्दष्टद्वितीयशकलगृहीतश्रीपात्रप्रथमबिन्दुसहपतितैः दक्षकराक्षतपुष्पक्षेपैः कुर्यादिति वचनेन द्रव्यलाभस्य निष्प्रत्यूहत्वात् ॥

न च तस्य श्यामाप्रकरणस्थत्वात् तत्रैव विश्रान्तिः इति वाच्यम्। श्यामाया ललितोपास्त्यङ्गत्वं पूर्वमेव व्यवस्थापितम्। अङ्गस्य प्रकरणं नास्तीति मीमांसकसिद्धान्तः। अतः प्रबलेन प्रकरणेन सन्निधिं बाधित्वा सर्वत्र विनियोगे बाधकाभावात्॥

न च तथाऽपि श्यामापदैरुभयतः संदंशात् प्रयाजाभिक्रमणन्यायेन अवान्तरप्रकरणं महाप्रकरणबाधकं भविष्यति इति वाच्यम्; सर्वशब्दश्रुत्या सर्वप्रबलया अवान्तरप्रकरणबाधसंभवात्॥

किं च अनारभ्य पठितेन सिद्धान्तग्रन्थस्थेन "तदभिव्यञ्जकाः पञ्च मकाराः तैरर्चनं" इत्यनेन द्रव्यस्य प्राप्तत्वेन अनुपपत्तिगन्धाभावात्॥

एता एव युक्तयः गणपतिप्रकरणस्थ—"सर्वत्र देवतानामसु श्रीपूर्वं पादुकां पूजयामीत्यष्टाक्षरं योजयेत्" इति वाक्ये—द्रष्टव्याः॥

त्रिधा त्रिवारं, अत्र द्रव्यभेदात् मन्त्रावृत्तिर्ज्ञेया॥ ७॥

षडङ्गपूजनम्

षडङ्गपूजनमाह—

देव्या अग्नीशासुरवायुषु मध्ये दिक्षु च षडङ्गानि पूजयित्वा॥ ७॥

अत्र पूजनं नाम पुष्पाक्षतबिन्दुप्रक्षेप एव, न तु पञ्चोपचाराद्यर्पणरूपं, श्यामाक्रमोक्तकल्पसूत्रानुरोधात् तथा शिष्टसंप्रदायाच्च॥

एवं सति अत्राधुनिकाः—यत्र यत्रैतदुत्तरं पूजयित्वेति तत्र तत्र पूर्वसूत्रस्थं सन्तर्प्येत्यनुवर्त्योभयविधिः, मूलदेवीस्थले तर्पणमात्रं, बिन्दुद्रव्यदानं तर्पणं, पुष्पाक्षतदानं पूजनं, इत्थं च त्रितारीशिरोमन्त्रोत्तरं शिरश्शक्तिश्रीपादुकां पूजयामि शिरश्शक्तिश्रीपादुकां तर्पयामि इत्यनुतिष्ठन्ति। तदनुष्ठानं भ्रान्तिमूलम्, तथा सति अर्धजरतीयन्यायात्। त्रितारीमारभ्य शिरोमन्त्रान्तं सकृदावृत्तिः, शिरश्शक्तीत्यारभ्य द्विवारमिति कथनस्यातिहासास्पदत्वात्। किं च पूजयामीति मन्त्रेण पूजनं अग्रिममन्त्रेण तर्पणं इति पूजनतर्पणयोः क्रमिकत्वं प्राप्तम्। तथा सति बिन्दुपुष्पाक्षतदानयोः एककालबोधकेन बिन्दुसहपतितैः पुष्पाक्षतैः कुर्यात् इति सूत्रेण विरुध्यते। अपिच वामकरसंबन्धाभावप्रसङ्गश्च, क्रमिकत्वेन द्वयोरपि दक्षहस्तेन कर्तुं शक्यत्वात्। न च

"वामकराङ्गुष्ठानामिकासन्दष्ट" इति सूत्रानुसारेण वामकरस्यावश्यकता इति वाच्यम्; दक्षकरस्य पुष्पाक्षतप्रक्षेपव्यापृतत्वेन सहत्वान्यथाऽनुपपत्त्या प्राप्तवामकरस्य विधानासंभवेनानुवादकत्वात्। अत एव बहिष्पवमानस्तोत्रार्थं प्रसर्पणावसरे छन्दोगानां सूत्रे "सव्यैः पाणिभिस्तृणन्ति" इत्यत्र भाष्ये दक्षहस्तस्य "अध्वर्युं प्रस्तोताऽन्वारभते प्रस्तोतारं प्रतिहर्ता, प्रतिहर्तारमुद्गाता" इति वाक्येन अध्वर्य्वाद्यन्वारंभे व्यापृतत्वात् अर्थप्राप्तः सव्यपाणिः अनूद्यते इत्युक्तम्॥

केचित्तु—सन्तर्प्येत्यनुवर्त्य तर्पणपूजोभयं विधीयते अर्धजरतीयन्यायभीत्या, त्रितार्युत्तरं हृन्मन्त्रान्ते हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः इति मन्त्रं पठन्ति। तदशुद्धम्, अनुवृत्तौ प्रमाणाभावात्॥

किं च विधौ आदौ तर्पणं, पश्चात् पूजा, मन्त्रे विपरीतक्रम इति च विरुद्धम्॥

तस्मात् पूर्ववाक्ये तर्पणं नाम बिन्दुप्रक्षेपमात्रम्। तस्य अनुवृत्तौ आकांक्षाविरहात् पूजनमेव विधीयते। पूजापदार्थश्च बिन्दुपुष्पाक्षतसमुदायप्रक्षेपः। इत्थं च आदौ त्रितारी, ततो हृन्मन्त्रः, ततो हृदयशक्तिश्रीपादुकां पूजयामि इति मन्त्रस्वरूपं ज्ञेयम्। एवमेवाग्रेऽपि सर्वत्र ज्ञेयम्॥

अ ग्नी शे त्यत्र अग्न्यादिपदेन तत्तद्देवतासंबन्धिदिशां ग्रहणम्। दि क्षु इत्यनेन प्रागादिदिक्चतुष्टयग्रहणम्। षडङ्गयुवतीनां—अग्न्यादिचतस्रो विदिशः, मध्यं, प्रागादिदिक्चतुष्टयं मिलित्वैकं, इति षट् स्थानानि ज्ञेयानि॥

अत्र केचित्—

यः पश्येद्यत्र सूर्यं तु सा प्राची तस्य कथ्यते।
उदये सूर्यद्रष्टुस्तु मेरुरुत्तरसंस्थितः॥

इति दिग्व्यवस्था श्रौतस्मार्तकर्मणि प्रसिद्धा, तथैव श्रीविद्योपासनायामपि दिग्व्यवस्था इत्याहुः॥

अन्ये तु निरुक्तदिग्व्यवस्थाया वैदिके कर्मणि सावकाशत्वात् "पूज्यपूजकयोर्मध्ये दिशं प्राचीं प्रकल्पयेत्" इति तन्त्रवचनानुसारेण देव्यग्रभागः प्राची, देवीपृष्ठभागः प्रतीची, देव्या दक्षभागो दक्षिणा, वामभाग उदीची, दिगनुसारेण विदिशां कल्पनं इत्यूचुः॥

तदुभयमपि स्थूलमानत्वादुपेक्ष्यम् । वस्तुतस्तु ज्ञानार्णवे श्रीचक्रपूजनसन्निधौ—

उत्तराशामुखो मन्त्री यदा चक्रं समुद्धरेत् ।
उत्तराशा तदा देवि पूर्वाशेति निगद्यते ॥
ईशानकोणं देवेशि तदाऽऽग्नेयं न संशयः ।
पश्चिमाशामुखो मन्त्री यदा चक्रं समुद्धरेत् ॥
पश्चिमाशा तदा ज्ञेया पूर्वाशेति न संशयः ।
वायुकोणं तदाऽऽग्नेयमैशानं राक्षसं भवेत् ॥
दक्षिणाभिमुखो मन्त्री यदा चक्रं समुद्धरेत् ।
पूर्वाशैव ह्युदीची स्यात् रक्षःकोणं तु वह्निदिक् ॥ इति ॥

उत्तरापश्चिमाशेत्यत्र लोकप्रसिद्धोत्तरां दिशमनूद्य पूर्वादिदिक्कार्यं विधीयते "खलेवाली यूपो भवति" इतिवत् । इत्थं च दिङ्मात्रानुवादेन दिक्कार्यविधानात् विदिङ्मुखश्चक्रं नोद्धरेत् इति सिद्धम् । प्राचीदिगनुवादेन विधेयाभावात् तत्त्यक्तम् । एवं कुलार्णवेऽपि—

यदाशाऽभिमुखो मन्त्री त्रिपुरां परिपूजयेत् ।
देवीपश्चात्तदा प्राची प्रतीची त्रिपुरापुरः ॥

इति निरवकाशवचनैः श्रीविद्याविषये उक्तरीत्या दिग्व्यवस्था । श्रीविद्याऽतिरिक्ते तान्त्रिके कर्मणि पूज्यपूजकयोर्मध्यं प्राची । निखिलश्रौतस्मार्तकर्मणि यः पश्येदित्यादिवचनप्रवेश इति अलं भूयसा । देव्या इत्युक्त्या बिन्दुचक्र एवाग्नेयादिदिश उक्तशास्त्रेण प्रकल्प्य तत्र षडङ्गयुवतीः पूजयेत् इति सिद्धम् ॥ ८ ॥

नित्यापूजनम्

अथ पञ्चदशनित्यामन्त्रोद्धारपूर्वकं नित्यापूजनमाह—

वाक्सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः इति कामेश्वरी । सर्वत्र नित्याश्रीपादुकेति योज्यम् । वाग्भगभुगे भगिनि भगोदरि भगमाले भगावहे

भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जें ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं भगमालिनी। तारो माया नित्यक्लिन्ने मदद्रवे स्वाहा इति नित्यक्लिन्ना। प्रणवः क्रों भ्रों क्रौं झ्रौं छ्रौं ज्रौं स्वाहा इति भेरुण्डा। प्रणवो माया वह्निवासिन्यै नमः इति वह्निवासिनी। मायाक्लिन्ने वाक् क्रों नित्यमदद्रवे ह्रीं इति महावज्रेश्वरी। माया शिवदूत्यै नमः इति शिवदूती। प्रणवो माया हुं खे च छे क्षः स्त्रीं हुं क्षें ह्रीं फट् इति त्वरिता। कुमारी कुलसुन्दरी। हसकलरडवाग्भवहसकलरड-बिन्दुमालिनी हसकलरडचतुर्दशषोडशा इति नित्या। माया फ्रें स्रूं अङ्कुशपाशस्मरवाग्भवब्लूंपदनित्य-मदद्रवे वर्मफ्रें मायेति नीलपताका। भमरयऊमिति विजया। स्वौमिति सर्वमङ्गला। तारो नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जात-वेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल त्रिजातियुक्तमायारेफसप्तकज्वालामालिनि वर्मफ-डग्निजायेति ज्वालामालिनी। (अं) चक्रौं इति

चित्रेति पञ्चदशनित्याः प्रथमत्र्यश्ररेखास्थितपञ्चदशस्वरेषु पूज्याः। विसृष्टौ षोडशीं मूलविद्यया चाभ्यर्च्य ॥ ९ ॥

वा क् ऐं। शेषं यथापठितम्। मन्त्रान्ते सर्वत्र तत्तन्नित्यानाम, तदुत्तरं अष्टाक्षरीयोगः। यथा आदौ त्रितारी, ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः कामेश्वरीनित्याश्रीपादुकां पूजयामि नमः इति। एवमग्रेऽपि द्रष्टव्यम्। यद्यपि श्रीपादुकेत्यष्टाक्षरीयोगः सामान्यवचनप्राप्तः, तथाऽपि नित्यापदघटितत्वेनाप्राप्तत्वात् तदर्थ आरम्भः सर्वत्र नित्यापूजनमन्त्रेषु। द्वितीयमाह—वा गि ति। तृतीयमाह—ता र इ ति। ता रः प्रणवः, मा या ह्रीं, शेषं यथाश्रुतं पठनीयम्। आदौ प्रणवः, ततो माया, ततः स्वाहाऽन्तो यथाश्रुतः इति फलितोऽर्थः। चतुर्थमाह—प्र ण व इति स्वा हेत्यन्तेन। पञ्चमीमाह—प्र ण व इति न म इत्यन्तेन। षष्ठमाह—मा ये ति ह्री मित्यन्तेन। सप्तममाह—मा ये ति न म इत्यन्तेन। अष्टममाह—प्र ण व इ ति फ डि त्यन्तेन। नवममाह—कु मा री ति। कु मा री बाला सैव कु ल सु न्द री त्यर्थः। दशममाह—ह से ति षो ड शा इत्यन्तेन। अत्र पूर्वोक्तयुक्त्या हसकेत्यादौ केवलव्यञ्जनानामेव ग्रहणम्। अन्यथा "द्वादशार्धा च नित्या स्यात्" इति अन्यतन्त्रवचनेन द्वादशार्धामन्त्रवर्णातिदेशे "त्रिबीजस्था द्वादशार्धा" इति मन्त्रे त्रिवर्णत्वसिद्धेः अत्रापि तदतिदेशसिद्धत्रिवर्णत्वं विरुध्येत। ह स क ल र डो त्तरं वा ग्भ वः ऐं पुनः तदुत्तरं बि न्दु युक्ता मा लि नी ईकारः, "गोविन्दश्च त्रिमूर्तीशो मालिनीवामलोचनम्" इति कोशात्। चतुर्दशषोडशौ पूर्वमुक्तौ। इत्थं च ह्स्क्लर्डैं ह्स्क्लर्डीं ह्स्क्लर्डौः नित्यानित्याश्री इति मन्त्रस्वरूपम् ॥

यच्च निबन्धे अवर्णसहितहकारादि लिखितं तदज्ञानप्रयुक्तमेव। तन्त्रान्तरानुसारेण यदि लिखितं, तर्हि वशिन्यादिन्यासे कवर्गं कलह्रीं च निगद्य इति सूत्रे सति हल्मात्रग्रहणे तन्त्रान्तरमृते साधनं मृग्यम्। तस्मात् उक्तयुक्त्या त्र्यक्षर्येव नित्याविद्या ॥

एकादशमाह—मा ये त्यारभ्य मा ये त्यन्तेन। आद्यानि त्रीणि बीजानि स्पष्टानि, अ ङ्कु शः क्रोमिति, पा शः आमिति "आद्यन्तगोमहापाश" इति योगिनीतन्त्रात्।

आदिरकारः तस्यान्तः अग्रिमो देशः तत्र स्थित आकार इति तदर्थः । एवं “कामोऽग्निर्व्यापकोऽङ्कुशः” इति तत्रैव । कामः ककारः अग्निः रेफः व्यापकः प्रणवः मिळित्वा क्रोमिति संपद्यते । अयमङ्कुश इत्यर्थः । स्मरः क्लीं वाग्भवः ऐं वर्म हुं । इत्थं च ह्रीं फ्रें स्त्रूं क्रों आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फ्रें ह्रीं नीलपताकानित्याश्री इति मन्त्रस्वरूपम् । द्वादशमाह—भं म र य ऊं इति । अत्रापि पूर्वयुक्त्या हल्मात्रग्रहणम्, “इयमेकाक्षरी विद्या विजया संप्रकीर्तिता” इति तन्त्रान्तरवचनात् ॥

तेन निबन्धे पञ्चाक्षरोच्चारणं औकारोच्चारणं प्रामादिकम् । भ्म्र्यूमिति स्वरूपं ज्ञेयम् । यद्यपि तन्त्रान्तरे अङ्गदादिबिन्दुसंयुतमित्यस्ति । अङ्गद औकारः । तेन चरमस्वर औकार इति प्रतिभाति । तथाऽपि सूत्रे षष्ठस्वरोच्चारणात् सूत्रविरुद्धं तन्त्रान्तरोक्तं सूत्रानुसारिणामनादर्तव्यमेव ॥

त्रयोदशमाह—स्वौमिति । चतुर्दशमाह—तार इति अग्निजायेत्यन्तेन । त्रिजातियुक्तमाया ह्रां ह्रीं ह्रूं । वह्निजाया स्वाहा । शेषं स्पष्टम् । पञ्चदशमाह—'अं च्कौमिति । पञ्चदशनित्यापूजने देशनियममाह—प्रथमेत्यादि । प्रथमत्र्यश्रं बिन्दुसमीपस्थं त्रिकोणं, तत्रत्या यास्तिस्रो रेखाः, तासु वर्तमाना ये पञ्चदश स्वराः अकाराद्यनुस्वारान्ताः तेषु एकैकस्वरे एकैकनित्या क्रमेण पूज्येत्यर्थः । अत्र रेखास्थितपञ्चदशस्वरेष्विति स्वराणां तत्र सिद्धवन्निर्देशात् एकैकरेखायां पञ्चपञ्चस्वराः भावनीयाः इति विधिरुन्नेयः । क्रमस्यानुक्तत्वात् स्वाग्रादिप्रादक्षिण्येन । पश्चिमादारभ्य ईशानान्तरेखायां अ आ इ ई उ इति । ऐशानादाग्नेयान्तरेखायां ऊ ऋ ॠ ऌ ॡ इति । आग्नेयादारभ्य पश्चिमान्तं ए ऐ ओ औ अं इति भावनाविवेकः । विगता निर्गता सृष्टिः यस्याः सा विसृष्टिः बिन्दुचक्रम् । तत्सृष्टिप्रकारः उत्तरचतुश्शतीव्याख्याने सेतुबन्धे द्रष्टव्यः । तस्मिन् षोडशीं समष्टिरूपां मूलविद्यया पञ्चदश्या अभ्यर्च्य । एतासामधिष्ठानं क्लृप्तत्रिकोणादन्यदेव त्रिकोणमुक्तं ज्ञानार्णवे—

विभाव्य च महात्र्यश्रमग्रदक्षोत्तरं क्रमात् ॥ इति ॥

तन्त्रराजे तु बिन्दावेव पूजनमुक्तम् । इत्थं तत्तत्तन्त्रानुयायिभिः तत्र तत्र कर्तव्यम् ॥ ९ ॥

ओघत्रयपूजनम्

ओघत्रयपूजामाह—

मध्ये प्राक्त्र्यश्रमध्यान्तः मुनिवेदनागसंख्यान् यथासंप्रदायं पादुकान् दिव्यसिद्धमानवौघसिद्धा-निष्ट्वा पश्चात् स्वशिरसि नाथं यजेत्। एतल्लयाङ्ग-पूजनं इति शिवम्[1] ॥ १० ॥

इति . . . कल्पसूत्रे ललिताक्रमो नाम चतुर्थः खण्डः

प्राक्त्र्यश्रं प्रथमत्र्यश्रम्। यद्वा—प्राक्त्र्यश्रं पूर्वोक्तं त्र्यश्रं तस्य यो मध्यः आभ्यन्तरप्रदेशः तस्य यो अन्तः चरमावयवः स्वाभिमुखाग्रसमीपवर्ती यः आभ्यन्तरप्रदेशः तत्रेति फलितोऽर्थः। मुनिः सप्त वेदः चत्वारः नागः अष्टौ संख्या यत्रेति व्युत्पत्त्या ओघे विशेषणम्। यथासंप्रदायं पादुकाः, कादिहादिविद्याभेदेन पादुकानां गुरुमण्डलानां भिन्नत्वात् यस्य पुरुषस्य परिगृहीताः यायाः पादुकाः तत्तल्लाभाय यथासंप्रदायं पादुका इति। दिव्याश्च सिद्धाश्च मानवाश्च ते ओघाश्च तादृशान् सिद्धान्। पूर्वोक्ते ओघविशेषणे। उभयत्र विभक्तिव्यत्ययः आर्षः। दिव्याः ७ सिद्धाः ४ मानवाः ८ इति विवेकः। तान् इष्ट्वा पूजयित्वा। क्त्वाप्रत्ययेन पाठेन च प्राप्तक्रमः पश्चादित्यनेन अनूद्यते। एतत् उक्तं—यद्वा एतदुत्तरं वक्ष्यमाणं नवावरणपूजनं—लयाङ्गं लयस्वरूपं चतुरश्रादिबिन्द्वन्तक्रमस्य लयस्वरूपत्वात् लयाङ्गपूजनं भवितुमर्हति। एतेन तन्त्रान्तरोक्तबिन्द्वादिपूजाव्यावृत्तिः। शिवमिति खण्डसमाप्तिद्योतकम् ॥ १० ॥

इति . . . परशुरामसूत्रवृत्तौ ललिताक्रमो नाम चतुर्थः खण्डः

---

[1] एके योगसूत्रसृष्टिस्थितिसंहारत्रिके पञ्चपञ्चिकपञ्चासूयान् प्रपञ्चादिन्यासदेवतादर्शनानि च यजन्ति—इत्यधिकः पाठः क्वचित्.

पञ्चमः खण्डः—ललितानवावरणपूजा

प्रथमावरणव्यष्टिपूजा

एतत्पदेन निर्दिष्टां पूजां वितत्य दर्शयति—

अथ प्राथमिके चतुरश्रे अणिमालघिमामहिमेशित्ववशित्वप्राकाम्यभुक्तीच्छाप्राप्तिसर्वकामसिद्ध्यन्ताः मध्यमे चतुरश्रे ब्राह्म्याद्या महालक्ष्म्यन्ताः तृतीये चतुरश्रे संक्षोभणद्रावणाकर्षणवश्योन्मादनमहाङ्कुशखेचरीबीजयोनित्रिखण्डाः सर्वपूर्वास्ताः संपूज्याः ॥ १ ॥

अथेति नवावरणपूजाऽधिकारद्योतकम् । चतुरश्रत्रयमध्ये प्राथमिके सर्वबाह्ये चतुरश्रे अणिमेत्यारभ्य सर्वकामपर्यन्तं द्वन्द्वः । ते सर्वेऽपि सिद्ध्यन्ताः कार्याः । सर्वेषां पदानां अन्ते सिद्धिरिति योज्यम् । तथा च त्रितारी ततोऽणिमासिद्धिश्रीपादुकां पूजयामीति । एवमग्रेऽपि । अत्राणिमाऽऽदिपदत्रयं न मन्नन्तं, किंतु डाबन्तं, अणिमालघिमेतिसमासान्तसूत्रपाठात् । अणिमासिद्धीति पुंवद्भावरहितः पाठः अशास्त्रीयोऽपि संप्रदायानुरोधादार्षप्रायः । यद्वा—षष्ठीतत्पुरुषः । षष्ठ्यर्थश्चाभेद एव "राहोः शिरः" इतिवत् । प्राथमिकचतुरश्रे अणिमाऽऽदीनां यथेच्छं पूजाप्राप्तौ तन्नियमः वामकेश्वरतन्त्रे—

> अणिमां पश्चिमद्वारे लघिमामपि चोत्तरे ।
> पूर्वद्वारे तु महिमामीशित्वाख्यां तु दक्षिणे ॥
> वशित्वाख्यां तु वायव्ये प्राकाम्यामीशदेशके ।
> भुक्तिसिद्धिं तथाऽऽग्नेय्यामिच्छासिद्धिं तु नैर्ऋतौ ॥
> अधस्तात् प्राप्तिसिद्धिं च [1]सर्वकामं तथोर्ध्वतः ॥ इति ॥

[1] सर्वकामां—श्री.

दिग्व्यवस्थासंप्रदायश्च पूर्वमुक्तः। ऊर्ध्वाधरावपि न लोकप्रसिद्धौ ग्राह्यौ, किं तु तान्त्रिकौ। तदुक्तं तत्त्वविमर्शिन्याम्—

इन्द्रेशानदिशोर्मध्ये स्थानमूर्ध्वस्य कीर्तितम्।
निर्ऋत्यम्बुपयोर्मध्ये अधःस्थानं प्रकीर्तितम्॥ इति॥

मध्यमे चतुरश्रे ब्राह्म्याद्याः—ब्राह्मी आदौ यासां ताः, एवं महालक्ष्मीः अन्ते यासां ताः।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही चैव चेन्द्राणी चामुण्डाः सप्त मातरः॥

इति प्रसिद्धाः सप्त, महालक्ष्मी चेत्यष्टौ मातरो मध्यचतुरश्रे पूज्याः। तत्र क्रमाकांक्षायां वामकेश्वरतन्त्रे—

ब्रह्माणीं पश्चिमद्वारे माहेशीमपि चोत्तरे।
पूर्वद्वारे तु कौमारीं दक्षिणे वैष्णवीमपि॥
वाराहीमपि वायव्ये तथैन्द्रीमैशदेशके।
चामुण्डामपि चाग्नेये महालक्ष्मीं च नैर्ऋते॥ इति॥

अथ तृतीये चतुरश्रे दशमुद्रापूजनमाह—तृतीये इति। सर्वः सर्वशब्दः पूर्वं यन्नामसु ताः यथा त्रितार्युत्तरं सर्वसंक्षोभिणीशक्तिश्रीपादुकां पूजयामि इति। एतादृशमुद्राशक्तयः—मुद्राशब्दार्थश्चोक्तः प्राक्—तादृशमुद्रात्वव्याप्यधर्मावच्छिन्नाः इमाः। सर्वसंक्षोभिणीपदार्थश्च इत्थं—सर्वान् पदार्थ[1]भूतान् क्षोभयतीति उत्पादयतीति सर्वसंक्षोभिणी, कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताऽऽश्रयेति यावत्। इयमेव वामाशक्तिरित्युच्यते। एतदुक्तं योगिनीतन्त्रे—

योनिप्राचुर्यतस्सैषा सर्वसंक्षोभिका पुनः।
वामाशक्तिप्रधानेयम् . . . . इति॥

योनिः कारणत्वानि तेषां प्राचुर्यतो भूयस्त्वेन। अत एव सर्वसंक्षोभिण्या बाह्यस्वरूपे अङ्गुलिग्रथनात्मकेऽपि अङ्गुष्ठे कनिष्ठानामामध्यमाग्राणां योगे योनिभूयस्त्वं प्रत्यक्षेणानु-

[1] मात्रान्—श्री, अ.

भूयते। एतेन अदृश्यरूपमपि तथेत्युन्नेयम्। द्वितीया सर्वविद्राविणी सर्वानुत्पन्नान् द्रावयति वर्धयति पोषणेन सा सर्वविद्राविणी, सर्वेषां वस्तूनां पालकत्वादृजुस्वभावा ज्येष्ठाशक्तिप्रचुरा च। तदुक्तं योगिनीतन्त्रे—"क्षुब्धविश्वस्थितिकरी ज्येष्ठा प्राचुर्यमास्थिता" इति। क्षुब्धस्य उत्पन्नस्येत्यर्थः। यश्च संरक्षकः स ऋजुरिति लोके प्रसिद्धा गाथा। अत एव अस्या मुद्रायाः बाह्यरूपेऽपि अङ्गुष्ठेन कनिष्ठिकानामायोगे अङ्गुलिचतुष्टये ऋजुत्वं दृश्यते। एवमाद्यत्रिकोणे रेखात्रयमध्ये पूर्वस्यां दिशि स्थितायां ऋजुरेखायामेव तस्या अधिष्ठानं शास्त्रप्रसिद्धम्। तृतीया सर्वाकर्षिणी सर्वाकर्षणशीला। इयं ज्येष्ठावामोभयात्मिका। तदुक्तं योगिनीतन्त्रे—

ज्येष्ठावामासमत्वेन सृष्टेः प्राधान्यमास्थिता।
आकर्षिणीति मुद्रेयम् . . . . ॥ इति ॥

पूर्वोक्तमुद्राद्वयवाचकपदशक्यताऽवच्छेदकयोः द्वयोरपि सर्वाकर्षिणीपदशक्यताऽवच्छेदकत्वं बोध्यम्, पुष्पवच्छब्दवत्। तत्रापि ज्येष्ठात्वविशिष्टवामात्वं शक्यताऽवच्छेदकं, न तु विपरीतम्। तथा सति ज्येष्ठाया विशेष्यत्वेन प्राधान्यं वाच्यम्। प्राधान्ये ज्येष्ठाया अतिसरळत्वेन प्रधानानुसारेण विशेषणीभूतवामाया अपि प्रधानानुवर्तिन्याः सरळतया तर्जनीमध्यमयोः बाह्यरूपे कुटिलत्वं न स्यात्। वामायाः प्राधान्ये तु तस्याः कुटिलतया तदनुसारेण अप्रधानाया ज्येष्ठायाः प्रधानानुवर्तिन्याः कुटिलत्वं युक्तम्। अत एव बाह्यस्वरूपे अङ्गुलिग्रथने सर्वास्वङ्गुलिषु कुटिलत्वम्। चतुर्थी सर्ववश्यकरी सर्वान् क्षित्यादिशिवान्तान् वश्यं स्वाधीनं नयति प्रापयतीति तथा। लोके आकाशो द्विविधः दह्रः प्राकृतश्च। दह्राकाशेऽपि सुसूक्ष्मोऽन्य आकाशोऽस्ति, "तस्यान्ते सुषिरं सूक्ष्मं" इति श्रुतिप्रसिद्धः। तन्मध्ये गाढमाश्लिष्टा परशिवेन या आनन्द-विग्रहा मूर्तिः सा सर्ववश्यकरीपदवाच्या। तदुक्तं उत्तरचतुश्शत्याम्—

व्योमद्वयान्तराळस्थबिन्दुरूपा महेश्वरी।
शिवशक्त्यात्मसंश्लेषादेषा वश्यकरी स्मृता ॥ इति ॥

बिन्दुरूपेति कथनात् स्वरूपमपि तथा। अत एवाङ्गुलिग्रथनेऽपि अस्या बाह्यरूपे बिन्द्वाकारता सर्वाङ्गुलीनां गाढसंश्लेषेऽपि व्यक्तः। पञ्चमी उक्तशिवशक्तिबिन्द्वोर्मध्ये

सूक्ष्मरेखा "नीवारशूकवत्तन्वी", "तस्य मध्ये वह्निशिखा" इति श्रुतिप्रसिद्धा। तस्याः शिखायाः द्विस्वभावत्वं ज्येष्ठास्वभावत्वं च। यथा लोके एकस्यैव दण्डस्य घटोत्पादकशक्तिमत्त्वं तन्नाशकशक्तिमत्त्वं चास्ति, तथाऽपि स दण्डः कदाचिदुत्पादकशक्तिप्रधानो भूत्वा घटमुत्पादयति, कदाचिन्नाशशक्तिप्रधानः तं नाशयति। एवं लोके बहुस्थले दृष्टम्। तथा दण्डस्थानीया उक्तरेखा। सा यदा जगद्रक्षणकर्तृत्वविशिष्टज्येष्ठाशक्तिप्रधाना तदा सर्वोन्मादिनी पदवाच्या। तदुक्तं उत्तरचतुश्शत्याम्—

बिन्द्वन्तराळविलसत्सूक्ष्मरूपशिखामयी।
ज्येष्ठाशक्तिप्रधाना तु सर्वोन्मादनकारिणी॥ इति॥

अत एव तदङ्गुळिग्रथनवेळायां अङ्गुष्ठानामतर्जन्यः सरळाः दृश्यन्ते, बिन्दुद्वयाकारं मध्यमाद्वयं च भवति। तत्रापि निरुक्तशिखास्थानापन्नग्रथनवेळायां अनामाद्वयमेव ज्ञेयम्। मध्यमाद्वयस्य तदानीं बिन्दुद्वयरूपत्वेन तन्मध्यवर्त्यनामाद्वयस्य "तस्य मध्ये वह्निशिखा" इति प्रसिद्धशिखात्वं युक्तम्। षष्ठी तु—इदमेव पूर्वोक्तं शिखाद्वयं यदा वामाप्रधानं तदा सर्वमहाङ्कुशा। सूक्ष्मरूपेण परमशिवकुक्षौ स्थितं जगत्। यथा अंतस्थो गजः अंकुशेन बहिराकृष्यते तथा सर्वस्य बहिराकर्षणात् सर्वमहाङ्कुशेत्युच्यते। परशिवकुक्षिस्थजगतो वमनात् वामा तत्प्रधाना शिखा सर्वमहाङ्कुशा इत्युच्यते। तदप्युक्तं योगिनीतन्त्रे—

वामाशक्तिप्रधाना तु महाङ्कुशमयी पुनः।
तद्वद्विश्वं वमन्ती सा द्वितीये तु दशारके॥ इति॥

अत एव पूर्वमुद्रायां सरळयोरनामयोः वक्रता दृश्यते। लोके वमनवेळायां मानवो धनुराकारो वक्रो भवति। प्रसिद्धमेतत्। अत्रायं विवेकः—केवलवामात्वं सर्वसंक्षोभिणीपदप्रवृत्तिनिमित्तं, ज्येष्ठात्वविशिष्टवामात्वं सर्वाकर्षिणीपदप्रवृत्तिनिमित्तं, सूक्ष्माकाशान्तर्वृत्तिबिन्दुद्वयत्वं सर्ववश्यकरपदप्रवृत्तिनिमित्तं, ज्येष्ठाशक्तिप्रधानकबिन्दुद्वयमध्यवृत्तिरेखात्वं सर्वोन्मादिनीपदशक्यताऽवच्छेदकं, वामाशक्तिप्रधानत्वं सर्वमहाङ्कुशापदशक्यताऽवच्छेदकं, एवंरीत्या वैलक्षण्यं सूक्ष्मधिया द्रष्टव्यम्। सप्तमी सर्वखेचरी जीवानां स्वकर्मजनितरोगादिदुःखनाशनक्षमा शक्तिः। अत एव सर्वरोगहरचक्रस्था भवति। तदप्युक्तं योगिनीतन्त्रे—

धर्माधर्मस्य संघट्टादुत्थिता वित्तिरूपिणी ।
विकल्पोत्थक्रियालोपरूपदोष[?]विघातिनी ।
विकल्परूपरोगाणां हारिणी खेचरी मता ॥ इति ॥

अस्यार्थः—धर्मः शक्तिः परशिववृत्तित्वात् । न विद्यते धर्मो यत्रेति अधर्मः परं ब्रह्म परशिवः । यद्वा—ʻन कस्यापि धर्मः अधर्म इति नञ्तत्पुरुष एव युक्तः, परशिवे शक्तिरूपधर्मसत्त्वेन पूर्वकल्पे स्वोक्तव्याघातात् । तयोः संघट्टः मेळनं तेन उत्थिता । यावद्विकल्पः तेनोत्थिताः याः क्रियाः नित्यनैमित्तिकाः तासां लोपेन यत्पापं तत्संभवाः रोगाः तन्नाशिनी खेचरीति । अत एवैतादृशशिवशक्तिसामरस्यद्योतकं बाह्यरूपे बाहुद्वयपरिवर्तनम् । अष्टमी बी ज मुद्रा—जगतः षड्विकारेषु प्राथमिको यो भावविकारः सूक्ष्मरूपेण सत्ता तदभिमानिनी शक्तिः । तदुक्तमुत्तरचतुश्शत्याम्—

शिवशक्तिसमाश्लेषस्फुरद्व्योमान्तरे पुनः ।
प्रकाशयन्ती विश्वं सा सूक्ष्मरूपस्थितं सदा ।
बीजरूपा महामुद्रा . . . . ॥ इति ॥

अयमर्थः—वटबीजे सुसूक्ष्मेऽपि किञ्चिदाकाशोऽस्ति विभुत्वात् । तस्मिन् यथा महावृक्षः सूक्ष्मरूपेण तिष्ठति तथा षट्त्रिंशत्तत्त्वानि शिवशक्तिगर्भे विद्यन्ते सूक्ष्मरूपेण । सैव सत्ता घटोऽस्ति पटोऽस्ति इत्यत्र अनुवर्तते । सा बीजमुद्रेत्यर्थः । सर्वबीजस्थानापन्नत्वात् सर्वबीजा । सूक्ष्मत्वादेव अङ्गुलिप्रग्रथनवेळायां संक्षोभिण्याद्यपेक्षया अल्पयोनित्वं सूक्ष्मत्वज्ञापकम् । या नवमी यो नि मुद्रा तद्वृत्त्यसाधारणो धर्मः मुद्रात्वे सति कळारूपत्वम् । मुद्रात्वस्वरूपमुक्तं प्राक् । कलापदार्थश्चोच्यते । शक्तिविशिष्टे प्रकाशरूपे परशिवे शक्तिमपहाय केवलस्वरूपमात्रनिष्कर्षणे सति तुरीयबिन्दुपदवाच्यत्वं, यथा जलनिष्ठं द्रवत्वमपहाय स्वरूपमात्रनिष्कर्षणे जलपदवाच्यत्वम् । अत्रापहानं नाम शक्यताऽवच्छेदककोटिप्रवेशाभाव एव न ततः पृथक् निष्कासनं, असंभवात् । तस्य शुद्धशिवस्य शक्तिसंबन्धित्वेन विवक्षायां कामबिन्दुपदवाच्यता । तस्यैव संबन्धस्याभेदत्वेन शक्यताऽवच्छेदककोटिप्रवेशे विसर्गो हकारः विमर्शः इति तान्त्रिकव्यवहारः । तादृशसामरस्योत्तरं रक्तशुक्लबिन्दुमिश्रणेन

आविर्भूतानन्दान्तर्भावेण विवक्षायां कलेत्युच्यते । [1]ईदृशकलारूपा योनिमुद्रा । तदुक्तं नित्याहृदये—

संपूर्णस्य प्रकाशस्य लाभभूमिरियं पुनः ।
योनिमुद्रा कलारूपा . . . . ॥ इति ॥

सर्ववश्यकरी केवलबिन्दुद्वयरूपा, अस्याः शरीरे बिन्दुद्वयसंसर्गाविर्भूतानन्दोऽपि शक्यताऽवच्छेदककोटिप्रविष्ट इति ततो वैलक्षण्यं ज्ञेयम् । दशमी त्रिखण्डा पूर्वमुक्ता । एवं दशमुद्राणां स्वरूपं श्रीगुरुकृपाविशेषेणाविर्भूतस्फूर्तिकं यथामति लोकानां सुखबोधार्थं स्पष्टीचकार । एवं स्वरूपज्ञानफलं तन्त्रेषु अनन्तं प्रपञ्चितं, विस्तरभयान्नेह लिखितम् । एवं दशमुद्राश्चतुरश्रे तृतीये पूज्याः । अत्रापि इच्छया प्राप्तौ नियामकं वचनं तन्त्रे—

पुरस्सव्ये च वंशे च वामे चैवान्तराळके ।
ऊर्ध्वाधो दशमुद्राश्च . . . . . . ॥ इति ॥

पूर्वदक्षिणपश्चिमोत्तरेष्वाग्नेयाद्यन्तराळचतुष्के चोर्ध्वमधश्च दशमुद्राः पूज्या इति तदर्थः ॥ १ ॥

प्रथमावरणसमष्टिपूजा

प्रथमावरणस्य व्यष्टिपूजामुक्त्वा समष्टिपूजामाह—

एताः प्रकटयोगिन्यस्त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्त्विति तासामेव समष्ट्यर्चनं कृत्वा ॥ २ ॥

ए ताः अणिमाऽऽदित्रिखण्डाऽन्ताः । प्र क ट यो गि न्य इति तासामेव समष्टिनाम, यथा चैत्रो मैत्र इत्यादिप्रत्येकनामवतामपि मनुष्य इति समष्टिनाम तद्वत् ।

[1] ‘कलापदशक्यताऽवच्छेदककोटौ आनन्दस्याधिकस्य निवेश इति विशेषः’ इत्यधिकः—ब.

उक्तयोगिनीषु प्रकटत्वं च शिवादिषट्त्रिंशत्तत्त्वानां मध्ये या स्थूला पृथिवी तद्रूपे भूपुरे चतुरश्रे वर्तमानत्वात् । तदुक्तं नित्याहृदये—

तत्र प्रकटयोगिन्यश्चक्रे त्रैलोक्यमोहने ।
योगिन्यः प्रकटा ज्ञेयाः स्थूलविश्वप्रथात्मनि ॥
स्थितत्वात् . . . . ॥ इति ॥

त्रैलोक्यमोहनमिति [1]योगरूढिभ्यां चतुरश्रत्रयात्मकं सर्वबाह्यं यच्चक्रं तस्य नाम । समुद्रा इति—पूर्वं विस्तरेण दश याः प्रतिपादिताः तास्वेकैका मुद्रा एकैकचक्रेऽस्ति । दशमी त्रिखण्डा सर्वव्यापिका । अस्मिन्नर्थे प्रमाणं योगिनीतन्त्रेऽस्ति । श्रीभगवान् परशुरामोऽपि तत्तच्चक्रपूजायां एकैकमुद्राप्रदर्शनं वक्ष्यति । एवं च यस्मिन् या मुद्राऽस्ति तया सहिता इत्यर्थः । ससिद्धय इति—अत्र सिद्धिर्नाम तत्तच्छक्तिसाध्यं फलम् । तच्च स्वाकारेण सूक्ष्मरूपेण तिष्ठत्येवेति शक्तयोऽपि ससिद्धयः । सायुधा इति स्पष्टम् । सशक्तयः—अत्र शक्तिपदेन अणिमाऽऽदिनिष्ठा या तत्तत्कार्यजनकता तदवच्छेदको यो धर्मः स ग्राह्यः । न हि कारणता निरवच्छिन्ना लोके प्रसिद्धा । अतः स्वनिष्ठकारणतायां अवच्छेदकं किं चिदभ्युपगन्तव्यम् । अभ्युपगतं च यद्रूपं तत् अधिष्ठानादन्यन्न वेत्यन्यदेतत् । तादृशशक्त्या सहिताः । सवाहना इति स्पष्टम् । परिवारा अनुचराः तैः सहिताः । शेषो मन्त्रार्थः स्पष्टः । तासामणिमाऽऽदित्रिखण्डाऽन्तानां समष्ट्यर्चनं समुदायनामघटितमन्त्रेणार्चनं विधाय । अत्र मन्त्रगतलिङ्गेन प्रार्थनाङ्गत्वं प्रतीयते, लोट्श्रवणात् "प्रार्थनेषु लिङ् लोट् च" इति पाणिनिस्मृतेः । तथाऽपि "ममाग्ने वर्चो विहवेष्वस्तु" इति मन्त्रस्य "विहव्या उपदधाति" इति श्रुत्या लिङ्गं बाधित्वा उपधानाङ्गत्ववत् अर्चनाङ्गत्वं बोध्यम् । संपूजिताः सन्तु इति समष्ट्यर्चनं कृत्वा इत्यनेन अर्चनाङ्गत्वे प्रतीयमाने दुर्बलं लोट्श्रवणं न बाधकं भवति ॥ २ ॥

करशुद्धिमुच्चार्य त्रिपुराचक्रेश्वरीमवमृश्य द्रामिति सर्वसंक्षोभिणीमुद्रां प्रदर्शयेत् । चक्रयोगिनीचक्रेशीनां नामानि भिन्नानि । शिष्टं समानम् ॥ ३ ॥

[1] योगरूढिशक्त्या भूसदनात्मकचतुरश्ररेखात्रयस्य नाम—व.

अत्र करशुद्धिपदेन करशुद्धिन्यासाङ्गभूतो मन्त्रः न्यासप्रकरणोक्तः तं उच्चार्य । त्रिपुरेति त्रैलोक्यमोहनचक्रस्य नायिका । त्रिपुरा चासौ चक्रेश्वरी चेति कर्मधारयः । त्रिपुरेत्यत्र पुंवद्भावाभाव आर्षः । ईदृशीं चक्रेश्वरीं अवमृश्य संपूज्य । अत्रापि पूजारूपत्वात् श्रीपादुकेति मन्त्रशेषोऽस्ति । परं तु समष्ट्यर्चने श्रीपादुकामिति मन्त्रशेषो नास्ति, 'इति समष्ट्यर्चनं विधाय' इत्यत्र इतिशब्देन शेषव्यवच्छेदात् । द्रां इति सर्वसंक्षोभिणीमुद्राबीजं तां पठित्वा सर्वसंक्षोभिणीमुद्रां अङ्गुलिप्रग्रथनरूपां वक्ष्यमाणरीत्या प्रदर्शयेत् । देव्या इति शेषः । एवं वक्ष्यमाणरीत्या देव्यग्रभागे अङ्गुलिषु ग्रथितेषु तस्याः दर्शितं भवति । एवमग्रिमेष्ववगन्तव्यम् । एवं प्रकृते समष्ट्यर्चनमन्त्रं प्रकृतचक्रेश्याश्च मन्त्रमुक्त्वा अग्रिमसमष्ट्यर्चनमन्त्रे चक्रेशीमन्त्रे च केषांचित् वर्णानां पर्युदासपूर्वकं कांश्चिद्वर्णानतिदिशति—चक्रेति । चक्रनामानि सर्वाशापरिपूरकेत्यादीनि, योगिनीनां नामानि गुप्तेत्यादीनि, चक्रेशीनां त्रिपुरेत्यादीनि, यानि नामानि तद्वर्णाभिन्नानि । समुद्रा इत्यादिवर्णकूटं समानम् । अनेन तत्तत्प्रकरणे उक्तचक्रादिनामस्थाने वक्ष्यमाणनामानि पठनीयानीति भावः ॥ ३ ॥

द्वितीयावरणपूजा

अथ द्वितीयावरणपूजामाह—

षोडशपत्रे कामाकर्षिणी नित्याकळेति नित्याकळाऽन्ताः बुद्ध्याकर्षिणी-अहंकाराकर्षिणी-शब्दाकर्षिणी - स्पर्शाकर्षिणी - रूपाकर्षिणी - रसाकर्षिणी - गन्धाकर्षिणी - चित्ताकर्षिणी - धैर्याकर्षिणी - स्मृत्याकर्षिणी-नामाकर्षिणी-बीजाकर्षिणी - आत्माकर्षिणी - अमृताकर्षिणी - शरीराकर्षिणी - एता गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्रा इत्यादि पूर्ववत् आत्मरक्षामुच्चार्य त्रिपुरेशीमिष्ट्वा द्रीं इति सर्वविद्राविणीं प्रदर्शयेत् ॥ ४ ॥

नि त्या क ळे ति वर्णसमुदायः अ न्ते यन्त्राम्नः इति व्युत्पत्त्या बुद्ध्याकर्षिण्यादि-पञ्चदशस्वपि इदं विशेषणमनुषज्य योज्यम् । सर्वत्र पुंवद्भावो नाऽस्ति, प्रथममन्त्रपाठानुरोधात् । श्रीपादुकेत्यादिशेषः पूर्ववत् । षोडशपत्रे क्रमस्तु वामकेश्वरतन्त्रे—"षोडशारे महादेवीं वामावर्तेन पूजयेत्" इति । तत्राप्यारंभः कस्माद्दळादारभ्य कर्तव्य इति विशेषजिज्ञासायां देव्यग्रकोणमारभ्येति सेतुबन्धे स्थितम् । योगिनीचक्रयोः प्रकृतमन्त्रप्रवेशार्थं नामनी आह—ए ता गु प्त यो गि न्य इति, भूपुरापेक्षया षोडशदळस्य अन्तःस्थत्वेन, तत्रस्था योगिन्यः गुप्ताः । "शिष्टं समानं" इति पूर्वसूत्रेणैव प्राप्तमर्थं अनुवदति स मु द्रा इत्यनेन । अनुवादफलं च तदर्थकानां पदान्तराणां मन्त्रे प्रक्षेपो मा भवत्वित्येतदर्थम् । पू र्व व त् पूर्वं यथोच्चरितं तथैवेत्यर्थः । आ त्म र क्षा तन्मन्त्रः । शेषं स्पष्टम् ॥ ४ ॥

तृतीयावरणपूजा

तृतीयावरणपूजामाह—

दिक्पत्रे कुसुमामेखलामदनामदनातुरारेखावेगिन्यङ्कुशामालिनीरनङ्गपूर्वाः संमृश्यैता गुप्ततरयोगिन्यः सर्वसंक्षोभणचक्रे समुद्रा इत्यादि पूर्ववदात्मासनमुच्चार्य 'त्रिपुरसुन्दरीमिष्ट्वा क्लींमिति सर्वाकर्षिणीमुद्रां प्रदर्शयेत् ॥ ५ ॥

अत्र दि क् पदमष्टसंख्यालक्षकं, दिक्षु अष्टसंख्यायाः सत्त्वात् । तथा च दिग्वृत्तिसंख्यानि पत्राणि यस्मिन्निति व्युत्पत्त्या तृतीयचक्रपरम् । दिक्ष्वष्टसंख्या च अवान्तरदिशो गृहीत्वा, "चतस्रो दिशश्चतस्रोऽवान्तरदिशाः" इति श्रुतेः । अवान्तरदिक्ष्वपि "अधिकं तु प्रविष्टं न तद्धानिः" इति न्यायेन दिक्त्वमबाधितम् । अनङ्ग इति पूर्वं यासां कुसुमादीनां देवतानां नामादौ ता देवता अ न ङ्ग पू र्वाः । अत्रान्यपदार्थो देव्यः, न कुसुमादिवर्णसमुदायः, सं मृ श्ये त्यस्यानन्वयापत्तेः । एतद्देवतापूजाक्रमश्च योगिनीतन्त्रे—

अनङ्गकुसुमां पूर्वे दक्षिणेऽनङ्गमेखलाम् ।
पश्चिमेऽनङ्गमदनामुत्तरे मदनातुराम् ॥
अनङ्गरेखामाग्नेये नैर्ऋतेऽनङ्गवेगिनीम् ।
अनङ्गाङ्कुशां वायव्ये ईशानेऽनङ्गमालिनीम् ॥ इति ॥

पूर्वचक्रदेवताऽन्तरङ्गत्वात् आसां गुप्ततरत्वम् । शेषं गतप्रायम् ॥ ५ ॥

चतुर्थावरणपूजा

चतुर्थावरणपूजामाह—

भुवनारे संक्षोभिणीद्राविण्याकर्षिण्याह्लादिनी-संमोहिनीस्तम्भिनीजृम्भिणीवशंकरीरञ्जन्युन्मादि-न्यर्थसाधिनी-संपत्तिपूरणी-मन्त्रमयी-द्वन्द्वक्षयंकरीः सर्वादीरवमृश्यैताः संप्रदाययोगिन्यः सर्वसौभाग्य-दायकचक्रे समुद्रा इत्यादि मन्त्रशेषः चक्रासनमुच्चार्य त्रिपुरवासिनीं चक्रेश्वरीमिष्ट्वा ब्लूं इति सर्ववशंकरी-मुद्रामुद्धाटयेत् ॥ ६ ॥

भुवनारे चतुर्दशारे । भुवनानि चतुर्दश । शेषं दिक्पत्रवत् । सर्व आदिर्यन्नामावयवानामित्यपि व्याख्यातप्रायं अनङ्गपूर्व इत्यनेन । क्रमाकांक्षायां योगिनीतन्त्रे "वामावर्तक्रमेणैव पश्चिमादेव दक्षिणं" इति पश्चिमे प्रारम्भः ततस्ततो दक्षिणं ग्राह्यमिति तदर्थः । पश्चिमादारभ्य अप्रादक्षिण्येनेति फलितोऽर्थः ॥ ६ ॥

पञ्चमावरणपूजा

पञ्चमावरणपूजामाह—

बहिर्दशारे सिद्धिप्रदासंपत्प्रदाप्रियंकरीमङ्गळ-कारिणीकामप्रदादुःखविमोचिनीमृत्युप्रशमनीविघ्न-

निवारिण्यङ्गसुन्दरीसौभाग्यदायिनीः सर्वपूर्वाः संपूज्यैताः कुलोत्तीर्णयोगिन्यः सर्वार्थसाधक[1]चक्रे मनुशेषमुक्त्वा मन्त्रासनमुच्चार्य त्रिपुराश्रीचक्रेश्वरीं प्रत्यवमृश्य, स इत्युन्मादिनीमुद्रां दद्यात् ॥ ७ ॥

नवचक्रेषु दशारद्वयमस्ति। तयोर्मध्ये यत् बहिर्दशारं तत्रेत्यर्थः। शेषं व्याख्यातप्रायम्। अत्रापि क्रमाकांक्षायां पूर्वचक्रवदेव क्रमः। वामकेश्वरतन्त्रे तथैवेत्यनेन पूर्वचक्रक्रमातिदेशात् ॥ ७ ॥

षष्ठावरणपूजा

षष्ठावरणपूजामाह—

अन्तर्दशारे ज्ञानशक्त्यैश्वर्यप्रदाज्ञानमयीव्याधिविनाशिन्याधारस्वरूपापापहराऽऽनन्दमयीरक्षास्वरूपिणीप्सितफलप्रदाः सर्वोपपदा यष्टव्या एता निगर्भयोगिन्यः सर्वरक्षाकरचक्रे शिष्टं तद्वत् साध्यसिद्धासनमुच्चार्य त्रिपुरमालिनी मान्या क्रोमिति सर्वमहाङ्कुशां दर्शयेत् ॥ ८ ॥

सर्वोपपदाः सर्वपूर्वाः। मान्या पूज्या। क्रमस्तु पूर्ववत्, "पूर्वोक्तेन विधानेन" इति योगिनीतन्त्रात्। शेषं व्याख्यातकल्पम् ॥ ८ ॥

सप्तमावरणपूजा

सप्तमावरणपूजामाह—

अष्टारे वशिन्याद्यष्टकं नमःस्थाने पूजामन्त्रसन्नाम एता रहस्ययोगिन्यः सर्वरोगहरचक्रे शिष्टं स्पष्टं

[1] चक्रे इति मनु—श्री.

मूर्तिविद्यामुच्चार्य त्रिपुरासिद्धामाराध्य शिवभृगु-ऋद्धियुक्स्फ्रें इति खेचरी देया ॥ ९ ॥

योगिनीन्यासप्रकरणे ये वशिन्यादीनामष्टौ मन्त्रा उद्धृताः तेषु नमःपदस्थाने पूजामन्त्रस्य श्रीपादुकेति मन्त्रस्य सन्नाम ऊहः कार्यः। चतुर्थीसहितनमःपदस्थाने पूजामन्त्रः कार्य इत्यर्थः, अन्यथा [1]चतुर्थीश्रवणापत्तेः ॥

न च—नमःपदनिवृत्तौ तद्योगनिमित्तचतुर्थ्यपि निवर्तते "निमित्तापाये नैमित्तिकापायः" इति न्यायात् इति—वाच्यम्। न हि चतुर्थीसत्त्वे नमःपदं निमित्तम्, किं तु तदुत्पत्तौ। तथा च नमःपदं निमित्तीकृत्योत्पन्ना या चतुर्थी तस्या निवर्तकपर्यन्तं स्थितौ बाधकाभावात् ॥

न च—चतुर्थ्युत्पत्तेः प्रागेव नमःपदं निवर्तताम्, तथा सत्युत्पादकाभावात् न चतुर्थी इति—वाच्यम्। न्यासमन्त्रस्य पूजामन्त्रप्रकृतित्वे सिद्धे प्रकृतितोऽतिदेशेन चतुर्थीनमःपदसहितप्राप्तौ नमःपदं युक्तविन्यासेनोहेन बाधितं, चतुर्थी केन बाध्यताम्। श्रौते प्रकृतितोऽग्निपदसहितनिर्वापमन्त्रस्य प्राप्तौ सूर्ययागे अर्थबाधात् अग्निपदमात्रस्य सूर्यपदेन बाधः न चतुर्थ्याः। तथाऽत्रापि। तस्मात् चतुर्थीसहित-नमःपदबाधकः पूजामन्त्रः। शेषं गतप्रायम् ॥

मूर्तिविद्या मूर्तिकल्पनमन्त्रः आवाहनप्रकरणे उक्तः। शिवो हकारः भृगुः सकारः ऋद्धिः खकारः। अत्र प्रमाणानि प्राक् दर्शितानि। तैर्युक्तः फ्रे मिति वर्णः ह्स्ख्फ्रें इति। इममुच्चार्य खेचरीं दर्शयेदित्यर्थः ॥ ९ ॥

आयुधपूजा

आयुधपूजामाह—

बाणबीजान्युच्चार्य सर्वजृंभणेभ्यो बाणेभ्यो नमः धं थं सर्वसंमोहनाय धनुषे आं ह्रीं सर्ववशीकरणाय पाशाय क्रों सर्वस्तंभनायाङ्कुशाय नमः इति महात्र्यश्रबाह्यचतुर्दिक्षु बाणाद्यायुधपूजा ॥ १० ॥

[1] चतुर्थीपूर्वं श्रूयमाणा या तस्याः बाधकाभावेन तच्छ्रवणं स्यात्—अ. श्री.

बाणबीजानि संक्षोभिण्यादिपञ्चमुद्राबीजानि [1]कामेश्वरबाणानां बीजानि । तदुक्तं मालिनीतन्त्रे—

थान्तद्वयं समालिख्य वह्निसंस्थं क्रमेण तु ।
मुखवृत्तेन नेत्रेण बिन्दुना परिभूषितम् ॥
बाणद्वयमिदं प्रोक्तं मादनं भूमिसंस्थितम् ।
चतुर्थस्वरबिन्द्वाढ्यं नादरूपं वरानने ॥
फान्तं [2]चक्रेण संयुक्तं वामकर्णविभूषितम् ॥
बिन्दुनादसमायुक्तं सर्गवान् चन्द्रमाः प्रिये ॥
पञ्च बाणानिमान् विद्धि मामकान् प्राणवल्लभे ॥ इति ॥

अस्यार्थः—थान्तः मातृकाक्रमे थकाराग्रिमो दकारः तस्य द्वयं लिखित्वा तयोर्मध्ये प्रथमदकारं वह्निना रेफेण संस्थं युक्तं, मुखवृत्तमाकारः, मातृकान्यासे तस्य तत्स्थानत्वात् । बिन्दुश्च ताभ्यां सहितः । द्रामिति संपन्नम् । द्वितीयदकारेऽपि वह्निसंस्थत्वं तल्लग्नं तदनन्तरं नेत्रेण वामनेत्रेण ईकारेण, मातृकान्यासे तत्स्थानत्वात्, बिन्दुना च समन्वितं द्रीमिति संपन्नम् । एवं संपन्नबीजद्वयं बाणद्वयं भवति । आद्यबाणद्वयबीजं भवति । एवं मादनं ककारः भूमिः लकारः तस्मिन् संस्थितं—अधो लकारः उपरि ककारः इति भावः—चतुर्थस्वर ईकारः बिन्दुः प्रसिद्धः ताभ्यां आढ्यं युक्तम्, क्लीमिति संपन्नम् । फान्तं बकारः, व्युत्पत्तिः थान्तवत्, चक्रेण लकारेण युक्तं वामकर्ण ऊकारः तेन बिन्दुना च युक्तं, ब्लूमिति संपन्नम् । सर्गो विसर्गः तद्वान् चन्द्रमाः सकारः स इति । एवं च द्रां द्रीं क्लीं ब्लूं सः इति पञ्च मामकान् बाणान् विद्धीत्यर्थः । कामेश्वरीबाणबीजानि योगिनीतन्त्रे—

त्वगसृङ्मांसमेदोऽस्थिमज्जार्णान्ताः सुरेश्वरि ।
द्वितीयस्वरसंयुक्ता एते बाणास्तदीयकाः ॥ इति ॥

[1] तदुक्तं कुलसारे—
संक्षोभिण्यादिमुद्राणां यानि बीजानि पञ्च वै ।
तानि सर्वाणि देवेशि शरादौ संप्रकीर्तयेत ॥ इति ॥
इत्यधिकः—व.

[2] शक्रेण—श्री.

अस्यार्थः—त्वक् यकारः "त्वग्वाली व्यापको वायुः" इति कोशात् । असृग्रेफः "रो रक्तः क्रोधिनी रेफः" इति कोशात् । मांसं लकारः "पिनाकी मांससंज्ञिकः" इति कोशात् । मेदो वकारः "वो मेदो वरुणः सूक्ष्मः" इति कोशात् । अस्थिमज्जान्ते चरमदेशे स्थितं शुक्रं तद्वर्णः सकारः "दशपादो भृगुः शुक्रं इति" कोशात् । यद्वा—अस्थिमज्जार्णौ शषौ, "शङ्कुकर्णास्थिसंज्ञश्च शकारो विद्धिरीरितः" इति, तथा "वृषः श्वेतेश्वरः पीतो मज्जा" इति षकाराधिकारे च कोशात् । तयोरन्ते वर्तमानः स इत्यर्थः । उक्ताः वर्णाः द्वितीयस्वरसंयुक्ताः, आकारेण युक्ताः, बीजरूपत्वात् बिन्दुयोगोऽपि । इत्थं च यां रां लां वां सां इति देव्या बाणबीजानि। उक्तवर्णेषु बिन्दुयोगस्तन्त्रान्तरे—"सर्वेऽन्तस्थास्तृतीयोष्मा बिन्द्वनन्तसमन्विताः" । यरलवा अन्तस्थाः, तृतीयोष्मा सकारः, अनन्त आकारः । अत्र बाणबीजपदेन सर्वेषां ग्रहणम्, सेतुबन्धे यां रां लां वां सां सर्वजृम्भणेभ्यः कामेश्वरी बाणेभ्यो नमः, द्रां द्रीं क्लीं ब्लूं सः सर्वजृम्भणेभ्यः कामेश्वरबाणेभ्यो नमः इति मन्त्रद्वयं लिखित्वा, अग्रे "इदं च कल्पसूत्रानुगुण्येनोक्तं" इति लिखित्वा, "वस्तुतस्तु स्वतन्त्रानुसारेण आदौ द्वितारी ततो दशबाणबीजान्युच्चार्य सर्वजृंभणबाणशक्तिश्रीपादुकां पूजयामि" इति लेखात् ॥

निबन्धे तु कामेश्वरबाणबीजमात्रं लिखित्वा सर्वजृम्भणेभ्यो बाणेभ्यो नमः इति मन्त्रस्वरूपं लिखितम् । तत्र बाणबीजत्वस्योभयसाधारणत्वेन बाणबीजान्युच्चार्येत्यनेन शिवबाणानामेवोच्चारणं न देव्या इति भगवतो रामस्याभिप्रायनिष्कासने प्रमाणगन्धस्याप्यभावात्, प्रत्युत स्थूलमानेन विचार्यमाणे ललितोपास्तेः उपक्रान्तत्वात् तदीयबाणपूजनमेव युक्तम् । तानपहाय केवलशिवबाणानेव लिलेख । तदीयं साहसं महत्तरम् ॥

न च तथा सति उत्तरमन्त्रेषु धनुषे पाशायाङ्कुशायेत्येकवचनमनुपपन्नं इति वाच्यम्; पाशाधिकरणन्यायेनोपपत्तिसंभवात् । यद्वा—बीजदशकमुच्चार्य सर्वजृम्भणेभ्यो बाणेभ्यो नमः इति द्वयोः तन्त्रेणैव पूजनम् । देवतात्वं चाग्नीषोमवद्व्यासक्तम् । इत्थमेव पाशादिषु । एवं च "आशासाना मेधपतये मेधम्" इतिवत् धनुर्द्वयनिष्ठदेवतात्वस्य व्यासक्तत्वात्, देवतात्वावच्छिन्नस्यैकत्वात्, तदभिप्रायेणैकवचनोपपत्तिः । बाणपदोत्तरं बहुवचनं च देवतात्वाधिष्ठानान्वयीति "मेधपतिभ्यां मेधं" इतिवत् न काऽप्यनुपपत्तिः ॥

न च—निबन्धकारः शिवबाणबीजान्युल्लिखन् बभ्रामेत्यास्ताम्। परं तु ललिताप्रकरणस्थत्वात् शक्तिबाणबीजानामेवात्र ग्रहणम्, बाणबीजान्युच्चार्य इति कल्पसूत्रेणाविशेषेण श्रुतस्यापि प्रकरणेन सङ्कोचस्य "आग्नेय्याऽऽग्नीध्रमुपतिष्ठते" इत्यादौ दृष्टत्वात्—इति वाच्यम्;

कामबाणान् महेशानि धनुस्तत्पाशमेव च।
चक्रमध्ये चतुःकोणे क्रमेण परिपूजयेत्॥

इति वामकेश्वरतन्त्रवचनेन तेषां शिवायुधानामपि ललिताप्रकरणे पूजनं विहितम्, प्रकृते कल्पसूत्रे बाणबीजान्युच्चार्येति अविशेषेण श्रुतस्य प्रकरणेन सङ्कोचे कर्तव्ये ततोऽपि बलवता वाक्यान्तरेण श्रूयमाणार्थस्यैव व्यवस्थापनात्। "आग्नेय्याऽऽग्नीध्रमुपतिष्ठते" इत्यत्र प्रकरणबाधकं वचनान्तरं नास्तीति वैषम्यम्॥

न च तन्त्रान्तराश्रयणं न क्रियत इति प्रतिज्ञाहानिः, सूत्रार्थनिर्णयाय वचनान्तरानुसरणे प्रतिज्ञायामनुपपत्त्यभावात्॥

किं च, बहुषु पुस्तकेषु कल्पसूत्रपाठः "धं थं सर्वसंमोहनाय धनुषे नमः, आं ह्रीं सर्ववशीकरणाय पाशाय नमः" इति, अयमपि बाणद्वयग्रहणे लिङ्गम्। अन्यथा धनुर्बाणयोरुभयसंबन्धिनोः ग्रहणसूचकं बीजद्वयं किमिति पठेत्। दृश्यते च बहुषु पुस्तकेष्वयमेव पाठः। तस्मादुभयपूजनमावश्यकम्। यदि च केषुचित्पुस्तकेषु बीजद्वयपाठस्यादर्शनात् निश्शङ्कं परमतसिद्धिरिति विभाव्यते, तदाऽपि सर्वपुस्तकेष्वविवादेन धं इति धनुर्मन्त्रे शिवधनुर्बीजमस्ति, "तुरीयमरुणावर्गात् द्वितीयमपि पार्वति। पुंस्त्रीकोदण्डयुगळम्" इति वामकेश्वरतन्त्रात्। अस्यार्थः—अरुणावर्गस्तवर्गः, तत्र तुरीयो धकारः द्वितीयः थकारः क्रमेण पुंस्त्रीधनुषी इत्यर्थः। अनेन धं इति शिवधनुर्बीजं सिद्धम्। एवं पाशे ह्रीं इत्यविवादेन सर्वपुस्तकेष्वस्ति। तच्च शक्तिपाशबीजं, "माया स्त्रीपाश उच्यते" इति योगिनीतन्त्रवचनात्। एवं कचित् पुमायुधबीजकथनं, क्वचित् स्त्र्यायुधबीजकथनं, प्रग्रथनरूपं आयुधद्वयग्रहणे सर्वपुस्तकसाधारणं लिङ्गम्। तन्त्रान्तरवचनं च स्पष्टरूपं लिखितं प्राक्। एकवचनगतिः दर्शिता। अतो विरोधाभावादायुधद्वयमत्र पूज्यमिति ममासंशयं प्रतिभाति। धर्मस्यातीन्द्रियत्वात् साधवः सुधियः परिशीलयन्तु इतो-

ऽप्यधिकम् । इत्थं च यस्मिन् पुस्तके धनुर्मन्त्रे केवलधमित्यस्ति तत् थं इत्यस्याप्युपलक्षकं, तृतीयमन्त्रे ह्रीमिति आमित्यस्याप्युपलक्षकं, तस्य शिवपाशरूपत्वात्, "आद्यन्तगो महापाशः पौरुषेयः प्रकीर्तितः" इति वामकेश्वरतन्त्रात् । एतदर्थोऽपि प्राक् नीलपताकामन्त्रोद्धारे वर्णितः । अङ्कुशबीजं तु उभयोरेकं "कामोऽग्निर्व्यापकोऽङ्कुशः" इत्यविशेषेण योगिनीतन्त्रपाठात् । तस्य तन्त्रेण सकृदेव पाठः । इत्थं च मन्त्रस्वरूपं यां रां लां वां सां द्रां द्रीं क्लीं ब्लूं सः सर्वजृंभणेभ्यो बाणेभ्यो नमः [1]बाणश्रीपादुकां पूजयामि । थं धं सर्वसंमोहनाय धनुषे नमः धनुःश्रीपादुकां पूजयामि । ह्रीं आं सर्ववशीकरणाय पाशाय नमः पाशश्री° । क्रों सर्वस्तम्भनायाङ्कुशाय नमः अङ्कुशश्री° इति । शक्तिबीजानां प्राथम्ये तत्प्राधान्यं गमकम् ॥

केचित्तु तन्त्रानुयायिनः दशबीजान्युच्चार्य कामेश्वरकामेश्वरीबाणेभ्यो नमः इति पठन्ति । तदतीवाशुद्धम् । कामेश्वरी च कामेश्वरश्चेति द्वन्द्वापवादकत्वात् "पुमान् स्त्रिया" इत्येकशेषः स्यात् न द्वन्द्वः ॥

महात्र्यश्रं आद्यत्रिकोणं तस्य बाह्यतः अष्टाश्रत्र्यश्रमध्ये दिक्षु पश्चिमादिप्रादक्षिण्येन । तदुक्तं वामकेश्वरतन्त्रे—

पश्चिमोत्तरपूर्वाशा दक्षिणाशा क्रमेण तु । इति ॥

अत्र निबन्धे आयुधमन्त्रेषु श्रीपादुकामिति शेषयोजनाभावे मूलं स एव प्रष्टव्यः ॥

न च—अष्टाक्षरीप्रापकं सर्वत्र देवतानामसु श्रीपूर्वकं पादुकामित्यादिवाक्यं तत्र देवतानामस्वित्यनेन यत्र नाम देवताया गृह्यते तत्रैवाष्टाक्षरी नान्यत्र । प्रकृते विधायकवाक्ये बाणादिरूपनामग्रहणाभावात् न तथा—इति वाच्यम् । देवतानामस्वित्यस्य देवतानामघटितमन्त्रेष्विति निबन्धकारेणाप्यवश्यं वाच्यम् । अन्यथा ओघत्रये तद्योगः तत्त्वतो विरुध्यते । तत्र विधिवाक्ये देवतानामग्रहणं नास्ति, किं त्वोघत्रयमेवास्ति । तस्मान्न किंचिदेतत् ॥ १० ॥

[1] बाणशक्तिश्री—श्री.

अष्टमावरणपूजा

अष्टमावरणपूजामाह—

त्रिकोणे वाक्कामशक्तिसमस्तपूर्वाः कामेश्वरीवज्रेश्वरीभगमालिनीमहादेव्यः बिन्दौ चतुर्थी ॥ ११ ॥

या परशिवरूपदीपस्य प्रकाशरूपा परा शक्तिः सा सृष्ट्युन्मुखा त्रिधा जाता वामा ज्येष्ठा रौद्री चेति। क्रमात् रजस्सत्वतमःप्रधानाः ताः। तासां समष्टिवाचकं पदं तन्त्रशास्त्रे अम्बिकेति। इमा एव क्रमात् इच्छाज्ञानक्रियाशक्तयः इत्युच्यन्ते। अमूषां त्रिपुरसुन्दरीव्यष्टिरूपत्वं ज्ञापयितुमेव योगिनीषु अतिरहस्येति विशेषणं अग्रे दत्तवान्। अत्र वाग्भवपदेन प्रथमकूटं ग्राह्यम्, कामपदेन द्वितीयकूटं, शक्तिपदेन तृतीयकूटं, न तु बालावर्णाः, वामकेश्वरतन्त्रे कूटानामेव परिगृहीतत्वात्। यद्यपि तन्त्रान्तरे "वाग्भवं चाद्यकूटं च" इति समुच्चयोऽपि द्वयोर्दृश्यते, तथाऽपि अत्र वागादीनामेवोक्तत्वात् योगिनीतन्त्रानुसारेण कूटमात्रग्रहणम्। समस्तं कूटत्रयम्। इमानि पूर्वं यासां नाम्नां ताः चतस्रः त्रिकोणे त्रिकोणकोणत्रये बिन्दौ च पूज्या इत्यर्थः ॥

निबन्धकारः चतुर्थदेवताया मन्त्रे समष्टिमूलानन्तरं ललिताश्री° इति लिलेख। तत्तुच्छम्। कामेश्वरीवज्रेश्वरीभगमालिनीमहादेव्यः इति सूत्रे क्रमेण चतसृणां देवतानां नामसु सत्सु शास्त्रप्रसिद्धं परित्यज्य स्वकपोलकल्पितं ललितेति नाम मन्त्रे प्रवेशयामास। अत्र शास्त्रं न प्रमाणम्। अचिन्त्यशक्तिमन्त्रेष्वपि स्वेच्छाप्रवृत्तिशीलो यः तद्वचनं महान्तोऽपि विश्वसन्ति। अत्र मूलं श्रीभगवन्मायासमुत्पन्नालस्यमेव नान्यत्। न च—महादेवीपर्याय एव ललिताशब्दः, तत्प्रयोगे किं बाधकं—इति वाच्यम्। "अग्निमीळे" इति मन्त्रे वह्निमीळ इत्यपि प्रयोगेनापूर्वं स्यात्। इत्यलमसदावेशेन ॥

क्रमस्तु वामकेश्वरतन्त्रे—

कामेश्वरीमग्रकोणे वज्रेशीं दक्षिणे ततः।
भगमालिनीं तथा वामे मध्ये त्रिपुरसुन्दरीम् ॥ इति ॥ ११ ॥

कामेश्वर्यादीनां मूलदेव्यभिन्नत्वम्

ननु पञ्चदशनित्यानां मन्त्रेण मूलविद्यया चाभ्यर्च्य इति विहितं, प्रकृतेऽपि तुरीयदेवताया मूलेन पूजनमुक्तं, बिन्दुचक्रेऽपि वक्ष्यति मूलेन पूजनं, एवं चरमचक्रेश्वर्या अपि। एवं च एकमन्त्रकरणकत्वात् एकदेवताकं यागत्रयं अभ्यासरूपं वा भिन्नदेवताकं वा इति शङ्कायां देवतैक्यं प्रतिपादयति—

तिसृणामासामनन्तरमभेदाय मूलदेव्याः पूजा। कामेश्वर्यादिचतुर्थी नित्यानां षोडशी चक्रदेवीनां नवमी बिन्दुचक्रस्था चेत्येकैव। न तत्र मन्त्रदेवताभेदः कार्यः। तन्महादेव्या एव। चतुर्षु स्थलेषु विशेषार्चनमावर्तते॥ १२॥

आसां कामेश्वर्यादीनां तिसृणामनन्तरं आसां मूलदेव्यभिन्नत्वप्रतिपादनाय मूलदेव्याः पूजा। एवं स्थलान्तरेऽपि त्रिपुरसुन्दर्या अन्ते पूजनं तत्र तत्र स्वस्वपूर्वदेवताकूटाभेदं ज्ञापयति। इममेवार्थं स्पष्टं दर्शयति—कामेश्वरीति। प्रकृतचक्रे कामेश्वर्यादिभ्यः परं चतुर्थी, पञ्चदशनित्याभ्यः परं षोडशी, अष्टचक्रात् परं नवमे बिन्दौ सैव चकारसूचिता, पुनर्बिन्दावेव अष्टचक्रेशीपूजाऽनन्तरं चक्रेशीत्वेन पूज्या एकैव। तत्र एषु स्थलेषु देवताभेदः मन्त्रभेदश्च नास्ति। इत्थं च नित्याः समस्तावरणदेव्यश्च त्रिपुरसुन्दर्या अव्यतिरिक्ता इति ज्ञापयितुं तत्तदन्ते उक्तं इति भावः। ननु देवतैक्ये द्रव्यैक्ये मन्त्रैक्ये सकृदेव पूजनं युक्तं, किमिति पूजात्रयं, अत आह—चतुर्षु स्थलेषु विशेषार्चनमावर्तते इति। दर्शितचतुःस्थलेष्वित्यर्थः। तथा च यागैक्येऽपि तदभ्यासस्यापूर्वसाधनत्वेनावश्यकत्वादिति भावः। न चाभ्यासे सति यथा प्रोक्षणमन्त्रो नावर्तते तथा मन्त्रावृत्तिर्न स्यात् इति वाच्यम्; क्रियाऽन्तरव्यवधाने अभ्यासेऽपि मन्त्रावृत्तेः अग्निहोत्रादौ दृष्टत्वात्। तथाऽत्रापि क्रियाऽभ्यासरूपत्वेऽपि स्वविजातीयक्रियाऽन्तरव्यवधानाद्युक्ता मन्त्रावृत्तिः॥ १२॥

प्रासङ्गिकमुक्त्वा प्रकृतमाह—

एता अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे । परिशिष्टं द्रष्टव्यम् । आवाहनीमुच्चार्य त्रिपुराम्बां संभाव्य ह्स्रौं इति बीजमुद्राकृतिः ॥ १३ ॥

परिशिष्टमित्यनन्तरं पूर्ववत् इति शेषः । आवाहनी तत्प्रकरणोद्धृता विद्या । संभाव्य पूजयित्वा । कृतिः कर्तव्येत्यर्थः ॥ १३ ॥

नवमावरणपूजा

नवमावरणपूजामाह—

बिन्दुचक्रे मूलेन देवीमिष्ट्वा एषा परापररहस्य-योगिनी सर्वानन्दमये चक्रे समुद्रा ससिद्धिः सायुधा सशक्तिः सवाहना सपरिवारा सर्वोपचारैः संपूजिताऽस्त्विति पुनर्मूलमुच्चार्य महाचक्रेश्वरीमिष्ट्वा वाग्भवेन योनिं प्रदर्श्य ॥ १४ ॥

अत्रापि निबन्धकारः मूलान्ते श्रीललिताश्रीपादुकां पूजयामि इति योजयामास। तदशुद्धम् । एतत्पूर्वसूत्रे "न तत्र मन्त्रदेवताभेदः कार्यः तन्महादेव्या एव चतुर्षु स्थलेषु" इति वाक्ये स्थलचतुष्टयेऽपि महादेव्याः पूजनं इति कण्ठरवेणोक्तम् । श्रुत्या श्रुतशब्दं परित्यज्य अश्रुतशब्दस्य कल्पनं अशास्त्रीयम् । अन्यथा "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्यस्मिन् यागे सूर्यपर्यायशब्दं प्रक्षिप्य "दिवाकराय जुष्टं निर्वपामि" इति स्यात् । न च—तत्र सूर्यशब्दः उत्पत्तिवाक्ये श्रुतः, इह तु पूर्वसूत्रं नोत्पत्तिवाक्यं, किं तु अभ्यासरूपगुणविधायकमिति वैषम्यं—इति वाच्यम् । नायमैकान्तिको नियमः, उत्पत्तिवाक्य एव श्रवणमपेक्षितमिति । नक्षत्रेष्ट्युपहोमोत्पत्ति-वाक्यं "सोऽत्र जुहोति" इत्येतावन्मात्रम् । नात्र देवतावाचकः शब्दः श्रूयते । तथाऽपि मन्त्रे—"अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा" इत्यत्र श्रूयमाणो योऽग्न्यादिशब्दः

तं गृहीत्वा प्रथममन्वाधानेऽग्निमाज्येन इति व्यवहरन्ति, न तु वह्निमाज्येनेति। यद्युत्पत्तिवाक्य एवेति नियमः, तर्ह्यत्र स्वेच्छया स्यात् । न च अस्य क्रमस्य उत्पत्तिवाक्ये "शक्तिचक्रैकनायिकायाः ललितायाः क्रममारभेत" इत्यस्मिन् ललिताशब्दस्य श्रुतत्वात् तद्ग्रहणं इति निबन्धाभिप्रायः वर्णितुं शक्यः । तथा सति पूर्वसूत्रे ललिताया एव चतुर्षु स्थलेषु इति वक्तव्ये तमपहाय महादेव्या एवेति कथनस्य फलं ब्रह्मणाऽपि वक्तुं अशक्यम् । मन्मते तु ललितामहादेवीशब्दयोः एकार्थकत्वेऽपि यत्र विशेषो न श्रुतः तत्र ललिताशब्दप्रयोगः, यत्र श्रुतः तत्र श्रुतशब्दोच्चारणं अपूर्वजनकमिति ज्ञात्वा ललिताशब्दपरित्याग इति । फलं सङ्कल्पादौ श्रीललिताप्रीतये इति वक्तव्यम् । प्रकृते महादेवीशब्दस्य निरवकाशस्य प्रयोग उचितः । अत एवानया दिशा नवम्याः चक्रेश्वर्याः मन्त्रे महादेवीप्राप्तौ विशेषतश्चक्रेशीमिष्ट्वेति तत्र श्रुतत्वात् महादेवीशब्दबाधः, "सावकाशनिरवकाशयोः निरवकाशं बलीयः" इति न्यायात् । न च—एवं सति चतुर्षु मन्त्राभेदः प्रदर्शितः, इदानीं त्रिषु महादेवीघटितो मन्त्रः, एकत्र महाचक्रेश्वरीघटित इति मन्त्रभेदः पतितः, कथमेतत्—इति वाच्यम्; निबन्धकारेणापि ललितामहाचक्रेश्वरीश्री० इति लिखितत्वेन अस्य दोषस्य उभयसाधारणत्वेनाचोद्यत्वात् । प्रत्युत निबन्धकारमन्त्रस्य ललितापदघटितत्वेन अस्त्यत्यन्तवैलक्षण्यम् । मन्मते देवीस्थाने चक्रेश्वरीमात्रप्रक्षेपे "एकदेशविकृतमनन्यवत्" इति वैय्याकरणपरिभाषामाश्रित्य निर्वाहो भविष्यतीत्यलमतिविस्तरेण ॥

महादेवीशब्दनिरुक्तिर्देवीभागवते—

बृहदस्य शरीरं यदप्रमेयं प्रमाणतः ।
धातुर्महेति पूजायां महादेवी ततः स्मृता ॥ इति ॥

वाग्भवेन ऐं इत्यनेन, न प्रथमकूटेन, पूर्वाष्टमुद्राबीजेषु वर्णैकत्वदर्शनात्, तत्पङ्क्तिस्थस्यास्यापि तादृशत्वस्यावश्यकत्वात् । अतः ऐं इत्यस्यैव ग्रहणं युक्तम् ॥ १४ ॥

धूपादिदानम्

एवं नवावरणपूजां विधाय अग्रे कर्तव्यक्रियाशेषमाह—

पूर्ववद्धूपदीपमुद्रातर्पणनैवेद्यादि दत्वा ॥ १५ ॥

धूपादिनैवेद्यान्तेषु पूर्वोक्तधर्माणां प्राप्त्यर्थं पूर्ववदिति । धूपादिषु ये पूर्वोक्तधर्माः तद्धर्मकाः ते धूपादयः कार्या इत्यर्थः । ते च धर्माः धूपदीपनैवेद्येषु पूर्वमन्त्राः । मुद्रासु पूर्ववत्त्वं तर्पणे मूलमन्त्रः त्रिरभ्यासः इत्येवंरूपाः ज्ञेयाः । आदिपदेन ताम्बूलकर्पूरनीराजनादिमद्रव्यप्रज्वलनप्रभृतयो ग्राह्याः ॥

निबन्धकारः, षोडश्युपासकः त्रिखण्डामपि प्रदर्शयेत् इत्युवाच । स बभ्राम, तथा व्यवस्थायाः सूत्रे अनुक्तत्वात् ॥

त्रिखण्डाऽऽदिमुद्राणां स्वरूपम्

अत्र संक्षोभिण्यादिमुद्राप्रदर्शनार्थं तत्कथंभावज्ञानस्यावश्यकत्वात् तन्मुद्रादर्शन-प्रकारः सप्रमाणं संक्षेपेण कथ्यते । तत्रावाहने प्रथमं विनियुक्ता त्रिखण्डोच्यते । त्रिखण्डालक्षणमुक्तं वामकेश्वरतन्त्रे—

परिवर्त्य करौ स्पृष्टावङ्गुष्ठौ कारयेत् समौ ।
अनामाऽन्तर्गते कृत्वा तर्जन्यौ कुटिलाकृती ॥
कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि ।
त्रिखण्डेयं समाख्याता त्रिपुराऽऽह्वानकर्मणि ॥ इति ॥

परिवर्तनं नाम हस्तद्वयाङ्गुळिमेळनम् । इदं सर्वत्राधिकाररूपं सदन्वेति । अङ्गुष्ठौ सरळौ परस्परस्पृष्टौ, तथैव कनिष्ठे मध्यमे च कुर्यात् । वामानामोपरि दक्षानामां तिर्यक् प्रसार्य तयोरधःप्रदेशात् तर्जनीद्वयमानीय कुटिलाकाराभ्यां तर्जनीभ्यां अनामाऽग्रद्वयं धारयेत् । अनामे अन्तर्गते ययोरिति विग्रहेण लब्धोऽर्थः । अस्या उक्तरीत्या निर्माणे खण्डत्रयं दृश्यते । उपरि सरळाङ्गुष्ठद्वययोगः । मध्ये तादृशमध्यमायोगः । अधश्च कनिष्ठायोगस्तादृशः । एवं सति पूर्वोक्तवामाज्येष्ठा-रौद्रीकलात्रयरूपमस्यां स्फुटम् । अत एव त्रयः खण्डाः कलाः यस्यां इति विग्रहेण त्रिखण्डेयम् । अत्र यद्यपि खण्डद्वयनिर्माणप्रकार उक्तः । मध्यमखण्डरचनाप्रकारो नोक्तः । तथाऽपि त्रिखण्डेति योगार्थसंपत्तये तन्त्रान्तरं शरणीकृत्य खण्डत्रयं संपादनीयम् । खण्डत्रयमुक्तं ज्ञानार्णवे—

पाणिद्वयं महेशानि परिवर्तनयोगतः ।
योजयित्वा तर्जनीभ्यां अनामे धारयेत् प्रिये ॥

मध्यमे योजयेन्मध्ये कनिष्ठे तदधस्ततः ।
अङ्गुष्ठावपि संयोज्य त्रिधा युग्मक्रमेण तु ॥
त्रिखण्डा मम मुद्रेयं त्रिपुराऽऽह्वानकर्मणि ॥ इति ॥

सर्वसंक्षोभिणीस्वरूपं तत्रैव—

मध्यमे मध्यगे कृत्वा कनिष्ठाङ्गुष्ठरोधिते ।
तर्जन्यौ दण्डवत् कृत्वा मध्यमोपर्यनामिके ॥
एषा तु प्रथमा मुद्रा सर्वसंक्षोभकारिणी ॥ इति ॥

तन्त्रराजे तु—

कनिष्ठाऽनामिकामध्याः नखैरन्योन्यसङ्गताः ।
कृत्वाऽङ्गुष्ठौ कनिष्ठास्थावृजू कुर्याच्च तर्जनी ॥
सर्वसंक्षोभिणी मुद्रा त्रैलोक्यक्षोभकारिणी ॥ इति ॥

सर्वविद्राविणी मुद्रा तत्रैव—

एतस्या एव मुद्राया मध्यमे सरळे यदि ।
क्रियते चेन्महेशानि सर्वविद्राविणी तदा ॥ इति ॥

मध्यमे मध्यमेऽपीत्यर्थः । एतेन तर्जनीमध्यमयोः द्वयोः सरळत्वं ज्ञेयम् ॥

तृतीयमुद्राऽपि तत्रैवोक्ता—

मध्यमा तर्जनीयुग्मे वक्रीकुर्यात् सुलोचने ।
एतस्या एव मुद्रायास्तदाकर्षणकारिणी ॥ इति ॥

तत्रैव चतुर्थी मुद्रा सर्ववशंकर्युक्ता—

पुटाकारौ करौ कृत्वा तर्जन्यावङ्कुशाकृती ।
परिवर्त्य क्रमेणैव मध्यमे तदधोगते ॥
क्रमेण देवि तेनैव कनिष्ठाऽनामिके अपि ।
संयोज्य निबिडाः सर्वाः अङ्गुष्ठावग्रदेशतः ॥
मुद्रेयं परमेशानि सर्ववश्यकरी स्मृता ॥ इति ॥

अस्यार्थः—पुटाकारौ परस्परं पृष्ठसंलग्नौ ऊर्ध्वाग्राङ्गुलिकौ हस्तौ कृत्वा ततोऽङ्गुष्ठव्यतिरिक्ताङ्गुलयः परस्परमङ्गुलिसन्धिषु प्रवेश्य तर्जन्यादिकनिष्ठाऽन्ता अङ्गुलयः अङ्कुशाकाराः कुर्यात्। एवं कृत्वा ततोऽङ्गुष्ठद्वयं अधोमुखं तर्जन्युपरि स्थापयेत्। इयं सर्ववशंकरी इति भावः ॥

पञ्चम्यपि तत्रैव—

संमुखौ तु करौ कृत्वा मध्यमामध्यगेऽनुजे।
अनामिके तु सरळे तद्बहिस्तर्जनीद्वयम् ॥
दण्डाकारौ ततोऽङ्गुष्ठौ मध्यमानखदेशगौ।
मुद्रैषोन्मादिनी नाम क्लेदिनी सर्वयोषिताम् ॥ इति ॥

अयमर्थः—वामकनिष्ठोपरि दक्षकनिष्ठां तिर्यगनामाद्वयोपरिमार्गेण मध्यमापर्यन्तं प्रसार्य तादृशकनिष्ठाऽग्रद्वयं मध्यमाद्वयेन दृढं गृह्णीयात्। गृहीतमध्यमानखोपरि दण्डाकारमङ्गुष्ठद्वयं स्थापयेत्। तथाऽनामाद्वयं परस्पराभिमुख्येन सरळे कुर्यात्। अनामिकयोः पार्श्वद्वये तर्जनीद्वयमपि सरळं कुर्यात्। एषा सर्वोन्मादिनी मुद्रा योषिद्वश्यकरी इति ॥

षष्ठी मुद्राऽपि सर्वमहाङ्कुशा तत्रैव प्रकटिता—

अस्यास्त्वनामिकायुग्ममधः कृत्वाऽङ्कुशाकृति।
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् ॥
इयं महाङ्कुशा मुद्रा सर्वकार्यार्थसाधिनी ॥ इति ॥

अस्याः सर्वोन्मादिन्याः। तेनैव क्रमेण अनामिकाक्रमेण। अनामिकाऽङ्कुशाकारा। तथैव तर्जनीद्वयमपि कर्तव्यम्। शेषं पूर्वमुद्रावत् इति भावः ॥

सप्तमीं खेचरीमुद्रां तत्रैव व्याचचक्षे—

सव्यं दक्षिणहस्ते तु दक्षिणं सव्यहस्ततः।
बाहू कृत्वा महेशानि हस्तौ संपरिवर्त्य च ॥
कनिष्ठाऽनामिके देवि युक्त्वा तेन क्रमेण तु।
तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्यमे ॥

अङ्गुष्ठौ तु महेशानि कारयेत् सरळावपि ।
इयं सा खेचरी नाम मुद्रा सर्वोत्तमा प्रिये ॥

अस्य तात्पर्यम्—बाहू सरळौ प्रथमं कृत्वा दक्षबाहूपरि वामं स्थापयित्वा पुनर्वामं हस्तं दक्षहस्ताधोमार्गेण वामपार्श्वे निर्गमय्य हस्तद्वयाङ्गुळीः वक्ष्यमाणरीत्या ग्रश्नीयात्। तद्यथा वामानामाकनिष्ठे दक्षमध्यमाधोमार्गेण दक्षतर्जन्यां नीत्वा एवं दक्षानामाकनिष्ठे वाममध्यमाऽधोमार्गेण वामतर्जन्यां नीत्वा हस्तद्वयतर्जनीभ्यां स्वसमीपागतानामाकनिष्ठे दृढं गृह्णीयात् । मध्यमे सर्वोर्ध्वे सरळे एवाग्राभ्यां परस्परसंलग्ने स्थापयेत् । अङ्गुष्ठौ सरळौ कृत्वा योनिसादृश्यं संपादयेत् । इयं खेचरीमुद्रा । यद्यप्युक्तार्थः सर्वोऽपि पूर्वलिखितवचने नास्ति, तथाऽपि—

वामं भुजं दक्षभुजे दक्षिणं वामदेशतः ।
निवेश्य योजयेत् पश्चात् परिवर्त्य क्रमेण हि ॥
कनिष्ठाऽनामिकायुग्मे तर्जनीभ्यां निरोधयेत् ।
मध्यमे सरळे कृत्वा योनिवत् सरळौ ततः ॥
अङ्गुष्ठौ खेचरीमुद्रा पार्थिवस्थानयोजिता ॥

इति ज्ञानार्णववचनेन सह एकवाक्यतां संपाद्य निष्कासितोऽर्थो ज्ञेयः ॥

अष्टमीमुद्राऽपि तत्रैव प्रकटिता—

परिवर्त्य करौ स्पृष्टावर्धचन्द्राकृती प्रिये ।
तर्जन्यङ्गुष्ठयुगळं युगपत् कारयेत् ततः ॥
अधःकनिष्ठाऽवष्टब्धे मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्वाधस्तादनामिके ॥
बीजमुद्रेयमचिरात् सर्वसिद्धिप्रवर्तिनी ॥ इति ॥

अस्यार्थः—अनामामध्यमामार्गेण व्यत्यस्ते कनिष्ठिके स्वाधोभागे मध्यमा यथा तिष्ठति तथा कुर्यात् । ततो मध्यमाद्वयं कनिष्ठाद्वयावष्टम्भकं यथा तथा कुर्यात् । सर्वाधःस्थिते अनामे यावत्कुटिले भवतः तावत् कुर्यात् । अङ्गुष्ठतर्जनीयुगळं अर्धचन्द्राकृति यथा भवति तथा योजयेत् । इयं बीजमुद्रा भवति ॥

नवमीं योनिमुद्रां तत्रैव विशिनष्टि—

मध्यमे कुटिलाकारतर्जन्युपरि संस्थिते ।
अनामिकामध्यगते तथैव च कनिष्ठिके ॥
सर्वा एकत्र संयोज्य अङ्गुष्ठपरिपीडिताः ।
एषा तु प्रथमा मुद्रा योनिमुद्रेति या स्थिता ॥ इति ॥

अस्यार्थः—अनामिके मध्यमाऽधोमार्गेण कुटिलाकारतर्जन्युपरि व्यत्यस्ते स्थापयेत् । अनामिकापृष्ठलग्ने व्यत्यस्ते कनिष्ठिके संयोजयेत् । अङ्गुष्ठाग्रद्वयं मध्यमामध्यपर्वद्वये योजयेत् । इयं योनिमुद्रा भवति । यद्यपि एतावानर्थो न लभ्यते तेन वचनेन, तथाऽपि—

अनामिकापृष्ठभागे मध्यमामध्यपर्वणि ।
कनिष्ठाङ्गुष्ठसंश्लेषान्महायोनिस्त्रिखण्डिका ॥

इति स्थलान्तरे । अस्यार्थः—या त्रिखण्डा सा महायोनिः । ततो विशेषस्त्वियान् —मध्यमामध्यपर्वणि अङ्गुष्ठसंयोगः, अनामिकापृष्ठभागेन कनिष्ठिकासंयोगः । शेषं त्रिखण्डया सममित्यर्थः । अनेन सह पूर्ववचनस्यैकार्थतायां क्रियमाणायां पूर्वलिखितार्थः संपद्यते ॥

एवं दशमुद्राः परमगहनाः यथामति सप्रपञ्चं सप्रमाणं प्रपञ्चिताः प्रासङ्गिकाः । प्रकृतमनुसरामः ॥ १५ ॥

कामकलाध्यानम्

अथ कामकळाध्यानं वक्तुमुपक्रमते—

बिन्दुना मुखं बिन्दुद्वयेन कुचौ सपरार्धेन योनिं कृत्वा कामकळामिति ध्यात्वा ॥ १६ ॥

सूक्ष्मं कळाध्यानं स्थूलं चेति द्विविधम् । तत्र सूक्ष्मकामकळाध्यानस्य अस्मत्परमेष्ठिगुरुभिः उत्तरचतुश्शतीव्याख्याने विस्तरेण सेतुबन्धे वरिवस्यारहस्ये च व्याख्यातत्वात् तादृशध्यानकर्तुः उपासकधौरेयस्य सांप्रतं शशशृङ्गकल्पत्वेन तल्लेखनस्य

केवलस्वपाण्डित्यमात्रख्यापकत्वं इदानीन्तनवेदान्तशास्त्राध्ययनवत् स्यात् । अतः प्रथमं परित्यज्य स्थूलमेव मन्दाधिकारिणामुपयोगाय वर्णयिष्यामः । तद्यथा— तुरीयस्वरे हकारे वा अंशत्रयं परिकल्प्य तत्र स्त्रीरूपं परिकल्प्य ऊर्ध्वांशे मुखकल्पनां मध्यमांशे कुचद्वयकल्पनां जघन्यांशे योनिकल्पनां च कृत्वा ध्यायेत् । तदुक्तं कुण्डलिनीविमर्शे—

शक्तिमध्यपरिकल्पितांशकेष्वन्तरङ्गपरिभावने पटुः ।
ऊर्ध्वमध्यतदधोविभागशः चिन्तयेन्मुखकुचावधोमुखम् ॥

अस्मिन् श्लोके शक्तिशब्दार्थः ईकारः इति बहवः । हकार इत्यपि केचित् । अधोमुखं योनिमित्यर्थः । शेषं स्पष्टम् । "मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम्" इति श्रीभगवत्पादैरप्युक्तम् । सेतुबन्धे तु ईकार एव स्थूलध्यानमुक्तम् "ईकारस्य बिन्दुविसर्गात्मनः शिवशक्त्योः सामरस्यरूपस्य स्वात्मत्वेन भावनायां परमानन्दानुभवः" इति पङ्क्त्याम् । साळग्रामे विष्णुबुद्धिवत् भगवत्या ध्यानाधिष्ठाननियमोऽयम् । एवं स्थूलध्यानेन जितान्तःकरणस्तादृशोपासकमकुटमणिः सूक्ष्मकलां सेतुबन्धादिलिखितां गुरुमुखात् ज्ञात्वा काममुपासीत । नान्ये इदानींतनाः तद्योग्याः । तादृशध्यानं च परदेवता-श्रीगुरुप्रसादैकलभ्यम् । अयमर्थस्त्रिपुरार्णवे सुस्पष्टमुक्तः—"सूक्ष्मध्यानेऽसमर्थश्चेत् स्थूलं ध्यायेद्यथोक्तवित्" इति । इत्थं च पूर्वोक्तान्यतरवर्णे मुखं कुचौ योनिं चांशत्रये कृत्वा मनसा निर्माय कामकलां इति वक्ष्यमाणप्रकारेण ध्यात्वा, यथाऽवकाशमिति शेषः ॥ १६ ॥

वर्णविशेषे पूर्वोक्तावयवकल्पनानन्तरं विशिष्टे ध्यानप्रकारमाह—

सौभाग्यहृदयमामृश्य ॥ १७ ॥

सौभाग्यस्य धर्मादिसकलपुरुषार्थस्य हृदयं स्थानं उपादानकारणमिति यावत् । ईदृशं पूर्वोक्तरूपं आमृश्य ध्यात्वा । पूर्वसूत्रस्थेतिशब्दस्य अत्राप्यनुवृत्तिः । अयमेवार्थः स्पष्टमुक्तो योगिनीतन्त्रे—

एवं कामकलारूपं अक्षरं यत् समुत्थितम् ।
कामादिविषमोक्षाणामालयं परमेश्वरि ॥ इति ॥

एतदुक्तरं निबन्धे होमः पाक्षिक उक्तः, स निर्मूलः, "यद्यग्निकार्यसंपत्तिः" इति सूत्रस्य गणपतिप्रकरणस्थस्य अन्यत्र प्रापकप्रमाणाभावात् ॥ १७ ॥

बलिदानम्

अथ बलिप्रकारमाह—

वामभागविहितत्रिकोणवृत्तचतुरश्रे गन्धाक्षतार्चिते वाग्भवमुच्चार्य व्यापकमण्डलाय नमः इत्यर्धभक्त-भरिताम्भसा आदिमोपादिममध्यमभाजनं तत्र न्यस्य ॥ १८ ॥

अत्र वा म भा गे त्यनेन शीघ्रोपस्थितत्वात् स्वस्यैव वामभागो ग्राह्यः । वि हि ते निर्मिते त्रि को ण वृ त्त च तु र श्रे । निर्गमरीत्या त्रिकोणं स्वाभिमुखं ग्राह्यम्, तथा शिष्टसंप्रदायात् ॥

केचित्तु त्रिकोणे या बलिग्राहिणी देवता सा तिर्यग्रेखाद्वयसंयोगरूपकोणाभिमुखी, त्रिकोणवर्तिदेवतानां तथात्वनियमात् । एवं च तन्त्रान्तरे—

मूलदेव्युन्मुखां ध्यात्वा न्यस्याग्रे बलिपात्रकम् ॥

इति वचनेन तस्या देवताया मूलदेव्युन्मुखत्वनियमात् । त्रिकोणमपि देव्युन्मुखमेव न स्वाभिमुखमित्याहुः । तन्न, अनङ्गकुसुमादिश्रीचक्रस्थकोणेषु कोणपराङ्मुखीनां मूल-देव्यभिमुखीनां देवतानां बह्वीनां दृष्टत्वेन तादृशनियमासिद्धेः । न किंचिदेतत् ॥

ग न्धा क्ष ते त्यनेन तदितरव्यावृत्तिः दर्शिता । अर्चने मन्त्रमाह—वा ग्भ व मि त्या दि । वा ग्भ वं ऐं इति । शेषं स्पष्टम् । अ र्ध भ क्ते न अन्नेन भ रि ता म्भ सा च सहितमिति शेषः । इदं भाजने विशेषणम् । एकस्मिन् पात्रे अर्धांशं अन्नेन अर्धांशं जलेन पूरयेत् । ईदृशमेकं पात्रं क्षीरादिपात्रत्रयं च त त्र मण्डले न्य स्य । अत्र बलिपात्रं ताम्रमयम्,

बलिपात्रं ताम्रभवं नैवान्यत्तु कदाच न ॥

इति त्रिपुरार्णववचनात् । व्यञ्जनादिमिश्रणं न कार्यम्, एतत्तन्त्रे उक्तद्रव्यैणैव द्रव्याकाङ्क्षाशान्तेः ॥

अत्र निबन्धकारः बाणमुद्रया बलिदानं वामपार्ष्णिघातादिकं लिलेख । स प्रष्टव्यः किं अत्र प्रमाणं इति । स यदि ब्रूयात् श्यामाप्रकरणे सूत्रे उक्तत्वात् अत्रापि ते धर्मा गृह्यन्ते इति, तर्हि तद्ग्रहणं आकाङ्क्षया, उत अनाकाङ्क्षया । आद्ये बलिदाने द्रव्यदेवतामन्त्राणामाकाङ्क्षोदिता प्रकृतवाक्यैरेव शान्ता । बाणमुद्राया वामपार्ष्णिघातस्य च ग्रहणं कुर्वतः तस्यैव कीदृशी आकाङ्क्षोदितेति च न विद्मः । किं च श्यामाप्रकरणस्थपार्ष्णिघातादिधर्मेण किमपकृतम् । क्षेत्रपालवागीश्वर्यादिबल्योऽपि तत्र सन्ति । उक्तव्यतिरिक्ता अन्येऽपि मन्त्राः सन्ति । तैः निबन्धकृतोऽपराधः कोऽनुष्ठितः । श्यामाप्रकरणस्थत्वस्य तुल्यत्वेऽपि केषु चित् अनुगृह्णन् जग्राह केषु चित् रुष्टः तत्याज्येति मूलं न विद्मः । किंच तत एव त्रिकोणादिमण्डलधर्माणां प्राप्तौ पुनर्विधानमत्र किमर्थं इति चेत् वाग्बन्धनमेवोत्तरं नान्यदिति । तस्मात् स्वेच्छया धर्मप्रवर्तकसरणिः अश्रद्धेया । यावदुक्तं कार्यम् ॥ १८ ॥

बलिदाने मन्त्रमाह—

प्रणवमायाऽन्ते सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा इति त्रिः पठित्वा बलिं दत्वा ॥ १९ ॥

त्रिः इत्यनेन मन्त्राभ्यासो विहितः । तेन त्रिःपाठान्ते बलिदानम् । देवता च मन्त्रलिङ्गेन ज्ञेया ॥ १९ ॥

प्रदक्षिणादि

प्रदक्षिणनमस्कारजपस्तोत्रैः सन्तोष्य ॥ २० ॥

प्रदक्षिणमेकं कार्यम्,

अजेशशक्तिगणपभास्कराणां प्रदक्षिणे ।
वेदार्धचन्द्रवह्न्यद्रिसङ्ख्याः सर्वार्थसिद्धयः ॥

इति शक्तिसङ्गमतन्त्रे उक्तत्वात् । अजः विष्णुः । वेदाः चतस्रः । अर्धं तदर्धं द्वयम् । चन्द्रः एकः । वह्निः तिस्रः । अद्रिः सप्त । इमाः सङ्ख्याः अजादिप्रदक्षिणे क्रमात् ज्ञेयाः इत्यर्थः । श्रीमच्छङ्करभगवत्पादैरपि "प्रदक्षिणं ते परितः करोमि" इत्येकवचनान्तमेवोक्तम् ॥

नमस्कारे तु इच्छैव नियामिका शास्त्रोपलब्धिपर्यन्तम् । नमस्कारे कश्चिद्विशेषः परमानन्दतन्त्रे—

पूजागृहाद्बहिर्देवीं प्रणमेत् दण्डवद्भुवि ।
मण्डले नमनं नैव साष्टाङ्गं दण्डवत् चरेत् ॥
जानुभ्यां च पदाभ्यां च मूर्ध्ना हस्तयुगेन च ।
चतुरङ्गप्रणामोऽयं मण्डले विहितः शिवे ॥ इति ॥

मण्डललक्षणं योगिनीतन्त्रे—

पूज्यते यत्र सा देवी तच्चतुर्दिक्षु शङ्करि ।
धनुश्शतप्रमाणेन मण्डलं परिकीर्तितम् ॥ इति ॥

धनुर्मानं तु हस्तचतुष्टयम् । बृहद्वामकेश्वरे तु—

मण्डलं तद्विजानीयात् यावद्दृश्या हि देवता ॥ इति ॥

रहस्यार्णवे तु—

द्वारपूजा यत्र कृता तदन्तर्मण्डलं विदुः ॥ इति ॥

अयं च देशतः परिच्छेद उक्तः । कालतः परिच्छेदस्तु शक्तिसङ्गमतन्त्रे—

द्वारपूजां समारभ्य यावदुद्वासनं भवेत् ।
तावत्तन्मण्डलं विद्धि . . . . ॥ इति ॥

त्रिपुरार्णवेऽपि—

इदं तन्मण्डलं देवि प्रारभ्यैतस्य पूजनम् ।
मार्ताण्डमण्डलार्घ्यान्तं . . . . ॥ इति ॥

इदमेव मण्डलं वक्ष्यमाणमण्डलधर्मेषु ज्ञेयम् ।

पूजागृहं ततो गत्वा चक्रराजं समर्चयेत् ।
विद्यां जपेत् सहस्रं वा त्रिशतं शतमेव वा ॥

इति ब्रह्माण्डपुराणोक्तजपसङ्ख्या ज्ञेया । अयं जपः कर्माङ्गभूतः, अङ्गैरुभयतः सन्दंशात् । यद्वा—

आवृत्तिर्गुरुनित्याऽर्चा समयाम्नाययोरपि ।
पूजात्रयं जपश्चैव प्रधानं पूजने मतम् ॥

इति स्वतन्त्रतन्त्रे त्रयोदशोल्लासे जपस्य प्राधान्यकथनात्, प्रत्यक्षवचनेन कथनस्य सर्वबाधकत्वात् ॥

स्तोत्राणि, गणेशग्रहनक्षत्रेत्यादिवामकेश्वरतन्त्रोक्तानि, सहस्रनामपाठः, अपराधस्तुतिः, सत्यवकाशे सप्तशतीपाठोऽपि, "ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः" इति तत्रैव विहितत्वात् । एवमादिभिः सन्तोष्य ॥ २० ॥

शक्तिपूजा

अथ शक्तिपूजामाह—

तद्रूपिणीमेकां शक्तिं बालयोपचारैः संपूज्य तां मपञ्चकेन सन्तर्प्य ॥ २१ ॥

तद्रूपिणीं त्रिपुरसुन्दरीरूपिणीं एकवचनेन एकामित्यनेन अद्वितीयां सौन्दर्येणेत्यर्थः प्रतिपाद्यते । एतेन तन्त्रान्तरोक्तशक्तिलक्षणानि सूचितानि । बालया मन्त्रेण उपचारैः यथासंभवैः । मपञ्चकेन सन्तर्पणं तस्याः इच्छायां सत्यां ज्ञेयम् । अयं भावः सन्तर्प्येत्यनेन ज्ञापितः । तर्पणं तृप्तिसंपादनं तत् शक्तिनिष्ठ-तत्तद्विषयकेच्छानिवर्तको व्यापारः । तस्या इच्छायामसत्यां तन्निर्वर्तकव्यापारस्यापि असंभवात् इच्छायामेव इति सिध्यति । अन्यथा "मपञ्चकैरुपचारैश्च पूजयेत्" इत्येव वदेत् । तस्मादयमर्थः सिद्धः । शक्तिलक्षणानि कुलार्णवे—

सुरूपा तरुणी शान्ताऽनुकूला मुदिता शुचिः ।
शङ्काहीना भक्तियुक्ता गुरुशास्त्रपरायणा ॥

[1]प्रियाक्षरा विशेषज्ञा देवतापूजनोत्सुका ।
मनोहरा सदाचारा शक्तिरेवं सुलक्षणा ॥ इति ॥

योगिनीतन्त्रेऽपि—

सवर्णा हीनवर्णा वा कुलस्था कुलटाऽपि वा ।
मन्त्रोपासनसंयुक्ता पूज्या स्यात् गणिकाऽपि च ॥ इति ॥

दोषा अपि कुलार्णवे—

दूष्या च कर्कशा लज्जाहीना च कुलदूषिणी ।
दुराचारा दुराराध्या भीता क्रुद्धा चलाऽलसा ॥
निद्रासक्ताऽतिदुर्मेधाः हीनाङ्गी व्याधिपीडिता ।
दुर्गन्धा दुःखिता मूढा वृद्धोन्मत्ता रहस्यभित् ॥
ईदृशीं मन्त्रयुक्तां च पूजाकाले विवर्जयेत् ॥ इति ॥

यश्च योगिनीतन्त्रे—

योग्या वाऽपि निषिद्धा वा बहुदोषाकुलाऽपि वा ।
काले सुवासिनीं प्राप्तां सर्वथा भक्तितोऽर्चयेत् ॥ इति ॥

सः मुख्यालाभे पूर्ववचनैः निषिद्धाया अभ्यनुज्ञापरः, विवाहे अनृतवदनवत् । यद्वा—पूर्ववचनैः निषेधः प्रतिपादितो यः स शक्तिपूजापरः । योग्या वा इत्यनेन तदतिरिक्तं सुवासिनीमात्रे पूजनं तत्काले प्रतिपादयति । युक्तश्चायमेव पक्षः ॥ २१ ॥

हविश्शेषप्रतिपत्तिः

हविश्शेषप्रतिपत्तिमाह—

शिष्टैः सार्धं चिदग्नौ हविश्शेषं हुत्वा ॥ २२ ॥

अत्र शिष्टत्वं कुलार्णवे दर्शितम्—

अहो भुक्तं तु यन्मद्यं मोहयेत् त्रिदशानपि ।
तन्मैरेयं शिवं पीत्वा यो न विक्रियते नरः ॥
जपन् शिवपरो भूत्वा स मुक्तः स च कौळिकः ॥ इति ॥

[1] प्रियेक्षणा—श्री.

ईदृशं शिष्टत्वं सामयिकनिष्ठम् । एतेन विशेषणेन आधुनिकाः कौळिकंमन्याः केवलं जिह्वाचपलाः मण्डले न प्रवेश्याः इति ज्ञापितं भवति । सामयिकैः सहेति सहत्वं एकजातीयक्रियाकर्तृत्वं, "पुत्रेण सह याति" इत्यादौ तथा दृष्टत्वात् । प्रकृतेऽपि होमरूपैकजातीयक्रियाकर्तृत्वमस्तीति सहत्वं उपपन्नम् । चिदग्नौ चिल्लक्षणेऽग्नौ हविश्शेषं देवतोद्देशेन संस्कृतार्पितशेषम् । हुत्वेत्यनेन तत्र केवलहोमबुद्धिरेव विधेया । इन्द्रियतृप्तिविषयिणीच्छा न कदाऽपि कार्येति सूचितं भवति । मण्डले प्रवेशे इन्द्रियतृप्तीच्छायां पतित एव स्यात् इति भावः । अयं च उपयुक्तद्रव्यसंस्कारः "आग्नेयं चतुर्धा करोति" इतिवत्, हविश्शेषं इति द्वितीयाश्रवणात् ॥

एतेनेदानीन्तनाः एकं कलशं असंस्कृतद्रव्येण परिपूर्णं स्थापयित्वा तस्मिन् विशेषार्घ्यबिन्दुं किञ्चिन्निक्षिप्य तद्द्रव्यं सामयिकेभ्यः प्रयच्छन्ति । तेषामनुकूलतया निबन्धकारोऽपि क्षीरकलशादिकं देव्याः पश्चाद्भागे निधायेति, विशेषार्घ्यपात्रात् किञ्चित् क्षीरं कलशे निक्षिपेत् इति च वाक्यद्वयं लिलेख । इदं मूलं कृत्वा य ईदृशोऽनाचारः पतनहेतुः प्रवृत्तः स लिखितसूत्रविरोधेन निरस्तः, तस्मिन् हविः-शेषत्वाभावात् । यदि च बिन्दुमात्रप्रक्षेपेण हविश्शेषत्वं संस्कृतत्वं स्यात् तर्हि आपणस्थद्रव्येऽपि बिन्दुप्रक्षेपं कृत्वा द्रव्यस्वीकारे दोषाभावेन महानुपप्लवः स्यात् ॥

यच्च त्रिपुरार्णवे—

तथा पूजानिमित्तं वै प्रथमाद्यमुपाहृतम् ।
यज्ञियं तत् पवित्रं स्यात् दृष्ट्वा स्पृष्ट्वा शुचिर्भवेत् ॥
तथैव मण्डले प्राप्तं सर्वं तदमृतं भवेत् ।
विप्रेणान्येन वाऽऽनीतं देवतायै निवेदयेत् ॥
प्रथमाद्यैः संस्कृतैस्तु युक्तं तत्तदगात्मजे ।
अविशेषेण सर्वैस्तु ग्राह्यं शङ्काविवर्जितैः ॥ इति ॥

संस्कृतद्रव्येण युक्तं असंस्कृतं संस्कृतं भवतीति कथयतीति यद्युच्यते, तथाऽपि संस्कृतद्रव्यसंयोगो द्वेधा । संस्कृतद्रव्यस्य असंस्कृतद्रव्यपात्रे प्रक्षेपे सति एकः, संस्कृते विशेषार्घ्यपात्रे असंस्कृतद्रव्यप्रक्षेपेणापरः । तत्र पूर्वस्मात् पक्षात् उत्तरपक्षो वरिष्ठः, श्रौते कर्मणि सोमे द्रोणकलशे दर्शपूर्णमासे ध्रुवादौ तथा दृष्टत्वात् । किं च यदि

संस्कृतद्रव्येण लौकिकं बहिष्ठं संस्कृतं भवेत् तर्हि अतिप्रसङ्गो दर्शितः पूर्वमेव। बहिर्द्रव्यस्य पात्रे प्रक्षेपपक्षे पूर्वोक्तातिप्रसङ्गोऽपि नास्ति। इदमपि साधकम्। तस्मात् द्वितीयपक्ष एव श्रेष्ठः। तत्रापि पूजानिमित्तं भक्तेनानीतस्थल एव अयं प्रकारो नान्यत्र, अशास्त्रीयत्वात्। इदानीन्तनाः बुद्ध्या यथेच्छं द्रव्यं संपाद्य मनःपूतं व्यवहरन्ति। तत्पतनायैवालं भविष्यतीति॥

वस्तुतस्तु इदमपि तन्त्रान्तरानुयायिनां, न तु सूत्रानुयायिनाम्। सूत्रे हविश्शेषं हुत्वेत्युक्त्या कलशस्थासंस्कृतद्रव्ये हविश्शेषत्वं गीर्वाणगुरुणाऽपि प्रतिपादयितुमशक्यम्, शास्त्रोक्तविधिना संस्कृत्य देवतायै दत्तशेषस्यैव हविश्शेषत्वात्। तस्मात् यागशेषेणैव होमप्रतिपत्तिसंस्कारः सूत्रानुयायिनां नान्यद्रव्येण इति राद्धान्तः॥

ननु तर्पणे आवरणपूजने च कृते सति यदा तत्रैव विनियोगः तदा इदं कर्म लुप्तं स्यात् इति चेत्—न। यथा "अश्वशफमात्रं पुरोडाशं करोति," "अङ्गुष्ठपर्वमात्रमवद्यति," इति विधिभ्यां अनुष्ठिते हविश्शेषो नियतः, तथा तन्त्रान्तरे—

सामान्यकलशं पञ्चपलान्यूनजलैर्युतम्।
दिक्पलादधिकं नैव हेतुकुंभं तदर्धकम्॥
तदर्धं च विशेषार्घ्यम्..........॥

इति मानानुसरणे सूत्रानुयायिनां हेतुकुंभस्थानापन्नविशेषार्घ्ये हेतुकुंभमानाङ्गीकारे षोडशशतगुञ्जापरिमितं विशेषार्घ्यद्रव्यं भवति। यदि च विशेषार्घ्यमानमेव अस्य तुल्यनामत्वात् अङ्गीक्रियते तदाऽपि अष्टशतगुञ्जापरिमितमित्यविवादम्। आवरणपूजादिषु एकैकदेवतोद्देशेन एकैकबिन्दुविनियोगो दृश्यते। तथा सति सामयिकानामात्मनश्च होमायालं द्रव्यं शिष्यत एव। अस्मिन् शास्त्रे द्रव्यस्वीकारजनितोऽवस्थाविशेषः उल्लासः। सोऽपि द्रव्यस्यात्युत्तमत्वे भवितुमर्हति इति न काऽप्यनुपपत्तिः॥

अत्र होमेतिकर्तव्यतायाः शिष्टानां मण्डले प्रवेशधर्माणां च अनुक्तेः कथं शिष्टैः सह होमं कुर्यात् इत्याकाङ्क्षायां तन्त्रान्तरं तद्विषये शरणीकार्यम्। तथा सति आदौ मण्डलधर्मा उच्यन्ते। ते चोक्ताः परमानन्दतन्त्रे—

क्षताङ्गो ज्वरिताङ्गश्च मलिनाम्बरमूर्धजः।
आशौचाङ्गस्तथोष्णीषी कञ्चुकी कृतभोजनः॥

पूयिताङ्गस्तथोच्छिष्टमुखो मरणसूतकी ।
अपस्मारी क्लेशयुक्तः छदर्यतीसाररोगवान् ॥
प्रायश्चित्ती तथाऽस्नातो न विशेन्मण्डले क्वचित् ।
सकृन्मोहात् प्रविष्टोऽपि देवताशापमाप्नुयात् ॥
यदि तेषां तु भक्तिः स्यादुत्कटा दर्शनादिषु ।
पूजागृहद्वारदेशाद्बहिः पूजां समाचरेत् ॥ इति ॥

त्रिपुरार्णवे भुक्तस्य विशेषः—

अतर्कितो दिवा भुक्तो यदा रात्रौ समागतः ।
तदा गुर्वाद्याज्ञया तु स्नात्वा सेवेन्न चान्यथा ॥ इति ॥

इदमपि सेवनं मण्डलाद्बहिरेव ।

भुक्त्वा न मण्डलं गच्छेत् सर्वथा परमेश्वरि ।

इति मण्डलप्रवेशनिषेधबाधकशास्त्राभावात् ॥

यच्च कुलार्णवे—

अस्नात्वा वाऽपि भुक्त्वा वा [1]अभक्त्या वा कुलेश्वरि ।
यः सेवेत कुलद्रव्यं स दारिद्र्यमवाप्नुयात् ॥

इति भुक्तस्य कुलद्रव्यसेवननिषेधशास्त्रं कामं बाधतां प्रवेशनिषेधबाधकाभावात् प्रवेशो न कर्तव्यः । न च मण्डलात् बहिः स्वात्मीकारविध्यभावेन स्वात्मीकारविधिना प्रवेशोऽप्याक्षिप्यते इति वाच्यम् । तथा सति त्रिपुरार्णवे—“भुक्त्वा न मण्डलं गच्छेत्” इति प्रवेशनिषेधेनैव स्वात्मीकारनिषेधे सिद्धे—

कुलद्रव्यं तथा भुक्त्वा मोहादपि प्रमादतः ।
यः सेवेत स वै देवि देवताशापमाप्नुयात् ॥

इत्यनेन उन्नीतः कुलद्रव्यसेवननिषेधो व्यर्थः स्यात् । अतोऽनेनैव ज्ञापकेन बहिरपि सेवनं द्रव्यस्य सिद्धम् ॥

[1] अभ्यङ्क्त्वा—श्री.

एवं प्रवेशायोग्यानुक्त्वा प्रवेष्टृगुणानप्याह परमानन्दतन्त्रे—

स्नातः शुचिर्धौतवस्त्रो धृतपुण्ड्रः शुभाशयः ।
क्षाळिताङ्घ्रिकरो देवीं ध्यायन् भक्त्या प्रणम्य च ॥
आचार्याज्ञाऽनुरूपेण मण्डलान्तर्विशेत् ततः ।
भावयन् देवतारूपं मण्डलं प्रणमेत् बुधः ॥
पुष्पाञ्जलिं ततः कुर्यात् तद्विधानं निगद्यते ।
सामान्यकुंभतोयेन करौ प्रक्षाळ्य भक्तितः ॥
सुरभीकृत्य गन्धाद्यैः पुष्पाण्यादाय भक्तितः ।
उत्थाय च ततो देवि देवताऽभिमुखस्थितः ॥
श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीरान् द्व्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥
संप्राप्तपञ्चदश्यादिः साधकस्तु महेश्वरि ।
समष्टियोगिनीविद्यामपि तत्र पठेच्छिवे ॥
देवतां ध्यानोक्तरूपां ध्यायन् संपूज्य शङ्करि ।
आचार्यादींस्ततो ध्यात्वा पूजयेत् परमेश्वरि ॥
प्रणमेदुक्तविधिना ज्ञात्वा सर्वं शिवात्मकम् ।
सद्द्वितीयं समादद्यात् पात्रमाचार्यसत्तमात् ॥
पात्रं ग्राह्यं दक्षकरे दीक्षायुक्तेन शङ्करि ।
अन्येन तु समादेयं वामहस्तेन शङ्करि ॥
अथवा वामहस्तेन सर्वैर्ग्राह्यं महेश्वरि ।
हस्तान्तरेण त्वाच्छाद्य गृह्णीयात् दापयेदपि ॥
अनाच्छादितपात्रं तु भवेदसुरभागकम् ।
तर्पणाद्युपयोगे तु छादनं तु परित्यजेत् ॥
उपवेशक्रमं देवि शृणु संयतमानसा ।
मण्डलाकारतो वाऽपि चतुरश्रतयाऽथवा ॥

आचार्यं मध्यतः कृत्वा विशेत् ज्येष्ठक्रमेण तु ।
ज्येष्ठेषु सत्सु न विशेत् आचार्यस्य समीपतः ॥
न साम्येन गुरोः स्थेयं स्त्रीणां मध्ये तथैव च ।
नाग्रतस्तु गुरोर्देवि नाज्ञामुल्लङ्घ्य वै गुरोः ॥
एवं ज्ञात्वा संप्रदायं निषीदेन्मण्डले शिवे ।
आचार्योऽपि तथा ज्येष्ठानुत्थाय प्रणिपत्य च ॥
तेषामाज्ञां गृहीत्वैव स्वासनेऽथ समाविशेत् ।
तस्मै च पात्रं दद्याद्वै ज्येष्ठायोत्थाय साधकः ॥
ज्येष्ठान् कनिष्ठोऽपि देवि गृह्णीयादुत्थितो नमन् ।
सर्वान् संपूज्य पात्राणि दातव्यानि महेश्वरि ॥
असंपूज्य शिष्यमपि यो दद्यात् पात्रमम्बिके ।
तस्मै कुप्यति सा देवी यस्मात् सर्वं हि तन्मयम् ॥
प्रक्षाल्य पात्रं पुष्पादियुतमाच्छाद्य यत्नतः ।
आचार्याय तथा दद्यात् नमस्कुर्याच्च भक्तितः ॥
स्वीकृत्य तत्प्रसादं वै जप्त्वा स्तोत्रादिकं पठेत् ॥ इति ॥

त्रिपुरार्णवे—

शक्त्या स्वर्णादिसंयुक्तमर्पयेत् पात्रमम्बिके ।
यत्किंचिद्वाऽपि पात्रस्थं दत्वाऽनन्तफलं लभेत् ॥ इति ॥

सुवासिनीनां विशेषो योगिनीतन्त्रे—

एवं सन्तर्प्य हुत्वा तु सुवासिन्यः सशेषकम् ।
दद्युस्तृतीयं तुर्यं वा पात्रं पीठाधिकारिणे ॥ इति ॥

त्रिपुरार्णवे कश्चिद्विशेषः—

वीरात् ज्येष्ठात् तथाऽऽचार्यात् ग्राह्यं शेषं च चर्वणम् ।
तदभावेऽपि चान्यस्मात् ज्येष्ठात् ग्राह्यं नगात्मजे ॥

बृहद्वामकेश्वरतन्त्रे—

गुर्वाद्यभावे ज्येष्ठात्तु चर्वणं शेषमर्पयेत् ।
तदभावे गुरुं मूर्ध्नि ध्यात्वा तच्छेष[1]कं न्यसेत् ॥
आदौ वा गुरुशेषं स्यात् सर्वान्ते वा नगात्मजे ।
पिबेदशब्दं पात्रं तु सकृन्निरवशेषकम् ॥
सावशेषं तु यत्पात्रं सुरापानसमं तु तत् ॥ इति ॥

पात्रस्य ओष्ठास्पर्शेऽपि निषेधस्तत्रैव—

दूरादोष्ठास्पर्शनेन पानं तु पशुपानवत् ॥ इति ॥

कुलार्णवेऽपि—

करेण पात्रं धृत्वाऽथ न तिष्ठेत चिरं प्रिये ।
नालपन् पात्रहस्तः सन् तिष्ठेत क्वचिदम्बिके ॥
पादेन न स्पृशेत् पात्रं न बिन्दुं पातयेदधः ।
नान्योन्यं ताडयेत् पात्रं न पात्रं पातयेदधः ॥
साधारं नोद्धरेत् पात्रं निराधारं न निक्षिपेत् ।
रिक्तं पात्रं न कुर्वीत न पात्रं भ्रामयेत् प्रिये ॥
न पात्रं लङ्घयेद्विद्वान् पात्रं नोत्पातयेत् प्रिये ।
प्रक्षाल्य गोपयेत् पात्रं इत्याज्ञा पारमेश्वरी ॥ इति ॥

परमानन्दतन्त्रे कश्चन विशेषः—

अर्घ्यस्थापनमारभ्य यावत्पात्रविसर्जनम् ।
सर्वं शिवमयं पश्येदन्यथा पतितो भवेत् ॥
सर्वे वर्णा द्विजास्तत्र न भेदं चिन्तयेत् क्वचित् ।
उद्वासानन्तरं नैक्यं कुर्याद्विद्वान् कदाचन ॥
स्वात्मीकारस्त्रिधा देवि दिव्यवीरपशुक्रमात् ।
उद्वासावधि दिव्यः स्यात् तत्पश्चाद्वीर उच्यते ॥

[1] माहरेत्—श्री.

असंस्कृतः पशुः प्रोक्तो विप्राणामाद्य एव तु ।
अपशुः क्षत्रियविशां शूद्राणां त्रितयं भवेत् ॥ इति ॥

कुलार्णवेऽपि—

[1]भुक्तिमुक्तिप्रदं दिव्यं वीरं भुक्तिप्रदं भवेत् ॥ इति ॥

रहस्यार्णवेऽपि—

संपूज्यैवं विधानेन विप्रश्चोद्वासनावधि ।
द्रव्यं पिबेत् तदन्तेऽपि क्षत्रियो वैश्य एव च ॥
शूद्रस्त्विच्छाऽनुरोधेन विधिना वाऽन्यथाऽपि वा ।
निवेद्य देवतायै तत् संतर्प्य प्रपिबेदनु ॥ इति ॥

एतावन्तः अत्यावश्यकधर्माः निरूपिताः । इतोऽधिका अनेकतन्त्रावलोकनेन ज्ञेयाः । ग्रन्थविस्तरभयान्नेह लिख्यन्ते ॥

अत्र सामयिकानां कल्पसूत्रानुयायिनां अन्येषां उक्ताः मण्डलधर्माः तुल्याः । होममन्त्रः सूत्रानुयायिनां "आर्द्रं ज्वलति" इति मन्त्र एव, मन्त्राकाङ्क्षायां तन्त्रान्तरमन्त्रात् अस्य सन्निकृष्टत्वात् । अन्येषां स्वस्वतन्त्रोक्ता सरणिः । अत्रेयं व्यवस्था चिन्त्यते । पीठाधिकारिणा स्वकर्तृकपूजाफलसिद्धये प्रतिपत्तिसंस्कारस्य अवश्यमनुष्ठेयतया स मण्डले ध्यानसमर्थोऽसमर्थो वा कामं द्रव्यस्वीकारं करोतु । सामयिकस्तु द्रव्यहोमानन्तरं शास्त्रोक्तध्यानसमर्थ एव द्रव्यं हुनेत् । नान्यः । तथा हि—

अन्तर्निरन्तरमनिन्धनमेधमाने मोहान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकासमाने विश्वं जुहोमि वसुधाऽऽदिशिवावसानम् ॥
धर्माधर्महविर्दीप्तावात्माग्नौ मनसा स्रुचा ।
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥

इति मन्त्रलिङ्गेन कल्पितो ध्यानप्रकार आवश्यकः । देवीयामळेऽपि—

होमेन चेतनां जित्वा ध्यायेदात्मानमात्मना ॥ इति ॥

[1] मुक्तिप्रदं भवेद्दिव्यं—श्री.

कुलार्णवेऽपि—

तन्मैरेयं शिवं पीत्वा यो न विक्रियते नरः ।
जपन् शिवपरो भूत्वा स मुक्तः स च कौलिकः ॥ इति ॥

परमानन्दतन्त्रेऽपि—

स्वीकृत्य तत्प्रसादं वै ध्यायेन्निश्चलमम्बिकाम् ॥ इति ॥

वीरचूडामणौ गणेश्वरसंहितायाम्—

द्रव्यमास्वाद्य विधिना मनो निश्चलतां नयेत् ।
ततो ध्यायेत् परं ज्योतिरात्मज्योतिः सनातनम् ॥

इत्यादिमनोनिग्रहपूर्वकध्यानविधायकवचनानि बहूनि ।

यावत्सुषुप्तता न स्यादविकारित्वमेव च ।
तावदेव हुनेत् देवि निष्फलं त्वन्यथा भवेत् ॥ इति ॥
विकारे तु समुत्पन्ने ध्यानयोगबहिष्कृतः ।
योगिनीनां पशुर्देवि मण्डलाच्च बहिष्कृतः ॥

इत्यधिकपात्रहोमे ध्यानभ्रंशमूलानर्थोऽपि तन्त्रे । तेनापि ध्यानावश्यकता सिध्यति । एवमादीनि बहूनि सन्ति । ग्रन्थविस्तरभयान्नेह लिखितमेतावदलमिति ॥

इत्थं च द्रव्यसेवनस्य प्रथमफलं चित्तैकाग्र्यं, तेन विना ध्यानासंभवात् । अत एव परमानन्दतन्त्रे—

तावदेव हुनेत् देवि यावदानन्दसंप्लुतः ।
मनो निश्चलतां याति चित्तं चापि प्रसादताम् ॥
विकारे तु समुत्पन्ने ध्यानयोगविहीनतः ।
योगिनीनां पशुर्देवि मण्डलाच्च बहिष्कृतः ॥

इति अयोग्यस्य द्रव्यस्वीकारे अनिष्टं फलं दर्शयति । योगिनीतन्त्रेऽपि—

कुलद्रव्यं समाश्रित्य मनो निश्चलतां नयेत् ॥ इति ॥

त्रिपुरार्णवेऽपि—

अयं सर्वोत्तमो धर्मः कौलमार्गो महेश्वरि ।
असिधाराव्रतसमो मनोनिश्चलहेतुकः ॥
तत्र संयतचित्तत्वं सर्वथा ह्यतिदुष्करम् ।
भक्तिश्रद्धाविहीनस्य . . . . ॥

इत्येवमादीनि तन्त्रवचनानि, द्रव्यसेवनं मनोनिग्रहद्वारा ध्यानार्थं कर्तव्यं विपरीते बाधत इति, कोटिशः उपलभ्यन्ते । एवमादितन्त्रवचनार्थानां सङ्ग्रहं कुर्वन्नेव श्रीपरशुरामः "शिष्टैः सह" इत्युवाच । ईदृशध्यानसमर्थो व्रतादिदिवसेष्वपि अविचारेण अनाहूतोऽपि मण्डलं प्रविश्य पात्रं याचित्वा हुत्वा ध्यानं संपादयेत् । तदुक्तं त्रिपुरार्णवे—

एवं सामयिको भक्त्या मानदम्भविवर्जितः ।
[1]अनाहूतोऽपि वाऽऽहूतो व्रजेन्मण्डलमुत्तमम् ॥
व्रती वाऽपि हुनेदेव न दोषस्तत्र विद्यते ।
व्रतादिशङ्कया यस्तु न व्रजेदाहूतोऽपि सन् ॥
व्रतं तस्य प्रतिहतमनर्थं च समाप्नुयात् ।
तस्मात् कनिष्ठाहूतोऽपि प्रविशेदेव मण्डले ॥ इति ॥

अत्र ज्येष्ठत्वं कनिष्ठत्वं च विप्राणां दीक्षापूर्वापरभावेन ज्ञेयम् । तदुक्तं रुद्रयामळे—

बालोऽपि दीक्षितः पूर्वं ज्येष्ठः स तु कुलागमे ॥ इति ॥
द्विजोऽपि दीक्षितः पश्चादन्त्यजः पूर्वदीक्षितः ।
द्विजः कनिष्ठः स ज्येष्ठ इति शास्त्रविनिश्चयः ॥ इति ॥

तत्रैव वचनात् क्षत्रियादीनां पश्चात् दीक्षितोऽपि द्विज एव ज्येष्ठः । क्वचिदुच्छिष्टग्रहणे योनिसंबन्धादपि ज्येष्ठत्वं प्रतिपादयति । तदुक्तं त्रिपुरार्णवे—

विद्यासंबन्धतो वाऽपि योनिसंबन्धतस्तथा ।
ज्येष्ठानामपि चोच्छिष्टं दीक्षितानां च भक्षयेत् ॥ इति ॥

[1] अनाहूतोऽप्यनाहूतो--श्री,

दीक्षाहीनस्य चोच्छिष्टं जनकस्यापि दीक्षितः ।
न भक्षयेत् सकृद्वाऽपि भुक्त्वा पातित्यमाप्नुयात् ॥ इति ॥

अथ प्रसङ्गात् केन कियद्द्रव्यसेवनं कार्यं तद्विविच्यते । तत्र बालोपास्तौ त्रिपात्रं, पञ्चदशीमन्त्रोपदेशवतः चतुष्पात्रं, षोडश्यादिदीक्षावतः पञ्चपात्रम् । तदुक्तं परमानन्दतन्त्रे—

सौभाग्यतोपासकस्य चतुस्तत्त्वं भवेच्छिवे ।
बालाद्युपासकानां तु तत्पूजोक्तविधानतः ॥
तेषां तु तत्त्वत्रितयं अन्यत् सर्वं समं भवेत् ॥ इति ॥
दीक्षावतां पूर्णपात्रं पञ्चमं तु भवेच्छिवे ।
हुत्वा शिवाग्नौ क्रमशः त्रिचतुःपञ्चपात्रकम् ॥ इति ॥

ननु—

पीत्वा पीत्वा पुनः पीत्वा यावत् पतति भूतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥
आनन्दात् तृप्यते देवी मूर्च्छया भैरवः स्वयम् ।
वमनात् सर्वदेवास्तु तस्मात् त्रितयमाचरेत् ॥

इत्यादिकुलार्णवप्रभृतितन्त्रेष्वनियतपानस्योक्तत्वात् कथं पात्रनियम इति चेत्—शृणु शास्त्राभिप्रायं अज्ञस्तत्त्वबुभुत्सुश्चेत् । पीत्वा पीत्वेति लिखितवचनं "आगळान्तं पिबेत् द्रव्यं स मुक्तो नात्र संशयः" इत्यादिकुलार्णववचनं यथेच्छयाऽनुरूपं न सर्वेषां, किं तु पूर्णारूढानाम् । अत एव कुलार्णवे "आगळान्तं" इत्यस्याव्यवहितप्राक् "पूर्णाभिषेकयुक्तानां पानं देवि निगद्यते" इति प्रतिज्ञाय "आगळान्तं पिबेत् द्रव्यं" इत्यादिवचनानि लिखितानि । पूर्णाभिषेकलक्षणमपि तत्रैव कुलार्णवे—

यो निन्दास्तुतिशीतोष्णसुखदुःखादिसंभवे ।
समः सर्वत्र योगीशो हर्षामर्षविवर्जितः ॥ इत्यादिना,
तत्त्वत्रयश्रीचरणमूलमन्त्रार्थतत्त्ववित् ।
देवतागुरुभक्तश्च शांभवीमुद्रयाऽन्वितः ॥
स च पूर्णाभिषिक्तः स्यात् कौलिको न तु दीक्षया ॥ इति ॥

ईदृशो यः पूर्णाभिषिक्तः स एव पूर्णारूढः, तस्यैव आगळान्तमिति विधानम् । अत एव अमृतारहस्ये—

ब्रह्मज्ञानी सुरां पीत्वा कुलाचारे चरन् मुहुः ।
भूमौ पतति तस्याङ्गे लगन्ति यदि रेणवः ।
तावत्कालं रेणुसङ्ख्यं ब्रह्मलोके स मोदते ॥

इति वचने ब्रह्मज्ञानीति समष्टिशब्देन कुलार्णवोदितं विशिष्टार्थमाह । इदानीन्तनाः तन्त्रार्थमजानन्तो रागान्धाः स्वाधिकारं अविचार्य पीत्वापीत्वेति तन्त्रवचनानि लोकानां दर्शयित्वा स्वयं यथेच्छाऽऽचारं कुर्वन्तः परेषां बुद्धिमपि तिरोदधिरे । ते यावच्चन्द्रदिवाकरौ तावन्नरकयातनामुपलभेयुः । अत्र प्रमाणं परमानन्दतन्त्रे—

यावन्न चलते दृष्टिर्यावन्न चलते मनः ।
तावत्पानं प्रकुर्वीत पशुपानमतः परम् ॥
यावन्नेन्द्रियवैकल्यं यावन्न मुखवैकृतिः ।
तावदेव पिबेत् द्रव्यमन्यथा पतनं भवेत् ॥ इति ॥

यथा साधकः स्वयोग्यताऽनुसारेण द्रव्यं स्वीकुर्यात्, एवमाचार्योऽपि योग्यतां दृष्ट्वैव पात्रं दद्यात् । तदुक्तं कुमारीतन्त्रे—

कौलिके पात्रमधिकं प्रयच्छत्यविचारयन् ।
तदीयमधिकारं सः सह तेनैव मज्जति ॥ इति ॥

तत्रैव—

पानमेकप्रयत्नेन यावद्द्रव्यस्य वै भवेत् ।
तदारम्भे भवेत् पात्रं न न्यूनं नाधिकं शिवे ॥ इति ॥

पानपात्रमानं नीलातन्त्रे । एकप्रयत्नसाध्यपानसाधनद्रव्यमानं पात्रं भवति इति तदर्थः । किं च तन्त्रान्तरे—

उल्लासभेदमज्ञात्वा प्राप्य मूढत्वमम्बिके ।
जिह्वालोलुपभावेन चेन्द्रियप्रीणनाय च ।
यः पिबेत्तं तु तामिस्रे मातृकाः पातयन्ति वै ॥ इति ॥

इत्थं च इदानीन्तनानां [1]अतिजितेन्द्रियाणामपि आरम्भोल्लासपर्यन्तानुधावनमेव युक्तम् । अत एवोक्तं तन्त्रे—

अशक्ताबुधबालानामारम्भः परिकीर्तितः ॥

आरम्भोल्लासलक्षणं तत्रैव—

यस्य यावत्पात्रमुक्तमारम्भस्तस्य तावता ॥ इति ॥

प्रसक्तानुप्रसक्ते अलं पल्लवितेन । इतः शेषमग्रे उल्लासविलासे चरमखण्डे वक्ष्यामः ॥ २२ ॥

देवीविसर्जनम्

खेचरीं बद्ध्वा क्षमस्वेति विसृज्य तामात्मनि संयोजयेत् इति शिवम् ॥ २३ ॥

इति . . . कल्पसूत्रे ललितानवावरणपूजा नाम पञ्चमः खण्डः

खे च रीं ब द्ध्वा, बन्धनानन्तरं—

ज्ञानतोऽज्ञानतो वाऽपि यद्यदाचरितं शिवे ।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि ॥

इति क्षमाप्य वि सृ जे त् । विसर्गो नाम पूजार्थमाहूतायाः पुनः स्वस्थानं प्रति नयनम् । आ त्म नि हृत्कमले यो ज ये त् स्थापयेत् । शि व मिति प्रकरणसमाप्तिद्योतकम् ॥

इति . . . कल्पसूत्रवृत्तौ श्रीललितानवावरणपूजा नाम पञ्चमःखण्डः

---

[1] अजितेन्द्रियाणामार—श्री.

षष्ठः खण्डः—श्यामाक्रमः

श्यामे सङ्गीतमातः परशिवनिलये मुख्यसाचिव्यभारो-
द्वाहे दक्षे दयापूरितनिजहृदये मामकीं दैन्यवृत्तिम् ।
श्रीमत्सिंहासनेश्यां भववनपतितान् दावदग्धान्नमस्ते
त्रातुं पीयूषवर्षैः कथय परिकरं बद्धवत्यां विविक्ते ॥

श्यामोपास्तिविधिः

श्रीभगवान् परशुरामः श्यामाक्रमविवक्षुः तस्यामुपासकानामुपास्यत्वज्ञानोत्पत्तये, अङ्गीकृतश्रीविद्योपासनस्य "यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति" इति श्रुत्या स्वीकृतैकदेवतोपास्तेरन्यदेवतोपासनमनिष्टजनकमिति यत् प्रतिपादितं, तेन कलुषितचेतसां कालुष्यनिवृत्तये च, आदौ तद्गुणस्वरूपं वर्णयति—

इयमेव महती विद्या सिंहासनेश्वरी साम्राज्ञी तस्याः प्रधानसचिवपदं श्यामा तत्क्रमविमृष्टिः सदा कार्या ॥ १ ॥

पराशक्तेः स्वरूपं उपास्यत्वं च

इयं वक्ष्यमाणा । इयमित्युत्तरं येति शेषः । या महती निरवधिकमहत्त्ववती सिंहासनं परशिवः स्वाधिष्ठानरूपत्वात्, तस्य ईश्वरी तन्निष्ठसृष्टिस्थितितिरोधानसङ्कल्पनिर्वाहकर्त्री । तदुक्तं शङ्करभगवत्पादैः—

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ॥ इति ॥

अगस्त्यसंहितायामपि विद्यावतीस्तुतौ—

यया देव्या विरहितः शिवोऽपि हि निरर्थकः ।
नमस्तस्यै सुमीनाक्ष्यै देव्यै मङ्गळमूर्तये ॥ इति ॥

इयं मायातो विलक्षणा चिद्रूपा, न जडस्वभावा। तदुक्तं सूतसंहितायाम्—

सदाकारा परानन्दा संसारोच्छेदकारिणी।
सा शिवा परमा देवी शिवाभिन्ना शिवङ्करी।
शिवाभिन्ना तया हीनः शिवोऽपि हि निरर्थकः॥ इति॥

ननु—मुख्यं शिवे सृष्ट्यादिकर्तृत्वं, तन्निर्वाहकत्वमात्रं यदि शक्तेः, तर्हि मुख्य-जगत्कर्तृत्वनियन्तृत्वादि शिवनिष्ठम्। इयं च सहकारिणी। तथा सति मुख्यत्वात् शिव एवोपास्यः न शक्तिः इति चेत्—शृणु। क्षित्यादिकार्यजातं कारणमन्तरेणानुपपन्नं इत्यनुपपत्त्यैव हि शिवस्य शक्तेर्वा कल्पनम्। न हि चर्मचक्षुषा शक्तिं शिवं वा पश्यामः। एवं कल्पयितुमारम्भे अत्र वेदान्तिनः—परस्य चिद्रूपस्य ब्रह्मणः धर्मो माया, सैवाविद्या जडस्वभावा, सैव जगदुपादानं, परं ब्रह्म तु विवर्तोपादानं, अत एव जडोपादानत्वात् जगदपि जडस्वभावं, मायोपादानत्वात् मिथ्यात्वं च—इति प्राहुः। तं पक्षं तान्त्रिकाः न क्षमन्ते। तथा हि, या मायाऽविद्येत्युच्यते सा चिद्धर्मोऽन्यधर्मो वा; आद्ये धर्मधर्मिणोरभेदस्य वेदान्तिनामप्यनुमतत्वेन चिद्धर्मस्य जडत्वानुपपत्तिः। अचिद्धर्मत्वे अद्वैतहानिः, "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति प्रमाणविरोधश्च। अतः गत्यभावात् सा माया चिद्धर्म इत्यवश्यं वाच्यम्। तथा सति तस्या जडत्वं दूरतो निरस्तम्। न च चिदतिरिक्ता शक्तिः नास्ति इति वाच्यम्। वयमपि तमेवार्थं ब्रूमः। परं तु पृथिवीव्यतिरिक्तगन्धाभावेऽपि धर्मो धर्मी इति व्यवहारानुरोधेन ईषद्भेदः कल्प्यते, एवं द्वयोः चिद्रूपत्वेऽपि ईषद्भेदो व्यवहारार्थं कल्प्यः। एवं च जगदुपादानत्वं द्वयोरपि न संभवति, जडस्वभावत्वात् जगतः। न हि प्रकाशात् तमो भवितुमर्हति। अतः चिति जगत् सूक्ष्मरूपेण बीजे वटवृक्षवत् सर्वदा अस्त्येव। तदवयवशैथिल्यपूर्वकविस्तारसङ्कोचकर्तृत्वमेव चिति, न तु तदुपादानत्वं, यथा वणिजः प्रभाते क्रय्यवस्तूनां प्रसारणं रात्रौ सङ्कोचः तादृशं कर्तृत्वं चितः। तत्सहकारिणी चिच्छक्तिः॥

ननु चिदतिरिक्ता ईषद्भेदवती तन्निष्ठकर्तृत्वनिर्वाहिका शक्तिः किमित्यङ्गीक्रियते चित्येव तत्कर्तृत्वमास्ताम्। अन्यथा तुल्ययुक्त्या कुलालादिष्वपि घटकर्तृत्वाश्रया एका शक्तिः सिध्येत इति चेत्—न, श्रुतिस्मृतिलोकव्यवहाराणां सत्त्वात्। "पराऽस्य शक्तिर्विविधैव श्रूयते" इति श्रुतिः। देवीभागवतेऽपि—

शक्तिः करोति ब्रह्माण्डं सा वै पालयतेऽखिलम् ।
इच्छया संहरत्येषा जगदेतच्चराचरम् ॥
न विष्णुर्न हरः शक्रो न ब्रह्मा न च पावकः ।
न सूर्यो वरुणः शक्ताः स्वे स्वे कार्ये कथंचन ॥
तया युक्ता हि कुर्वन्ति स्वानि कार्याणि ते सुराः ।
कारणं [1]सैव कार्येषु प्रत्यक्षेणावगम्यते ॥
वस्तुजालं शक्ति[2]हीनं शक्तं कर्तुं न किञ्चन ।
शक्तं तु परमेशानि शक्त्या युक्तं यदा भवेत् ॥

इति बहुविस्तरेण । आ गोपालाङ्गनमा च पण्डितं इदं कार्यं कर्तुं मम शक्तिरस्ति मम शक्तिर्नास्ति इति व्यवहरन्त्यविवादेन । तस्मात् बहुप्रमाणसिद्धा शक्तिः तन्निर्वाह्यं जगदपि शिवकुक्षौ सदा सूक्ष्मरूपेणास्त्येव ॥

अथवा चितो या शक्तिः तत्परिणामरूपं जगत् । तदुक्तं वासिष्ठे—

चिद्विलासः प्रपञ्चोऽयं [3]सखे ते दुःखदः कथम् ॥ इति ॥

एतेन चिच्छक्त्योः ईषद्भेदाङ्गीकारात् चितो निर्विकारत्वबोधकश्रुतिरविरुद्धा, अत्यन्तभेदानङ्गीकारात् अद्वैतप्रतिपादकश्रुतयोऽप्यबाधिताः । एतादृशी शक्तिः वस्तुमात्रे अनुभूयते कार्योत्पत्त्यनन्तरं न ततः प्राक् । अमुमेवार्थं भूतपञ्चकविवेके श्रीविद्यारण्यस्वामिचरणा अप्याहुः—

निस्तत्त्वा कार्यगम्याऽस्य शक्तिर्मायाऽग्निशक्तिवत् ।
न हि शक्तिं क्वचित् कश्चित् बुध्यते कार्यतः पुरा ॥ इति ॥

एवं शिवनिष्ठायां तदभिन्नायां तद्धर्मरूपायां तन्निष्ठकर्तृत्वनिर्वाहिकायां सिद्धायां सैवोपास्या । न चिद्रूपः शिवः, तस्यानुपास्यत्वात् । उपासना नाम उपास्यनिष्ठगुणनामकीर्तनम् । शक्तिरहिते केवले गुणाभावात् निर्गुणस्य ध्यानस्तुतिकीर्तनादि कथं भवेत् । तदुक्तं योगिनीतन्त्रे—

[1] नैव—श्री.
[2] हीनैः—श्री.
[3] स च ते—श्री.

शक्त्या विना शिवे सूक्ष्मे नाम धाम न विद्यते ॥ इति ॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥ इति श्रुतिश्च ।

"नेति नेति" इति सर्वनिषेधशेषत्वेनैव तस्य ज्ञेयत्वात् केवलशिवविषयकज्ञानस्योपासनादिकर्मविरोधित्वेन तादृशचरमवृत्तेरुपासनासाध्यत्वात् केवलशिवस्त्वनुपास्यः । तदुक्तं देवीभागवतेऽपि—

शिवोऽपि शवतां यातः कुण्डलिन्या विवर्जितः ॥ इति ॥

योगिनीतन्त्रेऽपि—

यज्ज्ञानेऽपि महादेवि शर्म वर्म न किंचन ॥ इति ॥

किं च—यथाकथंचित् वलयाकारेण मनसः निराकारग्रहणार्थं प्रेरणेऽपि शुभाशुभधर्महीनत्वात् क्षणमात्रमपि न स्थातुमर्हति । तदुक्तं श्रीभगवद्गीतायाम्—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ॥ इति ॥

अतस्तस्यैव मनसः स्थैर्यार्थं किञ्चिद्रूपं कल्पनीयम् । यच्च परब्रह्मणि कल्पितं रूपं नामधामसहितं तदेव शक्तिपदवाच्यम् । तदप्युक्तं भागवते—

एवं सर्वगता शक्तिः सा ब्रह्मेति विविच्यते ।
सगुणा निर्गुणा चेति द्विधोक्ता सा मनीषिभिः ॥
सगुणा रागिभिः सेव्या निर्गुणा तु विरागिभिः ।
धर्मार्थकाममोक्षाणां स्वामिनी सा निराकुला ॥
ददाति वाञ्छितानर्थानर्चिता विधिपूर्वकम् ॥ इति ॥

एवमुक्तप्रमाणयुक्तिकलापैः उपास्या परा शक्तिः । परशिवश्च निर्गुणः । तद्विषयिणी वृत्तिस्तु परमपुरुषार्थरूपत्वात् अम्बोपासनासाध्येत्युपपन्नं सिंहासनेश्वरीत्वं, साम्राज्ञीत्वम् ॥

निर्गुण एव शिवः यो "बहु स्यां प्रजायेय" इति इच्छाशक्त्या युक्तः सृष्ट्युन्मुखः स एव शक्तिपदवाच्यः, शिव एव शक्तिरूपेणोपास्यश्चेति तत्त्वमवगन्तव्यम् ॥

या ईदृशी तस्याः प्रधानसचिवपदं—अत्र सचिवपदं साचिव्यरूपधर्मपरं तस्य पदं आश्रयः श्यामेति। तस्याः यः क्रमः तस्य या विमृष्टिः अनुसरणं तत् सदा कार्यम्। अत्र सदेत्यनेन यावज्जीवं प्राप्तौ यथा अग्निहोत्रविधेः यावज्जीवं प्राप्तौ "सायं जुहोति प्रातर्जुहोति" इति वाक्यान्तरेण सङ्कोचः, तथा अस्या एव श्यामायाः प्रकरणे अग्रे "एवं नित्यसपर्या कुर्वन् लक्षजपं जप्त्वा" इति वाक्येन लक्षजपपर्यन्तं सकृत्पूजा कार्या न तु तदुत्तरमिति संकोचः॥

श्यामाया उपास्यतोपपत्तिः

ननु या साम्राज्ञी सर्वनियन्त्री स्वतन्त्रा तां परित्यज्य किं तदनुवर्तिन्याः श्यामायाः उपासनेनेत्याशङ्कायां तदुपासनामुपपादयिष्यन् प्रथमं लोकदृष्टान्तेन द्रढयति—

प्रधानद्वारा राजप्रसादनं हि न्याय्यम्॥ २॥

लोके राजदर्शनोत्सुकाः आदौ प्रधानमुपसेव्य तद्द्वारा राजदर्शनं गृह्णन्ति। तेन फलं सत्वरं अनायासेन भवतीति दृष्टं लोके। तद्वदत्रापि प्रथमं तत्प्रधानभूतायाः श्यामायाः प्रथममुपासनं न्याय्यमिति भावः। द्वारेत्यनेन प्रधानोपासनपूर्ववृत्तित्वं सूचितं, न्याय्यं इत्यनेन अत्यन्तमनावश्यकताऽपि सूचिता। परं तु यः कोऽपि समर्थः सचिवादीननादृत्य स्वयमेव राजकृपां संपाद्य तस्मात् फलं संपादयतीत्ययमपि पक्षो लोके क्वचिदस्ति। तथाऽपि प्रधानद्वारा राजप्रसादनं न्याय्यं वरमित्यर्थः। अयं भावः—यश्च प्रधानदेवताकृपां साक्षात् संपादयितुमसमर्थः स प्रथमं दीक्षां संपाद्य श्रीगणपत्युपास्तिं कृत्वा ततः श्यामोपास्तिं वाराह्युपास्तिं परोपास्तिं च विधाय तासां कृपां संपाद्य पश्चात् श्रीललितोपास्तिं आरभेत्। समर्थस्तु दीक्षोत्तरं गणपत्युपास्त्यनन्तरं श्रीललिताक्रममारभेत्। "अतिरात्रे षोडशिनं गृह्णाति," "नातिरात्रे षोडशिनं गृह्णाति," इतिवद्विकल्पः इति तत्त्वम्। फलाधिक्यकामः उक्तक्रमेण ललितोपास्तिं कुर्यात्। न्यूनफलकामः गणपत्युपास्त्यनन्तरं ललितोपास्तिं कुर्यात् इति व्यवस्था॥ २॥

प्रातःकृत्यं संध्याऽन्तम्

एवमुपास्त्यधिकारिणं प्रदर्श्य उपास्तिप्रकरणं वक्तुं प्रक्रमते—

ब्राह्मे मुहूर्ते चोत्थाय शयने स्थित्वैव श्रीपादुकां प्रणम्य प्राणानायम्य मूलादिद्वादशान्तपर्यन्तं ज्वलन्तीं परसंविदं विचिन्त्य मनसा मूलं त्रिशो जप्त्वा बहिर्निर्गत्य विमुक्तमलमूत्रो दन्तधावनजिह्वाघर्षणकफविमोचननासाशोधनविंशतिगण्डूषान् विधाय ॥ ३ ॥

श्रीपादुकां गुरुपादुकाम् । प्राणानिति, प्राणायामलक्षणमुक्तं सनत्कुमारतन्त्रे—

प्राणायामत्रयं कुर्यात् मूलेन प्रणवेन वा ।
अथवा मन्त्रबीजेन यथोक्तविधिना सुधीः ॥
पूरयेत् षोडशभिर्वायुं कुंभयेच्च चतुर्गुणैः ।
रेचयेत् कुंभकार्धेन अशक्तस्तत्तुरीयतः ॥
तदशक्तौ तच्चतुर्थैः स्यादेवं प्राणसंयमः ।
प्राणायामं विना नैव पूजनादिषु योग्यता ॥ इति ॥

समयाङ्कमातृकायाम्—

इडया पूरयेद्वायुं सकृद्धे मूलविद्यया ।
मध्यनाड्या कुंभयेच्च वेदसंख्या वरानने ॥
नेत्रसंख्याक्रमेणैव रेचयेत् पिङ्गलाऽध्वना ।
पुनः पुनः क्रमेणैव यथा वारत्रयं भवेत् ॥ इति ॥

दन्तधावनादीनां स्मृतिप्राप्तानामुक्तक्रमलाभार्थं पाठः । अतः पाठक्रमेणानुष्ठेयम् । यद्यपि प्राणायामप्रकारस्त्वग्रे सूत्रेऽपि वक्ष्यति, तथाऽपि वायुधारणसमर्थानां विस्तृततया प्रदर्शनं, अशक्तानां सूत्रस्थं ज्ञेयम् । विंशतिगण्डूषानित्यन्तः शेषः स्पष्टार्थः ॥ ३ ॥

मन्त्रभस्मजलस्नानेष्विष्टं विधाय वस्त्रं परिधाय ॥ ४ ॥

मन्त्रस्नानमुक्तं त्रिपुरार्णवे—

वस्त्रेणार्द्रेण चाङ्गानां कृत्वा प्रोञ्छनमादितः ।
मूलं जपन् सप्तधा तु आपादतलमस्तकम् ॥
तलाभ्यां संस्पृशेत् देवि मन्त्रस्नानं प्रकीर्तितम् ।
एतत्स्नानमशक्तस्य विहितं शुद्धिहेतवे ॥ इति ॥

भस्मस्नानमुक्तं शिवरहस्ये—

शुद्धं भस्म करे धृत्वा मूलमष्टशतं जपेत् ।
सर्वाङ्गेष्वनुलेपेन भस्मस्नानमुदाहृतम् ॥ इति ॥

जलस्नानं श्रीललिताप्रकरणोक्तम् । अत्र मुख्यं जलस्नानं, जलाद्यलाभे कर्मकाले प्राप्ते अशक्तौ गुरुकार्यार्थे क्षिप्रं गच्छता च मन्त्रस्नानादि कार्यम् । तदुक्तं नारदपाञ्चरात्रे—"अथ मान्त्रं शुभं शृणु" इत्युपक्रम्य,

तोयाभावे तु समये दुर्गमार्गेऽवसीदतः ।
गमने क्षिप्रसिद्ध्यर्थं गुरुकार्येष्वतन्द्रितः ॥
मन्त्रस्नानं प्रकुर्वीत . . . . इति ॥

इतोऽपि लघुस्नानं वीरतन्त्रे—

मणिबन्धादधोहस्तौ पादौ गुल्फौ तथाऽऽननम् ।
शोधयेत् स्नानमेतत् स्यात् पञ्चाङ्गं शुद्धिदायकम् ॥ इति ॥

इमानि स्नानानि शक्तितारतम्यात् अशुचित्वतारतम्याच्च व्यवस्थितानि ज्ञेयानि । अन्यान्यपि मानसिकध्यानस्नानादीनि ग्रन्थविस्तरभयात् नेह लिखितानि, तन्त्रान्तरात् द्रष्टव्यानि ॥ ४ ॥

सन्ध्यां विधत्ते—

सन्ध्यामुपास्य सवितृमण्डले देवीं सावरणां विचिन्त्य मूलेन त्रिरर्घ्यं दत्वा यथाशक्ति सन्तर्प्य ॥ ५ ॥

सन्ध्यामितीदमुत्पत्तिवाक्यं, अत्र कथंभावाकाङ्क्षायामाह—स वि तृ म ण्ड ल इत्यारभ्य स न्त र्प्ये त्यन्तेन । तर्पणमपि मू ल मुच्चार्य श्रीश्यामां तर्पयामि स्वाहा इति मन्त्रेण । मालिनीतन्त्रे तर्पणमन्त्रोद्धारस्य—"मूलान्ते मालिनीं प्रोच्य तर्पयाम्यभिवल्लभा" इति लेखात् । प्रकृते मन्त्रस्यानुक्तत्वात् मन्त्राकांक्षायाः तन्त्रान्तरस्थमन्त्रादरः । य था श क्ति इत्यनेन सङ्ख्यायाः तर्पणवृत्तेरनङ्गत्वं सूचितम् ॥

अत्र निबन्धकारः एतदन्तमाह्निकं स्वतन्त्रोपास्तौ पुरश्चरणकाले च, न तु श्रीक्रमाङ्गत्वेन सहानुष्ठाने इति जगौ । तन्न । पूर्वोक्तलौकिकन्यायदृष्टान्तेन ललितोपास्तेः पूर्वं श्यामोपास्तिः सिध्यति । तदनुष्ठानमर्यादा लक्षजपपर्यन्तमिति अग्रिमवाक्येन व्यवस्थितम् । इत्थं च "सङ्गीतमातृकामिष्ट्वा संवित्साम्राज्ञीं (इत्यादि) कोलमुखीं वरिवस्येत" इत्यग्रिमसूत्रे क्त्वाप्रत्ययेन वाराह्युपास्तिपूर्ववृत्तित्वं स्पष्टम् । इत्थं सति कोलमुखीवरिवस्यापूर्वकालसंबन्धिनी या श्यामावरिवस्या जपश्च स सर्वोऽपि श्रीललिताक्रमारम्भाङ्गभूतः, नान्यो ललिताक्रमेण सह अनुष्ठीयमानः श्यामाक्रमगन्धोऽपि सूत्रे प्रतीयते । एवं सति पुरश्चरणादिकाले आह्निकं अन्यत्र नेति किं प्रमाणमनुसृत्य लिलेख । तदभिप्रायं स एव जानाति । वस्तुतो ललिताप्रयोगानङ्गभूतश्यामाक्रमः सूत्रे अप्रसिद्धः । अङ्गभूतक्रममुद्दिश्याह्निकपाठात् अङ्गभूतेऽपि क्रमे सर्वमाह्निकं निश्शङ्कं प्रवर्तत एव ॥ ५ ॥

यागगृहप्रवेशादि प्राणायामान्तं कृत्यम्

सन्ध्यामुक्त्वा पूजां वक्तुमारभते—

यागगृहं प्रविश्यासने आधारशक्तिकमलासनाय नम इत्युपविश्य ॥ ६ ॥

अथ प्राणायामप्रकारमाह—

समस्तप्रकटगुप्तसिद्धयोगिनी[1]चक्रश्रीपादुकाभ्यो नम इति शिरस्यञ्जलिमाधाय स्वगुरुपादुकापूजां[2] च विधाय ॥ ७ ॥

[1] 'चक्र' इति नास्ति—अ.

[2] गणपतिपूजां च—श्री.

स्वगुरुपादुकापूजां विधाय । श्यामागुरुपादुका वक्ष्यमाणा । तेन स्वमूर्ध्नि पुष्पाक्षतान् क्षिपेत् ॥ ७ ॥

ऐं ह्रः अस्त्राय फट् इत्यस्त्रमन्त्रेण अङ्गुष्ठादि-कनिष्ठान्तं करतलयोः कूर्परयोः देहे च व्यापकत्वेन विन्यस्य ॥ ८ ॥

व्यापकत्वलक्षणं पूर्वमुक्तम् । अङ्गुल्यादिभेदेन मन्त्रावृत्तिः, प्रतिप्रधानमिति न्यायात् ॥ ८ ॥

यं इति वायुं पिङ्गळयाऽऽकृष्य देहमुपविशोष्य रं इति वायुमाकृष्य देहं दग्ध्वा वं इति वायुमा-कृष्यामृतेन दग्धदेहभस्म सिक्त्वा लं इति वायुमा-कृष्य दृढं विधाय हंस इति वायुमाकृष्य शिवचैतन्य-मुत्पाद्य ॥ ९ ॥

यं इत्यस्य विशोष्य इत्यनेनान्वयः, वायुबीजत्वे शोषणकार्यक्षमत्वात् । शोषणं नाम जलांशस्याकर्षणम् । वाय्वाकर्षणं तु तूष्णीमेव । इडापिङ्गळे नारदीये निरूपिते—

पिङ्गळा वामनासा स्यादिडा तदितरा स्मृता ॥ इति ॥

रं इति वह्निबीजेन देहदाहः । अमृतेन अमृतबीजेन वं इत्यनेन दग्धभस्मसेचनं पुनः शरीरोत्पादनार्थम् । लं इति पार्थिवबीजेन सिक्तभस्मनि काठिन्यसंपादनम् । ततः तस्मिन् हंस इति मन्त्रेण शिवचैतन्यसंपादनम् ॥

एतावत्पर्यन्तं भूतशुद्धिं विधाय श्रीक्रमोक्तां प्राणप्रतिष्ठां च कुर्यात् ॥ ९ ॥

मूलमेकश उच्चार्य वायुमाकृष्य त्रिशः उच्चार्य कुंभयित्वा सकृदुच्चार्य रेचयेत् । एवं रेचकपूरककुंभकं

त्रिधा सप्तधा दशधा षोडशधा वा विरच्य तेजोमयतनुः ॥ १० ॥

एकशः एकवारम् । एवमग्रेऽपि । रेचकपूरककुंभकमिति द्वन्द्वसमासात् साहित्यलाभः । अत्र यद्यपि पूरकं मध्ये पतितं रेचकं प्रथमं कुंभकं चरमं इति व्युत्क्रमः, तथाऽपि नात्र क्रमे तात्पर्यं, किं तु साहित्ये । क्रमस्तु पूर्वपाठानुसारेणैव । त्रिधेत्यारभ्य सङ्ख्यावृद्धौ फलाधिक्यम् । तेजोमयतनुः इत्यनेन प्राणायामक्रियायाः पापशोधकत्वं सूचितम् ॥ १० ॥

षडङ्गादिन्यासपञ्चकम्

अथ न्यासजालं वदति—

षडङ्गं बालासहितां मातृकां मूलहृन्मुखेषु रतिप्रीतिमनोभवान् विन्यस्य ॥ ११ ॥

विन्यस्य इति सर्वत्रानुषज्य योज्यम् । तथा च षडङ्गं विन्यस्येत्यर्थः । एतन्मन्त्रस्वरूपं उपरिष्टात् स्पष्टीकरिष्यामः । अयमेको न्यासः । बालासहितां मातृकां विन्यस्य इति द्वितीयो न्यासः । मातृकां बहिर्मातृकाम् । न्यासस्थानानि तन्त्रान्तरादवगन्तव्यानि । अग्रे वक्ष्यमाणत्रितारीकुमारीकेवलकुमार्योर्विकल्पेन प्राप्तौ तद्बाधकं केवलबालासहितामिति विशेषणम् । तेन मातृकान्यासमन्त्रे सदा बालायोग एव, अन्यत्र विकल्पेन बालायोगः । न्यासस्थानानां बहुप्रसिद्ध्या नात्र लेखः । मन्त्रस्वरूपं च—ऐं क्लीं सौः अं नमः । एवमग्रेऽपि । मूलं मूलाधारस्थानम् । तदादित्रिषु रत्यादित्रयं विन्यसेत् । अयं तृतीयो न्यासः ॥ ११ ॥

मूलं सप्तदशधा खण्डयित्वा षट् ब्रह्मबिले त्रीणि ललाटे चत्वारि भ्रूमध्ये दक्षवामेक्षणयोः षट् चाष्टौ सप्तास्ये दक्षवामश्रुतिकण्ठेष्वेकैकं दक्षवामांसयोरष्टौ च दश हृदि दश दक्षवामस्तनयोरष्टावष्टौ नव नाभौ द्विः स्वाधिष्ठाने षडाधार एवं विन्यस्य ॥ १२ ॥

खण्डयित्वा विभज्य । विभागप्रकारं विभक्तखण्डैः क्रियमाणन्यासस्थानानि चाह—षडित्यादिना । षडित्यादिसङ्ख्यावाचकानि पदानि मूलस्थवर्णपराणि । आदिमषड्वर्णान् नमोऽन्तानुच्चार्य ब्रह्मरन्ध्रे न्यसेत् । एवमग्रेऽपि । दक्षवामेक्षणयोः षट् चाष्टावित्यत्र दक्षनेत्रे षड्वर्णाः क्रमप्राप्ताः वामनेत्रे अष्टौ यथासंख्यं योज्यम् । एवमेव दक्षवामांसयोः इत्यादौ द्रष्टव्यम् । सर्वत्र त्रितारीकुमारीयोगः कार्यः । स्वाधिष्ठानं षड्दळकमलं गुह्यस्थानस्थम् । आधारो मूलाधारः, स पूर्वं व्याख्यातः । अयं चतुर्थो न्यासः ॥ १२ ॥

पञ्चममाह—

पुनराधारादिब्रह्मबिलपर्यन्तं सप्तदशखण्डानुक्तस्थानेषु विन्यस्य ॥ १३ ॥

पूर्वस्माद्वैलक्षण्यं मूलाधारादिस्थानवैपरीत्यमात्रं,[1]न तु सप्तदशखण्डवैपरीत्यं प्रमाणाभावात् ॥

निबन्धकारः खण्डवैपरीत्यं लिलेख । तस्य प्रमाणं तदीयेच्छैव न त्वन्यत् ॥ अयं पञ्चमो न्यासः ॥ १३ ॥

मन्दिरार्चनम्

एवं न्यासजालमुक्त्वा मन्दिरार्चनं वदति—

अमृतोदधिमध्यरत्नद्वीपे मुक्तामालाद्यलङ्कृतं चतुर्द्वारसहितं मण्डपं विचिन्त्य तस्य प्रागादिचतुर्द्वारेषु सां सरस्वत्यै लां लक्ष्म्यै शं शङ्खनिधये पं पद्मनिधये नमः लां इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावतवाहनाय सपरिवाराय नमः रां अग्नये शक्तिहस्ताय तेजोऽधिपतये अजवाहनाय सपरि-

[1] खण्डक्रमश्च पूर्ववत्, खण्डवैपरीत्यबोधकप्रमाणाभावात्—ब.

वाराय नमः टां यमाय दण्डहस्ताय प्रेताधिपतये महिषवाहनाय सपरिवाराय नमः क्षां निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये नरवाहनाय सपरिवाराय नमः वां वरुणाय पाशहस्ताय जलाधिपतये मकरवाहनाय सपरिवाराय नमः यां वायवे ध्वजहस्ताय प्राणाधिपतये रुरुवाहनाय सपरिवाराय नमः सां सोमाय शंखहस्ताय नक्षत्राधिपतये अश्ववाहनाय सपरिवाराय नमः हां ईशानाय त्रिशूलहस्ताय विद्याऽधिपतये वृषभवाहनाय सपरिवाराय नमः ओं ब्रह्मणे पद्महस्ताय सत्यलोकाधिपतये हंसवाहनाय सपरिवाराय नमः श्रीं विष्णवे चक्रहस्ताय नागाधिपतये गरुडवाहनाय सपरिवाराय नमः ओं वास्तुपतये ब्रह्मणे नमः इत्येकादशदिक्षु एकादश देवानर्चयेत् ॥ १४ ॥

एकादशदिशश्च—चतस्रो दिशः, चतस्रोऽवान्तरदिशः, ऊर्ध्वं, अधः, समस्तं चेति ज्ञेयाः । शेषं स्वयमूह्यम् ॥ १४ ॥

श्यामाक्रममन्त्रेषु बीजविशेषयोगः

श्यामाक्रमे सर्वमन्त्रेषु बीजविशेषयोगमाह—

श्यामाक्रममन्त्राणामादौ त्रितारीकुमारीयोगः कुमारीयोगो वा त्रितारी पूर्वोक्ता कुमारी बाला शेषमुत्तानम् ॥ १५ ॥

अर्थः स्पष्टः ॥ १५ ॥

कर्तृगुणविशेषविधिः

कर्तुरङ्गभूतान् कांश्चित् गुणानाह—

गन्धद्रव्येण लिप्ताङ्गस्ताम्बूलामोदितवदनः प्रसन्नमना भूत्वा ॥ १६ ॥

श्यामाचक्रलेखनप्रकारः

अथ श्यामाचक्रलेखनप्रकारमाह—

सुवर्णरजतताम्रचन्दनमण्डलेषु बिन्दुत्रिकोणपञ्चकोणाष्टदळषोडशदळाष्टदळचतुर्दळचतुरश्रात्मकं चक्रराजं विलिख्य ॥ १७ ॥

मण्डलेषु फलकेषु । पञ्चकोणं पञ्चाश्रकुण्डाकारम् । निर्माणं बिन्दुमारभ्य निर्गमनरीत्या ज्ञेयम् ॥ १७ ॥

सामान्यार्घ्यविधिः

अथ सामान्यार्घ्यविधिमाह—

मूलेन त्रिवारजप्तेन शुद्धजलेन चतुरश्रवृत्तषट्कोणत्रिकोणबिन्दून् प्रवेशेन मत्स्यमुद्रया विधाय अं आत्मतत्त्वाय आधारशक्तये वौषट् इत्याधारं प्रतिष्ठाप्य धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी सुश्रीः सुरूपा कपिला हव्यवाहा कव्यवाहेत्यग्निकळा अभ्यर्च्य उं विद्यातत्त्वाय पद्मानानाय वौषट् इति पात्रं प्रतिष्ठाप्य तपिनी

तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा इति पात्रे सूर्यकळा अभ्यर्च्य मं शिवतत्त्वाय सोममण्डलाय नमः इति शुद्धजलमापूर्य अमृता मानदा पूषा तुष्टिः पुष्टी रतिः धृतिः शशिनी चन्द्रिका कान्ति-र्ज्योत्स्ना श्रीः प्रीतिरङ्गदा पूर्णा पूर्णामृता चेति चन्द्रकळा अभ्यर्च्य अग्नीशासुरवायुषु मध्ये दिक्षु च षडङ्गानि विन्यस्य अस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य धेनुयोनी प्रदर्श्य मूलमन्त्रेण सप्तशोऽभिमन्त्र्य तज्जल-विप्रुड्भिः यागगृहं पूजोपकरणानि चावोक्ष्य ॥ १८ ॥

[1]प्र वे शे न प्रवेशरीत्या । म त्स्य मु द्र या, सा चोक्ता तन्त्रे—

अधोमुखे वामकरे दक्षिणं तादृशं करम् ।
स्थापयेन्मत्स्यमुद्रेयं तान्त्रिकैः परिकीर्तिता ॥ इति ॥
दक्षपाणितलं देवि वामपृष्ठोपरि न्यसेत् ।
अङ्गुष्ठद्वितयं सम्यक् ऋजुरूपमधोमुखम् ॥
मत्स्यमुद्रेयमाख्याता मण्डलादिप्रकल्पने ॥

इति परमानन्दतन्त्रेऽपि । आधारलक्षणं तत्रैव—

आधाराण्यपि चैतेषां वर्तुलं वा त्रिकोणकम् ।
योन्याकारं च षट्कोणं अष्टकोणमथापि वा ॥
अपदं त्रिपदं पञ्चषट्सप्ताष्टपदं तथा ।
मध्यछिद्रं यथापात्रपृष्ठं न स्याच्च भूगतम् ॥
अन्तर्नैव निमग्नं स्यात् तथा कर्तव्यमम्बिके ॥ इति ॥

1 "संस्कृतजलं मण्डलकरणार्थमेव न तु तत्पूरणार्थं प्रमाणाभावात्, पूरणं तु मूलानभिमन्त्रित-शुद्धजलेनैव ज्ञेयम्" इत्यधिकः—ब.

नमोऽन्तैश्चतुर्थ्यन्तैरेतैर्नामभिः वह्निकळापूजनमाधारे कुर्यात् । नमोऽन्तत्वं चतुर्थ्यन्तत्वं सूर्येन्दुकळास्वपि द्रष्टव्यम् । पात्रं प्रतिष्ठाप्य इति निरुक्तस्थापिताधारे इति शेषः । वह्न्यादिकळानामभ्यर्चनं पश्चिमादिप्रादक्षिण्येन । प्रमाणमुक्तं प्राक् । शेषं स्पष्टम् । अग्नीशेति—तत्प्रकारः पूर्वमेव दर्शितः । अस्त्रेण अस्त्रमन्त्रेण । कवचेन कवचमन्त्रेण ॥

केचित्तु—अवकुण्ठ्येत्यनेन अवकुण्ठनमुद्राकवचमन्त्रयोः ग्रहणं कार्यम् । अवकुण्ठनमुद्रास्वरूपमुक्तं तन्त्रे—

हस्तद्वयं मुष्टिरूपं तर्जन्यावृजुरूपके ।
युगपत् भ्रामयेत् ताभ्यां मुद्रेयमवकुण्ठिनी ॥

इति प्रजगुः ॥

धेनुः धेनुमुद्रा । इयं लोके बहुरूढा । तथाऽपि तत्प्रमाणं लिख्यते—

तर्जन्यादिचतुष्कं तु प्रोतं हस्तद्वयस्थितम् ।
दक्षतर्जन्यनामायां वाममध्यकनिष्ठिके ॥
वामतर्जन्यनामायां दक्षमध्यकनिष्ठिके ।
अधोमुखी धेनुमुद्रा . . . . ॥

इति परमानन्दतन्त्रे स्थितम् । योनिस्तु पूर्वमुक्ता । सप्तशः सप्तकृत्वः । तज्जलविप्रुड्भिः सामान्यार्घ्यविप्रुड्भिः ॥ १८ ॥

विशेषार्घ्यविधिः

ताभिरीकाराङ्कितत्रिकोण[1]वृत्तचतुरश्रं मण्डलं विधाय तस्मिन् पुष्पाणि विकीर्य पूर्ववदाधारं प्रतिष्ठाप्य अग्निकळा अभ्यर्च्य पात्रं प्रतिष्ठाप्य तस्मिन् पात्रे ह्रीं ऐं महालक्ष्मीश्वरि परमस्वामिनि ऊर्ध्वशून्य-

[1] षट्कोणवृ—श्री.

प्रवाहिनि सोमसूर्याग्निभक्षिणि परमाकाशभासुरे आगच्छागच्छ विश विश पात्रं प्रतिगृह्ण प्रतिगृह्ण हुं फट् स्वाहेति पुष्पाञ्जलिं विकीर्य सूर्यकळा अभ्यर्च्य

ब्रह्माण्डाखण्डसंभूतमशेषरससंभृतम् ।
आपूरितं महापात्रं पीयूषरसमावह ॥

इत्यादिममापूर्य द्वितीयं निक्षिप्य अकथादि-त्रिरेखाऽङ्कितकोणत्रये हलक्षान् मध्ये हंसं च विलिख्य मूलेन दशधा अभिमन्त्र्य चन्द्रकळा अभ्यर्च्य अग्नीशासुरवायुषु मध्ये दिक्षु षडङ्गानि विन्यस्य अस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य धेनुयोनी प्रदर्शयेत् ॥ १९ ॥

ता भिः सामान्यार्घ्योदकसंबन्धिनीभिःअद्भिः । ई का रा ङ्कि ते ति त्रि को ण-विशेषणम् । त्रिकोणमध्ये [1]ईकारं लिखेत् इति भावः । इदं न पूर्ववत् प्रवेशरीत्या निर्माणाभिप्रायकम्, किं तु निर्गमरीत्या, त्रिकोणमारभ्य चतुरश्रावसानपाठात्, त्रिकोणं सर्वान्तः चतुरश्रं सर्वस्मात् बहिरिति प्रायो दृष्टत्वात् । पू र्व व दि ति सामान्यार्घ्याधार-वदित्यर्थः । अ ग्नि क ळाः धूम्रार्चिरादीः अ भ्य र्च्य पा त्रं प्र ति ष्ठाप्य इत्यत्रापि पूर्ववत् इत्यनुवर्तते, योग्यत्वात् । तेन पात्रप्रतिष्ठापने पूर्वमन्त्रलाभः । आ दि म द्वि ती यौ प्रोक्तौ अत्र सूत्रे, तेन नात्र तृतीयचतुर्थपञ्चमाः अनुक्तत्वात् । [नहि] गणपतिक्रम इव मध्यमं चेतिवत् चकारोऽस्ति, अग्रे मपञ्चकमुररीकृत्येति वा लिङ्गमस्ति, येन तल्लाभो भवेत् । तस्मात् यावदुक्तम् । अश्च कश्च थश्च ते आदौ यासां ताः त्रिरेखाः । अवर्णमारभ्य विसर्गान्ता एका वर्णमयी रेखा, ततः कादितान्ता, ततः थादिसान्तेति भावः । विशेषस्यानुक्तत्वात् स्वाग्रादिप्रादक्षिण्येन । ह ळ क्षा न् त्रीन् वर्णान् त्रिषु विलिख्य

[1] ईकारं—अ.

मध्ये हंस इति उत्तरसंस्थं लिखित्वा । इदं सर्वं पात्रस्थद्रव्ये तत्संस्काररूपं लेखनम् । इत्थं च ईदृशलेखेन द्रव्यसंस्कारं भावयेत् इति तदर्थः । दशधा—एतदनन्तरं आवर्तितमूलेनेत्यस्य विशेषणम् । धेनुयोनी प्रदर्शयेत् इति धेनुमुद्रां प्रदर्श्य योनिमुद्रया प्रणमेत् । एतदर्घ्यसंशोधनमिति क्वचित् पुस्तके पाठः ॥ १९ ॥

चक्रदेवीपूजा

इत्थं पात्रासादनमुक्त्वा श्रीदेवताया मूर्तिकल्पनामन्त्रमाह—

चक्रमध्ये श्रीमातमुक्त्वा गीश्वरीमूर्तये नमः इति मूर्तिं कल्पयित्वा भूयः श्रीमातमुक्त्वा गीश्वर्यमृतचैतन्यमावाहयामि इत्यावाह्य षोडशभिरुपचर्य आशुशुक्षणित्र्यक्षरक्षःप्रभञ्जनदिक्षु देव्या मौळौ परितश्च पूज्या अङ्गदेव्यः । तन्मन्त्राः सर्वजनादयः अष्टौ सप्तैकादश दश पुनर्दशाष्टाविंशतिखण्डाः त्रितारीकुमारीवागादयः सजातयः सामान्यमनुयुक्ताः ॥ २० ॥

चक्रमध्ये इति आवाह्येत्यनेनान्वितम् । श्री इत्यारभ्य प्रथमनम इत्यन्तः उक्त्वेत्यपहाय मूर्तिकल्पनमन्त्रः । द्वितीय श्री इत्यारभ्य आवाहयामीत्यन्तः उक्त्वावर्जं आवाहनमन्त्रः । षोडशोपचाराः सप्रमाणं द्वितीयखण्डे दर्शिताः । आशुशुक्षणिः अग्निः, त्र्यक्षः ईशानः, रक्षः निर्ऋतिः, प्रभञ्जनो वायुः, एषां दिक्षु उक्तक्रमेण विदिक्ष्विति भावः । देव्या मौळौ मध्य इत्यर्थः । परितः प्रागादिदिक्षु अङ्गदेव्यः षडङ्गदेव्यः पूज्याः । तासां मन्त्रान् वक्तुं प्रक्रमते—तन्मन्त्रा इति । मूलमन्त्रे सर्वजनेत्यारभ्य षट्खण्डानि षडङ्गदेवीनां मन्त्रा बोध्याः । तत्रैकैकं कूटं कियद्वर्णकमिति जिज्ञासायामाह—अष्टाविति । सर्वजनेत्यादिषट्खण्डानि क्रमादष्टादिसङ्ख्याकानीत्यर्थः । प्रथमखण्डं अष्टवर्णं, द्वितीयं

सप्तवर्णे, तृतीयं एकादशवर्णे, चतुर्थपञ्चमौ दशवर्णौ षष्ठं अष्टाविंशतिवर्णकमिति फलितम् । न केवलं मूलमन्त्रघटकोक्तसङ्ख्याकवर्णा एव मन्त्रस्वरूपं, अन्येऽपि वर्णा योज्याः इत्याह—त्रितारीकुमारीवाचः आदौ एषां खण्डानां, जातिः हृदयाय शिरस इत्यादि, तैः सहिताः सजातयः, सामान्यमनवो नमःस्वाहावषडित्यादयः, तैः क्रमेण युक्ताः । इत्थं च मन्त्रस्वरूपं—ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं सर्वजनमनोहारि हृदयाय नमः । उक्तबीजानि ऐं इत्यादीनि सप्त आदौ सर्वत्र योज्यानि । ७ सर्वमुखरञ्जिनि शिरसे स्वाहा, ७ क्लीं ह्रीं श्रीं सर्वराजवशंकरि शिखायै वषट्, ७ सर्वस्त्रीपुरुषवशंकरि कवचाय हुं, ७ सर्वदुष्टमृगवशंकरि नेत्रत्रयाय वौषट्, ७ सर्वसत्ववशंकरि सर्वलोकवशंकरि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं अस्त्राय फट्, इति मन्त्रस्वरूपम् । यद्यपि मन्त्रे त्रयस्त्रिंशद्वर्णाः दृश्यन्ते सूत्रोक्ताष्टाविंशतिसङ्ख्यया विरुध्यन्ते, तथाऽपि स्वाहाऽन्ताः सप्तविंशतिवर्णाः अग्रिमषड्बीजानि मिळित्वा श्रीषोडशाक्षर्यां प्रविष्टपञ्चदशवर्णात्मककूटत्रये एकैककूटस्यैकैकवर्णत्ववत् षण्णां वर्णानामेकवर्णत्वम् । इत्थं च अष्टाविंशतिसंख्योपपन्ना ॥

निबन्धकारः स्वाहाऽन्तं खण्डं चकार, तथा सप्तविंशतिवर्णात्मके उक्तगतेरप्यभावः ॥ २० ॥

आवरणपूजा

पश्चादावरणपूजां कुर्यात् ॥ २१ ॥

पश्चादितीदं सूत्र व्यर्थं इव दृश्यते, तथाऽपि न तथा मन्तव्यम् । तथा हि—इदं आवरणपूजोत्पत्तिवाक्यं, अग्रिमवाक्यानि तदितिकर्तव्यताप्रपञ्चरूपाणि, "सोमेन यजेत," "ऐन्द्रवायवं गृह्णाति" इतिवत् । एतेन एकविधिविहितत्वेन एकपदार्थरूपत्वात् मध्ये आवरणावयवैकदेवतालोपेऽपि पुनः सर्वानुष्ठानं सिद्धम् ॥ २१ ॥

अथ सर्वोपयोगिनीं कांचित् परिभाषामाह—

सर्वचक्रदेवताऽर्चनानि वामकराङ्गुष्ठानामिकासन्दष्टद्वितीयशकलगृहीतश्रीपात्रप्रथमबिन्दुसहपतितैः दक्षकराक्षतपुष्पक्षेपैः कुर्यात् ॥ २२ ॥

सर्वचक्रदेवताः गणपत्यादिपराऽन्ताः सामान्यपद्धत्या यक्ष्यमाणा अन्याश्च। श्रीपात्रं विशेषार्घ्यपात्रम्। सहपतितैरित्यनेन बिन्दुपुष्पाक्षतयोः पतनं एककाल इति सूचितम् ॥ २२ ॥

प्रथमावरणदेवताः तत्स्थानं चाह—

त्रिकोणे रतिप्रीतिमनोभवान् ॥ २३ ॥

त्रिकोणे त्रिकोणकोणेष्वित्यर्थः। अत्र क्रमस्यानुक्तत्वात् स्वाग्रादिप्रादक्षिण्य क्रमः। यद्वा—आग्नेयकोणे, ततः पश्चिमकोणे, तत ऐशाने, तेनोदगपवर्गलाभः। इति प्रथमावरणम् ॥ २३ ॥

द्वितीयावरणपूजास्थानादिकं दर्शयति—

पञ्चारमूले पुरआदिक्रमेण द्रां द्रावणबाणाय द्रीं शोषणबाणाय क्लीं बन्धनबाणाय ब्लूं मोहनबाणाय सः उन्मादनबाणाय नम इति तदग्रे मायाकामवाग्ब्लूं स्त्रीमुपजुष्टाः काममन्मथकन्दर्पमकरकेतनमनोभवाः ॥ २४ ॥

नम इति सर्वमन्त्रेष्वनुषज्यते। पुरः प्राची। मूले पञ्चारकोणमूले। तदग्रे इति पञ्चारकोणाग्रेष्वित्यर्थः। मायाऽऽदिपञ्चकैः क्रमेण युक्ताः कामादयः पूज्या इत्यर्थः। मन्त्रस्वरूपं तु—ह्रीं कामश्रीपादुकां पूजयामि। एवमग्रेऽपि। पूर्ववत् चतुर्थ्यन्तनमोऽन्तरहितं ज्ञेयम्। इति द्वितीयावरणम् ॥ २४ ॥

तृतीयावरणपूजादेशादीनाह—

अष्टदळमूले ब्राह्मी-माहेश्वरी-कौमारी-वैष्णवी-वाराही-माहेन्द्री-चामुण्डा-चण्डिकाः सेन्दुस्वर-युग्मान्त्यादयः पूज्याः। तदग्रे लक्ष्मी-सरस्वती-रति-

प्रीति-कीर्ति-शान्ति-पुष्टि-तुष्टयः ॥ २५ ॥

इन्दुना अनुस्वारेण सहिताः ये स्वरयुग्मेषु अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः इत्यष्टसु अन्त्याः आं ईं ऊं ॠं ॡं ऐं औं अः इत्यष्टौ वर्णाः आदौ एभिः क्रमेण युक्ता ब्राह्म्यादयः पूज्याः । मन्त्रस्वरूपं—आं ब्राह्मीश्रीपादुकां पूजयामीति । एवमग्रेऽपि । तदग्रे इति अष्टदळाग्रे इत्यर्थः । जातावेकवचनम् । पूज्या इत्यस्यानुषङ्गः । इति तृतीयावरणम् ॥ २५ ॥

चतुर्थावरणपूजास्थानान्याह—

षोडशदळे वामा-ज्येष्ठा-रौद्री-शान्ति-श्रद्धा-सरस्वती-क्रियाशक्ति-लक्ष्मी-सृष्टि-मोहिनी-प्रमथिनी-आश्वासिनी-वीची-विद्युन्मालिनी-सुरानन्दा-नागबुद्धिकाः ॥ २६ ॥

अत्र क्रियाशक्तिः विद्युन्मालिनी सुरानन्दा इत्येकैका देवता । शेषाः देवताः स्पष्टाः । क्रमस्यानुक्तत्वात् देव्यग्रदळमारभ्य प्रादक्षिण्येन । इति चतुर्थावरणम् ॥ २६ ॥

पञ्चमावरणदेशादीनाह—

अष्टदळे असिताङ्ग-रुरु-चण्ड-क्रोधन-उन्मत्त-कपाल-भीषण-संहाराः सदण्डिस्वरयुग्मादिसंयुक्ता भैरवान्ताश्च भावनीयाः ॥ २७ ॥

सदण्डी त्यत्र दण्डी अनुस्वारः, “दण्डी पञ्चदशः शून्यः” इति मेदिनीकोशात् । अनुस्वारेण सहिता ये पूर्वोक्तस्वरयुग्मादयः अं इं उं इत्यादयः आदौ तैः युक्ताः भैरवान्ताश्च ये मन्त्राः तैः पूज्याः इत्यर्थः । यथा—अं असिताङ्गभैरवश्रीपादुकां पूजयामि । एवमेवाग्रिमसप्तमन्त्राः ऊह्याः । इति पञ्चमावरणम् ॥ २७ ॥

षष्ठावरणदेवतामन्त्रादीनाह—

चतुर्दले मायुक्तङ्गीसिद्धलक्ष्मीश्च महामायुक्त-तङ्गीमहासिद्धलक्ष्मीश्च ॥ २८ ॥

उभयत्र युक्तेति ज्ञेयम् । तथा च मातङ्गी महामातङ्गीति सिद्धम् । शेषं स्पष्टम् । मातङ्गी-सिद्धलक्ष्मी-महामातङ्गी-महासिद्धलक्ष्म्यः चतस्रः पूज्याः इति विवेकः । इति षष्ठावरणम् ॥ २८ ॥

सप्तमावरणपूजामाह—

गं गणपति-दुं दुर्गा-वं वटुक-क्षं क्षेत्रपालाः चतुरश्रे संपूज्याः ॥ २९ ॥

क्रमस्तु आग्नेयकोणमारभ्यैशानान्तकोणेषु । इति सप्तमावरणम् ॥ २९ ॥

आवरणबहिर्भूतदेवतायजनम्

श्रीक्रमे तन्त्रान्तरे आम्नायादिदेवतावत् आवरणबहिर्भूतदेवतायजनमाह—

सां सरस्वत्यै नमः इतिप्रभृति वास्तुपतये ब्रह्मणे नमः इतिपर्यन्तं पुनस्तत्रैवाभ्यर्च्य ॥ ३० ॥

तत्रैवेति पूर्वं यत्र न्यासोत्तरं पूजिताः तत्र तैरेव मन्त्रैः श्रीपादुकां पूजयामीति सहितैः । यथा सां सरस्वत्यै नमः सरस्वतीश्रीपादुकां पूजयामीति । एवमग्रेऽपि नमःपदान्ते श्रीपादुकामिति योगस्तु सूत्रे नमोऽन्तानुकरणेन सूचितः ॥

निबन्धे चतुरश्रे अमीषां पूजनमुक्तं, तन्मन्दम्, पूर्वं यत्रैकवारं पूजिताः तत्रैव पुनः पूज्या इति स्वरसतो लाभात् । लोकेऽपि-"चैत्रं गृहात् बहिः स्थापय, मैत्रं गृहे भोजय, चैत्रं तत्रैव भोजय" इत्युक्तौ कथमनुभवः श्रोतुः इति सूक्ष्मबुद्ध्या विचारयन्त्वार्याः ॥ ३० ॥

श्यामाविद्याऽऽचार्यपूजा

श्रीश्यामाविद्या[1]प्रवर्तकाचार्यपूजां तेषां स्थानं चाह—

हंसमूर्तिपरप्रकाशपूर्णनित्यकरुणसंप्रदायगुरूंश्चतुरश्रपूर्वरेखायामभ्यर्च्य ॥ ३१ ॥

हंसमूर्तिश्च परप्रकाशश्च पूर्णश्च नित्यश्च करुणश्च ये ते संप्रदायगुरवः तान् चतुरश्रपूर्वरेखायां उदगपवर्गं पूजयेत् इति तदर्थः । मन्त्रस्वरूपं च—हंसमूर्तिसंप्रदायगुरुश्रीपादुकां पूजयामि । एवमग्रिममंत्रेष्वपि संप्रदायगुर्विति योज्यम्, "द्वन्द्वान्ते श्रूयमाणं प्रत्येकं सर्वत्र सम्बध्यते" इति न्यायात् ॥ ३१ ॥

गुरुपादुकापूजा

एवं चक्रपूजां समाप्य गुरुपादुकापूजामाह—

स्वशिरसि सामान्यविशेषपादुके अभ्यर्चयेत् ॥ ३२ ॥

सामान्यगुरुपादुकामन्त्रः दीक्षाखण्डे प्रतिपादितः । विशेषगुरुपादुकामन्त्रः चरमखण्डे श्यामागुरुपादुकेत्युद्धृतः । ताभ्यां मन्त्राभ्यां स्वशिरसि पादुकाद्वयं संपूजयेत् ॥ ३२ ॥

देव्याः पुनःपूजा

एवं गुरुपादुकाऽर्चनान्तं आवरणपूजामुक्त्वा प्रधानदेवतापूजापुरस्सरं बलिप्रदानं विवृणोति—

पुनर्देवीमभ्यर्च्य बालया षोडशोपचारान् विधाय ॥ ३३ ॥

मूलेनेति शेषः । पुनरित्यनेन षडङ्गदेवताभ्यः प्राक् प्रधानदेव्यर्चनं ज्ञापितम् । बालयेति स्पष्टम् ॥ ३३ ॥

[1] 'प्रवर्तकपूजाऽऽचार्य' इति कोशेषु.

बलिदानम्

बलिदानप्रकारं दर्शयति—

शुद्धजलेन त्रिकोणवृत्तचतुरश्रं विधा[1]यार्धान्नपूर्णसलिलं सादिमोपादिममध्यमं सु[स]गन्धपुष्पं साधारं पात्रं निधाय ॥ ३४ ॥

शुद्धजलेन कलशस्थेन । अर्धान्नपूर्णं सलिलं यस्मिंस्तत् । आदिमं प्रथमं उपादिमं द्वितीयं मध्यमं तृतीयं एभिः सहितं सुगन्धपुष्पं यत्र ईदृशं आधारसहितं बलिपात्रं निधाय स्थापयित्वा ॥ ३४ ॥

बलिदानमन्त्रान् तदितिकर्तव्यतां च दर्शयति—

श्रीमातमुक्त्वा गीश्वरीमं बलिं गृह्ण गृह्ण हुं फट् स्वाहा श्रीमातमुक्त्वा गीश्वरि शरणागतं मां त्राहि त्राहि हुं फट् स्वाहा क्षेत्रपालनाथेमं बलिं गृह्ण गृह्ण हुं फट् स्वाहा इति मन्त्रत्रयेण वामपार्ष्णिघातकरास्फोटसमुदञ्चितवक्त्रनाराचमुद्राभिः बलिं प्रदाय ॥ ३५ ॥

श्रीमातमिति हुंफट्स्वाहेत्यन्तं मन्त्रत्रयम् । नाराचमुद्रा परमानन्दतन्त्रे—

> विमुष्टयङ्गुष्ठतर्जन्यावूर्ध्वाङ्गुष्ठाग्रतर्जनी ।
> हस्तद्वयगता चैवं मुद्रा नाराचसंज्ञिता ॥ इति ॥

अयमर्थः—प्रथमं हस्तद्वये मुष्टिभावं संपाद्य तस्या निर्गते विमुष्टी ये अङ्गुष्ठतर्जन्यौ तयोर्मध्ये ऊर्ध्वाग्रमङ्गुष्ठं प्रागग्रां ऋजुरूपां तर्जनीं कुर्यात् । इयं नाराचमुद्रेत्यर्थः ॥ ३५ ॥

[1] य तस्मिन् पुष्पाणि विकीर्यार्धा —श्री.

सुवासिनीपूजादि

एवं बलिप्रदानक्रममुक्त्वा सुवासिनीपूजाऽऽदिकमुपदिशति—

श्यामलां शक्तिमाहूय बालया तामभ्यर्च्य तस्या हस्ते आदिमोपादिमौ दत्वा तत्त्वं शोधयित्वा तच्छेषमुररीकृत्य योग्यैः सह हविश्शेषं स्वीकुर्यात् ॥ ३६ ॥

अभ्यर्च्येति विशेषानुक्तेः यथाविभवम् । तत्त्वं शोधयित्वा इत्यनेन तत्त्वशोधनमन्त्रा अपि प्राप्ताः, ते च मन्त्राश्चत्वारः प्रसिद्धाः । तैः पात्रचतुष्टयं ग्राहयित्वा चतुर्थपात्रं सशेषं ग्राहयित्वा तच्छेषं स्वयं उररीकुर्यात् । हविश्शेषप्रतिपत्तिमाह—योग्यैरिति । योग्यपदार्थः श्रीक्रमोक्तशिष्टपदेन व्याख्यातः । इत्थं च तस्य प्रयोजनं, तदितिकर्तव्यता, तत् सर्वमपि श्रीक्रमोक्तप्रकारेणावगन्तव्यं भवति ॥ ३६ ॥

श्यामापूजाऽवधिः

एवं सङ्गीतमातृकापूजा कियत्कालं कर्तव्या इत्यवध्याकाङ्क्षायां तदवधिमाह—

एवं नित्यसपर्यां कुर्वन् लक्षजपं जप्त्वा तद्दशांशक्रमेण च होमतर्पणब्राह्मणभोजनानि विदध्यात् ॥ ३७ ॥

एवं उक्तप्रकारेण नित्यसपर्यां नित्यपूजाम् । अत्र कुर्वन्नित्यनेन पूजनस्य जपाङ्गत्वं गमयति । तथा हि—यदि पूजा प्रधानं जपश्चाङ्गं स्यात् तर्हि यावत्पर्यन्तं लक्षजपः तावत्पूजेति कथनं विरुध्येत । न हि अङ्गानुसारिणी प्रधानावृत्तिः लोके वेदे च दृष्टा । "यावत् भटो धावति तावत् राजा धावति" इति न हि ब्रूते । "यावत् राजा धावति तावत् भटो धावति" इति व्यवहारोऽस्ति । अतो जपः प्रधानं, तदवधित्वस्य पूजायां कथनात् । अत एव जपसमाप्तौ पूजानिवृत्तिः । लक्षजपं जप्त्वेति लक्षसङ्ख्याविशिष्टजपोऽनेन विधीयते । तद्दशांशक्रमेण—होमो जपदशांशं, तद्दशांशं तर्पणं, तद्दशांशं ब्राह्मणभोजनमित्यर्थः ॥ ३७ ॥

श्यामामनुजापिधर्माः

अथैतन्मनुजापिधर्मानाह—

एतन्मनुजापी न कदम्बं छिन्द्यात् गिरा काळीति न वदेत् वीणावेणुनर्तनगायनगाथागोष्ठीषु न पराङ्मुखो गच्छेत् गायकं न निन्द्यात् ॥ ३८ ॥

एतन्मनुजापी श्यामामनुजापीत्यर्थः । एते धर्माः न जपसमकालिकाः, किं तु जपमारभ्य यावज्जीवं; "तस्मादग्निचिद्वर्षति न धावेत्" इतिवत् ॥ ३८ ॥

ललितोपासकधर्माः

एवं श्यामोपासकानां धर्मानुक्त्वा प्रसङ्गात् प्राधान्याच्च ललितोपासकधर्मानप्याह—

ललितोपासको नेक्षुखण्डं भक्षयेत् न दिवा स्मरेद् वार्ताळीं न जुगुप्सेत सिद्धद्रव्याणि न कुर्यात् स्त्रीषु निष्ठुरतां वीरस्त्रियं न गच्छेत् न तं हन्यात् न तद्द्रव्यमपहरेत् नात्मेच्छया मपञ्चकमुररीकुर्यात् कुलभ्रष्टैः सह नासीत न बहु प्रलपेत योषितं संभाषमाणामप्रतिसंभाषमाणो न गच्छेत् कुलपुस्तकानि गोपायेत् इति शिवम् ॥ ३९ ॥

इति . . . कल्पसूत्रे श्यामाक्रमोनाम षष्ठः खण्डः

इक्षुखण्डमित्यनेन तद्विकाराणां गुडशर्करादीनां अदोषः सूचितः । वार्ताळीं वाराहीम् । सिद्धद्रव्याणि मपञ्चकरूपाणि न जुगुप्सेत स्वमनसाऽपि न निन्द्यात् । निष्ठुरतां नासिकाच्छेदनादि । वीरस्त्रियमिति षष्ठीतत्पुरुषः, न कर्मधारयः । तथा सति अग्रे 'न तं हन्यात्' इत्यत्र पुंस्त्वस्यानन्वयापत्तेः । अतो बाधकसत्त्वात्

लघोरपि कर्मधारयस्य त्यागः । वीरस्त्रियं इत्यत्र वीरपदार्थश्च निर्मूलपराहतद्वैतभावः । तदुक्तं तन्त्रे—

अहमि प्रळयं कुर्वन् इदमः प्रतियोगिनः ।
स वीर इति विज्ञेयः स्वात्मानन्दनिमग्नधीः ॥

तं वीरम् । तद्द्रव्यं वीरद्रव्यम् । आत्मेच्छया स्वेन्द्रियतृप्तये उररीकुर्यात् स्वीकुर्यात् । कुलभ्रष्टैः—प्रथमं कुलमार्गमङ्गीकृत्य जन्मान्तरांहसा तत्रोत्पन्नाविश्वासाः सन्तो ये स्वीकृतं मार्गं परित्यजन्ति ते कुलभ्रष्टाः । तदुक्तं देवीभागवते—

कुलमार्गं समाश्रित्य जन्मान्तरकृतांहसा ।
तन्मार्गं त्यजता साकं न तिष्ठेन्न च संवदेत् ।
ततो वरः पशुर्ज्ञेयः तं दृष्ट्वाऽ[1]पः सुसंस्पृशेत् ॥ इति ॥

न बहु वचनं प्रलपेत इति तैः साकमेव । बहुपदेन स्वमार्गगुप्तये तज्जनितानर्थ-परिहारार्थं यावदर्थसंभाषी भवेत् इति ज्ञापितम् । अप्रतिसंभाषमाणः प्रत्युत्तर-मदत्वा । कुलपुस्तकानि कुलशास्त्रपुस्तकानि । शिवमित्यस्य व्याख्यानं पूर्ववत् ॥

इति . . . कल्पसूत्रवृत्तौ श्यामाक्रमो नाम षष्ठः खण्डः

सप्तमः खण्डः—वाराहीक्रमः

मातर्वाराहि जाते तव चरणसरोजार्चनं वा जपं वा
कर्तुं शक्तो न चाहं तदपि च सदये मय्यतस्त्वां हि याचे ।
यस्त्वां दंष्ट्राशिताग्रां त्रिणयनलसितां चारुभूदारवक्त्रां
मूर्तिं चित्ते विधत्ते तदरिगणविनाशोऽस्तु तस्मिन् क्षणे वै ॥

[1] अप्सुसंविशेत्—श्री.

कोलमुखीवरिवस्याविधिः

अथ वाराह्युपासनां वक्तुं प्रक्रमते--

इत्थं साङ्गां सङ्गीतमातृकामिष्ट्वा संवित्साम्राज्ञीसिंहासनाधिरूढाया ललिताया महाराज्ञ्या दण्डनायिकास्थानीयां दुष्टनिग्रहशिष्टानुग्रहनिरर्गळाज्ञाचक्रां समयसङ्केतां कोलमुखीं विधिवद्वरिवस्येत् ॥ १ ॥

इत्थं पूर्वोक्तप्रकारेण साङ्गां सावरणां सङ्गीतमातृकां मातङ्गीं इष्ट्वा संपूज्य उपास्य इत्यर्थः । नानेन वाराहीसङ्गीतमातृकयोः अग्निं चित्वेतिवत् अङ्गाङ्गिभावः प्रतिपाद्यते, उभयोरपि ललिताऽङ्गत्वस्य प्रमाणान्तरसिद्धत्वात् । किं तु अनेन सङ्गीतमातृकायागोत्तरकालस्य वाराह्युपासनाङ्गत्वमात्रं विधीयते । संविदः परशिवस्य या साम्राज्ञी पट्टमहिषी तद्रूपायाः, सिंहासनं राज्ञः सदसि सर्वोत्तमत्वेनावस्थितमासनं तदधिरूढाया ललिताया महाराज्ञ्या दण्डनायिकायाः यत् स्थानं महाराष्ट्रभाषया "कोत्तवाल्चावडि" इति प्रसिद्धं, तदीया तत्स्वामिनी दुष्टनिग्रहाधिकारवती या तां इति फलितोऽर्थः । एतेन ललिताऽङ्गत्वं सूचितम्, अप्रधानत्वात् । अस्या अधिकारं विवृणोति—दुष्टनिग्रहेत्यादिना । दुष्टनिग्रहादौ निरर्गळं अन्यानपेक्षं यदाज्ञाचक्रं आज्ञाशक्तिः तद्वतीम् । केचन सेवकाः स्वामिनमविचार्य निग्रहानुग्रहादिकं कर्तुमसमर्थाः, तथा नेयमिति भावः । एतेन श्रीललिताया अतिप्रीतिपात्रमिति ध्वनितं भवति । समयो गुप्तः सङ्केतः शास्त्रपद्धतिः यस्याः तां, "समयो रहसि प्रोक्तः काले कार्यक्षमेऽपि च" इति [1]त्र्यक्षरकोशः । "सङ्केतः शास्त्र[2]पन्थानौ" इति वैजयन्ती । एतेन अतिगोप्येयं विद्या इति सूचितम् । कोलः वराहः, "कोलः पोत्री किरिः किटिः" इत्यमरः । तस्य मुखमिव मुखं यस्याः तां विधिवत् वक्ष्यमाणविधिना । एतेन इतरदेवतोपास्तिवत् किञ्चिदङ्गलोपेन तस्मादपूर्वं, तद्वारा देवताप्रीतिश्च न भविष्यति, इति सूचितम्, अन्यथा विधिवत् इत्यस्य अनुवादकत्वापत्तेः । वरिवस्येत् पूजयेत् । इदमुत्पत्तिवाक्यम् ॥ १ ॥

[1] विश्वकोशः—श्री. [2] सदनं—अ.

महारात्रे अनाहतध्वनेरनुसंधानम्

तत्र कथंभावाकाङ्क्षायामाह—

तत्रायं क्रमो महारात्रे बुद्ध्वा स्वहृदयपरमाकाशे ध्वनन्तमनाहतध्वनिमूर्जितानन्ददायकमवमृश्य ॥ २ ॥

तत्र वाराह्युपास्तौ अयं वक्ष्यमाणः क्रमः प्रकारः। महारात्रे इति—धूर्तस्वामिभाष्ये "महारात्रिस्त्रिभागावशिष्टा रात्रिः" इति। यद्वा—महारात्रिः निशीथः, "महारात्रिसमुत्पन्नः कृष्णो गोपालनन्दनः" इति ब्रह्मवैवर्तात्, कृष्णजन्मार्धरात्रे इति प्रसिद्धत्वात्। तस्मिन् समये बोधोत्तरकालीनक्रियामाह—स्वहृदयेति। स्वहृदयरूपो यः परम उत्कृष्ट आकाशः तस्मिन् ध्वनन्तं शब्दं कुर्वन्तं अनाहतस्य द्वादशदळकमलस्य ध्वनिं कराभ्यां कर्णपिधाने श्रूयमाणो यः शब्दः सोऽनाहतशब्द इत्युच्यते। स मध्यरात्रे बाह्यशब्दविरमे कर्णपिधानाभावेऽपि अनुभूयते। कथंभूतं? ऊर्जितः सिद्धो य आनन्दः तस्य दायकं अभिव्यञ्जकं अवमृश्य अनुसन्धाय कंचित् कालं श्रुत्वेत्यर्थः॥ २॥

शिवादिगुरुनमस्कारः

शिवादिश्रीगुरुभ्यो नमः इति मूर्ध्नि बध्नीयादञ्जलिम् ॥ ३ ॥

शिवादि इति स्पष्टम्॥ ३॥

वाराहीक्रममन्त्रेषु बीजविशेषयोगः

वाराहीपद्धतौ सर्वमन्त्रेषु बीजविशेषस्य योगमाह—

वाचमुच्चार्य ग्लौं इति च पद्धतावस्यां सर्वे मनवो जप्याः ॥ ४ ॥

अस्यां पद्धतौ सर्वमन्त्रादौ ऐं ग्लौं इति योज्यमित्यर्थः॥ ४॥

भूतशुद्धिः

अथ भूतशुद्धिं विधत्ते—

मूलादिषण्मन्त्रैः यथामन्त्रं लिङ्गदेहं शोधयेत् ॥ ५ ॥

मूलादिषण्मन्त्रैः वक्ष्यमाणैः यथामन्त्रं मन्त्रे यथा लिङ्गमस्ति तथा लिङ्गदेहं सूक्ष्मदेहं शोधयेत् ॥ ५ ॥

तान् षण्मन्त्रानाह—

मूलश्रृङ्गाटकात् सुषुम्नापथेन जीवशिवं परशिवे योजयामि स्वाहा यं सङ्कोचशरीरं शोषय शोषय स्वाहा रं सङ्कोचशरीरं दह दह पच पच स्वाहा वं परमशिवामृतं वर्षय वर्षय स्वाहा लं शांभवशरीरं उत्पादयोत्पादय स्वाहा हंसः सोऽहमवतरावतर शिवपदात् जीव सुषुम्नापथेन प्रविश मूलश्रृङ्गाटकमुल्लसोल्लस ज्वल ज्वल प्रज्वल प्रज्वल हंसः सोहं स्वाहा इति भूतशुद्धिं विधाय ॥ ६ ॥

स्वाहेत्यत्रैकमन्त्रसमाप्तिः । सुषुम्नामार्गेण परशिवे शिवयोजनशोषणदाहनाप्लावनशांभवशरीरोत्पत्तिजीवस्वस्थाननयनानि क्रमेण षण्मन्त्रैः कुर्यात् ॥ ६ ॥

एकचत्वारिंशत्स्थानेषु द्वितारीन्यासः

अथ मातृकासंपुटितबीजाभ्यां न्यासमाह—

मातृकासंपुटितां द्वितारीं काननवृत्तद्व्यक्षिश्रुतिनासागण्डोष्ठदन्तमूर्धास्यदोःपत्सन्ध्यग्रपार्श्वद्वयपृष्ठ-

नाभिजठरहृद्दोर्मूलापरगळकक्षहृदादिपाणिपादयुगळजठराननेषु विन्यस्य ॥ ७ ॥

मातृकाभिः आदिक्षान्तैः संपुटितां, संपुटितलक्षणमुक्तं प्राक् । द्वितारी प्रकृतत्वात् ऐं ग्लौं तां । तद्यथा—आदिक्षान्तं प्रथमं सबिन्दुं उच्चार्य मध्ये ऐं ग्लौं इति वर्णद्वयं पुनरपि आदिक्षान्तं ततो नमःपदं न्यासरूपत्वात् । एवं वक्ष्यमाणैकचत्वारिंशत्स्थानेषु न्यसेदित्यर्थः । कं शिरः, "कं शिरोऽम्बुनोः" इत्यमरः । आननवृत्तं मुखवृत्तं अक्षिद्वयं श्रोत्रद्वयं नासाद्वयं गण्डद्वयं ओष्ठद्वयं दन्तपङ्क्तिद्वयं मूर्धा शिरः आस्यं गुहारूपं दोर्द्वयं पादसन्धिद्वयं पादाग्रद्वयं पार्श्वद्वयं पृष्ठः नाभिः जठरं कुक्षिः हृद्वक्षः दोर्मूलं गळस्यापरभागः पाश्चात्यदेशः कक्षः, पुनर्वामपार्श्वे हृदादिकक्षपर्यन्तं, पाणिद्वयं पादद्वयं पुनर्जठरं पुनराननं एवं एकचत्वारिंशत्स्थानेषु मातृकासंपुटितां द्वितारीं न्यसेत् ॥

यत्तु निबन्धे अं ऐं ग्लौं अं नमः इति रीत्या क्षान्तवर्णैः प्रत्येकसंपुटितबीजद्वयं मातृकास्थानेषु न्यसेत् इति, तत् तुच्छम् । तथाहि—मातृकास्थानलेखस्य मूलं तन्त्रान्तरं कल्पसूत्रं वा । नाद्यः, एकचत्वारिंशत्स्थानपाठवैय्यर्थ्यात् । न द्वितीयः, एकपञ्चाशत्स्थानाभावात् तन्त्रान्तरोक्तमातृकास्थानक्रमाभावाच्च । तस्मात् निबन्धलेखः लिखितसूत्रविरुद्धो हेयः ॥

इति द्वितारीन्यासः ॥ ७ ॥

अङ्गुलिन्यासः

अथाङ्गुळीन्यासमाह—

अन्धे प्रभृति सप्तार्णपञ्चकमङ्गुष्ठादिकनिष्ठान्तम् ॥ ८ ॥

अत्रापि पूर्वसूत्राद्विन्यस्येत्यस्यानुवृत्तिः । अन्धे अन्धिनि नमः इत्यादि स्तम्भे स्तंभिनि नमः इत्येतैः पञ्चभिः सप्तार्णमन्त्रैः अङ्गुष्ठादिकनिष्ठान्तं क्रमेण विन्यस्य । मन्त्रस्वरूपं तु—अन्धे अन्धिनि नमः अङ्गुष्ठाभ्यां नमः । एवमग्रेऽप्यूह्यम् ॥

यत्तु निबन्धे अन्धे अन्धिनि नमः हृदयाय नमः इति लेखनं तदत्यन्तमशुद्धं, अङ्गुष्ठादिकनिष्ठान्तं इति सूत्रे विद्यमाने हृदयादिप्रवेशस्य अन्धलेखतुल्यत्वात् ॥

इत्यङ्गुलीन्यासः ॥ ८ ॥

षडङ्गन्यासः

अथ हृदयादिन्यासमाह—

वाङ्नमो भगवतीत्यारभ्य त्रयोदशभिर्हृदयं षड्भिः शिरो दशभिः शिखां सप्तभिः सप्तभिः सप्तभिः कवचनेत्रास्त्राणि विन्यस्य ॥ ९ ॥

वागित्यारभ्य मूलमन्त्र त्र यो द शादिमवर्णैः हृन्मन्त्रसहितैः हृ द ये, तदग्रिमषड्वर्णैः शिरोमन्त्रसहितैः शि र सि, तदग्रिम द श वर्णैः शिखामन्त्रसहितैः शि खा यां, तदग्रिम स प्त वर्णैः कवचमन्त्रसहितैः क व चे, तदग्रिम स प्त भिः नेत्रमन्त्रसहितैः ने त्रे षु, तदग्रिम स प्त वर्णैः अस्त्रमन्त्रसहितैः अ स्त्रं च विन्यसेत् । मन्त्रस्वरूपं—ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि हृदयाय नमः । एवमग्रेऽपि योज्यम् । इति हृदयादिषडङ्गन्यासः ॥ ९ ॥

आत्मालंकरणम्

गन्धादिभिरलंकृत्य अर्घ्यं शोधयेत् ॥ १० ॥

आदिपदेन वस्त्रभूषणादिपरिग्रहः । आत्मानमिति शेषः । अर्घ्यं शोधयेत् इत्यस्य अग्रिमसूत्रेण सहान्वयः ॥ १० ॥

अर्घ्यशोधनम्

अथ अर्घ्यशोधनमाह—

आत्मनोऽग्रभागे गोमयेन विलिप्ते हेतुमिश्रितजलेन चतुरश्रं वर्तुलं षट्कोणं त्रिकोणमन्तरान्तरं

विलिख्य अर्घ्यशोधनमनुभिः श्यामाक्रमोक्तैः आधाराघ्यपात्राणि संशोध्य सामान्येनाभ्यर्च्य तदर्घ्यं वषडित्युद्धृत्य स्वाहेति संस्थाप्य हुं इत्यवकुण्ठ्य वौषट् इत्यमृतीकृत्य फडिति संरक्ष्य नम इति पुष्पं निक्षिप्य मूलेन निरीक्ष्य तत्पृषतैः पावयित्वा सपर्यावस्तूनि ॥ ११ ॥

हेतुमिश्रितेन प्रथममिश्रितेन । चतुरश्रादिमण्डलं प्रवेशरीत्या, चतुरश्रस्य सर्वबाह्यत्वेन भूरिदर्शनात् । अन्तरान्तरं परस्परमसंलग्नं यथा तथा मण्डलं कुर्यात् इत्यर्थः । अत्र विशेषांशमुक्त्वा शेषधर्मानतिदिशति—अर्घ्यशोधनेति । सामान्येन समस्तमूलमन्त्रेण । शेषं स्पष्टम् ॥

अत्र निबन्धे श्यामाक्रमोक्तैरिति सूत्रे उपलभ्यमाने श्रीक्रमोक्तेन क्रमेण सामान्यविशेषार्घ्ये आसादयेत् इति साहसेन यत् लिलेख तस्य साहसं धर्मे तस्यैव शोभायै भूयात् ॥

तदर्घ्यमिति सपर्यावस्तूनीत्यन्तं स्पष्टोऽर्थः । एतावत्पर्यन्तं विहितमर्घ्यशोधनं सामान्यविशेषार्घ्ययोः समानं, अविशेषेणोक्तेः ॥ ११ ॥

अनन्तरकर्तव्यन्यासाः

पुनरप्यर्घ्यशोधनानन्तरं कर्तव्यन्यासानाह—

शिरोवदनहृद्गुह्यपादेषु पूर्वोक्तसप्तकपञ्चकं विन्यस्य विद्यामष्टधा खण्डयित्वा पादादिजानु-जान्वादिकटि-कट्यादिनाभि - नाभ्यादिहृदय - हृदयादिकण्ठ - कण्ठादिभ्रूमध्य - भ्रूमध्यादिललाट - ललाटादि - मौळिषु एकत्रिंशत् सप्त सप्त सप्त सप्त सप्त पञ्चत्रिंश-

देकादशार्णखण्डान् मातृकास्थानेषु मूलमनुपदानि च न्यस्य ॥ १२ ॥

शिरोवदनेति । पूर्वोक्तसप्तार्णमन्त्रपञ्चकं शिरआदिपञ्चसु स्थानेषु न्यसेत् । पादद्वयं मिळित्वैकं स्थानम् । विद्यामिति , मूलविद्यां अष्टधा खण्डयित्वा विभज्य क्रमेण अष्टखण्डानष्टसु स्थानेषु विन्यसेदित्यर्थः । स्थानानि तानि कानि इत्याकांक्षायामाह—पादादिजान्विति ललाटादिमौळिष्वित्यन्तेन । पादादिजान्वित्यत्र जानुपर्यन्तमिति तदर्थः । तेन प्रथमखण्डन्यासे जान्ववयवलेशो न । एवमग्रेऽपि । अष्टधा खण्डयेदित्युक्तम् । तत्रैकखण्डे कियन्तो वर्णाः इत्याकाङ्क्षायामाह—एकत्रिंशदित्यादिना । मूलस्य खण्डाष्टकं क्रमादेकत्रिंशदादिसंख्याकं भवतीत्यर्थः । इत्यष्टखण्डन्यासः । मूलपदन्यासमाह—मातृकास्थानेषु इति । मातृकास्थानानि—शिरः १, मुखवृत्तं २, नेत्रद्वितयं ४, कर्णद्वयं ६, नासाद्वयं ८, कपोलद्वयं १०, ओष्ठद्वितयं १२, दन्तपङ्क्तिद्वितयं १४, जिह्वा १५, ब्रह्मरन्ध्रं १६, दक्षदोर्मूलं १७, बाहुमध्यं १८, मणिबन्धः १९, अङ्गुलिमूलं २०, अङ्गुल्यग्रं २१, एवं वामदोर्मूलादारभ्य अङ्गुल्यग्रान्तं पञ्च २६, दक्षोरुमूलं २७, तज्जानु २८, तत्पादसन्धिः २९, तत्पादाङ्गुलिमूलं ३०, तदङ्गुल्यग्रं ३१, एवं वामभागे पञ्च ३६, पार्श्वद्वयं ३७, पृष्ठं ३८, नाभ्यूरुजठराणि ४१, हृदि ४२, स्कन्धद्वयं ४४, गळापरभागं ४५, हृदयादिदक्षपाण्यन्तं ४६, हृदयादिवामपाण्यन्तं ४७, हृदयादिदक्षपादान्तं ४८, हृदयादिवामपादान्तं ४९, नाभिमूर्धनी ५१, एवं एकपञ्चाशत्स्थानानि । अत्र प्रमाणं परमानन्दतन्त्रे—

मस्तके मुखवृत्ते च नेत्रयोः श्रोत्रयोर्नसोः ।
गण्डोष्ठदन्तयुगळे जिह्वायां ब्रह्मरन्ध्रके ॥
पाणिद्वये मूलमध्यमणिबन्धेषु वै क्रमात् ।
शिखामूले तदग्रे च तद्वत् पदयुगे न्यसेत् ॥
पार्श्वद्वये पृष्ठनाभिजठरेषु तथा हृदि ।
स्कन्धयोर्गळपृष्ठे च हृदयात् पाणिपादयोः ॥
नाभौ मूर्ध्नि च देवेशि क्रमादादींस्तु विन्यसेत् ॥

पाणिद्वये इति षष्ठ्यर्थे सप्तमी । शाखामूले अङ्गुलिमूले । एवं एकपञ्चाशत्स्थानेषु मूलमन्त्रस्य एकपञ्चाशत्पदानि न्यसेत् । तानि चैकपञ्चाशत्पदानि । ऐं ग्लौं ऐं १, नमः २, भगवति ३, वार्तालि ४, वार्तालि ५, वाराहि ६, वाराहि ७, वराह ८, मुखि ९, वराह १०, मुखि ११, अन्धे १२, अन्धिनि १३, नमः १४, रुन्धे १५, रुन्धिनि १६, नमः १७, जम्भे १८, जम्भिनि १९, नमः २०, मोहे २१, मोहिनि २२, नमः २३, स्तम्भे २४, स्तम्भिनि २५, नमः २६, सर्व २७, दुष्ट २८, प्रदुष्टानां २९, सर्वेषां ३०, सर्व ३१, वाक् ३२, चित्त ३३, चक्षुः ३४, मुख ३५, गति ३६, [1]जिह्वा ३७, स्तम्भनं ३८, कुरु ३९, कुरु ४०, शीघ्रं ४१, वश्यं ४२, ऐं ४३, ग्लौं ४४, ठः ४५, ठः ४६, ठः ४७, ठः ४८, हुं ४९, [2]अस्त्राय ५०, फट् ५१, इत्येकपञ्चाशत्पदानि ॥

मूलमन्त्रस्य एकपञ्चाशत्पदवत्त्वनिरूपणम्

लिखितस्यैवार्थस्य उपपत्तिर्लिख्यते । प्रकृतसूत्रेण मातृकान्यासस्थानाधिकरणकत्वविशिष्टमूलपदरूपमन्त्रकरणकत्वविशिष्टन्यासरूपं कर्म विधीयते । अनेन तत्र मातृकास्थानानां एकपञ्चाशत्सङ्ख्याकत्वात् मूलस्थपदानां असमसङ्ख्याकत्वात् कथं भवितव्यं इति भवति संशयः ॥

अत्र निबन्धकारः मूलं द्विचत्वारिंशत्पदघटितमिति मत्वा पदानुसारेण नेत्रद्वयादौ सङ्कोचेन एकत्वं संपाद्य स्थानसङ्कोचं कृत्वा स्थानेष्वपि द्विचत्वारिंशत्सङ्ख्यां संपादयामास ॥

तदतीव तुच्छम् । तथा हि—सूत्रे मातृकास्थानेष्वित्यविशेषेण मातृकास्थानानि न्यासाङ्गत्वेन विहितानि । मातृकास्थानान्येकपञ्चाशत् । तावतां प्रत्येकमङ्गत्वं उक्तसूत्रवशात् अप्रत्याख्येयम् । तथा सति तत्सङ्कोचं कृत्वा द्विचत्वारिंशत्स्थानसंपादनं स्वमौर्ख्यप्रकाशायैव भवेत् ॥

न च मूले द्विचत्वारिंशत्पदानां सत्त्वात् तदनुसारेण स्थानसङ्कोच आवश्यक इति वाच्यम्; स्थानानुरोधेन मन्त्रस्य प्रयाजन्यायेनावृत्त्या एकपञ्चाशत्सङ्ख्यापूरणस्यापि कर्तुं शक्यत्वात् ॥

[1] 'मति' इत्यधिकः—श्री.

[2] 'अस्त्राय' इति नास्ति—श्री.

यद्वा—एकं साम त्रिचे क्रियते इत्युक्त्या ऋक्त्रये सर्वेष्वक्षरेषु सामगानं प्राप्तम् । एवं सति यत्र प्रथमा ऋक् अनुष्टुप्छन्दस्का द्वितीया जगती तत्र 'यद्योन्यां गायति तदुत्तरयोर्गायति' इत्यनेन प्रथमायां ऋचि यद्गानं तदेवोत्तरयोरतिदिष्टम् । तादृशं द्वात्रिंशदक्षरेषु समाप्तम् । शिष्टाक्षराणि गानेनासंस्कृतानि हेयानि इतिवत् मातृकास्थानेषु निखिलेषु प्राप्तः न्यासः मन्त्रानुसारेण द्विचत्वारिंशन्मातृकास्थानेषु न्यासो हृदयान्तेषु भविष्यतीति । स्थानसङ्कोचस्तु न्यायशून्यः प्रमाणशून्यश्च उन्मत्तप्रलापवद्धेयः ॥

वस्तुतस्तु मूलमन्त्रे एकपञ्चाशत्पदानां विभागस्य अस्माभिः दर्शितत्वात् स्थानानां तावतां सत्त्वात् नानुपपत्तिगन्धोऽपि ॥

न च सर्ववाक्चित्तेत्यादीनां समासघटकानां कथं पदत्वं इति वाच्यम् । किं नाम पदत्वम् ? नैय्यायिकमतरीत्या शक्तिमत्त्वं, उत वैय्याकरणरीत्या सुप्तिङन्तत्वम् । तव मतेऽपि नाद्यपक्षोऽभिमतः संभवति नैय्यायिकमते सुब्विभक्तीनामपि पदत्वेन तैः सह गणने द्विचत्वारिंशत्संख्याऽतीतानि पदानि, द्विचत्वारिंशत्त्वकथनं विरुद्धम् । सुप्तिङन्तं पदमिति द्वितीयपक्षो ममाप्यभिमतः अविरुद्धश्च । समासघटकेष्वपिं सर्ववाक्चित्तेत्यादिष्वन्तर्वर्तिनीं विभक्तिमाश्रित्य सुबन्तत्वमक्षतम् ॥

न च तत्र विभक्तेर्लुप्तत्वात् सुबन्तत्वं कथं इति शङ्क्यम् । "प्रत्ययलोपे प्रत्ययलक्षणम्" इत्यनेन लोपेऽपि तत्कार्यपदत्वसंभवात् । अन्यथा "राजपुरुषः" इत्यादौ राजोत्तरं नलोपो न स्यात् ॥

किं च तव मते वा द्विचत्वारिंशत्पदविभागेऽपि हुंफडादिपदानां पदत्वेन विभागो विरुध्येत, तेषामव्ययत्वेन तदुत्तरसुपो लुप्तत्वेन सुबन्तत्वाभावात् ॥

न च—तव मते प्रदुष्टानां इत्यत्र प्र इत्यस्योक्तरीत्या पृथक्पदत्वेन प्रथमबीजत्रयस्य त्रिपदरूपत्वेन चतुःपञ्चाशत्पदानि भवन्ति, कथं संख्यासाम्यं—इति वाच्यम् । न पदत्वं तावत् केवलं सुप्तिङन्तत्वम्, किं तु सुप्तिङन्तत्वे सति अर्थवत्त्वम् । प्र इत्यस्योपसर्गस्य द्योतकत्वेन अर्थवत्त्वाभावात् न पदत्वं इति तद्विभागः । प्रथमबीजत्रयस्य प्रत्येकं तत्त्वेऽपि वाक्संपुटितग्लौं इति वाराहीमन्त्रोद्धारसूत्रस्वारस्यात् त्रयाणामेकस्तोमत्वम् । यथा "गेहस्थं संपुटमानय" इत्यत्र आनयनकर्मत्वेन युगपत्पूर्वोत्तरावयवैतन्मध्यस्थवस्तु चान्वेति, एकस्तोमरूपत्वात् ॥

यद्वा—मातृकास्थानानुसारेण मूलपदसङ्कोचः कार्यः । तथा च प्रथममारभ्य मातृकास्थानेषु बीजत्रये पदत्रयं संपाद्य मूलपदेषु न्यस्यमानेषु उर्वरितचरमपदान्येकीकृत्य हुं अस्त्राय फट् इति मूर्ध्नि न्यसेत् ॥

न च मूलपदानुसारेण प्रयाजन्यायेन मातृकास्थानावृत्तिरेव किं न स्यात् इति वाच्यम् ; मातृकास्थानानां प्रथमं सूत्रे उल्लेखेन उपक्रमप्राबल्यमनुसृत्य तदनुसारेण चरमनिर्दिष्टमूलपदानां नेयत्वात् । युक्तश्चायमेव पक्षः । एतेन—हुंफट्पदयोः निरर्थकत्वात् सुबन्तत्वे सति अर्थवत्त्वरूपं पदत्वं नास्तीति पूर्वपक्षोऽपि पराहतः । हुं अस्त्राय फट् इत्यत्र सुप्तिङन्तत्वे सति अर्थवत्त्वाय हुंफट्छब्दयोः तदसत्त्वात् संघातकरणं युक्तं, नानुपपत्तिगन्धोऽपि ॥

नच—समासघटकपदानां निर्विभक्तिकानां कथं प्रयोग इति शङ्कनीयम् । यथा—"भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः" इत्यत्र त्वमित्यनुकरणे प्रयोगवत् तवापि कर्तुं शक्यत्वात् । अत एव क्वचिन्मन्त्रे मन्त्रघटकवर्णन्यासोऽपि प्रकृतन्यासे दृष्टान्ताय भविष्यतीत्यलं भूयसा ॥ १२ ॥

तत्त्वन्यासमाह—

पूर्वोक्तानष्टखण्डानेकैकश उच्चार्य पूर्वोक्तेषु स्थानेषु ह्लां शर्वाय क्षितितत्त्वाधिपतये ह्लीं भवाय अम्बुतत्त्वाधिपतये ह्लूं रुद्राय वह्नितत्त्वाधिपतये ह्लैं उग्राय वायुतत्त्वाधिपतये ह्लौं ईशानाय भानुतत्त्वाधिपतये सों महादेवाय सोमतत्त्वाधिपतये हं महादेवाय यजमानतत्त्वाधिपतये औं भीमाय आकाशतत्त्वाधिपतये नमः इति तत्त्वन्यासः ॥ १३ ॥

पूर्वोक्तानेकत्रिंशत्सप्तेत्यादिना खण्डितानष्टखण्डान् पूर्वोक्तस्थानेषु पादादिजान्वित्यादिस्थानेषु सर्वत्र तत्त्वाधिपतये एतदनन्तरं नम इति पदस्यानुषङ्गेण योगः । इति तत्त्वन्यासः ॥ १३ ॥

देवीध्यानम्

मूलेन सर्वेण व्यापकं कृत्वा देवीं ध्यात्वा ॥ १४ ॥

ध्यानं सूत्रे वक्ष्यमाणं, तन्त्रान्तरप्रसिद्धध्यानश्लोकरीत्याऽपि ज्ञेयम् । स ध्यानश्लोकः—

पाथोरुहपीठगतां पाथोरुहमेचकां कुटिलदंष्ट्राम् ।
कपिलाक्षित्रितयां घनकुचकुंभां प्रणतवाञ्छितवदान्याम् ।
दक्षोर्ध्वतोऽरिखड्गां मुसलमभीतिं तदन्यतस्तद्वत् ।
शङ्खं खेटं हलवरान् करैर्दधानां स्मरामि वार्ताळीम् ॥

अत्र अरिः चक्रं, दक्षोर्ध्वतः ऊर्ध्वमारभ्य, तद्वत् वामेऽप्यूर्ध्वमारभ्यैव ॥ १४ ॥

चक्रनिर्माणप्रकारः

चक्रनिर्माणप्रकारमाह—

पुरतः पटपट्टसुवर्णरजतताम्रचन्दनपीठादिनिर्मितं दृष्टिमनोहरं चतुरश्रत्रयसहस्रपत्रशतपत्राष्टपत्रषडश्रपञ्चाश्रत्र्यश्रबिन्दुलक्षणं कोलमुखीचक्रं विरचय्य ॥ १५ ॥

पटः तूलमयः, पट्टः कौशेयः, पीठं फलकं, आदिपदेन नवरत्नपरिग्रहः । तेषु निर्मितम् । दृष्टिमनोहरमित्यनेन दळानां कोणानां च मानवैषम्यविरहः, दळमाने शास्त्रीयनियमाभावश्च सूचितः । तथाऽपि तत् शारदातिलकात् ग्राह्य एव । यन्त्रनिर्माणक्रमः प्रवेशरीत्या, बिन्दुचक्रस्य चरमपाठात् । शेषं स्पष्टम् ॥ १५ ॥

चक्रपूजा

चक्रनिर्माणानन्तरं चक्रे कर्तव्यमाह—

तत्र कुसुमाञ्जलिं विकीर्य स्वर्णप्राकाराय सुधाऽब्धये वराहद्वीपाय वराहपीठाय नमः इति ।

आं आधारशक्तये कुं कूर्माय कं कन्दाय अं अनन्तनाळाय नमः इति च धर्मादिभिः सह षोडशमन्त्रैः पीठे अभ्यर्च्य ॥ १६ ॥

तत्र चक्रे । स्वर्णप्राकारादयः चतुर्थ्यन्ताः । अष्टौ नमोऽन्ताः मन्त्राः, तैः पीठमध्यपूजनं, धर्मादिचतुर्भिः अधर्मादिचतुर्भिश्च गणपतिक्रमे क्लृप्तस्थाने पूजनं, मिळित्वा षोडशभिः पीठपूजनं भवति । पीठपदेन देवताऽऽयतनं चक्रमेव, अग्रिमसूत्रे "चक्रमनुना चक्रमिष्ट्वा" इत्युक्तेः । न च—अग्रिममन्त्रेण चक्रपूजाऽस्तु, एभिः षोडशभिः चक्राधिष्ठानपीठपूजा आस्तां—इति वाच्यम् । त्रिपञ्चेत्यनेन यदि चक्रपूजनं अवशिष्टैः पीठपूजनं, तदा अग्रे "सप्तविंशतिकमिदं पीठे वरीवसनीयं" इति सूत्रोक्तसङ्ख्यापूर्तेरभावेन पीठपूजनमन्त्रेषु सप्तविंशतिकथनं असङ्गतं स्यात् ॥ १६ ॥

चक्रमनुमाह—

त्रिपञ्चषडरदळाष्टकशतसहस्रारपद्मासनाय नमः इति चक्रमनुना चक्रमिष्ट्वा ॥ १७ ॥

अत्र निबन्धे अरशब्दस्य अनुषङ्गो दर्शितः । स चाशुद्धः । अनुषङ्गो हि मन्त्रभेदे दृष्टः । "चित्पतिस्त्वा पुनातु" इत्यादौ एकस्मिन् मन्त्रे अनुषङ्गो न दृष्टो न वा श्रुतः । प्रकृते मनुनेत्येकवचनेन मन्त्रे एकत्वं क्लृप्तम् । इत्थं च एकमन्त्रे अनुषङ्गं ब्रुवन् अङ्गनानामप्युपहासास्पदो भूत्वा स्वमौर्ख्यं प्रकटीकृतवान् । द्वन्द्वान्ते श्रूयमाणं प्रत्येकं संबध्यते इति परिभाषां तदीयगुरुर्नावदत् । अस्मिन् मन्त्रे अनुषङ्गं चकारेति प्रतिभाति । इत्यलं भूयसा ॥ १७ ॥

ततो मण्डलादीनां यजनमाह—

वह्निमण्डलाय सूर्यमण्डलाय सोममण्डलाय नमः इति त्रयो गुणमन्त्राः आत्ममन्त्राः चत्वारः इति सप्तविंशतिकमिदं पीठे वरिवसनीयम् ॥ १८ ॥

अत्र सोममण्डलाय नमः इत्यन्तं मन्त्रत्रयम् । सर्वत्र नम इत्यस्यानुषङ्गः । सं सत्त्वाय नमः, रं रजसे नमः, तं तमसे नमः, इति गुणमन्त्राः । आं आत्मने नमः, अं अन्तरात्मने नमः, पं परमात्मने नमः, ह्रीं ज्ञानात्मने नमः, इति आत्ममन्त्राश्चत्वारः । इत्थं च स्वर्णप्राकारायेत्यारभ्य सप्तविंशतिः, तैः पीठपूजा कार्येत्यर्थः ॥ १८ ॥

हौं प्रेतपद्मासनाय सदाशिवाय नमः इति चक्रोपरि देव्यासनविमृष्टिः ॥ १९ ॥

प्रेतरूपं यत्पद्मं तदभिन्नं यदासनं तत्स्वरूपो यः सदाशिवः तस्मै नमः इति योजना । ननु—सदाशिवे प्रेतरूपत्वं कथं इति चेत्, एतदुक्तं ज्ञानार्णवे—

पञ्चप्रेतान् महेशान ब्रूहि तेषां तु कारणम् ।
निर्जीवा अविनाशास्ते नित्यरूपाः कथं भवेत् ॥

इति पार्वतीप्रश्ने "साधु पृष्टं त्वया" इत्यारभ्य—

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
पञ्च प्रेता वरारोहे निश्चला एव ते सदा ॥
ब्रह्मणः परमेशानि कर्तृत्वं सृष्टिरूपकम् ।
वामा शक्तिस्तु सा ज्ञेया ब्रह्मा प्रेतो न संशयः ॥

इत्यारभ्य "सदाशिवो महाप्रेतः केवलो निश्चलः प्रिये" इत्यन्तेन । अयमभिप्रायः—ब्रह्मादयः सदाशिवान्ताः वामाज्येष्ठादिस्वस्वशक्तिरहिताः स्पन्दनेऽप्यशक्ताः सन्तः प्रेततुल्या एवेति प्रेताः इति कथनम् । विमृष्टिः कल्पनम् ॥ १९ ॥

मूर्तिकल्पनम्

मूर्तिकरणीविद्यामाह—

ॡषाई वाराहमूर्तये ठः ठः ठः ठः हुं फट् इति वाग्लौमादिग्लौंवागन्ता मूर्तिकरणी विद्या ॥ २० ॥

वाक् ग्लौं आदौ यस्यां ग्लौं वागन्ते यस्यां मध्यतनवर्णानां ईदृशी मूर्तिकरणी विद्येत्यर्थः । एतेन आसनकल्पनानन्तरं मूर्तिकल्पनविधिरुन्नेयः । मन्त्रस्वरूपं ऐं ग्लौं ॡषाई वाराहिमूर्तये ठः ठः ठः ठः हुं फट् ग्लौं ऐं इति ॥ २० ॥

आवाहनादिमुद्राबन्धनम्

मूलविद्यया आवाहनसंस्थापनसंनिधापनसंनिरोधन-संमुखीकरणावकुण्ठनवन्दनधेनुयोनीर्बध्वा ॥ २१ ॥

मूलविद्यामुच्चार्य तत्तन्मुद्रां बद्ध्वा दर्शयन् तं तमर्थं भावयेत् इति भावः । आवाहनादिमुद्राबन्धनप्रकार उच्यते । हस्तद्वयकनिष्ठाग्रादिमणिबन्धान्तं ऊर्ध्वमुखसंलग्नं कृत्वा सर्वा अङ्गुलयोऽग्रभागे किञ्चित्कुटिलाः कृत्वा कनिष्ठामूलद्वये स्पृष्ट्वा अङ्गुष्ठाग्रं न्यसेत् । इयं आवाहनीमुद्रा । इयमेव अधोमुखी चेत् संस्थापनी । मुष्टिद्वयं परस्परं संलग्नं सन्निधापनी । अस्यामेव अङ्गुष्ठद्वयस्य मुष्टिद्वयोदरनिवेशः सन्निरोधिनी । सन्निरोधिन्येव मणिबन्धादाकनिष्ठं परस्परयोगेन उत्तानमुखी सम्मुखीकरणमुद्रा । अवकुण्ठनधेनुयोन्यः पूर्वमुक्ताः । उक्तार्थे प्रमाणं तन्त्रे—

हस्तद्वयं चोर्ध्वमुखमृज्वङ्गुलियुतं युतम् ।
अङ्गुल्यग्राणि भुग्नानि कनिष्ठामूलभागतः ॥
अङ्गुष्ठाग्रसमायोगान्मुद्रैषाऽऽवाहिनी मता ।
अधोमुखी चेयमेव स्थापनाख्या समीरिता ॥
मुष्टिद्वयोदरयुता भवेत् सा सन्निधापनी ।
इयमङ्गुष्ठगर्भा तु सन्निरोधनरूपिणी ॥
इयमेवोत्तानरूपा सम्मुखीकरणाभिधा ॥ इति ॥

आवाहनादिमुद्रा अनूद्य तदङ्गत्वेन मूलमन्त्रविधानात् "प्रतिप्रधानमङ्गावृत्तिः" इति न्यायेन "सृष्टीरुपदधाति" इतिवत् यावत्यो मुद्रा विहिताः तावतीषु मुद्रासु बध्यमानासु तावद्वारं मूलमावर्तयेत्, न तु सकृन्मूलमुच्चार्य सर्वमुद्राबन्धनं इति ज्ञेयम् ॥ २१ ॥

देव्यङ्गन्यासः

षडङ्गन्यासजालक्रमं च विवृणोति—

देव्यङ्गन्यस्तषडङ्गपञ्चाङ्गः ॥ २२ ॥

षडङ्गमन्त्राः ऐं ग्लौं ऐं नमो भगवति इत्यादयः । पञ्चाङ्गमन्त्राः अन्धे अन्धिनि इत्यादयः पूर्वोक्ताः । तैः देव्याः तत्तदङ्गेषु न्यासं भावयेत् ॥ २२ ॥

षोडशोपचारार्पणम्

अथ षोडशोपचारपदार्थकथनपूर्वकं तावतामर्पणं विधत्ते—

पाद्यार्घ्याचमनीयस्नानवासोगन्धपुष्पधूपदीपनीराजनछत्रचामरदर्पणरक्षाचमनीयनैवेद्यपानीयताम्बूलाख्यषोडशोपचारकॢप्त्यन्ते ॥ २३ ॥

उपचारमन्त्रस्तु ऐं ग्लौं पाद्यं कल्पयामि नमः इति श्रीक्रमवत् ज्ञेयः ॥ २३ ॥

देवीध्यानम्

अथ देव्या ध्यानप्रकारमाह—

ध्यानं देव्याः—मेघमेचका कुटिलदंष्ट्रा कपिलनयना घनस्तनमण्डला चक्रखड्गमुसलाभयशङ्खखेटहलवरपाणिः पद्मासीना वार्ताळी ध्येया ॥ २४ ॥

तथा च षोडशोपचारार्पणानन्तरं यावदवकाशं उक्तप्रकारेण मूर्तिं ध्यायेत् इत्यर्थः । मेघमेचका मेघश्यामळा, "कालश्यामलमेचकाः" इत्यमरः । कुटिला वक्रा, "कुटिलं भुग्नं वेल्लितं वक्रमित्यपि" इत्यमरः । हलं लाङ्गलम् ॥ २४ ॥

देवीतर्पणम्

दशधा तस्यास्तर्पणं कुर्यात् ॥ २५ ॥

तर्पणमन्त्रे कोलमुखीमिति मूलमन्त्रान्ते योज्यम्, न तु वाराहीमिति, उत्पत्तिवाक्ये कोलमुखीति श्रवणात् ॥ २५ ॥

आवरणपूजा

अथावरणपूजां वक्तुं प्रक्रमते—

त्र्यश्रे जम्भिनीमोहिनीस्तम्भिन्यः ॥ २६ ॥

देव्यग्रकोणमारभ्य प्रादक्षिण्येन ज्ञेयम् । इति प्रथमावरणम् ॥ २६ ॥

अथ द्वितीयावरणपूजामाह—

पञ्चारे अन्धिनीरुन्धिन्यौ ताश्च ॥ २७ ॥

पञ्चारे पञ्चकोणेषु अन्धिनीरुन्धिन्यौ, ताश्च जम्भिन्यादयः त्रयश्च । मन्त्राः पूर्वोक्ताः ग्राह्याः । मन्त्रस्वरूपं—ऐं ग्लौं अन्धिनि नमः अन्धिनीश्री° । एवमग्रेऽपि । क्रमः पूर्ववत् । इति द्वितीयावरणम् ॥ २७ ॥

तृतीयावरणपूजामाह—

षट्कोणे आक्षाई [1]ब्रह्माणी ईलाई माहेश्वरी ऊहाईं कौमारी ऋुसाई वैष्णवी ऐशाई इन्द्राणी औवाई चामुण्डा तस्यैवाग्रेषु मध्ये च यमरयूं यां यीं यूं यैं यौं यः याकिनि जम्भय जम्भय मम सर्वशत्रूणां त्वग्धातुं गृह्ण गृह्ण अणिमाऽऽदि वशं कुरु कुरु स्वाहेति । अन्यासां धातुनाथानामप्येवं बीजे नामनि धातौ त्वाराधनकर्मणि मन्त्रसन्नामः । रमरयूं राकिणि रक्तधातुं पिब पिब लमरयूं लाकिनि मांसधातुं भक्षय भक्षय डमरयूं डाकिनि मेदोधातुं

[1] ब्राह्मणी—श्री.

ग्रस ग्रस कमरयूं काकिनि अस्थिधातुं जम्भय जम्भय समरयूं साकिनि मज्जाधातुं गृह्ण गृह्ण हमरयूं हाकिनि शुक्रधातुं पिब पिब अणिमाऽऽदि वशं कुरु कुरु स्वाहा इति धातुनाथयजनम् ॥ २८ ॥

षट्कोणे कोणाग्रेषु आक्षाई इत्यादिषण्मन्त्रैः षड्देवताः पूजयेत् । ऐं ग्लौं आक्षाई ब्रह्माणीश्री° इति मन्त्रस्वरूपम् । एवमग्रेऽपि । मध्ये षट्कोणमध्ये । स्वाहाऽन्तं एकं मन्त्रं दर्शयित्वा एतन्मन्त्रवर्णानन्यत्र कांश्चिदतिदिशति—एवमिति । एवं उक्तमन्त्रवदित्यर्थः । एवमतिदेशमुक्त्वा अतिदिष्टमन्त्रवर्णेषु बाधकमूह्यं तत्रैव क्वचित्स्थलविशेषे दर्शयति—बीज इत्यादिना । बीज इत्येकवचनं 'जात्याख्यायां' इति रीत्या । बीजस्थाने वक्ष्यमाणबीजानां सन्नाम ऊहः कार्यः । एवं धातौ वग्धातुस्थाने तत्तद्धातूनां, नामनि याकिनीति नामस्थाने तत्तन्नाम्नां ऊहश्च कार्यः । शिष्टाः मन्त्रवर्णाः मम सर्वशत्रूणां इत्यादयः समानाः इति भावः । अथ द्वितीयादिमन्त्रेषु विशेषमाह—रमरयूमित्यादिना ॥ २८ ॥

अनन्तरं षडश्रोभयपार्श्वयोः क्रोधिनीस्तम्भिन्यौ चामरग्राहिण्यौ तत्रैव स्तम्भनमुसलायुधाय आकर्षणहलायुधाय नमः षडराद्बहिः पुरतो देव्याः क्ष्रौं क्रौं चण्डोच्चण्डाय नमः इति तद्यजनम् ॥ २९ ॥

अनन्तरं धातुनाथयजनानन्तरम् । षडश्रोभयपार्श्वयोः इति उभयपार्श्वद्वयकोणान्तःप्रदेशो बोध्यः । मन्त्रस्वरूपं च ऐं ग्लौं क्रोधिनीचामरग्राहिणीश्री° । एवं अपरम् । अग्रे चण्डोच्चण्डपूजाया बहिर्विधानात्, तत्रैवेति षडश्रोभय पार्श्वयोरेवेत्यर्थः । इति तृतीयावरणम् ॥ २९ ॥

चतुर्थावरणमाह—

अष्टदळे वार्ताळीवाराहीवराहमुख्यन्धिन्यादयः पञ्च, तद्बहिः महामहिषाय देवीवाहनाय नमः ॥ ३० ॥

देव्यग्रदळमारभ्य प्रादक्षिण्येन, क्रमस्यानुक्तत्वात् । वाहनपूजामाह—त द्ब हि रि ति । अष्टदळाद्बहिरित्यर्थः देवीपुरतः अयं पूज्यः, वाहनरूपत्वात्, वाहनस्थितेः सर्वत्र प्रधानदेवताऽग्रभागे दृष्टत्वात् ॥ ३० ॥

पञ्चमावरणमाह—

शतारे देवीपुरतो दळसन्धौ जम्भिन्या इन्द्रायाप्सरोभ्यः सिद्धेभ्यो द्वादशादित्येभ्योऽग्नये साध्येभ्यो त्रिश्वेभ्यो देवेभ्यो विश्वकर्मणे यमाय मातृभ्यो रुद्रपरिचारकेभ्यो रुद्रेभ्यो मोहिन्यै निर्ऋतये राक्षसेभ्यो मित्रेभ्यो गन्धर्वेभ्यो भूतगणेभ्यो वरुणाय वसुभ्यो विद्याधरेभ्यः किन्नरेभ्यो वायवे स्तम्भिन्यै चित्ररथाय तुम्बुरवे नारदाय यक्षेभ्यः सोमाय कुबेराय देवेभ्यो विष्णवे ईशानाय ब्रह्मणे अश्विभ्यां धन्वन्तरये विनायकेभ्यो नम इति देवतामण्डलमिष्ट्वा तद्बहिः औं क्षौं क्षेत्रपालाय नमः सिंहवराय देवीवाहनाय नम इति च तदुभयं वरिवस्येत् । तद्बहिः महाकृष्णाय मृगराजाय देवीवाहनाय नम इति तत्पूजा ॥ ३१ ॥

देवतानामष्टत्रिंशत्सङ्ख्याकत्वात् तया सङ्ख्यया शतपत्रविभागासंभवात् अवश्यं सन्धयो हेयाः । तथा सति देव्याः पुरतः देवतासमसङ्ख्याकसन्धयो ग्राह्याः । शेषा हेयाः । तत्राप्युदगपवर्गलाभाय दक्षिणस्यामारम्भः, उत्तरे समाप्तिः । सर्वत्र नमःपदमनुषज्यते । ततः क्षेत्रपालादिपूजां विधत्ते—त द्ब हि रिति । त द्ब हिः शतपत्रबहिः । वाहनरूपत्वात् देवीपुरत एव । यद्वा—त द्ब हिः पूर्वपूजिताष्टत्रिंशद्देवताऽधिष्ठानदलसन्धिबहिः । तेन देवीपुरोभागस्त्वर्थात् सिध्यति । त दु भ यं क्षेत्रपालसिंहोभयम् । त द्ब हिः क्षेत्रपालसिंहबहिः । त त्पू जा मृगराजपूजा । इति पञ्चमावरणम् ॥ ३१ ॥

षष्ठावरणमाह—

सहस्रारे अष्टधा विभक्ते ऐरावताय पुण्डरीकाय वामनाय कुमुदायाञ्जनाय पुष्पदन्ताय सार्वभौमाय सुप्रतीकाय नम इति तत्पूजा बहिः [1]सुधाऽब्धेर्वा। बाह्यप्राकाराष्टदिक्षु अध उपरि च हेतुकादयो भैरव-क्षेत्रपालशब्दयुक्ताः प्रत्येकं क्षौमादयश्च यष्टव्याः। हेतुकत्रिपुरान्तकाग्नियमजिह्वैकपादकालकराळभीम-रूपहाटकेशाचला दश भैरवाः ॥ ३२ ॥

अ ष्ट धा वि भ क्ते पञ्चविंशत्युत्तरशतदळेष्वेकैका देवता पूज्या। अमीषामेव देवतानां विकल्पेन स्थानान्तरमाह—ब हि स्सु धा ब्धे र्वे ति। सुधाऽब्ध्यधिकरणत्वेन कल्पितो यो देशः तस्मात् बहिरित्यर्थः। क्रमस्तु इन्द्रादीशानान्तं प्रदक्षिणम्। अत्र नमोऽन्तमन्त्रेषु सर्वत्र नमोऽन्ते देवतानाम। ततः श्रीपादुकामित्यष्टाक्षरीयोगः। यथा जम्भिन्यै नमः जम्भिनीश्री°। बा ह्य प्रा का रे ति प्रथमचतुरश्र इत्यर्थः। हेतुकादयः अग्रिमसूत्रे वक्ष्यमाणाः दश अचलान्ताः प्रत्येकं प्रतिमन्त्रं क्षौं इति आदौ येषां ते यष्टव्याः पूज्याः। मन्त्रस्वरूपं—ऐं ग्लौं क्षौं हेतुकभैरवक्षेत्रपालश्री°। एवमग्रेऽपि योज्यम्। हेतुकादयः के इत्याकाङ्क्षायामाह—हे तु क त्रि पु रा न्त के ति। द्वन्द्वान्ते श्रूयमाणं जिह्वापदं अग्नियमयोरुभयत्र अन्वेति। एवं च अग्निजिह्वेति यमजिह्वेति। भीमरूपः हाटकेशः इत्येकैकम्। शेषं स्पष्टम् ॥ ३२ ॥

देव्याः पुनःपूजा

उक्तमर्थमुपसंहरति--

एवं षडावरणीमिष्ट्वा पुनर्देवीं त्रिधा सन्तर्प्य सर्वैरुपचारैरुपचर्य ॥ ३३ ॥

[1] सुरा—अ, श्री.

षडावरणपूजाऽनन्तरं कर्तव्यां क्रियामाह—पुनरिति । सर्वैरुपचारैः पूर्वोक्तषोडशोपचारैः ॥ ३३ ॥

बलिदानप्रकारः

अथ बलिदानप्रकारं वक्तुं प्रक्रमते—

पुरतो वामभागे हस्तमात्रं जलेनोपलिप्य रुधिरान्नहरिद्राऽन्नमहिषपलसक्तुशर्कराहेतुफलत्रयमाक्षिकमुद्गत्रयमाषचूर्णदधिक्षीरघृतैः शुद्धोदनं संमर्द्य चरणायुधाण्डप्रमाणान् दशपिण्डान् विधाय तत्र निधाय कपित्थफलमानमेकं पिण्डं च तत्समीपे सादिमोपादिममध्यमं चषकं च निक्षिप्य दशपिण्डान् हेतुकादिभ्यो मध्यमपिण्डं चषकं च चण्डोच्चण्डाय तत्तन्मन्त्रैः दत्वा बृन्दमाराध्य ॥ ३४ ॥

देव्या इति शेषः, 'देवीं त्रिधा' इति पूर्वसूत्रे सन्निहितत्वात् । अथ द्रव्यमाह—रुधिरान्नेति । रुधिरेण रक्तेन युक्तं अन्नं हरिद्रायुक्तं अन्नं पलं मांसं सक्तवः भर्जितयवचूर्णं हेतुः प्रथमं फलत्रयं त्रिफला माक्षिकं पुष्परसः मुद्गत्रयं त्रिजातिमुद्गाः । शेषं स्पष्टम् । एतैः शुद्धोदनं संमर्द्य मिश्रितं कृत्वा । चरणायुधः कुक्कुटः, "कुक्कुटश्चरणायुधः" इत्यमरः । तत्र पूर्वलिप्तदेशे । तत्समीपे दशपिण्डसमीपे । दशपिण्डस्थापनं च प्रागादिदशदिक्षु, पूजायामासां दिशां क्लृप्तत्वात् । तत्तन्मन्त्रैः पूजायां क्लृप्तमन्त्रैः । तत्रापि नमोऽन्तैरेव, न श्रीपादुकेत्यादिमन्त्रशेषः । बृन्दमाराध्येति हेतुकादिचण्डोच्चण्डान्तबृन्दमित्यर्थः । अत्र पाठक्रमं बाधित्वा अर्थक्रमेण आदौ आराधनं, पश्चात् बलिदानं ज्ञेयम् । तत्रापि बाधकाभावात् प्रधानसन्निकर्षलाभाय सप्तदशप्राजापत्यपशुवत् पदार्थानुसमयेनाभ्यर्चनं पञ्चोपचारैः कार्यम् ॥ ३४ ॥

गुरुसंतोषणम्

यथाविभवं श्रीगुरुं सन्तोष्य ॥ ३५ ॥

यथाविभवं स्वशक्ति दृष्ट्वा । गुरुं सन्तोष्येत्यनेन गुरुसन्निधावस्यानुष्ठानं सूचितम्, दूरस्थे नित्यं सन्तोषणासंभवात् । तेन सति संभवे गुरुसन्निधौ फलाधिक्यं ज्ञेयम् ॥ ३५ ॥

शक्तिवटुकपूजा

शक्त्यादिपूजामाह—

सम्पूर्णयौवनाः सलक्षणा मदनोन्मादिनीस्तिस्रः शक्तीराहूय वटुकं चैकमभ्यर्च्य स्नपयित्वा गन्धादिभिरलंकृत्य वार्ताळीबुद्धया एकां शक्तिं मध्ये क्रोधिनीस्तम्भिनीबुद्धया द्वे इतरे पार्श्वयोश्चण्डोच्चण्डधिया वटुकमग्रे स्थापयित्वा सर्वैर्द्रव्यैः सन्तोष्य मम श्रीवार्ताळीमन्त्रसिद्धिर्भूयादिति ताः प्रति वदेत् ताश्च प्रसीदन्त्वधिदेवता इति ब्रूयुः ॥ ३६ ॥

उक्तं रतिरहस्ये—

षोडशाब्दं समारभ्य पञ्चविंशत्समावधि ।
रमणी पूर्णतारुण्या तत्र भोगोऽतिसौख्यदः ॥ इति ॥

लक्षणेन नेत्ररमणीयरूपेण मदनोन्मादिनीः मदनवर्धिनीः आहूयाभ्यर्च्येति शक्तिषु वटुके चान्वेति । स्नपनं चात्राभ्यङ्गरूपम् । तच्च पूजायां स्नानावसरे कर्तव्यम् । ततो गन्धादिभिरलंकुर्यात् । आदिपदेन वस्त्रभूषणादि ग्राह्यम् । अग्रे तासामग्रे सर्वैर्द्रव्यैरिति वाराहीपूजायां विहितप्रथमद्वितीयतृतीयैरित्यर्थः । ताः इत्यनेन प्रार्थनं सुवासिनीनामेव न वटुकस्य ॥ ३६ ॥

मन्त्रसाधनम्

एवं पूजामुपसंहृत्य अग्रे कर्तव्यं विधत्ते—

एवं सपरिवारामुदारां भूदारवदनामुपतोष्य लक्षं पुरश्चरणं कृत्वा तद्दशांशं तापिञ्छकुसुमैर्हुत्वा मन्त्रं साधयेत् ॥ ३७ ॥

एवमुक्तप्रकारेण सपरिवारां आवरणदेवतासहितां उदारां फलदानशौण्डां भूदारस्य क्रोडस्य वदनमिव वदनं यस्यास्ताम् । लक्षं पुरश्चरणं कृत्वा इति कथनं तन्त्रान्तरोक्तपुरश्चरणधर्मप्रापकम् ॥

पुरश्चरणप्रकारः

ते च धर्माः परमानन्दतन्त्रे—

पुरश्चरणयोगेन मन्त्रसिद्धिं समाश्रयन् ।
कामान् सुसाधयेत् सर्वान् विधिना परमेश्वरि ।
तद्विधानं शृणु शिवे विस्तरेण ब्रवीमि ते ॥

इत्यारभ्य

पुरस्करोति यो नैवं तस्य विद्या पराङ्मुखी ॥

इति निन्दया पुरश्चरणस्यावश्यकत्वं दर्शयित्वा "अशक्तश्चेत् देशिकेन ब्राह्मणेन च कारयेत्" इत्यनेन कर्तृप्रतिनिधिमुक्त्वा तद्विधिं देशं कालं नियमांश्चाह—

अशयाने हरौ काले दीक्षोक्तशुभसंयुते ।
मनःप्रसादो यत्रास्ति तत्र पुण्ये समाचरेत् ॥
पुरश्चरणकं देवि पञ्चाङ्गं प्रोच्यते बुधैः ।
जपो होमस्तर्पणं च मार्जनं ब्रह्मभोजनम् ॥
पूर्वपूर्वदशांशेन चाङ्गं स्यादुत्तरोत्तरम् ।
जपस्तु लक्षसङ्ख्याको होमादिस्तद्दशांशकः ॥

प्रत्यहं वा समासौ वा लक्षान्ते वा महेश्वरि ।
साधिताग्नौ नित्यवत्तु हुत्वा होमेन होमयेत् ॥
चतुस्तारं मुखे क्षिप्त्वा मूर्धान्तेन महेश्वरि ।
पायसं बिल्वपत्रं वा द्राक्षां [1]पुण्यफलानि वा ॥
करवीरं किंशुकं वा कमलं वा कुसुम्भकम् ।
मधूकं च जपां वाऽपि चान्यद्वा शुभगन्धयुक् ॥
एतेषां कुसुमं तद्वत् गव्यं क्षीरं घृतं तथा ।
पुष्पाणि तु समग्राणि कौसुम्भं दशसङ्ख्यकम् ॥
अम्लानं सुप्रसन्नं च होमकर्मणि योजयेत् ।
कर्षद्वयन्यूनफलं समग्रं [2]होमयेत् तदा ॥
ततोऽधिकफलस्येह खण्डं स्यात् कर्षतोऽधिकम् ।
घृतश्रीखण्डागरूणां माषत्रयमितं भवेत् ॥
षष्टितण्डुलजं तद्वत् पायसं संप्रकीर्तितम् ।
क्षीरं कर्षमितं ज्ञेयमेवमन्यन्महेश्वरि ॥
शूद्राणां च तथा स्त्रीणां होमो नैव भवेच्छिवे ।
उत्कटेच्छाभक्तियुक्तशूद्रस्य स्यान्नमोन्ततः ॥
अथवा ब्राह्मणद्वारा होमः कर्तव्य एव तु ।
सर्वत्रायं विधिः प्रोक्तः पूजाऽऽदिषु महेश्वरि ॥
होमाभावे द्विगुणतः तत्संख्यायां जपः स्मृतः ।
अशक्त्या यस्य चाङ्गस्य लोपस्तद्द्विगुणो जपः ॥
ब्राह्मणस्य द्विगुणतः क्षत्रियस्य त्रिधा स्मृतः ।
चतुर्धा तु विशः पञ्चगुणः शूद्रस्य वै जपः ॥
अशक्तवृद्धस्त्रीणां तु सिद्धिर्जपद्विजार्चनात् ।
अङ्गद्वयेनैव तेषां पुरश्चरणकं भवेत् ॥
दुग्धेन गन्धतोयेन तर्पयेद्वाऽपि मूलतः ।
[3]जले देवीं समावाह्य संपूज्यैव तु पूर्ववत् ॥

[1] विल्व—ब२.
[2] योज—श्री.
[3] जपेद्देवीं—श्री.

स्वमूर्ध्नि देवतां ध्यात्वा तीर्थमावाह्य [1]सुन्दरि ।
मार्जयेन्मूलमनुना मार्जयामीति वै शिवे ॥
ब्राह्मणान् विविधैर्देवि उपचारैस्तु पूजयेत् ।
आदौ भूमिग्रहं कुर्यात् पूर्वस्मिन् दिवसे शिवे ॥
सङ्कल्प्यामुकमन्त्रस्य पुरश्चरणसिद्धये ।
मयेयं गृह्यते भूमिर्मन्त्रो मे सिध्यतामिति ॥
ग्रामे क्रोशमितं तद्वन्नगरे द्विगुणं भवेत् ।
अन्यत्र तु यथेच्छं स्यात् पुण्यारण्यादिषु प्रिये ॥
तद्दिक्षु क्षीरवृक्षोत्थान् कीलान् वैतस्तिकान् शिवे ।
मूलास्त्रेणाभिमन्त्र्याथ पूर्वादिदशदिक्षु तान् ॥
निखनेत् तेषु गन्धाद्यैरस्त्रेणाभ्यर्च्य दिक्पतीन् ।
माषभक्तबलिं दद्यात् तत्तन्मन्त्रेण मन्त्रवित् ॥
एहीन्द्र पूर्वदिग्भागे पूजितो वस कीलके ।
मां पालय ततो निर्विघ्नेन कार्यं च साधय ॥
पुनः साधय वै माष ततो भक्तबलिं तथा ।
गृह्णद्वयं ततो [2]मूर्धा रामवेदाक्षरो मनुः ॥
तत्तद्दिशादेवनामसंयोगादन्यमन्त्र[3]काः ।
नैतत्सुरालये कुर्यात् यतस्तैः पूर्वसङ्ग्रहात् ॥
तन्मध्ये गणपं क्षेत्रपालं वास्त्वीशमर्चयेत् ।
पूर्ववत् कूर्मचक्रं तु पूजयेत् तदनन्तरम् ॥
नवकोष्ठेषु पूर्वादीशान्तकोष्ठेषु वै क्रमात् ।
विलिखेत् काद्यष्टवर्गान् मध्ये कोष्ठे तु पूर्वतः ॥
द्वन्द्वं स्वराणां संलिख्य कूर्मं भक्त्या समर्चयेत् ।
प्रागादिनवकोष्ठेषु क्षेत्रपालान्नवार्चयेत् ॥
अमृतं वृषभं शैलराजं वासुकिमेव च ।
अर्धकृच्छक्तिपद्मादियोनीन् शङ्खं महादिकम् ॥

[1] पूर्ववत्—व २. [2] मूर्धा—श्री. [3] कान्—श्री.

छायाछत्रगणं चेति क्रमात् संपूजयेत् बुधः ।
दीपस्थानं तत्र देवि जानन् संसाधयेन्मनून् ॥
तत्कूर्मस्य मुखं देवि दीपस्थानं प्रकीर्तितम् ।
दीप्यन्ते मनवो यत्र दीपस्थानं ततस्तु तत् ॥
गृहनामाद्यक्षरं तु यत्र कोष्ठे स्थितं शिवे ।
तत्कूर्ममुखमुद्दिष्टं निर्विघ्नं तत्र सिध्यति ॥
मध्यं पृष्ठं तस्य [1]चाथ पुच्छं पार्श्वेषु वै क्रमात् ।
हस्तयुग्मं पादयुग्मं पार्श्वयुग्मं प्रकीर्तितम् ॥
मुखे पृष्ठे चोत्तमं स्यात् मध्यमं हस्तयुग्मके ।
अन्यत्र तु निषिद्धं स्यादेष देवि त्रिधा स्थितः ॥
देशकूर्मं ग्रामकूर्मं गृहकूर्ममितीश्वरि ।
भावयेत् तत्र तत्रैव प्रोक्तरीत्या विचिन्तयेत् ॥
मुख्यं फलं त्रयाणां तु लाभः स्यादेकमेव वा ।
तत्रोक्तपरकूर्मं तु पूजयेत् तत्र वै जपेत् ॥
कुरुक्षेत्रे प्रयागे च महाकाले तथैव च ।
पर्वते च शुभारण्ये समुद्रस्योपकूलके ॥
काश्यां च चिन्तनं नैव दीपस्थानस्य शङ्करि ।
निजे गृहे यथोक्तं स्यात् गोष्ठेऽब्धेस्तीर एव च ॥
द्विगुणं कुलवृक्षाधः पर्वताग्रे त्रिधा फलम् ।
अब्धिसंयुक्तसरित्तीरे पुण्यस्रोतस्तटे तथा ॥
स्वयंभुदेवगेहे च शतधा फलमुच्यते ।
पश्चिमाभिमुखे नन्दिशून्ये [2]त्वेव शिवालये ॥
तथा नार्मदलिङ्गस्य चालये गुरुसन्निधौ ।
अनन्तसङ्ख्यं तु फलं मनःकान्तिविशेषतः ॥
दीपनाथस्य मन्त्राणामाद्यमेकाक्षरं यथा ।
तथाऽरिमन्त्रा अपि च सिध्यन्ति [3]दृढमीश्वरि ॥

[1] चाधः—ब२. [2] त्वेवं—श्री. [3] हुत—ब२.

तत्र स्थित्वा जपेल्लक्षं हविष्याशी समाहितः ।
मन्त्रसाधनकामस्तु युगसङ्ख्याकलक्षकम् ॥
आदौ शुभदिने केशान् वापयित्वा महेश्वरि ।
अयुतं प्रजपेत् तत्र तद्गायत्रीं समाहितः ॥
तेनाधिकारी भवति पुरश्चरणसाधने ।
तदादिनियमं कुर्यात् प्रयत्नेन तु साधकः ॥
शुद्धं स्वच्छं तथा वासः स्थानमङ्गं च मूर्धजाः ।
सुगन्धामलकैः केशशोधनं बन्धनं तथा ॥
पञ्चतिक्तमुखो निद्राजृम्भालस्यादिवर्जितः ।
निष्ठीवनं भयं नीचस्पर्शभाषणमेव च ॥
अकार्यभाषणं क्रोधं चित्तचाञ्चल्यमेव च ।
वर्जयेच्च महेशानि सदा नियतमानसः ॥
आहारस्तु फलं क्षीरं मूलं तद्वद्धविष्यकम् ।
भुञ्जीयाद्रात्रिसमये शयनं स्थण्डिलेऽथवा ॥
कुशासनेऽजिने श्वेतकम्बळे धौतवाससि ।
जपस्थानसमीपे तु शयनं प्रत्यहं भवेत् ॥
ब्रह्मचर्यं सदा कुर्यात् कायवाङ्मानसैः शिवे ।
त्रिकालं वा द्विकालं वा स्नानं स्यात् प्रातरेव वा ॥
त्रिकालं वा द्विकालं वा सकृद्वा देवताऽर्चनम् ।
आमध्याह्नं च देवेशि जपं कुर्यात् तथाऽन्वहम् ॥
मूलाभिमन्त्ररहितं न पिबेन्न च भक्षयेत् ।
कदळीमधुपर्णेषु पालाशे मध्यवर्जिते ॥
हितं मितं च भुञ्जीयात् देवतायै निवेदितम् ।
एलालवङ्गकर्पूरजातीपत्रफलात्मकम् ॥
पञ्चतिक्तं तेन युतं ताम्बूलं निशि भक्षयेत् ।
न वदेदप्रियं मिथ्यां बहुभाषणमेव च ॥
अर्कच्छायां स्नुहिच्छायां करञ्जस्यापि सुन्दरि ।
नैवाक्रमेद्बिभीतस्य छायां चापि क्वचिच्छिवे ॥

मौनेन भोजनं स्नानमप्रतिग्रह एव च ।
क्षौरमुष्णजलस्नानगीतवाद्यनिषेवणम् ॥
अनृतुस्त्रीसङ्गमं च कञ्चुकोष्णीषधारणम् ।
अन्धकारे च शयनं वर्जयेत् साधकोत्तमः ॥
अन्यानपि यथाशास्त्रं नियमानाचरेत् प्रिये ।
नियमांस्तु परित्यज्य य इच्छेन्मन्त्रसाधनम् ॥
चण्डभानुं समाश्रित्य शीतलं वाञ्छति ध्रुवम् ।
स्त्रीणां तथा रोगिणां च वृद्धानामपि सुन्दरि ॥
यथाशक्ति भवेदेतन्नियमानां तु धारणम् ।
आदौ गुरुं ब्राह्मणांश्च देवतां प्रणमेत् बुधः ॥
सङ्कल्प्य गणनाथार्चा पुण्याहं वाचयेत् तथा ।
गुर्वाद्याज्ञां समादाय जपं कुर्यात्तु भक्तितः ॥
विन्यस्य मूलविद्यां तु प्राणायामत्रयं चरेत् ।
सामान्यकलशोदेन पञ्चतिक्तं निवेदयेत् ॥
मूलाभिमन्त्रितं तच्च मुखे संस्थाप्य साधकः ।
गृहीत्वा वामपाणौ तु पात्रस्थां जपमालिकाम् ॥
कलशोदकविप्रुड्भिः प्रोक्ष्य संप्रार्थयेच्छिवे ।
ॐ माले त्वं महामाये सर्वशक्तिस्वरूपिणि ॥
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ।
संपूज्य मन्त्रयोगेन गृहीत्वा दक्षहस्तके ॥
[1]मायासिद्ध्यै च हृदयं पञ्चार्णः पूजने मनुः ।
अविघ्नं कुरु पश्चाद्वै मे मालेति शिरस्तथा ॥
गमाद्यं ग्रहणे चैव रुद्र[2]वर्णः स्मृतो मनुः ।
मूर्ध्नि संस्थाप्य मालां तु मातृश्रृङ्गाट[3]कं बिले ॥
तन्मयीं मूलविद्यां तु मुखे हृदि पराम्बिकाम् ।
तद्वाच्यां तन्मयं नाथमाज्ञायां तु विभावयेत् ॥

[1] मया—श्री. [2] वर्णयुतो—श्री. [3] केऽम्बिके—श्री.

इत्यादिना । किं च द्रव्यमाने विशेषो दक्षिणामूर्तिसंहितायाम्—

कस्तूरीकुङ्कुमशशिगुञ्जामात्रं हुनेच्छिवे ॥ इति ॥

तर्पणे विशेषो योगिनीतन्त्रे—

नद्यादौ वा शुभे तोये पात्रस्थे वाऽपि देवताम् ।
आवाह्य मूलमनुना तर्पयामीति तर्पयेत् ॥ इति ॥

तत्रैव—

देवतीर्थेनाञ्जलिना जलदानं तु तर्पणम् ।
मार्जनं तु कुशैर्वाऽपि निषिञ्चेत् तत्त्वमुद्रया ॥ इति ॥

स्थाने विशेषो योगिनीतन्त्रे—

प्रत्यग्भिन्नमुखे नन्दियुते हानिः शिवालये ॥ इति ॥

किंच तत्रैव—

अप्रसन्नं मनो यत्र तत्रोत्तमतमेऽपि च ।
मन्त्रसिद्धिर्न भवति यथोक्तानुष्ठितावपि ॥ इति ॥

जपसङ्ख्यायां विशेषः एकवीराकल्पे—

भावनारहितानां तु क्षुद्राणां क्षुद्रचेतसाम् ।
चतुर्गुणो जपः प्रोक्तः सिद्ध्यै नान्यथा भवेत् ॥ इति ॥

योगिनीतन्त्रेऽपि—

असंयतात्मनामुक्तो जपः षोडशधा भवेत् ॥ इति ॥

जपे गौणकालो योगिनीतन्त्रे—

सङ्कटे तु दिनस्यान्तं तृतीयांशं परित्यजेत् ॥ इति ॥

पुरश्चरणसङ्कल्प उक्तो योगिनीतन्त्रे—

तिथ्याद्युक्त्वा गोत्रनामद्वयमुल्लिख्य शङ्करि ।
श्रीविद्यासिद्धिवैद्वारा महात्रिपुरसुन्दरी ॥

प्रीत्यर्थं दिनसङ्ख्यां च जपसङ्ख्यां समुल्लिखन् ।
पञ्चाङ्गं पुरश्चरणं करिष्य इति वै वदेत् ॥ इति ॥

द्वित्रिकालपूजायां विशेषो योगिनीतन्त्रे—

द्वित्रिकालार्चने देवि उपचारांस्तथाऽऽवृतम् ।
आवर्तयेद्धोममपि चान्यत् सर्वं सकृत् भवेत् ॥ इति ॥

जपनियमाः मनोनिग्रहसाध्याः बहवः सन्ति तन्त्रेषु । तेषामनुष्ठाने मनोनिग्रहस्य मुख्यतया तत्साधयितुरिदानीमभावात् तादृशं जपाङ्गधर्मानुष्ठानमपि संप्रति कालेऽननुष्ठेयमिति ते धर्माः आभ्यन्तराः न लिख्यन्ते । यद्यनुष्ठानसमर्थास्तर्हि तन्त्रेभ्यो जानन्तु ॥

तद्दशांशं जपदशांशम् । तापिञ्छकुसुमैः तमालकुसुमैः, "कालस्कन्धस्तमालः स्यात् तापिञ्छोऽप्यथ सिन्धुकः" इत्यमरः । मन्त्रं साधयेत् इत्यनेन केवललक्षजपे नैव पर्याप्तिः । किं तु तन्त्रान्तरोक्तानि यानि चिह्नानि मन्त्रसिद्धिसूचकानि, तावत्पर्यन्तमनुष्ठानं कुर्यादिति ज्ञापितम् ॥

मन्त्रसिद्धिचिह्नानि

मन्त्रसिद्धिचिह्नानि तन्त्रान्तरेषु । तत्रादौ वक्रतुण्डकल्पे—

चित्तप्रसादो मनसश्च तुष्टिरल्पाशिता [1]स्वप्नपराङ्मुखत्वम् ।
स्वप्नेषु यानाद्युपलम्भनं तु सिद्धस्य चिह्नानि भवन्ति सद्यः ॥ इति ॥

भैरवीतन्त्रे—

ज्योतिः पश्यति सर्वत्र शरीरं वा प्रकाशयुक् ।
निजं शरीरमथवा देवतामयमेव हि ॥ इति ॥

नारदपाञ्चरात्रे—

मन्त्राराधनसक्तस्य प्रथमं वत्सरत्रयम् ।
जायन्ते बहवो विघ्नाः नियमस्थस्य नारद ॥

[1] विस्तप—श्री.

नोद्वेगं साधको याति कर्मणा मनसा यदि ।
तृतीयवत्सरादूर्ध्वं राजानश्च महीभृतः ॥
प्रार्थयन्तेऽनुरोधेन गर्विता अपि मानिनः ।
प्रसादः क्रियतां नाथ ममोद्धरणकारणम् ॥
प्रज्वलन्तं च पश्यन्ति तेजसा विभवेन च ।
अतस्ते मुनिशार्दूल निष्ठुरं वक्तुमक्षमाः ॥
नवमाद्वत्सरादूर्ध्वं स्वयं सिध्यति मन्त्रराट् ।
नानाश्चर्याणि हृदये मन्त्रसिद्धिमयानि वै ॥
अत्यानन्दप्रदान्याशु प्रत्यक्षेण बहिस्तथा ।
जडधीस्तु क्षणं विप्र क्षणमस्ति प्रहर्षितः ॥
क्षणं दुन्दुभिनिर्घोषं शृणोत्येवान्तरिक्षतः ।
क्षणं च मधुरं वाद्यं नानागीतसमन्वितम् ॥
आजिघ्रति क्षणं गन्धान् कर्पूरमृगनाभिजान् ।
उत्पतन्तं क्षणं वापि पश्यत्यात्मानमात्मना ॥
चन्द्रार्ककिरणाकीर्णं क्षणमालोकयेन्नभः ।
तारकाणि विचित्राणि योगिनो नभसि स्थितान् ॥
क्षणं मेघोदयं पश्येत् क्षणं रात्रिं दिने सति ।
रात्रौ च दिवसालोकं ससूर्यं क्षणमीक्षते ॥
[1]बलेन परिपूर्णश्च तेजसा भास्करोपमः ।
पूर्णेन्दुसदृशः कान्त्या गमने विहगोपमः ॥
स्वल्पाशनेनाशक्तता बहुनाऽपि न खिद्यते ।
विण्मूत्रयोरप्यल्पत्वं भवेन्निद्राजयस्तथा ॥
जपध्यानगतो मन्त्री न खेदमधिगच्छति ।
विना भोजनपानाभ्यां पक्षमासादिकं मुने ॥
इत्येवमादिभिश्चिह्नैः महाविस्मयकारिभिः ।
प्रवृत्तैः संप्रबोद्धव्यं प्रसन्नो मन्त्रराडिति ॥

[1] जपेन—श्री,

बोधायनः—

सिद्धेस्तु त्रीणि चिह्नानि दाता भोक्ता ह्ययाचकः ॥ इति ॥

प्रपञ्चसारे—

ततोऽस्य प्रत्ययास्त्वेवं जायन्ते जपतो मनुम् ।

इत्यारभ्य

अर्काभस्तेजसाऽसौ भवति नलिनजा सन्ततं किंकरी स्या-
द्रोगा नश्यन्ति दृष्ट्वा तमथ च धनधान्याकुलं तत्समीपम् ।
देवा नित्यं नमोऽस्मै विदधति फणिनो नैव दंशन्ति पुत्राः
संपन्नाः स्युः सपुत्रास्तनुविपदि परं धाम विष्णोः स भू[या]यात् ॥

शुभाशुभस्वप्नाः

परमानन्दतन्त्रेऽपि—

साधकस्य तु सिद्धेर्वै चिह्नानि शृणु शङ्करि ।
आचार्यदर्शनं चित्तप्रसादोऽल्पाशनं तथा ॥
अल्पनिद्रा मनोल्लासः सिद्धिचिह्नानि शङ्करि ।
अथ स्वप्नान् प्रवक्ष्यामि शुभांश्चैव तथेतरान् ॥
उपास्य देवतारूपं प्रासादं स्फटिकोपमम् ।
गुरुप्रियजनं पूर्णचन्द्रं सूर्यं सरित्पतिम् ॥
पूर्णां नदीं तटाकं च प्रफुल्लकमलाकरम् ।
यन्त्रराजं महादेवलिङ्गं हैरण्यपर्वतम् ॥
दृष्ट्वा सिद्धिस्तथा नौकातरणं स्वस्य वै जयः ।
ज्वलदग्निं हंसचक्रवाकसारसबर्हिणः ॥
अश्वयुग्रथमध्यस्थं श्वेतच्छत्रादिभूषणम् ।
दीपपङ्क्तिं श्वेतमाल्यं दिव्यस्त्रीणां कदम्बकम् ॥
फुल्लवृक्षं चारुमांसं खे यानमभयं तथा ।
श्वेताश्ववृषभौ मत्तवारणं तेषु रोहणम् ॥

विमानगमनं मद्यपानं मांसस्य भक्षणम् ।
विष्ठालेपं रक्तलेपं दधिलेपं च भक्षणम् ॥
राज्याभिषेकं रत्नादिभूषणं चैवमादिकम् ।
हर्षहेतुकरं चित्रं स्वप्नं विद्याच्छुभावहम् ॥
एतन्निवेदनविधिं शृणु वक्ष्यामि सुन्दरि ।
प्रातःस्नानं च सन्ध्याऽऽदि विधाय गुरुसन्निधौ ॥
तत्समानसमीपे वा देवतानिकटेऽथवा ।
नत्वा कृताञ्जलिः सर्वं वाच्यं दृष्टवदेव हि ॥
शुभस्वप्ने पुनःस्वापो न कर्तव्यः कदाचन ॥ इति ॥

अथ पुरश्चरणे अनुष्ठीयमाने अशुभस्वप्नानि तत्रैव—

अथाशुभांस्तु स्वप्नान् वै प्रवक्ष्यामि शृणु प्रिये ।
काककङ्कोलूकगृध्रान् खरमार्जारमाहिषान् ॥
चण्डाळं कृष्णपुरुषं स्त्रियं वा विकटां तथा ।
शून्यगर्तं शुष्कवृक्षं नदीपुष्करवापिकाः ॥
तैलाभ्यङ्गं कण्टकयुग्वृक्षं प्रासादभञ्जनम् ।
उन्मत्ततां नग्नतां च भीततां स्वात्मनस्तथा ॥
सङ्कटेन समायोगं पश्यन् शान्तिं समाचरेत् ॥ इति ॥

अशुभस्वप्नशान्तिः

एवं अशुभे शान्तिरुक्ता तत्रैव—

दर्शने चाशुभस्याथ शान्तिं वक्ष्यामि संशृणु ।
मन्त्रराजं पठित्वा तु नृसिंहं प्रार्थ्य वै जपेत् ॥
नृसिंहबीजं देवेशि शुचिर्भूत्वा ह्युदङ्मुखः ।

प्रथमं मन्त्रराजजपः, ततः—

नृसिंहाय नमो दोषान् जहि दुःस्वप्नजान् मम ।
यतः स्वप्नाधिपस्त्वं वै सर्वेषां फलदो मतः ॥

अनेन प्रार्थनं, ततो नृसिंहबीजजपः। मन्त्रराजः कः? नृसिंहबीजं किम्? इति। तदुक्तं तन्त्रे ऊर्ध्वाम्नाये—

उग्रं वीरं चाथ महाविष्णुं चाथ ज्वलं च तम्।
सर्वतश्च मुखं पश्चात् नृसिंहं भीषणं तथा॥
भद्रं वै मृत्युमृत्युं वै नमाम्यहं रदनाक्षरः।
मन्त्रराज इति ख्यातः सर्वत्रायं सुगोपितः॥
नृसिंहबीजं देवेशि वक्ष्यामि प्राणवल्लभे॥
पृथ्वी स्पर्शयुता ज्वाला बिन्द्वाढ्येति समीरितम्॥ इति॥

नृसिंहमन्त्रोद्धारे च अथ पश्चात् तथा वै इत्यपहाय द्वात्रिंशदक्षरो मन्त्रः। पृथ्वी-क्ष, स्पर्शः-र, ज्वाला-औ, बिन्दुयोगे-क्ष्रौं इति ज्ञेयम्। अथ स्वप्नफलकालेयत्ता तत्रैव—

वर्षेण च तदर्धेन तदर्धेन च मासतः।
आद्ययामादितो ज्ञेयं फलं यामचतुष्टये॥ इति॥

मन्त्रजापिशयनधर्माः

जपस्थाने शयनं कर्तव्यमित्युक्तम्। तत्र धर्माः—

भुक्त्वैव तु जपस्थानसमीपे शयनं चरेत्।
मूलेन सप्ताभिमन्त्र्य प्रार्थयेत् देवतागणम्॥

अत्र शयनं आस्तरणं तदभिमन्त्रणं मूलेन—

अत्र देवास्त्रयस्त्रिंशदाशापाला मरुद्गणाः।
रक्षन्तु मां मन्त्रसिद्ध्यै यतन्तं विबुधेश्वराः॥
महाविद्यासाधकस्य भूतबेताळकादयः।
विघ्नं कुर्वन्ति सततं तेभ्यो रक्षतु मां शिवः॥
भैरवा मातृसहिताः कोटिशः संचरन्ति वै।
सिद्धिनाशाय लोकस्य तेभ्यो रक्षतु शंकरः॥
सुप्तं सर्पादिरूपेण साधकं भीषयन्ति वै।
सिद्धिलोपाय देवाद्याः शूलपाणिस्ततोऽवतु॥

अनन्तमूर्ध्नि देव्येषा धरा यस्मात् प्रतिष्ठिता ।
तेन सत्येनावतु मामनन्तः [1]सर्वरक्षकः ॥
नमः स्वप्नाधिपतये रुद्रायामिततेजसे ।
इष्टार्थान् सम्यगाचक्ष्व नाशयानिष्टसूचकान् ॥
रुद्रमन्त्रं त्रिधा जप्त्वा विन्यस्याङ्गेषु सुस्वपेत् ॥ इति ॥

रुद्रमन्त्रोऽपि तत्रैवोक्तः—

तारश्च हृदयं वै च स्वप्नाधिपतये ततः ।
रुद्राय हृदयं मूर्ध्ना नृपवर्णः स्मृतो मनुः ॥ इति ॥

"ॐ नमः स्वप्नाधिपतये रुद्राय नमः स्वाहा" इति षोडशाक्षरो मन्त्रः ॥

हविष्यपदार्थगणनम्

पूर्वं हविष्याशननियम उक्तः । तत्र हविष्याणि तन्त्रे—

व्रीहिजास्तण्डुलाश्चैव यवाः कृष्णतिलास्तथा ।
मुद्गा नीवारकाश्चापि षाष्टिकाश्च महेश्वरि ॥
सैन्धवं चापि सामुद्रं लवणं द्विविधं स्मृतम् ।
गव्यं घृतं पयश्चैव दधि निस्सृतसारकम् ॥
ऐक्षवं सर्वमेव स्यात् गुडवर्जं महेश्वरि ।
फलं तु नारिकेळं स्यात् कदळी लवली तथा ॥
तिन्त्रिण्याम्रफलं तद्वत् दाडिमस्य फलं तथा ।
आर्द्रकं नागरं धात्री तथैव च हरीतकी ॥
पटोलं वास्तुशाकं च कन्दं स्यात्तु पवित्रकम् ।
निवेदितं तथाऽन्यद्वा चार्थप्राप्तं न सन्त्यजेत् ॥ इति ॥

वास्तुशाकं महाराष्ट्रभाषया चाकवत् इति प्रसिद्धम् । कन्दे अन्यस्मिंश्च पवित्रकमित्य-स्यान्वयः । तथा च, पवित्रं कन्दं, उक्तादन्यत् यत् पवित्रं अनिच्छया प्राप्तं तदपि हविष्ये ग्राह्यमिति भावः ॥

[1] सर्वभक्ष—श्री. अ.

जपकालिकनैमित्तिकक्रियाः

अथ जपप्रारम्भानन्तरं निमित्ते सति नैमित्तिकाः याः क्रियाः सन्ति ता यथा—

उद्गारजृम्भाहिक्कानां जपमध्ये तु संभवे ।
जपेच्चतुस्तारकं तु प्राणायाममथापि वा ॥
निद्राऽपानोद्गारयोगे तन्मालां तु परित्यजेत् ।
आचम्य विन्यसेदङ्गं मालास्रंसे तु निद्रया ॥
जपेदष्टोत्तरशतं तदा त्रोटे सहस्रकम् ।
आजानुकूर्परान्तं तु प्रक्षाळ्य करपादयोः ॥
कृत्वाऽऽचमनकं देवि त्रिधा प्राणस्य धारणम् ।
मूत्रोत्सर्गे मलोत्सर्गे स्नानं चापि विधीयते ॥
विस्मृतौ जपसङ्ख्यायाः पुनरारम्भ एव च ॥ इति ॥

मूत्रोत्सर्गे प्राणायामान्तं मलोत्सर्गे तावत् स्नानं चेति तात्पर्यम् । अथासने विशेष उच्यते । तदुक्तं योगिनीतन्त्रे—

छिद्रयुक्तानि दग्धानि जीर्णानि स्फुटितानि च ।
परकीयान्यासनानि वर्जयेत् जपकर्मणि ॥
हरिणव्याघ्रयोश्चर्म कुशवेत्रभवं कटम् ।
कार्पासपट्टोर्णवस्त्रमच्छिद्रास्फुटितं भवेत् ॥
त्रयं वा द्वयमेकं वा भिन्नजातीयकं स्मृतम् ॥ इति ॥

एवमन्येऽपि धर्माः अनुष्ठितुं समर्थेन परमानन्दतन्त्रात् अवगन्तव्याः ॥

एतद्धर्माणां श्रीविद्यापुरश्चरणेऽपि ग्राह्यत्वम्

इत्थं वाराहीपुरश्चरणपदेन सूचिता धर्मा निरूपिताः । श्रीविद्याया अपि पुरश्चरणे इमान् धर्मान् गृहीत्वा श्रेयस्कामोऽनुतिष्ठेत्, पुरश्चरणस्य पूजादिप्रयोगबहिर्भूतस्यासूचितस्यापि सहस्रनामपाठादिवत् श्रेयस्कामेन गृहीतुं शक्यत्वात्. "तथाऽन्येष्वतिदूषितं" इति [1]त्रिपुराणववचनाच्च । किंच

[1] त्रिपुरारहस्यवचनोदाहरणरूपत्वाच्च--अ, ब २.

चरमखण्डे श्रीविद्याजपकालस्य प्राह्ण इत्यनेनोक्तत्वाच्च सूत्रकाराभिमतं पुरश्चरणमिति ज्ञायते ॥

कादिहादिभेदेन श्रीविद्योपास्तिभेदः

तत्र श्रीविद्योपास्तिः कादिहादिभेदेन द्विधा । तत्र हादिविद्योपास्तिः लक्षसङ्ख्याजपरूपा, श्रीचक्रसंहितायां हादिविद्यामुद्धृत्य—

लक्षमेकमिदं जप्त्वा सर्वपापहरो भवेत् ।

इत्युक्तत्वात् । कादिविद्यायास्तु लक्षं त्रिलक्षं नवलक्षं इति त्रिप्रकारं शास्त्रमुपलभ्यते । एकलक्षसङ्ख्या परमानन्दतन्त्रे—

तत्र स्थित्वा जपेल्लक्षं हविष्याशी समाहितः ।
मन्त्रसाधनकामस्तु . . . . इति ॥

त्रिलक्षजपस्तु ज्ञानार्णवे—

तदा लक्षत्रयं साधुः सर्वपापनिकृन्तनम् ।
एवं लक्षत्रयं जप्त्वा व्रतस्थः स्वस्थमानसः ॥
संक्षोभयति भूलोकस्वर्लोकतलवासिनः ॥ इति ॥

दक्षिणामूर्तिसंहितायाम्—

लक्षमात्रं जपेत् देवि नियतः संयतेन्द्रियः ।
तद्दशांशेन होमः स्यात् कुसुमैर्ब्रह्मवृक्षजैः ॥ इति ॥

नवलक्षजपोऽपि तत्रैव—

अथवा नवलक्षं तु जपेद्विद्यां समाहितः ।
क्षोभयेत् स्वर्गभूलोकपाताळतलवासिनः ॥ इति ॥

अत्रेयं व्यवस्था । केवलं मन्त्रसिद्धिकामस्य लक्षात्मकमेव पुरश्चरणम्, पूर्ववचने "मन्त्रसाधनकामस्तु" इति श्रवणात् । सर्वक्षोभणकामः त्रिलक्षं, पूर्ववचनेन "संक्षोभयति भूलोक" इति श्रवणात् । अत एव ज्ञानार्णवे—

तृतीयलक्षे संप्राप्ते द्रावयन्ति सुराङ्गनाः ॥ इत्युक्तम् ॥

स्वर्गभूपाताळादिवासिलोकवशीकरणकामो नवलक्षं, पूर्ववचने तथा श्रुतत्वात् । इत्थं च एकलक्षात्मकं मन्त्रसिद्ध्यर्थं पुरश्चरणं विधाय मन्त्रसिद्धिं संपाद्य पश्चात् तत्तत्कामनायां सत्यां तत्तत्संख्याकं कुर्यात् । अत एव ज्ञानार्णवे एकलक्षमारभ्य नवलक्षपर्यन्तं एकद्वित्र्यादिलक्षसंख्यानां फलं पृथगेवोक्तम् । ग्रन्थविस्तरभयात् न लिखितम् ॥

पञ्चदश्यादिविद्यासु मन्त्रशोधनानपेक्षा

यद्यपि सिद्धारिचक्रादिमन्त्रशोधने[नं] तन्त्रान्तरे बहुशोऽस्ति, तथाऽपि—

नृसिंहार्कवराहाणां प्रासादप्रणवस्य च ।
सपिण्डाक्षरमन्त्राणां सिद्धादीन् [1]नैव शोधयेत् ॥

इति सौरतन्त्रे । डामरे—

पञ्चदशीं षोडशीं च तथा सर्वाङ्गसुन्दरीम् ।
चण्डालेभ्योऽपि गृह्णीयात् यदि भाग्येन लभ्यते ॥
न शुद्धिं चिन्तयेदत्र भावशुद्धेर्हि शुद्धता ।
नात्र शुद्ध्याद्यपेक्षाऽस्ति [2]नारिमित्रादिशोधनम् ॥ इति ॥

तन्त्रराजे च—

नित्यानां त्रैपुराणां च नावेक्ष्यास्त्वंशकादयः ॥ इति ॥

प्रकृते तद्विचारस्याप्रयोजकत्वात् न लिखितम् ॥

इयं पूर्वोक्तसङ्ख्या पुरश्चरणे कृतयुगे । "कलौ चतुर्गुणं प्रोक्तं" इति वचनात् कलियुगे चतुर्गुणम् । इत्यलं पल्लवितेन ॥ ३७ ॥

पूजाशेषकृत्यम्

एवं प्रसंगात् पुरश्चरणमुक्त्वा पूजाशेषकृत्यमाह—

[1] न विचारयेत्—ब२.

[2] नचामित्रादिदूषणम्—अ, ब२.

ततश्च पूजितां देवीमात्मनि योजयित्वा स्वैरं विहरन्नाज्ञासिद्धः सुखी विहरेत् इति शिवम् ॥ ३८ ॥

इति . . . कल्पसूत्रे वाराहीक्रमो नाम सप्तमः खण्डः

ततः जपानन्तरं पूजितां चक्रे पूजितां आत्मनि हृदयकमले योजयित्वा स्थापयित्वा स्वैरं स्वेच्छया विहरन् गच्छन् आज्ञायाः सिद्धिः फलवत्ता यस्यैतादृशः अप्रतिहताज्ञ इत्यर्थः । सुखी अपरिच्छिन्नसुखः । शिवमिति व्याख्यातं प्राक् ॥ ३८ ॥

इति . . . कल्पसूत्रवृत्तौ वाराहीक्रमो नाम सप्तमः खण्डः

अष्टमः खण्डः—परा-क्रमः

सृष्टिस्थितिलयकृद्भिः नयनाम्भोजैः शशीनदहनाख्यैः ।
मौक्तिकताटङ्काभ्यां मण्डितमुखमण्डलां परां नौमि ॥

पराया उपास्यत्वम्

अथ परा-क्रमं वक्तुमुपक्रमते—

इति विधिवत्कृतवार्ताळीवरिवस्यः सिंहासन-विद्याहृदयमनुत्तरं पराबीजरूपं धाम तत्क्रमपूर्वं विमृशेत् ॥ १ ॥

कृतवार्ताळीवरिवस्य इत्यनेन वार्ताळीक्रमसमाप्त्युत्तरकालोऽङ्गत्वेन सूचितः । सिंहासनं सिंहासनस्वामिपरम्, तद्रूपा या विद्या सा त्रिपुरसुन्दरी ललिता, तस्याः हृदयं हृदयरूपम् । क्वचित् सिंहासनीविद्या इति पाठः । तत्पक्षे सुगमम् । न विद्यते उत्तरं श्रेष्ठं यस्मात् तत् अनुत्तरं पराबीजं सौः तद्रूपं, देवतामन्त्रयोः अभेदात् तद्रूपत्वं युक्तम् । धाम तेजः । तत्क्रमः पूर्वं यस्येति क्रियाविशेषणम् । विमृशेत उपासनां कुर्यात ॥ १ ॥

अस्या उपासने हेतुमाह—

प्रभुहृदयज्ञातुः पदेपदे सुखानि भवन्ति ॥ २ ॥

अस्याः श्रीललिताहृदयरूपत्वात् एतदुपासनेन तत्प्रीतौ संपादितायां प्रधानदेवीप्रीतिसंपादनं सुगममिति ध्वनितम् ॥ २ ॥

परापद्धतिप्रारम्भः

अस्याः क्रमव्याख्यानं प्रतिजानीते—

अथोऽनुत्तरपद्धतिं व्याख्यास्यामः ॥ ३ ॥

अथो इति समुच्चयार्थो निपातः । अग्रिमवर्णे पूर्वरूपमार्षम् ॥ ३ ॥

उषःकृत्यम्

कल्ये समुत्थाय ब्रह्मकोटरवर्तिनि सहस्रदळकमले सन्निविष्टायाः सौवर्णरूपायाः परायाश्चरणयुगळ-विगळदमृतरसविसरपरिप्लुतं वपुः ध्यात्वा ॥ ४ ॥

कल्ये उषसि । "प्रत्यूषोऽहर्मुखं कल्यं" इत्यमरः । ब्रह्मकोटरं ब्रह्मबिलम् । सौवर्णरूपाया इति—सुवर्णस्येदं सौवर्णं पीतं इत्यर्थः । सौवर्णं रूपं यस्याः तस्याः । विगळत् प्रस्रवत् अमृतरसः अमृतसारं तस्य यो विसरः व्याप्तिः तेन परिप्लुतं स्नातं ध्यात्वा । इति ब्राह्ममुहूर्तकृत्यम् ॥ ४ ॥

स्नानादिकृत्यम्

अथ स्नानादिकृत्यमाह—

स्नातः शुचिवासो वसानः [1]सौः वर्णेन त्रिराचम्य द्विः परिमृज्य सकृदुपस्पृश्य चक्षुषी नासिके श्रोत्रे अंसे नाभिं हृदयं शिरश्चावमृश्य एवं त्रिराचम्य ॥ ५ ॥

[1] सौवर्णेन—व२.

स्नात इति नाम्ना श्रीक्रमोक्तस्नानधर्मातिदेशः । अत्र मूलस्थाने प्रकृतमूलम् । एतावान् विशेषः । अथाचमनमाह—त्रिराचम्य त्रिवारं सौः वर्णेन एकैकवारमभिमन्त्रितजलपानं कृत्वेत्यर्थः । सौः वर्णस्य तृतीयाश्रुत्या आचमनाङ्गत्वे सिद्धे "प्रतिप्रधानमङ्गावृत्तिः" इति न्यायेन मन्त्रावृत्तिर्लभ्यते । एवमेव द्विः परिमृज्य इत्यादिषु सर्वत्र मूलेनेत्यस्यानुषज्यान्वयः, योग्यत्वात् । द्विः परिमार्जनं ओष्ठयोः, ब्रह्मयज्ञप्रकरणे तथा दृष्टत्वात् । तथा सकृदुपस्पृश्य इत्यत्रापि जलमिति, ब्रह्मयज्ञे दर्शनात् । अवमृश्य स्पृष्ट्वा । एवं त्रिराचम्येति अवमृश्येत्यन्तं क्रियाकलापः आचमनमेकम् । अस्मिन् तन्त्रे यत्राचमनं तत्रेत्थं कार्यम् । तत्तत्प्रकरणे तत्तन्मूलमात्रयोजनं विशेषः । न तु तन्त्रान्तरस्थं, विप्रकर्षात् । प्रकृते अस्यैवाचमनस्य त्रिरभ्यासो विधीयते ॥ ५ ॥

आसनविधिः

अथासनविधिमाह—

ऊर्णामृदु शुचितममासनं सौवर्णसूर्यजपाभिमन्त्रितं मूलमन्त्रोक्षितमधिष्ठाय ॥ ६ ॥

ऊर्णा एडकलोमविकारः । मृदुत्वविधानात् दृष्टं फलं स्वस्थान्तःकरणं कठिनसंयोगाभावेन । सौवर्णः तद्युक्तो यः सूर्यः विसर्गः सौः । विसर्गस्य सूर्यपदवाच्यत्वे प्रमाणं देवीभागवते बालामन्त्रवासनाकथनावसरोक्तं—

बिन्दुद्वयं हिमांशुः स्यात् विसर्गस्तरणिस्तथा ।

इति वाक्यं ज्ञेयम् । सौः अनेनाभिमन्त्रितं मूलेन तेनैवोक्षितं आसनं इति शेषः । अधिष्ठाय स्थित्वा ॥

एतेन निबन्धे सूर्यशब्दस्य सङ्ख्यावाचकत्वमङ्गीकृत्य मूलमन्त्रेण द्वादशवारमभिमन्त्रितेनेति लेखः परास्तः; विसर्गप्रापकपदाभावेन निबन्धे विसर्गान्तपाठस्य सन्दर्भविरोधात् । व्याख्यानसमये नानादेशसमुद्भवानि षोडशसङ्ख्याकानि पुस्तकानि संपादितानि । एकस्मिन्नपि पुस्तके विसर्गान्तपाठाभावात् तथा पाठप्रतिपादनमप्यशुद्धम् ॥ ६ ॥

देशिकयजनम्

उदग्वदनो मौनी भूषितविग्रहो मूलपूर्वेण देशिकमनुना मस्तके देशिकमिष्ट्वा ॥ ७ ॥

उदग्वदन इति पराप्रकरणे नियमविधिः । भूषितविग्रहः वस्त्रभूषणादिभिः । मूलं पूर्वं यस्य ईदृशेन देशिकमनुना दीक्षाप्रकरणस्थगुरुपादुकामन्त्रेण देशिकं गुरुम् ॥ ७ ॥

विघ्नोत्सारणम्

वामपार्ष्णिघातैः छोटिकात्रयेण च पाताळादिगतान् भेदावभासिनो विघ्नानुत्सार्य ॥ ८ ॥

वामपार्ष्णिघातैः वामपादपृष्ठभागघातैः । बहुवचनेन त्रित्वमेव प्रथमोपस्थितं बुध्यते । छोटिका अङ्गुलिद्वयसंयोगजनितो ध्वनिः तासां च त्रयेण । पाताळादिपदेन अन्तरिक्षस्य दिवश्च परिग्रहः, चकारस्वारस्यात् । पाताळादित्रये अभिघातछोटिकयोः प्रत्येकमन्वयः । अनुक्तास्त्रग्रहणं वा । उत्सार्य दूरीकृत्य ॥ ८ ॥

अङ्गन्यासः

शिरोमुखहृन्मूलसर्वाङ्गेषु मूलं विन्यस्य ॥ ९ ॥

अत्र शिरोमुखादिषु प्रत्यवयवं मूलावृत्तिः, सर्वाङ्गे सकृत् । मूले मूलाधारे । पराप्रकरणे एतावानेव न्यासः, अधिकानुक्तेः ॥ ९ ॥

चिदग्नौ सर्वतत्त्वविलापनम्

काकचञ्चूपुटाकृतिना मुखेन संचोष्यानिलं सप्तविंशतिशो मूलं जप्त्वा वेद्यं नाभौ संमुद्रय पुनः सप्तविंशतिशो जप्त्वा अङ्गुष्ठेन शिखां बद्ध्वा

पुनरनिलमापूर्य तेन मूले चिदग्निमुत्थाप्य तत्र वेद्यस्य विलयं विभाव्य ॥ १० ॥

काकचञ्चूपुटं काकमुखाग्रं तत्समाकृतिना स्वमुखेन सङ्कोच्य निरु सम्यग्बाह्यवायुमन्तर्नीत्वा । वेद्यम् षट्त्रिंशत्तत्त्वानि वक्ष्यमाणानि संमुद्रच्य एकीकृत्य । अङ्गुष्ठेन तन्मन्त्रेण नम इत्यनेनेत्यर्थः । विलयमिति घनघृतं अग्निसंयोगेन द्रवीभूतम् । यद्यपि लयशब्दः नाशः, तथाऽपि 'वि' इत्युपसर्गेण द्रवत्वं अर्थः, "आज्यं विलाप्य" इति प्रयोगात्, "तप्तायोद्रववत्" इत्यग्रिमसूत्रानुरोधाच्च ॥ १० ॥

अर्घ्यसादनम्

अथार्घ्यसादनमाह—

गोमयेनोपलिप्तचतुरश्रभूतले प्रवहत्पार्श्वकरकृतया मत्स्यमुद्रया दिव्यगन्धाम्बुयुतया भूव्योमवायुवह्निमण्डलानि कृत्वा ॥ ११ ॥

प्रवहत्पार्श्वेति—येन नासापुटेन वायुर्वहति तत्पार्श्वकरमधः कृत्वा रचितमत्स्यमुद्रयेत्यर्थः । दिव्यः श्रेष्ठः । भूमण्डलं चतुरश्रं, श्रीयन्त्रलेखने चतुरश्रं भूबिम्बं क्षोणीपुरमिति भूरिप्रयोगात् । व्योममण्डलं वृत्तं, शून्यात्मकवृत्ते ज्योतिश्शास्त्रादौ सङ्ख्यासङ्केते आकाशशब्दस्य भूरिप्रयोगात्, शून्यस्य वृत्तरूपत्वात् । वायुमण्डलं षट्कोणं, तन्त्रसारे भूशुद्धिप्रकरणे—

धूम्रवर्णं ततो वायुबीजं षड्बिन्दुलाञ्छितम् ।
षट्कोणं . . . .

इति विशुद्धेश्वरतन्त्रवचनस्योदाहृतत्वात् । वह्निमण्डलं त्रिकोणम् "रक्तवर्णं वह्निबीजं त्रिकोणकं" इति तत्रैव सत्त्वात् । इत्थं च चतुरश्रवृत्तषट्कोणत्रिकोणानीत्यर्थः ॥ ११ ॥

ततः शेषधर्मानतिदिशति—

श्यामावत् सामान्यविशेषार्घ्ये सादयेत् ॥ १२ ॥

परामन्त्रेषु योजनीयो बीजविशेषः

पराक्रमे सर्वमन्त्रेषु बीजविशेषयोगमाह—

सर्वेऽपि पराक्रममनवः [1]सौः वर्णपूर्वाः कार्याः ॥ १३ ॥

षडङ्गन्यासविशेषः

विशेषार्घ्ये श्यामातो योऽधिकांशः तमाह—

भृगुचतुर्दशषोडशाद्विरावृत्त्या वर्णषडङ्गं सर्वमूल-षडावृत्त्या मन्त्रषडङ्गं च कृत्वा ॥ १४ ॥

भृगुः सकारः, चतुर्दशः औकारः षोडशो विसर्गः, एतेषां प्रत्येकं द्विरावृत्त्या हृदयादिषडङ्गं कुर्यात्। अयं वर्णषडङ्गन्यासः। बिन्दुयोगश्च, शिष्टसंप्रदायात्। मन्त्रस्वरूपं—सं हृदयाय नमः। औं शिरसे स्वाहा। अः शिखायै वषट्, विसर्गस्य केवलस्यानुच्चार्यत्वात्। एवमग्रेऽपि। इति मूलवर्णषडङ्गन्यासः। विशेषार्घ्ये अग्रे सुधादेवीमभ्यर्च्येति तस्यैव संस्कारश्रवणात् तत्रैव विशेषः। मूलेन पुनः षडङ्गन्यासमाह—सर्वमूलेति ॥ १४ ॥

षडङ्गदेवीपूजा

न्यस्तानां षडङ्गदेवीनां पूजामाह—

उभाभ्यामर्चयित्वा ॥ १५ ॥

मूलवर्णमूलाभ्यामित्यर्थः ॥ १५ ॥

सुधादेवीपूजा

अथ सुधादेवीपूजामाह—

मूलमुच्चार्य तां चिन्मयीमानन्दलक्षणाममृतकलशपिशितहस्तद्वयां प्रसन्नां देवीं पूजयामि नमः

[1] सोवर्ण—ब२.

स्वाहा इति सुधादेवीमभ्यर्च्य तया संप्रोक्ष्य वरिवस्यावस्तूनि ॥ १६ ॥

मूलमुच्चार्येति। तया सुधादेव्या वरिवस्यावस्तूनि पूजाद्रव्याणि॥ १६ ॥

तत्त्वकदम्बस्य हृत्पद्मानयनम्

पूर्वं नाभौ संमुद्रितं चिदग्निविलीनं तप्तायोद्रववत् षट्त्रिंशत्तत्त्वकदम्बकं हृत्सरोजे समानीय ॥ १७ ॥

पूर्वं, पात्रसादनात् पूर्वमित्यर्थः। तप्तायोद्रववत् तप्तसुवर्णरसवत्, वेदे निघण्टौ सुवर्णपर्याये अयःपदसत्त्वात् प्रकृतायःपदमपि सुवर्णवाचकम्। इत्थं च पूर्वं नाभौ षट्त्रिंशत्तत्त्वानि एकीकृत्य चिदग्निना द्रवीभावः संपादितोऽस्ति,ताननूद्य हृदये तद्रसस्य समानयनं विधीयते ॥ १७ ॥

पराचक्रनिर्माणम्

अथ पराचक्रं वक्तुं प्रक्रमते—

मूलजप्तैः कुसुमक्षेपैः[1] वक्ष्यमाणैश्च मन्त्रैरासनक्लृप्तिं कुर्यात्—मूलादियोगपीठाय नम इत्यन्तानि तानि च पृथिव्यप्तेजोवाय्वाकाशगन्धरसरूपस्पर्शशब्दोपस्थपायुपादपाणिवाग्घ्राणजिह्वाचक्षुस्त्वक्छ्रोत्राहङ्कारबुद्धिमनःप्रकृतिपुरुषनियतिकालरागकलाविद्यामायाशुद्धविद्येश्वरसदाशिवशक्तिशिवाः। एवं पराचक्रं कृत्वा ॥ १८ ॥

[1] माक्षतैः—श्री.

प्रथमं केवलमूलेनैकवारं कुसुमक्षेपः । ततो वक्ष्यमाणैकैकतत्त्वमन्त्रेण । मूलादिना योगपीठाय नमः इत्यन्तेनैकवारं कुसुमाक्षतक्षेपः वक्ष्यमाणैर्मन्त्रैः । यथा तत्र तत्त्वमन्त्रस्वरूपं—पृथिवी योगपीठाय नमः इति । एवं शिवान्तेषु योज्यम् । एवं हृदये षट्त्रिंशद्वारं मूलेन निरुक्तषट्त्रिंशत्तत्त्वमन्त्रैश्च कुसुमानां प्रक्षेप एव पराचक्रनिर्मितिः इति भावः । तानि चेत्यत्र लिङ्गव्यत्यय आर्षः । षट्त्रिंशत्तत्त्वान्याह—पृथिवीति शिवा इत्यन्तेन । यद्यपि तन्त्रान्तरे शिवादिपृथिव्यन्तक्रमस्तत्त्वानामस्ति, तथाऽपि प्रकृते अनेनैव क्रमेण मन्त्रैः पुष्पक्षेपोऽपूर्वसाधनमिति विपरीतपाठः । तत्त्वस्वरूपं व्याख्यातं प्राक् ॥ १८ ॥

देव्या आवाहनम्

कल्पितचक्रे आवाहनमाह—

तत्रैतदैक्यविमर्शरूपिणीं षोडशकलां परां देवीमावाह्य ॥ १९ ॥

एतेषां तत्त्वानां य ऐक्यविमर्शः ऐक्यप्रकाशशक्तिः तद्रूपिणीं आवाहयेत् । अन्यत् स्पष्टम् ॥ १९ ॥

देवीध्यानम्

एवमावाहनमुक्त्वा आवाहिताया ध्यानप्रकारमाह—

अकलङ्कशशाङ्काभा त्र्यक्षा चन्द्रकलावती ।
मुद्रापुस्तलसद्बाहुः पातु मां परमा कला ॥
इति ध्यात्वा ॥ २० ॥

अकलङ्कः कलङ्कशून्यः यः शशाङ्कः चन्द्रः तत्तुल्या भा । मुद्रा चिन्मुद्रा पुस्तं पुस्तकम् । एतेन द्विबाहुत्वं स्पष्टम् । अत्र पुस्तकं वामहस्ते, गणपतिप्रकरणलिखितयामळवचनात् । परिशेषात् मुद्रा दक्षे ॥ २० ॥

देवीपूजा

अथ पूजामाह—

मूलादिमुच्चार्य प्रकाशरूपिणी पराभट्टारिका मूलमध्यमुच्चार्य विमर्शरूपिणी पराभट्टारिका मूलान्त्यमुच्चार्य प्रकाशविमर्शरूपिणी पराभट्टारिकेति त्रिभिः देव्या मूलहृन्मुखेष्वभ्यर्च्य समस्तमुच्चार्य महाप्रकाशविमर्शरूपिणी पराभट्टारिकेति दशवारमवमृश्य तामेव देवीं कालाग्निकोटिदीप्तां ध्यात्वा ॥ २१ ॥

मूलादिं सकारम् । तत्र बिन्दुयोगोऽपि । एवं मूलद्वितीयं औं । तृतीयं अः । मन्त्रस्वरूपं तु—सं प्रकाशरूपिणीपराभट्टारिकाश्री° । एवमन्यत् । देव्या मूलं मूलाधारम् । इदं पूजनं विशेषार्घ्यद्रव्येण [1]आवरणदेवतावत् स्वहृदये ज्ञेयम् । समस्तं संपूर्णं मूलमित्यर्थः । श्रीपादुकेत्यादियोजनं अत्रापि । अवमृश्य पूजयित्वा ॥ २१ ॥

देव्यामखिलतत्त्वहोमभावनम्

ततः कृत्यशेषमुपदिशति—

[2]तस्यां क्रियासमभिव्याहारेण वेद्यमखिलं हुत्वा ॥ २२ ॥

तस्यां दीप्तौ हुत्वा हुतं भावयित्वा ॥ २२ ॥

गुरवे अर्घ्यनिवेदनम्

मूलमुच्चार्य सामान्यपादुकया स्वमस्तकस्थाय गुरवे अर्घ्यं निवेद्य ॥ २३ ॥

[1] परदेवतावत्—अ, श्री.

[2] तस्याः—बर,

सामान्यपादुकया दीक्षाप्रकरणे पठितगुरुपादुकामन्त्रेण ॥ २३ ॥

चिदग्नेरुद्दीपनम्

पुनश्चिदग्निमुद्दीप्तं विभाव्य ॥ २४ ॥

उद्दीप्तं विशेषेण दीप्तं विभाव्य ॥ २४ ॥

ओघत्रयाभ्यर्चनम्

दिव्यौघं तिस्रः पादुकाः सिद्धौघं तिस्रः मानवौघमष्टावभ्यर्च्य ॥ २५ ॥

दिव्यौघसिद्धौघमानवौघानां अर्चनं आवरणदेवताऽर्चनवद्विशेषार्घ्यद्रव्येण स्वहृदय एव कार्यम् ॥ २५ ॥

दिव्यौघादीनाह—

पराभट्टारिकाऽघोरश्रीकण्ठशक्तिधरक्रोधत्र्यम्बकानन्दप्रतिभादेव्यम्बावीरसंविदानन्दमधुरादेव्यम्बाज्ञानश्रीरामयोगा इति पराक्रमपादुकाः ॥ २६ ॥

पराभट्टारिका अघोरः श्रीकण्ठः इति दिव्यौघः । शक्तिधरः क्रोधः त्र्यम्बकः इति सिद्धौघः । आनन्दः प्रतिभादेव्यम्बा वीरः संविदानन्दः मधुरादेव्यम्बा ज्ञानः श्रीरामः योगः इति मानवौघः ॥ २६ ॥

बलिनिवेदनम्

ततः कळामनुना बलिं निवेद्य ॥ २७ ॥

ततः अर्चनानन्तरम् । कळामनुना सौः इत्यनेन "पातु मां परमा कळा" इत्यत्र परायाः कळापदवाच्यत्वं निर्णीतम् । अतस्तन्मनुरसावेव भवितुमर्हति ।

बलिदाने धर्माः श्रीक्रमोक्ताः ग्राह्याः, एकदेवताकत्वेन साजात्यात् । अत्र जपस्य उपासनाकालस्य वाऽनुक्तेः, अयं प्रयोगः सकृदेव । यद्वा—श्यामावार्ताळीसाहचर्यात् जपसङ्ख्या अनुक्ता तत्रत्या ग्राह्या । तावज्जपपर्यन्तमुपास्तिः । अत एवाग्रे सूत्रकारः जपकालं वक्ष्यति ॥ २७ ॥

हविश्शेषस्वीकारः

हविश्शेषमात्मसात्कुर्यात् । इति शिवम् ॥ २८ ॥

इति . . . कल्पसूत्रे परा-क्रमो नामाष्टमः खण्डः

हविश्शेषात्मसात्कारः श्रीक्रमवत् । आत्मसात्कुर्यात् इत्येवोक्त्या अत्र सामयिकाभावः सूचितः । शिवमिति व्याख्यातमेव ॥ २८ ॥

इति . . . कल्पसूत्रवृत्तौ परा-क्रमो नामाष्टमः खण्डः

नवमः खण्डः—होमविधिः

होमाधिकारः

अथ गणपतिक्रमे नित्यहोमप्रसक्तौ ललिताऽऽदिपुरश्चरणाङ्गहोमस्य अन्यत्र काम्यहोमस्य वा प्रसक्तौ तदितिकर्तव्यताज्ञानस्यावश्यकतया तदर्थं होमविधिं वक्तुमारभते—

अथ स्वेष्टमन्त्रस्य होमविधानं व्याख्यास्यामः ॥ १ ॥

अथेति पूर्वप्रक्रान्तविच्छेदद्योतकः। स्वेष्टमन्त्रस्येत्यनेन अग्रे सौरवैष्णवादि- सर्वसाधारणोपासनायाः वक्ष्यमाणत्वात् अत्रापि सर्वसाधारणो होमविधिः इति ज्ञापितः ॥ १ ॥

कुण्डस्थण्डिलनिर्माणम्

ततः तद्विधिमाह—

चतुरश्रं कुण्डमथवा हस्तायाममङ्गुष्ठोन्नतं स्थण्डिलं कृत्वा ॥ २ ॥

कुण्डमित्यनेन तन्त्रान्तरोक्तमेखलायोनिखातादिकमतिदिष्टं नाम्ना। चतुरश्रं नित्यम्। प्रजाऽऽदिकामनायां योनिकुण्डादिकमपि। सूत्रानुयायिनां न मण्डपविचारः, अनुक्तत्वात् असूचितत्वाच्च। आयामः विस्तारः ॥ २ ॥

सामान्योदकेनावोक्षणम्

सामान्यार्घ्यमुपशोध्य तेनावोक्ष्य ॥ ३ ॥

तत्तत्क्रमोक्तविधिना सामान्योदकं निर्मायेत्यर्थः। यदि पूजाऽङ्गहोमः तदा पूजायां कॢप्तेनैव कार्यसिद्धौ न निर्माणं, अन्यत्र निर्माणं इति ज्ञेयम् ॥ ३ ॥

रेखासु ब्रह्मादिदेवताऽर्चनम

प्राचीरुदीचीस्तिस्रस्तिस्रो रेखा लिखित्वा ॥ ४ ॥

प्राचीः प्रागग्राः उदीचीः उदगग्राः ॥ ४ ॥

तासु रेखासु ब्रह्मयमसोमरुद्रविष्णिवन्द्रान् षट्[1]तारीनमस्संपुटितानभ्यर्च्य ॥ ५ ॥

[1] तार—अ, श्री.

षट्तारी त्रितारीकुमारी प्रथमं, ततो ब्रह्मणे नमः इति। एवं च षट्तारनमस्संपुटिता भवन्ति। एवमेव यमायेत्यादौ योज्यम्। नमस्संपुटितान् इत्यनन्तरं पठित्वेति शेषः। अभ्यर्च्येत्यस्य कर्माकाङ्क्षायां मन्त्रलिङ्गात् देवता योज्या ॥ ५ ॥

कुण्डाभ्यर्चनम्

सहस्रार्चिषे हृदयाय नमः, स्वस्तिपूर्णाय शिरसे स्वाहा, उत्तिष्ठपुरुषाय शिखायै वषट्, धूमव्यापिने कवचाय हुं, सप्तजिह्वाय नेत्रत्रयाय वौषट्, धनुर्धराय अस्त्राय फट्, इति षडङ्गं विधाय तेन षडङ्गेन कुण्डमभ्यर्च्य ॥ ६ ॥

उक्तषण्मन्त्रैः स्वदेहे हृदयादिषडङ्गन्यासानन्तरं कुण्डे तैरेव मन्त्रैः अग्नीशासुरवायुषु मध्ये दिक्षु च षडङ्गयुवतीः पूजयेत् ॥ ६ ॥

अग्निचक्रनिर्माणादि

ततः अग्निचक्रनिर्माणादिकमाह—

तत्राष्टकोणषट्कोणत्रिकोणात्मकं अग्निचक्रं विलिख्य पीतायै श्वेतायै अरुणायै कृष्णायै धूम्रायै तीव्रायै स्फुलिङ्गिन्यै रुचिरायै ज्वालिन्यै नम इति त्रिकोणमध्ये वह्नेः पीठशक्तीः संपूज्य तं तमसे रं रजसे सं सत्त्वाय आं आत्मने अं अन्तरात्मने पं परमात्मने ह्रीं ज्ञानात्मने नमः इति तत्रैवाभ्यर्चयेत् ॥

कुण्डे स्थण्डिले वा अष्टकोणादिनिर्माणं प्रवेशरीत्या कार्यम्, त्रिकोणस्याभ्यन्तरे भूरि दर्शनात्। पीताया इत्यादि ज्ञानात्मने नमः इत्यन्तं स्पष्टम्। तत्रैव त्रिकोण एव। क्रमस्तु स्वाग्रादिप्रादक्षिण्येन ॥ ७ ॥

वागीश्वरीवागीश्वरपूजा

एवं पीठशक्तिपूजामुक्त्वा ततः अग्निप्रतिष्ठामुपदिशति—

ततो जनिष्यमाणवह्नेः पितरौ वागीश्वरीवागीश्वरौ पीठेऽभ्यर्च्य तयोर्मिथुनीभावं भावयित्वा ह्रीं वागीश्वरीवागीश्वराभ्यां नमः इति ध्यात्वा ॥ ८ ॥

पीठे त्रिकोणात्मके अभ्यर्चितदेवताविशिष्टे। तयोः वागीश्वरीवागीश्वरयोः मिथुनीभावं मैथुनकर्म मनसा भावयित्वा। ध्यात्वेति ध्यानं कामेश्वरीकामेश्वरवत्, तदभिन्नत्वात् ॥ ८ ॥

संविदग्निपातनम्

अरणेः सूर्यकान्तात् द्विजगृहाद्वा वह्निमुत्पाद्य मृत्पात्रे ताम्रपात्रे वा आग्नेय्यामैशान्यां नैर्ऋत्यां वा निधाय अग्निशकलं क्रव्यादांशं नैर्ऋत्यां विसार्य निरीक्षणप्रोक्षणताडनावकुण्ठनादिभिः विशोध्य ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति मूलाधारोद्गतसंविदं ललाटनेत्रद्वारा निर्गमय्य तं बाह्याग्नियुक्तं पातयेत् ॥ ९ ॥

अरणिः प्रसिद्धः। द्विजगृहे यः पचनाग्निः तस्यानयनमेव तदुत्पादनम्। पात्रनियममाह—मृत्पात्र इति। स्थापनदेशनियममाह—आग्नेय्यामिति।

क्रव्यादांशमिति अमेध्यांशं इत्यर्थः, "य एतान् क्रव्यात्तमपहत्य मेध्येऽग्नौ कपालमुपदधाति" इति श्रुतेः। विसार्य बहिर्निरस्य। निरीक्षणं स्वनेत्राभ्याम्। प्रोक्षणं सामान्यार्घ्योदकेन। ताडनं अभिघाताख्यः संयोगविशेषः। अवकुण्ठनं पूर्वदर्शितमुद्रा। आदिपदेन धेनुयोनी, स्थलान्तरे अवकुण्ठनसहपाठात्। एतैः विशोध्य संस्कृत्य। तस्मिन् पात्रे चिदग्न्याह्वानप्रकारमाह—ॐ वैश्वानरेति। ललाटनेत्रद्वारा भ्रूमध्यद्वारा निर्गमय्य निर्गमनं विभाव्य। तं चिदग्निम्। बाह्याग्नियुक्तं इत्यनेन चिदग्नेः प्राधान्यं सूचितम्, भृत्ययुक्तराजेतिवत्। पातयेत् इत्यस्मात् पूर्वं पूर्वनिर्मिताग्निचक्रे इति शेषः॥ ९॥

इन्धनैराच्छादनम्

कवचमन्त्रेण इन्धनैराच्छाद्य॥ १०॥

कवचमन्त्रेण हुं इत्यनेन॥ १०॥

उपस्थानम्

अथोपस्थानमाह—

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
सुवर्णवर्णमनलं समिद्धं विश्वतोमुखम्॥

इत्युपस्थाय॥ ११॥

उपस्थानं नाम अग्नेरपरभागे कृताञ्जलेस्तिष्ठतो मन्त्रपाठः॥ ११॥

उत्थापनम्

भूमौ मृण्मयपात्रे पूर्वं आग्नेयाद्यन्यतमदिक्षु स्थापिताग्नेः कुण्डे प्रक्षेपार्थं उत्थापने मन्त्रमाह—

उत्तिष्ठ [1]हरितपिङ्गळ लोहिताक्ष सर्वकर्माणि साधय मे देहि दापय स्वाहा इति वह्निमुत्थाप्य॥ १२॥

[1] पुरुषह—श्री.

एतेन ॐ वैश्वानरेति बहिः निर्गमय्य कुण्डे प्रक्षेपात् प्राक् अर्थक्रमेण पाठक्रमं बाधित्वा प्रयोगानुष्ठानकाले पाठः, उत्थापनस्य प्रक्षेपपूर्वकालिकत्वात् ॥ १२ ॥

प्रज्वालनम्

प्रज्वालनमन्त्रमाह—

चितिपिङ्गळ हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा इति प्रज्वाल्य ॥ १३ ॥

प्रज्वालनं वेणुधमन्या, "मुखेनाग्निं नोपधमेत्" इति स्मृतेः ॥ १३ ॥

अग्नेः पुंसवनादिसंस्काराः

उत्पन्नाग्नेः संस्कारानाह—

षट्तारवाचो नमोमन्त्रेण पुंसवनसीमन्तजातकर्मनामकरणान्नप्राशनचौळोपनयनगोदानविवाहकर्माण्यमुकाग्नेरमुकं कर्म कल्पयामि नमः इति विधाय ॥ १४ ॥

षट्तारवाचः उक्ताः । नमोमन्त्रेण नमोऽन्तमन्त्रेण । स्वयमेव नमोऽन्तमन्त्रं विवृणोति—अमुकेत्यादिना । इत्थं च प्रथमं षट्तारी ततः ऐं ततः इष्टदेवतानाम ततोऽग्निशब्दः षष्ठ्यन्तः पुंसवनादिकर्मनाम द्वितीयान्तं ततः कल्पयामीति ॥ १४ ॥

परिषेचनादि

परिषिच्य परिस्तीर्य परिधाय ॥ १५ ॥

परिषिच्य, अनुक्तत्वात् ऐशानीमारभ्य प्रदक्षिणं समन्तात् सामान्यार्घ्योदकेन । परिस्तीर्य—परिस्तरणे एकैकदिशि चत्वारो दर्भाः, "अग्निं षोडशभिर्दर्भैः

परितस्तु परिस्तरेत्" इति वचनात् । परिधाय श्रौतोक्तधर्मकसमिद्भिः प्राग्वर्जं त्रिषु । क्रमादिकं काष्ठनियमः श्रौतात् ज्ञेयः ॥ १५ ॥

अग्निध्यानम्

अथ साधिताग्नेः ध्यानमाह—

त्रिणयनमरुणजटाबद्धमौळिं सशुक्लां-
शुकमरुणमनेकाकल्पमम्भोजसंस्थम् ।
अभिमतवरशक्तिं स्वस्तिकाभीतिहस्तं
नमत कनकमालालङ्कृतांसं कृशानुम् ॥

इति ध्यात्वा ॥ १६ ॥

अग्निचक्रे देवतास्थापनम्

पूर्वकल्पिताग्निचक्राष्टकोणादिषु देवतास्थापनमाह—

अष्टकोणे जातवेदसे सप्तजिह्वाय हव्यवाहाय [1]अश्वोदराय वैश्वानराय कौमारतेजसे विश्वमुखाय देवमुखाय नम इति षट्कोणे षडङ्गं त्रिकोणे अग्निमन्त्रेण अग्निं पूजयित्वा ॥ १७ ॥

अष्टकोणे अनुक्तत्वात् प्रागादिप्रादक्षिण्यक्रमः । षट्कोणेऽपि तथैव । अग्निमन्त्रेण "अग्निं प्रज्वलितं" इत्युपस्थापनमन्त्रेण, अग्निलिङ्गस्य स्पष्टत्वात् । पूजनं च पञ्चोपचारैः मन्त्रावृत्त्या ज्ञेयम् ॥ १७ ॥

[1] अश्वोदरजाय—अ.

सप्तजिह्वाहोमः

सप्तजिह्वाऽऽहुतीराह—

हिरण्यायै कनकायै रक्तायै कृष्णायै सुप्रभायै अतिरक्तायै बहुरूपायै नमः इत्यग्नेः सप्तजिह्वासु मूलशुद्धेनाज्येन सप्ताहुतीः कुर्यात् ॥ १८ ॥

नमः इति सर्वत्रानुषज्यते । मूलशुद्धेन मूलाभिमन्त्रणेन संस्कृतेन । अभिमन्त्रणं सङ्ख्याऽनुक्तेः सकृन्मूलेन । नमः पदोत्तरं स्वाहायोगः, होमरूपत्वात्, "स्वाहा होमे तर्पणे तु तर्पयामीति योजयेत्" इति योगिनीतन्त्रवचनात् ॥ १८ ॥

अग्नेराहुतित्रयम्

कर्मशेषमुपदिशति सूत्रान्तरेण—

वैश्वानरोत्तिष्ठचित्पिङ्गलैरग्नेस्त्रिधाऽऽहुतिं विधाय ॥ १९ ॥

वैश्वानरोत्तिष्ठचित्पिङ्गलैरिति पूर्वपठितैः त्रिभिर्मन्त्रैः इत्यर्थः । त्रिधा त्रिवारम् । अनेन कर्माभ्यासो नाहुतिभेदः इति सूचितः । वैश्वानरादिमन्त्रत्रये स्वाहाकारोऽस्ति । तथाऽप्यन्यस्वाहाकारो होमकाले योज्यः । तदुक्तं शक्तिसङ्गमतन्त्रे—

> मन्त्रान्ते या वह्निजाया सा तु मन्त्रस्वरूपिणी ।
> तदन्तेऽन्यां प्रयुञ्जीत सा होमाङ्गतया मता ॥ इति ॥

अत्र मन्त्रलिङ्गेनैव देवतालाभे पुनरग्नेरिति कथनात् त्रिष्वपि होमेषु "अग्नय इदं न मम" इति त्यागं गमयति । अन्यथा "वैश्वानरायेदं न मम" इति लिङ्गेन प्राप्नुयात् ॥ १९ ॥

इष्टदेवताऽऽवाहनादि

अथेष्टदेवताऽऽवाहनमाह—

बहुरूपजिह्वायामिष्टां देवतामावाह्य पञ्चोपचारैरुपचर्य ॥ २० ॥

आवाहनं पूजाप्रकरणोक्तसरण्या । पञ्चोपचारैः गन्धादिभिः ॥ २० ॥

चक्रदेवीनामाहुतयः

सर्वासां चक्रदेवीना[1]मेकाहुतिं हुत्वा, नमोऽन्तान् पादुकाऽन्तान् [2]शेषान् मन्त्रान् स्वाहाऽन्तान् विधाय जुहुयात् ॥ २१ ॥

सर्वासामिति तत्तदावरणदेवताषडङ्गौघत्रयनित्याऽऽदीनां मध्ये यस्मिन् पूजाप्रकरणे यावत्यो विहिताः तासां सर्वासां इत्यर्थः । द्रव्यस्यानुक्तत्वादाज्यम् । नमोऽन्तानिति—ये च नमोऽन्ता मन्त्राः वाणमन्त्राः वशिन्यादिमन्त्राश्च पादुकाऽन्ता मन्त्रा गुरुपादुकामन्त्रादयः, एतदुभयभिन्नाः केवलं नाम्नैवोद्धृताः अणिमासिद्ध्यादयः [3]शेषाः एतान् सर्वान् स्वाहाऽन्तान् कृत्वा तेन होतव्यं इत्यर्थः । श्रीक्रमे पञ्चदशनित्याऽनन्तरं सर्वरोगहरचक्रे कामेश्वर्याद्यनन्तरं मूलेन पूजनवन्न होमः, तस्याः प्रधानदेवतारूपत्वेन तस्या आहुतेः वक्ष्यमाणत्वात् ॥ २१ ॥

प्रधानदेवताऽऽहुतयः

एवं अग्निसंस्कारानुक्त्वा प्रधानहोमधर्मानुपदिशति—

अथ प्रधानदेवतायै दशाहुतीर्जुहुयात् ॥ २२ ॥

अथेत्यनेन अङ्गदेवताहोमविच्छेदः सूचितः ॥

एतावत्पर्यन्तं सर्वप्रयोगसाधारणम् । पुरश्चरणाङ्गहोमः काम्यहोमो वा सर्वोऽप्येतदुत्तरं भवति ॥ २२ ॥

काम्यहोमविधिः

अथ काम्यहोमं विदधाति—

यदि काम्यमीप्सेदभीष्टदेवतायै विज्ञाप्य सङ्कल्पं कृत्वैतावत्कर्मसिद्ध्यर्थमेतावदाहुतीः करिष्यामीति ॥

[1] मेकैका—श्री. [2] अशेषान—श्री. [3] अशेषाः—श्री, ब२.

विज्ञाप्य प्रार्थ्य एतावत्कर्मसिद्ध्यर्थं अमुकफलसिद्ध्यर्थं एतावत्कर्मामुकसङ्ख्याकाहुतीः । कार्यतारतम्येन आहुतिसङ्ख्यातारतम्यं ज्ञेयम् ॥ २३ ॥

ससाधनं होमं विधत्ते—

तिलाज्यैः शान्त्या अन्नेनान्नायामृताय समिच्चूतपल्लवैर्ज्वरशमाय दूर्वाभिरायुषे कृतमालैर्धनायोत्पलैर्भोगाय बिल्वदळै राज्याय पद्मैः साम्राज्याय शुद्धलाजैः कन्यायै नन्द्यावर्तैः कवित्वाय वञ्जुळैः [1]पुष्टयै मल्लिकाजातीपुन्नागैर्भाग्याय बन्धूकजपाकिंशुकवकुळमधुकैरैश्वर्याय लवणैराकर्षणाय कदम्बैः सर्ववश्याय शालितण्डुलैर्धान्याय कुङ्कुमगोरोचनादिसुगन्धैः सौभाग्याय पलाशपुष्पैः कपिलाघृतैर्वा तेजसे धुत्तूरकुसुमैरुन्मादाय विषवृक्षैः निम्बश्लेष्मातकविभीतकसमिद्भिः शत्रुनाशाय निम्बतैलाक्तलवणैर्मारणाय काकोलूकपक्षैर्विद्वेषणाय तिलतैलाक्तमरीचैः कासश्वासनाशाय जुहुयात् ॥ २४ ॥

तिलाज्यैः तिलसहिताज्यैः । यावत्सङ्ख्याकाज्याहुतयः तावत्सङ्ख्याकतिलाहुतयः कार्याः इति निष्कर्षः । साहित्यं द्वन्द्वसमासलभ्यं ज्ञेयम् । शान्त्यै शान्तिर्नाम उत्पत्स्यमानानिष्टप्रागभावसंरक्षणम् । अन्नेनोदनेन अन्नलाभाय अमृताय मोक्षाय । समिच्चूतपल्लवैः इति तिलाज्यवत् । समिधश्च यज्ञीयवृक्षसम्बन्धिनो ग्राह्याः । दूर्वाः प्रसिद्धाः । कृतमालैः आरेवतैः, "आरेवतव्याधिघातकृतमालसुपर्णकाः" इत्यमरः । शुद्धलाजैरिति शुद्धत्वं गृहे निर्मितत्वम् । नन्द्यावर्तैः तगरैः । वञ्जुळैः चित्रकृद्भिः, "वञ्जुळश्चित्रकृच्चाथ" इत्यमरः । बन्धूको महाराष्ट्रभाषया

[1] पुष्टैर्म—अ, व२.

दुयारी इति प्रसिद्धः । किंशुकः पलाशः । अग्रे पलाशपुष्पैरिति स्वातन्त्र्येण तेजस्साधनत्वं बोध्यते । इह तु बन्धूकादिसहितस्य ऐश्वर्यसाधनत्वं इति न पुनरुक्तिः । मधुकरैरिति योगेन मधुपुष्पाणां ग्रहणम्, न तु रूढ्या भ्रमरग्रहणं, पुष्पसाहचर्यात् । विषवृक्षाः महाराष्ट्रभाषया काजा इति प्रसिद्धम् । अत्र वृक्षशब्दः तत्समिल्लक्षकः, अग्रे समित्साहचर्यात् । श्लेष्मातकः शेलुः "शेलुः श्लेष्मातकः" इति कोशात् । विभीतक; अक्षः, "त्रिलिङ्गस्तु विभीतकः । नाक्षस्तुषः कर्षफलः" इति कोशात् । द्वन्द्वसमासाभावात् विषवृक्षसमिधः निम्बादिसमिद्भिः सह विकल्प्यन्ते । शत्रुनाशकर्मणि द्वयोस्तुल्यसाधनत्वम् । शत्रुनाशोऽत्र न मरणम्, मारणप्रयोगस्य पृथग्वक्ष्यमाणत्वात्, किं तु तदीयपशुपुत्रादिनाशः । विद्वेषः स्वशत्रोर्यः प्रबलाश्रयभूतः तेन साकम् । तिलतैलाक्तेति—[1]कासश्वासः रोगविशेषः ॥

ननु किमनेन द्रव्यविशिष्टं कर्म फलाय विधीयते, उत वाक्यान्तरेण प्राप्तहोमसामान्यमनूद्य द्रव्यफलसम्बन्धो विधीयते इति चेत्—

अत्र केचित्—द्वितीयपक्ष एव युक्तः । विशिष्टविधिपक्षे षष्ठो विधिः अत्यन्तगुरुभूतः, गुणफलसम्बन्धपक्षो लघुभूतः, अन्यथा "दध्नेन्द्रियकामस्य जुहुयात्" इत्यत्रापि तथात्वापत्तेः । न च—"दध्नेन्द्रियकामस्य" इत्यत्र वाक्यान्तरेण लब्धहोमानुवादो युक्तः, इह धात्वर्थप्रापकप्रमाणान्तराभावात् कथमनुवादः—इति वाच्यम् । होमविधानं व्याख्यास्यामः इत्यधिकारात् प्रकरणेन तन्त्रशास्त्रप्राप्तपुरश्चरणाद्यङ्गभूतहोमानुवादेन गुणविधिसंभवात्—इत्याहुः ॥

तदसत् । यदि पुरश्चरणाद्यङ्गभूतहोमानुवादेन द्रव्यं फलाय विधीयते, तर्हि तत्र तद्दशांशसङ्ख्याया होमे क्लृप्तत्वेन श्रीदेवतायै विज्ञापनविधिसूत्रे "एतावदाहुतीः करिष्यामि" इति सर्वनाम्ना निर्देशो विफलः । "जपदशांशं करिष्यामि" इति वदेत् । मन्मते कार्यगौरवलाघवाभ्यां ह्रासवृद्धिसंभवात् अनियतसङ्ख्याकत्वेन सर्वनाम्ना निर्देशो युक्तः ॥

न च जपं विहाय केवलहोमो नोपलभ्यते अन्यतन्त्रेषु इति शङ्कनीयम् । अगस्त्यसंहितायां चोळराज्ञो रिपोः पाण्ड्यस्य संहारार्थं नग्नाः केवलं निम्बतैलमिश्रि-

[1] कासश्वासौ रोगविशेषौ—श्री.

तलवणहोमेन कृत्यामुत्पादयामासुः इत्यैतिह्यमस्ति । एवं तन्त्रेष्वप्युपलभ्यते । तस्मात् प्रथमपक्षो युक्तः ॥ २४ ॥

वलिदानम

अथोत्तराङ्गमाह—

बलिं प्रदाय ॥ २५ ॥

व लि दा नं तत्तत्पूजाक्रमोक्तविधिना ॥ २५ ॥

महाव्याहृतिहोमः

महाव्याहृतिहोममाह—

ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा । ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा । ॐ सुवरादित्याय च दिवे च महते च स्वाहा । ॐ भूर्भुवस्सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा । इति चतुर्भिर्मन्त्रैः महाव्याहृतिहोमं कृत्वा ॥ २६ ॥

ब्रह्मार्पणाहुतिः

ब्रह्मार्पणाहुतिमाह—

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत् कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा इति ब्रह्मार्पणाहुतिं कृत्वा ॥ २७ ॥

अग्निदेवतयोरुद्वासनम्

पूर्वावाहितचिदग्नेरावाहिताया देवतायाश्चोद्वासनमाह—

चिदग्निं देवतां चात्मन्युद्वासयामि नम इत्युद्वास्य ॥ २८ ॥

उद्वासनं खेचरीमुद्रया ॥ २८ ॥

भस्मधारणम्

भस्मधारणफलमाह—

तद्भस्मतिलकधरो लोकसम्मोहनकारः सुखी विहरेत् । इति शिवम् ॥ २९ ॥

इति . . . कल्पसूत्रे होमविधिर्नाम नवमः खण्डः

तद्भस्म अग्नेर्भस्म । अग्निविसर्जनानन्तरं परिस्तरणपरिधीनामपि विसर्गः, प्रतिपत्तिसंस्कारस्यानुक्तत्वात् । शिवमिति व्याख्यातम् ॥ २९ ॥

इति . . . कल्पसूत्रवृत्तौ होमविधिर्नाम नवमः खण्डः

दशमः खण्डः—सर्वसाधारणक्रमः

सामान्यक्रमाधिकारः

प्रथमखण्डे दीक्षाऽनन्तरं सर्वमन्त्राधिकारी भवतीत्युक्तत्वात् श्रीत्रिपुरसुन्दर्युपास्तेः निष्कामरूपतया यदा सङ्कटे कामनावशात् सूर्यविष्णुभैरवाद्युपास्तिप्रसक्तिः तदितिकर्तव्यताज्ञानार्थं तन्त्रान्तरोपास्तिं सूत्रानुयायी मा करोतु इति तदुपासनासिद्धये, किं च रश्मिमालाऽऽदिषु प्रत्येकं मन्त्राणां फलश्रवणात् तत्तत्कामनया तत्तदुपास्ति-

प्रसक्तौ, अपिच कश्चन उपासनायां श्रद्धावान् ललितोपास्तौ च अनधिकारी तस्य शिवविष्ण्वाद्युपासनां प्रवर्तयतु इति, परमकृपालुः श्रीपरशुरामः सर्वसाधारणीं उपासनासरणिं दर्शयति—

अथातः सर्वेषां मन्त्राणां सामान्यपद्धतिं व्याख्यास्यामः ॥ १ ॥

अथ त्रिपुरसुन्दर्युपास्तिप्रकारदर्शनानन्तरम् । अतः अवतरणिकायामुक्तहेतोः । सर्वेषां गणपति-ललिता-श्यामा-वार्ताळीभिन्नानां यावतां मन्त्राणाम् । सामान्यपद्धतिं साधारणसरणिम् ॥ १ ॥

श्यामाऽङ्गानां केषांचिदतिदेशः

अथ श्यामाक्रमे पठितानि कानिचिदङ्गान्यतिदिशति वचनेन—

श्यामावत् सन्ध्याऽऽद्यर्घ्यशोधनपर्यन्तं न्यासवर्जम् ॥ २ ॥

सन्ध्याऽऽदीत्यनेन सन्ध्यातः प्राक् पठितानां व्यावृत्तिः । अर्घ्यशोधनपर्यन्तं इत्यनेन तदग्रिमव्यावृत्तिः । उभयमध्यतनानां मध्ये न्यासवर्जं इत्यनेन तद्व्यावृत्तिः । अर्घ्यशोधनं इत्यविशेषोक्त्या विशेषार्घ्यशोधनान्तं कार्यम् । तेन ब्राह्मे मुहूर्ते यत् कृत्यं स्नानदन्तधावनविंशतिगण्डूषादि सर्वं निवर्तते ॥ २ ॥

सर्वसाधारणन्यासः

सर्वसाधारणन्यासमाह—

अनुक्तषडङ्गस्य षड्जातियुक्तमायया षडङ्गम् ॥ ३ ॥

अनुक्तेत्यनेन अज्ञातमप्युपलक्षणीयम् । इत्थं च यस्य मन्त्रस्य षडङ्गं उक्तम्, तेन स्वषडङ्गे श्यामाक्रमे न्याससमये न्यसेत् । यस्यानुक्तमज्ञातं वा तत्र षड्जातियुक्तमायया षडङ्गन्यासः । षड्जातिमाया च ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति क्रमेण षडङ्गेषु योज्यम् ॥ ३ ॥

चक्रनिर्माणम्

चक्रनिर्माणप्रकारमाह—

बिन्दुत्रिषडरनागदळचतुष्पत्रचतुरश्रमयं चक्रम् ॥ ४ ॥

अष्टदळं चतुर्दळं पद्मद्वयम् । शेषं स्पष्टम् ॥ ४ ॥

षडावरणीपूजा

अथावरणदेवतास्थानमाह—

बिन्दौ मुख्यदेवतेच्छाज्ञानक्रियाशक्तयस्त्र्यश्रे षडरे तत्तत्षडङ्गान्यष्टदळे ब्राह्म्याद्याः चतुर्दळे गणपतिदुर्गावटुकक्षेत्रेशाश्चतुरश्रे दिक्पालाः ॥ ५ ॥

द्वितीयावरणमाह—इच्छेति । क्रमः स्वाग्रादिप्रादक्षिण्येन । तृतीयमाह—षडर इति । क्रमः प्राक्कोणमारभ्येशानान्तम् । चतुर्थमाह—अष्टदळ इति । क्रमः पूर्ववत् । चतुर्दळे पञ्चमावरणे । क्रमः प्रागादिदिक्षु । चतुरश्रेऽपि तथैव प्रागादीशानान्तं ऊर्ध्वं अधश्च ज्ञेयम् । एवं षडावरणीपूजा ॥

यद्यपि प्रधानदेवतायाः अन्ते पूजाऽन्यत्रास्ति, तथाऽप्यत्र विपरीतं, तथा पाठात् ॥ ५ ॥

सर्वमन्त्रयोज्यबीजानि

सर्वमन्त्रेषु योज्यान् बीजानाह—

त्रितारीकुमारीभ्यां सर्वे क्रममन्त्राः प्रयोक्तव्याः ॥ ६ ॥

त्रितारी श्रीक्रमोक्ता । कुमारी बाला ॥ ६ ॥

आवाहनादिमन्त्राः

तत्तन्मूलेनावाहनं कलामनुना बलिरनेन क्रमेणाहुतिः ॥ ७ ॥

आवाहनमन्त्रमाह—त त दिति । बलिदानमन्त्रमाह—क ले ति । क ला म नुः व्याख्यातः । अत्र बलिदानं पात्रोद्वासनदेवतोद्वासनादीनामुपलक्षकम्, तेषामावश्यकत्वादनुक्तेः । अ ने न क्र मे ण उक्तक्रमेण । आ हु तिः यजनं पूजनम् । सर्वदेवानां तत्तन्मन्त्रजपः श्रीक्रमोक्तजपसमये कार्यः ॥ ७ ॥

इति सर्वसाधारणक्रमः ॥

रश्मिमालाविनियोगः

एवं सामान्यक्रममुक्त्वा पुनस्सिंहगुहाऽवलोकनन्यायेन ललिताक्रमशेषमेव वक्तुं प्रक्रमते—

अथ रश्मिमाला ॥ ८ ॥

अ थे ति पूर्वप्रकरणविच्छेदद्योतकम् । र श्मि रि ति प्रकाशापरपर्यायः । मा ले ति मन्त्रविशेषसंज्ञा । तदुक्तं नित्यातन्त्रे—

मन्त्रा एकाक्षराः पिण्डाः कर्तव्या द्व्यक्षरा मताः ।
[1]बहुवर्णं समारभ्य नवार्णावधि बीजकाः ॥
ततो दशार्णमारभ्य यावद्विंशति मन्त्रकाः ।
तत ऊर्ध्वं गता मालास्तासु भेदो न विद्यते ॥ इति ॥

इत्थं च गायत्र्यादिमहापादुकाऽन्तस्य प्रकाशकत्वात् विंशतिवर्णाधिकत्वाच्च र श्मि मा ले ति वक्ष्यमाणमन्त्रकलापसंज्ञा ॥ ८ ॥

तस्याः विनियोगं कालं चाह—

सुप्तोत्थितेनैषा मनसैकवारमावर्त्या ॥ ९ ॥

एषा रश्मिमाला सुप्तोत्थितेनेति स्वारस्यात् प्रबोधाव्यवहितोत्तरक्षण एव काल इति ज्ञाप्यते । तेन ब्रह्मरन्ध्रे गुरोर्ध्यानादिकं पूर्वोक्तं एतदुत्तरमेवेति सिद्धम् । न च—पूर्वमपि "मुहूर्ते ब्रह्मणो मुक्तस्वापः" इत्यनेन पूर्वोक्तक्रियाकलापेऽपि

[1] वर्णत्रयं—ब२.

प्रबोधाव्यवहितत्वं प्रतीयते । अन्यथा तदुत्तरं वक्ष्यमाणसंविद्ध्यानादेः निद्रासमये असंभवेनार्थसिद्धे तत्कालप्रबोधे मुक्तस्वाप इति विशेषणं व्यर्थं स्यात्—इति वाच्यम् । ब्राह्मे मुहूर्ते निद्रां रागप्राप्तां निवारयत् तच्चरितार्थम् । अत्र सुप्तोत्थितेनेति विशेषणस्य तथा गत्यभावात् उत्थानानन्तरकालाङ्गतामेव प्रतिपादयति ॥

एतेन निबन्धे व्युत्क्रमेण पाठः अप्रामाणिक एवेति सिद्धः ॥ ९ ॥

गायत्र्यादि प्रथमं रश्मिपञ्चकम्

अथ रश्मिमालासंज्ञकान् मन्त्रान् दर्शयति—

प्रणवो भूर्भुवस्सुवः—

तत्सवितुर्वरेणियं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

इति त्रिंशद्वर्णा गायत्री ॥

यत इन्द्र भयामहे ततो नो अभयं [1]कुरु ।
मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि॥
स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः ॥

इत्यैन्द्री सप्तषष्ठ्यर्णा सङ्कटे भयनाशिनी ॥

प्रणवो घृणिस्सूर्य आदित्यों इत्यष्टार्णा सौरी तेजोदा ॥

प्रणवः केवलो ब्रह्मविद्या मुक्तिदा ॥

तारः परो रजसे सावदों इति नवार्णा तुर्यगायत्री स्वैक्यविमर्शिनी ॥

[1] कृधि—श्री.

रश्मिपञ्चकमेतन्मूलहृत्फालविधिबिलद्वादशान्तबीजतया विमृष्टव्यम् ॥ १० ॥

"त्रिंशद्वर्णा गायत्री" इत्यादिभिः वक्ष्यमाणैः रश्मिमालाऽवयवमन्त्रसंज्ञा दर्शिता। ऐन्द्री इन्द्रदैवत्या। सङ्कटे दावाग्निव्याघ्रादिप्राणसङ्कटे। तेजोदा—तेजः स्वदर्शनेन परेषां स्वस्मिन् उत्कर्षप्रतिपादिका शक्तिः, तस्याः दायिनी। प्रणवः केवलः प्रणवोच्चारणमेव ब्रह्मविद्या ब्रह्मविद्याप्रतिपादिका। तारः प्रणवः। तुर्यगायत्री गायत्र्यास्तुर्यपादरूपा। तदुक्तं विश्वामित्रकल्पे—

गायत्र्यास्तुर्यपादोऽयं त्रिपदाया ह्युदाहृतः ॥ इति ॥

स्वैक्यविमर्शः आत्मरूपज्ञानं [1]तत्प्रदायिका। एतत्—तत्सवितुरिति गायत्रीमारभ्य गायत्रीतुर्यपादपर्यन्तं यत् रश्मिपञ्चकम्। रश्मीनां प्रकाशशक्तिमत्त्वात् अमीष्वपि तत्त्वे रश्मिशब्देन व्यवहारः। क्रमेण मूले मूलाधारे हृदि ललाटे विधिबिले ब्रह्मरन्ध्रे द्वादशान्ते। अयं व्याख्यातः प्राक्। विमृष्टव्यं भावयितव्यम् ॥ १० ॥

चाक्षुष्मतीविद्याऽदि द्वितीयं रश्मिपञ्चकम्

सूर्याक्षितेजसे नमः। खेचराय नमः। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय। उष्णो भगवान् शुचिरूपः। हंसो भगवान् शुचिरप्रतिरूपः ॥

विश्वरूपं घृणिनं जातवेदसं
हिरण्मयं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः
प्राणः प्रजानामुदयत्येष सूर्यः ॥

[1] तत्प्रापिका—ब२.

ॐ नमो भगवते सूर्याय अहो वाहिनि वाहिन्यहो वाहिनि वाहिनि स्वाहा ॥

वयस्सुपर्णा उपसेदुरिन्द्रं
प्रियमेधा ऋषयो नाथमानाः ।
अपध्वान्तमूर्णुहि पूर्धि चक्षु-
र्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥

पुण्डरीकाक्षाय नमः । पुष्करेक्षणाय नमः । अमलेक्षणाय नमः । कमलेक्षणाय नमः । विश्वरूपाय नमः । श्रीमहाविष्णवे नमः ॥

इति षोडशमन्त्रसमष्टिरूपिणी दूरदृष्टिप्रदा [1]चाक्षुष्मती विद्या ॥ ११ ॥

सूर्येत्यारभ्य घृणिनं जातवेदसं [अप्रतिरूपः] इतिपर्यन्तं सप्त वाक्यानि सप्त मन्त्राः । ततो हिरण्मयं [विश्वरूपं] इत्यारभ्य एष सूर्यः इत्यन्तोऽष्टमः । ॐ नमः इत्यारभ्य स्वाहाऽन्तो नवमः । वयस्सुपर्णा इत्यारभ्य बद्धान् इत्यन्तो दशमो मन्त्रः । तदग्रिमाणि नमोऽन्तानि षट् वाक्यानि प्रत्येकं षण्मन्त्राः । इत्थं षोडशमन्त्राणां समष्टिः समुदायः तद्रूपिणी या प्रकृतविद्या सा उपासकानां दूरदृष्टिप्रदा द्वीपान्तरस्थं वस्त्वपि करस्थामलकवत् दृष्टिगोचरीकरोतीति भावः ॥ ११ ॥

द्वितीयपञ्चके द्वितीयमन्त्रमाह—

प्रणवो गन्धर्वराज विश्वावसो मम अभिलषितामुकां कन्यां प्रयच्छ ततोऽग्निवल्लभेत्युत्तमकन्याविवाहदायिनी विद्या ॥ १२ ॥

[1] चक्षु—श्री.

अमुकेत्यत्र अभिलषितकन्यानामनिक्षेपः, नात्रोहः सर्वनाम्ना निर्देशात्, "अदीक्षिष्टायं ब्राह्मणः" इतिवत्। अग्निवल्लभा स्वाहा ॥ १२ ॥

तृतीयमन्त्रमाह—

तारो नमो रुद्राय पथिषदे स्वस्ति मा सम्पारय इति मार्गसङ्कटहारिणी विद्या ॥ १३ ॥

मार्गे यत् सङ्कटं चोरादिजनितं तस्य हारिणी ॥ १३ ॥

चतुर्थमन्त्रमाह—

तारस्तारे पदमुक्त्वा तुत्तारे तुरे शब्दं च दहनदयितेति जलापच्छमनी विद्या ॥ १४ ॥

पदमुक्त्वेति शब्दं चेति त्यक्त्वा शेषं—ॐ तारे तुत्तारे तुरे इति पठित्वा ततः दहनदयितां पठेत् ॥ १४ ॥

पञ्चममन्त्रमाह—

अच्युताय नमः अनन्ताय नमः गोविन्दाय नमः इति महाव्याधि[1]विनाशिनी नामत्रयी विद्या ॥ १५ ॥

पञ्चेमा रश्मयो मूलादिपरिकरतया प्रपञ्च्याः ॥ १६ ॥

इमा उक्ता रश्मयः। परिकरतया तदाधारतया प्रपञ्च्याः योज्याः इत्यर्थः ॥ १६ ॥

महागणपतिविद्याऽऽदि तृतीयं रश्मिपञ्चकम्

अथ तृतीयपञ्चके प्रथममाह—

प्रणवः कमला भुवना मदनो ग्लाच्चतुर्दश-पञ्चदशौ गं गणपतये वरयुगळं द सर्वजनं मे

[1] शमनी—श्री.

शब्दो वशमानयाग्निवामलोचनेति महागणपतिविद्या प्रत्यूह[1]शमनी ॥ १७ ॥

कमला श्रीं भुवना ह्रीं मदनः क्लीं ग्लात् चतुर्दशः औ पञ्चदशोऽनुस्वारश्च, मिळित्वा ग्लौं । वरयुगळं वरद्वयम् । ततः शब्दं इति शब्दं च त्यजेत् । अवशिष्टाः सर्वे वर्णाः मन्त्रावयवाः । वह्निवामलोचना स्वाहा इति चरमं पठेत् । प्रत्यूहशमनी विघ्ननाशिनी ॥ १७ ॥

द्वितीयमन्त्रमाह—

प्रणवो नमः शिवायै प्रणवो नमः शिवायेति द्वादशार्णा शिवतत्त्वविमर्शिनी विद्या ॥ १८ ॥

शिवरूपं यत् चरमं, तत्त्वं तस्य यो विमर्शः प्रकाशशक्तिः तत्संपादिनी ॥ १८ ॥

तृतीयमाह—

प्रणवः काष्टमदक्षश्रुतिबिन्दुपिण्डो भृगुषोडशो मां पालयद्वन्द्वं इति दशार्णा मृत्योरपि मृत्युरेषा विद्या ॥ १९ ॥

ककारात् अष्टमः जकारः दक्षश्रुतिः उकारः, मातृकान्यासे तत्स्थानत्वात्, बिन्दुः प्रसिद्धः । त्रितय पिण्डः समुदायः जुं इति । भृगुः सकारः, षोडशो विसर्गः, सः इति । तदनन्तरं मां पालय पालयेति । मृत्योरपि मृत्युः अपमृत्युनाशिनीत्यर्थः ॥

चतुर्थमाह—

तारः नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ॐ इति श्रुतधारिणी विद्या ॥ २० ॥

[1] नाशिनी—श्री.

श्रुतस्य अधीतस्य धारिणी दृढसंस्कारजनिका ॥ २० ॥

पञ्चममाह—

श्रीकण्ठादिक्षान्ताः सर्वे वर्णाः बिन्दुसहिता मातृका सर्वज्ञताकरी विद्या ॥ २१ ॥

श्रीकण्ठः अकारः तदादिक्षान्ताः एकपञ्चाशद्वर्णाः बिन्दुसहिताः मातृका वाच्या सर्वज्ञताकरी ॥ २१ ॥

रश्मयः पञ्च मूलादिरक्षाऽऽत्मकतया यष्टव्याः ॥ २२ ॥

मूलाधारादिद्वादशान्तान्तरक्षाकर्त्र्यः इमाः यष्टव्याः भावयितव्याः इति भावः ॥ २२ ॥

शिवादिविद्याऽऽदि चतुर्थरश्मिपञ्चकम्

चतुर्थपञ्चके प्रथममन्त्रमाह—

शिवशक्तिकामक्षितिमायारवीन्दुस्मरहंसपुरन्दर-भुवनापरामन्मथवासवभौवनाश्च शिवादिविद्या स्व-स्वरूपविमर्शिनी ॥ २३ ॥

इयमेव लोपामुद्रोपास्या। इयं, अग्रिमा कामराजोपास्या च, श्रीगुरुवक्त्रैकलभ्येति द्वयोरतिगोप्यत्वात् तद्विवरणं न करोमि। शिवादिविद्या हादिविद्या। स्वस्यात्मनः स्वरूपप्रकाशकर्त्री ॥ २३ ॥

द्वितीयमाह—

क्रुशब्दाद्वामेक्षणबिन्दुरेकोऽनन्तयोनिबिन्दवोऽन्यः शङ्करपरात्रिशूलविसृष्टयोऽपरश्चैत एव खण्डाः प्रति-लोमाः षट्कूटा संपत्करी विद्या ॥ २४ ॥

क्ल इति वर्णादुपरि वामेक्षणं ईकारः, मातृकान्यासे तत्स्थानत्वात्, ततो विन्दुः, क्लीं इति सम्पन्नम्। अयं एकोंऽशः। अनन्तः हकारः योनिः ऐकारः बिन्दुः, हैं इत्यपरोंऽशः। शङ्करः हकारः परा सकारः त्रिशूलं औ विसृष्टिः विसर्गः ह्सौः इति अपरोंऽशः। अत्र यद्यपि परापदेनैव विसर्गान्तलाभः, न तु केवलसकारस्य, तथाऽपि त्रिशूलविसृष्ट्योः पृथगुक्त्या पराशब्देन तदेकदेशस्य सकारस्यैव ग्रहणम्। उक्तार्थेषु सर्वेषु प्रमाणमुक्तं प्राक्। अतो नात्र प्रमाणमुच्यते। येषां प्रमाणं नोक्तं तावदंशोऽत्रोच्यते। एवं अंशत्रयं क्रमेण पठित्वा व्युत्क्रमेण च पठेत्। इयं षट्कूटा संपत्करी विद्या ॥ २४ ॥

तृतीयमाह—

समुच्चार्य सृष्टिनित्ये स्वाहेति हमित्युक्त्वा स्थिति-पूर्णे नम इत्यनलबिन्दुमहासंहारिणि कृशोपदा-च्चण्डशब्दः कालि फट् इत्यग्निबिन्दुसप्तममुद्रा-बीजं महानाख्ये अनन्तभास्करि महाचण्डपदात् कालि फट् इति सृष्टिस्थितिसंहाराख्यानां प्राति-लोम्यं खेचरीबीजं महाचण्डवाणी च योगीश्व-रीति विद्यापञ्चकरूपिणी कालसङ्कर्षिणी परमायुः-प्रदायिनी ॥ २५ ॥

उच्चार्येति त्यक्त्वा स्वाहाऽन्ता प्रथमा विद्या। इति शब्दं उक्त्वेति चापहाय नमोऽन्ता द्वितीया विद्या। अनलबिन्दुः रं। ततः पदात् इति शब्द इति च त्यक्त्वा फट् इत्यन्ता तृतीया विद्या। ततः अग्निबिन्दुः रं ततः सप्तममुद्रायाः संक्षोभिण्यादिदशसु सप्तमी खेचरी तस्याः बीजं ह्स्ख्फ्रें। ततः पदादित्यंशमपहाय फडित्यन्ता चतुर्थी विद्या। क्रमेणोक्तासु चतसृषु विद्यासु मध्ये सृष्टिस्थितिसंहाराख्याः याः आद्यास्तिस्रः ताः प्रातिलोम्येन पठित्वा खेचरीबीजमुक्तं पठित्वा वाणी च इत्येतावदंशमपहाय योगीश्वर्यन्तं पठेत्। इयं पञ्चमी विद्या। एवं पञ्चविद्या-

समष्टिरूपिणी कालस्य मृत्योः सङ्कर्षिणी विनाशिनी परमायुः शतवर्षपर्यन्तं तत्प्रदेत्यर्थः ॥ २५ ॥

चतुर्थमाह—

त्रितारी सप्तममुद्रा शिवयुक्शक्तिरहंयुगळमेत-त्पञ्चवैलोम्यमिति शुद्धज्ञानमयी शाम्भवी विद्या ॥२६॥

त्रितारी उक्ता । अत्र सप्तममुद्रापदेन तद्बीजं, तदुक्तं प्राक् । शिवः हः तेन युक्शक्तिः सौः, ह्सौः । अहंयुगळं अहमिति द्विः पाठः । एवं क्रमेण पञ्चावयवाः । प्रथमावयवस्त्रितारी, ह्स्ख्फ्रें द्वितीयः, ह्सौः तृतीयः, अहंयुगळं चतुर्थ-पञ्चमौ । एते पञ्चावयवाः विपरीतं पठिताश्चेत् शांभवी विद्या । शुद्धज्ञानं निर्विषयं, तत्स्वरूपा केवलब्रह्मस्वरूपेत्यर्थः ॥ २६ ॥

पञ्चममाह—

भृगुत्रिशूलविसृष्टयः परा विद्या ॥ २७ ॥

भृगुः सः त्रिशूलं औ विसृष्टिः विसर्गः । मिळित्वा पराविद्या भवति ॥ २७ ॥

पञ्चेमा रश्मयो मूलाद्यधिष्ठानतया परिकल्प-नीयाः ॥ २८ ॥

स्पष्टम् । पञ्च पञ्चमन्त्राः ॥ २८ ॥

अंगोपांगप्रत्यंगपादुकायुक्ता श्रीविद्या

मूलाधारादिषु एकैकस्थाने एकैकविद्यायोजनमुक्त्वा, इतः परं अङ्गोपाङ्गप्रत्यङ्ग-पादुकायुक्तमूलविद्यायाः पञ्चविद्यासमष्टिरूपेणैकस्थान एव विभावनं विवक्षुः तत्रादौ श्रियोऽङ्गबालामाह—

वाक्कामशक्तयोऽनुलोमविलोमाः पुनरनुलोमा इति श्रियोऽङ्गबाला ॥ २९ ॥

वाक् ऐं, कामः क्लीं, शक्तिः सौः । इमाः प्रथमं क्रमेण पठित्वा पश्चात् विपरीतं पठित्वा पुनः क्रमेण पठेत् । एवं सति इयं नवार्णा श्रियोऽङ्गभूता बाला भवति । श्रियोऽङ्गबालेत्यनेन त्र्यक्षरीबालातो व्यावृत्तिः दर्शिता । त्र्यक्षरी तु शुद्धबाला । सैव कुमारीपदवाच्या । तावुभौ पर्यायौ । त्र्यक्षर्याः केवलबालापदवाच्यत्वे प्रमाणं तु तन्त्रान्तरे—

श्रृणु देवि प्रवक्ष्यामि बालाया मन्त्रसाधनम् ।

इत्युपक्रम्य—

वाचं कामं समुच्चार्य शक्तिबीजं ततः पठेत् ।
इयं बाला त्र्यक्षरी सा या पुरोक्ता तवानघे ॥

इति वचनम् । तेन दीक्षाकाले बालामुपदिशेयेत्यनेन त्र्यक्षरी ग्राह्या । न नवाक्षरी । इयं श्रियोऽङ्गबाला । अत एव विशेषणं स्वरसं, तात्पर्यविषयविशेषणस्य स्वसजातीयवस्त्वन्तरव्यावर्तकत्वात्, यथा "रक्तघटमानय" इत्यनेन नीलादिव्यावृत्तिः ॥

नच—नीलघटः घटानतिरिक्तः, विशिष्टस्यातिरिक्तत्वाभावात्, तथा प्रकृतेऽपि श्रियोऽङ्गबालैव बालापदेनोच्यते न शुद्धा—इति वाच्यम् । न हि विशेषवाचकपदस्य सामान्यवाचकत्वं लक्षणामृते संभवति, यथा "रक्तघटमानय" इत्यत्र समुदायस्य केवलघटे लक्षणामृते । अथवा विशेषणमविवक्षितमित्यनुक्त्वा वा घटसामान्यबोधः संभवति । तावुभावपि पक्षौ प्रमाणान्तराश्रयमन्तरा न संभवतः ॥

तस्मात् श्रियोऽङ्गबाला शुद्धबालातोऽन्या । अत एव तन्त्रसारे आदौ शुद्धकालीमन्त्रमुक्त्वा "अथ वक्ष्ये गुह्यकालीविद्यां सर्वार्थसाधिनीं" इत्यधिकारान्तरं चक्रे । इत्यलमसदावेशेन ॥ २९ ॥

श्रिय उपाङ्गं द्वितीयमाह—

भुवना कमला सुभगा तारो नमो भगवति पूर्णेशेखरमन्त्र ममाभिलषितमुक्त्वाऽन्नं देहि दहनजायेति श्रिय उपाङ्गमन्त्रपूर्णा ॥ ३० ॥

भुवना ह्रीं कमला श्रीं सुभगा क्लीं "सुभगो मदनः कामः" इति कोशात् । तार उक्तः ॐ । ततो नमो भगवति । ततः पूर्णे इति शेखरे अग्रभागे यस्य ईदृशं यत् अन्न इति वर्णद्वयं, अन्नपूर्णे इति पठितव्यमिति यावत् । उक्त्वेत्यंशमपहाय देह्यन्तं समानम् । दहनजाया स्वाहा । इयं अन्नपूर्णा विद्या श्रिय उपाङ्गं भवतीत्यर्थः ॥ ३० ॥

श्रियः प्रत्यङ्गं तृतीयमाह—

प्रणवः पाशादित्र्यर्णा एहि परमेश्वरीत्युक्त्वा वह्निवामाक्ष्युक्तिरिति श्रीप्रत्यङ्गमश्वारूढा ॥ ३१ ॥

पाशादित्र्यर्णा आं ह्रीं क्रों । आद्यवर्णद्वयं शिवयोः पाशः, क्रों इत्यङ्कुशः । शेषं स्पष्टम् ॥ ३१ ॥

श्रीपादुकां तुरीयमाह—

तारित्रिकं सप्तममुद्रा शिवशक्तिसंवर्तपुपञ्चम-पुरन्दरवरयूं शक्तिशिवक्षमान्ते वादिवरयीं शिवभृगु-त्रिशूलबिन्दुभृगुशिवत्रिशूलविसृष्टयः श्रीपूर्वं स्वगुरु-नामतोऽष्टाक्षरी चेति श्रीपादुका च ॥ ३२ ॥

तारित्रिकं त्रितारी । सप्तममुद्रा तद्बीजमुक्तम् । शिवः हः शक्तिः सः संवर्तः क्षः, क्षकारस्य प्रळयस्य [च] चरमदशारूपत्वात् क्षकारस्य चरमत्वरूपसंवर्त-रूपत्वम् । पुः पवर्गः तस्य पञ्चमो मकारः, पुरन्दरो लः, एतान् पठित्वा ततो वरयूं इति पठित्वा ततः शक्तिः सः शिवः हः क्षमौ श्रूयमाणमेव वर्णद्वयम् । अमीषामन्ते अग्रभागे वादिः वात् पूर्ववर्णो मातृकासु लः ततो वरयीं ततः शिवः हः भृगुः सः त्रिशूलं औ बिन्दुः ह्सौं इति संपन्नम् । भृगुशिवत्रिशूला उक्ताः । विसृष्टिः विसर्गः । ततः स्वगुरोर्दीक्षानाम । ततः श्रीपादुकां इत्यष्टाक्षरपाठः । अष्टाक्षरे आदौ यः श्रीवर्णः तस्य पूर्वं गुरुनामेत्यर्थः । एषा श्रीपादुका ॥ ३२ ॥

एताभिश्चतसृभिर्युक्ता मूलविद्या साम्राज्ञी मूलाधारे विलोचनीया ॥ ३३ ॥

बालादि च त सृ भि र्यु क्ता मू ल वि द्या वक्ष्यमाणा मू ला धा रे वि लो च नी या ध्येयेति यावत् ॥ ३३ ॥

मूलविद्यामाह—

मादनशक्तिबिन्दुमालिनीवासवमायाघोषदोषा - करकन्दर्पगगनमघवद्भुवनभृगुपुष्पबाणभूमायेति सेयं तस्या महाविद्या ॥ ३४ ॥

त स्याः साम्राज्ञीनामिकायाः ॥ ३४ ॥

अंगादियुक्ता श्यामाविद्या

अथ हृच्चक्रे ध्येयश्यामाऽङ्गविद्यामाह—

वाङ्नतिरुच्छिष्टचाण्डालिमातमुक्ता गिसर्वपदाद्वशंकरिवह्निवामलोचनेति श्यामाऽङ्गं लघुश्यामा ॥ ३५ ॥

वा क् ऐं न तिः नमः एतदुत्तरं उ क्त्वा प दा दि ति त्यक्त्वा स्वाहाऽन्तो यथाश्रुतो मन्त्रः । इयं ल घु श्या मा श्या मा ऽ ङ्ग भू ता ॥ ३५ ॥

उपाङ्गमाह—

कुमारीमुच्चार्य वदद्वन्द्वं वाक्पदं वादिनि वह्निप्रियेति श्यामोपाङ्गं वाग्वादिनी ॥ ३६ ॥

कु मा री बाला । ततो व दे ति द्विवारम् । ततः प द मिति वर्णद्वयं त्यक्त्वा स्वाहाऽन्तं पठेत् । इयं वा ग्वा दि नी विद्या त्रयोदशवर्णा ॥ ३६ ॥

अथ श्यामाप्रत्यङ्गमाह—

प्रणव ओपिनाकुदंपवृपसस्यैचशाचामाहदशब्दाः छाधानलीतैःरिताविःर्ववाईनारुमिवायेच्छेखरा नकुली श्यामाप्रत्यङ्गम् ॥ ३७ ॥

ओ इत्यारभ्य दान्ता ये शब्दा वर्णाः षोडश तेषां क्रमेण छावर्णमारभ्य येत् इतिपर्यन्तं षोडशवर्णाः शेखरे अग्रभागे येषां ते। इदं दशब्दा इत्यस्य विशेषणम्। इत्थं च ओ इत्यारभ्य ये दवर्णान्ताः षोडश तेषां क्रमेण एकैकवर्णस्याग्रे छादिषोडशसु वर्णेषु क्रमेणैकैकं पठेत्। यथा आदौ प्रणवः, ततः ओ, ततः छा, ततः पि, ततः धा, एवं क्रमेण सर्वान् वर्णान् योजयेत्। एवं च द्वात्रिंशदक्षरा नकुली श्यामाप्रत्यङ्गं भवतीति भावः ॥ ३७ ॥

श्यामापादुकामाह—

ललितापादुकादित्रिकस्थाने कुमारी योज्या शिष्टं तद्वत् इति श्यामापादुका च ॥ ३८ ॥

ललितापादुका योद्धृता पूर्वं श्रीपादुकेति तस्याः प्रथमबीजत्रयस्थाने बाला योज्या। शेषं पूर्ववत्। इयं श्यामापादुका ॥ ३८ ॥

चतसृभिर्युक्ता हृच्चक्रे श्यामा यष्टव्या ॥ ३९ ॥

उक्ताभिश्चतसृभिर्युक्ता वक्ष्यमाणा श्यामाविद्या हृच्चक्रे अनाहते यष्टव्या ॥ ३९ ॥

अथ श्यामाविद्यामाह—

तद्विद्या तु त्रितारी कुमारी नभवश्रीतंश्वसज-महासमुरंनिमायासरावकसस्त्रीरुवकसदुमृवकससव-कसलोवकअकंवमायहावर्णा ओंमोगतिमागीरिर्वननो-

रिर्वखाजिमदनश्रींर्वजशंरिर्वपुषशंरिर्वष्टगशंरिर्वत्वशं - रिर्वकशंरिमुमेशनस्वाऽन्त मन्त्रादि बीजषट्कं प्रातिलोम्यमिति अष्टनवतिवर्णाः ॥ ४० ॥

तद्विद्या तु श्यामाविद्या त्वित्यर्थः । त्रितारीकुमारी च प्रागुक्ते । नश्च भश्चेति हावर्णपर्यन्तं द्वन्द्वः । इत्थं ओं इत्यारभ्य स्वा वर्णपर्यन्तं द्वन्द्वः । इत्थं च नकारमारभ्य हाऽन्ता ये वर्णाः तेषु क्रमेणैकैकवर्णोत्तरं योजयेत् । यथा—-ओम्, तदुत्तरं नवर्णः, तदुत्तरं मो, एतदुत्तरं भ, इत्युच्चरेत् । एवंक्रमेण वर्णान् योजयित्वा स्वाहाऽन्तं पठेत् । नभइत्यादिहावर्णान्तकूटे मायापदेन ह्रीं इति गृहीत्वा अष्टनवतिवर्णान्तर्गतषट्त्रिंशद्वर्णः ह्रीं इति योज्यः । एवं ओं इत्यारभ्य स्वावर्णान्ते द्वितीयकूटे कामपदे क्लीं इति वर्णे गृहीत्वा अष्टनवतिवर्णान्तर्गतपञ्चत्रिंशद्वर्णः क्लीं इति योज्यः । कूटद्वयेऽपि शेषवर्णाः उक्तरीत्या यथाश्रुता एव पठितव्याः । एवंग्रथनपूर्वकं स्वाहाऽन्तं मन्त्रं पठित्वा ततः प्रथमषड्बीजानि विपरीतानि पठेत् । एवं च सर्वं मिळित्वा अष्टनवतिवर्णा भवन्ति । अत्र ग्रथिते मन्त्रे द्व्यशीतित्र्यशीतिचतुरशीतिवर्णा अमुकं इति भवन्ति । तत्स्थाने विवक्षितनामनिर्देशः, सर्वनामत्वात् "आशास्ते यं यजमानोऽसौ" इतिवत् । विवक्षितनामप्रक्षेपे वर्णन्यूनाधिकभावो न दोषाय, सङ्ख्यावाचकशब्दस्यानुवादकत्वात् ॥ ४० ॥

अंगादियुक्ता वाराहीविद्या

अथ अनाहते ध्येयाया वाराहीविद्याया अङ्गमाह—

हरः सबिन्दुर्वापूर्वराहि स्थाणुः सबिन्दुरुन्मत्तपदं भैशब्दो रविपादुकाभ्यां नम इति वार्ताळ्यङ्गं लघुवार्ताळी ॥ ४१ ॥

हरः अग्रे स्थाणुरिति दशमस्वरवाचकौ । इत्थं च प्रथमं ऌं ततः पूर्व इत्यंशं त्यक्त्वा हिवर्णान्तः । पुनः ऌं । ततः पदं शब्दः इत्येतावदंशमपहाय नमोऽन्तं यथाश्रुतम् । इयं लघुवाराही वाराह्यङ्गभूता ॥ ४१ ॥

अथ वार्ताळ्युपाङ्गविद्यामाह—

वेदादि[1] भुवनं नमो वाराहिघोरे स्वप्नं ठद्वितयं अग्निदारा इति वार्ताळ्युपाङ्गं स्वप्नवार्ताळी स्वप्ने शुभाशुभफलवक्त्री ॥ ४२ ॥

वेदादि प्रणवः । भुवनं ह्रीम् । ठद्वितयं ठद्वयम् । अग्निदारा स्वाहा । शेषं यथाश्रुतम् । इयं वार्ताळ्युपाङ्गम् । स्वप्ने शुभाशुभफलवक्त्रीत्यनेन तादृशकामनावता स्वतन्त्रतया इयमुपास्येति सूचितम् ॥ ४२ ॥

तत्प्रत्यङ्गविद्यामाह—

वाग्घृदयं भगवति तिरस्करिणि महामाये पशुपदाज्जनमनश्चक्षुस्तिरस्करणं कुरुद्वितयं वर्मफट्पावकपरिग्रह इति वार्ताळीप्रत्यङ्गं तिरस्करिणी ॥ ४३ ॥

वाक् ऐम् । हृदयं नमः । ततः पदादिति त्यक्त्वा तिरस्करणमित्यन्तं यथाश्रुतम् । ततः कुरु इति द्विवारम् । ततः वर्म हुम् । ततः फट् पावकपरिग्रहः स्वाहा । इयं तिरस्करिणी विद्या प्रत्यङ्गभूता ॥ ४३ ॥

अथ वाराहीपादुकां दर्शयति—

श्यामापादुकामन्त्रादित्रिबीजमपहाय वाग्ग्लौं इति योज्यम् । एषा वार्ताळीपादुका ॥ ४४ ॥

श्यामापादुकाया आद्यबीजत्रयमपसार्य तत्स्थाने ऐं ग्लौं इति पठित्वा शेषं अविकृतं पठेत् । इयं वाराहीपादुका भवति ॥ ४४ ॥

विद्याभिरेताभिर्युक्ता फालचक्रे परिपूज्या भगवतीयं भूदारमुखी ॥ ४५ ॥

[1] भुवना —श्री.

एताभिरुक्ताभिर्विद्याभिर्युक्ता भूदारमुखी वाराही तद्विद्येत्यर्थः । सा कालचक्रे आज्ञायां परिपूज्या ध्येयेत्यर्थः ॥ ४५ ॥

अथ वाराहीविद्यामाह—

मनुरिदमीयोऽयं वाक्पुटितं ग्लौं नभववाळितांवाहिरावहाखिरामुअंअंनिमःधेधिनजंजंनिमःहेहिन स्तं स्तंनिमःर्वष्टदुनांर्वेसवाकृत्तक्षुखातिह्वाभकुकुशीवशब्दा यथाक्रमं मोगतितांवाळिरावाहिरामुवहखिधेधिनरुरुं-निम ः भेभिनमोमोनिम ः भेभिनसदुप्रष्टासषांर्वचिच-मुर्गोंजिस्तंनंरुरुघ्रंश्यंशब्दोपेता वाक् ग्लौं विसृष्टय-न्ताश्चसप्तमाश्चत्वारो वर्मास्त्रायफडिति द्वादशोत्तर-शताक्षरा ॥ ४६ ॥

अस्या वाराह्या अयं इदमीयः । मनुः मन्त्रः । अयं वक्ष्यमाणः । अयमित्यनेन निर्दिष्टमर्थमाह—वाक्पुटितमिति । व्याख्यातं प्राक् । प्रथमं ऐम् । ततः ग्लौम् । ततः ऐं इति तदर्थः । ततः नेत्यारभ्य वान्ता ये वर्णाः तेषु क्रमेणैकैकवर्णोत्तरं मो इत्यारभ्य श्यं इति वर्णान्ताः क्रमेण पूर्ववत् एकैकान् पठेत् । एवं ग्रथनपूर्वकं वश्यं पर्यन्तं पठित्वा । ततो वाक् ऐम् । ततो ग्लौं इति पठित्वा । ततः चवर्णात् सप्तमाः ठकाराः विसृष्टयन्ता विसर्गसहिताः चत्वारः तान् पठित्वा । वर्म हुम् । ततो अस्त्राय फट् इति पठेत् । इयं वाराहीविद्या द्वादशोत्तरशताक्षरी ज्ञेया ॥ ४६ ॥

श्रीपूर्तिविद्या

अथ ब्रह्मरन्ध्रे यष्टव्यां श्रीपूर्तिविद्यामाह—

पञ्चमैकादशबीजवर्जा श्रीरेव श्रीपूर्तिविद्या ब्रह्म-कोटरे यष्टव्या ॥ ४७ ॥

पूर्वं मादनशक्तीत्यादिना दर्शिता या श्रीविद्या तस्यां यः पञ्चमः एकादशश्चवर्णौ, माया बीजम्, तावपहाय श्रीविद्यैवोर्वरिता श्रीपूर्तिविद्या। सा ब्रह्मकोटरे ब्रह्मरन्ध्रे यष्टव्या ध्येयेति यावत् ॥ ४७ ॥

महापादुका

श्रीब्रह्मरन्ध्रे ध्येयां महापादुकामुद्धरति—

श्यामापादुकाप्रथमत्रिकस्थाने तारत्रयं कुमारी वाक् ग्लौं इति योज्यम्। ततः परस्ताच्छेषं समानम् ॥४८॥

स्पष्टम् ॥ ४८ ॥

इमां लोकप्रवृत्तसर्वोत्तमत्वज्ञानाय स्तौति—

इयं महापादुका सर्वमन्त्रसमष्टिरूपिणी स्वैक्यविमर्शिनी महासिद्धिप्रदायिनी द्वादशान्ते [1]यष्टव्या ॥

सर्वमन्त्रसमष्टिरूपिणी सर्वमन्त्रैः प्रत्येकं यद्यत् साध्यं फलं तत् सर्वं अनेनैव साधितुं शक्यं इति भावः। एवं इह लोके क्षुल्लकफलसाधनत्वमुक्त्वा साध्याणिमादिसाधनत्वमप्यस्तीत्याह—महासिद्धिप्रदायिनीति। महासिद्धयः अणिमाऽऽदयः। एवं कृत्रिमपुरुषार्थसाधनत्वमुक्त्वा परमपुरुषार्थसाधनत्वमप्याह—स्वैक्येति। स्वैक्यविमर्शः ब्रह्मात्मैक्यज्ञानं, जनकतासंबन्धेन तद्वती, ब्रह्मात्मैक्यविमर्शाभासनरूपा, अविद्यालयकर्त्रीति यावत्। अत्र सूत्रे यद्यपि महासिद्धिप्रदायिनीत्यस्मात् पूर्वपठितस्य स्वैक्यविमर्शिनीत्यस्य पश्चाद्व्याख्यानमसङ्गतवद्भाति; तथाऽपि अस्य परमपुरुषार्थरूपस्य कथनानन्तरं सिद्ध्यादिफलकथनं असङ्गतम्। अतः सूत्रकारस्य तत्क्रमेणान्वितवाक्यादेव बोधोऽभिप्रेतः इति पश्चात्पठितस्याऽपि पूर्वं व्याख्यानं ज्ञेयम् ॥ ४९ ॥

[1] वरीवस्या—अ, ब२.

रश्मिमालाध्यातृप्रशंसा

एवं रश्मिमालामन्त्रकलापमुक्त्वा यथोक्तस्थानेषु उक्तरश्मिमालाध्यानकर्तारं प्रशंसति—

एवं रश्मिमाला संपूर्णा । सर्वगात्रः शुद्धविद्यामयतनुः स एव परमशिवः ॥ ५० ॥

स्पष्टोऽर्थः ॥ ५० ॥

जपविघ्ननिवारकमन्त्राः

अथ जपपूर्वाङ्गभूतान् जपविघ्ननिवारकान् मन्त्रानाह—

अथ विघ्नदेवताः । इरिमिलिकिरिकिलिपदात् परिमिरोमित्येकः । प्रणवो माया नमो भगवति महात्रिपुराद्भैवर्णाद्रविपदमनु मम त्रैपुररक्षां कुरु कुरु इति द्वितीयः । संहर संहर विघ्नरक्षोविभीषकान् कालय हुं फट् स्वाहा इति तृतीयः । ब्लूं रक्ताभ्यो योगिनीभ्यो नमः इति चतुर्थः । सां सारसाय बह्वाशनाय नमः इति पञ्चमः । दुमुलुषुमुलुषु मायाचामुण्डायै नमः इति षष्ठः । एते मनवो ललिताजपविघ्नदेवताः ॥ ५१ ॥

अथेति प्रकरणान्तरज्ञापकम् । विघ्नहर्त्र्यो देवताः विघ्नदेवताः । मध्यमपदलोपी समासः । अत्र देवतापदेन तत्तद्देवतावाचकमन्त्रा लक्षणीयाः । तेन देवताकथनं प्रतिज्ञाय अग्रे मन्त्रकथनं न सन्दर्भविरुद्धम् । वक्ष्ये इति शेषः । तत्र श्रीविद्याऽङ्गभूताः षण्मन्त्राः, तेष्वाद्यं मन्त्रमाह—इरिमिलीति । अत्र पदादित्यंशमपहाय शेषं यथाश्रुतं पठितव्यम् । द्वितीयमाह—प्रणव इति । प्रणवमायोत्तरं त्रिपुरपर्यन्तं पठित्वा । ततः भै इति । ततः रवि इति । मम त्रैपुरेति कुर्वन्तो यथाश्रुतः पठितव्यः । अयं यथाश्रुतः पठितव्यः । तृतीयमाह—संहरेति ।

चतुर्थमाह—ब्लू मिति । अयमपि यथाश्रुतः पठितव्यः । पञ्चममाह—सा मिति । अयमपि यथाश्रुतः । षष्ठमाह—दु मु लु इ ति । षष्ठ्यां मा या इति ह्रींवर्णग्रहणम् । शेषं यथाश्रुतम् । ललितामनुसमाप्तिं द्योतयति—ए त इ ति । ए ते उक्ताः ॥ ५१ ॥

श्यामाविघ्नहरमन्त्रमाह—

हसन्ति हसितालापे पदं मातमुद्गा गीपरिचारिके मम भयविघ्ननाशं कुरुद्वितयं सविसर्गठत्रितयमिति श्यामाविघ्नदेवी ॥ ५२ ॥

ह स न्ती त्यारभ्य ना श मितिपर्यन्तम् प दं उ क्त्वे त्यंशं अपहाय शेषं समानम् । नाशं इत्येतदुत्तरं कुरुद्वयम् । ततः सविसर्गठत्रितयं पठेत् । इयं हसन्ती विद्या श्यामाजपाङ्गम् ॥ ५२ ॥

अथ वाराहीविघ्नहरविद्यामाह—

स्तं स्तम्भिन्यै नम इति कोलमुखीविघ्नदेवी ॥ ५३ ॥

यथाश्रुतं स्पष्टम् ॥ ५३ ॥

एतेषां तत्तज्जपाव्यवहितप्राक्कालेन संबन्धं दर्शयति—

एते तत्तज्जपारंभे जप्तव्याः ॥ ५४ ॥

सङ्ख्याया अनुक्तत्वात् जपात् पूर्वं सकृत्पाठः ॥ ५४ ॥

ललिताऽऽदिजपकालाः

अथ ललिताऽऽदिपराऽन्तानां जपकालमाह—

ललिता प्राह्णे । अपराह्णे श्यामा । वार्ताळी रात्रौ । ब्राह्मे मुहूर्ते परा ॥ ५५ ॥

एतदव्यवहितसूत्रे जप्तव्या इत्यनेन जपारंभे इत्यनेन च जपप्रकरणे सिद्धे अयं कालविधिः जपस्यैवेति सिद्धम् । प्राह्णः सूर्यपरावृत्तिप्राक्कालः । अ प रा ह्णः

परावृत्त्यपरभागः । तयोर्मध्यः अतिसूक्ष्मः कालो मध्याह्नः, "प्राह्णापराह्णमध्याह्नाः" इति कोशात् । यद्वा—दिवसं त्रेधा विभज्य प्राह्णादयः समं ज्ञेयाः । त्रेधा विभागश्च श्रुत्या दर्शितः—"ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते ।" इति । अयमेव विभागः प्राह्णादिशब्देन कोशेन दर्शितः । अस्तोत्तरं अर्धयामं उदयात् प्रागर्धयामं चापहाय शेषं यामत्रयं रात्रिपदवाच्यम् । अत एव "रात्रिस्त्रियामा" इति पर्यायोऽपि कोशेऽस्ति । ब्राह्मो मुहूर्तः प्रागुक्तः । शेषं स्पष्टम् ॥ ५५ ॥

श्रीनित्यपूजायां मपञ्चकप्रतिनिधिग्रहणे हेतवः

श्रीनित्यपूजायां मपञ्चकप्रतिनिधिना पूजनं मुख्यालाभे उक्तम् । इदानीं प्रतिनिध्यादरे अन्यानपि हेतूनाह—

व्यवहारदेशस्वात्म्यप्राणोद्वेगसहायामयवयांसि प्रविचार्यैव तदनुकूलः पञ्चमादिपरामर्शः ॥ ५६ ॥

व्यवहारः पूजाऽव्यवहितोत्तरकाले पशुजनैः सह कर्तव्यो लौकिकः आवश्यकः कार्यविशेषः । तत्तद्द्रव्यसेवनाव्यवहितोत्तरं तद्विकारं दृष्ट्वा पशव एनं दूषयेयुः । क्रतावावश्यकं रहस्यं भिद्येत । अतः प्रतिनिधिसेवनं इति भावः । एवं यस्मिन् देशे द्रव्यसेवनेन धातुवैषम्यजनितः शरीरविकारः, येन केनचिदपरिहार्यनिमित्तेन तद्देशवास आवश्यकः, तत्र प्रतिनिध्याश्रयः । अयं द्वितीयो हेतुः । किं च समीचीनश्चासावात्मा च स्वात्मा, अत्रात्मा मनः, स्वात्मनो भावः स्वात्म्यम् । तत्त्वं च सात्त्विकवृत्तिमत्त्वम् । सात्त्विकवृत्तिलक्षणमुक्तं गीतायाम्—

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ इति ॥

अयमेवार्थः स्पष्टमुक्तः तन्त्रसारोदाहृतरुद्रयामळवचनेन—

कुलद्रव्यं निषेवेत यदा सत्त्वाधिका मतिः ।
अन्यथा सेवनं कुर्वन् पतनायैव कल्पते ॥

इत्यनेन ॥

ननु इदं वचनं प्रकृतसूत्रं सामयिकपरमास्तां इति चेत्— न; सामयिकेषु पञ्चमप्रसक्तेरभावेन 'पञ्चमादिपरामर्शः' इति सूत्रविरोधात्। अत एवेमां शङ्कां निराकर्तुं प्रथमादिकमित्यनुक्त्वा पञ्चमादीत्युक्तं सूत्रकारेण। इत्थं च सात्त्विकान्तःकरणवृत्तिश्च स्वैकवेद्या। एवं सति अन्तःकरणशुद्धिं सम्यग्विचार्य पश्चात् पञ्चमादिमुख्यपरामर्शः इति सिद्धम्। इत्थं च यः पूजाकर्ता तस्यैव सात्त्विकवृत्तिशून्यस्य द्रव्यसेवनं निषेधति शास्त्रं, किमु वक्तव्यं सामयिकस्य तद्विचारे॥

एवं सति इदानीन्तनाः कौलिकाभासाः वयं कौलिका इति प्रतिष्ठावन्तः अधिकारस्वरूपं अधिकारगन्धमप्यजानन्तः पानपात्रं कक्षे गृहीत्वा गेहाद्गेहमटन्ति। तांश्च शिष्टाभासाश्च मण्डले प्रवेश्य हविश्शेषं पात्रसङ्ख्यामुलङ्घ्य पाययन्ति। तेभ्यः दातृभ्यश्च भूयो भूयो नमः इत्यलमसदावेशेन॥

प्राणस्योद्वेगः सहनशक्तिः। सहायाः प्रसिद्धाः। आमयः रोगः। वयांसि बाल्यादि। एतानि सर्वाणि पञ्चमादिपरिग्रहे अनुकूलानि उत प्रतिकूलानि इति प्रविचार्य सम्यग्विचार्य अनुकूलत्वयाथार्थ्यग्रह एव मुख्यपञ्चमादि-परिग्रहः। अन्यथा प्रतिनिधिनैव नित्यक्रमविमृष्टिः इति भावः॥ ५६॥

सर्वभूताविरोधादयः उपासकधर्माः

प्रसङ्गात् पूर्वोक्तशेषान् उपासकधर्मान् वक्तुमारभते—

सर्वभूतैरविरोधः॥ ५७॥

सर्वभूतैरविरोधः स्वमार्गगुप्त्यर्थम्। अन्यथा द्वेषेण एतदीयं दोषं गुप्तरूपेण छद्मना वा दृष्ट्वा सभायां प्रकटं कुर्युः। अविरोधे तादृशदोषान्वेषणयत्नं न कुर्युः। दैवात् कदाचित् ज्ञाते वा अविरोधात् सभायां प्राकट्यं न कुर्युरिति भावः॥ ५७॥

ननु सर्वभूतैरविरोधेन वर्तमानेऽपि "मक्षिका व्रणमिच्छन्ति" इति न्यायेन कश्चन दोषान्वेषणन्यायेन प्रवृत्तश्चेत् तत्र किं कार्यं? अत आह—

परिपन्थिषु निग्रहः॥ ५८॥

तादृशदुर्जनेषु निग्रहः । यथा तन्नाशः स्यात् तथा वर्तितव्यम् । लौकिकेन अलौकिकेन व्यापारेण तस्य निरासः कार्यः इति भावः ॥ ५८ ॥

एवमुदासीनेषु विरोधाभावं परिपन्थिषु निग्रहं प्रदर्श्य भक्तिभूमिकामारुरुक्षूणां सेवाऽऽदिना सम्यक् श्रितानां प्रसादं संपादितवतामुपरि किं कार्यमित्याशङ्कायामाह—

अनुग्रहः संश्रितेषु ॥ ५९ ॥

संश्रितेषु चिरकालं प्रसादितेषु तेषु अनुग्रहः, विद्याप्रदानादिना तेषां मनोरथपूरणं कर्तव्यमिति शेषः ॥ ५९ ॥

एवं गुरोर्धर्मानुक्त्वा प्राप्तविद्येन शिष्येण कथं वर्तितव्यं इति तं प्रकारमाह—

गुरुवत् गुरुपुत्रकळत्रादिषु वृत्तिः ॥ ६० ॥

आदिपदेन गुरुपूज्यानां ग्रहणम् । अत्र यद्यपि गुरुवृत्तिः तत्कळत्रादिष्वतिदिष्टा गुरुवृत्तिश्च नोक्ता, तथाऽपि अतिदेशेनैव ज्ञापितो गुरुधर्मः तन्त्रान्तरोक्तोऽस्यानुमत इति । गुरौ यथा वर्तितव्यं तत्प्रकारः कुलार्णवादिषु—

एकग्रामे क्रोशदूरे चार्धयोजनके स्थितः ।
गुरोस्त्रिसन्ध्यैकसन्ध्ये पञ्चपर्वसु दर्शनम् ॥
एकयोजनमारभ्य योजनद्वादशावधि ।
तत्तद्योजनसङ्ख्याकैः मासैः स्यात् गुरुदर्शनम् ॥
अतिदूरे नमेच्छिष्यस्तद्दिशाऽभिमुखो गुरुम् ।
रिक्तहस्तो नैव चिरात् पश्येदेवं गुरुं स्वकम् ॥
गुरौ मनुष्यबुद्धिं च मन्त्रे चाक्षरबुद्धिताम् ।
न कुर्याद्यन्त्रमूर्त्यादौ शिलाबुद्ध्यादिकं तथा ॥
गुरुं पश्येत् सदा भक्त्या साक्षाच्छिवमयं बुधः ।
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥
ऋणदानं तथाऽऽदानं तथैव क्रयविक्रये ।
न कुर्यात् गुरुभिः सार्धं तदाज्ञां नैव लङ्घयेत् ॥

शिरसा न वहेत् भारं पादुकाभावनापरः ।
नाभिमानं गुरोः कार्ये लज्जां कुर्यात् कदाचन ॥
गुरुमित्रसुहृद्दासीदासाद्यान् मानयेत् सदा ।
वाहनं पादुकां चैव चामरं व्यजनं तथा ॥
ताम्बूलभक्षणं सेव्यभावं गुर्वग्रतः त्यजेत् ।
पादप्रक्षाळनं दन्तधावनं मलमूत्रयोः ॥
विसर्गं क्षौरमभ्यङ्गं शयनं स्त्रीनिषेवणम् ।
दुर्वाक्यं रोदनं हास्यं प्रपदोद्घाटनं तथा ॥
दूषणं कलहं वादमधोवायुं दुराग्रहम् ।
अङ्गभङ्गं न कुर्याद्वै गुरुसंमुखतः क्वचित् ॥
गुरोरासनवस्त्राङ्गच्छायां नोल्लङ्घयेत् क्वचित् ।
अधस्स्थे तु गुरावूर्ध्वं न तिष्ठेन्नाग्रगो भवेत् ॥
न विशेदुत्थिते तस्मिन् स्वाङ्गच्छायां न पातयेत् ।
गुरुनाम न गृह्णीयात् जपाच्छ्राद्धादृते क्वचित् ॥

इत्यादिवचनैः या गुरौ वृत्तिरुक्ता सा गुरुपुत्रे तत्पत्न्यां च कार्या । आदिपदेन गुरोर्मान्याः ये स्वज्येष्ठाश्च ते ग्राह्याः,

गुरुपत्नीसुतज्येष्ठान् गुरुवत् पूजयेत् सदा ॥

इति तन्त्रान्तरवचनात् । स्वज्येष्ठानां मानार्हता कुलार्णवेऽप्युक्ता—

पूजामध्ये गुरौ ज्येष्ठे पूज्ये वाऽपि समागते ।
नत्वा ब्रूयात् स्थितः शेषमाचरेत् तदनुज्ञया ।
आसीनः प्रह्वभावेन श्रेष्ठभावमदर्शयन् ॥ इति ॥

ज्येष्ठलक्षणमुक्तं प्राक् । इत्थं चैव सर्वेषु गुरुवद्वर्तितव्यम् । तत्राप्येकयोजनादिदूरे दर्शनादि, स्वशिरसि ध्यानादि, काश्चन वृत्तयः गुर्वतिरिक्ते हेयाः । यौवनशालिन्यां गुरुपत्न्यां पादस्पर्शपूर्वकाभिवन्दनं निषिद्धम्,

गुरुपत्नी च युवती नाभिवाद्या हि पादयोः ॥

इति वचनात् । इत्यलं विस्तरेण ॥ ६० ॥

आदिमस्वीकारे ग्राह्याग्राह्यद्रव्यविवेकः

शिष्टैः सार्धमितिवाक्येन प्राप्तं आदिमस्वीकारमनूद्य त्याज्यांशं विधत्ते—

आदिमस्य स्वयं सेवनमागमदृष्ट्या दोषदं त्याज्यम् ॥ ६१ ॥

आगमाः तन्त्राणि तेषां दृष्ट्या यद्दोषदं तत् त्याज्यम् । पूर्वं क्रत्वर्थत्वेन आदिमसेवनं कर्तव्यमिति तन्त्रे प्रतिपादितम् । तथाऽपि यत् दोषदं तत् त्याज्यम् । यथा स्वयं साधकः स्वस्य अधिकारमविचार्य केवलं "आगळान्तं पिबेत्" इति वचनं पुरस्कृत्य वृथा अनुतिष्ठन् दुष्टः पतेदेव न श्रेयसे इति । अत एव कौलोपनिषद्भाष्ये "यावन्न चलते दृष्टिः" "आगळान्तं पिबेच्छिवे" इत्यादितन्त्रवचसां सिद्धिमात्रपरत्वं व्यवस्थापितम् । अयं विषयः विस्तरतः प्राक् निरूपितोऽस्माभिः ॥ ६१ ॥

अथ प्रसङ्गात् आदिमं कीदृशं किंप्रकृतिकं ग्राह्यं इति परिशिष्टाकाङ्क्षायां वचनेन पूरयति—

सानन्दस्य रुचिरस्यामोदिनो लघुनो वार्क्षस्य गौडस्य पिष्टप्रकृतिन अन्धसो वाल्कलस्य कौसुमस्य वा यथादेशसिद्धस्य वा तस्य परिग्रहः ॥ ६२ ॥

द्रव्ये आनन्दसाहित्यं जनकतासंबन्धेन आनन्दविशिष्टत्वं, आनन्दाविर्भावसाधनं इति यावत् । रुचिरस्य यद्दर्शनमात्रेण मनःप्रसादः तस्य । आमोदिनः सुगन्धयुक्तस्य । लघुनः धातुवैषम्याजनकस्य । इम एवोक्तगुणाः योगिनीतन्त्रे—

अत्यन्तशीघ्रबोधाढ्यं दुष्टामोदविवर्जितम् ।
सुगन्धाढ्यं प्रीतिकरं अविकारकरं तथा ॥ इति ॥

अथ तत्प्रकृतीराह—वार्क्षस्येत्यादिना । वार्क्षस्य ताळलाङ्गल्यादिवृक्षोद्भवस्य गौडस्य गुडभवस्य अन्धसः अन्नप्रकृतिकस्य, "भिन्ना स्त्री भक्तमन्धोऽन्नं"

इत्यमरः । वाल्कलं वृक्षत्वक्संबन्धि "त्वक् स्त्री वल्कलमस्त्रियां" इत्यमरः । कौसुमस्य मधूकादिपुष्पोद्भवस्य । यथादेशसिद्धस्य यस्मिन् देशे यद्यत्प्रकृतिकं द्रव्यं तद्वा ग्राह्यमित्यर्थः । एतेन दर्शितादन्याऽपि द्रव्यप्रकृतिरस्तीति दर्शिता । अन्याः प्रकृतयो दर्शिता योगिनीतन्त्रे—

द्राक्षोद्भवा च खार्जूरी माध्वी गौडी तथाऽन्नजा ।
मधुपुष्पभवा वार्क्षी ख्याता सप्तप्रकारतः ।
यथोत्तरं ह्रासगुणमाद्यमाद्यं तथोत्तमम् ॥ इति ॥

यद्यपि सूत्रे सर्वेषां तुल्यविकल्प इव दृश्यते, तथाऽपि लिखितयोगिनीतन्त्रवचनानुसारेण क्रमं धृत्वा पूर्वाभावे परं ग्राह्यम् । गुणह्रासानुसारेण भवन्ति शेषव्यवस्थाः । ताः सर्वाः दर्शिताः प्राक् । तस्य आदिमस्य ॥

आदिमप्रतिनिधिः

अथ प्रसङ्गात् सूत्रानुक्तं आदिमप्रतिनिधिं तन्त्रान्तरोक्तं दर्शयिष्यामः । तच्चोक्तं परमानन्दतन्त्रे—

अथानुकल्पाः प्रोच्यन्ते शृणु देवि समाहिता ।
हेतुद्रव्यं द्वितीयं च तृतीयं चाष्टगन्धकम् ॥
समानं वटकां कृत्वा संशोष्य स्थापयेच्छिवे ।
अनू दघृष्योदके तत्तु योजयेदर्घ्यपात्रके ॥
नारिकेळोदकं कांस्ये ताम्रे क्षीरं तु तक्रकम् ।
गुडमिश्रं जलं वाऽपि जलं चन्दनमिश्रितम् ॥
मुख्यालाभे चानुकल्पः . . . . . ॥ इति ॥

प्रथमद्वितीयतृतीयान् अष्टगन्धं च समानभागं मेळयित्वा वटकां शुष्कं स्थापितं तज्जलेन घृष्ट्वा अर्घ्यपात्रे मेळयेत् । गुडमिश्रमित्यस्य देहळीदीपकन्यायेन तक्रेण जलेन चान्वयः, "गुडोदकं तथा तक्रं" इति त्रिपुरार्णववचनात्, "गुडमिश्रेण तक्रेण" इति कुलार्णववचनाच्च ॥ ६२ ॥

द्वितीयतृतीयसंपादनप्रकारः

अथ द्वितीयतृतीयसंपादनप्रकारं दर्शयति—

तदनन्तरं मध्यमयोरस्वयमसुविमोचनम्। उपादिमे नायं नियमः। मध्यमे तु स्वयं संज्ञपने तत्रायं मन्त्रः—

उद्बुध्यस्व पशो त्वं हि नाशिवस्त्वं शिवो ह्यसि।
शिवोत्कृत्तमिदं पिण्डं मत्तस्त्वं शिवतां व्रज॥

इति॥ ६३॥

तदनन्तरं प्रथमसंपादनानन्तरम्। मध्यमयोः द्वितीयतृतीययोः। अस्वयं आत्मभिन्नम्। असुविमोचनं प्राणविमोचनं प्राणमोचनसाधनम्। कुर्यादिति शेषः। द्वितीयतृतीयप्रकृतिभूतपशुप्राणवियोगं स्वयं न कुर्यात् इति फलितोऽर्थः॥

अथान्यस्य संज्ञप्तुरभावे किं कार्यं तत्राह—उपादिम इति। उपादिमस्य द्वितीयस्य असुविमोचनं स्वयमप्यन्याभावे कुर्यात्। तृतीयस्य स्वयमसुविमोचने "उद्बुध्यस्व" इति मन्त्रं पठित्वा असुविमोचनं कुर्यात् इति भावः॥

द्वितीयप्रकृतिः

द्वितीयतृतीयौ किंसम्बन्धिनौ ग्राह्यौ इत्याकाङ्क्षायां सूत्रे अनुक्तत्वात् तन्त्रान्तरवचनानि लिख्यन्ते। तत्र द्वितीयप्रकृतिः योगिनीतन्त्रे—

द्वितीयभेदं वक्ष्यामि द्विविधं तच्छृणु प्रिये।
भूचरं खेचरं चैव पुनस्तद्द्विविधं स्मृतम्॥
ग्रामजं वनजं चापि ग्रामजं छागमेषकौ।
वराहः शल्यको रोजो रुरुर्हरिण एव च॥
खड्गी गोधा च शशकः दशधा भूचराः स्मृताः।
रोगिणः कालविहताः परित्याज्या महेश्वरि॥

कोमलाः पुष्टसर्वाङ्गाः भवेयुश्चोत्तमोत्तमाः ।
ग्राम्यारण्यौ कुक्कुटौ च मयूरस्तित्तिरिस्तथा ॥
चक्रवाकः सारसश्च राजहंसस्तथैव च ।
जलकुक्कुटहंसौ च चटको दश खेचराः ॥ इति ॥

तत्संस्कारप्रकारस्त्रिपुरार्णवे—

मधुराम्लहिङ्गुबीजमरीच्याज्यसुपाचितम् ।
सुगन्धं मृदु पक्वं च सुस्वादु च मनोहरम् ॥ इति ॥

एतेषामलाभे प्रतिनिधिरुक्ता डामरतन्त्रे—

मांसानुकल्पोऽपूपः स्यान्मत्स्यस्य तु कदल्यपि ॥

तृतीयप्रकृतिः

अथ तृतीयमुख्यभेदो योगिनीतन्त्रे—

मत्स्यः कूर्मश्च देवेशि तृतीयं द्विविधं स्मृतम् ॥ इति ॥

तत्पाकस्त्रिपुराऽर्णवे—

अल्पकण्टकसंयुक्तं सुपक्वं स्वादुसंयुतम् ।
लिकुचाम्लादिसंयुक्तं विधिना संस्कृतं तथा ॥ इति ॥

तदनुकल्पो रहस्यार्णवे—

संवित्संयुक्तचणकपिष्टजं वटकं शिवे ।
मीनाकृतिकृतं वाऽपि मूलकं वाऽपि वा शिवे ॥ इति ॥

तन्त्रान्तरे—

अलाभे तु तृतीयस्य द्वितीये त्र्यम्बकं जपेत् ॥

इति द्वितीयं स्पृष्ट्वा 'त्र्यम्बकं यजामहे' इति मन्त्रं जपेत् । तेन तृतीयकार्यसंपत्तिर्भवतीति तद्भावः ॥

चतुर्थद्रव्यम्

चतुर्थमुक्तं योगिनीतन्त्रे—

चणकोत्था माषजा वा मुद्राः स्युर्घृतपाचिताः ।
तैलपक्का अपि शिवे मधुराश्च सुसंस्कृताः ॥
लवणाद्यैः संस्कृता वा गोधूमैस्तण्डुलादिभिः ।
निर्मिता रुचिराकाराः स्वादुयुक्ता महेश्वरि ॥ इति ॥

इदं द्वितीयादिपर्युषितं वर्ज्यम् । तदुक्तं त्रिपुरार्णवे—

एतत्पर्युषितं सर्वमनर्हं पूजनादिषु ।
तत्पूजया प्रकुप्यन्ति योगिन्यस्त्वतिभीषणाः ॥ इति ॥

तन्त्रान्तरे प्रथमस्यापि हेयत्वमुक्तम्—

प्रथमादि चतुर्थान्तं यामात् पर्युषितं भवेत् ।
प्रथमादि चतुर्थान्तं सर्वं त्याज्यं सुसाधकैः ॥ इति ॥

पर्युषितस्य परित्यागः । सति संभवे अन्यथा ग्राह्यं क्रयक्रीतमपीति । तन्त्रसा
लिखितनीलतन्त्रवचनविरोधात् क्रयक्रीतमपर्युषितं संभवति । दोषदुष्टं सर्वदा त्याज्यम् ।
तन्त्रे प्रतिपादिता दोषा यथा—

तथा विकृतिमापन्नं मार्जाराद्यैरपाहतम् ।
केशाश्रुनखनिष्ठीवदूषितं च परित्यजेत् ॥ इति ॥

चकारेण कृमिकीटादिसंमिश्रं पिपीलिकादिदूषितादि एतत्सदृशं सर्वं ग्राह्यम् ॥

प्रथमादीनां मण्डलादन्यत्र ग्रहणप्रकारः

प्रथमादि सर्वं मण्डलात् बहिः न ग्राह्यं इत्युक्तं प्राक् । तस्यापवादः
कचित्तन्त्रे—

देव्यै निवेदितं सर्वं प्रथमादिकमद्रिजे ।
येन केनापि संस्पृष्टं समानीतं सुसंस्कृतम् ॥

उद्वासानन्तरं वाऽपि मण्डलात् बाह्यतोऽपि वा ।
आदरेण समादेयं सर्वैः पर्वतगोत्रजे ॥
उपवासपरैश्चापि स्वीकर्तव्यं सुभक्तितः ।
भोजनादौ तथा सर्वैः स्वीकर्तव्यं प्रसादकम् ॥
निवेदितं यत् प्रथमं सर्वैरापोशनान्ततः ।
चुलुकेन समादेयं मूलं स्वाहाऽन्तमुच्चरेत् ।
एतत्सर्वं तदमृतं करोति शृणु शङ्करि ॥ इति ॥

मपञ्चकेषु यदनुकल्पः तदुत्तरस्य मुख्यस्य लाभेऽपि न ग्रहणम् । यथा द्वितीयस्यानुकल्पे तृतीयं मुख्यं न । एवं अग्रेऽपि । तदुक्तं परमानन्दतन्त्रे—

पूर्वानुकल्पे तु परं मुख्यं नैव तु योजयेत् ॥ इति ॥

पञ्चमप्रकारः

पञ्चममुख्यस्य प्रकारस्त्रिविधः । तत्राद्यं दूतीयजनरूपम् । तत्राधिकारिणः सदाशिवादय एव, न मनुष्याः । तदुक्तं परमानन्दतन्त्रे—

अद्वैतज्ञाननिष्ठो यो योऽसौ संसारपारगः ।
स एव यजने दूत्या अधिकारी तु नापरः ॥ इति ॥

अतस्तदनुष्ठानस्य संप्रत्यभावात् तदितिकर्तव्यतां परित्यज्य द्वितीयप्रकारमारभ्योच्यते । तदुक्तं रहस्यार्णवे—

त्रिधा तु पञ्चमं प्रोक्तं दूतीयागस्तदादिमः ।
एष प्रकारो देवेशि योगिराजैकगोचरः ॥
द्वितीयं तु समर्चाऽन्ते [1]दूती पूज्या यथाविधि ।
योनिकुण्डे शिवात्माग्नौ मन्त्रमावर्तयन् क्रमात् ।
रेतोहविर्हावयित्वा देवताप्रीतिमाप्नुयात् ॥

[1] दूतीं पूज्य—श्री.

समर्चाऽन्ते शक्तिपूजाऽन्ते । अयं पञ्चमद्वितीयप्रकारः स्वयोषित्स्वेव । तदुक्तं स्वतन्त्रतन्त्रे—

आद्यं तत्र कलौ देवि त्रिसहस्रान्तमिष्यते ।
द्वितीयं तु भवेत् देवि स्वयोषित्सु सुरेश्वरि ॥ इति ॥

पञ्चमस्य तृतीयप्रकारो रहस्यार्णवे—

अथवा शिष्यभूतां वा चान्यां वाऽपि महेश्वरि ।
प्रार्थितो वा तया स्वेन प्रार्थितां वाऽपि शंकरि ॥
संपूजयित्वा पूजाऽन्ते भोगपात्रं निवेद्य च ।
मनसा तां समागच्छन् देवतायै निवेदयेत् ॥ इति ॥

मनसा तया कृतं संभोगं देव्यै समर्पयेत् इत्यर्थः । एवं त्रिप्रकारं मुख्यम् । अमीषामभावे तत्प्रतिनिधिरुक्तो योगिनीतन्त्रे—

रक्तं तु करवीरं वै तथा कृष्णाऽपराजिता ।
एतत् प्रोक्तं लिङ्गयोन्योः पुष्पं तत्र तु योजयेत् ॥ इति ॥

परमानन्दतन्त्रे—

कुसुमे लिङ्गयोन्योर्वा सकाश्मीरं च चन्दनम् ॥ इति ॥

शुक्रस्थाने चन्दनं शोणितस्थाने काश्मीरं योजयित्वा तत्र मैथुनबुद्धिं विभाव्य श्रीदेव्यै अर्पणं कुर्यात् इति भावः । अयं प्रकारोऽपि सामयिकपूजाऽन्ते शक्तिपूजाऽन्ते वा । अर्घ्यपात्रे पञ्चमप्रतिनिधिमेळनमपि योगिपरम् । तेषामपि कलौ त्रिसहस्रवर्षपर्यन्तं ज्ञेयम् ॥

एवमुक्तो मपञ्चकप्रकारः ॥ ६३ ॥

अवशिष्टकुलाचारधर्माः

अथ पूर्वोक्तावशिष्टाः ये कुलाचारधर्माः तानाह—

सर्वत्र वचनपूर्वं प्रवृत्तिः ॥ ६४ ॥

सर्वत्र कुलशास्त्रविहितक्रियासामान्ये अस्मिन् शास्त्रे विहितं किं अविहितं किं इति परिशोध्य सप्रमाणं कर्म अनुष्ठेयमिति भावः ॥ ६४ ॥

अन्यं धर्ममाह—

दशकुलवृक्षानुपप्लवः ॥ ६५ ॥

श्लेष्मातककरञ्जाम्रनिम्बाश्वत्थकदम्बकाः ।
बिल्वो वटोदुम्बरौ च तिन्त्रिण्या सहिता दश ॥

इति तन्त्रान्तरे प्रसिद्धाः ये कुलवृक्षाः तेषामनुपप्लवः अच्छेदनम् ॥ ६५ ॥

धर्मान्तरमाह—

स्त्रीबृन्दादिमकलशसिद्धलिङ्गिक्रीडाऽऽकुलकुमारी-कुलसहकाराशोकैकतरुपरेतावनिमत्तवेश्याश्यामारक्त-वसनामत्तेभानां दर्शने वन्दनम् ॥ ६६ ॥

स्त्रीबृन्दं सुवासिनीबृन्दम्, न तु विधवानाम्,

सुवासिनीकुमारीणां समूहं मदिराघटम् ॥

इति तन्त्रान्तरवचनात् । आदिमकलशं मदिरापूर्णघटः । सिद्धाः मन्त्रसिद्धिमन्तः, तेषां लिङ्गानि पूर्वं वाराहीप्रकरणे लिखितानि, तच्छालिनः सिद्धलिङ्गिनः । क्रीडासु आकुलाः व्याकुलाः व्यासक्ताः कुमार्यः कन्याः तासां कुलं समूहः । सहकारोऽतिसुगन्धिचूतः, "आम्रश्चूतो रसालोऽथ सहकारोऽतिसौरभः" इत्यमरः । अशोकः प्रसिद्धः । एकतरुः यो वा को वा अद्वितीयः नेत्रसंचारपर्यन्तं तरुः । न च सहकाराशोकात्मक एकतरुः इति शङ्कनीयम्,

मत्तेभं सहकारेच्छाऽप्यशोकं पुष्पितद्रुमम् ।
श्मशानं द्रव्यसौगन्ध्यमेकवृक्षं च कीलकम् ॥

इति तन्त्रान्तरवचनात् । परेतावनिः श्मशानम् । मत्तवेश्या यौवनभरा वेश्या । यद्वा—पानादिना मत्ता । श्यामा यौवनमध्यस्था तारुण्यनिर्भरेति यावत् ।

रक्तवसना रक्तवस्त्रपरिधानवती । मत्तेभः प्रसिद्धः । एतेषां दर्शने वन्दनं नमनं कुर्यात् । तदपि मानसे, स्वधर्माणां प्राकट्ये निरयश्रवणात् ॥ ६६ ॥

पञ्चपर्वसु नैमित्तिकी पूजा

अथ नैमित्तिकपूजामाह—

पञ्चपर्वसु विशेषार्चा ॥ ६७ ॥

पञ्च पर्वाणि—कृष्णाष्टमी कृष्णचतुर्दशी अमा पूर्णिमा संक्रान्तिः इति । तदुक्तं तन्त्रे—

कृष्णाष्टमीचतुर्दश्यौ पूर्णिमाऽमा च संक्रमः ।
एतानि पञ्च पर्वाणि . . . . इति ॥

श्रीदेवीभागवते—

[1]कृष्णाष्टमी च तद्भूता पूर्णिमा संक्रमो रवेः ।
एतानि पञ्चपर्वाणि दुर्लभं तत्र पूजनम् ॥ इति ॥

एतेषु पञ्चपर्वसु विशेषेण विशेषद्रव्येण मुख्यमपञ्चकेन न तु प्रतिनिधिनेति यावत् । नैमित्तिकपूजायां कृष्णाष्टम्यादितिथयः प्रदोषव्यापिन्यः ग्राह्याः । तदुक्तं नित्यातन्त्रे—

प्रदोषव्याप्ततिथ्यादौ कुर्यान्नैमित्तिकार्चनम् ।
विषमे त्वधिकं ग्राह्यं समे परदिनं तथा ।
रात्रिव्याप्तेरलाभे वै पर्वयोगे दिवैव तु ॥ इति ॥

रात्रिव्याप्तेरलाभे इत्यत्र रात्रिपदं प्रदोषपरम् । उभयदिने अव्याप्तौ सङ्क्रान्त्यादौ दिवा पर्वयोगे च परदिने दिवैव पूजनं कुर्यादित्यर्थः ॥

प्रतिनिधिना नैमित्तिकपूजा न कार्या इत्यत्र प्रमाणमुक्तं "मपञ्चकालाभेऽपि नित्यक्रमप्रत्यवमृष्टिः" इत्यस्य व्याख्याने प्रथमखण्डे । नैमित्तिकपूजायामशक्तिः द्विविधा, द्रव्यालाभात् शरीरदेशसंपत्त्यभावाच्च । एवं अशक्तौ पूजाप्रतिनिधित्वेन कर्मोक्तं परमानन्दतन्त्रे—

[1] अत्र श्लोकार्धं गलितं स्यात.

नैमित्तिके यद्यशक्तौ जपेदष्टोत्तरं शतम् ॥ इति ॥

अस्यापि कालः स एव । संक्रान्तिपर्वकालो ज्योतिर्निबन्धे—

प्रागूर्ध्वं दश चैव मेषतुलयोः सिंहे वृषे वृश्चिके
कुंभे षोडश पूर्वतोऽथ मिथुने मीने धनुःकन्ययोः ।
ऊर्ध्वाः षोडश कीर्तिताः प्रथमतः त्रिंशत्तु कर्काटके
चत्वारिंशदधोऽपरास्तु मकरे पुण्यप्रदा नाडिकाः ॥ इति ॥

पञ्चपर्वस्विति कथनात् पञ्चपर्वसु सूत्रानुयायिनः पूजनमावश्यकम् । दमनपवित्रारोपणाद्यकरणे न प्रत्यवायः, करणे अभ्युदयः इति सिद्धम् ॥ ६७ ॥

आरम्भादयः सप्तोल्लासाः

अथैषां कुलधर्माणां अनुष्ठानविधिं वक्तुं तदुपोद्घातभूतान् उल्लासान् विभजते—

आरम्भतरुणयौवनप्रौढतदन्तोन्मनानवस्थोल्लासेषु प्रौढान्ताः समयाचाराः । ततः परं यथाकामी । स्वैरव्यवहारेषु वीरावीरेष्वयथामननादधःपातः ॥ ६८ ॥

आरंभः, तरुणः, यौवनः, प्रौढः, तदन्तः, उन्मनः, अनवस्थः, उपासकस्य सप्त दशाविशेषाः । तत्र आरम्भो नाम उपासनाविषयकेच्छामात्रवत्त्वे सति तन्त्रशास्त्रानभिज्ञत्वम् । सम्यग्गुरुं संपाद्य दीक्षितस्तदनन्तरं तन्त्रशास्त्रपिपठिषाशालित्वं तरुणोल्लासः । ततस्तच्छास्त्रविषयकज्ञानवत्त्वं यौवनोल्लासः । ततः तच्छास्त्रविषयकतत्त्वज्ञानं संपाद्य शास्त्रप्रतिपादितध्यानं कर्तुमीहमानत्वं प्रौढोल्लासः । तदिच्छाऽनन्तरं किंचिदभ्यस्ते ध्यानवत्त्वं तदन्तोल्लासः । ततो ध्यानेन कंचित्कालं मनोलयशक्तिमत्त्वं उन्मनोल्लासः । पूर्णारूढत्वं अनवस्थोल्लासः । अत्र प्रमाणं परमानन्दतन्त्रे—

यस्य यावत्पात्रमुक्तमारम्भस्तस्य तावता ।
तत्पश्चात् तरुणो देवि ईषद्बोधोदये सति ॥
तत्पश्चान्मध्यबोधस्य चोदयाद्यौवनो मतः ।
यत्नान्मनोलयो देवि यदा स्याद्यावता शिवे ॥

अयत्नात्तु लयो यत्र प्रौढ इत्युच्यते शिवे ।
ईषच्चलो लयश्चापि प्रौढान्तः समुदाहृतः ॥
यदा यत्नात् सञ्चलनं तदा स्यादुन्मनः शिवे ।
निश्चलत्वं सर्वथा चेत् तदात्यन्तिक ईरितः ॥ इति ॥

अस्यार्थः—पूर्वं श्रीप्रकरणे अधिकारिभेदेन पात्रसंख्याव्यवस्था सप्रमाणमुक्ता । तावत्पात्रस्यैव व्यवस्थया ग्रहणं आरंभोल्लासः । तदनन्तरं पात्रवृद्धिः ईषदुन्माद-रूपबोधाय क्रियते स तरुणः । ततोऽपि पात्रवृद्धिं संपाद्य मध्यमबोधजननं यौवनः । यावता पात्रसेवनेन स्वाभाविकतया चञ्चलस्य मनसः शास्त्रोक्तध्यानेन स्वप्रयत्नसाध्येन स्थिरता भवेत् तावत्पात्रसेवनं प्रौढः । अयत्नादेव ईषच्चलनं मनसः, अयत्नादेव स्थिरीभावः, ईदृशं यावत् भवति तावत्पात्रसेवनं तदन्तः । यावताऽयत्नान्मनसः स्थिरीभावः मनसश्चलनं तावत्पात्रसेवनं उन्मनः । यावता यत्नेनापि मनश्चालयितुं न शक्नोति सोऽनवस्थः इति ॥

एवं पात्रसेवनवृद्धिं उल्लासभेदेन प्रदर्श्य सप्तसूल्लासेषु मध्ये कस्मिन् कोऽधिकारीति विवक्षायां अधिकारिव्यवस्थाऽप्युक्ता परमानन्दतन्त्रे—

अशक्तावुधबालानामारंभः परिकीर्तितः ।
तरुणो नूतनानां स्याद्भक्तिमात्रस्य यौवनः ॥
प्रौढः स्यादारुरुक्षोर्वै मध्यारूढस्य तत्परः ।
पूर्णारूढस्योन्मनश्च तद्वदात्यन्तिकोऽपि वा ॥ इति ॥

इत्थं च अमीषां वचसां तत्त्वे निर्मथ्यमाने उल्लासलक्षणं मदुक्तमेव पर्यवस्यति । उपासकस्य निरुक्तोल्लासरूपाः दशाविशेषाः स्वान्तःकरणैकवेद्याः । स्वयं विद्वान् स्वीयां दशां सूक्ष्मधिया सम्यक् परिशोधयेत् । एवं परिशोध्य तुरीय प्रौढोल्लासपर्यन्तं शास्त्रप्रथिताः समयाचाराः कार्याः । अत ऊर्ध्वं यथाकामी विहरेत् इति भावः ॥

एवं समयाचारपरिग्रहः त्यागश्चोक्तः अधिकारिभेदेन । तमधिकारं स्वबुद्ध्या अविचार्य यदि कामचारी भवेत् तर्हि पतेदेवेत्याह—स्वैरव्यवहारेष्विति । वीराः पञ्चमषष्ठसप्तमोल्लासिनः । अवीराः पञ्चमोल्लासवन्तः । अनयोः अयथामननात् याथार्थ्यं अविदित्वा यदि स्वैरचारी भवेत् तर्हि पतेदेव निरय इत्यर्थः ।

उल्लासभेदमज्ञात्वा प्राप्य मूढत्वमम्बिके ।
[1]जिह्वालोलुपभावेन चेन्द्रियप्रीणनाय च ।
यः पिबेत् तं तु तामिस्रे मातृकाः पातयन्ति हि ॥

इत्यनेनोक्त एवार्थः प्रकटीकृतः स्वतन्त्रतन्त्रे । इत्यलमतिविस्तरेण ॥ ६८ ॥

अवशिष्टा उपासकधर्माः

एवं प्रसङ्गात् आचारविधिमुक्त्वा पुनः शिष्टान् धर्मान् वक्तुं प्रक्रमते—

रक्तात्यागविरक्ताऽऽक्रमणोदासीनाप्रलोभनवर्जनम् ॥

रक्ता आत्मना साकं भोगे आसक्ता तां न त्यजेत् । एवं स्वस्मिन् विरक्ता या तां बलात्कारेण नोपभुञ्जीत । या चोदासीना तां धनादिना प्रलोभ्य तदुपभोगोऽपि न कार्यः ॥ ६९ ॥

घृणाशङ्काभयलज्जाजुगुप्साकुलजातिशीलानां क्रमेणावसादनम् ॥ ७० ॥

घृणा दया । शङ्का विधिविहितहिंसायां द्वितीयादिसंपादनविषये, एवं प्रथमादिग्रहणे संशयः । जुगुप्सा द्वितीयादिविषयकस्तिरस्कारः अन्तःकरणवृत्तिविशेषः । कुलं गोत्रम् । जातिः ब्राह्मणत्वादिः । शीलं स्वभावः । इमान्यविद्यामूलानि अनेकजन्मस्वनुवृत्तानि क्रमेण तत्तद्भूमिकां प्राप्य अवसादनं त्यागः कार्य इति शेषः ॥

प्रथमभूमिकामारूढः हेयं किं ग्राह्यं किं इति परिशोधयेत् । ततः यत् हेयं तस्य त्यागेच्छां द्वितीयभूमिकाऽऽरूढः कुर्यात् । तृतीयभूमिकाऽऽरूढः त्यागसाधनानि संपादयेत् । चतुर्थभूमिकाऽऽरूढः संपादितसाधनैः सह यत्नं कुर्यात् । पञ्चमभूमिकाऽऽरूढः उक्तधर्मान् मनसि त्यजेत्, न बाह्यतः । षष्ठभूमिकाऽऽरूढः सर्वथा त्यजेत् । एवं स्वस्य तत्तद्भूमिकाऽऽरूढत्वज्ञानं सम्यग्विचार्य निश्चित्य पश्चात् तद्धर्मान् अनुसरेत् । न त्वन्यथा । अन्यथा कुर्वन् पतनायैव कल्पेत । तदुक्तं भागवते—

[1] "स योगिनीनां सततं पशुः स्यादन्यथा पिबन्" इत्यधिकः—अ.

स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।
विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥ इति ॥

अधिकारिभेदेन गुणदोषौ व्यवस्थितौ न वस्तुनि नियतौ इति तच्छ्लोकभावः ॥ ७० ॥

धर्मान्तरमाह—

गुरुप्रगुरुसन्निपाते प्रगुरोः प्रथमं प्रणतिः तदग्रे तदनुरोधेन तन्नतिवर्जनम् ॥ ७१ ॥

गुरुः प्रसिद्धः । प्रगुरुः गुरोः गुरुः । तयोः सन्निपाते एकत्र वासे प्रगुरोः प्रथमं नमस्कारः कार्यः । यावत्पर्यन्तं प्रगुरुसन्निधौ गुरुस्तिष्ठति तावत्पर्यन्तं तं गुरुं न नमेत्, नमस्कारः गुरोः न कार्यः इति भावः । प्रगुरोरनुरोधेनैव तिष्ठेत् ॥

ननु प्रथमं नतिः इत्यनेन नमस्कारानुवादेन प्राथम्यं विधीयते ?, उत "वषट्कर्तुः प्रथमभक्षः" इतिवत् क्रमविशिष्टं नमनं विधीयते ? नाद्यः, उभयोः नतिप्राप्तौ कस्य प्रथमं इति क्रमाकाङ्क्षायां प्रकृते गुरुनमननिषेधे परिशिष्टप्रगुरुनतौ क्रमाकाङ्क्षाऽभावात् प्रथममित्यस्य वैय्यर्थ्यापत्तेः । न द्वितीयः, दृष्टान्तवैषम्यात् । तथा हि वषट्कर्तुरित्यत्र भक्षस्य समासघटकत्वेन समासमध्ये अर्धेनानुवादः अर्धेन विधिः न संभवति इति गत्यभावात् विशिष्टं अपूर्वं विधीयते इत्युक्तम्, इह तथात्वाभावात् ॥

वृद्धान्नमस्कुर्यात् इत्यनेन प्राप्तानुवादसंभवे विशिष्टविधिकल्पनायाः असंभवात् इति चेत्—न । सूत्रे नतिवर्जनं इत्यनेन न नतिसामान्यं निषिध्यते, किं तर्हि कायिकं दण्डवन्नमनं निषिध्यते । मानसं गुरुनमनं भवत्येव ॥

कथं सामान्येन श्रुतस्य नतिवर्जनं इत्यस्य सङ्कोचः प्रमाणमन्तरेति चेत्—न वयं स्वेच्छया संकोचं कुर्मः, किं तु सप्रमाणम् । तदुक्तं परमानन्दतन्त्रे—

गुरोर्गुरौ समीपस्थे प्रगुरुं पूजयेच्छिवे ।
गुरोः पूजाऽऽदिकं सर्वं मनसैव प्रकल्पयेत् ॥ इति ॥

अत्र आदिपदेन नमस्कारो ग्राह्यः ॥

तत्र आदौ प्रगुरोः कायिको नमस्कारः, गुरोश्च मानसः । द्वयोः प्राप्तौ आदौ किं कार्यं इति जिज्ञासायां तत्पूरकतया प्रथममिति पदस्य सार्थक्यसंभवात् केवलक्रममात्रविधायकमिदं, न विशिष्टापूर्वविधिः । तथा च उभयसन्निपाते प्रगुरुं दण्डवत् प्रथमं प्रणम्य गुरुं मनसा प्रणमेत् इति फलितम् ॥

अत्र विधौ निषेधे च नतिपदेन पूजासामान्यं लक्ष्यते, पूर्वलिखितपरमानन्दतन्त्रवचनात् । एवं गुरुप्रगुरुपदं प्रगुरुपूर्वपरंपरासन्निपातेऽपि तुल्यत्वलक्षकम्,

गुरूणां सन्निपाते तु सर्वाद्यं तत्र पूजयेत् ॥

इति योगिनीतन्त्रवचनात् ॥ ७१ ॥

धर्मान्तरमाह—

अभ्यर्हितेष्वपराङ्मुख्यम् ॥ ७२ ॥

अभ्यर्हितेषु श्रेष्ठेषु । श्रेष्ठत्वं चात्र ज्ञानाधिक्येन ग्राह्यम् । अपराङ्मुख्यं औदासीन्याभावः । तेन मम किं कार्यं इति औदासीन्यं न कार्यम् । स्वापेक्षया ज्ञानाधिक्यात् ज्ञेयांशं तस्मादवगच्छेत् ॥ ७२ ॥

धर्मान्तरमाह—

मुख्यतया प्रकाशविभावना ॥ ७३ ॥

प्रकाशः परशिवः तत्त्वातीतः, यदुपनिषत्प्रतिपाद्यं ब्रह्मेति व्यवह्रियते सः, तस्य विभावना मुख्यतया सकलशास्त्राभ्यासफलमिति जानीयादित्यर्थः । तादृशभावनासिद्ध्युपायमेव सर्वं शास्त्रं ब्रूते तदन्यदफलमिति ब्रूते इति तत्त्वार्थं जानीयादिति सूत्ररहस्यतात्पर्यं ज्ञेयम् ॥ ७३ ॥

धर्मान्तरमाह—

अधिजिगमिषा शरीरार्थासूनां गुरवे धारणम् ॥ ७४ ॥

अत्रापि पूर्वसूत्रात् मुख्यतयेत्यनुषज्यते । अधिजिगमिषा यत्र कचित् कार्योद्देशेन गमनेच्छा । सा द्विप्रकारा, स्वार्था गुर्वर्था च । तत्र द्वयोः सन्निपाते

मुख्यतया गुर्वर्थं या जिगमिषा तदनुरोधेन स्वार्थजिगमिषां साधयेत्। एवं शरीरधारणं, अर्थस्य द्रव्यस्य धारणं प्राणधारणं च गुर्वर्थं मुख्यं, स्वार्थं गौणम्। यदि स्वशरीरपातेन गुरोर्हितं भवति तर्हि देहं पातयेत्, न तु स्वोपभोगार्थं शरीरधारणं कुर्यात् इति भावः। अर्थप्राणयोरप्येवमेव ज्ञेयम् ॥ ७४ ॥

धर्मान्तरमाह—

एतदुक्तकरणम् ॥ ७५ ॥

एतदुक्तं गुरूक्तं नीचकार्यमपि अभिमानमुत्सृज्य कार्यम् ॥ ७५ ॥

अपरीक्षणं तद्वचने व्यवस्था ॥ ७६ ॥

तद्वचने गुरुलक्षणविशिष्टगुरुवचनं स्वबुद्ध्या न परीक्षयेत्, सदसद्वेति न विचारयेत्। व्यवस्था अयं सर्वतन्त्रार्थवित् अन्यथा न वदिष्यति, किं तु शास्त्रयुक्तमेव वदिष्यति इति निश्चयं कुर्यात् ॥ ७६ ॥

सर्वथा सत्यवचनम् ॥ ७७ ॥

सर्वथा सङ्कटेऽपि। यद्वा—सर्वथा सहसा सङ्कटमन्तरेत्यर्थः। तेन सङ्कटे विवाहादौ अनृताभ्यनुज्ञा स्मृतिप्राप्ता न बाधिता ज्ञेया ॥ ७७ ॥

परदारधनेष्वनासक्तिः ॥ ७८ ॥

स्पष्टम् ॥ ७८ ॥

धर्मान्तरमाह—

स्वस्तुतिपरनिन्दामर्मविरुद्धवचनपरिहासधिक्कारा-क्रोशत्रासनवर्जनम् ॥ ७९ ॥

स्वस्तुतिपरनिन्दे प्रसिद्धे। "द्वन्द्वान्ते श्रूयमाणं प्रत्येकं संबध्यते" इति न्यायेन विरुद्धपदोत्तरवृत्तिवचनशब्दस्य स्तुतौ निन्दायां मर्मणि चान्वयः। इत्थं च स्तुतिवचनं निन्दावचनं मर्मवचनं विरुद्धवचनं चेति फलितम्। मर्मवचनं

गूढदोषप्रकाशकशब्दः । विरुद्धवचनं तव मरणं भूयात् इत्यादिरूपं श्रवणकटुवचः । परिहासो हेळनं, दरिद्रं दृष्ट्वा त्वं महाराजः तव किङ्कराः वयं स्मः इत्याद्याक्षेपरूपम् । धिक्कारस्तु तुच्छीकरणम् । आक्रोशः रोदनादि । त्रासनं परस्य भयजनकं, इदानीं तव शिरश्छेदनं करोमि इत्यादिरूपम् । उक्तानां अमीषां वर्जनं कार्यम् ॥ ७९ ॥

एवं सामयिकधर्मेषु अत्यन्तं आवश्यकं मुख्यं धर्ममाह—

प्रयत्नेन विद्याऽऽराधनद्वारा पूर्णख्यातिसमावेशनेच्छा चेत्येते सामयिकाचाराः ॥ ८० ॥

प्रयत्नेन सावधानेन जितेन्द्रियेणेति यावत् । श्रीविद्याऽऽराधनद्वारा प्राक्प्रपञ्चितामपूर्णख्यातिं व्युदस्य पूर्णख्यातिः जीवस्य स्वतस्सिद्धा या पूर्णख्यातिः सा प्रकटा भवतीत्याकारिका इच्छा तां सदा कुर्यात् । एते इच्छाऽन्ता निरूपिता धर्माः सामयिकाः समये कुलशास्त्रमर्यादायां वर्तमानाः, ते कुलशास्त्रप्रतिपादिता उपासकधर्मा इति यावत् ॥ ८० ॥

पूर्वोक्तान् इच्छाऽन्तान् आचारान् कण्ठरवेणोक्त्वा ग्रन्थविस्तरभयात् शेषधर्मान् शास्त्रान्तरोक्तान् ग्राह्यत्वेन अतिदिशति—

परे च शास्त्रानुशिष्टाः ॥ ८१ ॥

ये पूर्वोक्ताः तेभ्यः परे अन्यधर्माः ते शास्त्रे तन्त्रान्तरे अनुशिष्टाः तेऽपि ग्राह्याः इति शेषः ॥

तन्त्रान्तरात् ग्राह्यधर्मपरिगणनम्

ते च धर्माः तन्त्रान्तरे प्रसिद्धाः संगृह्यन्ते—

अशोकपुष्पितवृक्षकोकिलमांसकुलशास्त्रपुस्तकानां दर्शने नमनम् ॥

न नग्नां स्त्रियमीक्षेत कुरूपीं प्रकटस्तनीम् ।
दृष्ट्वा तु विकृतां वाऽपि नोपहासं समाचरेत् ॥

योषितामप्रियं नैव कुर्यात् कार्यं प्रियं सदा ।
न स्वपेत् कुलवृक्षाधः तत्पत्रे नैव भोजनम् ॥
वृथा छेदं न कुर्याच्च नमस्कुर्याच्च दर्शने ।
शपथं नैव कुर्वीत कार्ये क्वापि समुत्थिते ॥

इत्येवंरूपाः । तानप्यनुतिष्ठेत् । इत्युक्ताः समयाचाराः ॥

अथ प्रसङ्गात् यद्वचनं मुख्यत्वेन पुरस्कृत्य अन्यानि प्रमाणानि तदुपोद्बलत्वेन स्वीकृत्य तन्त्रान्तरस्पर्शस्त्यक्तः तद्वचनं त्रिपुरारहस्ये—

क्वचित्तन्त्रेषु विस्तारः क्वचित्तन्त्रेषु सङ्ग्रहः ।
एकं तन्त्रं समाश्रित्य सम्यक् कर्मकृते तथा ॥
सर्वं तेन कृतं राम तच्च श्रीगुरुमार्गतः ।
तन्त्रानुक्तं सूचितं च तथाऽन्येष्वतिदूषितम् ॥
अकृतं यत् कर्म राम विकल्पेन विवर्जितम् ।
तदन्यस्मादुपादेयं एष शास्त्रविनिर्णयः ॥ इति ॥

अस्मिन् वचने तन्त्रान्तरात् ग्राह्याणां परिगणनं कृतम् । सूचितं यथा—षोढाचक्रे न्यसेत् । एतावत्सूचनया षोढाचक्रन्यासानुष्ठानक्रमः तन्त्रान्तरात् ग्राह्यः । तथा यदकरणे तन्त्रान्तरे अतिनिन्दा श्रूयते तदपि कस्य चित् अनङ्गभूतम्, परप्रयोगोऽनन्तः, न स्वतन्त्रम्, तदपि परतन्त्रात् ग्राह्यम् । एतद्विस्तरः प्रपञ्चितः प्राक् श्रीक्रमे ॥

तदुदाहरणरूपाणि सूत्रानुयायिभिः कानि कानि कर्तव्यानि इत्याकाङ्क्षायां सूत्रानुयायिनां आवश्यकं परतन्त्रस्थमुच्यते—

नित्यं रहस्यनामसहस्रपाठः । तदपाठे निन्दा अतीव श्रूयते । तत् दर्शितं प्राक् ॥

एवं दीक्षितस्य मृतस्यान्त्येष्टिः तन्त्रप्रतिपादिता आवश्यकी—

अन्त्येष्टिविधिना हीनो मण्डलस्थो न जायते ॥

इति तन्त्रे निन्दाश्रवणात् पूर्वोक्तत्रिपुरारहस्योदाहरणरूपत्वात् ॥

अन्त्येष्टिविधिः

अन्त्येष्टिविधिस्त्रिकूटारहस्ये——

ईश्वर उवाच——

अथातः संप्रवक्ष्यामि विधिमन्त्येष्टिसंज्ञितम् ।
अवश्यं तत् साधको वै कुर्यात् गुर्वादिषु प्रिये ॥ १ ॥
अन्त्येष्टिविधिना हीनो मण्डलस्थो न जायते ।
तस्मात् कुर्यात् प्रयत्नेन चान्त्येष्टिविधिमुत्तमम् ॥ २ ॥
यस्य न क्रियते देवि न दीक्षाकुलमश्नुते ।
नैव कृत्वाऽन्त्येष्टिविधिं कौलश्राद्धे न चार्हता ॥ ३ ॥
सूतकान्ते तदाद्ये वा मासे वर्षेऽपि वा शिवे ।
अन्त्येष्टिमेवं कुर्वीत मण्डलान्तर्गताय वै ॥ ४ ॥
यस्यान्त्येष्टिर्न क्रियते प्रमादेनापि हेतुतः ।
तन्नाम्ना मूलमयुतं जप्त्वा श्राद्धं ततश्चरेत् ॥ ५ ॥
न ज्ञायते यस्य नाम तस्य श्राद्धविधौ शिवे ।
मानवौघाद्यनाम्ना तु सर्वं देवि समाचरेत् ॥ ६ ॥
मृतेऽह्नि पर्वसु तथा तीर्थश्राद्धं समाचरेत् ।
उपासको हि तद्वंश्यो वीरत्वं गच्छतीश्वरि ॥ ७ ॥
बाह्यसंस्कारयोगेन प्रेतत्वाच्च विमुक्तितः ।
मण्डलान्तःप्रवेशार्थमन्त्येष्टिं तु समाचरेत् ॥ ८ ॥
एकान्ते तु शुचौ देशे संकल्प्योदङ्मुखः शिवे ।
आचार्यं चापि ब्रह्माणं वृणुयात् तत्र शक्तितः ॥ ९ ॥
आचार्यस्तु समर्च्याथ नैवेद्यान्ते विधानतः ।
हस्तसम्मितवेद्यां तु सिन्दूररजसा लिखेत् ॥ १० ॥
श्रीयन्त्रं तत्र चावाह्य देवतां शक्तितो [1]यजेत् ।
वितस्तिसंमितां तत्र कुशपुत्तलिकां न्यसेत् ॥ ११ ॥

[1] जपेत्—अ, श्री.

अवाक्शीर्षं तत्र वीरं नाम्नाऽऽवाह्य विधानतः ।
आगच्छ वीरपुरुष तिष्ठ चात्र कृतक्षणः ॥ १२ ॥
विनियुक्तो मया पश्चात् परं धाम प्रपत्स्यसि ।
मण्डलेषु निविष्टः सन् भुवनेषु चिरं स्थितः ॥ १३ ॥
निर्वृतिं परमां प्राप्य याहि तत् परमं पदम् ।
एतज्जपित्वा तत्कर्णे न्यसेत् तस्मिन् षडङ्गकम् ॥ १४ ॥
तन्मात्राकर्षिणीः पञ्च श्रोत्रादिषु तु विन्यसेत् ।
हृदि चित्ताकर्षिणीं तु मूर्ध्नि काळीं तु बीजतः ॥ १५ ॥
मर्मकृन्तनिकां कण्ठे चाङ्कुशाद् ब्रह्मरन्ध्रके ।
प्राणाकर्षिणिकां आं ह्रीं मुखे कृत्वा तु विन्यसेत् ॥ १६ ॥
ततस्तु मन्त्रं संश्राव्यं निष्प्राणं तु [1]विलापयेत् ।
कालधर्मं तु संप्राप्य न क्लेशं प्राप्तुमर्हसि ॥ १७ ॥
न ते मृत्युः शिवो यस्मात् साक्षात् त्वं बहुशक्तिमान् ।
स्वशक्त्या स्वस्वरूपस्य गोपनारूपया ननु ॥ १८ ॥
स्वातन्त्र्याख्यमहाशक्त्या पशुत्वं प्राप्तवानसि ।
गुरोर्वाक्यं स्मर क्षिप्रं भव श्रीशिवरूपकः ॥ १९ ॥
देहाश्रितात् समुत्क्रम्य सर्वकर्तृत्वमाप्नुहि ।
शिवाग्नौ देहसंस्कारं ततः संकलयेच्छिवे ॥ २० ॥
पादजानू नाभीषु हृत्कण्ठमुखलोचने ।
मूर्ध्नि विन्यस्य चक्रेशीं मन्त्रं चक्रात्मकं स्मरन् ॥ २१ ॥
संपूज्य नः विशेषार्घ्यात् तन्नाम्ना तर्पयेत् त्रिधा ।
पार्श्वे मृतग्निं संस्थाप्य यन्त्राद्देवीं समावहेत् ॥ २२ ॥
संपूज्य तु विशेषार्घ्यात् त्रिधा सन्तर्प्य वै ततः ।
पलाशसमिधा मूलेनाष्टोत्तरशतं हुनेत् ॥ २३ ॥
घृतेन स्रुचमापूर्य वीरं तत्र तु निक्षिपेत् ।
दक्षपादं तदोत्तानं स्रुवेणाच्छादयेत् ततः ॥ २४ ॥

[1] विभावयेत्—ब२.

गृहीत्वोत्थाय तद्धस्ते वौषडन्ते हुनेत् ततः ।
पराशक्तिस्वरूपस्य मृतवह्नेर्महामुखे ॥ २५ ॥
पूर्णाहुतिं प्रदास्यामि तन्नाम कथयेत् ततः ।
पश्चात् तस्य तु वीरस्य पूर्णताप्राप्तिहेतवे ॥ २६ ॥
त्वं वीराग्नौ हुतोऽस्मिन् वै मलं भौतिकरूपकम् ।
कार्मं मानसमप्येवं मायिकं चान्तरं तथा ॥ २७ ॥
आणवं च विसृज्याग्नौ धूममार्गेण चाथवा ।
तेजोमार्गेणोर्ध्वलोकं प्राप्तं ते परमं पदम् ॥ २८ ॥
पुनरावृत्तिरहितं व्रज मन्त्रप्रभावतः ।
मूलं च पादुकामुक्त्वा तत्राग्नौ तद्विनिक्षिपेत् ॥ २९ ॥
तत्सङ्ख्ययाऽमृतैर्हुत्वा होमतन्त्रं समापयेत् ।
संपूज्य सामयिकान् पश्चादाचार्यादीन् विसर्जयेत् ॥ ३० ॥
पुनर्दिनद्वयं देवि गुर्वादिद्वारतोऽर्चयेत् ।
कुर्याच्छ्राद्धं चतुर्थेऽह्नि देवि मण्डलमेळनम् ॥ ३१ ॥
वीरपात्रं च संस्थाप्य विश्वान् देवान् प्रपूजयेत् ।
पितामहादित्रितयं वीरं प्रत्यङ्मुखं यजेत् ॥ ३२ ॥
त्रिकोणं मण्डलं तस्य जलमुत्सृज्य वै ततः ।
अद्यप्रभृत्ययं वीरो मण्डलत्रयमध्यगः ॥ ३३ ॥
तेन मित्रेशतां प्राप्तो विहरेच्च यथासुखम् ।
पठन्नेवं वीरपात्रं पितृपात्रे विनिक्षिपेत् ॥ ३४ ॥
ततो मित्रेशरूपाय पित्रे चेति पुनर्हुनेत् ।
सर्वत्र क्रमतो देवि वृद्धे तु त्रितयात्मना ॥ ३५ ॥
पित्रादीनां चतुर्णां तु ततः पूजां समाचरेत् ।
स पृथग्वीरशब्देन सर्वमेवं समापयेत् ॥ ३६ ॥
एषोऽन्त्येष्टिविधिः प्रोक्तः सर्वतन्त्रेषु गोपितः ॥ ३७ ॥

इत्यन्त्येष्टिमूलं दर्शितम् ॥

अथास्यैव संक्षेपेण भावं दर्शयामि—दीक्षिता मृता बाह्यसंस्कारविहीन वीरदूताः, बाह्यसंस्कारेण संस्कृता वीराः, बाह्यसंस्कारेण संस्कृता उक्तसंस्कारसंस्कृता मण्डलान्तःप्रविष्टा इति तन्त्रशास्त्रप्रसिद्धिः । बाह्यसंस्कारमन्तरा नेदं कर्म ॥ १—३ ॥ सूतकान्ते सपिण्डीकरणान्ते, तदुत्तरमेव वीरत्वप्राप्तेः ॥ ४—८ ॥ आचार्यब्रह्मोभय-वरणाशक्तौ आचार्यस्यैव वरणमित्याह—शक्तित इति ॥ ९ ॥ नैवेद्यान्ते आवरणपूजोत्तरनैवेद्यान्ते ॥ १० ॥ श्रीचक्रदेवताऽऽवाहनोत्तरं यथाविभवं पूजा कार्येत्याह—शक्तितो यजेदिति । तत्र निर्मितश्रीयन्त्रे । कुशपुत्तलिकां कुशपुरुषम् ॥ ११ ॥ नाम्ना अमुकानन्दनाथं वीरं नमः । अज्ञाने गगनानन्दनाथं वीरमिति ॥ १२—१४ ॥ तन्मात्राकर्षिणीः शब्दाकर्षिण्यादयः पञ्च श्रोत्रादि-पञ्चसु ज्ञानेन्द्रियेषु । बीजतः कालीबीजोत्तरं, क्रीं काल्यै नम इति ॥ १५ ॥ अङ्कुशात् क्रों एतदुत्तरं मर्मकृन्तिन्यै नम इति । आं ह्रीं प्राणाकर्षिण्यै नम इति ॥ १६ ॥ श्राव्यमन्त्रश्च कालधर्ममित्यादिः ॥ १७—२१ ॥ तन्नाम्ना अमुकानन्दनाथाय वीराय नमः । षोडशपञ्चान्यतमोपचारैरभ्यर्च्य अन्ते देवतानाम द्वितीयान्तं तर्पयामीति पठित्वा विशेषार्घ्येण तर्पयेत् । वेद्याः पार्श्वे होमप्रकरणोक्तविधिना विवाहान्ते मरणसंस्कारेणापि संस्कृतमग्निं संस्थाप्य यन्त्रात् कल्पितयन्त्रस्थां अग्नौ देवीमावाहयेत् ॥ २२ ॥ संपूज्य पञ्चोपचारैः तां सन्तर्प्य ॥ २३ ॥ घृतेन स्रुचं संपूर्य हविषः स्थाने स्रुच्येव वीरं निक्षिप्य ॥ २४—२९ ॥ तत्संख्यया समित्संख्यया । मूलेनैव होमतन्त्रं समापयेत् इति । अनेन होमप्रकरणोक्तोत्तराङ्गप्राप्तिः ॥ ३० ॥ कुर्याच्छ्राद्धमिति नाम्ना कौळश्राद्धीययावद्धर्मातिदेशः । मण्डलमेळनश्राद्धमित्यस्य नाम । अत्र विश्वेदेवा वीराः । वीरात् प्राक्तनास्त्रयः पुरुषाश्च देवताः । वीरात् प्राक् पुरुषा अपि तान्त्रिकान्त्येष्टिसंस्कृता यदि स्युः, तर्हि मित्रेशादिस्वरूपताप्राप्तिसिद्ध्यै एकैकोद्देशेन मण्डलप्रवेशलाभाय अन्त्येष्टिप्रतिनिधिभूतं अयुतं मूलं जप्त्वा पश्चात् वीरं संस्कृत्य मण्डलमेळनश्राद्धं कुर्यात् । दीक्षितवंशग्रहणात् अदीक्षितस्यापि तद्वंश्यस्य मुख्यं प्रतिनिधिरूपं वा इदं कर्म भवति ॥ ३१ ॥ अथ कौलश्राद्धाद्यो विशेषः तमाह—वीरपात्रमित्यादिना । वीरस्य पूजा प्रत्यङ्मुखस्य पूजनं विशेषः ॥ ३२ ॥ वीरस्य पाद्यमण्डलं त्रिकोणं, तथा तत्पात्रासादनमण्डलमपि । पितृपात्रासादनानन्तरं

वीरपात्रासादनं तद्दक्षिणतः । अत्र ब्राह्मणपञ्चकं सति संभवे । अशक्तौ त्रयं— विश्वेदेवार्थमेकः, पितामहाद्यर्थमेकः, वीरार्थमेकः । कौळश्राद्धवत् पात्रहवनम् । वीरस्यापि कौळश्राद्धे "संविन्मये" इत्यारभ्य "तद्भवेच्छिवं" इत्यन्तेन विहितो यो जलोत्सर्गः तदनन्तरं "अद्यप्रभृति" मन्त्रपठने वीरपात्रस्थं कुलद्रव्यं पितृपात्रे क्षिपेत् ॥ ३३–३४ ॥ वीरस्य प्रथमहवनं दीपान्तज्योत्तरं, पात्रसमर्पणमपि अमुकाय वीराय स्वाहेति । तदूर्ध्वं वीरपदं त्यक्त्वा मित्रेशरूपाय स्वाहेति पठेत् । पितामहे षष्ठीशरूपाय प्रपितामहे ओ[उ]ड्डीशरूपाय, वृद्धप्रपितामहे मित्रेश-षष्ठीश-ओ[उ]ड्डीशरूपाय इति पठेत् । क्रमस्तु पूर्ववत् । अस्मिन् श्राद्धे इदं द्वितीयं हवनम् ॥ ३५ ॥ शेषं इतः परं कौलश्राद्धवदासमाप्ति ज्ञेयम् ॥ ३६–३७ ॥

कौलश्राद्धविधिः

अथ कौलश्राद्धधर्माणां अत्रातिदिष्टत्वात् तज्ज्ञानाय कौलश्राद्धविधिरुच्यते । सोऽपि रुद्रयामलान्तर्गतदेवीरहस्ये पञ्चषष्टितमे पटले अस्ति—

अधुना श्रोतुमिच्छामि कौलश्राद्धविधिं तथा ।

इति पार्वतीप्रश्ने ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
यस्य [1]स्मरणमात्रेण देवताप्रीतिमाप्नुयात् ॥ १ ॥
कौलश्राद्धमकृत्वा तु चान्यैः श्राद्धसहस्रकैः ।
नैव तृप्तिर्भवेद्देवि पितृणां परमेश्वरि ॥ २ ॥
मृताहे तद्द्वितीये वा कृतनित्यक्रियः शुचिः ।
चतुरो ब्राह्मणान् द्वौ वा दीक्षायुक्तान् निमन्त्रयेत् ॥ ३ ॥
संकल्प्याथ विशेषार्घ्यपुरतः पात्रयुग्मकम् ।
विश्वेषां चैव देवानां पितृणां च क्रमाच्छिवे ॥ ४ ॥
आवृतिं पूज्य नैवेद्यं कृत्वा शक्तिं प्रपूज्य च ।
चर्यानाथस्वरूपान् वै विश्वान् देवांस्तु पूजयेत् ॥ ५ ॥

[1] श्रवण—श्री.

मित्रेशादिस्वरूपांश्च पितॄन् संपूजयेत् क्रमात् ।
व्यष्ट्या वाऽथ समष्ट्या वा पूर्वोत्तरमुखान् शिवे ॥ ६ ॥
आसनावाहने कृत्वा प्रार्थयेत्तु कृताञ्जलिः ।
विश्वेदेवाः स्वागतं वो यज्ञेऽस्मिन् स्थीयतां क्षणम् ॥ ७ ॥
सावधानेन मनसा स्वीकुर्वन्तु सभाजनम् ।
चतुरश्रे तथा वृत्ते मण्डले पूज्य पादयोः ॥ ८ ॥
क्षाळनं वाऽथ सामान्यादर्घ्यादर्घ्यं विनिक्षिपेत् ।
आचामयेत्तान् वस्त्रादिदीपान्तेन पितॄन् यजेत् ॥ ९ ॥
स्वाहाऽन्तनाम्ना तत्पात्रात् तेभ्यः पात्रं प्रकल्पयेत् ।
पूर्ववन्मण्डलं कृत्वा पूज्य भोजनपात्रकम् ॥ १० ॥
परिवेष्याभ्युक्ष्य तद्वै दत्वा हस्ते तथोदकम् ।
संविन्मये महापात्रे आनन्दमयभोज्यकम् ॥ ११ ॥
भोक्ता त्वं पुरुषः साक्षी महाशक्तिर्महेश्वरः ।
सर्वमन्नं शक्तिमयं भोक्ता साक्षात् परः स्वयम् ॥ १२ ॥
तस्मात् सर्वं शिवः साक्षात् भोक्ता दाता च भोज्यकम् ।
विश्वेदेवा देवता नो भुञ्जन्त्वत्र मखे मम ॥ १३ ॥
यावच्छक्यं तावदिह भोक्तव्यं स्वस्थमानसैः ।
पेयं खाद्यं भक्ष्यभोज्यं सर्वं वस्तु समर्पितम् ॥ १४ ॥
पितॄणां परमानन्दहेतवे तद्भवेच्छिवम् ।
इत्येवं तोयमुत्सृज्य पितृस्थानेऽपि चोत्सृजेत् ॥ १५ ॥
तत आपोशनं दत्वा यथेष्टं भोजयेत् ततः ।
यथासंभवपक्वाद्यैः तृप्ता यूयं भविष्यथ ॥ १६ ॥
कुलद्रव्यैश्चर्वणैश्च पितॄणां शान्तिहेतवे ।
प्रार्थ्यैवं भोजनस्यान्ते प्रार्थयेत् पुनरेवच ॥ १७ ॥
विश्वेदेवाश्च पितरस्तृप्ताश्चास्मिन् महामखे ।
सर्वं समिष्टं संपन्नं भवत्वत्र यथेप्सितम् ॥ १८ ॥

उत्तरापोशनं दत्वा तथा ताम्बूलदक्षिणाः ।
विश्वान् देवांस्तथा पितॄन् देवतारूपमास्थितान् ॥ १९ ॥
नमः पुरस्तात् पश्चाच्च पार्श्वयोरपि वो नमः ।
अनेन कौलश्राद्धेन विधिना पितृमुख्यकाः ॥ २० ॥
परमं पदमास्थाय भुञ्जन्त्वेते सुनिर्वृताः ।
परिक्रम्य नमस्कृत्य चैवं पश्चाद्विसर्जयेत् ॥ २१ ॥
यथाऽऽगतं च पितरो गच्छन्त्वस्मान्महामखात् ।
विश्वैर्देवैश्च सहिताः प्रसन्नाः सन्तु मे चिरम् ॥ २२ ॥
ततः सामयिकान् पूज्य कर्म देव्यै समर्पयेत् ।
इत्येवं कथितो देवि कौलश्राद्धविधिः परः ॥ २३ ॥ इति ॥

अस्यापि संक्षेपेण गूढमर्थं प्रकटयामि । श्राद्धसंकल्पानन्तरं ब्राह्मणान् वृत्वा द्वारपूजाऽऽदिसामान्यविशेषार्घ्यपात्रासादनोत्तरं विशेषार्घ्यपुरतः अग्रभागे देवी-विशेषार्घ्यपात्रमध्ये इति निष्कर्षः । विशेषार्घ्यपात्रासादनप्रकारेण विश्वेदेवपात्रं पितृपात्रं चासादयेत् ॥ ३–४ ॥ ततः सुवासिनीपूजाऽन्तपूजाशेषमनुष्ठाय एकस्मिन् विप्रे चर्यानाथस्वरूपान् विश्वान् देवान् प्रपूजयेत् ॥ ५ ॥ मित्रेशस्वरूपं पितरं षष्ठीशस्वरूपं पितामहं ओ[उ]ड्डीशस्वरूपं प्रपितामहं प्रत्येकब्राह्मणपक्षे । एकब्राह्मणपक्षे मित्रेशषष्ठीशोड्डीशरूपान् पितृपितामहप्रपितामहान् इत्यावाहनं कृत्वा, आसनं दत्वा, उक्तमन्त्रेण प्रार्थ्य, विहितपात्रमण्डले पादौ प्रक्षाळ्य, सामान्यार्घ्याद र्घ्यं दत्वा, आचमनं दत्वा, दीपान्तं यथाविभवं विश्वान् देवान् पितॄंश्च पूजयेत् । पितृपदं देवानामप्युपलक्षकम् ॥ ६–९ ॥ ततः चर्यानाथस्वरूपेभ्यः विश्वेभ्यो देवेभ्यः स्वाहा इति विश्वेदेवपात्रं तद्विप्रस्य अर्पयेत् । एवमेव पित्रादेरपि पात्रसमर्पणम् । ते त्वमन्त्रमेव होमं कुर्युः, होममन्त्रस्य स्वाहाऽन्तस्य श्राद्धकर्त्रा पूर्वमेव पठितत्वात् । अमन्त्रकहोमनिषेधशास्त्रं सामयिकप्रकरणस्थं तत्रैव विश्रान्तम्, नात्र प्रवर्तते । वस्तुतोऽत्र स्वाहाऽन्तमन्त्रपाठात् नामन्त्रकं हवनम् । पाद्ये देवस्य चतुरश्रं पितॄणां वृत्तमुक्तं प्राक् । तत्तद्देवभोजनपात्राधः मण्डलम् ॥ १०–१४ ॥ पितृस्थाने चोत्सृजेत् इति चकारेण विश्वेदेवपात्रस्याप्युत्सर्गः सूचितः । तत्र पितृस्थाने विश्वेदेव-पदप्रक्षेपः ॥ १५ ॥ शेषं स्पष्टम् ॥ १६–२३ ॥

अन्त्येष्टिकौलश्राद्धयोरावश्यकत्वम्

कौलश्राद्धमपि सूत्रानुसारिणामावश्यकं, अकरणे निन्दाश्रवणात् । यद्यपि त्रिपुररहस्ये "तथाऽन्येष्वतिदूषितं" इति श्रवणात्—अन्त्येष्टिकौलश्राद्धयोः नातिदोषः श्रूयते, अतिदूषितं नाम पुनः पुनः असकृन्निन्दाश्रवणं, प्रकृते सकृदेव निन्दा श्रूयते, रहस्यनामपाठे निन्दा त्वसकृत् श्रूयते, तद्वदत्राभावात्—सूत्रानुयायिनामनावश्यकमिति प्रतिभाति । अन्यथा अतिदूषितमित्यत्र अतिपदानर्थक्यं स्यात् । तथाऽपि आपस्तम्बादयः स्वसूत्रे अनुक्तं अन्यसूत्रोक्तं अन्यत् किमपि न गृह्णन्ति, भारद्वाजोक्तं अन्त्येष्टिप्रयोगं तु जगृहुः । तत एव ज्ञायते अन्त्येष्टिसंस्कार आवश्यक इति । तद्वदत्रापीत्युन्नेयम् ॥

किं च अतिदूषितमित्यस्य नासकृन्निन्दाश्रवणमर्थः । किं तु अकरणे महानिष्टफलसाधनत्वप्रतिपादनम् । तच्च प्रकृतेऽप्यस्ति । जन्मप्रभृति उपासनासंपादनं मण्डले प्रवेशार्थम् । मण्डलं नाम पुनरावृत्तिरहितः ब्रह्मलोकादपि वरिष्ठः ओघत्रयनिवासाधारभूतः स्थानविशेषः । अन्त्येष्ट्यकरणे तल्लाभाभावे महापुरुषार्थहानिसाधनत्वप्रतिपादनात् अतिदूषितमित्यवश्यं अनुष्ठेयम् । एवमेव श्राद्धेऽपि । इत्यलं भूयसा ॥

प्रायश्चित्तविधिः

अथ विहितकर्मसु पुरुषदोषेण अन्यथाभावोऽवश्यंभावी । तदर्थं तत्प्रायश्चित्ताकाङ्क्षायां प्रायश्चित्तं प्रसङ्गाल्लिख्यते । तदुक्तं स्वतन्त्रतन्त्रे त्रयोदशपटले—

देव्युवाच—

देवेश श्रोतुमिच्छामि नित्यनैमित्तिकादिषु ।
प्रायश्चित्तं तु सन्ध्याऽऽदिपूजाकर्मसु च स्फुटम् ॥ १ ॥

श्रीभैरव उवाच—

शृणु देवि प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ।
अङ्गाङ्गिभेदात् द्वैविध्यं कर्मणः परमेश्वरि ॥ २ ॥

अङ्गेऽपि देवि द्वैविध्यं मुख्यगौणत्वभेदतः ।
गौणाङ्गलोपे मूलस्य दशधा जपतः शुचिः ॥ ३ ॥
मुख्याङ्गलोपे शतधा अङ्गिलोपे पुनःक्रिया ।
अङ्गाङ्गिभेदं देवेशि शृणु विस्तरतः शिवे ॥ ४ ॥
जपे षडङ्गन्यासस्तु गौणाङ्गं परिकीर्तितम् ।
ध्यानमृष्यादिकं पूजा मुख्याङ्गमिति कथ्यते ॥ ५ ॥
सन्ध्यायां मूलदेव्यर्घ्ये जपे चाङ्गित्वमिष्यते ।
मार्ताण्डवाग्भवाद्यर्घ्ये मुख्याङ्गत्वं प्रकीर्तितम् ॥ ६ ॥
आकालमङ्गिलोपे तु पुनः कर्म भवेदिह ।
आपद्यङ्गस्य लोपे तु कालत्यागेऽपि नास्त्यघम् ॥ ७ ॥
सन्ध्याऽन्तरे तु संप्राप्ते शतमष्टोत्तरं जपेत् ।
आशौचद्वितये देवि प्रधानं मानसं चरेत् ॥ ८ ॥
पूजाऽऽदिकं समानं वै बाह्यमन्येन कारयेत् ।
क्षयाशौचे देवताया मण्डले न व्रजेच्छिवे ॥ ९ ॥
अज्ञानेन गतश्चेद्वै देवताशापमाप्नुयात् ।
तद्दोषपरिहारार्थं पुनर्मण्डलमाचरेत् ॥ १० ॥
देवतां पयसा स्नाप्य मूलात्तर्पणमाचरेत् ॥ ११ ॥
पञ्चवारं घृतेनैव होमं कुर्याद्वरानने ।
ब्राह्मणान् भोजयेत् पश्चात् देवताशान्तिमाप्नुयात् ॥ १२ ॥
त्रिरात्रं सन्ध्यया हीनः सहस्रं जपमाचरेत् ।
अहोरात्रमनश्नन् वै ततः शुद्धो भविष्यति ॥ १३ ॥
अष्टरात्रमसन्ध्यो वै त्रिरात्रोपोषणाज्जपात् ।
मासेऽतीते तु देवेशि पतितश्च बहिष्कृतः ॥ १४ ॥
मण्डलाद्बाह्यगः सर्वकर्मायोग्यो महेश्वरि ।
एष एव जपे मार्गः मासादूर्ध्वं पतत्यधः ॥ १५ ॥
पूजायां शृणु देवेशि भेदमङ्गाङ्गिनोः स्फुटम् ।
आवृतिर्गुरुनित्याऽर्चासमयाम्नाययोरपि ॥ १६ ॥

पूजात्रयं जपश्चैव प्रधानं पूजने मतम् ।
पात्रसंस्था पीठपूजा बलिर्होमस्तथैव च ॥ १७ ॥
अर्पणं देहशुद्धिश्च मुख्याङ्गं संप्रकीर्तितम् ।
शक्तिसामयिकार्चादि गौणाङ्गमिति कथ्यते ॥ १८ ॥
नित्यकर्मण्यङ्गलोपे न वैगुण्यं तु कर्मणः ।
काम्ये तदेकदेशस्य लोपे वैगुण्यमेव हि ॥ १९ ॥
अङ्गलोपे तु मूलेन तर्पणाष्टकमुच्यते ।
अष्टोत्तरशतावृत्त्या मुख्याङ्गे शृणु पार्वति ॥ २० ॥
शतधा तर्पणं जापः सहस्रं वा स्मृतं शिवे ।
व्यत्यासे कर्मणोऽप्येवमङ्गाङ्गेषु स्मृतिः सकृत् ॥ २१ ॥
अङ्गं तन्त्रेण वा कुर्यात् कार्यकारणयोर्विना ।
अन्तरे च न कुर्वीत भिन्नार्थेष्वपि चेश्वरि ॥ २२ ॥
विन्दुतर्पणव्यत्यासे प्रायश्चित्तं शृणु प्रिये ।
मुख्याद्गौणार्पणे देवि पुनस्तर्पणमाचरेत् ॥ २३ ॥
मूलाष्टकस्मृतिर्वाऽपि व्युत्क्रमे शृणु पार्वति ।
देवतां शङ्खतोयेन मूलेनाभ्युक्ष्य वै शिवे ॥ २४ ॥
पुष्पाञ्जलिं समभ्यर्च्य त्रिः सन्तर्प्य च प्रार्थयेत् ।
पुनर्यथोक्तं सन्तर्प्य जपेदष्टोत्तरं शतम् ॥ २५ ॥
मुख्यगौणविभेदं च शृणु देवेशि तत्त्वतः ।
मूलदेवीतर्पणात्तु सर्वं गौणं महेश्वरि ॥ २६ ॥
ततः परं गुरोः पङ्क्तिं नित्यामण्डलके ततः ।
आवृत्तिश्च ततो देवी क्रमाद्गौणं भवेच्छिवे ॥ २७ ॥
एतद्विभेदमज्ञात्वा यः कुर्यात् तर्पणं शिवे ।
तं भैरवीगणाः क्रुद्धाः विकुर्वन्ति पदे पदे ॥ २८ ॥
नवपात्रे व्यवस्थैव सप्तपात्रेऽपि पार्वति ।
पञ्चपात्रेऽपि तुल्या स्यात त्रिपात्रे मनसा स्मरेत् ॥ २९ ॥

पात्रद्वयं तु प्रत्यक्षपूजनेनैव कारयेत् ।
आद्यप्रतिनिधिर्यत्र तत्र पात्रद्वयं स्मृतम् ॥ ३० ॥
तत्र द्वयाधिकं नैव कार्यं पात्रं सुरेश्वरि ।
द्रव्यप्रतिनिधिं चात्र प्रसङ्गात् कथयामि ते ॥ ३१ ॥
आद्याभावे तु घुटिकासारयुक्तजलार्पणम् ।
मन्त्रयं चाष्टगन्धेन समानघुटिका भवेत् ॥ ३२ ॥
तदभावे नारिकेळजलं पात्रे तु कांस्यके ।
तदभावे ताम्रपात्रे क्षीरं वाऽथ गुडोदकम् ॥ ३३ ॥
अथवा गन्धतोयेन पूजां नैव तु लोपयेत् ।
द्वितीयभेदं देवेशि शृणु संयतमानसा ॥ ३४ ॥
पूर्वोक्तभेदान्यतमा पलाण्डुर्वाऽऽर्द्रकं तु वा ।
प्रत्यक्षाद्ये द्वितीयादिप्रत्यक्षं देवि योजयेत् ॥ ३५ ॥
द्रव्यप्रतिनिधौ देवि तर्पणं कुसुमेन वै ।
स्वात्मीकारादिकं नास्ति अक्षतैर्गुरुपूजनम् ॥ ३६ ॥
संपूर्णमन्त्रपाठेन स्वात्मीकारं तु भावयेत् ।
पूर्णपूजां भावयन् वै बाह्यपूजां समाचरेत् ॥ ३७ ॥
घुटिकायामार्द्रकं स्यात् स्वात्मी[1]कारेऽपि विद्यते ।
तत्र पात्रद्वयं देवि न्यूनं नैव तु कारयेत् ॥ ३८ ॥
शक्तिपूजा विना तत्त्वशोधनं संभवेच्छिवे ।
प्रत्यक्षे तु त्रिपात्रं वै गौणात् गौणतरं भवेत् ॥ ३९ ॥
आनुकूल्ये त्रिपात्रादि नैव कर्तव्यमीश्वरि ।
प्रत्यक्षयुग्मपात्रं वै कृत्वा शापमवाप्नुयात् ॥ ४० ॥
क्वचिन्मयैवोपदिष्टः परमापत्तिकालिकः ।
तृतीयभेदं देवेशि प्रोक्तेष्वन्यतमं स्मृतम् ॥ ४१ ॥
वटिका चणपिष्टस्य विजयायुक्तदाकृतिः ।
मूलकं वा महादेवि पलाण्ड्ववधिको वटिः ॥ ४२ ॥

[1] कारोऽपि—ब२.

आर्द्रकान्तं मूलकं स्यात् क्षीरादौ मन्त्रसंजपः ।
प्रत्यक्षतो द्वितीये तु एतत्प्रत्यक्षमिष्यते ॥ ४३ ॥
द्वितीयादिकपर्यायं स्थापयेदष्टदिक्ष्वथ ।
अथवा मन्त्रजापो वै नित्यं तुर्यं तु सर्वदा ॥ ४४ ॥
पञ्चमे शृणु देवेशि द्वैविध्यं चोक्तमेव ते ।
आद्यं तत्र कलौ देवि त्रिसहस्रान्तमिष्यते ॥ ४५ ॥
द्वितीयं तु भवेत् देवि स्वयोषिति सुरेश्वरि ।
अथवा लिङ्गयोन्योश्च कुसुमं तत्र योजयेत् ॥ ४६ ॥
काश्मीरपङ्के मूलेन श्वेतचन्दनपङ्ककम् ।
संयोज्य योजयेत् देवि मूलाष्टजप एव वा ॥ ४७ ॥
द्रव्यं साक्षात् पञ्चमं तु दुर्लभं तु कलौ युगे ।
जितेन्द्रियाणां धीराणां योगिनां सुलभं भवेत् ॥ ४८ ॥
कदाचिच्छक्तितः पूर्वं क्षोभे जाते शिवस्य वै ।
शक्त्यसंतोषतो देवि नाशमेति स वै पुमान् ॥ ४९ ॥
तस्मात् स्वस्यां परस्यां वा अन्त्यं नैव समाचरेत् ।
प्रतिनिध्यैव कर्तव्यं कलौ देवि सुनिश्चितम् ॥ ५० ॥
उपासको नु नित्यं वै परिवारार्चनं चरेत् ।
नित्यामण्डलकं चैव गुरुमण्डलकं तथा ॥ ५१ ॥
पञ्चिकां समयां चैव आम्नायसमयां यजेत् ॥ ५२ ॥
अथवा दिननित्यास्तु नित्यां च गुरुमण्डलम् ।
समष्ट्या पञ्चिकां चापि पूजयेदापदादिषु ॥ ५३ ॥
परमापत्तिकाले तु आवृतेः पञ्चकं त्रिकम् ।
समष्ट्या चेतरत् सर्वं परमापत्तिगोचरम् ॥ ५४ ॥
पूजाऽन्तरे महाविघ्ने प्राप्ते संशृणु निश्चितम् ।
पूर्वं संकल्पतो देवि न दोषस्तत्र विद्यते ॥ ५५ ॥
संकल्पानन्तरं देवि विसृज्योपोषणं चरेत् ।
सपर्यां मानसीं कुर्वन् पुनः पूजां समाचरेत् ॥ ५६ ॥

आवाहनानन्तरं तु महाविघ्नो भवेद्यदि ।
पात्रादिकं समुद्वास्य देवतां स्थापयेत् तथा ॥ ५७ ॥
कार्यान्ते तत्र पात्रादिस्थापनं संविधाय च ।
संकल्पेन विना देवि आवृतिं तु समापयेत् ॥ ५८ ॥
यावन्तो दिवसा देवि व्यतीतास्तावदावृतिम् ।
पायसेन हुनेत् तस्य दोषस्येहापनुत्तये ॥ ५९ ॥
मूलेनाष्टोत्तरशतं हुत्वा पूज्य च सामयान् ।
क्षमापयेत् ततो देवीं गुरुं चापि सुखी भवेत् ॥ ६० ॥
उद्वासनात्तु पूर्वं वै पूजाऽन्ते सङ्कटे स्थिते ।
झटित्युद्वास्य देवेशीं विसृजेन्मण्डलं ततः ॥ ६१ ॥
अतीतविघ्ने देवेशि सहस्रं प्रजपेन्मनुम् ।
अपराधान्मुच्यते वै दोषस्तत्र न विद्यते ॥ ६२ ॥
अथोपघातदोषस्य प्रायश्चित्तं शृणु प्रिये ।
देवताहेतुकलशविशेषार्घ्योपघाततः ॥ ६३ ॥
कर्तुर्मृत्युस्तु षण्मासात् तस्य शान्तिं ब्रवीमि ते ।
यस्योपघातः संस्थाप्य पुनस्तत् पूजयेत् ततः ॥ ६४ ॥
पश्चात् त्र्यहमनश्नन् वै जपेत् दशसहस्रकम् ।
पूजयेच्च यथाशक्ति देवीं क्षीरेण स्नापयेत् ॥ ६५ ॥
अष्टोत्तरशतं हुत्वा गुरुं पूज्य च मुच्यते ।
आवाहनस्थापनाच्च पूर्वं जपसहस्रकम् ॥ ६६ ॥
उपघातात्तत्स्फुटिते महासांतपनं चरेत् ।
उपघाते तु शंखस्य धीर[ह्य]ष्टोत्तरसहस्रकम् ॥ ६७ ॥
दीक्षाऽऽदिष्वप्येवमेव शान्तिः स्यादुपघातके ।
दीपोपघाते देवेशि पुनर्मण्डलमाचरेत् ॥ ६८ ॥
साधकानां दत्तपात्रस्योपघाते शतं जपः ।
पूजकानां साधकानां तुल्यमेतद्विधीयते ॥ ६९ ॥

प्रसङ्गादत्र सर्वेषां आचारं कथयामि ते ।
विप्रार्चायां तु सर्वेषां स्वात्मीकारो विधीयते ॥ ७० ॥
अनन्तरस्य पूजायां पूर्वस्यानर्हतेप्यते ।
न्यूनदीक्षावतां चापि व्यवस्थैषा सुसम्मता ॥ ७१ ॥
दीक्षाभेदमथो वक्ष्ये बाला प्रथमतो मता ।
द्वितीया पञ्चदश्युक्ता चतुराम्नायजा परा ॥ ७२ ॥
पञ्चाम्नाया चतुर्थी स्यात् षोडश्यन्ता तु पञ्चमी ।
षष्ठी चरणविद्याऽन्ता सप्तमी वासनान्तका ॥ ७३ ॥
रहस्यान्ता चाष्टमी स्यात् [1]नवमी षोडशी परा ।
षड्दर्शनान्ता दशमी महावाक्यान्तिमा ततः ॥ ७४ ॥
द्वादशी श्रीपादुकाऽन्ता न्यूनं तत्पूर्वमुच्यते ।
विप्रक्षत्रिययोर्देवि सर्वदीक्षाऽर्हता भवेत् ॥ ७५ ॥
रहस्यान्ता तु वैश्यस्य षोडश्यन्ता तु शूद्रके ।
श्रेष्ठवर्णाद्दीक्षणं स्यादभावे तुल्यवर्णतः ॥ ७६ ॥
शूद्रो नैव गुरुर्देवि तस्मात् दीक्षां परित्यजेत् ।
अनर्हाद्दीक्षणं लब्ध्वा परित्यागो मनोः स्मृतः ॥ ७७ ॥
न्यूनाश्रमेऽनन्तरे वा गुरुशक्त्योस्तु संमतः ।
स्वात्मीकारो महादेवि निषेध[षिद्ध]स्त्वितराश्रमः ॥ ७८ ॥
अन्येषां तु प्रमादेन स्याच्चेज्जपसहस्रकम् ।
उच्छिष्टभक्षणेऽप्येषा व्यवस्था देवि सम्मता ॥ ७९ ॥
न्यूनवर्णाश्रमाणां तु त्रिरात्रोपोषणं तथा ।
शक्त्यभीष्टे तु नैषा स्याद्व्यवस्था तत्र चोत्तमा ॥ ८० ॥
दीक्षिता यदि लभ्येत दीक्षाहीनां परित्यजेत् ।
अलभ्या यदि चान्या स्यात्तदा संस्कारमाचरेत् ॥ ८१ ॥
मूलशङ्खोदकैः प्रोक्ष्य पञ्चबाणषडङ्गके ।
विन्यस्य तस्या देहे तु दक्षकर्णे श्रियं वदेत् ॥ ८२ ॥

[1] विद्याषोडशका परा—ब२.

कन्याया नास्ति संस्कारः विधवां तु परित्यजेत् ।
मातरं गुरुपत्नीं च ज्येष्ठपत्नीमृते शिवे ॥ ८३ ॥
बालोपदेशिनां पात्रत्रितयं तत्त्वशोधनम् ।
पात्रं दक्षकरे गृह्य वामहस्तेन तर्पणम् ॥ ८४ ॥
महावाक्यान्तयोग्यानां तत्त्वपात्रचतुष्टयम् ।
तर्पणं पूजनं च स्यात् पादुकाऽन्ते तु पूजनम् ॥ ८५ ॥
आत्मविद्याशिवाख्यादितत्त्वपात्राणि वै शिवे ।
समष्टिरथपूर्णं च सांकर्यं त्रितये भवेत् ॥ ८६ ॥
समष्टिपूर्णके देवि सांकर्यं बहुदोषकृत् ।
तस्मात् प्रक्षाल्य देवेशि समष्टिं पूर्णपात्रकम् ॥ ८७ ॥
स्वीकुर्यादन्यथा देवि जपेदष्टसहस्रकम् ।
आत्मतत्त्वं शक्तिशेषं सर्वेषां देवि संमतम् ॥ ८८ ॥
पञ्चाम्नायोर्ध्वगानां तु पश्चाद्वा पञ्चपात्रतः ।
प्रथमं शक्तिशेषं स्यात् द्वितीयादित्रयं शिवे ॥ ८९ ॥
वीरोच्छिष्टं तु ज्येष्ठस्य अन्यथा पापमाप्नुयात् ।
गुरोस्तु सर्वं संग्राह्यं शक्तिशेषादनन्तरम् ॥ ९० ॥
स्वशेषं नैव शक्त्यै तु देयं शिष्यामृते शिवे ।
अत्र प्रमादो यदि चेज्जपेदष्टसहस्रकम् ॥ ९१ ॥
आत्मशेषं तु ज्येष्ठेषु दत्वा त्र्यहमुपोषणम् ।
उभयोरपि तुल्यं स्यात् प्रायश्चित्तं वरानने ॥ ९२ ॥
अभुक्त्वैव तु तत्त्वानां शोधनं त्वाचरेच्छिवे ।
पूजनं चापि देवेशि अन्यथा पतितो भवेत् ॥ ९३ ॥
गुर्वादीनां यथा चाज्ञा स्वात्मतत्त्वं तु शोधयेत् ।
सद्यः काले स्वयं पक्षः ज्ञात्वा भुक्तो बहिष्कृतः ॥ ९४ ॥
भुक्त्वा तत्त्वं शोध्य देवि जपेदयुतसंख्यकम् ।
अस्नानेऽप्येवमेव स्यादशक्तौ गौणमाचरेत् ॥ ९५ ॥

क्षताङ्गो ज्वरिताङ्गश्च मण्डलाद्बाह्यतः स्थितः ।
मलाङ्गो मलवस्त्रश्च उष्णीषी कञ्चुकी तथा ॥ ९६ ॥
कुष्ठी क्षताङ्गी कुनखी पूतिगन्धी ज्वराङ्गकः ।
क्रोधी कुटिलभावश्च नास्तिकोऽप्यजितेन्द्रियः ॥ ९७ ॥
पातकी भ्रमचित्तश्च गुरुद्रोही च वञ्चकः ।
प्रविष्टो मण्डलं यस्य तस्य शापो भवेत् तव ॥ ९८ ॥
तद्दोषपरिहारार्थं पुनर्मण्डलमाचरेत् ।
वीरासनं कुक्कुटं च नाचरेन्मण्डले शिवे ॥ ९९ ॥
न प्रदर्श्यौ च चरणौ न वदेदुच्चभाषणम् ।
कलहो रोदनं निद्रा पारुष्यं मर्मभाषणम् ।
न वदेच्छिवभावेन सर्वं तत्र तु भावयेत् ॥ १०० ॥
विहाय जिह्वाचापल्यं इन्द्रियाणि निगृह्य च ।
शिवोऽहमिति पूर्णं वै भावयन् शिवतां व्रजेत् ॥ १०१ ॥
इत्येतत्ते मयाऽऽख्यातं गोप्यात् गोप्यतरं शिवे ।
प्रायश्चित्तविधौ देवि किं पुनः श्रोतुमिच्छसि ॥ १०२ ॥

इति श्रीस्वतन्त्रतन्त्रे त्रयोदशःपटलः ॥

अस्मात् पटलात् सुखं बालानामर्थलाभाय कठिनांशं किंचिद्वितनोमि—पुनःक्रियेत्यन्तो ग्रन्थः सन्ध्यामात्रप्रायश्चित्तपरः, पूजायां पृथग्वक्ष्यमाणत्वात् ॥ ४–७ ॥ सन्ध्याऽन्तरे द्वितीयसन्ध्याकाले प्राप्ते पूर्वसन्ध्यानिवृत्तिः, विहितप्रायश्चित्तमात्रम् ॥ ८–९ ॥ पुनर्मण्डलमाचरेत् इति अग्रे दीपनाशप्रायश्चित्ते विविच्यते ॥ १०–१६ ॥ पूजात्रयमिति आवरणार्चनं ओघत्रयतिथिनित्याऽर्चनं समयाम्नायार्चनं चेत्यर्थः । पीठपूजा धर्मादिपूजा ॥ १७ ॥ अर्पणं उपचारार्पणम् । देहशुद्धिः भूतशुद्धिः । सामयिकादीत्यादिना आरादुपकारकनिखिलशेषाङ्गानां ग्रहणम् ॥ १८–१९ ॥ मूलेन तर्पणाष्टकमित्यत्र तर्पणं प्रथमेनैव । तदवसरश्च नवावरणपूजाऽनन्तरं, ततः प्राग्वा. श्रौते प्रधानात् प्राक् तदनन्तरं वा नैमित्तिकप्राय-

श्चित्तानां दृष्टत्वात् ॥ २० ॥ सहस्रं वेत्यत्र वाकार एवकारार्थे । व्यत्यासे वैपरीत्ये । एवं पूर्वोक्तप्रायश्चित्तम् । अङ्गाङ्गेषु अङ्गभूतेषु कर्मसु अङ्गत्वेन विहितानि, यथा पात्रासादनादिरूपप्रधानाङ्गमुद्दिश्य तदङ्गत्वेन मण्डलादिकरणं, ईदृशानां लोपे स्मृतिः भगवत्स्मरणम् ॥ २१ ॥ अङ्गं तन्त्रेणेति—यत्र पूजाद्वयं एककाले प्राप्तं तदङ्गानामप्येककालिकत्वात् कालैक्ये कर्त्रैक्ये दर्शपूर्णमासयोः प्रयाजाद्यनुष्ठानवत्, तन्त्रेण पात्रासादनं कुर्यात् । तत्रापि कार्यकारणयोः विना निमित्ते सति नैमित्तिकं यत् तत्र नाङ्गानां तन्त्रम् । यथा दर्शपूर्णमासमध्ये पवित्रनाशे पवित्रेष्टिः । तदीयप्रयाजानां दर्शपूर्णमासप्रयाजानां न तन्त्रम् । तथाऽत्रापि । तथा अन्तरे कालान्तरे । यथा नित्यपूजा प्रातः नैमित्तिकी रात्रौ तत्र न तन्त्रम् । एवं भिन्नार्थेषु भिन्नफलकेषु यथा दीक्षायां पञ्चदेवतापूजा युगपत् प्रसक्ता तत्र पात्रासादने न तन्त्रं तत्तद्देवतातर्पणरूपभिन्नत्वात् । यथा दर्शपूर्णमासयोः पुरोडाशभेदः ॥ २२ ॥ बिन्दुतर्पणव्यत्यासे इति—व्यत्यासो द्विविधः, मुख्यदेवतापात्रादमुख्यदेवतातर्पणं, तद्विपरीतं अमुख्यपात्रान्मुख्यदेवतातर्पणं च । द्वयोर्मध्ये आद्यस्य प्रायश्चित्तमाह—पुनस्तर्पणमिति ॥ २३ ॥ द्वितीये आह—व्युत्क्रमे इति । विपरीत इत्यर्थः ॥ २४–२५ ॥ तन्त्रान्तरानुयायिनां मुख्यदेवतागुरुमण्डलावरणदेवतादिपात्राणां पृथग्विहितत्वात् एतत्प्रायश्चित्तनिमित्तज्ञानाय देवतासु मुख्यगौणभावं दर्शयति—मूलदेवीतर्पणादित्यादिना ॥ २६–३५ ॥ मुख्याभावे द्रव्यप्रतिनिधियोजने अनुष्ठाने यो विशेषस्तमाह—तर्पणमिति । द्वितीयद्रव्यप्रतिनिधौ तर्पणं कुसुमेन । आद्यद्रव्यप्रतिनिधौ आवाहनात् प्राक् स्वात्मीकारो यो विहितः स नास्ति । गुरुपूजनमक्षतैः न तु प्रतिद्रव्येण तर्पणम् ॥ ३६ ॥ अक्षतैः गुरुमर्चयित्वा संपूर्णमन्त्रं पठन् मनसा स्वात्मीकारं भावयेदिति तदर्थः । बाह्यपूजा यथोक्ता कर्तव्या ॥ ३७ ॥ यदा घुटिका पूजासाधनत्वेन कल्पिता तदा द्वितीयस्थाने आर्द्रकमेव ॥ ३८ ॥ त्रिपात्रन्यूनं न कार्यम् । इदं त्रिपात्रविधानं द्विपात्रनिन्दातन्त्रानुयायिपरं, न सूत्रानुयायिपरम् । उक्तं चैतद्वितत्र प्राक् । न ह्येतत्तन्त्रे प्रत्यक्षे युग्मपात्रे निन्दाश्रवणेन, सर्वथा अननुष्ठेयं भवति । तथा सति "यदनुदिते सूर्ये प्रातर्जुहुयात् उभयमेवाग्नेयः स्यात्" इत्यनुदितहोमे निन्दा

श्रूयते। एवमग्निहोत्रे "यद्वे समिधावादध्यात् भ्रातृव्यमस्मै जनयेत्" इति समिद्वये निन्दा श्रूयते। तथा सति अग्निहोत्रे अनुदितहोमः समिद्वयं त्रयं चतुष्टयं च शाखाऽन्तरप्रतिपादितं अननुष्ठेयं स्यात्। तस्मात् यत्र निन्दा श्रूयते तच्छाखिनामेव तदावश्यकता नान्येषाम्। स्वशास्त्राविरुद्धं तु आकाङ्क्षितं तन्त्रान्तरात् ग्राह्यं इत्युक्तं प्राक्। अतः प्रायश्चित्ताकाङ्क्षायां यावदुपयुक्तं ग्राह्यं, विरुद्धं हेयम्। "मपञ्च-कालाभेऽपि नित्यक्रमप्रत्यवमृष्टिः" इति सूत्रेण अलाभे कर्मविधानात् प्रतिशास्त्रं तन्त्रान्तरस्थं प्रतिनिधिशास्त्रं प्राप्तम्। तेन सह स्वात्मीकारादिनिषेधोऽपि प्राप्तोऽपरि-हार्यः। एवं प्रतिनिध्यर्चने शक्तिपूजाऽपि तत्त्वशोधनं विहाय कार्या॥ ३९-६०॥ झ टि त्यु द्वा स्ये ति—उत्तराङ्गलोपं कृत्वोद्वास्येत्यर्थः॥ ६१-६२॥ अ थो प घा त दो ष-स्ये ति—उपघातशब्दार्थ उक्तो बृहद्धामकेश्वरतन्त्रे—

उच्छिष्टरक्तमूत्रादिसंपर्को यदि जायते।
पूजनायोग्यताहेतोरुपघातः स उच्यते।
स्थानात् भ्रंशेप्वेवमेव महादोषकरः स्मृतः॥ इति॥ ६३-६६॥

स्फु टि ते भेदने अवयवभङ्ग इति यावत्। म हा सा न्त प न मुक्तं तन्त्रे—

महासान्तपनाख्यं च करिष्ये देवताव्रतम्।
ततः शिवालये पुण्ये नदीतीरे रहःस्थले॥
तिथिसंख्यशतं मूलं जप्त्वा होमं [1]समाचरेत्।
घृताक्तबिल्वपत्रैश्च ततो रात्रौ सुभक्तितः॥
चक्रराजार्चनं देवि कारयित्वा यथाविधि।
पूजां सामयिकांतां च निर्वर्त्य च ततः प्रिये॥
स्वीकृत्य च यथायोग्यं त्रिचतुःपञ्चपात्रकम्।
ग्रासं हि पात्रस्यान्ते वै प्रत्येकं भक्षयेत् प्रिये॥

[1] समं च—ब२.

शुद्धयादिचर्वणोन्मिश्रं पूर्वसङ्ख्याऽनुरोधतः ।
मयूराण्डमितो ग्रासः सङ्ख्यया तदपः पिबेत् ॥
पश्चात् जलं पिबेत् देवि जपेन्मूलशतत्रयम् ।
रात्रौ स्थण्डिलशायी च ब्रह्मचर्ययुतः सदा ॥
पूजाऽन्ते भोजयेत् पश्चात् यथाविभवमम्बिके ।
एवं त्रिरात्रं निर्वर्त्य चतुर्थे पूजयेत् गुरुम् ॥
यथाशक्ति ततो देवि तदाज्ञावशतः शिवे ।
व्रतं निवेदयेत् देव्यै ब्राह्मणान् भोजयेत् ततः ॥
य एवमाचरेत् देवि तस्य पापक्षयो भवेत् ॥

इति तन्त्रान्तरोक्तं महासान्तपनं व्रतम् ॥ ६७ ॥

नित्यपूजोक्तान्येव प्रायश्चित्तानि स्थलान्तरे अतिदिशति—दीक्षाऽऽदिष्वप्येवमेवेति । आदिपदेन नैमित्तिककाम्यपूजापरिग्रहः । दीपोपघाते दीपनाशे पुनर्मण्डलमाचरेत् इति । यथा पूर्वं मण्डलं द्वारपूजाऽऽदिना देशपरिचितिं कृत्वा देवयजनभूमिं संपाद्य यागः संपादितः, तथा तत्समाप्तौ तथैव दीपोपघातनिमित्तं पुनर्मण्डलपूजां करिष्ये इति संकल्प्य मण्डलोद्वासनान्तं पुनर्यजेत् । श्रौते कर्मण्यपि परिश्रयणादेरिदमेव फलं श्रुतं अर्थवादे "परिश्रयत्यन्तर्हितो हि देवलोको मनुष्यलोकात्" इत्यादिना । अत्रापि द्वारपूजनमेव परिश्रयणं मण्डलकरणम् । यद्वा —मण्डललक्षणमुक्तं योगिनीतन्त्रे—

कुमार्या वटुकेनापि सुवासिन्या द्वयेन च ।
पञ्चसामयिकैश्चैव युक्तं मण्डलमुच्यते ।
एतन्न्यूनं तु देवेशि केवलं पूजनं स्मृतम् ॥ इति ॥

ईदृशगुणविशिष्टं वा पूजनं मण्डलमाचरेदित्यनेन ग्राह्यम् । दीपघातेऽपि कश्चन विशेषो बृहद्वामकेश्वरतन्त्रे—

दीपान्तरस्य सत्त्वे तु दीपनाशो न दोषदः ।
तस्मात् दीपाननेकान् वै ज्वालयेत् परितः शिवे ॥ ६८ ॥

शेषं स्पष्टम् ॥

एतत्प्रयोगरचनं सूक्ष्मबुद्ध्या विभाव्य रचनीयम् । ग्रन्थविस्तरभयान्नेह लिख्यते ॥

एवं प्रायश्चित्तं कर्मवैगुण्ये प्रायो दर्शितम् । अनुक्तविषये प्रायश्चित्तं साधारणतयोक्तं योगिनीतन्त्रे—

अनुक्तानां च दोषाणां दशधा मूलसंस्मृतिः ॥ इति ॥

तथा बृहद्वामकेश्वरेऽपि—

ज्ञाताज्ञातकृतानां तु पापानां परमेश्वरि ।
पादुकां तु त्रिधा स्मृत्वा तत्क्षणादेव नश्यति ॥ इति ॥

एवं प्रसक्तानुप्रसक्त्या । इत्यलं भूयसा ॥ ८२ ॥

कुलमार्गनिष्ठप्रशंसा

एतावत्पर्यन्तमनुष्ठेयक्रियामुक्त्वा तदनुष्ठातारं स्तौति—

इत्थं विदित्वा विधिवदनुष्ठितवतः कुलनिष्ठस्य सर्वतः कृतकृत्यता शरीरत्यागे श्वपचगृहकाश्योर्नान्तरं जीवन्मुक्तः ॥ ८२ ॥

इत्थं एतावत्पर्यन्तं उक्तप्रकारं विदित्वा सम्यग्विदित्वा विधिव यथाशास्त्रमनुष्ठितवतः अनुष्ठानं कुर्वतः कुलनिष्ठस्य कुलमार्गे श्रद्धाभक्तिमतः । कुलमार्गश्चैतावत्पर्यन्तं दशखण्डैरुक्तो ज्ञेयः । सर्वतः सर्वप्रकारैः कृतकृत्यता अनुष्ठेयशेषरहितता संपन्नेति शेषः । एवं शरीरस्थितिकाले फलमुक्त्वा देहत्यागेऽपि

फलमाह—शरीरत्याग इति । एतदनुष्ठातृभिन्नानां काश्यां देहत्यागे मुक्तिः, कीकटे नरकः, पुण्यदेशे स्वर्गः, इति फलतारतम्यम् । अस्य तु श्वपचः चण्डालः तद्गृहकाश्योर्न किंचिदन्तरम् । अत्र हेतुमाह—जीवन्मुक्त इति । यतोऽयं जीवन्नेव मुक्तः अतोऽविद्यालेशाभावात् स्वर्गनरकयोरप्राप्तिः, कारणाभावे कार्यासंभवात्, स्वर्गनरकयोरविद्याकार्यत्वात् । नापि मुक्तिः काशीमरणेन भवितुमर्हति, तस्य जीवत एव लब्धत्वात् । अतः अयं देहः यत्र क्वचन वा पतितः न ततो दुःखं सुखं वा भवितुमर्हति । अतो द्वयोर्नान्तरमिति भावः । एतेन एतत्सदृशं परमपुरुषार्थसाधनं नान्यदिति भावः । प्रथमखण्डे श्रुतं फलं दीक्षाया एव । एवं तत्तत्करणावसाने दर्शितं फलं तस्य तस्यैव, इदं तु विशिष्टानुष्ठानस्यैव इति बोध्यम् ॥ ८२ ॥

अध्येतृप्रशंसा

एवं दशखण्डैर्विहितानुष्ठानकर्तारं स्तुत्वा दशखण्डाध्येतारं स्तौति—

य इमां दशखण्डीं महोपनिषदं महात्रैपुरसिद्धान्तसर्वस्वभूतामधीते स सर्वेषु यज्ञेषु यष्टा भवति यं यं क्रतुमधीते तेन तेनास्येष्टं भवति इति हि श्रूयते इत्युपनिषत् इति शिवम् ॥ ८३ ॥

इमां पूर्वोक्तां दशखण्डीं महोपनिषदं दशखण्डसमुदायात्मिकाम् । उपनिषदिति ब्रह्मस्वरूपप्रतिपादकवेदस्य संज्ञा । तत्र ब्रह्मप्रतिपादनं साक्षात् परंपरया चेति द्विविधम् । तत्र साक्षात्प्रतिपादिका महोपनिषत् । अस्यापि साक्षात्प्रतिपादकश्रुत्यर्थानुवादकत्वात् महोपनिषत्त्वं औपचारिकम् । एतेन केवलब्रह्मप्रापकशास्त्ररूपत्वात् परमपुरुषार्थसाधनमेतदध्ययनमिति ध्वनितम् । त्रैपुरसिद्धान्तमिति—त्रिभ्यः सृष्टिस्थितिलयेभ्यः पुरा पूर्ववर्तिनी नित्येति यावत् सा त्रिपुरेति । तदुक्तं त्रैपुरसिद्धान्ते "त्रिभ्यः पुरा त्रिपुरा" इति । कालिपुराणेऽपि—

त्रिकोणं मण्डलं चास्य भूपुरं च त्रिरेखकम् ।
मन्त्रोऽपि त्र्यक्षरः प्रोक्तः तथा रूपत्रयं पुनः ॥
त्रिविधा कुण्डलीशक्तिः त्रिदेवानां च सृष्टये ।
सर्वं त्रयं त्रयं यस्मात् तस्मात् तत्त्रिपुरा मता ॥ इति ॥

त्रिपुरारहस्येऽस्य पदस्य निरुक्तयो बह्वयः सन्ति, ग्रन्थविस्तरभयात् अतिप्रयोजनाभावाच्च न लिख्यन्ते । त्रिपुरासंबन्धी त्रैपुरः स चासौ सिद्धान्तश्च तस्मिन् सर्वस्वभूतां दध्नो नवनीतवत् सारभूतां तां योऽधीते सः सर्वयज्ञेषु गणपत्यादिपराऽन्तेषु यज्ञेषु यष्टा भवति । क्रियाऽननुष्ठानेऽप्यध्ययनमात्रेणैव तावदनुष्ठानफलं भवतीत्यर्थः । एतस्मिन्नर्थे आरण्यकश्रुतिं प्रमाणत्वेनोपन्यस्यति—यं यं क्रतुमधीते इति श्रूयते इत्यन्तेन । इत्युपनिषदिति उपनिषत्प्रतिपादकमिति उपसंहारद्योतकम्,

इतीदं ते मयाऽऽख्यातं दिव्यं नाम्नां शतत्रयम् ।
इत्येतन्नामसाहस्रं कथितं ते घटोद्भव ॥

इत्यादिस्थले तथा दृष्टत्वात् । शिवमिति कल्याणवाचि ॥

खण्डादिपरिपठनम्

आपस्तम्बादिसूत्रवत् अत्रापि सूत्ररूपत्वं "अथातो दीक्षां व्याख्यास्यामः" इत्यनेन ज्ञापितम् । अतः उपसंहारवेळायामपि तत्संप्रदायेन वैपरीत्येन खण्डादीन् परिपठति—

अथातः सर्वेषां मन्त्राणां, अथ स्वेष्टमन्त्रस्य, इति विधिवत्, इत्थं साङ्गां, इयमेव महती विद्या, अथ प्राथमिके चतुरस्रे, अथ हृच्चक्रस्थितां, एवं गणपतिमिष्ट्वा, इत्थं सद्गुरोः, अथातो दीक्षां व्याख्यास्यामः । अथ, एवं, अथ, इत्थं, अथ स्वेष्टेति पञ्च ॥ ८४ ॥

"अथातः सर्वेषां मन्त्राणां" इत्यादि "अथातो दीक्षां" इत्यन्तेन खण्डविभागमुक्त्वा पटलानुक्रमणिकां दर्शयति—अथैवमिति । अथेत्यारभ्य खण्डद्वयानन्तरं तृतीयखण्डारंभः एवमिति । अथ १, एवं २, अथ ३, इत्थं ४, अथ स्वेष्ट ५ । एवं एकैकं पटलं खण्डद्वयात्मकं ज्ञेयम् ॥ ८४ ॥

ग्रन्थकर्तृप्रशंसा

ग्रन्थकर्तारं तद्गुणोत्कर्षं च प्रकटयति—

इति श्रीदुष्टक्षत्रियकुलकालान्तकरेणुकागर्भसंभूतमहादेवप्रधानशिष्यजामदग्न्यश्रीपरशुरामभार्गवमहोपाध्यायमहाकुलाचार्यनिर्मितं कल्पसूत्रं संपूर्णम् ॥

दुष्टक्षत्रियकुलकालान्तके त्यनेन दुष्टनिग्रहपूर्वकधर्मव्यवस्थापकत्वं दर्शितम् । रेणुकागर्भे त्यनेन जामदग्न्यस्योभयकुलशुद्धत्वं दर्शितम् । महादेवे त्यनेन संप्रदायप्रवर्तकशुद्धिर्दर्शिता । कुलाचार्य इत्यनेन स्वस्य सर्वतन्त्रस्वतन्त्रता सूचिता । एतैः सर्वैर्विशेषणैः स्वप्रणीतग्रन्थे अप्रामाण्यशङ्काकलङ्कलेशाभावः सूचितः ॥ ८५ ॥

व्याख्यानरचनकालः

एषोऽपराजितानन्दनाथः श्रीगुरुसेवया ।
संपन्नसूक्ष्मविज्ञानः श्रीदेवीप्रेरितः कृती ॥
जामदग्न्यं कल्पसूत्रं व्याचख्यौ गूढभावकम् ।
बालानां सुखबोधाय श्रीदेवीप्रीतयेऽपि च ॥
रचितग्रन्थजालं तु साधवो गतमत्सराः ।
शोधयन्तु विचार्यैव भ्रान्तेः पुरुषधर्मतः ॥
साधुरेषोऽथवाऽसाधुः सौभाग्योदयसंज्ञकः ।
यत्प्रेरणासमुद्भूतः तस्याश्चरणपङ्कजे ॥

अग्निबाणाद्रिभूसङ्ख्ये शाके तपसि गीष्पतेः ।
वासरे शुक्लपक्षस्य दिन आद्ये निशामुखे ॥
अर्पितः श्रीकाळिकायामनेन प्रीयतां शिवा ॥

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥

अनेन कर्मणा श्रीकामेश्वरीकामेश्वरौ प्रीयेताम् ॥

इति श्रीपण्डितकुलावतंसनिखिलनित्यनैमित्तिकानुष्ठानपुष्टीकृतकलशोद्भवाद्युपासकवर्यामृते-
शानन्दनाथप्रेमपात्रसुब्रह्मण्यतनूद्भवरामेश्वरविरचिता सौभाग्योदयसंज्ञिका
परशुरामसूत्रवृत्तिः समाप्ता

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.

अनुबन्धः

परशुरामकल्पसूत्रपरिशिष्टम्

अथातो वार्ताळीसिद्धियन्त्रं व्याख्यास्यामः ॥ १ ॥

भुवनेश्वरीबीजमध्ये वृत्तद्वयं विधाय, तन्मध्ये व्यतिभिन्नं चतुरश्रद्वयं विधाय, तदन्तर्वृत्तं कृत्वा, तदन्तर्वृत्त-सप्तकयुक्तानि सप्तषट्कोणानि यथासंप्रदायं विदध्यात् ॥ २ ॥

तत्र अष्टसु कोणेषु अष्टस्वन्तराळेषु च दशोत्तरश-ताक्षरीविद्यायाः षोडशवर्णान् अकारादिककारान्तषोडश-स्वररहितषोडशवर्णसहितान् संलिख्य पूर्वषट्कोणषट्सु कोणेषु षट्सु अन्तराळेषु च खकारादिङकारान्तं तद्द्वादश-वर्णान् संलिख्य पुनराग्निकोणस्थषट्कोणे ढकारादिमकारान्त-द्वादशवर्णसहितान् द्वादशवर्णान् राक्षसकोणस्थषट्कोणे यकाराद्याकारान्तद्वादशवर्णयुक्तान् द्वादशवर्णान् पश्चिमकोणे इकाराद्यौकारान्तसहितान् वसुकोणे अंकारादिटकारान्त-सहितान् दशकोणे ठकारादिबकारान्तयुतान् मध्यषट्कोणे भकारादिक्षकारान्तसंयुक्तान् विलिख्य लक्षताद्यद्वयवृत्ता-न्तराळवीथ्यां शिष्टान् दशवर्णान् ओगजडदबलक्षसंयुक्तान् विलिखेत् ॥ ३ ॥

अथ नवग्रहयन्त्रं व्याख्यास्यामः । नवकोष्ठान् विधाय, नवसु कोणेषु वृत्तत्रयं विधाय, नवकर्णिकासु नवकोष्ठान् विलिख्य, नवसु कोष्ठेषु मध्यकोष्ठेषु मध्यकोष्ठ-वृत्तत्रयं कर्णिकास्थनवकोष्ठं मध्यकोष्ठे मकारसहितं प्रणवं विलिख्य, शिष्टेष्वष्टसु कोष्ठेषु अकाराद्यृकारान्तानष्टस्वरान् विलिख्य, अन्तर्वृत्तान्तराळे मकारसहितान् षोडशस्वरान् लिखित्वा, बहिर्वृत्तान्तराळे अकारादिक्षकारान्तान् मातृ-कार्णान् विलिखेत् ॥ ४ ॥

एवं भास्करमण्डलं मध्ये कृत्वा पूर्वकोष्ठवृत्तत्रय-कर्णिकास्थितनवसु कोष्ठेषु मध्यकोष्ठे ऌकारगर्भं प्रणवं विलिख्य, पूर्वाद्यष्टसु कोष्ठेषु ऌकारादिविसर्गान्तानष्टस्वरांश्च विलिख्य, अन्तर्वृत्तान्तराळे ऌकारसहितान् षोडश-स्वरान् संलिख्य, बाह्यवृत्तान्तराळे अकारादिक्षका-रान्तान् लिखेत् ॥ ५ ॥

एवं चन्द्रमण्डलं विधाय, अग्निस्थितवृत्तत्रयकर्णिका-नवकोष्ठमध्यकोष्ठे प्रणवगर्भककारं विलिख्य, ईशानकोष्ठा-दिराक्षसकोष्ठान्तं कवर्गं विलिख्य, पश्चिमकोष्ठादिसोम-कोष्ठान्तकोष्ठत्रये भौमायेति वर्णत्रयं विलिख्य, अन्तर्वृत्ता-न्तराळे ककारसहितान् षोडशस्वरान् संलिख्य, बाह्यवृत्ता-न्तराळवीथ्यां मातृकां लिखेत् । एवं भौममण्डलं विधाय, बुधमण्डलं लिखेत् ॥ ६ ॥

दक्षिणकोष्ठस्थवृत्तत्रयकर्णिकास्थितनवकोष्ठेषु मध्यकोष्ठे च कागर्भं प्रणवं विलिख्य, ईशानादिपञ्चकोष्ठेषु चवर्गं विलिख्य, कोष्ठत्रये बुधायेति वर्णत्रयं च विलिख्य पूर्ववत् षोडशस्वरसहितं चकारं विलिख्य, मातृकार्णं च विलिख्य, नैर्ऋतिकोष्ठस्थवृत्तत्रयकर्णिकास्थितनवकोष्ठके मध्यकोष्ठे पकारगर्भं प्रणवं विलिख्य, शिवादिकोष्ठपञ्चके पवर्गं विलिख्य, शिष्टकोष्ठत्रये सौरये इति शनिनामवर्णान् आलिख्य, अन्तराळद्वये पकारं मातृकां च विलिख्य, पश्चिमकोष्ठस्थवृत्तत्रयकर्णिकामध्ये कोष्ठनवकं विधाय, तन्मध्यकोष्ठे टकारगर्भं प्रणवं विलिख्य, ईशानादिकोष्ठपञ्चके टवर्णान् विलिख्य, कोष्ठत्रये गुरव इति विलिख्य, पूर्ववदन्तराळद्वये टवर्गं मातृकां च विलिखेत् ॥ ७ ॥

एवं गुरुमण्डलं विधाय वायुकोष्ठे मध्ये यकारगर्भं प्रणवं विलिख्य, ईशानादिकोष्ठपञ्चके यवर्गं विलिख्य, राहव इति लिखित्वा, सोमकोष्ठमध्ये कोष्ठे तकारगर्भं प्रणवं लिखित्वा, ईशादिकोष्ठेषु तवर्गं शुक्रायेति विलिख्य, ईशानकोष्ठे मध्ये शकारं विलिख्य ईशाद्यष्टसु कोष्ठेषु षवर्गं केतव इति च विलिख्य, अन्तराळद्वये षोडशस्वरसहितं शकारं मातृकां च विलिखेत् इति नवग्रहचक्रं विधाय, नवग्रहपूजां कुर्यात् इति शिवम् ॥ ८ ॥

इत्येकादशः खण्डः

अथातः शिवात्मकान् मन्त्रान् व्याख्यास्यामः ॥ १ ॥

ऐं ह्रीं श्रीं ह्स्ख्फ्रें हसहहरौः अमृतविग्रहा पञ्चार्णा ५ ॥ २ ॥

ओं जुं सः पालय पालय सः जुं ओं इति मृत्युञ्जयविद्या द्वादश १२ ॥ ३ ॥

श्रीं ह्रीं क्लीं त्रिपुटाविद्या त्रिवर्णा ३ ॥ ४ ॥

ओं ह्रां ह्रीं ह्रूं वैरिमोहि गरुडपक्षि हर हर हिंस हिंस स्वाहा इति गरुडमन्त्रः त्रयोविंशत्यक्षरात्मकः २३ ॥ ५ ॥

ओं एहि परमेश्वरि स्वाहा इत्यश्वारूढा दशाक्षरी१०॥

ओं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा इत्यन्नपूर्णाविद्या सप्तदशाक्षरी १७ ॥ ७ ॥

हसक्षमलवरयूं इत्येकाक्षरो नवात्मको मन्त्रः १ ॥ ८॥

सहक्षमलवरयीं इत्येकाक्षरा नवात्मिका १ ॥ ९ ॥

ओं ह्रीं नम इति देवीहृदयविद्या चतुर्वर्णा ४ ॥ १०॥

ओं रुद्रदयिते योगेश्वरि स्वाहा इति द्वादशार्णा गौरीविद्या १२ ॥ ११ ॥

इटि इटि मुटि मुटि काकटमुण्डि स्वाहा इति लक्षसुवर्णप्रदा पञ्चदशाक्षरी १५ ॥ १२ ॥

ओं नवकेशी कनकवती स्वाहा इति निष्कत्रयप्रदा विद्या द्वादशा क्षरी १२ ॥ १३ ॥

एकायकुणाणातुके इत्यभीष्टदायिनी विद्याऽष्टाक्षरी ८ ॥ १४ ॥

ऐं ह्रीं श्रीं मातङ्गिन्यै स्वाहा श्रीं ह्रीं ऐं इति मातङ्गिनीविद्या द्वादशाक्षरी १२ ॥ १५ ॥

ह्रीं श्रीं क्लें अ इ राज्यदे राज्यलक्ष्मी सः क्लें श्रीं ह्रीं इति राज्यलक्ष्मीविद्या षोडशाक्षरी १६ ॥ १६ ॥

ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नम इति महालक्ष्मीविद्या सप्तविंशतिवर्णा २७ ॥ १७ ॥

ज झ री म हा च ण्ड ते ज स्सं क र्षि णी का ल मं था ने हः सिद्धलक्ष्मीविद्या सप्तदशार्णा १७ ॥ १८ ॥

ओं गलयौं ओं, ह्रीं गलयौं ह्रीं, क्लीं गलयौं क्लीं, ऐं गलयौं ऐं, क्रूं गलयौं क्रूं, स्त्रीं गलयौं स्त्रीं, ह्रीं क्लीं ऐं क्रूं स्त्रीं गलयौं द्रां द्रीं क्लीं क्रूं सः, एते सप्तगोपालमन्त्राः ॥ १९ ॥

एतेषां पारायणात् सर्वसिद्धीश्वरो भवेत् इति शिवम् ॥ २० ॥

इति द्वादशः खण्डः

अथातः प्रस्तारक्रमं व्याख्यास्यामः ॥ १ ॥

स्वेच्छया कतिचित् ध्रुवाक्षराणि केनचित् प्रकारेण विलिख्य तेष्वन्त्यशिरसि बिन्दुं विलिख्य उपान्त्यवर्णमारभ्य प्रथमवर्णपर्यन्तं व्युत्क्रमेण एकैकस्य वर्णस्य शिरस्येकैकमङ्कं एकद्वित्रिचतुःपञ्चषडादिरूपमेकोत्तराभिवृद्धिं विलिख्य, तत

एकेन द्वयं द्वाभ्यां त्रयं त्रिभिश्चतुष्टयमित्येवं क्रमेण तानङ्कान् गुणयेत् ॥ २ ॥

तेन हसकलह्रींरूपेषु ध्रुवेषु मायाबीजस्य शिरसि शून्यं लकारस्य शिरस्येकं ककारस्य द्वौ सकारस्य षट् हकारस्य चतुर्विंशतिः इति सिध्यति ॥ ३ ॥

ईदृशस्य बिन्द्वाद्यं कुवर्गस्य खण्डाङ्क इति संज्ञा नष्टोद्दिष्टादिषु व्यवहारार्थं कृता ॥ ४ ॥

तत औत्तराधर्येण चतुर्विंशतिवारं विलिख्य तदधस्तथैव सकारांस्तदधः ककारांस्तदधः लकारांस्तदधः मायां विलिखेत् ॥ ५ ॥

ततः अनयैव रीत्या सादिचतुष्टयं षट्षड्वारं लिखेत् ॥

कादित्रयं द्विद्विवारं लिखेत् ॥ ७ ॥

लकारमायां च एकैकवारं लिखेत् ॥ ८ ॥

एवं सति द्वितीयपङ्क्तौ एकमक्षरं न्यूनं संपद्यते ॥ ९ ॥

तं लकारं पञ्चमस्थाने लिखेत् ॥ १० ॥

प्रथमपङ्क्तिस्तु पूर्वमेव पूर्णास्तीति न तत्र लेखनप्रसक्तिः ॥ ११ ॥

तृतीयादिषु पङ्क्तिषु द्वौ द्वौ वर्णौ न्यूनौ भवतः, तावेकस्यां पङ्क्तौ क्रमाद्विलिख्य तदधस्तनपङ्क्तौ व्युत्क्रमात् तावेव लिखेत् ॥ १२ ॥

पुनस्तत्पङ्क्तिद्वये विशिष्टौ ध्रुवौ तौ क्रमोत्क्रमाभ्यां लिखेत् ॥ १३ ॥

एवमान्तकरणेनैकः प्रस्तारखण्डो भवति ॥ १४ ॥

यावन्तो ध्रुवास्तावन्त एव तत्प्रस्तारस्य खण्डाः समसङ्ख्यावृत्तका भवन्ति ॥ १५ ॥

तेष्वाद्ये खण्डे वृत्ताद्यो ध्रुवाद्य एव, द्वितीये खण्डे ध्रुवद्वितीय एव वृत्ताद्यः, तृतीये खण्डे ध्रुवतृतीय एवेत्यपि नियमोऽस्ति ॥ १६ ॥

ततश्च द्वितीयखण्डप्रथमवृत्ते पूर्व एव क्लृप्तद्वितीयस्य सकारात् परतः संस्थापयेत् ॥ १७ ॥ ×

एवं तृतीयखण्डादिमवृत्ते कहसलह्रीमिति क्रमः ॥

चतुर्थखण्डादौ लहसकह्रीं, पञ्चमखण्डादौ ह्रीं हसकल इति क्रमः ॥ १९ ॥

प्रथमखण्डान्ततृतीयवृत्तेऽपि यौ द्वौ शिष्येते तौ द्वावपि कह्रीमिति लेख्यौ प्रथमवृत्ते तयोः पौर्वापर्यस्य क्लृप्तस्य त्यागे मानाभावात् ॥ २० ॥

एतेन नवमादिवृत्तेष्वपि सकारह्रींकारयोः क्रमेण लेख इत्यादि सिध्यति ॥ २१ ॥

तत्तत्खण्डद्वितीयादिवृत्तानि प्रथमखण्डवदेव लेखनीयानि ॥ २२ ॥

यावत्प्रथमखण्डाद्यवृत्ताक्षराणि व्युत्क्रमेण पतन्ति तावत्पर्यन्तोऽयं प्रस्तारः प्रथमवृत्तप्रथमाक्षरशिरोंको ध्रुवार्णसङ्ख्यया गुणितश्चेत् प्रस्तारवृत्तसङ्ख्यापि निष्पद्यते ॥ २३ ॥

तेन पञ्चध्रुवके चतुर्विंशतिः चतुर्ध्रुवके षट् द्वितीयध्रुवके द्वौ एकध्रुवके एकं इति शिवम् ॥ २४ ॥

इति त्रयोदशः खण्डः

अथातो नष्टोद्दिष्टं व्याख्यास्यामः ॥ १ ॥

हसकलह्रीं इत्येषां पञ्चानामक्षराणां ध्रुवप्रस्तारे विंशत्यधिकशतं वृत्तानि तेषु चतुरशीतितमवृत्तजिज्ञासायां चतुरशीतिसङ्ख्यैव नष्टोऽङ्कः ॥ २ ॥

खण्डाङ्कास्तु चतुर्विंशतिः षट् द्वे एकं शून्यं चेति पूर्वमेवोक्त्या तेनैकैकेन नष्टाङ्कं विभजेत् ॥ ३ ॥

तथा चतुर्विंशत्या चतुरशीतेर्हरणे त्रयो लब्धाः द्वादशाशिष्टास्ततः षड्भिः द्वादशानां हरणे यद्यपि निश्शेषता भवति तथाऽऽपि विभाजकानां सशेषत्वादत्राप्येकं षट्कमवशेष्यं तेनैकलब्धं षट् षष्ठा ततो द्वाभ्यां षण्णां हरणे सावशेष विभजनेन द्वौ लब्धौ द्वौ शिष्टौ तत एकेन सशेषहरणे एकं लब्धं एकं शिष्टम्। तस्य शून्येन विभजनेन शून्यं लब्धं शून्यं शिष्टं तेन त्र्येकद्व्येकशून्यानि लब्धाङ्काः एते प्रत्येकं सैकाः कार्याः। तेन चतुर्द्वित्रिद्व्येकाङ्का भवन्ति ॥ ४ ॥

ततश्च पूर्वक्लृप्तक्रमेषु हसकलह्रीं इत्याकारकेषु ध्रुववर्णेषु चतुर्द्विद्व्येकसङ्ख्यावर्णास्तान् सङ्ख्यायै निष्कास्य पृथक् लिखेत् ॥ ५ ॥

यथा वाग्बीजात्मकबीजचतुर्थे लकारः ॥ ६ ॥

सजिज्ञासितवृत्ते प्रथमो वाग्बीजात्मके द्वितीयः सकार एव तत्र द्वितीयः ॥ ७ ॥

अथानयोः लकारसकारयोः पूर्वलिखितत्वात् परित्यागे गणने वाग्बीजपञ्चम एव तृतीयो भवति ॥ ८ ॥

माययैव जिज्ञासितवृत्ते तृतीया कथकवर्गात् द्वितीयोपात्तसकारपरित्यागेन गणनया ककार एव पूर्वो भवतीति स तत्र चतुर्थः ॥ ९ ॥

वाग्बीजस्य प्रथमो हकारः स तत्र पञ्चमो भवतीति लसह्लींकह इत्याकारकं चतुरशीतितमं वृत्तं निष्पद्यते इति शिवम् ॥ १० ॥

इति चतुर्दशः खण्डः

इत्थं कृतनष्टो लसह्लींकह इत्याकारकं वृत्तं पञ्चध्रुवप्रस्तारे कतितममिति जिज्ञासायां तद्वृत्तं भूमौ विलिख्य तच्छिरसि खण्डाङ्कान् लिखेत् ॥ १ ॥

ते यथा—चतुर्विंशतिः षट् द्वे एकं शून्यं चेति ॥ २ ॥

ते च लकारादयः वर्णाः कृप्तक्रमेषु हसकलह्लीं इत्याकारकेषु पञ्चसु ध्रुववर्णेषु पूर्वलिखितपरित्यागेन गणनया चतुर्थद्वितीयतृतीयद्वितीयप्रथमाः क्रमेण भवन्ति ॥ ३ ॥

तेन तेष्वङ्केषु प्रत्येकमेकाङ्कनिरासे सति त्र्येकद्व्येकशून्यानि संपद्यन्ते ॥ ४ ॥

ते चाङ्काः लकारादीनामधः क्रमाल्लेख्याः ॥ ५ ॥

अथ अधोङ्केनोर्ध्वाङ्कं गुणयित्वा तत्तदक्षराधोङ्काधःक्रमेण लिखेत् ॥ ६ ॥

यथा चतुर्विंशतिस्त्रिभिर्हननात् द्वासप्ततिभिः षण्णामेकेन हननात् षट् द्वयोर्द्वाभ्यां घाते चत्वारः एकस्यैकेन हनने एकं शून्यस्य शून्येन गुणने शून्यं एवमेतेषां सर्वेषां मेळने त्र्यशीतिः तेष्वेङ्काङ्कप्रक्षेपे चतुरशीतिः संपद्यते इति शिवम् ॥ ७ ॥

इति पञ्चदशः खण्डः

अथातो योनियन्त्रं व्याख्यास्यामः ॥ १ ॥

स्वेष्टमानेन त्रिकोणं विलिख्य, तिसृषु रेखासु दशदश चिह्नानि समांशाङ्कानि कृत्वा, तेषु दशदश सूत्राणि पातयेत् इत्येकविंशत्यधिकशतसङ्ख्याकाः प्रस्तोत्पन्नभेदा भवन्ति ते तत्र लेख्याः सर्वमध्यत्रिकोणे कर्म लेख्यम् ॥ २ ॥

इत्थं योनिचक्रं विधाय, लिङ्गचक्रं व्याकुर्मः ॥ ३ ॥

पूर्वे एकं चतुष्कोष्ठात्मकं कोष्ठं विलिख्य, तदधः कोष्ठत्रयं तदधः पञ्च तदधः पार्श्वयोः षट् षड्विहाय यथासंप्रदायं चत्वारिंशत्कोष्ठात्मकं लिङ्गं विलिख्य, तत्संलग्नं

चतुरश्रद्वयं वह्न्यादिकोणचतुष्टयं कोष्ठचतुष्टयविशिष्टं विलिख्य, तत्र संप्रदायेन वाग्भवे बीजभेदान् विंशत्यधिकशतसङ्ख्याकान् प्रस्तारसञ्जनितान् विलिख्य, विशिष्टेषु तृतीयबीजस्य प्रस्तारसंजनितचतुर्विंशतिभेदान् विलिखेत् ॥

अथ चतुरश्रद्वयान्तराळे षड्रेखायातनेन सप्तकोष्ठान् संविधाय, तत्र दिननित्यायुगनित्याक्षराणि षट् संविलिख्य, शिष्टे कोष्ठे चोद्याक्षरं विलिख्य तत्रावाह्य पूजयेत् इति शिवम् ॥ ५ ॥

इति षोडशः खण्डः

अथातः सर्वमङ्गविद्यायाः स्वरूपबाहुळ्योपदेशं तद्विनियोगप्रस्तावं च करोति ॥ १ ॥

तत्र वाताद्यैः ग्रासमयान्तैः अकाराद्यैः क्षकारान्तैः मातृकाविसराक्षरैः प्रोक्तसंख्यैरित्यर्थः ॥ २ ॥

शतैः पञ्चभिः अकारादीनां षोडशस्वराणां ककारादीनां च पञ्चत्रिंशतां क्षकारान्तानां प्रत्येकं षोडशस्वरयोजनतः षोडशानां षोडशानामप्येवं षट्सप्तत्यधिकपञ्चशतसंख्यानां मातृकाविसराक्षराणां मूलविद्यायाः आदौ क्रमशः प्रत्येकं योजनतः षट्सप्तत्यधिकपञ्चशतसंख्याविद्यारूपाणि सतीति तस्यानवस्थाने मूलविद्यायाश्चतुर्दशस्वरस्थाने स्वरान् षोडश योजयेत् ॥ ३ ॥

पूर्वोक्तैर्विद्यादियोजितैः षट्सप्तत्यधिकपञ्चशतैरक्षरैः तत्संख्यारूपभेदाय अन्त्ये प्रत्येकं क्रमात् षोडशस्वरयोजनतः षोडशाधिकद्विशतोत्तरनवसहस्रसंख्याविद्यारूपाणि भवन्तीति तैः संप्रोक्तसंख्यैः विद्यारूपैः प्रयोजयेद्यन्त्रैरिति आदौ वृत्तत्रयं तद्बहिः षट्कोणं तद्बहिरष्टदळं विधाय तद्बहिर्वृत्तत्रयं विदध्यात् ॥ ४ ॥

तेषु विद्याकूटानुक्तक्रमेण न्यसेत् ॥ ५ ॥

तेष्वाद्यं मध्यतः साध्यसमेतं विलिखेत् ॥ ६ ॥

षट्कोणेषु चत्वारि चत्वारि विलिखेत् ॥ ७ ॥

अष्टच्छदेषु प्रत्येकं पञ्चपञ्च समालिखेत् ॥ ८ ॥

बहिर्वृत्तान्तरयुगे मातृकां मायया चितां विलोमामनुलोमां स्वेन सम्यक् समालिखेत् ॥ ९ ॥

अन्तःषडन्तराळेषु पर्यायदिनसंभवे नित्ये लिखेत् ॥

प्रादक्षिण्येन सर्वत एवं यन्त्राणि जायन्ते ॥ ११ ॥

तैः कूटैरुक्तयोगतः शतं च चत्वारिंशच्च चत्वारि च ततः क्रमादिति वृतं, एवमन्यानि कूटानि प्रोक्तानि क्रमेण विलिखेत् ॥ १२ ॥

मध्ये नामसमेतानि तदन्यान्यभितो लिखेत् ॥ १३ ॥

त्रयोदशमितैर्लक्ष्यैः सप्तविंशतिसंख्याकैः सहस्रैश्च शतेनापि चतुर्भिः तानि संख्यया यन्त्राणि जायन्ते ॥ १४ ॥

तैश्च सा सर्वमङ्गळा एवं कामेश्वर्यादिषोडशनित्यानां पृथक् पृथक् यन्त्राणि स्युः ॥ १५ ॥

तस्मादाभिरसाध्यानि न कदाचिच्च कुत्रचित् विद्यते तेषु यत्किंचित् वक्ष्ये कोशेषु तान्यै वदेन्नाथात्मकानि येन स्युस्तेन च मैर्भित्त्वा षोडशधा मन्त्री विदध्यात् ॥ १६ ॥

विनियोजकं विशालमध्यविन्यासं विदध्यात् ॥ १७ ॥

नवकोष्ठकं प्रागादिमध्यपर्यन्तं प्रादक्षिण्यक्रमाल्लिखेत् ॥ १८ ॥

नवानि नवसु प्राज्ञस्तेषु ऋक्षाणि चालिखेत् ।
सप्तम्या साध्यसंयुक्तं नाथां देवीश्च तत्क्रमात् ॥ १९ ॥
यद्यद्विवाञ्छितं कर्म तत्तत्तेषु विलिख्य वै ।
पीठे वा भूतले वाऽपि पूजयेत् प्रोक्तवासरम् ॥ २० ॥
ततः प्राप्ते वाञ्छितार्थे स्वात्मन्युद्वास्य देवताः ।
चक्रं प्रक्षाळ्य तत्तोयं केदारादिषु निक्षिपेत् ॥ २१ ॥
एवमन्यानि यन्त्राणि प्रोक्तानि क्रमशो भुवि ।
विनियोज्यान्यभीष्टेषु कार्येषूक्तक्रमेण वै ॥ २२ ॥
परसङ्ख्यासमेतानि तेषु तेष्वप्ययं विधिः ।
सर्वतः सौम्यकर्माणि सिद्ध्यन्ते वाऽनया द्रुतम् ॥ २३ ॥
वश्येषु ज्ञानसंपत्त्यै सर्वप्रत्यूहशान्तये ।
लक्ष्मीप्राप्तौ तथारोग्यसिद्धौ रोगार्तिशान्तिषु ॥ २४ ॥
विजयाय समस्तापत्तरणायाभिवृद्धये ।
पुत्रावाप्त्यै च रक्षायै पूजयेत् तेषु तत्क्रमात् ॥ २५ ॥
गजाश्वगोखरोष्ट्राजमहिषीणां विवृद्धये ।
तेषां रोगादिपीडासु तच्छान्त्यै च यथाक्रमम् ॥ २६ ॥

निर्माय नवयन्त्राणि तत्र तत्रार्चयेच्छिवाम् ।
तेषु तेषूक्तकार्येषु तत्तत्संप्राप्तिहेतवे ॥ २७ ॥
नवप्रकारयुक्तानि षोडशप्रथमादिषु ।
तिथिषु प्रोक्तरूपाणि तत्र तां सर्वमङ्गळाम् ॥ २८ ॥
पूजयेत् काङ्क्षितावाप्त्यै तेन सर्वसिद्धिर्भवतीति शिवम् ॥ २९ ॥

इति सप्तदश: खण्ड:

अथातो वासनां व्याख्यास्याम: ॥ १ ॥
तदात्मकं समुदयं मदात्मिकापि विश्रितम् ।
हयात्मकं आत्मस्वरूपं तैर्भावयेत् ॥ २ ॥
कालेनान्यत्वदु:खार्तिवासनाशतशो ध्रुवम् ।
पराहन्तामयं सर्वस्वरूपस्वात्मविग्रहम् ॥ ३ ॥
सदात्मकं स्फुरत्ताख्यं अशेषोपाधिवर्जितम् ।
प्रकाशरूपमात्मत्वे वस्तु सद्भासते परम् ॥ ४ ॥
वरयन्ते एवमतो लोके नान्यत्र मन्त्रवदक्षरम् ।
यद्विद्येति हि मन्वीत सर्वधा सर्वत: सदा ॥ ५ ॥

अथ मन्त्रार्थ:—

ललितायास्त्रिभिर्वर्णै: सकलार्थोऽभिधीयते ।
शेषेण देवीरूपेण तेन स्यादिदमीरितम् ॥ ६ ॥

अशेषतो जगत् कृत्स्नं हृल्लेखात्मकतः परम् ।
तस्याश्चार्थस्तु कथितः सर्वतन्त्रेषु गोपितः ॥ ७ ॥
व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना ।
ते यो विमर्श ईकार बिन्दुना तन्निफालनम् ॥ ८ ॥

१. ह्रीं श्रीं अं कामेश्वरीपादुकां पूजयामि ।
२. ,, आं भगमालिनीपादुकां पूजयामि ।
३. ,, इं नित्यक्लिन्नापादुकां पूजयामि ।
४. ,, ईं भेरुण्डापादुकां पूजयामि ।
५. ,, उं वह्निवासिनीपादुकां पूजयामि ।
६. ,, ऊं महावज्रेश्वरीपादुकां पूजयामि ।
७. ,, ऋं शिवदूतीपादुकां पूजयामि ।
८. ,, ॠं त्वरितापादुकां पूजयामि ।
९. ,, ऌं कुलसुन्दरीपादुकां पूजयामि ।
१०. ,, ॡं नित्यापादुकां पूजयामि ।
११. ,, एं नीलपताकापादुकां पूजयामि ।
१२. ,, ऐं विजयापादुकां पूजयामि ।
१३. ,, ओं सर्वमङ्गळापादुकां पूजयामि ।
१४. ,, औं ज्वालामालिनीपादुकां पूजयामि ।
१५. ,, अं चित्रापादुकां पूजयामि ।
१६. ,, अः त्रिपुरसुन्दरीपादुकां पूजयामि ॥ ९ ॥

शङ्कुच्छायया दिक्परिज्ञानक्रमं प्रस्तावसहितं उपदिशति ॥ १० ॥

तत्र भानोर्गत्या आदित्यदक्षिणोत्तरायणक्रमगति-भेदज्ञानच्छाययेति यावत् ॥ ११ ॥

तन्मध्यं बिन्दुमध्यं इत्येतत्क्रियाविशेषणम् ॥ १२ ॥

पूर्वापरद्वये पूर्वापरात्मिकयोः दिशोः प्राग्वच्छिन्ने कृत्वेत्यर्थः ॥ १३ ॥

तदभिमतः तद्द्वयमवष्टभ्य सममानपरिभ्रान्त्या तच्चिह्नद्वयान्तराळमानपरिभ्रान्त्यां स्वेच्छाधिकेनार्धेन मानेन अन्योन्यतुल्येन परिभ्रान्त्यां कृत्वा वृत्तद्वयं कृत्वेत्यर्थः ॥ १४॥

तयोः पूर्वापरयोः संश्लेषसंजातमध्यदक्षोत्तरस्थित इत्यस्य उत्तरत्र सन्धिद्वये इत्येते विशेषं प्राक्प्रत्यक्सूत्रमध्ये प्राक्प्रत्यगात्मसूत्रमध्ये तु संहारे दक्षोत्तरं दक्षिणोत्तरं तेषां मण्डपादीनामग्रैः सूत्राग्रैः ॥ १५ ॥

एतदुक्तं भवति—जीमूताद्यपरिवेष्टितभानौ दिवसे छायादिभिरनावृतदेशे जलयन्त्रादिभिः सुसमीकृतस्य दर्पणोदरसंकाशस्य भूतलस्य मध्ये बिन्दुं कृत्वा तदवष्टम्भतः प्रतिदिशं द्वादशाङ्गुलमानेन वृत्तं कृत्वा तत्र षडङ्गुलमानपरिणाहमूलमुत्तरोत्तरपरिणाहापचयेन सूचीमात्रीकृताग्रपरिणाहं मृद्वाकृतिं शङ्कुमूलमानोच्छ्रायसहितं वृत्ताकारं शिल्पिवरेण निर्मितं वृत्तमध्यस्थबिन्दुमध्ये यथा शङ्कुमूलपरिणाहमध्यं भवति तथा तच्छङ्कुच्छायाग्रस्य पूर्वाह्णे तत्तद्वृत्तरेखापश्चिमभागे यत्र संपातस्तत्र ततोऽपराह्णे तच्छङ्कुच्छायाग्रस्य तद्वृत्तरेखापूर्वभागे चिह्नं विधाय

तच्चिह्नद्वयं प्रापयत् सूत्रं तत्पूर्वापरं परिकल्प्य तच्चिह्नद्वया-वष्टंभेन तच्चिह्नान्तराळमानस्य चेष्टाधिकेनार्धमानेनान्योन्य-समेते किंचिदन्योन्यसंश्लिष्टं पूर्वापरं वृत्तद्वयं विधाय तद्वृत्तरेखादक्षिणोत्तरसन्धिद्वयप्रापि प्राक्पश्चिमसूत्रमध्य-गत्या तिर्यग्रूपेण यत् सूत्रं दक्षिणोत्तरं परिकल्प्य तत्प्राक्प्रत्यक्दक्षिणोत्तरसूत्रद्वयसंपाताद्वृत्तवक्ष्यमाणमानेन तुल्य-रूपपरिकल्पितसूत्राग्रैस्तैस्तेषां मण्डपादीनां प्राक्प्रत्यग्दक्षिणोत्तरात्मकदिक्चतुष्टयं परिकल्पयेत् ॥ १६ ॥

सर्वप्रयत्नेन विद्याराधितद्वारा पूर्णताख्यातिसमा-वेशनेच्छा चेत्येते समयाचारिकाः परे च शास्त्रानुशिष्टाः ॥

इत्थं विदित्वा विधिवदनुष्ठितवतः कुलनिष्ठस्य सर्वतः कृतकृत्यता शरीरत्यागे श्वपचगृहकाश्योर्नान्तरं जीवन्मुक्तो भवति ॥ १८ ॥

य इमामष्टादशखण्डीं महोपनिषदं महात्रैपुर-सिद्धान्तसर्वस्वभूतामधीते स सर्वेषु यज्ञेषु यष्टा भवति । यं यं क्रतुमधीते तेन तेनास्येष्टं भवति इति हि श्रूयते इत्युपनिषत् इति शिवम् ॥ १९ ॥

य एवं वेदेत्युपनिषत् ॥ २० ॥

भद्रं नो अपि वादय मनः ओं शान्तिः शान्तिः शान्तिः ॥ २१ ॥

इत्यष्टादशः खण्डः

इति श्रीपरशुरामकल्पसूत्रपरिशिष्टं द्वितीयभागः सम्पूर्णम् ॥

व्याख्यानोदाहृतग्रन्थग्रन्थकर्तृसूची

ग्रन्थनाम	पुटसङ्ख्या
अगस्त्यसंहिता	१०,१५,१०४,२१६,२९९
अग्निपुराणम्	४
अध्यात्मरामायणम्	८
अपराधस्तुतिः	२०२
अमरः	११३, १६२, २४२, २४५, २५६-२, २७०, २९८-२, ३२८-२, ३३४
अमृतारहस्यम्	२१४
आकरः	१४६
आङ्गिरसवचनम्	४१
आत्मपुराणम्	३६
उत्तरचतुश्शती	१७५, १७६, १७७
उत्तरचतुश्शतीव्याख्यानम्	१९७
उत्तरचतुश्शतीसेतुबन्धः	४४
उपनिषत्	३९
ऊर्ध्वाम्नायः	२७४-२
एकवीराकल्पः	२६९
कादिमतम्	४०
कामिकागमः	१०३
कालिकापुराणम्	१४९, १५२, ३६४
काशीखण्डः	१४६
कुण्डलिनीविमर्शः	१९८
कुमारीतन्त्रम्	२१४-२
कुलचूडामणिः	१४३, १४८
कुलसारः	१५२, १८५
कुलार्णवः	३६, ३९-२, ४९, ७५, १४१, १४२-२, १४९, १५१-२, १६८, २०२, २०३-२, २०६, २०९, २१०, २११, २१३-३, ३२६, ३२८
कौलोपनिषद्भाष्यम्	३२७
चिद्गगनचन्द्रिका	१०३
जैमिनितन्त्रम्	१३४, १४६
ज्ञानार्णवः	१०८, १४३, १६८, १७१, १९३, २०६, २५४, २७७-२, २७८
ज्योतिर्निबन्धः	३३६
डामरतन्त्रम्	२७८, ३३०
तत्त्वविमर्शिनी	१७४
तन्त्रम्	२१५-२, २२९, २३०, २४१, २५५, २७५, ३३५, ३६१
तन्त्रप्रामाण्यखण्डनम् भट्टोजि - दीक्षितकृतम्	११
तन्त्ररत्नम्	४४, ५२
तन्त्रराजः	३६, १३७, १९४-४, १९५-३, १९६, १९७, २७८

ग्रन्थनाम पुटसङ्ख्या

तन्त्रसारः ९६, १११, ११७, २८३, ३१३, ३२३, ३३१
तन्त्रान्तरम् ४६, ९६, ७६, १६२, १६३, १८६, १८९, १९९, २०९, २१४, ३१३, ३२६, ३३०, ३३१, ३३४–२, ३४२, ३६२
तन्त्रालोकः . . . ९०
ताराभक्तिसुधार्णवः . . १४१
तैत्तिरीयारण्यकम् . . १४
त्रिकूटारहस्यम् . . १९२, ३४४
त्रिपुरारहस्यम् ४०, ९०, ९१, ९९, १३४, ३४३, ३९१
त्रिपुरार्णवः १०, १७, १०२–२, १०७, १०९, १२८, १३३, १४१, १४२, १४४, १९०, १९९, १९८, २००, २०१, २०४, २०६–२, २०८–२, २१२–३, २२२, २७६, ३२८, ३३०–२, ३३१
त्रिपुरोपनिषत् . . १४, १९०
त्रैपुरसिद्धान्तः . . . ३६४
त्र्यक्षरकोशः . . ११३, २४२
दक्षिणामूर्तिसंहिता १०९, ११९, १६२, १६९, २६९, २७७–२
देवीभागवतम् ९९, १००, ११७, ११९, १२३, १९९, १९२, २१७, २१९, २४१, २८१, ३३९
देवीयामळम् . . १४१, २१०

ग्रन्थनाम पुटसङ्ख्या

देवीरहस्यम् . . . ३४८
धूर्तस्वामिभाष्यम् . . . २४३
नामधेयपादः . . . १४६
नारदपाञ्चरात्रम् . . २२२, २७०
नारदीयम् . . . २२४
नित्यातन्त्रम् १०७, १०९, ३०४, ३३९
नित्यारहस्यम् . . . १२४
नित्याहृदयम् . . १७८, १७९
नीलातन्त्रम् . . . २१४
नृसिंहतापिनी . . . १४
नैषधम् ४६
पद्मपुराणम् . . . ९९
परमानन्दतन्त्रम् १७–२, २४, २६, ३७–२, ९१, ९९, ८६, ९०, ९१, ९२, ९४, १०९, १११, १२४, १२८–२, १९०, १९२, १६३, २०१, २०९, २०७, २०९, २११–२, २१३, २१४, २२९, २३०, २३८, २४८, २६३, २७२, २७३–२, २७६, २७७, ३२८, ३३२–२, ३३३, ३३९, ३३६, ३३७, ३३९
परमानन्दतन्त्रटिप्पणी १०९, १३३, १९२
परमार्थसारः . . . २९
पुष्करमाहात्म्यम् . . . ४
पूर्वचतुःशती . . . १३६
प्रपञ्चसारः . . . २७२
प्रपञ्चसारसंग्रहः . . . १०७
प्रबोधचन्द्रोदयः . . . १९१

ग्रन्थनाम	पुटसङ्ख्या
फेट्कारीतन्त्रम् . . .	१९३
बीजकोशः . . .	१२४
बृहत्पाञ्चरात्रम् . . .	१११
बृहद्वामकेश्वरतन्त्रम्	३७, १४६, २०१, २०९–२, ३६१, ३६२, ३६३
बोधायनाचार्याः	९७, ९८, १३८, २७२
ब्रह्मगीता . . .	३, ४
ब्रह्मवैवर्तम् . .	२४२
ब्रह्माण्डपुराणम्	६, १४, ९८, १०६, १९२, १९९, १९८, २०२
ब्रह्मोत्तरखण्डः . . .	६, ९१
ब्राह्मम् . . .	१६–२
भगवत्पादाः . .	६९–२, १९८
भगवद्गीता	२९, ३९, ४३, १९९, २१९, ३२३
भट्टपादाः (वार्तिके) .	३, ३२
भवस्वामी . . .	९७–२
भागवतम्	६, ९, १२–२ °३ २, १६, २७, ४२, १३९, १४१, २१९, ३३८
भागवतादिः . . .	११०
भावचूडामणिः . .	१४९ १९१
भावनोपनिषत् . .	१४
भासुरानन्दनाथपादाः . .	३४
भूतपञ्चकविवेकः . .	२१८
भैरवीतन्त्रम्	१४३, १४४, १४९, २७०
मदनमहार्णवः . . .	६७
मन्थानभैरवतन्त्रम् . .	१९
महाकालसंहिता . .	१४३, १४८
महाभारतम् . .	७, २६, ८६
मार्कण्डेयपुराणम् . .	१९९
मालिनीतन्त्रम् . .	१८९, २२३
मुक्तिखण्डः (सूतसंहिता) .	९, ७
मृगेन्द्रसंहिता . . .	२६
मेदिनीकोशः . . .	२३९
यज्ञवैभवखण्डः . .	४, ९, ६–२
यामळम्	८६, १०७, १४२, १९३
योगिनीतन्त्रम्	३९, १०८, ११८, १२३, १२४, १४०, १६६–२, १६४–२, १७०, १७४, १७९–२, १७६–२, १८१, १८२, १८९, १८७, १८८, १९८, २०१, २०३–२, २०८, २११, २१८, २१९, २६९–७, २७०, २७६, २९६, ३२७, ३२८, ३२९, ३३०, ३३१, ३३३, ३४०, ३६२, ३६३
योगिनीतन्त्रव्याख्यानम् . .	४१
रतिरहस्यम् . . .	२६२
रत्नत्रयपरीक्षा . .	२०, २२
रहस्यार्णवः	९३, १४८, २०१, २१०, ३३०, ३३२, ३३३
रामतापिनी . . .	१४
रुद्रयामळम् .	३९, ८६, ८७, २१२
लघुस्तवः . . .	१४२
. . .	१६
लैङ्गम् . . .	२७०
वक्रतुण्डकल्पः . . .	
वरिवस्यारहस्यम् .	१२०, १२३, १९७

ग्रन्थनाम	पुटसङ्ख्या
वामकेश्वरतन्त्रम्	१०७, १०८, १०९, १२२, १७३, १७४, १८१, १८३, १८७, १८८–२, १८९–२, १९३, २०२
वासिष्ठम्	२६, २१८
विद्यारण्यस्वामिनः	११०
विशुद्धेश्वरतन्त्रम्	२८३
विश्वकोशः	१६१
विश्वामित्रकल्पः	३०६
विष्णुपुराणम्	३२, १९४
वीरचूडामणिः	२११
वीरतन्त्रम्	२२२
वैजयन्ती	१८, २४२
वैद्यसारः	६७
शक्तिरहस्यम्	३९
शक्तिसङ्गमतन्त्रम्	२०१–२, २९६
शक्तिसूत्रभाष्यम्	२२
शंकरभगवत्पादाः	२०१, २१६
शाण्डिल्यसूत्रम्	१३
शारदातिलकम्	२९२
शिङ्गभूपालपद्धतिः	१०७
शिवमहिम्नम्	१६०
शिवमाहात्म्यखण्डः	९, १०
शिवरहस्यम्	२२२
श्यामारहस्यम्	६९
श्रीचक्रसंहिता	२७७
श्रुतिः	४८
सनत्कुमारतन्त्रम्	२२१
सप्तशती	२०२
समयाङ्कमातृका	१९०, २२१
समयाचारतन्त्रम्	१४२, १४९
सहस्रनाम	२०२
सहस्रनामभाष्यम्	१००
सिद्धान्तग्रन्थः	१२४
सिद्धान्तशिरोमणिः	४७
सुन्दरीतन्त्राणि	११
सुन्दरीहृदयम्	१०३
सुभगोदयः	२८, २९
सूतगीता	८
सूतसंहिता	२७, २१७
सेतुबन्धः	१४, ७९, १०५, १०६, १०८–२, १२०, १२२, १२४, १९८, १८१, १८६, १९७, १९८
सौन्दर्यलहरी	१०७
सौभाग्यानन्दसन्दोहः	९२, १२९, १३०, १९०,
सौरतन्त्रम्	२७८
स्कन्दः	३२
स्कान्दम्	२६, ३०, १९४
स्वच्छन्दतन्त्रम्	२०
स्वच्छन्दसंग्रहः	३०, ७८
स्वतन्त्रतन्त्रम्	२०२, ३३३, ३३८, ३५१, ३५९
हिरण्यकेशिसूत्रम्	९२
हिरण्यकेशिसूत्रव्याख्या	१८
हंसमाहेश्वरतन्त्रम्	१४३, १४८

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.

GAEKWAD'S ORIENTAL SERIES

Published under the Authority of the
Government of His Highness the
Maharaja Gaekwad of Baroda.

PARAS'URĀMAKALPASŪTRA

PART II

NITYOTSAVA

Volume XXIII

नित्योत्सवः

उमानन्दनाथरचितः

NITYOTSAVA

BY

UMĀNANDANATHA

[SUPPLEMENT TO PARASURAMA-KALPA-SUTRA]

EDITED BY

A. MAHADEVA SASTRI, B.A.

DIRECTOR, ADYAR LIBRARY, ADYAR, MADRAS

Author of the Vedic Law of Marriage, etc., the English translation of Sankaracharya's Commentary on the Bhagavad-Gita and Taittiriya Upanishad. Late Editor of the Mysore Government Oriental Library Sanskrit Series, Editor of the Adyar Library Series

BARODA

CENTRAL LIBRARY

1923

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras and published by Newton Mohun Dutt, Curator of Libraries, Baroda State, on behalf of the Government of His Highness the Maharaja Gaekwad, at the Central Library, Baroda.

PREFACE

In the preface to the *Parasurāma-Kalpa-Sūtra*, Part I, all that needs be said with reference to *Nityotsava* has been said. It only remains to mention the MSS. on which this edition of *Nityotsava* is based.

They are as follows:—

1. A grantha manuscript copy of the Adyar Library, No. XXXV B 103; cited as अ.

2. Another grantha manuscript copy of the Adyar Library, No. VIII F 18; cited as अ १.

3. A grantha manuscript copy kindly lent by Mr. M. V. Srinivasa Iyer of Triplicane, Madras; cited as श्री.

4—6. Devanagari MS. copies of Central Library, Baroda, Acc. Nos. 183, 4637, 5572; cited as ब १, ब २, ब ३ respectively.

7. A Telugu MS. copy borrowed by Pandit R. Anantakrishna Sastri from the owner in the Nizam's Dominions, cited as भ.

Of these No. 3 is the most carefully prepared copy. The others are all tolerably correct, except for some clerical errors. Two or three of these MSS. contain each here and there passages not found in the other MSS. Of these the important and useful ones have been embodied in this edition, the source being noted in each case.

A. MAHADEVA SASTRI

विषयसूचिका

विषयः	पुटसङ्ख्या
आरम्भोल्लासः प्रथमः—दीक्षाक्रमः	

भूमिका	१
दीक्षाकालनिर्णयः	२
गुरुलक्षणम्	६
शिष्यलक्षणम्	६
गुरुवरणम्	७
क्रमप्रवर्तनपूर्वकं शिष्याह्वानम्	७
त्रैपुरसिद्धान्तः	८
मन्त्रोपासनम्	८
उपासकधर्माः	९
सर्वसारभूतो धर्मः	९
दीक्षाऽऽवश्यकत्वम्	९
शाम्भवी दीक्षा	९
शाक्ती दीक्षा	१०
मान्त्री दीक्षा	१०
दीक्षात्रये मुख्यगौणपक्षौ	११
इष्टमन्त्रदानम्	१२
समयाचारानुशासनम्	१२
कुलधर्मनिष्ठाफलम्	१३
शिष्यस्य परचिद्रूपापादनम्	१३
सर्वमन्त्राधिकारलाभः	१३
तत्तत्क्रमानुष्ठाने दीक्षाव्यवस्था	१३
अधिकारिनिर्णयः	१४

विषयः | पुटसङ्ख्या

तरुणोल्लासो द्वितीयः—गणपतिक्रमः

उपोद्घातः १५
काल्यकृत्याह्निकयोर्विशेषः १५
चतुरावृत्तितर्पणसंकल्पादि १५
चतुरावृत्तितर्पणम् १६
पूजाविधिः २१
यागमन्दिरागमनादि विघ्नोत्सारणान्तम् २१
शिखाबन्धनादि मातृकान्यासान्तम् २२
षडङ्गन्यासः २२
ध्यानम् २२
अर्घ्यसंस्कारः २३
पीठे प्राणप्रतिष्ठा २३
पीठशक्तिपूजा २४
धर्माद्यष्टकपूजा २४
महागणपतिपूजा २४
महागणपतितर्पणम् २५
षडङ्गपूजा २५
ओघत्रयपूजा २५
दिव्यौघः २५
सिद्धौघः २६
मानवौघः २६
दिव्यौघपाठान्तरम् २६
सिद्धौघपाठान्तरम् २६
मानवौघपाठान्तरम् २६
आवरणार्चनम् २८
प्रथमावरणम् २८
द्वितीयावरणम् २८
तृतीयावरणम् २८
चतुर्थावरणम् २८

विषयः	पुटसङ्ख्या
पञ्चमावरणम्	२९
गणनाथस्य पुनस्तर्पणं, षोडशोपचारपूजा च	३०
अग्निकार्यम्	३०
बलिदानम्	३०
तर्पणजपस्तोत्राणि	३१
सदाशिवप्रोक्तं गणेशाष्टकम्	३२
सुवासिनीपूजा	३३
पुरश्चरणविधिः	३३

यौवनोल्लासस्तृतीयः—श्रीक्रमः

१—आह्निकप्रकरणम्	३६
गुरुध्यानम्	३६
प्राणसंयमनम्	३७
चिद्विमर्शः	३८
हृदा मूलावृत्तिः	३८
रश्मिमालास्मरणम्	३८
अजपागायत्रीभावनम्	३८
भूप्रार्थनादि मुखक्षालनान्तम्	३८
स्नानविधिः	३९
सन्ध्याविधिः	४०
२—सपर्याप्रकरणम्	४१
यागमन्दिरप्रवेशः	४१
श्रीचक्रपरिकल्पनम्	४२
यन्त्रप्राणप्रतिष्ठा	४२
मन्दिरार्चा	४३
वर्धनीपात्रनिधानादि दीपप्रज्वालनान्तम्	४३
भूतशुद्धिः	४४
आत्मप्राणप्रतिष्ठा	४४
प्रत्यूहोत्सारणम्	४४

विषयः	पुटसङ्ख्या
न्यासजालविधिः	४९
पात्रासादनम्—सामान्यार्घ्यविधिः	४९
विशेषार्घ्यविधिः	४७
अन्तर्यागः	५१
चतुष्षष्ठ्युपचारार्चनम्	५२
षडङ्गार्चनम्	५५
नित्यादेवीयजनम्	५५
गुरुमण्डलार्चनम्	५७
१—कादिविद्योपासकानाम्	५७
दिव्यौघः	५७
सिद्धौघः	५८
मानवौघः	५८
२—षोडश्युपासकानाम्	५८
दिव्यौघः	५९
सिद्धौघः	५९
मानवौघः	५९
३—हादिविद्योपासकानाम्	६०
दिव्यौघः	६०
सिद्धौघः	६०
मानवौघः	६०
मन्वादिविद्यानां गुरुपरम्परा	६१
दिव्यौघः	६१
सिद्धौघः	६१
मानवौघः	६१
अज्ञातगुरुपारम्पर्याणां गुरुक्रमः	६२
दिव्यौघः	६२
सिद्धौघः	६२
मानवौघः	६२
आवरणपूजा	६३

विषयः	पुटसङ्ख्या
प्रथमावरणम्	६३
द्वितीयावरणम्	६४
तृतीयावरणम्	६५
चतुर्थावरणम्	६५
पञ्चमावरणम्	६६
षष्ठावरणम्	६७
सप्तमावरणम्	६८
अष्टमावरणम्	६८
नवमावरणम्	६९
मन्त्रपुष्पम्	७१
कामकळाध्यानम्	७१
होमस्य कृताकृतत्वम्	७२
बलिदानविधिः	७२
प्रदक्षिणाः	७२
स्तोत्रम्	७२
सुवासिन्याः पूजनम्	७५
तत्त्वशोधनम्	७६
देवतोद्वासनम्	७७
शान्तिस्तवः	७८
विशेषार्घ्यविसर्जनम्	७८
सङ्क्षेपार्चाविधिः	७९
सङ्क्षेपार्चनानि	७९
ऋत्वर्थनियमः	८०
श्रीचक्रलेखनोपायः	८०
श्रीचक्रप्रस्तारभेदाः	८२
श्रीचक्रप्रतिष्ठापनविधिः	८२
यन्त्रभेदेन अर्चनकालावधिः	८४
श्रीचक्रमहिमा	८५
३—होमप्रकरणम्	८५

विषयः	पुटसङ्ख्या
४—मुद्राप्रकरणम्	९०
श्रीगुरुवन्दनमुद्राः	९०
अर्घ्यस्थापनमुद्राः	९१
अर्चने मुद्राः	९१
सङ्क्षोभिण्यादिमुद्राः	९१
न्यासे मुद्राः	९२
जपे मुद्राः	९२
५—न्यासप्रकरणम्	९३
करशुद्धिन्यासः	९५
आत्मरक्षान्यासः	९५
चतुरासनन्यासः	९५
वालाषडङ्गन्यासः	९५
वशिन्यादिन्यासः	९६
मूलविद्यावर्णन्यासः	९६
श्रीषोडशाक्षरीन्यासः	९६
संमोहनन्यासः	९७
संहारन्यासः	९७
सृष्टिन्यासः	९७
स्थितिन्यासः	९७
लघुषोढान्यासः	९८
गणेशन्यासः	९८
ग्रहन्यासः	१०१
नक्षत्रन्यासः	१०२
योगिनीन्यासः	१०३
राशिन्यासः	१०६
पीठन्यासः	१०७
श्रीचक्रन्यासः	१०९
त्रैलोक्यमोहनचक्रन्यसः	११०
सर्वाशापरिपूरकचक्रन्यासः	११२

विषयः	पुटसङ्ख्या
सर्वसङ्क्षोभणचक्रन्यासः	११३
सर्वसौभाग्यदायकचक्रन्यासः	११३
सर्वार्थसाधकचक्रन्यासः	११४
सर्वरक्षाकरचक्रन्यासः	११४
सर्वरोगहरचक्रन्यासः	११५
आयुधन्यासः	११६
सर्वसिद्धिप्रदचक्रन्यासः	११६
सर्वानन्दमयचक्रन्यान्सः	११७
६—जपप्रकरणम्	११७
जपविधिः	११८
जपोत्तराङ्गमन्त्राः	१२२
रश्मिमालामन्त्राः	१२४
रश्मिमालामन्त्राणां ऋष्यादयः	१२९
७—नैमित्तिकप्रकरणम्	१३६
पर्वसु नैमित्तिकार्चनविधिः	१३६
नित्यक्रमात् नैमित्तिके विशेषः	१३७
निवेदने पक्षभेदाः	१३७
दमनविधिः	१३८
चैत्रपूर्णिमाकृत्यम्	१३९
वैशाखीकृत्यम्	१३९
ज्येष्ठकृत्यम्	१३९
आषाढकृत्यम्	१३९
पवित्रारोपणविधिः	१३९
भाद्रपदकृत्यम्	१४०
आश्वयुजकृत्यम्	१४१
कार्तिककृत्यम्	१४१
मार्गशीर्षकृत्यम्	१४२
पौषकृत्यम्	१४२
माघकृत्यम्	१४२

विषयः	पुटसङ्ख्या
फाल्गुनकृत्यम्	१४२

प्रौढोल्लासश्चतुर्थः—श्यामाक्रमः

उपोद्घातः	१४४
काल्यकृत्यं आह्निकं च	१४४
यागमन्दिरप्रवेशः	१४४
प्राणायामः	१४५
षडङ्गादिन्यासपञ्चकम्	१४५
मन्दिरार्चनम्	१४७
यन्त्रोद्धारः	१४९
अर्घ्यशोधनम्	१४९
चक्रदेवीपूजा	१५०
गुर्वौघत्रयपूजा	१५१
दिव्यौघः	१५१
आवरणार्चनम्	१५१
गुरुपादुकापूजा	१५३
देव्याः पुनःपूजा	१५३
वलिदानम्	१५३
मातङ्गीश्वरीमन्त्रजपः	१५४
मातङ्गीस्तुतिः	१५४
सुवासिनीपूजाऽऽदि शेषकृत्यम्	१५६
श्यामोपासकनियमाः	१५७
पुरश्चरणसंकल्पः	१५७
मन्त्रजपः	१५७
जपकालः	१५८
स्त्रीशूद्रयोः प्रणवप्रत्याम्नायः	१५८
पुरश्चरणाङ्गहोमः	१५८
पुरश्चरणाङ्गं तर्पणम्	१५९
पुरश्चरणाङ्गं भोजनम्	१५९

विषयः	पुटसङ्ख्या
होमप्रत्याम्नायो जपः	१५९
सिद्धिपर्यन्तं पुरश्चरणस्य अभ्यासः	१६१
पुरश्चरणप्रत्याम्नायाः	१६१
कूर्मचक्रलक्षणम्	१६३
मालासंस्कारः	१६३
अक्षमालायाः संस्कारानपेक्षा	१६४
रुद्राक्षमालासंस्कारः	१६४
मालान्तरसंस्कारः	१६५
देवताभेदेन सूत्रभेदः	१६६
मालासंस्कारकालः	१६६
मालाभेदेन फलभेदः	१६६
सूत्रजीर्णतादौ प्रायश्चित्तम्	१६६
जपभेदाः	१६६
कुण्डस्थण्डिलयोः परिमाणम्	१६९
होमे इतिकर्तव्यताविशेषः	१७०
काम्यहोमद्रव्याणां मानं फलं च	१७०
पुरश्चरणकाले विहितानि	१७१
निषिद्धानि	१७१
भोज्यानि	१७१
अभोज्यानि	१७२
भोजनपर्यायः	१७२

तदन्तोल्लासः पञ्चमः—दण्डिनीक्रमः

उपोद्घातः	१७३
काल्यकृत्यं आह्निकं च	१७३
यागमन्दिरप्रवेशः	१७४
प्राणायामः	१७५
द्वितारीन्यासः	१७५
करषडङ्गन्यासौ	१७५

विषयः	पुटसङ्ख्या
अर्घ्यशोधनम्	१७६
सप्तार्णमन्त्रपञ्चकन्यासः	१७६
अष्टखण्डन्यासः	१७६
मातृकास्थानेषु मूलपदन्यासः	१७७
तत्त्वाष्टकन्यासः	१७७
यन्त्रप्राणप्रतिष्ठा	१७८
पीठपूजा	१७८
आसनपूजा	१७८
मूर्तिकल्पनम्	१७९
देवीध्यानम्	१७९
देव्याः षोडशोपचारपूजा	१७९
देवीतर्पणम्	१८०
ओघत्रययजनम्	१८०
आवरणार्चनम्	१८०
देवीपुनःपूजाऽऽदि बलिदानान्तम्	१८४
वाराहीमन्त्रजपः	१८४
वाराहीस्तोत्रम्	१८५
बृन्दाराधनं, गुरुसन्तोषणं, शक्तिवटुकपूजा च	१८८
हविःप्रतिपत्तिः	१८८
मन्त्रसाधनम्	१८९

उन्मनोल्लासः षष्ठः—परापद्धतिः

उपोद्घातः	१९०
काल्यकृत्यं आह्निकं च	१९०
यागमन्दिरप्रवेशः	१९१
प्राणायामः	१९१
अङ्गन्यासः	१९२
चिदग्नौ सर्वतत्त्वविलापनम्	१९२
अर्घ्यशोधनम्	१९२

विषयः	पुटसङ्ख्या
तत्त्वकदम्बस्य हृत्पद्मस्थापनम्	१९३
पराचक्रनिर्माणम्	१९३
चक्रे देव्याः पूजा	१९३
देव्यां अखिलतत्त्वहोमभावनम्	१९४
गुर्वोघत्रययजनम्	१९४
बलिदानम्	१९५
परामनुजपः	१९५
परास्तुतिः	१९६
हविःशेषस्वीकरणम्	१९६
मन्त्रसाधनम्	१९७

अनवस्थोल्लासः सप्तमः—साधारणक्रमः

उपोद्घातः	१९८
काल्यकृत्यं आह्निकं च	१९८
यागमन्दिरप्रवेशः	१९८
प्राणायामः	१९९
मातृकाषडङ्गन्यासौ	१९९
अर्घ्यशोधनम्	२००
यन्त्रोद्धारः	२००
चक्रे प्रधानदेवतायाः तदङ्गदेवतानां च पूजा	२००
गुर्वोघत्रययजनम्	२०१
आवरणार्चनम्	२०१
देवतायाः पुनःपूजा	२०३
होमः	२०३
प्रदक्षिणनतिमूलमन्त्रजपाः	२०३
देवतास्तुतिः	२०४
मन्त्रसाधनम्	२०५
मन्त्राणां जातिनिर्णयः अधिकारिभेदश्च	२०५
कलौ सिद्धमन्त्राः	२०६

विषयः	पुटसङ्ख्या
गुरुशिष्ययोः वर्णाश्रमादिव्यवस्था	२०७
वयोभेदेन सिद्धिप्रदा मन्त्राः	२०८
मन्त्राणां व्यक्तिविशेषाः	२०९
सिद्धारिशोधनप्रकारः	२०९
ऋणधनशोधनप्रकारः	२११
ऋणिधनिचक्रम्	२११
कुलाकुलचक्रविचारापवादः	२१२
मन्त्राणां संस्काराः	२१५
पुष्पविचारः	२१७
देवतायोग्यानि पुष्पादीनि	२१७
वर्जनीयानि	२१८
सर्वदेवतासाधारणानि विहितानि च	२१९
केषांचित्कालावधिः	२२०
विहितनिषिद्धानि	२२१
निषिद्धानि	२२१
मध्यमं फलरूपं कुसुमम्	२२२
अधमम्	२२२
पर्युषितकुसुमविचारः	२२२
पर्युषितापवादः	२२२
पर्युपितमात्रस्यापि ग्राह्यत्वम्	२२३
सर्वस्यैतस्यापवादः.	२२३
निबन्धाध्ययनमहिमा	२२३
ग्रन्थकर्तृप्रशस्तिः.	२२४
नित्योत्सवोदाहृतग्रन्थग्रन्थकारसूची	२२५

शुद्धाशुद्धपत्रिका

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१२३	१२	जातवदसि	जातवेदसि
२१०	०३	नकृन्तति	निकृन्तति
,,	२६	त्याधि	त्याय
२११	१३	ऋणीधनी	ऋणिधनि
,,	१७	साधक	साधकः
२१२	२१	ऋणीधनी	ऋणिधनि
२१३	२२	विधवा प	विधवाप
२१७	११	गगनं ह	गगनं हृ

नित्योत्सवः

श्री उमानन्दनाथविरचितः

आरम्भोल्लासः प्रथमः—दीक्षाक्रमः

भूमिका

नत्वा नाथपरम्परां शिवमुखां विघ्नेश्वरं श्रीमहा-
राज्ञीं तत्सचिवां तदीयपृतनानाथां तदन्तःपराम् ।
एषामावृतिदेवताः परिचितान् रश्मिस्रजानिर्जरान्
वीरांश्च प्रणये निबन्धनमिदं नाम्नाऽपि नित्योत्सवम् ॥
अन्तेवसता शम्भोरवतारेणाच्युतस्य षष्ठेन ।
प्रकृतयति कल्पसूत्रं प्रोक्तं रामेण यत्र गदितोऽर्थः ॥
काश्याश्चोळान् समागत्य कावेर्यङ्कविहारिणा ।
नाथेन भासुरानन्दनाथेनास्मीह योजितः ॥
यस्यादृष्टो नास्ति भूमण्डलांशो
यस्यादासो विद्यते न क्षितीशः ।
यस्याज्ञातं नैव शास्त्रं किमन्यैः
यस्याकारः सा परा शक्तिरेव ॥
भृगुरामसूत्रजालकभग्नप्रसरस्य मे द्विजस्येह ।
ग्रन्थिविमोकधुरीणं गुरुचरणस्मरणमेव मार्गकरम् ॥
आरम्भ-तरुण-यौवन-प्रौढ-तदन्तोन्मनानवस्थाऽऽख्यैः ।
सूत्रोदितैस्तु सप्तभिरुल्लासैराश्रितेह विश्रान्तिः ॥

येषु दीक्षा-गणेश-श्री-श्यामा-क्रोडी-परा-क्रमाः ।
सामान्यश्च क्रमोऽन्येषां क्रमेण प्रतिपादिताः ॥
प्रतिपाद्येषु मुख्यत्वमङ्गताऽन्यच्च यद्भवेत् ।
तत्सर्वं श्रीगुरुप्रोक्ते रत्नालोकेऽधिगम्यताम् ॥
न्यायोपसंहृतैरङ्गैः प्रयुञ्जानस्य मे क्रमान् ।
भ्रम[1]प्रमादात् स्खलितं [2]समादधतु तद्विदः ॥
सूत्रसंसूचितानुक्ताविरुद्धाङ्गेतिकार्यता ।
तन्त्रान्तरात् सम्प्रदायादप्युक्तेह क्वचित् क्वचित् ॥
इह क्रमाणां सर्वेषां श्रीक्रमः प्रकृतिर्मतः ।
अतिदिश्य तमन्यत्र विशेषस्तु निरूप्यते ॥
[3]क्रमान्तरेषु चाङ्गानां विज्ञेया श्रीक्रमेऽपि च ।
पौर्वापर्यभिदा तत्तत्खण्डसूत्रक्रमानुगा ॥
श्रेयोऽर्थिनः साधकस्य साङ्गे श्रीसुन्दरीक्रमे ।
आवश्यकत्वात् प्रथमं दीक्षाविधिरुदीर्यते ॥

दीक्षाकालनिर्णयः

तस्य च कालनिर्णयो मन्थानभैरवतन्त्रे—

वैशाखे सिद्धिदा दीक्षा श्रावणे वृद्धिदा नृणाम् ।
आश्विने सर्वसिद्धिः स्यात् कार्तिके ज्ञानवृद्धिदा ॥
शुभदा मार्गशीर्षे च माघे स्वर्णफलप्रदा ।
फाल्गुने सर्वसिद्धिः स्यादन्येऽनिष्टफलप्रदाः ॥

इति । सारसङ्ग्रहे 'मलमासं विवर्जयेत' इत्युक्तम् । इदं क्षयमासस्याप्युपलक्षणम् । तत्रैव—

[1] प्रमादस्ख—भ.
[2] समयन्त्विह साधवः—अ, भ.
[3] अयं श्लोकः अ, अ१, कोशयोरेव दृश्यते.

रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत् किल ।
बुधे सौन्दर्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ ॥
शुक्रे सौभाग्यमाप्नोति . . . . ॥ इति ॥
द्वितीयायां भवेत् ज्ञानं तृतीयायां भवेच्छुचिः ।
पञ्चम्यां बुद्धिवृद्धिः स्यात् सौख्यं स्यात्सप्तमीदिने ॥
दशम्यां राजसौभाग्यं एकादश्यां शुचिर्भवेत् ।
द्वादश्यां सर्वसिद्धिः स्यात् पूर्णिमा सर्वसिद्धिदा ॥ इति ॥
अस्वाध्यायं विवर्जयेत् . . . . . . ॥ इति च ॥

अस्वाध्यायं सन्ध्यागर्जितनिर्घोषभूकम्पादिनिमित्तकानध्यायदिवसानित्यर्थः ।

अश्विन्यां सुखमाप्नोति रोहिण्यां वाक्पतिर्भवेत् ।
पुनर्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनम् ॥
मघायां दुःखहानिः स्याद्रूपदा पूर्वफल्गुनी ।
ज्ञानं चोत्तरफल्गुन्यां हस्तायां च बली भवेत् ॥
चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनम् ।
अनूराधा बुद्धिवृद्ध्यै [1]कीर्त्यै स्यातां ततः परे ॥
[2]पूर्वाषाढोत्तराषाढे [3]सर्वसम्पत्तिदायिके ।
बुद्धिः शतभिषायां स्यात् पूर्वभाद्रे सुखी भवेत् ॥
सौख्यं चोत्तरभाद्रायां रेवत्यां कीर्त्तिवर्धनम् ॥ इति च ॥
योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनः शुभः ।
सुकर्मा च धृतिर्वृद्धिर्ध्रुवः सिद्धिश्च हर्षणः ॥
वरीयांश्च शिवः सिद्धो ब्रह्मा चैन्द्रोऽप्यमी शुभाः ॥ इति च ॥
बवादिवणिजान्तानि करणानि शुभासये ॥ इति च ॥

वैशम्पायनसंहितायां—

मन्त्राद्यारम्भणं मेषे धनधान्यप्रदं भवेत् ।
कर्कटे सर्वसिद्धिः स्यात् कन्या लक्ष्मीप्रदा नृणाम् ॥

[1] मूलं सर्वसमृद्धिकृत्—अ. [2] एतदर्धं अ. कोश एव दृश्यते. [3] भवेतां कीर्तिदायिके—अ.

तुलायां सर्वसिद्धिः स्यात् सर्वलाभश्च वृश्चिके ।
मकरं पुत्रदं प्राहुः [1]कुम्भो धनसमृद्धिदः ॥
शुक्लपक्षे शुभा दीक्षा कृष्णेऽप्यापञ्चमीदिनात् ।
भूतिकामैः सिते पक्षे मुक्तिकामैः सितेतरे ॥ इति ॥

अत्र च गुरुभार्गवमौढ्यं चन्द्रतारानुकूल्यं लग्नस्य ग्रहबलादिकं च विचार्यम् । ग्रहबलं तु—

त्रिषडायगताः पापाः शुभाः केन्द्रत्रिकोणगाः ।
दीक्षायां तु शुभाः सर्वे रन्ध्रस्थाः सर्वनाशकाः ॥

आयः एकादशस्थानम् । पापाः पापग्रहाः रविभौमशनिराहुकेतुक्षीणेन्दुपापयुक्ताः । सौम्याः शुभाः शुभग्रहाः अक्षीणेन्दुपापयोगरहितबुधगुरुभृगवः । केन्द्राणि प्रथमचतुर्थसप्तमदशमस्थानानि । त्रिकोणे पञ्चमनवमस्थाने । सर्वे पापाः शुभाश्च ग्रहाः उक्तस्थानगताः दीक्षायां शुभावहा एव । एत एव रन्ध्रे अष्टमस्थाने स्थिता यदि सर्वनाशका इति योजना ॥

अथ उक्तकालमन्तरेण दीक्षार्हः कालो यथा तन्त्रान्तरे—

विषुवेऽप्ययनद्वन्द्वे सङ्क्रान्त्यां दमनोत्सवे ।
दीक्षा कार्या त्वकालेऽपि पवित्रे गुरुपर्वणि ॥

विषुवे—मेषतुलासङ्क्रमणयोः इत्यर्थः । अयनद्वन्द्वे—कर्कटमकरसङ्क्रान्त्योः । सङ्क्रान्त्यां—तदन्यासु सङ्क्रान्तिषु इत्यर्थः । दमनोत्सवे—चैत्रपूर्णिमाऽऽदिषु दमनकरणकदेवीपूजादिनेष्वित्यर्थः । पवित्रे—श्रावणपूर्णिमाऽऽदिषु, देव्याः पवित्रारोपणदिवसेषु इत्यर्थः । गुरुपर्वणि—गुरोः जन्मव्याप्तिदिनयोः । तथा—

षष्ठी भाद्रपदे मासि [2]कृष्णाश्विनचतुर्दशी ।
कार्तिके नवमी शुक्ला मार्गे कृष्णा च पञ्चमी ।
पौषे च पूर्णिमा [3]देवी माघे चैव चतुर्थिका ॥

[1] कुम्भः सर्वसमृद्धिकृत्—अ.
[2] कृष्णेति काकाक्षिन्यायेनोभयत्रान्वेति—इति टिप्पणी अ, ब२.
[3] देवि—अ, ब१, ब२, ब३.

फाल्गुनैकादशी कृष्णा चैत्रे मासि त्रयोदशी ।
वैशाखेऽक्षय्यतृतीया ज्येष्ठे [1]दशहरा स्मृता ।
आषाढे द्वादशी कृष्णा अमावास्या च श्रावणी ।
इमानि देवीपर्वाणि कोटियज्ञफलानि वै ॥

दीक्षाऽर्हाणीति शेषः । दशहरा ज्येष्ठशुक्ल[2]दशमी । सौभाग्यचन्द्रोदये[3] अस्मन्नाथचरणैः बहूनि देवीपर्वाणि उक्तानि । यथा—

अमाऽन्तचान्द्रमासेषु चैत्रशुक्लत्रयोदशी ।
चतुर्दश्यपि शुक्लाऽथ वैशाखे शुक्लपक्षगाः ॥
तृतीयैकादशीपौर्णमास्यः कृष्णचतुर्दशी ।
ज्येष्ठे तु शुक्ले दशमी राका कृष्णचतुर्दशी ॥
आषाढे शुक्लपक्षस्थे पञ्चमी च त्रयोदशी ।
श्रावणे मासि शुक्लैकादशी शुक्लचतुर्दशी ॥
कृष्णा पञ्चम्यष्टमी च रोहिणीसहिता यदि ।
नवमी चाथ भाद्रस्य कृष्णषष्ठी तथाऽष्टमी ॥
रोहिणीसहिता चेत् स्यादाश्विने सप्तमी सिता ।
अष्टमी च सिता कृष्णपक्षस्था च चतुर्दशी ॥
कार्तिके शुक्लपक्षस्थे नवमीद्वादशी तिथी ।
मार्गशीर्षे तृतीया च षष्ठी धवळपक्षगे ॥
पौषे चतुर्थीनवमीचतुर्दश्यः सिता मताः ।
दशमी त्वसिता माघे चतुर्थ्येकादशी सिते ॥
चतुर्दश्यसिता चाथ फाल्गुने शुक्लपक्षगे ।
षष्ठीनवम्यौ कृष्णा तु भवेदेकादशीति च ॥
रत्नावलीकुलोड्डीशयामळाद्यर्थसङ्ग्रहे ॥ इति ॥

अन्योऽपि विस्तरः तत एव ज्ञातव्यः ॥

[1] तु दहरा—अ.
[2] नवमी—अ.
[3] इतः प्रभृत्युदाहृतवचनानि अ१, ब१, ब३ कोशेष्वेवोपलभ्यन्ते.

सत्तीर्थेऽर्कविधुग्रासे पुण्यारण्ये वनेषु च ।
मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन् न शोधयेत् ॥

प्रकारान्तरे च—

सर्वे वारा ग्रहाः सर्वे नक्षत्राणि च राशयः ।
यस्मिन्नहनि सन्तुष्टो गुरुः सर्वे शुभावहाः ॥
सन्तुष्टे च गुरौ तस्य सन्तुष्टाः सर्वदेवताः ।
गुरुं सन्तोषयेत् भक्त्या द्वयमेव तदा भवेत् ॥

द्वयं भोगमोक्षौ । एवकारः अप्यर्थः । अधिकारिभेदेन कालो यथा—

मुमुक्षूणां सदा कालः स्त्रीणां कालस्तु सर्वदा ॥ इति ॥

गुरुलक्षणम्

तन्त्रराजे—

सुन्दरः सुमुखः स्वस्थः सुलभो बहुतन्त्रवित् ।
असंशयः संशयच्छिन्निरपेक्षो गुरुर्मतः ॥
सौन्दर्यमनवद्यत्वं रूपे सुमुखता पुनः ।
स्मेरपूर्वाभिभाषित्वं स्वच्छताऽजिह्मवृत्तिता ॥
सौलभ्यमप्यगर्वित्वं सन्तोषो बहुतन्त्रता ।
असंशयस्तत्त्वबोधः तच्छित्तत्प्रतिपादनात् ॥
नैरपेक्ष्यमवित्तेच्छा गुरुत्वं हितवेदिता ।
एवंविधो गुरुर्ज्ञेयस्त्वितरः शिष्यदुःखदः ॥

अजिह्मवृत्तितेति छेदः । बहुतन्त्रता—बहुतन्त्रवेदिता इत्यर्थः ॥

शिष्यलक्षणम्

तथा—

चतुर्भिराद्यैः सहितः श्रद्धावान् सुस्थिराशयः ।
अलुब्धः स्थिरगात्रश्च प्रेक्ष्यकारी जितेन्द्रियः ॥

आस्तिको दृढभक्तिश्च गुरौ मन्त्रे [1]सदैवते ।
एवंविधो भवेच्छिष्यः इतरो दुःखकृद्गुरोः ॥ इति ॥

चतुर्भिराद्यैरिति सुन्दरत्वादिभिः । अन्यान्यपि तल्लक्षणानि कुलार्णवादितन्त्रेषु बहुळमुपलभ्यमानानि ग्रन्थगौरवभयात् नेह लिखितानि ।शिष्यपरीक्षाकालोऽपि तत्रैव——

एकद्वित्रिचतुःपञ्चवर्षाण्यालोच्य योग्यताम् ।
भक्तियुक्तान् गुणांश्चाऽपि क्रमाद्वर्णे ससङ्करे ।
पश्चादुक्तक्रमेणैव वदेद्विद्यामनन्यधीः ॥ इति ॥

ससङ्करे, अनुलोमजातिसहिते । वर्णे, ब्राह्मणादिवर्णेषु इत्यर्थः । एकवर्षं ब्राह्मणस्य योग्यतापरीक्षा, क्षत्रियादिषु द्व्यादिसंवत्सरपरीक्षा इत्यर्थः ॥

एवमुक्तान्यतमे काले उक्तलक्षणो गुरुः उक्तलक्षणं परीक्ष्य शिष्यं दीक्षयेत् ॥

गुरुवरणम्

तत्र निर्वर्तितस्नाननित्यविधिः साधको वाद्यघोषपुरस्सरं ब्राह्मणैः स्वस्ति वाचयित्वा आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य श्रेयस्कामोऽहं अमुकविद्याग्रहणार्थं अमुकगुरोः दीक्षां ग्रहीष्यामीति सङ्कल्प्य सोपहारो गुरुमुपसृत्य दण्डवत् प्रणम्य गुरोराज्ञया पुनर्देशकालौ सङ्कीर्त्य अमुकगोत्रोऽमुकशाखाऽध्यायी अमुकशर्मवर्मादिरहं चतुर्विधपुरुषार्थसिद्ध्यर्थं स्वेष्टमनुग्रहणाय अमुकगोत्रं अमुकशाखाऽध्यायिनं अमुकशर्माणं त्वां गुरुत्वेन वृणे इति क्रमुकादिना गुरुं वृणुयात् ॥

क्रमप्रवर्तनपूर्वकं शिष्याह्वानम

स च वृतोऽस्मीत्युक्त्वा सशिष्यः सामयिकैः सह गोमयेनोपलिप्तं रङ्गवल्लीपुष्पमालावितानाद्यलङ्कृतं मण्टपं विविक्तं दीक्षाप्रदेशं आसाद्य पादौ प्रक्षाल्य आचम्य मण्टपान्तः प्रविश्य वक्ष्यमाणविधिना आसने उपविश्य कृतभूतशुद्धिप्राणप्रतिष्ठाकश्च वक्ष्यमाणेन प्रकारेण गणपति-ललिता-श्यामा-वार्ताळी-पराणां पञ्चानामपि देवतानां पदार्थानुसमयेन काण्डानुसमयेन वा यागमन्दिरप्रवेशादिचक्रपूजाऽन्त (१), तदादि-

[1] स्वदैवते—श्री.

विघ्नोत्सारणान्त (२), तदादिन्यासान्त (३), तदादिपात्रासादनान्त (४), तदादिलयाङ्गपूजान्त (५), तदाद्यावरणार्चनान्त (६), तदादिहवनान्त (७), तदादि सौभाग्यहृदयामर्शनान्त (८), तदादिहविःप्रतिपत्त्यन्त (९), तदादिदेवतोद्वासनान्त (१०), तदादिविशेषार्घ्यविसर्जनान्तेषु (११), पदार्थेषु यागगृहप्रवेशादिहवनान्तं पदार्थानुसमयेन काण्डानुसमयेन वा क्रमं प्रवर्त्य तरुणोल्लासवान् शिष्यमाहूय नूतनेन वाससा तस्य मुखं बद्ध्वा गणपत्यादिमूलमन्त्रानुच्चारयन् पात्रपञ्चकसामान्यार्घ्योदकबिन्दुभिः तमवोक्ष्य त्रैपुरं तन्त्रसिद्धान्तं श्रावयेत् ॥

त्रैपुरसिद्धान्तः

यथा—पृथिव्यप्तेजोवायुवियन्ति भूतानि पञ्च । गन्धरसरूपस्पर्शशब्दाः तन्मात्राणि पञ्च । उपस्थपायुपादपाणिवाचः कर्मेन्द्रियाणि पञ्च । घ्राणरसनाचक्षुस्त्वक्श्रोत्राणि ज्ञानेन्द्रियाणि पञ्च । रजःसत्वतमोरूपाणि अहङ्कारबुद्धिमनांसि अन्तःकरणवृत्तित्रयम् । प्रकृतिर्गुणसाम्यरूपा । चित्तं पुरुषो जीवः । परमशिवगताः स्वतन्त्रता-नित्यता-नित्यतृप्तता-सर्वकर्तृता-सर्वज्ञताऽऽख्या धर्मा एव सङ्कुचिताः सन्तो जीवे क्रमात् नियति-काल-राग-कलाऽविद्याशब्दवाच्या भवन्ति । माया जगत्परमशिवयोः भेदबुद्धिः । शुद्धविद्या तयोरभेदधीः । जगदिदंतया पश्यन् परमशिव ईश्वरः । तदहन्तया पश्यन् स एव सदाशिवः । शक्तिः परमशिवस्य जगत्सिसृक्षा । तद्वान् स एव तत्त्वेषु प्रथमतत्त्वरूपः शिवः । इति षट्त्रिंशत्तत्त्वान्येव एतद्दर्शनप्रमेयजातम् । एतदात्मकं विश्वमेव परमशिवशरीरम् । प्रागुक्तनियत्यादितत्त्वपञ्चकाख्यापरपर्यायेण लीलास्वीकृतेन कञ्चुकेन आवृतस्वरूप ईश्वर एव जीवः । तद्विनिर्मुक्तः परमशिवः । स्वस्वरूपाववोधः पुरुषार्थ[1]: ॥

मन्त्रोपासनम्

शब्दाः वर्णात्मका नित्याश्च । मन्त्राणामन्यादृशं सामर्थ्यम् । स्वगुरुपरम्परोपदेशैकगम्यधर्मरूपेण सम्प्रदायेन गुरुशास्त्रदेवतासु विश्वासेन च सर्वाः सिद्धयः ।

[1] स्वतन्त्रादिना सङ्कुच्य स्वीकृतेन आवृतस्वरूपः शिव एव मायया सञ्जातकञ्चुकितः स एव जीवः इत्यधिकः पाठो दृश्यते (अ) कोशे.

एतच्छास्त्रप्रामाण्यं विश्वासैकसमधिगम्यम् । गुरुमन्त्रदेवताऽऽत्मनां श्रीगुरूक्तपथेन ऐक्यविभावनात् मनःपवनयोः एकयत्ननिरोद्धव्यत्वज्ञानाच्च प्रत्यगात्मवेदनम् । स्वरूपानन्दाभिव्यञ्जकैः पञ्चमकारैः अर्चनमुपह्वरे । प्राकट्यान्निरयः । भावनादार्ढ्यात् निग्रहानुग्रहसामर्थ्यलाभः ॥

उपासकधर्माः

दर्शनान्तराणामनिन्दनम् । स्वोपास्यदेवतामन्तरा क्वापि महत्त्वबुद्ध्यभावः । सच्छिष्य एव रहस्यप्रकाशनम् । सदा स्वोपास्यमन्त्रानुसन्धानम् । सततं शिवोऽहमिति भावनम् । कामक्रोधलोभमोहमदमात्सर्याणां अविहितहिंसायाश्चौर्यस्य जनविरोधस्य स्त्रिया विद्वेषस्य विद्विष्टस्य च वर्जनम् । सर्वज्ञस्यैकस्य गुरोः उपास्तिः । गुरुवाक्यशास्त्रादौ सर्वत्रासंशयः । स्वैकोपभोगबुद्ध्या धनाद्यनार्जनम् । फलमनभिसन्धाय कर्माचरणम् । अलोप्यं स्ववर्णाश्रमोक्तानां नित्यानां कर्मणाम् । मपञ्चकस्यालाभेऽपि नित्यसपर्यानिर्वर्तनम् । वैधानुष्ठाने सर्वतो निर्भयता ॥

सर्वसारभूतो धर्मः

वृत्तिभिः वेद्यं सर्वं हविः । इन्द्रियाण्येव स्रुचः । सङ्कोचेन स्वात्मस्थिताः सर्वज्ञत्वसर्वकर्तृत्वादयः परमशिवशक्तय एव ज्वालाः । स्वात्मशिव एव पावकः । स्वयमेव होता । निर्गुणब्रह्मापरोक्ष्यं फलम् । स्वपारमार्थिकस्वरूपलाभान्न परं विद्यते ॥

सेयमेतच्छास्त्रमर्यादा ॥

दीक्षाऽऽवश्यकत्वम्

वेश्या इव प्रकटा वेदादयो विद्याः । सर्वेषु दर्शनेषु गुप्तेयं विद्या । तत्र सर्वथा मतिमान् दीक्षेतेति ॥

शाम्भवी दीक्षा

अथ शिष्यस्य शिरसि कामेश्वरीकामेश्वरयोः रक्तशुक्लाख्यचरणन्यासं भावयित्वा तदमृतक्षरणेन तस्य बाह्यमाभ्यन्तरं च मलं दूरीकुर्यात् । एषा चरणविन्यासरूपा शाम्भवी दीक्षा ॥

शाक्ती दीक्षा

अथ शिष्यस्यामूलाधारं आ च ब्रह्मरन्ध्रं प्रज्वलन्तीं ज्वलदनलनिभां परचिद्रूपां प्रकाशलहरीं ध्यात्वा तत्किरणैः तस्य पापपाशान् दहेत् । इयं शक्तिप्रवेशनरूपा शाक्ती दीक्षा द्वितीया ॥

मान्त्री दीक्षा

ततः शुण्ठी-मरीचि-पिप्पली-हरीतकी-धात्रीफल-विभीतकत्वगेला-लवङ्ग-पत्र-नागकेसर-तक्कोल-मदयन्ती-सहदेवीसंज्ञानां त्रयोदशानां वस्तूनां चूर्णमिश्रेण दूर्वाभस्मभ्यां गजाश्वशालाचतुष्पथवल्मीकनदीसङ्गमह्रदगोष्ठसमानीताभिः सप्तभिः मृत्तिकाभिश्च उपेतेन चन्दनकाश्मीरगोरोचनकर्पूरैः चतुर्भिः सुरभिळेन शुचिना जलेन पूर्णं नवीनवासोयुगवेष्टितं ईशानतः शालितण्डुलपुञ्जोपरि निहितं नूतनं कलशं आग्नेयादिविदिक्षु मध्ये प्रागादिदिक्षु च बालाषडङ्गेन अभ्यर्च्य तदन्तर्ललिताश्यामा-वाराहीणां चक्राणि विनिक्षिप्य तत्र पुनः तास्तिस्रो देवताः त्रिः तत्तन्मूलेन तत्तदावरणानि च तत्तन्मन्त्रैः समभ्यर्च्य कुम्भमस्त्रमन्त्रेण संरक्ष्य प्रदर्श्य धेनुयोनिमुद्रे चक्राणि यथास्थानमवस्थापयेत् ॥

ततः सक्षीरेण सिन्दूरकुङ्कुमादिना चन्दनादिपीठे मातृकायन्त्रं विलिख्य तत्र शिष्यं निवेश्य तेन कुम्भाम्भसा ललिताश्यामावार्ताळीमूलविद्याभिः स्नपयेत् । मातृकायन्त्रं तु

> व्योमेन्द्वौरसनार्णकर्णिकमचां द्वन्द्वैः स्फुरत्केसरं
> पत्रान्तर्गतपञ्चवर्गयशळार्णादित्रिवर्गं क्रमात् ।
> आशास्वश्रिषु लान्तलाङ्गलियुजा क्षोणीपुरेणावृतं
> वर्णाब्जं शिरसि स्थितं विषगदप्रध्वंसि मृत्युञ्जयम् ॥ इति ॥

अस्यार्थः—व्योम हकारः । इन्दुः सकारः । औ इति रूपम् । रसनार्णः विसर्गः । एतत्पिण्डः कर्णिकायां यस्य तथोक्तम् । क्रमात् प्राच्यादित इत्यर्थः । अचां अकारादिविसर्गान्तानां षोडशानां स्वराणाम् । द्वन्द्वैः अं आं इत्यादिभिः । लिखितैरिति शेषः । स्फुरन्तः केसराः दळद्वयमध्यभागाः अष्टौ यस्य तत्

तथोक्तम् । पत्राणां दळानां अन्तः अभ्यन्तरे गताः लिखिताः पञ्चवर्गाः कचटतपादीनि पञ्चपञ्चाक्षराणि यशळार्णादयः यादिवान्तशादिहान्तळक्षात्मिकाः त्रिवर्गाः यस्य तत्तथोक्तम् । आशासु प्राच्यादिषु अश्रिषु आग्नेयादिकोणेषु च क्रमात् लान्तेन वकारेण लाङ्गलिना ठकारेण युज्यत इति तथोक्तेन क्षोणीपुरेण चतुरश्रेण आवृतम् । वर्णाब्जं मातृकापद्मम् । शिरसि स्थितं भावितं सदिति शेषः । विषगदप्रध्वंसि विषरोगयोः प्रध्वंसनशीलम् । अन्ततो मृत्युञ्जयं च भवतीत्यर्थः ॥

एतल्लेखनप्रकारो यथा—चतुरश्रालङ्कृतं सकेसरमष्टदळकमलं विलिख्य तत्कर्णिकायां हकारसकारौकारविसर्गात्मकं बीजं, तत्केसरेषु प्राच्यादित अकारादिस्वरद्वन्द्वं, दळोदरेषु कचटतपयशळाख्यवर्गाष्टकं, चतुरश्रस्य बाह्यतः प्रागादिदिक्षु वकारं आग्नेयादिविदिक्षु ठवर्णं च लिखेत् । सर्वेषामक्षराणां सबिन्दुकत्वं सम्प्रदायादिति ॥

ततः परिहितदुकूलं सुरभिळचन्दनानुलिप्ताङ्गं मल्लिकाऽऽदिमाल्यधारिणं सुप्रसन्नं शिष्यं पार्श्वे निवेश्य वक्ष्यमाणप्रकारेण तदङ्गेषु अकारादिक्षकारान्तैकपञ्चाशन्मातृकान्यासं विधाय विमुक्तमुखबन्धवाससः तस्य हस्ते क्रमात् त्रीन् प्रथमसिक्तान् चन्दनोक्षितान् द्वितीयखण्डान् पुष्पखण्डांश्च विनिक्षिप्य वक्ष्यमाणैः तत्त्वमन्त्रैः ग्रासयित्वा गुरुः तस्य [1]दक्षिणकर्णे ललिताक्रमे वक्ष्यमाणं श्रीविद्यागुरुपादुकामन्त्रमुपदिश्य बालामुपदिशेत् । तत्र अमुकपदस्थाने स्वस्य स्वशक्तेश्च दीक्षानाम्नोरूहः ॥

स्त्रीणां तु वाग्दीक्षैव विहिता नान्येति तन्त्रसारे स्थितम् । वाग्दीक्ष मन्त्रोपदेशः ॥

एषा मान्त्री दीक्षा ॥

दीक्षात्रये मुख्यगौणपक्षौ

इत्थमुक्तं दीक्षात्रयं एकप्रयोगेण एकस्मिन्नेव काले दद्यादिति मुख्यपक्षः, 'सर्वाश्च कुर्यात्' इति सूत्रात् । कतिपयकालव्यवधानेन क्रमादेकामेकामेव वेति तु गौणः, 'एकैकां वेत्येके' इति सूत्रात् ॥

[1] "दक्षिणकर्णे दशमखण्डोक्तत्रितारीबालापूर्वकं आत्मनः पादुकामन्त्रमुपदिश्य बालामुपदिशेत्" इत्यपि पाठान्तरम्—अ१, भ.

इष्टमन्त्रदानम्

एवं इदं दीक्षात्रयं निर्वर्त्य पश्चात् तस्मा इष्टं मन्त्रं दद्यात् । ततो गुरुः शिष्यशिरसि स्वचरणौ निवेश्य इष्टमन्त्रक्रमोपयुक्तान् सर्वान् अङ्गमन्त्रान् तस्मिन्नेव काले क्रमेण वा यथाऽधिकारमुपदिश्य स्वाङ्गेषु किमप्यङ्गं शिष्यं स्पर्शयित्वा तदङ्गमातृकाक्षरादिं द्व्यक्षरं त्र्यक्षरं चतुरक्षरं वा आनन्दनाथशब्दान्तं तस्य नाम कृत्वा दशमखण्डोक्तानाचाराननुशिष्यात् ॥

समयाचारानुशासनम

यथा—व्यवहारं देशं च स्वस्य स्वात्म्यबलसहायवयांसि च प्रविचार्यैव पञ्चमः स्वीकर्तव्यः । सर्वैः प्राणिभिः अविरोद्धव्यम् । उपासनापरिपन्थिनो विनिग्रहीतव्याः । आश्रिता अनुग्रहीतव्याः । स्वगुरुवत् गुरोः पुत्रे कळत्रे ज्येष्ठादिषु च वर्तितव्यम् । मकारत्रितये इतिकर्तव्यता गुरुशास्त्रसम्प्रदायतो ज्ञातव्या । सर्वस्मिन् विषये वचनपूर्वकमेव प्रवर्तितव्यम् । दश कुलवृक्षाः न छेत्तव्याः । ते च—

श्लेष्मातककरञ्जाक्षनिम्बाश्वत्थकदम्बकाः ।
विल्वो वटोदुम्बरौ च तिन्त्रिणी च दश स्मृताः ॥

स्त्रीबृन्दक्षीरकलशसिद्धलिङ्गिविविधक्रीडाकुलकुमारीकुलसहकाराशोकैकतरुपितृवनमत्तवाराङ्गनारक्तांशुकामत्तेभान् दृष्ट्वा वन्दितव्यम् । कृष्णाष्टमीकृष्णचतुर्दशीदर्शपूर्णिमासङ्क्रमणाख्येषु पञ्चपर्वसु विशेषतो नैमित्तिकी वरिवस्या कर्तव्या । साधकस्य आरम्भ-तरुण-यौवन-प्रौढ-तदन्तोन्मनानवस्थाऽऽख्येषु सप्तसु उल्लासेषु प्रौढोल्लासान्तमेव हविःप्रतिपत्तिः । समयाचारांश्च प्रवर्तेरन् । ततः परां दशां प्राप्तानां स्वैरचारित्वम् । तत्र तादृशो वीर इति व्यवह्रियते । वीरव्यवहारेषु अन्यथासम्भावनया अधः पतेत् । अतः तथा नाचरेत् । रक्तायास्त्यागं, विरक्ताया हठादाक्रमणं, उदासीनाया धनादिना प्रलोभनं च वर्जयेत् । करुणाशङ्काभयलज्जाजुगुप्साकुलजात्यभिमानशीलानि क्रमेण त्यजेत् । विहितहिंसाऽऽदौ करुणाऽऽदीनां प्रातिकूल्येन तत्त्याग उक्त इति भावः । गुरुपरमगुर्वोः समागमने प्रथमं परमगुरुं प्रणमेत् । तदग्रे गुर्वनुमत्या तन्नतिं कलयेत् । पूज्येषु न पराङ्मुखो भवेत् । मुख्यतया स्वप्रकाशमात्मानं अनुसन्दध्यात् ।

शरीरं अर्थं असूंश्च गुर्वर्थं धारयेत् । तदुक्तं कुर्यात् । तद्वचसि युक्तायुक्तं न विचारयेत् । सर्वत्र व्यवस्थां तन्यात् । सत्यं वदेत् । परधनं न स्पृहयेत् । आत्मस्तुतिं परनिन्दां मर्मस्पृग्वचनं परिहासं धिक्कारमाक्रोशं त्रासोत्पादनं च न विदध्यात् । सर्वप्रयत्नेन परदेवताऽऽराधनद्वारा पूर्णज्ञानात्मकं ब्रह्मभावमभिलषेत् । एतानन्यांश्च मन्वादिभिरुक्तान् एतदविरुद्धान् आचारान् अङ्गीकुर्यात् ॥

कुलधर्मनिष्ठाफलम्

इत्थं विदित्वा विधिवत् अनुतिष्ठन् कुलधर्मनिष्ठः सर्वथा कृतकृत्यो भवति । तस्य शरीरत्यागे श्वपचगृहे वा काश्यां वा न विशेषः । स तु जीवन्मुक्त एवेति ॥

शिष्यस्य परचिद्रूपापादनम

ततो देहेन्द्रियादिविलक्षणमवस्थात्रयसाक्षि सच्चिदानन्दात्मकं प्रत्यगभिन्नं ब्रह्मैव त्वमसीति शिष्याय आत्मतत्वमुपदिश्य ललिताश्यामावार्ताळीविद्याभिः तदङ्गं त्रिः परिमृज्य परिरभ्य तं मूर्ध्न्युपाघ्राय स्वमिव शिष्यमपि परचिद्रूपं कुर्यात् ॥

सर्वमन्त्राधिकारलाभः

सोऽपि श्रीगुरूपदिष्टप्रकारेण क्षणमात्मानं पूर्णं भावयित्वा कृतार्थः सन् यथाविभवं श्रीगुरुं वसुवसनाभरणादिभिः आराध्य तस्मात् विदितवेदितव्यरहस्यजातोऽशेषमन्त्राधिकारी भवेत् ॥

ततो गुरुः हविःप्रतिपत्त्यादिविशेषार्घ्यविसर्जनान्तं विधिशेषं निर्वर्तयेत् ॥

तत्तत्क्रमानुष्ठाने दीक्षाव्यवस्था

[1]अनेनैव—एकस्मिन्नेव काले समुच्चितेन वा अन्यतमेनैकैकेन कालभेदात्—दीक्षाविधिना गणपत्यादीनामुक्तानां पञ्चानां देवतानामपि क्रमानुष्ठानं सम्भवति । न तु पृथक् पृथक् दीक्षणम् । सामान्यपद्धत्युक्ततत्तन्मन्त्रमात्रोपासकस्य तु पृथक्

[1] "अनेन एकस्मिन्नेव काले समुच्चितेन अन्यतमेन वा एकेनैव दीक्षाविधिना गणपत्यादीनां" इति (अ) पाठः—"अनेनैव दीक्षाविधिना गणपत्यादीनां" इति (ब२) पाठः.

पृथगेव दीक्षा । बालोपासकस्य तु मन्त्रदीक्षाऽऽत्मतया बालाया उपदेशः, एवं इष्टमनुत्वेनाप्युपदेशो ज्ञेयः । ललिताऽङ्गत्वेन श्यामाऽऽदीनां तिसृणामुपास्तेः कृताकृतत्व-ज्ञापकात् तदकरणपक्षे गणपतेः ललितायाश्च क्रमं प्रवर्त्य उभयोरेव पात्राण्यासाद्य चक्रराजमात्रं कलशे निक्षिप्य श्रीविद्यया केवलं शिष्यं स्नपयित्वा तदङ्गं च परिमृज्य शेषमशेषं अनुतिष्ठेत् । गणपतिश्यामाऽऽदीनां अन्यासां च देवतानां स्वातन्त्र्येण एकैकोपास्तौ तु तत्तत्क्रममात्रं प्रवर्त्य तत्तत्पात्रे आसाद्य तत्तद्यन्त्रं कुम्भे निक्षिप्य तत्तन्मन्त्रेण स्नानाङ्गपरिमार्जने कुर्यात् । अवशिष्टं अविशिष्टमिति विवेकः ॥

अधिकारिनिर्णयः

[1]सुन्दरीमहोदये तु—अस्यां च दीक्षायां त्रैवर्णिकस्यैव अधिकारः, "सर्वशास्त्रार्थवेदार्थज्ञानिने सुव्रताय च । दीक्षा देया" इति मूले ज्ञानार्णवतन्त्रे अधिकार्युक्तेः—इति स्थितम् । शाक्तीनां तु ओघत्रयान्तर्गुरुमण्डलान्तर्दर्शनज्ञापकबलात अस्त्येवाधिकार इति रहस्यमिति शिवम् ॥

इति भासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेन उमानन्दनाथेन निर्मिते अभिनवे कल्पसूत्रानुसारिणि नित्योत्सवनिबन्धे दीक्षासमारम्भनिरूपणं नामारम्भोल्लासः प्रथमः सम्पूर्णः

---

[1] अयं ग्रन्थभागः (भ)कोशे नास्त्येव. अन्यकोशेषु केषु चित् पृथक् संयोजितः.

तरुणोल्लासो द्वितीयः—गणपतिक्रमः

उपोद्घातः

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
तनोत्युमाऽऽनन्दनाथस्तरुणोल्लासमादृतः ॥
यत्रोच्यते जगन्मातुः यावज्जीवार्चनाविधौ ।
प्रत्यूहापोहनिपुणा पद्धतिर्गाणनायकी ॥
स्वतन्त्रोपास्तिविषया पृथग्दीक्षेह सम्मता ।
न श्रीक्रमाङ्गभावे साऽप्यारम्भोल्लास ईरिता ॥
इह श्रीं ह्रीं कामबीजयोगोऽङ्गमनुषु स्मृतः ।
असूत्रितोऽपि श्रीविद्यार्णवादौ कथितो हि सः ॥

काल्यकृत्याह्निकयोर्विशेषः

तत्र तावत् काल्यकृत्याह्निकयोः वक्ष्यमाणश्रीक्रमतो विशेषो यथा— श्रीगुरुपादुकायां आदौ त्रितार्युत्तरं बाला वाक् ग्लौमिति पञ्चबीजयोजनम् । हृदयकमलकर्णिकायां उद्यदरुणकिरणकोटिपाटलस्य देवस्य करटिवदनस्य ध्यानेन परिप्लुष्टनिःशेषदोषत्वं आत्मनः तत्प्रभाऽरुणतनुत्वभावनं च । रश्मिस्रगननुस्मरणम् । तत्र तत्र यथोचितं सम्बुद्ध्यादीनामूहः । सवितृमण्डले वक्ष्यमाणं देवस्य ध्यानम् ।

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥

इति मन्त्रेण त्रिः अर्घ्यदानम् । ऋष्यादिन्यासत्रयमिह वक्ष्यमाणं चेति ॥

चतुरावृत्तितर्पणसंकल्पादि

ततः आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम श्रीमहागणपतिप्रसादसिद्ध्यै चतुरावृत्तितर्पणं करिष्य इति सङ्कल्प्य नद्यादौ हस्तमात्रं चतुरश्रमण्डलं परिगृह्य

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥

इति मन्त्रेण सूर्यमभ्यर्थ्य

आवाहयामि त्वां देवि तर्पणायेह सुन्दरि ।
एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥

इति गङ्गां प्रार्थ्य [1]ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इत्युच्चार्य क्रों इत्यङ्कुशमुद्रया गङ्गाऽऽदितीर्थान्यावाह्य वं इत्यमृतबीजेन सप्तवारमभिमन्त्र्य तत्र चतुरश्राष्टदळषट्कोणत्रिकोणात्मकं महागणपतियन्त्रं विचिन्त्य स्वदेहे ऋष्यादिन्यासान् न्यस्य यन्त्रे सावरणं देवमावाह्य

श्रीं ह्रीं क्लीं महागणपतये लं पृथिव्यात्मकं गन्धं कल्पयामि नमः । (त्रिवारम्)
३ महागणपतये हं आकाशात्मकं पुष्पं कल्पयामि नमः । (त्रिवारम्)
३ महागणपतये यं वाय्वात्मकं धूपं कल्पयामि नमः । (त्रिवारम्)
३ महागणपतये रं वह्न्यात्मकं दीपं कल्पयामि नमः । (त्रिवारम्)
३ महागणपतये वं अमृतात्मकं नैवेद्यं कल्पयामि नमः । तदङ्गत्वेन
३ महागणपतये सं सर्वात्मकं ताम्बूलं कल्पयामि नमः । (त्रिवारं)

इति पञ्चोपचारैः अर्चयेत् ॥

चतुरावृत्तितर्पणम्

प्रथमं प्रत्यावृत्ति मूलान्ते महागणपतिं तर्पयामीति द्वादशवारं तर्पयित्वा ततः स्वाहाऽन्तेन मूलस्यैकैकेन वर्णेन चतुश्चतुर्वारं प्रतिवर्णान्तमावृत्तेन मूलेन च प्राग्वत् चतुश्चतुर्वारं देवं, त्रयोदशसु मिथुनेषु श्रीश्रीपत्यादिषु एकैकां देवतां द्वितीयान्तेन तत्तन्नाम्ना चतुश्चतुर्वारं प्रतिदेवतमावृत्तेन च मूलेन देवं चतुश्चतुर्वारं तर्पयेत् । यथा—

ॐ श्री ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा
महागणपतिं तर्पयामि ॥ द्वादशवारम् ॥
३ ॐ स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

[1] ह्रां, ह्रीं . . . इति—भ.

३ श्रीं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ ह्रीं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ क्लीं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ ग्लौं स्वाहा महागणतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ गं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ गं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ णं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ पं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ तं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ यें स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ वं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ रं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ वं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम ॥
३ रं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ दं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ सं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ वँ स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ जं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ नं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ में स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ वं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ शं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ मां स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ नं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ यं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ स्वां स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ हां स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

३ श्रियं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ श्रीपतिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ गिरिजां स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ गिरिजापतिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ रतिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ रतिपतिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ महीं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ महीपतिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ महालक्ष्मीं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ महागणपतिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ ऋद्धिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ आमोदं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ समृद्धिं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
मूलं महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥
३ प्रमोदं स्वाहा महागणपतिं तर्पयामि ॥ चतुर्वारम् ॥

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ कान्ति स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ सुमुखं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ मदनावतीं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ दुर्मुखं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ मदद्रवां स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ अविघ्नं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ द्राविणीं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ विघ्नकर्तारं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ वसुधारां स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ शङ्खनिधिं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ वसुमतीं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

३ पद्मनिधिं स्वाहा महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

मूलं महागणपतिं तर्पयामि ।। चतुर्वारम् ।।

इत्याहत्य तर्पणसङ्ख्यापिण्डश्चतुश्चत्वारिंशदुत्तरचतुश्शती ४४४ भवति ।।

अथ पुनर्मूलेन देवं उक्तया रीत्या पञ्चधा उपचर्य आत्मन्युद्वासयेत् ॥

इति चतुरावृत्तितर्पणविधिः ॥

पूजाविधिः

यागमन्दिरागमनादि विघ्नोत्सारणान्तम्

ततो यागगृहमागत्य स्थण्डिलं गोमयेनोपलिप्य यागमन्दिरं च रङ्गवल्लीपुष्पमालिकावितानादिभिः अलङ्कृत्य च द्वारस्य दक्षवामभागयोः ऊर्ध्वभागे च क्रमेण—

श्रीं ह्रीं क्लीं भद्रकाळ्यै नमः ॥ दक्षशाखायाम् ॥
३ भैरवाय नमः ॥ वामशाखायाम् ॥
३ लम्बोदराय नमः ॥ ऊर्ध्वशाखायाम् ॥

इति तिस्रो द्वारि देवताः सम्पूज्य अन्तः प्रविष्टः सपर्यासामग्रीं दक्षभागे निधाय दीपानभितः प्रज्वाल्य दीपौ वा गन्धादिभिः कृतात्मालङ्करणः ताम्बूलेन जातीपत्रफललवङ्गैलाकर्पूराख्यपञ्चतिक्तेन वा सुरभिळवदनः स्वास्तीर्णे ऊर्णाम्रदुनि शुचिनि बालातृतीयबीजेन द्वादशवारमभिमन्त्रिते मूलमन्त्रोक्षिते आसने ३ आधारशक्तिकमलासनाय नमः इति प्राङ्मुख उदङ्मुखो वा पद्मासनाद्यन्यतमेनासनेनोपविश्य ३ रक्तद्वादशशक्तियुक्ताय दीपनाथाय नम इति पुष्पाञ्जलिना भूमौ दीपनाथमिष्ट्वा ३ समस्तगुप्तप्रकटसिद्धयोगिनीचक्रश्रीपादुकाभ्यो नम इति मूर्धनि बद्धाञ्जलिः स्ववामदक्षपार्श्वयोः क्रमेण श्रीगुरुपादुकया गुरुं मूलेन च देवं प्रणम्य स्वस्य तदैक्यं भावयन्—

श्रीं ह्रीं क्लीं अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया ॥

इति मन्त्रं सकृदुच्चार्य युगपद्वामपार्ष्णिभूतलत्रिराघातकरास्फोटत्रितयक्रूरदृष्ट्यवलोकनपूर्वकताळत्रयेण भौमान्तरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् ॥

ताळत्रयं नाम दक्षतर्जनीमध्यमाभ्यां अधोमुखाभ्यां वामकरतले सशब्दमुपर्युपरि त्रिरभिघातः ॥

शिखाबन्धनादि मातृकान्यासान्तम्

ततो नम इत्यङ्गुष्ठमन्त्रमुच्चार्य [1]अंकुशेन शिखां बद्ध्वा श्रीक्रमे वक्ष्यमाणेन प्रकारेण भूतशुद्धिमात्मनः प्राणप्रतिष्ठां च विधाय विंशतिधा षोडशधा दशधा सप्तधा त्रिधा वा मूलेन प्राणानायम्य तेजोरूपदेवानन्यं भावयन् आत्मानं ऐं हः अस्त्राय फट् इति मन्त्रेण मुहुरावृत्तेन अङ्गुष्ठादिकरतलान्तं कूर्परयोश्च विन्यस्य देहे च व्यापकं कृत्वा श्रीक्रमे वक्ष्यमाणं मातृकान्यासं विदध्यात् । तत्र च श्रीं ह्रीं क्लीं इति त्रिबीजं प्रथमं योजयेत् इति विशेषः ॥

षडङ्गन्यासः

ततः

श्रीं ह्रीं क्लीं ॐ गां अंगुष्ठहृदयाय नमः ॥
३ श्रीं गीं तर्जनीशिरसे स्वाहा ॥
३ ह्रीं गूं मध्यमाशिखायै वषट् ॥
३ क्लीं गैं अनामिकाकवचाय हुम् ॥
३ ग्लौं गौं कनिष्ठिकानेत्रत्रयाय वौषट् ॥
३ गं गः करतलकरपृष्ठास्त्राय फट् ॥

इति षडङ्गमन्त्रानङ्गुष्ठादिषु हृदयादिषु च न्यस्य मूलेन त्रिर्व्यापकं कुर्यात् ॥

ध्यानम्

ततो ध्यानम्—

ततो हृदब्जे शोणाङ्गं वामोत्सङ्गविभूषया ।
सिद्धलक्ष्म्या समाश्लिष्टपार्श्वमर्धेन्दुशेखरम् ॥

[1] 'अंगुष्ठेन' इत्यपि वा स्यात्—अंगुष्ठमन्त्रेण 'नमः' इत्यनेनेत्यर्थः (कल्पसूत्रे ८ खण्डे १० सूत्रं दर्शनीयम्)—(संपादकः).

वामाधःकरतो दक्षाधःकरान्तेषु पुष्करे ।
परिष्कृतं मातुलुङ्गगदापुण्ड्रेक्षुकार्मुकैः ॥
शूलेन [1]शङ्खचक्राभ्यां पाशोत्पलयुगेन च ।
शालिमञ्जरिकास्वीयदन्ताञ्चलमणीघटैः ॥
स्रवन्मदं च सानन्दं श्रीश्रीपत्यादिसंवृतम् ।
अशेषविघ्नविध्वंसनिघ्नं विघ्नेश्वरं स्मरेत् ॥

अर्घ्यसंस्कारः

अथ तं मानसैः पञ्चोपचारैः अभ्यर्च्य श्रीक्रमे वक्ष्यमाणेन क्रमेण सामान्यविशेषार्घ्ये आसादयेत् । तत्र चोभयोरर्घ्ययोरप्युक्तं षडङ्गमाधारस्थापनादिषु क्रमेण—

श्रीं ह्रीं क्लीं अं अग्निमण्डलाय दशकलाऽऽत्मने अर्घ्यपात्राधाराय नमः ॥
३ उं सूर्यमण्डलाय द्वादशकलाऽऽत्मने अर्घ्यपात्राय नमः ॥
३ मं सोममण्डलाय षोडशकलाऽऽत्मने अर्घ्यामृताय नमः ॥

इत्येवं मन्त्राः, गणपतिगायत्र्योक्तया—

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥

इत्यनया ऋचा चाभिमन्त्रणम्, चतुर्नवतिमन्त्राद्यभिमन्त्रणाभावश्चेति विशेषः । अथ सामान्यार्घ्यजलबिन्दुभिः आत्मानं पूजोपकरणानि च सम्प्रोक्ष्य विशेषार्घ्यबिन्दुभिः स्वशिरसि गुरुपादुकां त्रिरिष्ट्वा सपर्यासामग्रीं पावयित्वा ॥

पीठे प्राणप्रतिष्ठा

पुरतो रक्तचन्दनादिभिः निर्मिते पीठे कलधौतादिविरचितां महागणपतिप्रतिमां वा ध्यानोक्तरूपां चतुरश्राष्टदलषडरत्रिकोणात्मकं सिन्दूरादिना लिखितं लेखितं वा यन्त्रं, धातुमयं वा निवेश्य—

[1] पद्मच—अ.

श्रीगणेशयन्त्रस्य प्राणा इह प्राणाः श्रीगणेशयन्त्रस्य जीव इह स्थितः श्रीगणेशयन्त्रस्य सर्वेन्द्रियाणि श्रीगणेशयन्त्रस्य वाङ्मनःप्राणा इह आयान्तु स्वाहा ॥

इति मन्त्रेण प्राणप्रतिष्ठां विदध्यात् ॥

पीठशक्तिपूजा

तस्य त्रिकोणे स्वाग्रादिप्रादक्षिण्येन परितो मध्ये च क्रमेण—

श्रीं ह्रीं क्लीं तीव्रायै नमः ॥ श्रीं ह्रीं क्लीं उग्रायै नमः ॥
३ ज्वालिन्यै नमः ॥ ३ तेजोवत्यै नमः ॥
३ नन्दायै नमः ॥ ३ सत्यायै नमः ॥
३ भोगदायै नमः ॥ ३ विघ्ननाशिन्यै नमः ॥
३ कामरूपिण्यै नमः ॥

इति नवगणेशपीठशक्तीरभ्यर्च्य

धर्माद्यष्टकपूजा

तत्रैव आग्नेय्यादिविदिक्षु प्रागाद्यासु च दिक्षु क्रमेण—

श्रीं ह्रीं क्लीं ऋं धर्माय नमः ॥ श्रीं ह्रीं क्लीं ऋं अधर्माय नमः ॥
३ ॠं ज्ञानाय नमः ॥ ३ ॠं अज्ञानाय नमः ॥
३ ऌं वैराग्याय नमः ॥ ३ ऌं अवैराग्याय नमः ॥
३ ॡं ऐश्वर्याय नमः ॥ ३ ॡं अनैश्वर्याय नमः ॥

इति चार्चयेत् ॥

महागणपतिपूजा

ततो मनसा ध्यातं महागणपतिं भक्तानुग्रहात्तेजोरूपेण परिणतं प्रापय्य ब्रह्मरन्ध्रं वहन्नासापुटाध्वना निर्गमय्य कुसुमगर्भितेऽञ्जलौ मूर्तं मूलमन्त्रान्ते महागणपतिमावाहयामीति त्रिकोणे आवाह्य "आवाहितो भव" इत्यादिक्रमेण श्रीक्रमे वक्ष्यमाणतत्तन्मुद्राप्रदर्शनपूर्वकं आवाहन-संस्थापन-सन्निधापन-सन्निरोधन-

सम्मुखीकरणावगुण्ठनादि कृत्वा वन्दनधेनुयोनिमुद्राश्च प्रदर्श्य सामान्यार्घ्योदकेन प्राग्वत् गन्धादिपञ्चोपचारान् आचरेत् ॥

महागणपतितर्पणम्

ततो मूलान्ते श्रीमहागणपतिश्रीपादुकां पूजयामीति वामकरतत्त्वमुद्रया सन्दष्टद्वितीयशकलगृहीतक्षीरबिन्दुदक्ष[1]करोपात्तकुसुमयुगपत्प्रक्षेपेण देवं दशवारं उपतर्पयेत् । तत्त्वमुद्रा उत्तरत्रापि साधारणी ॥

षडङ्गपूजा

ततो देवस्य अग्नीशासुरवायुकोणेषु मौळौ प्रागादिदिक्षु च क्रमेण—

श्रीं ह्रीं क्लीं ॐ गां हृदयाय नमः हृदयशक्तिश्रीपादुकां पूजयामि ॥
३ श्रीं गीं शिरसे स्वाहा शिरश्शक्तिश्रीपादुकां पूजयामि ॥
३ ह्रीं गूं शिखायै वषट् शिखाशक्तिश्रीपादुकां पूजयामि ॥
३ क्लीं गैं कवचाय हुम् कवचशक्तिश्रीपादुकां पूजयामि ॥
३ ग्लौं गौं नेत्रत्रयाय वौषट् नेत्रत्रयशक्तिश्रीपादुकां पूजयामि ॥
३ गं गः अस्त्राय फट् अस्त्रशक्तिश्रीपादुकां पूजयामि ॥

इति सगभ्यर्च्य

ओघत्रयपूजा

देवस्य पश्चात् प्रागपवर्गरेखात्रये दक्षिणसंस्थाक्रमेण गुर्वोघत्रयं यजेत् । यथा—

दिव्यौघः

श्रीं ह्रीं क्लीं विनायकसिद्धाचार्यश्रीपादुकां पूजयामि ।
३ कवीश्वरसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ विरूपाक्षसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ विश्वसिद्धाचार्यश्रीपादुकां पूजयामि ॥

[1] करज्ञानमुद्रोपात्त—अ.

३ ब्रह्मण्यसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ निधीशसिद्धाचार्यश्रीपादुकां पूजयामि ॥

सिद्धौघः

श्रीं ह्रीं क्लीं गजाधिराजसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ वरप्रदसिद्धाचार्यश्रीपादुकां पूजयामि ॥

मानवौघः

श्रीं ह्रीं क्लीं विजयसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ दुर्जयसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ जयसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ दुःखारिसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ सुखावहसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ परमात्मसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ सर्वभूतात्मसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ महानन्दसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ फालचन्द्रसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ सद्योजातसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ बुद्धसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ शूरसिद्धाचार्यश्रीपादुकां पूजयामि ॥

दिव्यौघपाठान्तरम्

श्रीं ह्रीं क्लीं विनायकसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ विरूपाक्षसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ बुद्धसिद्धाचार्यश्रीपादुकां पूजयामि ॥

३ शूरसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ वरप्रदसिद्धाचार्यश्रीपादुकां पूजयामि ॥

सिद्धौघपाठान्तरम्

श्रीं ह्रीं क्लीं विजयसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ दुर्जयसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ जयसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ कवीश्वरसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ ब्रह्मण्यसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ निधीशसिद्धाचार्यश्रीपादुकां पूजयामि ॥

मानवौघपाठान्तरम्

श्रीं ह्रीं क्लीं गजाधिराजसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ दुःखारिसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ सद्योजातसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ सुखावहसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ परमात्मसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ सर्वभूतात्मसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ महानन्दसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ शुभानन्दसिद्धाचार्यश्रीपादुकां पूजयामि ॥
३ फालचन्द्रसिद्धाचार्यश्रीपादुकां पूजयामि ॥

(गुर्वोघत्रयसंख्या विंशतिः)

आवरणार्चनम्

प्रथमावरणम्

त्र्यश्रषडश्रयोरन्तराळे प्रागादिदिक्षु क्रमेण—

श्रीं ह्रीं क्लीं श्रीश्रीपतिश्रीपादुकां पूजयामि ॥
३ गिरिजागिरिजापतिश्रीपादुकां पूजयामि ॥
३ रतिरतिपतिश्रीपादुकां पूजयामि ॥
३ महीमहीपतिश्रीपादुकां पूजयामि ॥

द्वितीयावरणम्

षडश्रे देवाग्रकोणमारभ्य प्रादक्षिण्येन तद्दक्षवामपार्श्वयोश्च क्रमेण यजेत्—

श्रीं ह्रीं क्लीं ऋद्ध्यामोदश्रीपादुकां पूजयामि ॥
३ समृद्धिप्रमोदश्रीपादुकां पूजयामि ॥
३ कान्तिसुमुखश्रीपादुकां पूजयामि ॥
३ मदनावतीदुर्मुखश्रीपादुकां पूजयामि ॥
३ मदद्रवाविघ्नश्रीपादुकां पूजयामि ॥
३ द्राविणीविघ्नकर्तृश्रीपादुकां पूजयामि ॥
३ वसुधाराशङ्खनिधिश्रीपादुकां पूजयामि ॥
३ वसुमतीपद्मनिधिश्रीपादुकां पूजयामि ॥

तृतीयावरणम्

षडश्रसन्धिषट्के प्राग्वत् षडङ्गदेवताऽर्चनम् ॥

चतुर्थावरणम्

अष्टदळे पश्चिमादिदिक्षु वायव्यादिविदिक्षु च प्रादक्षिण्यक्रमेण—

श्रीं ह्रीं क्लीं आं ब्राह्मीश्रीपादुकां पूजयामि ॥
३ ईं माहेश्वरीश्रीपादुकां पूजयामि ॥

३ ऊं कौमारीश्रीपादुकां पूजयामि ॥

३ ॠं वैष्णवीश्रीपादुकां पूजयामि ॥

३ ॡं वाराहीश्रीपादुकां पूजयामि ॥

३ ऐं माहेन्द्रीश्रीपादुकां पूजयामि ॥

३ औं चामुण्डाश्रीपादुकां पूजयामि ॥

३ अः महालक्ष्मीश्रीपादुकां पूजयामि ॥

पञ्चमावरणम्

अथ चतुरश्रस्य रेखायां प्रागाद्यासु अष्टसु दिक्षु क्रमेण—

श्रीं ह्रीं क्लीं लां इन्द्राय वज्रहस्ताय सुराधिपतये
ऐरावतवाहनाय सपरिवाराय नमः ॥

३ रां अग्नये शक्तिहस्ताय तेजोऽधिपतये
अजवाहनाय सपरिवाराय नमः ॥

३ टां यमाय दण्डहस्ताय प्रेताधिपतये
महिषवाहनाय सपरिवाराय नमः ॥

३ क्षां निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये
नरवाहनाय सपरिवाराय नमः ॥

३ वां वरुणाय पाशहस्ताय जलाधिपतये
मकरवाहनाय सपरिवाराय नमः ॥

३ यां वायवे ध्वजहस्ताय प्राणाधिपतये
रुरुवाहनाय सपरिवाराय नमः ॥

३ सां सोमाय शङ्खहस्ताय नक्षत्राधिपतये
अश्ववाहनाय सपरिवाराय नमः ॥

३ हां ईशानाय त्रिशूलहस्ताय
विद्याऽधिपतये वृषभवाहनाय सपरिवाराय नमः ॥

सर्वा आवरणदेवताः देवस्याभिमुखासीनाः स्वयं तत्तदभिमुखः पूजयामीति भावयेत् ॥

गणनाथस्य पुनस्तर्पणं षोडशोपचारपूजा च

एवं पञ्चावरणीं इष्ट्वा पुनर्देवं दशधा प्राग्वदुपतर्प्य षोडशभिः उपचारैः आराधयेत् । [ते च] पाद्यार्घ्याचमनीयस्नानवासोगन्धपुष्पधूपदीपनीराजनछत्रचामरयुगदर्पणनैवेद्यपानीयताम्बूलाख्याः । मन्त्रास्तु—श्रीं ह्रीं क्लीं महागणपतये पाद्यं कल्पयामि नमः इत्यादयः । नैवेद्ये त्रिकोणवृत्तचतुरश्रमण्डलकरणम्, मूलेन प्रोक्षणम्, वं इति धेनुमुद्रया अमृतीकरणम्, मूलेन सप्तवाराभिमन्त्रणम्, प्राणादिमुद्राप्रदर्शनं च कुर्यात् । इहापरिगणितान्यपि पूर्वोत्तरापोशनहस्तप्रक्षाळनगण्डूषपुनराचमनीयानि नैवेद्याङ्गत्वेन पूर्ववत् कल्पयेत्[1] ॥

अग्निकार्यम्

अथ श्रीक्रमे वक्ष्यमाणेन विधिना स्थण्डिलकल्पनादिप्रधानदेवतापञ्चोपचारान्तं कृत्वा,

श्रीं ह्रीं क्लीं श्रियै स्वाहा । श्रिया इदं न मम ॥

३ श्रीपतये स्वाहा । श्रीपतय इदं न मम ॥

इत्यादिरीत्या पञ्चममिथुनवर्जं श्र्यादिविघ्नकर्तृपर्यन्ताः विंशतिदेवता उद्दिश्य चतुर्थ्यन्तैः बीजत्रयाद्यैः स्वाहाशिरस्कैः तत्तन्नाममन्त्रैः आज्येन एकैकवारं उद्देशत्यागपूर्वकं हुत्वा अथ प्रधानदेवतायै महागणपतये मूलेन दशवारं हुत्वा वक्ष्यमाणप्रकारेण बलिं प्रदाय महाव्याहृत्यादिविधिशेषं निर्वर्तयेत् ॥

बलिदानम्

होमाकरणपक्षे बलिमात्रं दद्यात् । यथा—[2]पुरतः स्ववामभागे त्रिकोणवृत्तचतुरश्रात्मकं मण्डलं कृत्वा ऐं व्यापकमण्डलाय नमः इति गन्धादिभिरभ्यर्च्य अर्धभक्तपूरितोदकं सक्षीरादित्रयं पात्रं तत्र विन्यस्य ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा इति मन्त्रं त्रिः पठित्वा दक्षकरार्पितं वामकरतत्त्वमुद्रास्पृष्टं क्षीरं बल्युपरि दत्वा बाणमुद्रया बलिं भूतैः ग्राहितं विभाव्य प्रणमेदिति ॥

[1] "ताम्बूलं च" इत्यधिकः—अ, भ.

[2] यागगृहाद्बहिः वामभागे—अ.

तर्पणजपस्तोत्राणि

अथ प्रक्षालितपाणि[1]पाद आचान्त आगत्य देवं मूलेन त्रिधा सन्तर्प्य पुष्पाञ्जलिं दत्वा प्रदक्षिणनुतीर्विधाय जपेत्—

अस्य श्रीमहागणपतिमहामन्त्रस्य गणकऋषये नम इति शिरसि । नृचद्गायत्रीछन्दसे नम इति मुखे । महागणपतये देवतायै नम इति हृदये । गं बीजाय नम इति गुह्ये । स्वाहाशक्त्यै नम इति पादयोः । ॐ कीलकाय नम इति नाभौ । मम अभीष्टसिद्ध्यै विनियोगाय नम इति करसम्पुटे च न्यस्य । उक्तैः षडङ्गमन्त्रैः अङ्गुष्ठादिषु हृदयादिषु च न्यासं विधाय । पूर्वोक्तभङ्ग्या ध्यात्वा । श्यामाक्रमे वक्ष्यमाणप्रकारेण संस्कृतां मालामादाय श्रीक्रमे वक्ष्यमाणविधिना मूलमष्टोत्तरशत-वारानावर्त्य पुनरपि न्यासादि कृत्वा

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्मयि स्थिरा ॥

इति सामान्यार्घ्योदकेन जपं देवस्य दक्षकरे समर्पितं विभाव्य स्तुवीत । यथा—

श्रीभगवानुवाच ।

गणेशस्य स्तवं वक्ष्ये कलौ झटिति सिद्धिदम् ।
न न्यासो न च संस्कारो न होमो न च तर्पणम् ॥
न मार्जनं च [2]पञ्चाढ्यं सहस्रजपमात्रतः ।
सिध्यत्यर्चनतः पञ्चशतब्राह्मणभोजनात् ॥

अस्य श्रीगणपतिस्तोत्रमालामन्त्रस्य भगवान् श्रीसदाशिव ऋषिः । [3]उष्णिक् छन्दः । श्रीगणपतिर्देवता । श्रीगणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ध्यानम्—

चतुर्भुजं रक्ततनुं त्रिणेत्रं पाशाङ्कुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थं गणाधिनाथं शशिचूडमीडे ॥ इति ॥

[1] पादमाचान्तमागत्य—इति पाठः बहुषु कोशेषु दृश्यते.
[2] पञ्चास्य—अ.
[3] अष्टिः—ब१, ब२, ब३, भ.

सदाशिवप्रोक्तं गणेशाष्टकम्

ॐ विनायकैकभावनासमर्चनासमर्पितं
प्रमोदकैः प्रमोदकैः प्रमोदमोदमोदकम् ।
यदर्पितं समर्पितं नवन्यधान्यनिर्मितं
नखण्डितं नखण्डितं नखण्डमण्डनं कृतम् ॥

सजातिकृद्विजातिकृत्स्वनिष्ठभेदवर्जितं
निरञ्जनं च निर्गुणं निराकृतिं च निष्क्रियम् ।
सदात्मकं चिदात्मकं सुखात्मकं परं पदं
भजामि तं गजाननं स्वमाययाऽऽत्तविग्रहम् ॥

गणाधिप त्वमष्टमूर्तिरीशसूनुरीश्वरः
त्वमम्बरं च शम्बरं धनञ्जयः प्रभञ्जनः ।
त्वमेव दीक्षितः क्षितिर्निशाकरः प्रभाकरः
चराचरप्रचारहेतुरन्तरायशान्तिकृत् ॥

अनेकदं तमालनीलमेकदन्तसुन्दरं
गजाननं नुमो गजाननामृताब्धिमन्दिरम् ।
समस्तवेदवादसत्कलाकलापमन्दिरं
महान्तरायदुस्तमश्शमार्कमाश्रितोदरम् ॥

सरत्नहेमघण्टिकानिनादनूपुरस्वनैः
मृदङ्गताळनादभेदसाधनानुरूपतः ।
धिमिद्धिमित्ततोऽङ्गतोङ्गथेयिथेयिशब्दतो
विनायकश्शशाङ्कशेखरोग्रतः प्रनृत्यति ॥

नमामि नाकनायकैकनायकं विनायकं
कलाकलापकल्पनानिदानमादिपूरुषम् ।
गणेश्वरं गुणेश्वरं महेश्वरात्मसम्भवं
स्वपादमूलसेविनामपारवैभवप्रदम् ॥

भजे प्रचण्डतुन्दिलं सदन्दशूकभूषणं
सनन्दनादिवन्दितं समस्तसिद्धसेवितम् ।

सुरासुरौघयोस्सदा जयप्रदं भयप्रदं
समस्तविघ्नघातिनं स्वभक्तपक्षपातिनम् ॥
कराम्बुजात्तकङ्कणः पदाब्जकिङ्किणीगणो
गणेश्वरो गुणार्णवः फणीश्वराङ्गभूषणः ।
जगत्त्रयान्तरायशान्तिकारकोऽस्तु तारको
भवार्णवादनेकदुर्ग्रहाच्चिदेकविग्रहः ॥
यो भक्तिप्रवणः परावरगुरोस्स्तोत्रं गणेशाष्टकं
शुद्धस्संयतचेतसा यदि पठेन्नित्यं त्रिसन्ध्यं पुमान् ।
तस्य श्रीरतुला स्वसिद्धिसहिता श्रीशारदा सारदा
स्यातां तत्परिचारिके किल तदा काः कामनानां कथाः ॥

सुवासिनीपूजा

ततः श्रीक्रमे वक्ष्यमाणेन क्रमेण सुवासिनीपूजनहविःप्रतिपत्तिदेवतोद्वासनादिशेषं समापयेत् । अत्र च सुवासिन्या साकं वटुकार्चनमपि । तत्र मन्त्रः—२ वं वटुकाय नमः इति । मम निर्विघ्नं मन्त्रसिद्धिर्भूयादिति तौ प्रति प्रार्थनायां तथाऽस्त्विति तत्प्रतिवचनम् । मूलान्ते अमुकतत्त्वं शोधयामि नमः स्वाहेति तत्त्वत्रय-शोधनं चेति विशेषः ॥

पुरश्चरणविधिः

एवं नित्यक्रमं प्रवर्तयन् श्यामाक्रमे वक्ष्यमाणेन विधिना अष्टाविंशतिसहस्रस-ङ्ख्यापुरश्चरणजपः । प्रकृते कलियुगत्वात् तच्चतुर्गुणितम् । प्रथमेऽहनि सहस्रं ततः प्रत्यहं त्रिसहस्रसङ्ख्यं च कृत्वा जपदशांशहोम-तद्दशांशतर्पण-तद्दशांशब्राह्मणभोजनानि विदध्यात् । होमद्रव्याणि च—

मोदकैः पृथुकैर्लाजैः सक्तुभिश्चेक्षुपर्वभिः ।
नारिकेळैस्तिलैः शुद्धैः सुपक्वैः कदळीफलैः ॥

इत्युक्तान्यष्टौ । एतेषां प्रमाणं तु—मोदका अखण्डिता ग्रासमिताः । पृथुकलाजसक्तवो मुष्टिपरिमिताः । इक्षुप्रमाणं श्लोक एवोक्तम् । नारिकेळं अष्टधा खण्डितम् । तिलाः

चुलुकप्रमाणाः शतसङ्ख्याका वा। कदळीफलमल्पं यद्यखण्डितम्, पृथुचेद्यथारुचि खण्डितम्। अमीषां द्रव्याणां मधुक्षीरघृतसिक्तानां पृथक्पृथगाहुतयो होमसङ्ख्यापिण्डाष्टमभागमिताः ३५० श्लोकपाठक्रमेण भवन्ति। अष्टद्रव्यहोमात् प्रागावरणदेवतानां एकैकाहुतिः प्रधानदेवतायाश्च [1]यादृशाहुतयः ताः आज्येनैव भवन्ति। तर्पणपूर्वाङ्गं तु चतुरावृत्तितर्पणवदेव ॥

इत्थं पुरश्चरणेन सिद्धमनुः, स्वातन्त्र्येणोपास्तौ च श्रीक्रमोक्तेन क्रमेण नैमित्तिकार्चनपरः, काम्यापेक्षी चेत् श्यामाक्रमे वक्ष्यमाणेन तत्तत्कामानुगुणेन द्रव्येण इष्ट्वा सिद्धसङ्कल्पः सुखी विहरेत् ॥ इति शिवम् ॥

इति श्रीभासुरानन्दनाथचरणारविन्दमिळिन्दायमानमानसेन उमानन्दनाथेन निर्मिते कल्पसूत्रानुसारिणि नित्योत्सवनिबन्धे महागणपतिक्रमनिरूपणं नाम तरुणोल्लासो द्वितीयः समाप्तः

---

[1] यावदाहु—अ१.

यौवनोल्लासः तृतीयः—श्रीक्रमः

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
युनक्त्युमानन्दनाथो यौवनोल्लासमद्भुतम् ॥
महात्रिपुरसुन्दर्या मतोऽत्र यजनक्रमः ।
कीर्त्यन्ते गणपत्यादिक्रमाः यदुपजीविनः ॥
आद्याय श्रीभासुरानन्दनाथाचार्यायास्मद्गुरवे ह्युमानन्दनाथः ।
श्रेयोमूलं साधकानां तनोति यौवनोल्लासं श्रीक्रमोपक्रमेण ॥
इह सप्तप्रकरणान्याह्निकेन सपर्यया ।
होममुद्रान्यासजपनैमित्तिकसमर्चनैः ॥
आह्निके श्रीगुरुध्यानं प्राणसंयमनं ततः ।
चिद्विमर्शो हृदा मूलावृत्ती रश्मिसरस्मृतिः ॥
स्नानं सन्ध्याविधानं च पूजाप्रकरणे पुनः ।
द्वारपूजाऽऽत्मनैपथ्यं आसनावस्थितिक्रमः ॥
दीपनाथसपर्या च श्रीचक्रपरिकल्पनम् ।
मन्दिरार्चा भूतशुद्धिः प्रत्यूहोत्सारणं ततः ॥
न्यासजालविधिः पात्रासादनं मातुरर्चनम् ।
मुद्राकृतिः षडङ्गार्चा नित्याश्रीगुरुपूजनम् ॥
नवावृतिसपर्या च श्रीदेवीपुनरर्चनम् ।
अथ कामकलाध्यानं सौभाग्यहृदयस्मृतिः ॥
कृताकृतत्वं होमस्य बलिदानविधिस्तथा ।
जपस्तोत्रे सुवासिन्याः पूजनं तत्त्वशोधनम् ॥

देवतोद्वासनं चाथ विशेषार्घ्यविसर्जनम् ।
सङ्क्षेपार्चाविधिस्तद्वत् क्रत्वर्थनियमास्ततः ॥
श्रीचक्रलेखनोपायस्तत्प्रतिष्ठाविधिस्तथा ।
होमादिप्रक्रियास्तत्तद्विभिज्ञानप्रयोजनाः ॥
सन्तु पद्धतयो लोके कल्पसूत्रानुगाः पराः ।
अनन्यसव्यपेक्षेयं प्रायेणेति विभाव्यताम् ॥
कादिहाद्योः पञ्चदश्योरियं साधारणी मता ।
श्रीषोडश्या विशेषस्तु तत्र तत्र निरूपितः ॥
सर्वश्रीक्रममन्त्रेषु त्रितार्या योजनं पुरः ।
ऐं ह्रीं श्रीमित्यात्मिकायास्सा च तत्पूर्वकेषु न ॥
श्रीमान् प्रोक्तगुणो लब्ध्वा दीक्षामुक्तगुणाद्गुरोः ।
इष्ट्वा महागणपतिमारभेत श्रियः क्रमम् ॥

आह्निकप्रकरणम्

गुरुध्यानम्

मुहूर्ते ब्राह्म उत्थाय निषण्णः शयने निजे ।
अपलापाय पापानामादावेवं समाचरेत् ॥
स्वब्रह्मरन्ध्रगाम्भोजकर्णिकापीठवासिनम् ।
शिवरूपं श्वेतवस्त्रमाल्यभूषानुलेपनम् ॥
दयाऽऽर्द्रदृष्टिं स्मेरास्यं वराभयकराम्बुजम् ।
वामाङ्कगतया पीतवपुषाऽरुणवेषया ॥
पद्मवत्या वामकरे शक्त्या दक्षभुजावृतम् ।
गौरं श्रीभासुरं नाथं सानन्दं चिन्तयेत् सुधीः ॥

ततः ऐं ह्रीं श्रीं ह्स्रूक्रैं हसक्षमलवरयूं सहक्षमलवरयीं [1]ह्सौं स्हौः अमुकाम्बासहितश्री अमुकानन्दनाथगुरु[2]श्रीपादुकां पूजयामीति मन्त्रान्ते सुमुखसुवृत्तचतुरश्रमुद्गरयोन्याख्याभिः पञ्चभिः मुद्राभिः तं प्रणमेत् । मुद्राप्रकारस्तु तत्प्रकरणे वक्ष्यते ।

ततः—

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
विद्याऽवतारसंसिद्धयै स्वीकृतानेकविग्रह ॥
नवाय नवरूपाय परमार्थस्वरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥
स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदा मच्चित्तरूपेण विधेहि भवदासनम् ॥
[3]इत्येवं पञ्चभिः श्लोकैः स्तुवीत यतमानसः ।
प्रातः प्रबोधसमये जपात् सुदिवसं भवेत् ॥

प्राणसंयमनम्

अथ तच्चरणकमलयुगळविगळदमृतरसविसरपरिप्लुताखिलाङ्गं आत्मानं भावयन् शिवादिश्रीगुरुभ्यो नम इति मूर्धनि बद्धाञ्जलिः त्रिः प्राणानायच्छेत् । तत्प्रकारस्तु —एकवारमावृत्तया मूलविद्यया पिङ्गळापथेन पूरकं, त्रिरावृत्तया तया मूलाधारानाहताज्ञासंज्ञेषु कमलेषु क्रमेण शोणपीतश्वेतकूटत्रयविभावनापूर्वं सुषुम्नायां कुम्भकं, सकृदावृत्तया च तया इडानाडीवर्त्मना रेचकमिति । इह पूरकरेचकयोः पिङ्गळेडयोः व्यत्ययोऽपि दृष्टोऽन्यत्र ॥

[1] ह्सौंः स्हौंः—अ १.
[2] श्रीपरमगुरुपरमेष्ठिगुरुश्री—अ १.
[3] त्वत्प्रसादादहं देव कृतकृत्योऽस्मि सर्वदा । मायामृत्युमहापाशात् विमुक्तोऽस्मि शिवोऽस्मि च ॥ (इत्यधिकः अ, पुस्तके).

चिद्विमर्शः

तेन च नियमितपवनमनःस्पन्दः आमूलाधारं आ च ब्रह्मरन्ध्रमुद्गतां तटिल्लता-सदृशाकृतिं तरुणारुणपिञ्जरतेजसं ज्वलन्तीं सर्वकारणभूतां परां संविदं विचिन्त्य

हृदा मूलावृत्तिः

तद्रश्मिनिकरभस्मितसकलकश्मलजालो मूलं मनसा दशवारमावर्त्त्य

रश्मिमालास्मरणम्

वक्ष्यमाणान् रश्मिमालामन्त्रांश्च एकवारमावर्त्तयेत् । रश्मिस्रगावर्तनं तु त्रैवर्णिकविषयम् ॥

यदि प्रबोधसमकालमावश्यकोपाधिस्तदा तन्निरसनपूर्वमुक्तमनुतिष्ठेत् ॥

इति काल्यकृत्यम् ॥

अजपागायत्रीभावनम्

[1][इति देवीं प्रार्थ्य गुरूपदेशेन ज्ञातं सहजसिद्धं अजपाजपं निवेदयेत् । मया पूर्वेद्युरजपां षट्छताधिक-एकविंशतिसाहस्रिकां निःश्वासोच्छ्वासरूपिणीं मूलाधारादिब्रह्मरन्ध्रान्तसप्तचक्रनिवासिनीभ्यो देवताभ्यो निवेदयामीति सङ्कल्प्य हंसस्सोऽहं इति मन्त्रं पञ्चविंशतिवारं जपित्वा तदुपरि निःश्वासोच्छ्वासादिकं गायत्रीरूपं भावयित्वा ॥

प्रातः प्रभृतिसायान्तं सायादिप्रातरन्ततः ।
यत्करोमि जगद्योने तदस्तु तव पूजनम् ॥]

भूप्रार्थनादि मुखक्षालनान्तम्

समुद्रवसने देवि पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्यं पादचारं क्षमस्व मे ॥

[1] [] एतच्चिह्नमध्यगतो भागः (श्री. अ१) पुस्तकयोरेव दृश्यते.

इति भूमिं प्रार्थ्य धरणीतलन्यस्तवहन्नाडीपार्श्वपादमुत्थाय ग्रामात् वहिः स्मार्तेन विधिना निर्वर्तितशौचक्रियः

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥

इति मन्त्रेण दन्तधावनकाष्ठमभिमन्त्र्य, ऐं ह्रीं श्रीं क्लीं कामदेवाय सर्वजनप्रियाय नमः इति मन्त्रेण दन्तधावनं, ऐं ह्रीं श्रीं ह्ल्लेखया जिह्वोल्लेखनं च विधाय, कफविमोचन-नासाशोधनदृषिकानिरसनपूर्वकं विहितविंशतिगण्डूषः, ऐं ह्रीं श्रीं श्रीं—ऐं ह्रीं श्रीं ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः—ऐं ह्रीं श्रीं श्रीं ह्रीं क्लीं—ऐं ह्रीं श्रीं [1]सहकलह्रीं श्रीं—इति मन्त्रचतुष्टयेन मुखं प्रक्षाल्य यथास्मृत्याचामेत् ॥

स्नानविधिः

ततो नद्यादौ वैदिकस्नानोत्तरं श्रीललिताप्रीत्यर्थं तान्त्रिकस्नानं करिष्ये इति सङ्कल्प्य, जले पुरतो हस्तमात्रं चतुरश्रमण्डलं परिगृह्य, तत्र—

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥

इति सूर्यमभ्यर्थ्य,

आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ।
एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥

इति गङ्गामर्थयित्वा ऐं ह्रीं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः क्रों इत्यङ्कुशमुद्रया सूर्यमण्डलं भित्त्वा, ततो गङ्गाऽऽदिसर्वतीर्थावाहनोत्तरं वं इति सलिलबीजेन सप्तवारमभिमन्त्र्य, मुहुर्मूलमावर्तयन् मूर्धनि त्रीनुदकाञ्जलीन् दत्वा, त्रिरपश्च पीत्वा, मूलपूर्वं श्रीललितां तर्पयामीति त्रिस्तर्पणं, मूलेन त्रिः प्रोक्षणं च आत्मनो योनिमुद्रया विदध्यात् ॥

[1] सकल—अ, अ१. हसकल—ब२.

गृहे तु विना तर्पणम् । अशक्तौ च स्मार्तेन पथा मन्त्रभस्मस्नानयोरन्यतरं निर्वर्त्य मूलेन त्रिराचमनप्रोक्षणे केवलं कुर्यात् ॥

सन्ध्याविधिः

अथ धौते वाससी परिधाय विधृतपुण्ड्रः वैदिकीं सन्ध्यामभिवन्द्य तान्त्रिकीमाचरेत् । यथा—मूलेन त्रिराचम्य द्विः परिमृज्य सकृदुपस्पृश्य चक्षुषी नासिके श्रोत्रे अंसे नाभिं हृदयं शिरश्चाभिस्पृशेत् । [1]एवं त्रिराचम्य, पूर्ववत् प्राणानायम्य, त्रिरात्मानं च प्रोक्ष्य, अञ्जलिना सलिलमादाय ऐं ह्रीं श्रीं ह्रां ह्रीं ह्रूं सः मार्ताण्डभैरवाय प्रकाशशक्तिसहिताय स्वाहेतिमन्त्रेण उदयते विवस्वते त्रिरर्घ्यं दत्वा तन्मण्डले श्रीचक्रमनुचिन्त्य तत्र ध्यायेत्—

ध्यायेत् कामेश्वराङ्कस्थां कुरुविन्दमणिप्रभाम् ।
शोणाम्बरस्रगालेपां सर्वाङ्गीणविभूषणाम् ॥
सौन्दर्यशेवधिं सेषुचापपाशाङ्कुशोज्ज्वलाम् ।
स्वभाभिरणिमाद्याभिः सेव्यां सर्वनियामिकाम् ॥
सच्चिदानन्दवपुषं सदयापाङ्गविभ्रमाम् ।
सर्वलोकैकजननीं स्मेरास्यां [2]ललिताऽम्बिकाम् ॥

अत्रायुधानां क्रमः स्वरूपं च सपर्याप्रकरणे वक्ष्यते ॥

ततः—ऐं ह्रीं श्रीं क ए ई ल ह्रीं त्रिपुरसुन्दरि विद्महे ऐं ह्रीं श्रीं ह स क ह ल ह्रीं पीठकामिनि धीमहि ऐं ह्रीं श्रीं सकलह्रीं तन्नः क्लिन्ने प्रचोदयात्—इति मन्त्रेण महेश्यै त्रिरर्घ्यं दत्वा मूलेन त्रिः सन्तर्प्य मूलेन पूर्ववदाचम्य [3]जपप्रकरणे वक्ष्यमाणान् ऋष्यादीन् न्यस्य मूलमष्टोत्तरशतवारं आवर्तयेत् । ततः पुनः

[1] षोडश्युपासनायां तु मूलत्रये दशबीजसम्पुटितेन प्रथमादिखण्डत्रयेण तत्त्वशोधनम् । सर्वेण मूलेन सर्वतत्त्वशोधनं चेति विशेषः । एवमुत्तरत्रापि खण्डत्रयेण ज्ञेयम् ।—इत्यधिकः (अ) पुस्तके.

[2] परदेवतां—अ, अ१, भ.

[3] ह्रां ह्रीं ह्रूं सः मार्ताण्डभैरवं तर्पयामि त्रिः । मूलेन साङ्गां सायुधां सशक्तिकां सवाहनां सपरिवारां श्रीललितामहात्रिपुरसुन्दरीं तर्पयामीति त्रिः सन्तर्प्य आचम्य—इत्यधिकः (अ) पुस्तके.

कराङ्गन्यासादिकं कृत्वा जपं वक्ष्यमाणमन्त्रेण श्रीदेव्यै समर्प्य आचम्य मण्डलस्थं तीर्थं विसर्जनमुद्रया सूर्ये विसृजेत् ॥

इयमेकैव प्रातःसंध्याऽनुष्ठेया सूत्रकारमते नान्या माध्याह्निकादयः ॥

अथ सपर्यासाधनानि सम्पाद्य ब्रह्मयज्ञादि निर्वर्तयेत् इति शिवम् ॥

आह्निकप्रकरणं प्रथमं समाप्तम्

सपर्याप्रकरणम्

यागमन्दिरप्रवेशः

अथ मौनवान् यागमन्दिरमागत्य, गोमयेनोपलिप्तद्वारस्थण्डिलाभ्यन्तरस्य रङ्गवल्ल्याद्यलङ्कृतस्य धूपधूपितस्य बद्धवितानकुसुमस्रजो मण्टपस्य पश्चिमद्वारे तिष्ठन् दक्षवामशाखयोः ऊर्ध्वभागे च क्रमेण—

ऐं ह्रीं श्रीं भद्रकाल्यै नमः, ३ भैरवाय नमः, ३ लम्बोदराय नमः ॥

इति तिस्रो द्वारदेवताः सम्पूज्य, अन्तः प्रविष्टश्चाचम्य देशकालौ सङ्कीर्त्य मम श्रीललिताप्रसादसिद्ध्यर्थं यथाशक्ति क्रमं निर्वर्तयिष्ये इति सङ्कल्प्य, विधृतारुणवसनाभरणानुलेपनमाल्यः, सङ्कल्पमात्रकल्पिताकल्पो वा, ताम्बूलेन जातीपत्रफललवङ्गैलाकर्पूराख्यपञ्चतिक्तेन वा सुरभिळवदनः समास्तीर्णे ऊर्णावसनमृदुनि शुचिनि बालातृतीय[1]बीजेन द्वादशवारमभिमन्त्रिते मूलमन्त्रोक्षिते चित्रकम्बळाद्यन्यतमे आसने ऐं ह्रीं श्रीं आधारशक्तिकमलासनाय नमः इति पुष्पाक्षतैरभ्यर्च्य प्राङ्मुख उदङ्मुखो वा पद्मासनाद्यन्यतमेन आसनेन उपविशेत् ॥

[2][कुलार्णवे—

यदाशाऽभिमुखो मन्त्री त्रिपुरां परिपूजयेत् ।
देवीपश्चात्तदा प्राची प्रतीची त्रिपुरापुरः ॥

इति पूज्यपूजकयोः मध्यं प्रतीचीति नियमः ॥]

[1] बीजहंसमन्त्राभ्यां—अ.

[2] अयं भागः (श्री) कोश एव.

[1][शक्तिसङ्गमतन्त्रे नित्यनैमित्तिकपुरश्चरणादिव्यतिरिक्तेषु काम्येषु जपेषु गजाश्वादीनि चरासनान्युक्तानि । तदलाभे मृत्प्रकृतिकानि कुशप्रकृतिकानि वा आन्दोळिकादीनि वृक्षविशेषरूपाणि च कथितानि । विस्तरभिया न तद्वचनलेखः ॥]

ततः ऐं ह्रीं श्रीं रक्तद्वादशशक्तियुक्ताय दीपनाथाय नम इति भूमौ पुष्पाञ्जलिं दद्यात् । ततः ऐं ह्रीं श्रीं समस्तगुप्तप्रकटसिद्धयोगिनीचक्रश्रीपादुकाभ्यो नम इति मूर्धनि बद्धाञ्जलिः स्ववामदक्षपार्श्वयोः क्रमेण पूर्ववत् श्रीगुरुपादुकामनुमुच्चार्य, पञ्चमुद्राभिः श्रीगुरुं महागणपतिमन्त्रेण च गणपतिं प्रणम्य ऐं ह्रीं श्रीं ऐं ह्रः अस्त्राय फट् इत्यस्त्रमन्त्रेण मुहुरावृत्तेन अंगुष्ठादिकनिष्ठान्तं करतलयोः कूर्परयोः देहे च व्यापकं कुर्यात् ॥

श्रीचक्रपरिकल्पनम्

अथ पुरतश्चतुर्विंशत्यङ्गुलिमितां भूमिमपहाय, गोमयेनोपलिप्ते शुचिनि समे हस्तमात्रस्थण्डिले यथायोग्यपरिमाणे सुवर्णरूप्यताम्रादिपट्टे वा क्षीरमिश्रितेन सिन्दूर-रजसा कुङ्कुमेन वा हेमादिलेखिनीगृहीतेन बिन्दुत्रिकोणवसुकोणदशारयुग्मचतुर्दशा-रकर्णिकावृत्ताष्टदळपुनःकर्णिकावृत्तषोडशदळमर्यादावृत्तत्रयचतुरश्रत्रितयात्मकं श्रीचक्रं विलिखेत्, विलेखयेद्वा । स च प्रकारः एतत्प्रकरणावसाने कथयिष्यते ॥

यन्त्रप्राणप्रतिष्ठा

अथ सूत्रानुक्तामपि साम्प्रदायिकसम्मतां तन्त्रान्तरोदितां यन्त्रप्राणप्रतिष्ठां कुर्यात् । यथा—ऐं ह्रीं श्रीं श्रीचक्रस्य प्राणा इह प्राणाः श्रीचक्रस्य जीव इह स्थितः श्रीचक्रस्य सर्वेन्द्रियाणि श्रीचक्रस्य वाङ्मनःप्राणाः इह आयान्तु स्वाहा इति । एवमेव आत्मप्राणप्रतिष्ठाऽऽदौ सम्प्रदायः शरणीकार्यः ॥

यद्वा—काञ्चनरूप्यपञ्चलोहरत्नस्फटिकगण्डकीशिलाद्युत्कीर्णे वक्ष्यमाणेन प्रतिष्ठा-विधिना प्रतिष्ठापितं तत्स्वास्तीर्णपट्टवसने श्रीखण्डचन्दनादिनिर्मिते पीठे निवेशयेत् ॥

[1] अयं भागः (भ) कोशे नास्ति.

मन्दिरार्चा

अथ तत्र चक्रराजे मन्दिरपूजां कुर्यात् । यथा—

ऐं ह्रीं श्रीं अमृताम्भोनिधये नमः,—रत्नद्वीपाय, नानावृक्षमहोद्यानाय, कल्पवाटिकायै, सन्तानवाटिकायै, हरिचन्दनवाटिकायै, मन्दारवाटिकायै, पारिजातवाटिकायै, कदम्बवाटिकायै, पुष्परागरत्नप्राकाराय, पद्मरागरत्नप्राकाराय, गोमेदकरत्नप्राकाराय, वज्ररत्नप्राकाराय, वैडूर्यरत्नप्राकाराय, इन्द्रनीलरत्नप्राकाराय, मुक्तारत्नप्राकाराय, मरकतरत्नप्राकाराय, विद्रुमरत्नप्राकाराय, माणिक्यमण्टपाय, सहस्रस्तम्भमण्टपाय, अमृतवापिकायै, आनन्दवापिकायै, विमर्शवापिकायै, बालातपोद्गाराय, चन्द्रिकोद्गाराय, महाशृङ्गारपरिघायै, महापद्माटव्यै, चिन्तामणिमयगृहराजाय, पूर्वाम्नायमयपूर्वद्वाराय, दक्षिणाम्नायमयदक्षिणद्वाराय, पश्चिमाम्नायमयपश्चिमद्वाराय, उत्तराम्नायमयोत्तरद्वाराय, रत्नप्रदीपवलयाय, मणिमयमहासिंहासनाय, ब्रह्ममयैकमञ्चपादाय, विष्णुमयैकमञ्चपादाय, रुद्रमयैकमञ्चपादाय, ईश्वरमयैकमञ्चपादाय, सदाशिवमयैकमञ्चफलकाय, हंसतूलतलिमाय, हंसतूलमहोपधानाय, कौसुम्भास्तरणाय, महावितानकाय,—ऐं ह्रीं श्रीं महायवनिकायै नमः ॥

इति चतुश्चत्वारिंशन्मन्दिरमन्त्रैः तत्तदखिलं भावयन् कुसुमाक्षतैरभ्यर्चयेत् । एवमेव सर्वत्र अर्चने तत्तद्भावना श्रेयसी ॥

वर्धनीपात्रनिधानादि दीपप्रज्वालनान्तम्

ततो जलपूर्णं वर्धनीपात्रं स्ववामभागे, गन्धपुष्पाक्षतादिकां सपर्यासामग्रीं समग्रां स्वदक्षदेशे, क्षीरकलशादिकं देव्याः पश्चाद्भागे च निधाय, दीपानभितः प्रज्वालयेत् । असम्भवे तु दीपौ दीपं वा । इह च विशेषः—

घृतदीपो दक्षिणे स्यात्तैलदीपस्तु वामतः ।
सितवर्तियुतो दक्षे वामतो रक्तवर्तिकः ॥

दक्षवामभागौ देव्या एव ॥

भूतशुद्धिः

ततो ऐं ह्रीं श्रीं मूलेन श्रीचक्रे पुष्पाञ्जलिं दत्वा, ३ क ए ई ल ह्रीं नमः इति त्रिकोणस्य स्वाग्रकोणं, ३ ह स क ह ल ह्रीं नमः इति ईशानकोणं, ३ स क ल ह्रीं नमः इति आग्नेयकोणं अभ्यर्च्य भूतशुद्धिं विदध्यात् । यथा—श्वाससमीरं पिङ्गळया नाड्या अन्तराकृष्य ३ मूलशृङ्गाटकात् सुषुम्नापथेन जीवशिवं परमशिवपदे योजयामि स्वाहा इति मन्त्रेण मूलाधारस्थितं जीवात्मानं सुषुम्नावर्त्मना ब्रह्मरन्ध्रं नीत्वा परमशिवेनैकीभूतं भावयित्वा इडया वायुं रेचयेत् । एवमेवोत्तरत्र शोषणादिष्वपि प्रातिस्विकं पूरकरेचने । ३ यं सङ्कोचशरीरं शोषय शोषय स्वाहेति [1]निजशरीरं शोषितं विभाव्य, ३ रं सङ्कोचशरीरं दह दह पच पच स्वाहेति प्लुष्टं भस्मीकृतं च विभाव्य, ३ वं परमशिवामृतं वर्षय वर्षय स्वाहेति तद्भस्म सहस्रारेन्दुमण्डल-विगळदमृतरसेन सिक्तं च विभाव्य, ३ लं शाम्भवशरीरं उत्पादयोत्पादय स्वाहेति तद्भस्मनो दिव्यशरीरमुत्पन्नं च विभाव्य, ३ हं सः सोऽहमवतरावतर शिवपदात् जीवं सुषुम्नापथेन प्रविश मूलशृङ्गाटकमुल्लसोल्लस ज्वल ज्वल प्रज्वल प्रज्वल हंसः सोऽहं स्वाहेति परमशिवेनैकीकृतं जीवं पुनः सुषुम्नावर्त्मना मूलाधारे स्थापितं विचिन्तयेत् । सङ्कोचशरीरं नाम पाञ्चभौतिकं परिच्छिन्नमिदमेवाङ्गम् ॥ इति भूतशुद्धिः ॥

आत्मप्राणप्रतिष्ठा

अथ आत्मप्राणप्रतिष्ठा अनुष्ठेया । तस्याश्च तन्त्रान्तरेषु विस्तरेऽपि सूत्रकारस्य सङ्कुचितप्रयोगप्रियत्वात् ज्ञानार्णवोक्त एव तत्प्रकारो ग्राह्यः । यथा—हृदि दक्षकरतलं निधाय ३ आं सोऽहमिति त्रिः पठेत् इति ॥

प्रत्यूहोत्सारणम्

ततः प्राग्वत् विंशतिधा षोडशधा दशधा सप्तधा त्रिधा वा प्राणानायम्य,

ऐं ह्रीं श्रीं—अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

[1] सूक्ष्मशरीरं—अ, भ.

इति मन्त्रं सकृदुच्चार्य, युगपद्वामपार्ष्णिभूतलाघातत्रय-करास्फोटत्रय- क्रूरदृष्ट्यवलोकन-पूर्वं तालत्रयेण भौमान्तरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् । तालत्रयं नाम दक्षतर्जनीमध्यमाभ्यां अधोमुखाभ्यां वामकरतले सशब्दं उपर्युपरि त्रिरभिघातः ॥

न्यासजालविधिः

अथ नम इत्यङ्गुष्ठमन्त्रमुच्चारयन् अङ्कुशेन शिखां बद्ध्वा, श्रीदेवीरूपं भावयन् आत्मानं स्वदेहे न्यासजालात्मकं वज्रकवचं विदधीत । न्यासाश्च—

मातृकान्यासः, करशुद्धिन्यासः, आत्मरक्षान्यासः, चतुरासनन्यासः, बालाषडङ्गन्यासः, वशिन्यादिन्यासः, मूलविद्यावर्णन्यासः, षोढान्यासः, चक्रन्यासः ॥

तेषु विद्यावर्णन्यासः कादिहादिभेदेन द्विविधोऽपि तत्तदुपासकस्यैकैक एव । षोढा-चक्रन्यासौ कृताकृतौ । करणे त्वभ्युदय एव । श्रीषोडश्युपासकस्य पञ्चविधो मूल-वर्णन्यास इति विशेषः । न्यासानामितिकर्तव्यता न्यासप्रकरणे व्यक्तीभविष्यति ॥

पात्रासादनम्—सामान्यार्घ्यविधिः

स्वासनस्य द्वादशाङ्गुलमितात् प्रदेशात् परतो भुवि शुचिनि स्थले स्वस्य वामतो देव्याः पुरतो गन्धाक्षतकुसुमसमर्चितेन सप्तवारं त्रिवारं वा मूलमन्त्राभिमन्त्रितेन वर्धनीपात्रगतेन शुद्धेनाम्भसा बिन्दुत्रिकोणषट्कोणवृत्तचतुरश्रात्मकं मण्डलं मत्स्यमुद्रया निर्माय पुष्पैरभ्यर्च्य चतुरश्रस्याग्नीशासुरवायुकोणेषु मध्ये पूर्वादिदिक्षु च क्रमेण—

ऐं ह्रीं श्रीं ऐं हृदयाय नमः । आग्नेये ।
३ क्लीं शिरसे स्वाहा । ईशान्ये ।
३ सौः शिखायै वषट् । नैर्ऋतौ ।
३ ऐं कवचाय हुम् । वायव्ये ।
३ क्लीं नेत्रत्रयाय वौषट् । मध्ये ।
३ सौः अस्त्राय फट् । प्रागादिचतुर्दिक्षु ॥

इति पुष्पैः षडङ्गं विन्यसेत् । अत्र पूर्वादिचतुर्दिगधिकरणकं सकृदेकमेवास्त्रं ज्ञेयम् । एवमुत्तरत्रापि । अथ तत्र मण्डले ऐं ह्रीं श्रीं अस्त्राय फडिति क्षाळितं चतुरङ्गुल-विस्तारोत्सेधं स्वर्णरूप्यताम्रादिमयं त्रिपदं चतुष्पदं षट्पदमष्टपदं वा आधारं ३ अं अग्निमण्डलाय [1]दशकलाऽऽत्मने अर्घ्यपात्राधाराय नम इति निधाय अग्निमण्डलत्वेन विभावितस्य तस्य पश्चिमादिप्रादक्षिण्यक्रमेण—

ऐं ह्रीं श्रीं धूम्रार्चिषे नमः, ऊष्मायै, ज्वलिन्यै, ज्वालिन्यै, विस्फुलिङ्गिन्यै, सुश्रियै, सुरूपायै, कपिलायै, हव्यवाहायै, कव्यवाहायै नमः ॥

इति दशवह्निकलाः सम्पूज्य, आधारोपरि अस्त्रेण क्षाळितं शङ्खं ३ उं सूर्यमण्डलाय [2]द्वादशकलाऽऽत्मने अर्घ्यपात्राय नम इति प्रतिष्ठाप्य सूर्यमण्डलात्मकतया ध्यातस्य तस्य पूर्वोक्तक्रमेण—

ऐं ह्रीं श्रीं कं भं तपिन्यै नमः, खं बं तापिन्यै, गं फं धूम्रायै, घं पं मरीच्यै, ङं नं ज्वालिन्यै, चं धं रुच्यै, छं दं सुषुम्नायै, जं थं भोगदायै, झं तं विश्वायै, ञं णं बोधिन्यै, टं ढं धारिण्यै, ठं डं क्षमायै नमः ॥

इति द्वादशसूर्यकलाः समभ्यर्च्य, तस्मिन् शंखे ३ मं सोममण्डलाय [3]षोडशकलाऽऽत्मने अर्घ्यामृताय नम इति कर्पूरादिवासितं वर्धनीसलिलमापूर्य क्षीरबिन्दुं दत्वा, सोममण्डलत्वेन सञ्चिन्तिते तत्र अर्घ्यसलिले पूर्वोक्तक्रमेण—

ऐं ह्रीं श्रीं अमृतायै नमः, मानदायै, पूषायै, तुष्ट्यै, पुष्ट्यै, रत्यै, धृत्यै, शशिन्यै, चन्द्रिकायै, कान्त्यै, ज्योत्स्नायै, श्रियै, प्रीत्यै, अङ्गदायै, पूर्णायै, पूर्णामृतायै नमः ॥

इति षोडशेन्दुकलाः यजेत् । ततः पूर्ववत् विदिक्षु मध्ये दिक्षु च, ३ क ए ई ल ह्रीं हृदयाय नमः हृदयशक्तिश्रीपादुकां पूजयामि इत्यादिरीत्या त्रितारीयुतकूटत्रयं द्विरावर्त्य पुष्पैः षडङ्गानि समर्चयेत् । श्रीषोडशाक्षर्यां तु यथास्थितेन कूटषट्केनैव । एवमुत्तरत्रापि ॥

[1] 'धर्मप्रद' इत्यधिकः—अ.
[2] 'अर्थप्रद' इत्यधिकः—अ.
[3] 'कामप्रद' इत्यधिकः—अ.

अथ अस्त्राय फडिति अस्त्रमन्त्रेण संरक्ष्य, ३ कवचाय हुमिति अवकुण्ठनमुद्रया अवकुण्ठ्य, धेनुयोनिमुद्रे प्रदर्श्य, मूलेन सप्तवारमभिमन्त्र्य, तत्सलिलपृषतैः आत्मानं पूजोपकरणानि चावोक्ष्य, शङ्खगतजलात् किञ्चिद्वर्धन्यां क्षिपेत् ॥ इति सामान्यार्घ्यविधिः ॥

विशेषार्घ्यविधिः

अथ सामान्यार्घ्योदकेन तद्दक्षिणतो बिन्दुत्रिकोणषट्कोणवृत्तचतुरश्रात्मकं मण्डलं मत्स्यमुद्रया परिकल्प्य, बिन्दौ सानुस्वारं तुरीयस्वरमालिख्य [1](विद्यया मध्यमभ्यर्च्य) चतुरश्रे प्राग्वत् षडङ्गं विन्यस्य कूटत्रयेण त्रिकोणकोणानभ्यर्च्य पुरोभागादिप्रादक्षिण्येन कूटत्रयद्विरावृत्त्या षट्कोणस्य कोणांश्च क्रमेण कुसुमादिभिः अभ्यर्चयेत् । अथ तत्र मण्डले ३ ऐं अग्निमण्डलाय [2]दशकलाऽऽत्मने अर्घ्यपात्राधाराय नम इति उक्तलक्षणमाधारमादाय, प्राग्वत् विचिन्त्य तस्मिन्नुक्तदिशासु दशकृशानुकलाः संमृश्य, तदुपरि सुवर्णरूप्यशङ्खमुक्ताशुक्तिमहाशङ्खनारिकेळाश्वत्थपलाशादिनिर्मितमुक्तविस्तारोत्सेधं त्रिकोणचतुरश्रवर्तुलाद्यन्यतमाकारं पात्रं ३ क्लीं सूर्यमण्डलाय [3]द्वादशकलाऽऽत्मने अर्घ्यपात्राय नम इति मन्त्रेण निधाय, पूर्ववत् विभाविते तत्र ३ ह्रीं ऐं महालक्ष्मि ईश्वरि परमस्वामिनि ऊर्ध्वशून्यप्रवाहिनि सोमसूर्याग्निभक्षिणि परमाकाशभासुरे आगच्छ आगच्छ विश विश पात्रं प्रतिगृह्ण प्रतिगृह्ण हुं फट् स्वाहा इति मन्त्रेण पुष्पाञ्जलिं विकीर्य, दर्शितक्रमेण द्वादशदिनेशकलाः सम्भाव्य, तत्र पात्रे सौः सोममण्डलाय [4]षोडशकलाऽऽत्मने अर्घ्यामृताय नम इति मन्त्रेण कलशगतं कस्तूरिकाऽऽद्यधिवासितं क्षीरमभिपूर्य प्राग्वत् अवमृष्टे तत्र चन्दनागरुकर्पूरकचोरकुङ्कुमरोचनाजटामांसिसिशिलारसाख्याष्टगन्धपङ्कलोलितं यथासम्भवं गन्धकर्दमक्लिन्नं वा सुरभिळं कुसुमं निक्षिप्य मूलशकलान्यार्द्रकनागरादिखण्डानि च सम्मिश्र्य प्रागुक्तभङ्ग्या षोडशसोमकलाः सम्पूज्य, तत्र विशेषार्घ्यामृते स्वाग्रादिप्रादक्षिण्येन अकथादिषोडशवर्णात्मकरेखात्रयं त्रिकोणं विलिख्य, तदन्तः स्वाग्रादिकोणेषु प्रादक्षिण्येन हळक्षान् विलिख्य, बहिश्च मूलखण्डत्रयं, बिन्दौ सबिन्दुं तुरीयस्वरं, तद्वामदक्षयोः क्रमेण हं

[1] कुण्डलितो भागः (श्री) कोश एव वर्तते.
[2] 'धर्मप्रद' इत्यधिकः—अ.
[3] 'अर्थप्रद' इत्यधिकः—अ.
[4] 'कामप्रद' इत्यधिकः—अ.

सः इति च वर्णौ विलिख्य, ३ हं सः नम इति मन्त्रेण आराध्य, त्रिकोणस्य परितो वृत्तं निर्माय तद्बहिश्च षट्कोणं निर्माय स्वाग्रकोणादिप्रादक्षिण्येन प्रागुक्तैः षडङ्गमन्त्रैः षडङ्गयुवतीरभिपूज्य, ३ मूलान्ते तां चिन्मयीं आनन्दलक्षणां अमृतकलशपिशितहस्तद्वयां प्रसन्नां देवीं पूजयामि नमः स्वाहेति सुधादेवीमभ्यर्च्य, तदर्घ्यं किञ्चित् पात्रान्तरेण ३ वषडित्युद्धृत्य, पुनः ३ स्वाहेति मन्त्रेण तत्रैव अर्घ्यामृते निक्षिप्य, ३ हुं इत्यवगुण्ठ्य, ३ वौषट् इति धेनुमुद्रया अमृतीकृत्य, ३ फट् इति संरक्ष्य, ३ नम इति पुष्पं दत्वा, गालिन्या मुद्रया ३ मूलेन निरीक्ष्य, योनिमुद्रया नत्वा, मूलेन सत्रितारकेण सप्तवारमभिमन्त्र्य, गन्धाक्षतपुष्पधूपदीपान् दत्वा, विशेषार्घ्यपृषद्भिः समुक्षितसपर्यासाधनः सर्वं विद्यामयं विधाय विशेषार्घ्यपात्रं करेण संस्पृश्य चतुर्नवत्या मन्त्रैः अभिमन्त्रयेत् । मन्त्राश्च—त्रितारीनमःसम्पुटिताः धूम्रार्चिषे इत्याद्या मूलविद्याऽन्ताः । तत्र वह्निसूर्यसोमकला अष्टत्रिंशत् पूर्वं उक्ता एवेह ग्राह्याः । ततः—

ऐं ह्रीं श्रीं सृष्ट्यै नमः, ऋध्यै, स्मृत्यै, मेधायै, कान्त्यै, लक्ष्म्यै, द्युत्यै, स्थिरायै, स्थित्यै, सिद्ध्यै नमः ॥

इति ब्रह्मदशकलाः सम्पूज्य,

ऐं ह्रीं श्रीं जरायै नमः, पालिन्यै, शान्त्यै, ईश्वर्यै, रत्यै, कामिकायै, वरदायै, ह्लादिन्यै, प्रीत्यै, दीर्घायै नमः ॥

इति विष्णुदशकलाः सम्पूज्य,

ऐं ह्रीं श्रीं तीक्ष्णायै नमः, रौद्र्यै, भयायै, निद्रायै, तन्द्र्यै, क्षुधायै, क्रोधिन्यै, क्रियायै, उद्गार्यै, मृत्यवे नमः ॥

इति दश रुद्रकलाः सम्पूज्य,

ऐं ह्रीं श्रीं पीतायै नमः, श्वेतायै, अरुणायै, असितायै नमः ॥

इति चतस्रः ईश्वरकलाः सम्पूज्य,

ऐं ह्रीं श्रीं निवृत्त्यै नमः, प्रतिष्ठायै, विद्यायै, शान्त्यै, इन्धिकायै, दीपिकायै, रेचिकायै, मोचिकायै, परायै, सूक्ष्मायै, सूक्ष्मामृतायै, ज्ञानायै, ज्ञानामृतायै, आप्यायिन्यै, व्यापिन्यै, व्योमरूपायै नमः ॥

इति सदाशिवषोडशकलाः सम्पूज्य,—अत्र ब्रह्मविष्णुरुद्राणां प्रत्येकं दशकलाः, ईश्वरस्य चतस्रः, सदाशिवस्य षोडशेति विवेकः । आहत्य कलाः अष्टाशीतिः ॥

ऐं ह्रीं श्रीं हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ नमः ॥

ऐं ह्रीं श्रीं प्रतद्विष्णुस्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु अधिक्षयन्ति भुवनानि विश्वा ॥ नमः ॥

ऐं ह्रीं श्रीं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ नमः ॥

ऐं ह्रीं श्रीं तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ नमः ॥

ऐं ह्रीं श्रीं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥ नमः ॥

एतेषु पञ्चमन्त्रेषु अन्त्यौ द्वौ द्विद्विऋगात्मकौ ॥

मूलविद्या च—

ऐं ह्रीं श्रीं क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीम् ॥ नमः ॥

आहत्य षट् । पूर्वमुक्ता अष्टत्रिंशत्, ततः पञ्चाशत्, ततः षट्, आहत्य मन्त्राः चतुर्नवतिः ॥

केषां चिन्मते—

अखण्डैकरसानन्द[1]करे परसुधा[2]त्मनि ।
स्वच्छन्दस्फुर[3]णामत्र निधेहि कुलनायिके ॥ नमः ॥
अकुलस्थामृताकारे शुद्धज्ञानकरे परे ।
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि ॥ नमः ॥

[1] परे—अ, ब३, भ. [2] त्मिके—अ. [3] णंमातः—अ.

त्वद्रूपिण्यैकरस्यत्वं कृत्वा ह्येतत्स्वरूपिणि ।
भूत्वा परामृताकारा मयि चित्स्फुरणं कुरु ॥ नमः ॥

ऐं ब्लूं झ्रौं जुं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा ॥ नमः ॥

ऐं वद वद वाग्वादिनि ३ ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय क्लेदय महाक्षोभं कुरु कुरु ३ क्लीं सौः मोक्षं कुरु कुरु ह्सौं स्हौः ॥ नमः ॥

इत्येतैरपि मन्त्रैः पञ्चभिरभिमन्त्रणम् । आहत्य मन्त्रपिण्डसङ्ख्या एकोनशतम् ॥

एतदर्घ्यसंशोधनम् ॥

एवमभिमन्त्रणेन ज्योतिर्मयीकृतात् विशेषार्घ्यामृतात् पात्रान्तरे किञ्चिदुद्धृत्य तद्बिन्दुभिः त्रिवारं श्रीगुरुपादुकामन्त्रेण शिरसि श्रीगुरुं यजेत् । सन्निहिताय तु निवेदयेत् । स्वयं च—

श्रीं ह्रीं क्लीं आर्द्रं ज्वलति ज्योतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा ॥

इति मन्त्रेण आत्मनः कुण्डलिनीरूपे चिदग्नौ होमबुद्ध्या जुहुयात् । विशेषार्घ्यपात्रात् किञ्चित् क्षीरं [1]कारणकलशे निक्षिपेत् ॥

कलशलक्षणं श्यामारहस्ये—

[2]पञ्चाशदङ्गुलो व्यास उच्छ्रायो द्वादशाङ्गुलः ।
कलशानां प्रमाणं तु मुखमष्टाङ्गुलं स्मृतम् ॥

कलशः कांस्यजोऽपि स्यात् । स च देवतायाः पृष्ठे स्थाप्य इति । आविसर्जनं शङ्खं विशेषार्घ्यपात्रं च न चालयेत् । इदं पात्रद्वयमेव सूत्ररीत्या श्रीक्रमे नान्यत् ॥ इति विशेषार्घ्यस्थापनविधिः ॥

[1] कारण पदं (अ, श्री) कोशयोरेव.

[2] पञ्चदशाङ्गुलो—अ.

अन्तर्यागः

स च ज्ञानार्णवे दृष्टः । यथा—मूलाधारादा ब्रह्मबिलं विलसन्तीं बिसतन्तुतनीयसीं विद्युत्पुञ्जपिञ्जरां विवस्वदयुतभास्वत्प्रकाशां परश्शतसुधामयूखशीतलतेजोदण्डरूपां परचितिं भावयेदिति । अथ हृदि श्रीचक्रं विभाव्य तत्र तामेव स्वीकृतप्रागुक्तरूपां श्रीदेवीं ध्यात्वा वक्ष्यमाणैः गन्धादिताम्बूलान्तं षडुपचारमन्त्रैः उपचर्य तां पुनस्तेजोरूपेण परिणतां परमशिवज्योतिरभिन्नप्रकाशात्मिकां वियदादिविश्वकारणां सर्वावभासिकां स्वात्माभिन्नां परचितिं सुषुम्नापथेन उद्गमय्य विनिर्भिन्नविधिबिलविलसदमलदशशतदळकमलाद्वहन्नासापुटेन निर्गतां त्रिखण्डामुद्रामण्डितशिखण्डे कुसुमगर्भिते अञ्जलौ समानीय ऐं ह्रीं श्रीं ह्रीं श्रीं सौः श्रीललिताया अमृतचैतन्यमूर्तिं कल्पयामि नमः इति मन्त्रमुच्चारयन् निजलीलाऽङ्गीकृतललितवपुषं विचिन्त्य—ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्ल्रीं ह्स्रौः ।

महापद्मवनान्तःस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥[1]

इति मन्त्रेण बिन्दुपीठगतनिर्विशेषब्रह्मात्मकश्रीमत्कामेश्वराङ्के परदेवतामावाहयेत् ॥

अथ नित्याऽऽदिकमणिमाऽन्तं श्रीकामेश्वराङ्कोपवेशनं विना श्रीदेवीसमानाकृतिवेषभूषणायुधशक्तिचक्रं ओघत्रयगुरुमण्डलं च वक्ष्यमाणेषु आवरणेषु निजस्वामिन्यभिमुखोपविष्टमवमृश्य मूलेन आवाहनसंस्थापनसन्निधापनसन्निरोधनसम्मुखीकरणावगुण्ठनवन्दनधेनुयोनिमुद्राः प्रदर्शयंस्तदखिलं भावयेत् ॥

अत्र—

मेरुमन्त्रात्मकं चक्रं श्रीत्विषस्तत्र देवताः ।
कामेश्वरः प्रकाशात्मा श्रीविमर्शस्तदङ्कगः ॥

[1] एह्येहि देवदेवेशि त्रिपुरे देवपूजिते ।
परामृतप्रिये शीघ्रं सान्निध्यं कुरु सिद्धिदे ॥
देवेशि भक्तिसुलभे सर्वावरणसंवृते ।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥
इति अधिकः 'अ' कोशे.

इत्येतद्वासनारूपं अभेदं च परस्परम् ।
ज्ञात्वा श्रीगुरुवक्त्राब्जात् कृता पूजा महाफला ॥

मेरुमन्त्रश्च चतुरश्रादिचक्रनवकविशेषणगतैः लकारादिभिः अवयवैः ज्ञातव्यः ॥

चतुष्षष्ट्युपचारार्चनम्

अथ श्रीपरदेवतायाः चतुष्षष्ट्युपचारानाचरेत् । तेषु अशक्तानां भावनया सामान्यार्घ्योदकात् किंचित्किंचिदम्बाचरणाम्बुजे अर्पणबुद्ध्या पात्रान्तरे निक्षिपेत् । पुष्पाक्षतान्वा समर्पयेत् । [1]भूषावरोपणाभ्यङ्गरूपमुपचारद्वयमपि मण्टपान्तर एव भावनीयम्, मज्जनादिषु तथा दर्शनात्, औचित्याच्च । अनयोः मण्टपादिशब्दस्य मन्त्रावयवत्वेन प्रवेशो न सम्भवति, अनुक्तत्वात् । मज्जनमण्टपप्रवेशादिषु मध्येमार्गे पीठे च मृदुलदुकूलास्तृतिश्च भावयितुमुचितम् । श्रीचक्रादवरोहणमपि, उत्तरत्रारोहण-कथनात् । अभ्यङ्गादिषु यवनिकाभावनं च । उपचारमन्त्रशरीरं तु—अत्रादौ त्रितारी, ततश्चतुर्थ्यन्तं ललितेति पदं, अथामुकं कल्पयामि नमः इति । ललिता कामेश्वरी त्रिपुरसुन्दरी इति देवतानामपर्यायेषु सत्स्वपि सूत्रकारेण ललितापदग्रहणात् ललिता-पदप्रयोगः कार्यः । यथा—

ऐं ह्रीं श्रीं ललितायै पाद्यं कल्पयामि नमः, आभरणावरोपणं, सुगन्धतैलाभ्यङ्गं, मज्जनशालाप्रवेशनं, मज्जनमण्टपमणिपीठोपवेशनं, दिव्यस्ना-नीयोद्वर्तनं, उष्णोदकस्नानं, कनककलशच्युतसकलतीर्थाभिषेकं (इह श्रीसूक्ता-दीनामावृत्तिः), धौतवस्त्रपरिमार्जनं, अरुणदुकूलपरिधानं, अरुणकुचोत्तरीयं, आलेपमण्टपप्रवेशनं, आलेपमण्टपमणिपीठोपवेशनं, चन्दनागरुकुङ्कुममृगमद-कर्पूरकस्तूरीगोरोचनादिदिव्यगन्धसर्वाङ्गीणविलेपनं, केशभारस्य कालागरुधूपं, मल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकुहळीपुन्नागकल्हारमुख्यसर्वर्तुकुसुम-मालाः, भूषणमण्टपप्रवेशनं, भूषणमण्टपमणिपीठोपवेशनं, नवमणिमकुटं, चन्द्रशकलं, सीमन्तसिन्दूरं, तिलकरत्नं, कालाञ्जनं, पाळीयुगळं, मणिकुण्डल-

[1] तत्तन्मन्त्रमात्रं वा जपेत् । तथाच तन्त्रसारे "चतुष्षष्ट्युपचाराणां अभावे तु मनुं जपेत् । तत्तदेव फलं विन्द्यात् साधकः स्थिरमानसः ॥" इति (भ) कोशे अधिकः ॥

युगळं, नासाभरणं, अधरयावकं, प्रथमभूषणं (माङ्गल्यसूत्रं), कनकचिन्ताकं (एतच्च आन्ध्रपुरन्ध्रीजनेन ध्रियमाणः कर्ण[कण्ठ] भूषणविशेषः), पदकं, महापदकं, मुक्तावळिं, एकावळिं, छन्नवीरं (इदं चोभयतो वैकक्ष्यदामात्मकं भूषणम्), केयूरयुगळचतुष्टयं, वलयावळिं, ऊर्मिकावळिं, काञ्चीदाम, कटिसूत्रं, सौभाग्याभरणं, (अधश्च जघनालम्बी भूषणविशेषः), पादकटकं, रत्ननूपुरं, पादाङ्गुलीयकं, एककरे पाशं, अन्यकरे अङ्कुशं, इतरकरे पुण्ड्रेक्षुचापं, अपरकरे पुष्पबाणान् [तत्रोर्ध्वयोः वामदक्षयोः करयोः पाशाङ्कुशौ । अधःस्थितयोः चापबाणाः । (पाशो वैद्रुमः अङ्कुशो रूप्यमयः) एते च क्रमेण रागरोषमनस्तन्मात्रात्मकवासनारूपाः इति च ज्ञेयम्] श्रीमन्माणिक्यपादुके, स्वसमानवेषाभिः आवरणदेवताभिः सह महाचक्राधिरोहणं, कामेश्वराङ्कपर्यङ्कोपवेशनं, (अत्र इतरासां निजनिजस्थानावस्थितिभावनामात्रम्), अमृतासवचषकं, आचमनीयं, कर्पूरवीटिकां कल्पयामि नमः ॥

तल्लक्षणं तु—

एलालवङ्गकर्पूरकस्तूरीकेसरादिभिः ।
जातीफलदळैः पूगैः लाङ्गल्यूषणनागरैः ।
चूर्णैः खादिरसारैश्च युक्ता कर्पूरवीटिका ॥

आदिपदेन ताम्बूलीदळतक्कोलग्रहणम् ।

ऐं ह्रीं श्रीं लळितायै आनन्दोल्लासविलासहासं, मङ्गळारार्तिकं कल्पयामि नमः ॥

तत्प्रकारस्तु—कलधौतादिभाजने कुङ्कुमचन्दनादिलिखितस्याष्टषट्चतुर्दळाद्यन्यतमस्य कमलस्य चन्द्राकार[1]चरुगोळकवत्यां [2]चणकमुद्गजुषि वा कर्णिकायां दळेषु च पयः-शर्करापिण्डीकृतयवगोधूमादिपिष्टोपादानकानि त्रिकोणशिरस्कडमर्वाकृतीनि चतुरङ्गुलोत्सेधानि घृतपाचितानि नवसप्तपञ्चान्यतमसङ्ख्यानि दीपपात्राणि निधाय तेषु गोघृतं प्रत्येकं

[1] चारु—अ, भ.

[2] एकमुद्राजुषि—अ.

कर्षप्रमितं आपूर्य कर्पूरगर्भिता वर्तिका हृल्लेखया प्रज्वाल्य ३ श्रीं ह्रीं ग्लूं स्लूं म्लूं प्लूं न्लूं ह्रीं श्रीं इति नवाक्षर्या रत्नेश्वरीविद्यया अभिमन्त्र्य चक्रमुद्रां प्रदर्श्य मूलेनाभ्यर्च्य जगद्ध्वनिमन्त्रमातः स्वाहा इति मन्त्रपूर्वकं गन्धाक्षतादिना घण्टां सम्पूज्य तां वादयन् जानुचुम्बितभूतलस्तत्पात्रं आमस्तकमुद्धृत्य, ऐं ह्रीं श्रीं ललितायै आरार्तिकं कल्पयामि नम इति कल्पयित्वा,

समस्तचक्रचक्रेशीयुते देवि नवात्मिके ।
आरार्तिकमिदं तुभ्यं गृहाण मम सिद्धये ॥

इति नववारं श्रीदेव्या आचूडं आचरणाब्जं परिभ्राम्य दक्षभागे स्थापयेत् । ततः—

ऐं ह्रीं श्रीं ललितायै छत्रं कल्पयामि नमः, चामरयुगळं, तालवृन्तं, गन्धं, पुष्पं, कल्पयामि नमः ॥

विविधानि पुष्पाणि कल्पयेत् । एतत्प्रकारश्च सप्तमे अनवस्थाख्योल्लासे द्रष्टव्यः ॥

अथ धूपपात्रभरितेषु अङ्गारेषु दशाङ्गादि निक्षिप्य---

ऐं ह्रीं श्रीं ललितायै धूपं कल्पयामि नमः ॥

इति श्रीदेवीचरणान्तिके समर्प्य तत्पात्रं श्रीदेव्या वामभागे निदध्यात् । दशाङ्गानि तु—

श्वेतकृष्णागरू लाक्षा गुग्गुलुश्चन्दनं घृतम् ।
मधुबिल्वफलं राळः कर्पूरश्च दशाङ्गकम् ॥

इति वचनोक्तानि । ततो दीपभाजने अर्पितं गोघृततैलाद्यक्तं कर्पूरगर्भितं त्र्यादिविषमसङ्ख्याकं वर्तिजातं प्रज्वाल्य,

ऐं ह्रीं श्रीं ललितायै दीपं कल्पयामि नमः ॥

इति देव्या दृक्समसीमनि प्रदर्श्य तत्पात्रं दक्षिणभागे निवेश्य,

देव्यग्रतः स्वदक्षिणे अधिचतुरश्रमण्डलं आधारोपरि निहितकनकरौप्यादिभाजनभरितं फलविशेषखण्डसितालड्डुकादिनैवेद्यं मूलेन प्रोक्ष्य, वं इति धेनुमुद्रया अमृतीकृत्य मूलेन त्रिवारमभिमन्त्र्य,

ऐं ह्रीं श्रीं ललितायै आपोशनं कल्पयामि नमः ॥

इति नैवेद्याङ्गत्वेन आपोशनं दत्वा—

ऐं ह्रीं श्रीं ललितायै नैवेद्यं कल्पयामि नमः ॥

इति निवेदयेत् ॥

गन्धादिनैवेद्यान्तं उपचारवस्तुपञ्चकं तु पृथिव्यादिमहाभूतपञ्चकरूपं क्रमेण भावयेत् । सर्वभूतात्मकत्वं च कर्पूरवीटिकायाः ॥

अथ पानीयोत्तरापोशनहस्तप्रक्षाळनगण्डूषाचमनकर्पूरवीटिकाश्चोपचारमन्त्रैः कल्पयित्वा—ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः क्रों ह्स्ख्फ्रें ह्सौः ऐं सर्वसङ्क्षोभिण्यादिनवमुद्राः प्रदर्श्य, षोडश्युपासनायां तु ऐं इति त्रिखण्डामपि प्रदर्शयेत् ॥

ततो ३ मूलान्ते ललिताश्रीपादुकां पूजयामि इति तत्त्वमुद्रासन्दष्ट[1]द्वितीयशकलगृहीतविशेषार्घ्यबिन्दुसहार्पितैः दक्षकरोपात्तज्ञानमुद्राधृतकुसुमाक्षतैः श्रीदेवीं त्रिः सन्तर्पयेत् । अनेनैव प्रकारेण सर्वासामावरणदेवतानां तर्पणं ज्ञेयम् ॥ इति देवीपूजनम् ॥

षडङ्गार्चनम्

अथ श्रीदेव्यङ्गे अग्नीशादिकोणेषु मध्ये दिक्षु च पूर्वोक्तविधिना मूलेन षडङ्गयुवतीः पूजयेत् ॥

नित्यादेवीयजनम्

ततो मध्यत्रिकोणस्य दक्षिणरेखायां वारुण्याद्याग्नेयान्तं क्रमेण अं आं इं ईं उं इति, पूर्वरेखायां आग्नेयादीशानान्तं ऊं ऋं ॠं लृं ॡं इति, उत्तररेखायां ईशानादिवारुण्यन्तं एं ऐं ओं औं अं इति, पञ्चपञ्चस्वरान् विभाव्य तेषु वामावर्तेनैव प्रागुक्तस्वरूपाः कामेश्वर्यादिनित्या यजेत् । बिन्दौ च षोडशं स्वरं अः इति विचिन्त्य महानित्याम् । यथा—

ऐं ह्रीं श्रीं अं ऐं स क ल ह्रीं नित्यक्लिन्ने मदद्रवे सौः अं कामेश्वरीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

[1] मूलक—ब२. ब३. अ.

कर्षप्रमितं आपूर्य कर्पूरगर्भिता वर्तिका हृल्लेखया प्रज्वाल्य ३ श्रीं ह्रीं ग्लूं स्लूं म्लूं प्लूं न्लूं ह्रीं श्रीं इति नवाक्षर्या रत्नेश्वरीविद्यया अभिमन्त्र्य चक्रमुद्रां प्रदर्श्य मूलेनाभ्यर्च्य जगद्ध्वनिमन्त्रमातः स्वाहा इति मन्त्रपूर्वकं गन्धाक्षतादिना घण्टां सम्पूज्य तां वादयन् जानुचुम्बितभूतलस्तत्पात्रं आमस्तकमुद्धृत्य, ऐं ह्रीं श्रीं ललितायै आरार्तिकं कल्पयामि नम इति कल्पयित्वा,

समस्तचक्रचक्रेशीयुते देवि नवात्मिके ।
आरार्तिकमिदं तुभ्यं गृहाण मम सिद्धये ॥

इति नववारं श्रीदेव्या आचूडं आचरणाब्जं परिभ्राम्य दक्षभागे स्थापयेत् । ततः—

ऐं ह्रीं श्रीं ललितायै छत्रं कल्पयामि नमः, चामरयुगळं, तालवृन्तं, गन्धं, पुष्पं, कल्पयामि नमः ॥

विविधानि पुष्पाणि कल्पयेत् । एतत्प्रकारश्च सप्तमे अनवस्थाख्योल्लासे द्रष्टव्यः ॥

अथ धूपपात्रभरितेषु अङ्गारेषु दशाङ्गादि निक्षिप्य---

ऐं ह्रीं श्रीं ललितायै धूपं कल्पयामि नमः ॥

इति श्रीदेवीचरणान्तिके समर्प्य तत्पात्रं श्रीदेव्या वामभागे निदध्यात् । दशाङ्गानि तु—

श्वेतकृष्णागरू लाक्षा गुग्गुलुश्चन्दनं घृतम् ।
मधुबिल्वफलं राळः कर्पूरश्च दशाङ्गकम् ॥

इति वचनोक्तानि । ततो दीपभाजने अर्पितं गोघृततैलाद्यक्तं कर्पूरगर्भितं त्र्यादिविषम-सङ्ख्याकं वर्तिजातं प्रज्वाल्य,

ऐं ह्रीं श्रीं ललितायै दीपं कल्पयामि नमः ॥

इति देव्या दृक्समसीमनि प्रदर्श्य तत्पात्रं दक्षिणभागे निवेश्य,

देव्यग्रतः स्वदक्षिणे अधिचतुरश्रमण्डलं आधारोपरि निहितकनकरौप्यादि-भाजनभरितं फलविशेषखण्डसितालड्डुकादिनैवेद्यं मूलेन प्रोक्ष्य, वं इति धेनुमुद्रया अमृतीकृत्य मूलेन त्रिवारमभिमन्त्र्य,

ऐं ह्रीं श्रीं ललितायै आपोशनं कल्पयामि नमः ॥

इति नैवेद्याङ्गत्वेन आपोशनं दत्वा—

ऐं ह्रीं श्रीं ललितायै नैवेद्यं कल्पयामि नमः ॥

इति निवेदयेत् ॥

गन्धादिनैवेद्यान्तं उपचारवस्तुपञ्चकं तु पृथिव्यादिमहाभूतपञ्चकरूपं क्रमेण भावयेत् । सर्वभूतात्मकत्वं च कर्पूरवीटिकायाः ॥

अथ पानीयोत्तरापोशनहस्तप्रक्षाळनगण्डूषाचमनकर्पूरवीटिकाश्चोपचारमन्त्रैः कल्पयित्वा—ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः क्रों ह्स्ख्फ्रें ह्सौः ऐं सर्वसङ्क्षोभिण्यादिनवमुद्राः प्रदर्श्य, षोडश्युपासनायां तु ऐं इति त्रिखण्डामपि प्रदर्शयेत् ॥

ततो ३ मूलान्ते ललिताश्रीपादुकां पूजयामि इति तत्त्वमुद्रासन्दष्ट[1]द्वितीयशकलगृहीतविशेषार्घ्यबिन्दुसहार्पितैः दक्षकरोपात्तज्ञानमुद्राधृतकुसुमाक्षतैः श्रीदेवीं त्रिः सन्तर्पयेत् । अनेनैव प्रकारेण सर्वासामावरणदेवतानां तर्पणं ज्ञेयम् ॥ इति देवीपूजनम् ॥

षडङ्गार्चनम्

अथ श्रीदेव्यङ्गे अग्नीशादिकोणेषु मध्ये दिक्षु च पूर्वोक्तविधिना मूलेन षडङ्गयुवतीः पूजयेत् ॥

नित्यादेवीयजनम्

ततो मध्यत्रिकोणस्य दक्षिणरेखायां वारुण्याद्याग्नेयान्तं क्रमेण अं आं इं ईं उं इति, पूर्वरेखायां आग्नेयादीशानान्तं ऊं ऋं ॠं ऌं ॡं इति, उत्तररेखायां ईशानादिवारुण्यन्तं एं ऐं ओं औं अं इति, पञ्चपञ्चस्वरान् विभाव्य तेषु वामावर्तेनैव प्रागुक्तस्वरूपाः कामेश्वर्यादिनित्या यजेत् । बिन्दौ च षोडशं स्वरं अः इति विचिन्त्य महानित्याम् । यथा—

ऐं ह्रीं श्रीं अं ऐं स क ल ह्रीं नित्यक्लिन्ने मदद्रवे सौः अं कामेश्वरीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

[1] मूलक—व२. व३. अ.

३ आं ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्वान् भगेश्वरि ऐं ब्लूं जें ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं आं भगमालिनीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ इं ओं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा इं नित्यक्लिन्नानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ईं ओं क्रों भ्रों क्रौं झ्रौं छ्रौं ज्रौं स्वाहा ईं भेरुण्डानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ उं ओं ह्रीं वह्निवासिन्यै नमः उं वह्निवासिनीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ऊं ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं ऊं महावज्रेश्वरीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ऋं ह्रीं शिवदूत्यै नमः ऋं शिवदूतीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ॠं ओं ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षें ह्रीं फट् ॠं त्वरितानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ऌं ऐं क्लीं सौः ऌं कुलसुन्दरीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ॡं ह स क ल र डैं ह स क ल र डीं ह स क ल र डौः ॡं नित्यानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ एं ह्रीं फ्रें स्रूं क्रों आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फ्रें ह्रीं एं नीलपताकानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ऐं भ म र य औं ऐं विजयानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ ओं स्वौं ओं सर्वमङ्गळानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ औं ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं र र र र र र र ज्वालामालिनि हुं फट् स्वाहा औं ज्वालामालिनीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ अं च्क्लौं अं चित्रानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ अः क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं अः ललितामहानित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥

गुरुमण्डलार्चनम्

१. कादिविद्योपासकानाम्

ततो देव्याः पश्चात् मूलत्रिकोणपूर्वरेखायाः तदव्यवहितप्रागग्रत्रिकोणपश्चिमरेखायाश्चान्तरे विमलाजयिन्योर्मध्ये अरुणावाग्देवतासन्निधौ दक्षिणोत्तरायतं रेखात्रयं विभाव्य दक्षिणसंस्थाक्रमेण दिव्यसिद्धमानवाख्यमोघत्रयं मुनिवेदवसुसङ्ख्यं समर्चयेत् । यथा—

दिव्यौघः

ऐं ह्रीं श्रीं परप्रकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ परशिवानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ पराशक्त्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ कौलेश्वरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ शुक्लदेव्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कुलेश्वरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कामेश्वर्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

सिद्धौघः

ऐं ह्रीं श्रीं भोगानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ क्लिन्नानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ समयानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ सहजानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

मानवौघः

ऐं ह्रीं श्रीं गगनानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ विश्वानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ विमलानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ मदनानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ भुवनानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ लीलानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ स्वात्मानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ प्रियानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

एतत् कादिविद्योपासकानां दक्षिणामूर्तिसम्प्रदायानुसारि गुरुपारम्पर्यम् । इदमेव षोडश्यामपीति ज्ञानार्णवमतम् । अस्मादेव ज्ञापकात् अयमेव पूजनक्रमः तत्राप्युपयुज्यते ॥

२. षोडश्युपासकानाम्

विद्यार्णवनिबन्धे तु श्रीषोडशीगुरुपारम्पर्ये विशेषः । यथा—

दिव्यौघः

ऐं ह्रीं श्रीं व्योमातीताम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ व्योमेश्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ व्योमकाम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ व्योमचारिण्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ व्योमस्थाम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

सिद्धौघः

ऐं ह्रीं श्रीं उन्मनाकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ समनाकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ व्यापकाकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ शक्त्याकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ ध्वन्याकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ ध्वनिमात्राकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ अनाहताकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ बिन्द्वाकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ इन्द्वाकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

मानवौघः

ऐं ह्रीं श्रीं परमात्मानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ शाम्भवानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ चिन्मुद्रानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ वाग्भवानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ लीलानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ सम्भ्रमानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ चिदानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ प्रसन्नानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ विश्वानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३. हादिविद्योपासकानाम्

हादिपञ्चदश्युपासकानां गुरुक्रमो यथा—

दिव्यौघः

ऐं ह्रीं श्रीं परमशिवानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कामेश्वर्यम्बानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ दिव्यौघानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ महौघानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ सर्वानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ प्रज्ञादेव्यम्बानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ प्रकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

सिद्धौघः

ऐं ह्रीं श्रीं दिव्यानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ चिदानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कैवल्यानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ अनुदेव्यम्बानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ महोदयानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ [1]सिद्धानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

मानवौघः

ऐं ह्रीं श्रीं चिदानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ [2]विश्वानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ रामानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कमलानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ परानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

[1] अयं पर्यायः (श्री)कोश एव दृश्यते.

[2] विश्वशक्त्यानन्द—अ, ब३, भ.

३ मनोहरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ स्वात्मानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ प्रतिभानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

मन्वादिविद्यानां गुरुपरम्परा

अथ सूत्रकृतानुक्तानामपि श्रीविद्यात्मनोपलक्षितानां मन्वादिविद्यानां गुरुपारम्पर्यं यथा—

दिव्यौघः

ऐं ह्रीं श्रीं परप्रकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ परविमर्शानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कामेश्वर्यम्बानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ मोक्षानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ अमृतानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ [1]सिद्धानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ पुरुषानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ अघोरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

सिद्धौघः

ऐं ह्रीं श्रीं प्रकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ सदानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ सिद्धौघानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ उत्तमानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

मानवौघः

ऐं ह्रीं श्रीं उत्तरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ [2]परमानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ सर्वज्ञानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

[1] अयं पर्यायः केषुचित्कोशेषु नोपलभ्यते.
[2] 'उद्भवानन्द' इति पर्यायः अधिकः (अ) कोशे.

३ सर्वानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ [1]सिद्धानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ गोविन्दानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ शङ्करानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥

कल्पसूत्रस्य काळीमतान्तर्गतत्वात् इदं पारम्पर्यत्रयं तदनुगमेव । विद्यार्णवोक्तश्रीषोडशाक्षरीगुरुपादुकापारम्पर्यस्य कादिकाळ्युभयमतसम्मतत्वं ज्ञेयम् ॥

अज्ञातगुरुपारम्पर्याणां गुरुक्रमः

अथ प्रासङ्गिकः अज्ञातगुरुपारम्पर्याणां गुरुक्रमो यथा—

दिव्यौघः

ऐं ह्रीं श्रीं ऐं गुरुभ्यो नमः ॥

३ ऐं गुरुपादुकाभ्यो नमः ॥

सिद्धौघः

ऐं ह्रीं श्रीं ऐं परमगुरुभ्यो नमः ॥

३ ऐं परमगुरुपादुकाभ्यो नमः ॥

मानवौघः

ऐं ह्रीं श्रीं ऐं आचार्येभ्यो नमः ॥

३ ऐं आचार्यपादुकाभ्यो नमः ॥

३ ऐं पूर्वसिद्धेभ्यो नमः ॥

३ ऐं पूर्वसिद्धपादुकाभ्यो नमः ॥

एवं स्वस्योपास्यविद्योघत्रयसपर्यां विधाय स्वशिरसि पूर्वोक्तरूपं श्रीगुरुं ध्यात्वा, पूर्वोक्तेन श्रीगुरुपादुकामन्त्रेण श्रीगुरुं त्रिर्यजेत् ॥

इति गुरुमण्डलार्चनम् ॥ एतावल्लयाङ्गपूजनमित्युच्यते ॥

---

[1] 'स्वच्छानन्द' इत्यधिकः पर्यायः (अ) कोशे.

आवरणपूजा

प्रथमावरणम्

एतद्देवतास्वरूपं तु प्रागुक्तमेव । क्रमेण शुक्लारुणपीतवर्णरेखात्रयस्य लकारप्रकृतिकपृथिव्यात्मकस्य चतुरश्रस्य प्रवेशरीत्या प्रथमरेखायां पश्चिमादिद्वार-चतुष्टयदक्षिणभागेषु वाय्वादिकोणेषु च पश्चिमनैर्ऋतयोः पूर्वेशानयोश्च मध्ये क्रमेण——

ऐं ह्रीं श्रीं अणिमासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः, लघिमा, महिमा, ईशित्व, वशित्व, प्राकाम्य, भुक्ति, इच्छा, प्राप्ति, सर्वकामसिद्धि-श्रीपादुकां पूजयामि तर्पयामि नमः ॥

इति स्वस्य तत्तदाभिमुख्यं भावयन् पूजयेत् । एवं उत्तरत्रापि । अत्र देव्याः पुरतः पश्चिमादिदिक् । पश्चिमनैर्ऋतयोर्मध्ये अधोदिक् । पूर्वेशानयोर्मध्ये चोर्ध्वदिक् इति विवेकः ॥

अथ चतुरश्रमध्यरेखायां प्रागुक्तद्वारवामभागेषु कोणेषु च क्रमेण—

ऐं ह्रीं श्रीं ब्राह्मीमातृदेवीश्रीपादुकां पूजयामि तर्पयामि नमः, माहेश्वरी, कौमारी, वैष्णवी, वाराही, माहेन्द्री, चामुण्डा, महालक्ष्मीमातृदेवीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

ततः चतुरश्रान्त्यरेखायां प्रथमरेखोक्तक्रमेण—

ऐं ह्रीं श्रीं सर्वसङ्क्षोभिणीमुद्राशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः, सर्वविद्राविणी, सर्वाकर्षिणी, सर्ववशङ्करी, सर्वोन्मादिनी, सर्वमहाङ्कुशा, सर्वखेचरी, सर्वबीज, सर्वयोनि, सर्वत्रिखण्डमुद्राशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥

इति पूजयित्वा,

एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः सन्तर्पिताः सन्त्विति तासामेव समष्ट्यर्चनं पुष्पाञ्जलिना कृत्वा अणिमासिद्धेः पुरतो ३ अं आं सौः त्रिपुराचक्रे-

श्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इति सम्पूज्य, द्रां इति सर्वसङ्क्षोभिणीमुद्रां प्रदर्शयेत् ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति प्रथमावरणम्

द्वितीयावरणम्

श्वेतवर्णे सकारप्रकृतिकषोडशकलाऽऽत्मके चन्द्रस्वरूपे स्रवदमृतरसे षोडशदलकमले देव्यग्रदळमारभ्य वामावर्तेन (अप्रादक्षिण्येन)

ऐं ह्रीं श्रीं कामाकर्षिणीनित्याकळा[1]देवीश्रीपादुकां पूजयामि तर्पयामि नमः, बुद्ध्याकर्षिणी, अहङ्काराकर्षिणी, शब्दाकर्षिणी, स्पर्शाकर्षिणी, रूपाकर्षिणी, रसाकर्षिणी, गन्धाकर्षिणी, चित्ताकर्षिणी, धैर्याकर्षिणी, स्मृत्याकर्षिणी, नामाकर्षिणी, बीजाकर्षिणी, आत्माकर्षिणी, अमृताकर्षिणी, शरीराकर्षिणीनित्याकळादेवीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

इत्यभ्यर्च्य, एताः गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः सन्त्विति तासामेव समष्टयर्चनं विधाय कामाकर्षिण्याः पुरतो ऐं क्लीं सौः त्रिपुरेशीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इत्यवमृश्य, द्रीं इति सर्वविद्राविणीमुद्रां प्रदर्शयेत् ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

इति द्वितीयावरणम्

---

[1] 'देवी' इति (श्री) कोश एव दृश्यते.

तृतीयावरणम्

हकारप्रकृतिकाष्टमूर्त्यात्मकशिवाभिन्ने जपाकुसु[1]ममित्रे [2]अष्टपत्रे श्रीदेव्याः पृष्ठदळमारभ्य पूर्वादिदिक्षु आग्नेयादिविदिक्षु च क्रमात्—

ऐं ह्रीं श्रीं अनङ्गकुसुमादेवीश्रीपादुकां पूजयामि तर्पयामि नमः, अनङ्गमेखला, अनङ्गमदना, अनङ्गमदनातुरा, अनङ्गरेखादेवी, अनङ्गवेगिनी, अनङ्गाङ्कुशा, अनङ्गमालिनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

एताः गुप्ततरयोगिन्यः सर्वसङ्क्षो[3]भिणीचक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः संतर्पिताः सन्त्विति तासामेव समष्टयर्चनं विधाय अनङ्गकुसुमाया अग्रे ऐं ह्रीं श्रीं ह्रीं क्लीं सौः त्रिपुरसुन्दरीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इति संविभाव्य, क्लीं इति सर्वाकर्षिणीमुद्रां उन्मुद्रयेत् ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

इति तृतीयावरणम् ॥

चतुर्थावरणम्

ईकारप्रकृतिकचतुर्दशभुवनात्मकमहामायारूपे दाडिमीप्रसूनसहोदरे चतुर्दशारे देव्यग्रकोणमारभ्य वामावर्तेन—

ऐं ह्रीं श्रीं सर्वसङ्क्षोभिणी[4]श्रीपादुकां पूजयामि तर्पयामि नमः, सर्वविद्राविणी, सर्वाकर्षिणी, सर्वाह्लादिनी, सर्वसम्मोहिनी, सर्वस्तम्भिनी, सर्वजृम्भिणी, सर्ववशङ्करी, सर्वरञ्जिनी, सर्वोन्मादिनी, सर्वार्थसाधिनी, सर्वसम्पत्तिपूरणी, सर्वमन्त्रमयी, सर्वद्वन्द्वक्षयङ्करीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

[1] ममित्रे—अ. माभे—भ.
[2] अष्टदळे पत्रे—अ.
[3] भणे—अ, अ१, ब२, ब३, भ.
[4] अत्रत्यपर्यायेषु 'शक्ति' इत्यधिकः—श्री.

एताः सम्प्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः संतर्पिताः सन्त्विति तासामेव समष्टयर्चनं विधाय, सर्वसङ्क्षोभिण्याः पुरतः ऐं ह्रीं श्रीं हैं ह्क्लीं ह्सौः त्रिपुरवासिनीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः । ब्लूं इति सर्ववशङ्करीमुद्रां समुन्मीलयेत् ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥

इति चतुर्थावरणम् ॥

पञ्चमावरणम्

एकारप्रकृतिकदशावतारात्मकविष्णुस्वरूपे प्रभापराभूतसिन्दूरे बहिर्दशारे देव्यग्रकोणाद्यप्रादक्षिण्येन—

ऐं ह्रीं श्रीं सर्वसिद्धिप्रदा[1]श्रीपादुकां पूजयामि तर्पयामि नमः, सर्वसम्पत्प्रदा, सर्वप्रियङ्करी, सर्वमङ्गळकारिणी, सर्वकामप्रदा, सर्वदुःखविमोचिनी, सर्वमृत्युप्रशमनी, सर्वविघ्ननिवारिणी, सर्वाङ्गसुन्दरी, सर्वसौभाग्यदायिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

एताः कुलोत्तीर्णयोगिन्यः सर्वार्थसाधके चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः संतर्पिताः सन्त्विति तासामेव समष्टयर्चनं विधाय सर्वसिद्धि[2]प्रदाया धुरि ऐं ह्रीं श्रीं ह्सैं ह्स्क्लीं ह्स्सौः त्रिपुराश्रीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इति समभ्यर्च्य, सः इति उन्मादिनीमुद्रां उद्घाटयेत् ॥

[1] सर्वपर्यायेषु अत्र 'देवी' इत्यधिकः—श्री.

[2] प्रदायिन्याः पुरतः—अ.

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

इति पञ्चमावरणम्

षष्ठावरणम्

रेफप्रकृतिकदशकलाऽऽत्मकवैश्वानराभिन्ने जपासुमनस्सहचरे अन्तर्दशारे देव्यग्रकोणमारभ्य वामावर्तेन—

ऐं ह्रीं श्रीं सर्वज्ञा[1]श्रीपादुकां पूजयामि तर्पयामि नमः, सर्वशक्ति, सर्वैश्वर्यप्रदा, सर्वज्ञानमयी, सर्वव्याधिविनाशिनी, सर्वाधारस्वरूपा, सर्वपापहरा, सर्वानन्दमयी, सर्वरक्षास्वरूपिणी, सर्वेप्सितफलप्रदाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

एताः निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः संतर्पिताः सन्त्विति तासामेव समष्ट्यर्चनं विधाय, सर्वज्ञायाः पुरतः ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें त्रिपुरमालिनीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इत्यर्चयित्वा, क्रों इति सर्वमहाङ्कुशमुद्रां [2]अङ्कुरयेत् ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं षष्ठमावरणार्चनम् ॥

इति षष्ठावरणम्

---

[1] 'देवी' इत्यधिकः—श्री.

[2] अङ्कूरयेत्—अ१.

सप्तमावरणम्

ककारप्रकृतिकाष्टमूर्त्यात्मककामेश्वरस्वरूपे पद्मरागरुचिरे अष्टारे देव्यग्रकोणाद्यप्रादक्षिण्येन—

ऐं ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः ब्लूं वशिनीवाग्देवता[1]श्रीपादुकां पूजयामि तर्पयामि नमः, कं खं गं घं ङं क्ल्ह्रीं कामेश्वरी, चं छं जं झं ञं न्व्लीं मोदिनी, टं ठं डं ढं णं य्लूं विमला, तं थं दं धं नं ज्म्रीं अरुणा, पं फं बं भं मं ह्स्ल्व्यूं जयिनी, यं रं लं वं झ्म्र्यूं सर्वेश्वरी, शं षं सं हं ळं क्षं क्ष्म्रीं कौळिनीवाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः ॥

एताः रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादि कथितचरम् । वशिन्याः पुरतः ऐं ह्रीं श्रीं ह्रीं श्रीं सौः त्रिपुरासिद्धाचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इति सम्पूज्य ह्स्ख्फ्रें इति खेचरीमुद्रां उररीकुर्यात् ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥

इति सप्तमावरणम्

अष्टमावरणम्

महात्र्यश्रबाह्यतः पश्चिमादिदिक्षु प्रादक्षिण्येन—

ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः सर्वजम्भनेभ्यो बाणेभ्यो नमः बाणशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ धं सर्वसम्मोहनाय धनुषे नमः धनुश्शक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥

[1] 'देवी' इति पूर्ववत् अधिकः—श्री.

३ ह्रीं सर्ववशीकरणाय पाशाय नमः पाशशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ क्रों सर्वस्तम्भनाय अङ्कुशाय नमः अङ्कुशशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥

इत्यायुधार्चनं विधाय नादप्रकृतिकगुणत्रयप्रधानत्रिशक्तिरूपरेखात्र्यात्मके बन्धूकपुष्पबन्धुकिरणे त्रिकोणे अग्रदक्षवामकोणेषु बिन्दौ च क्रमेण—

ऐं ह्रीं श्रीं मूलप्रथमखण्डं कामेश्वर्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ मूलद्वितीयखण्डं वज्रेश्वर्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ मूलतृतीयखण्डं भगमालिन्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ मूलं ललिताऽम्बाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

एताः अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्रा इत्यादि स्पष्टम् । कामेश्वर्या अग्रे ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्ल्रीं ह्स्रौः त्रिपुराऽम्बाचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इत्यवमृश्य ३ ह्सौः इति सर्वबीजमुद्रां विनिर्दिशेत् ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम् ॥

इति अष्टमावरणम्

नवमावरणम्

बिन्द्वभिन्नपरब्रह्मात्मके बिन्दुचक्रे ऐं ह्रीं श्रीं मूलं ललिताऽम्बाश्रीपादुकां पूजयामि तर्पयामि नमः इति श्रीदेवीं पूजयेत् । ततः एषा परापररहस्ययोगिनी सर्वानन्दमये चक्रे समुद्रा ससिद्धिः सायुधा सशक्तिः सवाहना सपरिवारा सर्वोपचारैः सम्पूजिता संतर्पिताऽस्तु इत्यभ्यर्च्य, पुनः—ऐं ह्रीं श्रीं मूलं श्रीललितामहाचक्रेश्वरी-

श्रीपादुकां पूजयामि तर्पयामि नमः इत्यभिपूज्य ऐं इति योनिमुद्रां प्रदर्शयेत् । षोडश्युपासनायां तु ऐं इति त्रिखण्डामपि ॥

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् ॥

इति नवमावरणम् ॥

इयं नवावरणीपूजा अत्यावश्यकी । चतुराम्नायदेवताऽऽदिचतुस्समयदेवता-ऽन्तानां सपर्याऽपि तन्त्रान्तरोक्ता क्रियमाणा श्रेयस एव ॥

अथ पुनरपि श्रीदेव्यै पूर्ववत् धूपदीपौ कल्पयित्वा सङ्क्षोभिण्यादिमुद्राः सबीजाः प्रदर्श्य, मूलेन त्रिवारं सन्तर्प्य महानैवेद्यं समर्पयेत् । यथा—श्रीदेव्यग्रे चतुरश्रमण्डलं सामान्योदकेन विधाय तत्र आधारोपरि स्थापितं सौवर्णरौप्यकांस्यादि-स्थालीचषकभरितं भक्ष्यभोज्यचोष्यलेह्यपेयात्मकं सद्रव्यशुद्ध्यादिरसवद्व्यञ्जनमञ्जुळं प्राज्यकपिलाज्यं दधिदुग्धमुग्धं यथासम्भवं वा नैवेद्यं विधाय, ("स्विन्नं वामे आमं दक्षिणे निदध्यात्" इति श्यामारहस्ये दृष्टम् । सुन्दरीमहोदये तु— "देव्या वामे दीपो दक्षिणे नैवेद्यम्" इत्युक्तम्), ऐं ह्रीं श्रीं मूलेन त्रिः प्रोक्ष्य, वं इति धेनुमुद्रया अमृतीकृत्य, सप्तवारं मूलेनाभिमन्त्र्य, पूर्ववत् आपोशनं कल्पयित्वा,

हेमपात्रगतं देवि परमान्नं सुसंस्कृतम् ।
पञ्चधा षड्रसोपेतं गृहाण परमेश्वरि ॥

इति प्रार्थ्य, पूर्वोक्तनैवेद्योपचारमन्त्रेण निवेद्य, तत्तन्मुद्राविधानपूर्वकं पञ्चप्राणाहुतीः कल्पयेत् । यथा—

ऐं ह्रीं श्रीं ऐं प्राणाय स्वाहा, ३ क्लीं अपानाय स्वाहा, ३ सौः व्यानाय स्वाहा, ३ सौः उदानाय स्वाहा, ३ ऐं क्लीं सौः समानाय स्वाहा, ब्रह्मणे स्वाहा ॥

ततः—

ऐं ह्रीं श्रीं क ए ई ल ह्रीं नमः आत्मतत्त्वव्यापिनी ललिता तृप्यतु ॥
३ ह स क ह ल ह्रीं नमः विद्यातत्त्वव्यापिनी ललिता तृप्यतु ॥
३ स क ल ह्रीं नमः शिवतत्त्वव्यापिनी ललिता तृप्यतु ॥
ऐं ह्रीं श्रीं क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं
नमः सर्वतत्त्वव्यापिनी ललिता तृप्यतु ॥

इति निमीलितनयनः क्षणमवस्थाय, श्रीदेवीं भुक्तवतीं विभाव्य, पूर्ववत् उपचारमन्त्रैः पानीयोत्तरापोशनकरप्रक्षाळनगण्डूषपाद्यादि कल्पयित्वा, भोजनपात्रं नैर्ऋत्यां निरस्य, अस्त्रेण स्थलं संशोध्य, ततः पुनः प्राग्वदाचमनीयकर्पूरवीटिकादक्षिणाकर्पूरनीराजनानि दत्वा, सुवर्णादिभाजनलिखितं कुङ्कुमपङ्करेखाऽऽत्मकं अष्टदळकमलकर्णिकास्थापितमणिमयचषकपूरितं प्रथमं प्रज्वाल्य, पुष्पाक्षतैरभ्यर्च्य, उपचारमन्त्रपूर्वकं—

अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ।
त्रिधा दीपं परिभ्राम्य कुलदीपं निवेदये ॥

इति चतुर्दशधा नवधा त्रिधा वा परिभ्राम्य दक्षभागे स्थापयेत् ॥

मन्त्रपुष्पम्

अथ अञ्जलौ पुष्पाण्यादाय मन्त्रपुष्पम् । यथा—

शिवे शिवसुशीतळामृततरङ्गगन्धोल्लस-
न्नवावरणदेवते नवनवामृतस्यन्दिनि ।
गुरुक्रमपुरस्कृते गुणशरीरनित्योज्ज्वले
षडङ्गपरिवारिते कलित एष पुष्पाञ्जलिः ॥

इत्युक्त्वा पुष्पाञ्जलिं समर्पयेत् । इत्येते कतिचिच्चतुष्षष्टयुपचारातिरिक्ता उपचारास्तु पूर्ववत् धूपदीपेतिसूत्रगतेनादिपदेन गृह्यन्ते ॥

कामकलाध्यानम्

अथ बिन्दुना मुखं बिन्दुद्वयेन स्तनौ सपरार्धेन योनिरिति कामकलाऽऽत्मिकां ध्यात्वा, सौः इति देवीशक्तिबीजं श्रीदेव्या हृदयत्वेन भावयेत् ॥

होमस्य कृताकृतत्वम्

अथ होमः । स च "यद्यग्निकार्यसम्पत्तिः" इति सूत्रगतेन यदिशब्देन कृताकृतः सूचितः । तस्य च करणपक्षे तदितिकर्तव्यता होमप्रकरणे ज्ञातव्या । तत्र च महाव्याहृतिहोमादर्वागेव बलिदानम् । [1]होमाकरणपक्षे तु बलिदानमात्रम् ॥

बलिदानविधिः

यथा—देव्या दक्षभागे सामान्योदकेन त्रिकोणवृत्तचतुरश्रात्मकं मण्डलं परिकल्प्य, ३ ऐं व्यापकमण्डलाय नमः इति गन्धाक्षतैरभ्यर्च्य, अर्धभक्तपूरितोदकं सक्षीरादित्रयं पात्रं तत्र विन्यस्य, ३ ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा, इति मन्त्रं त्रिः पठित्वा दक्षकरार्पितं वामकरतत्त्वमुद्रास्पृष्टं सलिलं बल्युपरि दत्वा वामपार्ष्णिघातकरास्फोटौ कुर्वाणः समुदञ्चितवक्त्रो बाणमुद्रया बलिं भूतैः ग्रासितं विभाव्य प्रणमेत् ॥ इति बलिदानविधिः ॥

प्रदक्षिणाः

अजेशशक्तिगणपभास्कराणां क्रमादिमाः ।
वेदार्धचन्द्रवह्न्यद्रिसङ्ख्याः स्युः सर्वसिद्धये ॥

प्रदक्षिणनमस्कारानन्तरं जपप्रकरणे वक्ष्यमाणेन विधिना जपं निर्वर्त्य स्तुवीत—

स्तोत्रम्

ॐ गणेशग्रहनक्षत्रयोगिनीं राशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकां पीठरूपिणीम् ॥ १ ॥
प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहल्लोहलोल्लोलकलनाशमकारिणीम् ॥ २ ॥

[1] एतदितिकर्तव्यताविशिष्टहोमकरणाशक्तस्य लघुपक्ष उक्तो ज्ञानार्णवे—

सङ्कल्प्य परमेशानि नित्यहोमं समाचरेत् ।
मूलेन प्राणसहिता आहुतीः पञ्च होमयेत् ॥
षडाहुतीष्षडङ्गेन नित्यहोमः प्रकीर्तितः ।

इत्यधिकः (अ१)कोशे.

यदक्षरैकमात्रेऽपि संसिद्धे स्पर्धते नरः ।
रविताक्ष्येन्दुकन्दर्पशङ्करानलविष्णुभिः ॥ ३ ॥
यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥ ४ ॥
यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ॥ ५ ॥
यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ॥ ६ ॥
अकचादिटतोन्नद्धपयशाक्षरवर्गिणीम् ।
[1]ज्येष्ठाङ्गबाहुहृत्पृष्ठकटिपादनिवासिनीम् ॥ ७ ॥
तामीकाराक्षरोद्धारां सारात् सारां परात् पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥ ८ ॥
अद्यापि यस्या जानन्ति न मनागपि देवताः ।
केयं कस्मात् क्व केनेति सरूपारूपभावनाम् ॥ ९ ॥
वन्दे तामहम्[2]क्षय्यां क्षकाराक्षररूपिणीम् ।
देवीं कुलकलो[3]ल्लासप्रोल्लसन्तीं परां शिवाम् ॥ १० ॥
वर्गानुक्रमयोगेन यस्यां मात्रष्टकं स्थितम् ।
वन्दे तामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीम् ॥ ११ ॥
कामपूर्णजका[4]राख्यश्रीपीठान्तर्निवासिनीम् ।
चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ॥ १२ ॥

इति द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिकृत् ।
देव्यास्त्वखण्डरूपायाः स्तवनं तव [5]तथ्यतः ॥
भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं शिवे ॥

[1] ज्येष्ठाङ्गबाहुपादाग्रमध्यस्वान्तनिवासिनीम् इति पाठान्तरम्.
[2] क्षय्यक्ष—इति पाठान्तरम्.
[3] ल्लोलप्रो—इति पाठान्तरम्.
[4] राढ्य—इति पाठान्तरम्.
[5] तद्यतः—इति च पाठः

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥

पिता माता भ्राता गुरुरथ सुहृद्बान्धवजनः
प्रभुस्तीर्थं कर्माविकलमिह चामुत्र च हितम् ।
विशुद्धा विद्या वा पदमपि च तत्प्राप्यमसि मे
त्वमेव श्रीमातः स्वपिमि गतशङ्कः सुखतमः ॥

दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥

हे सद्रूपिणि हे चिदर्चिरुदये हे कामराजप्रिये
हे भण्डासुरहन्त्रि हेऽद्भुतनिधे हेऽनङ्गसञ्जीविनि ।
हे विश्वप्रसवित्रि हे सकरुणे हे दीनरक्षामणे
हे श्रीमल्ललिताऽम्ब हे परशिवे मां पाहि डिम्भं निजम् ॥

नमो हेमाद्रिस्थे शिवसति नमः श्रीपुरगते
नमः पद्माटव्यां कुतुकिनि [1]नमो रत्नगृहगे ।
नमः श्रीचक्रस्थेऽखिलमयि नमो बिन्दुनिलये
नमः कामेशाङ्कस्थितिमति नमस्तेऽम्ब ललिते ॥

जय जय जगदम्ब भक्तवश्ये जय जय सान्द्रकृपावशान्तरङ्गे ।
जय जय निखिलार्थदानशौण्डे जय जय हे ललिताम्ब चित्सुखाब्धे ॥

षडङ्गदेवता नित्या दिव्याद्योघत्रयीगुरून् ।
नमाम्यायुधदेवीश्च शक्तीश्चावरणस्थिताः ॥

पद्मवत्यम्बिकाऽधीनवामाङ्काय शिवात्मने ।
भासुरानन्दनाथाय मम श्रीगुरवे नमः ॥

[1] नमः सन्मणिगृहे—अ.

सुन्दर्यम्बासमाश्लेषसुखिताय नमो नमः ।
प्रकाशानन्दनाथाय गुरवे परमाय मे ॥
मिश्राम्बानयनोल्लासविश्रान्तमनसे नमः ।
आनन्दानन्दनाथाय गुरवे परमेष्ठिने ॥
यदिदं श्रीगुरुस्तोत्रं [1]स्वस्वरूपोपलक्षणम् ।
बालभावानुसारेण ममेदं हि विचेष्टितम् ।
मातृवात्सल्यसदृशं त्वया देवि विधीयताम् ॥

एवमादिभिः अन्याभिश्च यथाऽवकाशं स्तुतिभिः अखिललोकमातरमभिष्टूय, शक्तिं पूजयेत् ॥

सुवासिन्याः पूजनम्

यथा—प्राङ्निमन्त्रितां षोडशाब्दपरत आत्रिंशद्वर्षदेशीयां सुवासिनीमभ्यक्तां गौरीरूपिणीं लक्षण्यां दीक्षितां भक्तां अन्यैरप्युक्तगुणैरलङ्कृतां कुलाष्टकपरिगणितां अलाभे चातुर्वर्ण्यान्तर्गतां परकीयां शक्तिं स्वीयां वा समानीय प्रक्षाळितपादां आसने समुपवेशयेत् । सा चेददीक्षिता तदैष शोधनविधिः । ऐं ह्रीं श्रीं ऐं क्लीं सौः त्रिपुरायै नमः इमां शक्तिं पवित्रीकुरु मम शक्तिं कुरु स्वाहा । इत्यभिषेकमन्त्रपूर्वं सामान्यसलिलेन त्रिः शक्तिं प्रोक्ष्य, ३ ॐ,

शान्तिरस्तु शिवं चास्तु प्रणश्यत्वशुभं च यत् ।
यत एवागतं पापं तत्रैव प्रतिगच्छतु ॥

इत्युच्चार्य तस्याः कर्णे हृल्लेखां जपेत् । अथ तां देवीरूपां विभाव्य ऐं ह्रीं श्रीं ऐं क्लीं सौः शक्त्यै अमुकं कल्पयामि नम इति मन्त्रेण हरिद्राकुङ्कुमचन्दनपट्टवासःपुष्पधूपदीप-नैवेद्यताम्बूलानि दद्यात् । सति विभवे वसनाभरणादीनि च । ततो मूलेन वक्ष्यमाणेन समष्टिमन्त्रेण च क्रमेण श्रीदेव्यै आवरणदेवताभ्यश्च दत्तपुष्पाञ्जल्यास्तस्याः करे सोपादिममध्यममुद्राचुळुकमितक्षीरपात्रं समर्पयेत् । साऽप्युत्थाय तत्कपालमुद्रया

[1] स्वगुरोरुप—अ१.

समादाय, द्वितीयतृतीये च [1]दक्षकरेणादाय, पात्रं दक्षकरे निधाय, तत्त्वमुद्रागतद्वितीयशकलगृहीतैः क्षीरबिन्दुभिः शिरसि [2]श्रीगुरुपादुकामनुना त्रिरिष्ट्वा, हृदि च श्रीदेवीं त्रिः सन्तर्प्य मूलेन पुनः पात्रं वामकरे कृत्वोत्थाय, होष्यामीति श्रीगुरुज्येष्ठान्यतरानुज्ञां प्रार्थ्य, जुहुधीति तदनुज्ञया दक्षकरेण व्यवधाय, मूलान्ते सर्वतत्त्वं शोधयामि नमः स्वाहेति मन्त्रेण सर्वतत्त्वं शोधयेत् । [3]एतस्या ऐच्छिकानि विना मन्त्रं पात्रान्तराण्यपि दद्यात् । अथ पुनः कर्ता पूर्ववत् पात्रमादाय, ऐं ह्रीं श्रीं,

अळिपात्रमिदं तुभ्यं दीयते पिशितान्वितम् ।
स्वीकृत्य सुभगे देवि यशो देहि रिपून् दह ॥

इति मन्त्रेण शक्त्यै समर्पयेत् । साऽपि तत्सावशेषं स्वीकृत्य, ऐं ह्रीं श्रीं,

वत्स तुभ्यं मया दत्तं पीतशेषं कुलामृतम् ।
त्वच्छत्रून् संहरिष्यामि तवाभीष्टं ददाम्यहम् ॥

इति मन्त्रेण प्रतिदद्यात् । साधकस्तंदुररीकृत्य शक्तिं चतुष्टयेन भोजयित्वा समर्पितताम्बूलो यथाविधि तां पञ्चमेनापि सन्तोष्य विसृजेत् ॥ इति सुवासिनीपूजा ॥

तत्त्वशोधनम

अथ सन्निहिते गुरौ तं पादुकामन्त्रेणाभिपूज्य पात्राणि समर्प्य समाहूतैः शिष्यैः बृन्दात्मना अवस्थितैः सामयिकैः साकं पाणी प्रक्षाळ्य, श्रीदेव्यै मूलेनोपचारमन्त्रेण च त्रिः पुष्पाञ्जलिं समर्प्य, ३ समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापरातिरहस्ययोगिनीश्रीपादुकाभ्यो नम इति समष्टिमन्त्रेण आवरणदेवतानां एकं पुष्पाञ्जलिं दत्वा, पूर्ववत् पात्रं पुनःपुनरादायाचमनोक्तैः मन्त्रैः तत्त्वानि शोधयेत् । यथा—

ऐं ह्रीं श्रीं क ए ई ल ह्रीं आत्मतत्त्वं शोधयामि नमः स्वाहा ॥
३ ह स क ह ल ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा ॥
३ स क ल ह्रीं शिवतत्त्वं शोधयामि नमः स्वाहा ॥

[1] 'दक्ष' इत्येतत् 'वाम' इति शोधितम्—अ१.

[2] श्रीगुरुं पादुका—भ, श्रीगुरुपादुकां तन्मनुना—अ.

[3] अदीक्षितायास्तु बालयैव—इत्यधिकः (अ) कोशे.

षोडश्युपासकस्य तु त्रयोदशबीजपुटितैः प्रत्येकखण्डैः तत्त्वत्रयशोधनं सर्वेण मूलेन सर्वतत्त्वशोधनं च विशेषः ॥

अत्र प्रथमपात्रस्वीकार एवोत्थानम् । यथासम्प्रदायं सर्वपात्रस्वीकारोऽपि । स्त्रीणां तूत्थायैव । अत्र च बालोपास्तावेकं पात्रं सर्वतत्त्वशोधनम् । पञ्चदश्युपासनायां तु पात्रत्रयम् । श्रीषोडशाक्षर्युपास्तौ तु तच्चतुष्टयम् । निवृत्ते पूर्णाभिषेके तत्पञ्चकं, यथाऽधिकारमैच्छिकानि वा । विश्वस्तायाः कुमार्याः सुवासिन्याश्चैकं पात्रमिति विवेकः ॥

किं च श्रीगुरोस्तच्छक्तिसुतज्येष्ठकनिष्ठानां स्वज्येष्ठस्य [1]सामयिकानां स्त्रीणां चोच्छिष्टं द्रव्याद्युपादेयम् । तेभ्यस्तु न देयम् । स्वकनिष्ठशिष्ययोस्तु प्रदेयम् । वीराणां तूच्छिष्टं चर्वणमात्रमादेयम् ॥

उल्लासास्तु—आरम्भतरुणयौवनप्रौढतदन्तोन्मनानवस्थाऽऽख्याः सप्त । तेष्व- र्घ्यसंशोधनमारम्भः । तरुणयौवनप्रौढेषु सपर्याविधिः । ततो देवताविसर्जनम् । अवशिष्टं अवस्थात्रयं सिद्धानां वीराणां न तु साधकानां इति तत्त्वम् । इति हविःप्रतिपत्तिः ॥

देवतोद्वासनम्

ततः सामान्योदकात् किञ्चिदादाय—

साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ।
तत् सर्वं कृपया देवि गृहाणाराधनं मम ॥

इति देव्या वामहस्ते पूजां समर्प्य शङ्खमुद्धृत्य देव्युपरि त्रिः परिभ्राम्य तज्जलं हस्ते समादाय सामयिकानात्मानं च मूलेन प्रोक्ष्य शङ्खं प्रक्षाल्य निदध्यात् । ततो मूलेन तीर्थनिर्माल्ये स्वीकृत्य,

ज्ञानतोऽज्ञानतो वाऽपि यन्मयाऽऽचरितं शिवे ।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि ॥

इति क्षमाप्य सर्वासामावरणदेवतानां श्रीदेव्यङ्गे विलयं विभाव्य, खेचरीं बद्ध्वोद्वास्य, तेजोरूपेण परिणतां श्रीदेवीं पूर्ववत् हृदयं नीत्वा तत्र च मूर्तिं पञ्चधा उपचर्य पुनरात्माभिन्नसंविद्रूपेण विभावयेत् । इति विसर्जनम् ॥ ततः—

[1] सामयिकीनां—अ१, ब२, ब३.

शान्तिस्तवः

सम्पूजकानां परिपालकानां यतेन्द्रियाणां च तपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञां करोतु शान्तिं भगवान् कुलेशः ॥
नन्दन्तु साधककुलान्यणिमाऽऽदिसिद्धाः
शापाः पतन्तु समयद्विषि योगिनीनाम् ।
सा शाम्भवी स्फुरतु काऽपि ममाऽप्यवस्था
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम् ॥
शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यतु ॥

इत्यादिशान्तिश्लोकान् पठित्वा,

विशेषार्घ्यविसर्जनम्

विशेषार्घ्यपात्रं मूलेन आमस्तकमुद्धृत्य तत् क्षीरं पात्रान्तरेणादाय—

आर्द्रं ज्वलति ज्योतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा ॥

इति मन्त्रेण आत्मनः कुण्डलिन्यग्नौ हुत्वा शेषं प्रियशिष्याय दत्वा तत्पात्रमन्यानि च हविश्शेषप्रतिपत्तिपात्राणि प्रक्षाळ्य अग्नौ प्रताप्य अवस्थापयेत् ॥

अथ यथाशक्ति ब्राह्मणान् सुवासिनीश्च भोजयित्वा, स्वयमपि भुञ्जीत ॥ इति नित्यक्रमविधिः ॥

अयं च नित्यक्रमः सूतकेऽपि कर्तव्यः । अत्र वचनानि श्यामाक्रमे लिखितानि । तत्र च सकामैर्मनसा, निष्कामैर्यथोक्तमिति विशेषः । बालवृद्धस्त्रीमूढैः यथाप्रज्ञं कृता सपर्या [1]दौर्बोधीत्युच्यते ।

स्वयं सम्पाद्य सर्वाणि श्रद्धया साधनानि यः ।
पूजयेत् तत्परो देवीं स लभेताखिलं फलम् ॥

[1] दौर्बोधिन्युच्यते—अ१.

पूजनेन फलार्धं स्यादन्यदत्तैस्तु साधनैः ।
यथाकथंचिद्देव्यर्चा विधेया श्रद्धयाऽन्वितैः ॥

पक्षान्तराणि च—

अशक्तः कारयेत् पूजां दद्याद्वाऽर्चनसाधनम् ।
दानाशक्तः सपर्याऽन्तं पश्येत्तत्परमानसः ॥

इति कल्पसूत्रप्रकारः परदेवतायाः नित्यक्रमविधिः समाप्तः ॥

सङ्क्षेपार्चाविधिः

नित्यक्रमो मुख्यालाभे प्रतिनिधिनाऽपि निर्वर्त्यः । तत्र प्रथमस्य प्रतिनिधिः —तक्रं दधि वा गुडमिश्रं, ससैन्धवं पयः, क्षौद्रं गव्यं सर्पिः क्षीरं वा ताम्रपात्रगतं, तिलाः शर्करा वा सलिलमिश्राः, तैलं आरनाळं कांस्यपात्रस्थं तप्तं वा नारिकेळोदकं च । अथ द्वितीयस्य मूलकम् । तृतीयस्य तु लवणार्द्रकपिण्याकनागरगोधूमविकार-माषलशुनानि । चतुर्थं तु मुख्यमेव । पञ्चमस्यापराजितापुष्पं करवीरकुसुमं वेति । एतन्मिश्रणं तु सूत्रकारेण अनुपात्तम् । डामरे तु—

मांसानुकल्पोऽपूपः स्यान्मत्स्यस्य च कदळ्यपि ।
मैथुनस्य कळत्रे स्वे तदलाभे तु यन्नतः ॥

पाठान्तरम्—

द्वितीयस्य त्वपूपः स्यात्तृतीयस्य कदळ्यपि ।
पञ्चमस्य कळत्रे स्वे तदलाभे तु यन्नतः ॥ इति ॥

नित्यक्रमस्य प्रमादादिना अतिक्रमे मूलशतजपः प्रायश्चित्तमाम्नातम् । नित्यनैमित्तिकौ च क्रमौ सुतशिष्यादिभिरपि कारयितुं शक्यते ॥

सङ्क्षेपार्चनानि

तानि च विस्तराशक्तानां राजवनिताऽऽदीनां राज्यक्षोभदुर्भिक्षज्वराद्यापत्सु च कर्तव्यानि । तत्र चतुर्दशाराद्यावरणषट्कसमर्चनं कुर्यादित्येकः पक्षः । ([1]क्रमो

[1] इदं वाक्यं नास्ति केषुचित्कोशेषु.

निर्वर्त्यः ।) अष्टाराद्यावृतित्रयसपर्येति द्वितीयः । आयुधार्चनसहितकामेश्वर्यादिचतुष्टयार्हणं तृतीय इति । पक्षान्तराणि च—

अशक्तः कारयेत् पूजां दद्याद्वाऽर्चनसाधनम् ।
दानाशक्तः सपर्याऽन्तं पश्येत्तत्परमानसः ॥ इति ॥

अनापदि तु कृतान्येतान्यनिष्टापादकानि ॥

क्रत्वर्थनियमः

कृष्णाष्टमीतच्चतुर्दश्यमापूर्णिमासङ्क्रान्तिसंज्ञेषु पर्वसु पञ्चसु सविशेषैः साधनैः आराधयेत् । तत्प्रकारस्तु नैमित्तिकप्रकरणे वक्ष्यते । नित्यनैमित्तिकक्रमौ च शिष्यसुतादिभिरपि कारयितुं शक्येते ॥

श्रीललितोपासको नेक्षुखण्डं भक्षयेत् । न दिवा स्मरेद्वार्तालीम् । न जुगुप्सेत सिद्धद्रव्याणि । न कुर्यात् स्त्रीषु निष्ठुरताम् । वीरस्त्रियं न गच्छेत् । न तं हन्यात् । न तद्द्रव्यमपहरेत् । नात्मेच्छया मपञ्चकमुररीकुर्यात् । कुलभ्रष्टैः सह नासीत । न बहु प्रलपेत् । योषितं सम्भाषमाणामप्रतिसम्भाषमाणो न गच्छेत् । कुलपुस्तकानि गोपायेत् ॥ एते क्रत्वर्थनियमाः अकरणे क्रतुवैगुण्यापादकाः साधकेन अवश्यमनुष्ठेयाः । अन्यांश्च दीक्षाक्रमोक्तान् सामयिकानामाचारान् अनुतिष्ठेत् । अनिशमात्मानं कामकलाऽऽत्मकं श्रीदेवीरूपं भावयेत् । एवं वर्तमानस्य कुलनिष्ठस्य सर्वतः कृतकृत्यता । शरीरविमोके च श्वपचगृहकाश्योर्नान्तरम् । स एव जीवन्मुक्तः सुखी विहरेदिति ॥

श्रीचक्रलेखनोपायः

अथ प्राक्सूचितः श्रीचक्रलेखनप्रकारः सुबोधतमो लिख्यते ॥

अत्रेयं परिभाषा—ईशानाद्याग्नेय्यन्ता वायव्यादिनैर्ऋत्यन्ता वा रेखा तिर्यग्रेखेत्युच्यते । तस्या एवाग्रद्वयादाकृष्टे प्रतीच्यां प्राच्यां वा मेळिते च पार्श्वरेखे इत्युच्यते । रेखोपरि रेखाऽन्तरस्यारोहे तयोर्योगस्थानं सन्धिः । ईदृशः रेखात्रययोगो मर्म । साधको यदाशाऽभिमुखः सैव प्राची । तदितरा प्रतीची । प्रत्यगग्रं त्रिकोणं शक्तिः । प्रागग्रं तु शिवो वह्निश्चेत्युच्यते इति ॥

प्रथमं ईशानाद्याग्नेयान्त-तदादिवारुण्यन्त-तदादीशानान्तां रेखामभिलिख्य शक्तिं निष्पादयेत् । इदं मध्यत्रिकोणं भवति । यन्मध्यं हि बिन्दुस्थानमामनन्ति । अथास्य मध्यतः पार्श्वरेखाद्वयनिर्भेदपूर्वकं प्राग्वच्छक्त्यन्तरं कल्पयेत् । अत्र सन्धिद्वयं जायते । ततो द्वितीयशक्तिमध्यतः तत्पार्श्वरेखाद्वयं निर्भिद्य च तां प्रथमशक्त्यग्रसंलग्नां तिर्यग्रेखामालिख्य तदग्राकृष्टाभ्यां पक्षरेखाभ्यां सन्धिद्वयभेदचणं शिवत्रिकोणं कुर्यात् । एतावता अष्टकोणं सम्पद्यते । एतदेव मध्यत्रिकोणेन सह नवयोनिचक्रमिति कीर्त्यते । इह सन्धयः षट् मर्मणी द्वे च सिध्यन्ति । अथ प्राचीं तिर्यग्रेखामुभयतोऽप्यभिवर्ध्य तदग्राकृष्टाभ्यां प्रथमवह्निपक्षकोणाग्रसंलग्नाभ्यां पार्श्वरेखाभ्यां शक्तिं जनयेत् । एवं प्रतीचीं तिर्यग्रेखामुभयतोऽप्यभिवर्ध्य तदग्राकृष्टाभ्यां प्रथमशक्तिपक्षकोणाग्रस्पृष्टाभ्यां पार्श्वरेखाभ्यां शिवं साधयेत् । ततो मध्यत्रिकोणपार्श्वरेखे ऐशान्यामाग्नेय्यां चाभिवर्ध्य तदग्रयोः प्रथमलिखितवह्न्यग्रे च संसक्तां तिर्यग्रेखामालिखेत् । एवं प्रथमलिखितवह्नेरपि पार्श्वरेखे अभिवर्ध्य तदग्रयोः द्वितीयशक्त्यग्रे च संसक्तां तिर्यग्रेखां विलिखेत् । तदिदमन्तर्दशारं भवति । अत्र मर्माणि षट् सन्धयो द्वादश च निष्पद्यन्ते । अथ विद्यमानासु पञ्चसु तिर्यग्रेखासु प्रथमां चरमां च उभयतोऽप्यभिवर्ध्य तत्तदग्राकृष्टाभिः पार्श्वरेखाभिः तृतीयशक्तिपक्षकोणशिखावर्जं इतरकोणाष्टकाग्रस्पर्शिनौ शक्तिशिवौ समुत्पादयेत् । ततः प्रथमवर्धिता मध्यशक्तिप्रथमवह्निपार्श्वरेखास्तत्तद्दिदिक्षु संवर्ध्य तत्तदग्राकृष्टे अन्तर्दशारीयप्राक्प्रत्यक्कोणशिखासम्पृक्ते रेखे समालिखेत् । तदेतद्बहिर्दशारं भण्यते । इह मर्माणि दश सन्धयोऽष्टादश चोन्मीलन्ति । अथ सप्तसु तिर्यग्रेखासु षष्ठद्वितीये पूर्वसंवर्धित एव रेखे उभयतः संवर्ध्य तत्तदग्राकृष्टाभिः बहिर्दशारस्य प्राक्प्रत्यक्किलकोणशिखरसंसर्गवर्जमितरकोणाष्टकशिखरसम्पृक्ताभिः पार्श्वरेखाभिः शक्तिं शिवं च समुन्मीलयेत् । ततश्चतुर्थशक्तिपार्श्वरेखे सर्वप्राचीनां तिर्यग्रेखां चोभयतोऽप्य-भिवर्ध्य मेळयेत् । एवं तृतीयवह्निपार्श्वरेखे सर्वप्रतीच्यां तिर्यग्रेखां चोभयतस्संवर्ध्य मेलयेत् । ततः प्रथमशक्तिप्रथमशिवयोः पार्श्वरेखे द्वे तत्तद्दिदिक्षु समभिवर्ध्य तत्तदग्रतश्चतुर्थशक्तितृतीयशिवशिखरचुम्बितिर्यग्रेखायुगळमालिखेत् । तदिदं चतुर्दशारं भवति । अत्र मर्माणि अष्टादश, सन्धयः चतुर्विंशतिः, शक्तयः पञ्च, वह्नयश्चत्वारः, पार्श्वयोः डमरवोऽष्टौ, त्रिकोणानि च संहत्य त्रिचत्वारिंशत् सम्पद्यन्ते । अथास्य परितः कर्णिकावृत्तं विलिख्य तत्संसक्तान्यसन्धीनि दळान्यष्टौ

कल्पयेत् । तदिदमष्टदळमिति व्यवह्रियते । असन्धित्वं नाम केसराभाववत्त्वम्, श्रीचक्रराजे केसरनिषेधदर्शनात् । अथ तदभितः पुनःकर्णिकावृत्तं निष्पाद्याऽसन्धीनि पत्राणि षोडश निर्मिमीत । तदिदं षोडशदळं सञ्चक्षते । अथ तद्बहिर्मर्यादावृत्तत्रयं परिकल्प्य तत्परितः चतुरश्ररेखात्रयेण चतुर्द्वारं भूपुरं समुद्भावयेत् ॥ इति श्रीचक्र-लेखनप्रकारः ॥

श्रीचक्रप्रस्तारभेदाः

एतत्प्रतिष्ठापनमन्त्रः प्रागुक्त एव। सुवर्णादिनिर्मितस्य यन्त्रस्य तु द्वौ प्रस्तारौ— भौमो, मैरवश्चेति । तत्र पलद्वयपरिमाणे चतुरङ्गुलविस्तृतपट्टे ऊर्ध्वरेखाऽऽत्मको बिन्द्वादिभूपुरान्तरचनाक्रमो भूप्रस्तारः । मैरवप्रस्तारस्त्रिविधः । तत्र भूपुरमारभ्य चक्रत्रिकत्रिकं सृष्टिस्थितिसंहारपदैः व्यपदिश्यते । तेषु सृष्टिचक्रात् स्थितिचक्रमुन्नतम्। ततोऽपि संहारचक्रमुच्छ्रितम् । इत्येकः पक्षः । भूपुरात् पद्मद्वयमुन्नतम् । तस्मात् चतुर्दशारादिषट्कं उदग्रमिति द्वितीयः । भूपुरादिबिन्द्वन्तानि नवापि चक्राणि पूर्वपूर्वस्मादुत्तरोत्तरं उन्नतानीति तृतीयः । अत्र—

चतुरश्रं समारभ्य नवचक्राण्यनुक्रमात् ।
उन्नतोन्नतमामध्याच्चक्रं स्यान्निधनेधनम् ॥ इति ॥

चरमपक्षप्रतिपादके तन्त्रराजवचनगते "निधनेधनं" इति पदे "उरसिलोम" इत्यादिवत् व्यधिकरणबहुव्रीहिः । चरमे वयसि धनप्राप्तिरित्यर्थः । सम्पदनुभव-दशायामेव निधनमाप्नोति न तु तद्ह्रासकाले इति यावत् । प्राञ्चस्तु धनलाभोत्तरं निधनं भवतीति सप्तमीद्वितीययोः व्यत्ययं विधाय निन्दापरतया व्याचक्षते । तत्र मूलं त एव जानत इति दिक् ॥

श्रीचक्रप्रतिष्ठापनविधिः

दीक्षाप्रकरणोक्ते शुभे दिवसे कृताह्निकः साधको गणपतिमाराध्य ब्राह्मणैः स्वस्ति वाचयित्वा आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य अमुकगोत्रोऽमुकशर्म-वर्मादिरहं महात्रिपुरसुन्दरीमाराधयिष्यन् श्रीचक्रराजप्रतिष्ठापनं करिष्य इति सङ्कल्प्य

दुग्धदधिघृतशकृन्मूत्रात्मकं पञ्चगव्यमानीय सम्मिश्र्य हौं इति मन्त्रेण अष्टोत्तरशतवारानभिमन्त्र्य तत्र प्रणवेन यन्त्रं निक्षिप्य तत उद्धृत्य पात्रान्तरे निधाय, मिश्रितेन गोदुग्धदधिघृतमधुशर्कराऽऽत्मकेन पञ्चामृतेन संस्नाप्य धूपयेत् । अथ प्रत्येकं दुग्धादिभिः क्रमेण अन्तरान्तरा धूपनपूर्वकं स्नपयित्वा पुनर्मिश्रितैश्च तैः स्नपयेत् । ततोऽष्टासु दिक्षु शालितण्डुलपुञ्जोपरि निहितैः नूतनवसनवेष्टितैः गन्धपुष्पार्चितैः कुङ्कुमरोचनाचन्दनकस्तूरीसुरभिळशीतळसलिलपूर्णैः कुशाग्रेण स्पृष्ट्वा मूलेनाष्टोत्तरशतवारानभिमन्त्रितैः सौवर्णादिमार्त्तिकान्तान्यतमैरष्टभिः कलशैरभिषिञ्चेत् । इह सर्वमपि पञ्चगव्यादिकं स्नानं मूलमन्त्रकरणकमेव । अथ यन्त्रं धौतेन वाससा परिमृज्य पीठे निधाय कुशाग्रैः स्पृशन्—ऐं ह्रीं श्रीं ॐ यन्त्रराजाय विद्महे महायन्त्राय धीमहि । तन्नो यन्त्रः प्रचोदयात् ॥ इति—यन्त्रगायत्रीं अष्टोत्तरशतवारानावर्त्य आत्मनो भूतशुद्ध्यादिमातृकान्यासान्तं कृत्वा यन्त्रं करेण संस्पृश्य प्राणप्रतिष्ठां कुर्यात् । यथा—

अस्य श्रीयन्त्रराजप्राणप्रतिष्ठामहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामाथर्वाणि छन्दांसि । चैतन्यं देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । मम श्रीचक्रप्राणप्रतिष्ठायै जपे विनियोगः ॥

ऐं ह्रीं श्रीं अं कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने आं अंगुष्ठाभ्यां नमः ॥

३ इं चं छं जं झं ञं शब्दस्पर्शरूपरसगन्धात्मने ईं तर्जनीभ्यां नमः ॥

३ उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां नमः ॥

३ एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः ॥

३ ॐ पं फं बं भं मं वचनादानविहरणविसर्गानन्दात्मने औं कनिष्ठिकाभ्यां नमः ॥

३ अं यं रं लं वं शं षं सं हं ळं क्षं मनोबुद्ध्यहङ्कारचित्तान्तःकरणात्मने अः करतलकरपृष्ठाभ्यां नमः ॥

एवं हृदयादिन्यासः ॥

ध्यानम्—

रक्ताम्बोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमळिगुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणाऽसृक्कपालं त्रिणयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

ऐं ह्रीं श्रीं ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हं सः श्रीचक्रस्य प्राणाः इह प्राणाः ॥

३ ॐ . . . सः श्रीचक्रस्य जीव इह स्थितः ॥

३ ॐ . . . सः श्रीचक्रस्य सर्वेन्द्रियाणि ॥

३ ॐ . . . सः श्रीचक्रस्य वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ इति ॥

यन्त्रान्तरप्राणप्रतिष्ठायां तत्तन्नाम्नः ऊहःकार्यः । अथ तत्र श्रीक्रमोक्तेन विधिना देवीमावाह्य अभ्यर्च्य यन्त्रं कुशाग्रैः स्पृशन् मूलमष्टोत्तरं सहस्रं शतं वा वारानावर्त्य होमप्रकरणोक्तेन क्रमेण अष्टोत्तरशतमाज्याहुतीः मूलेन हुत्वा सम्पाताज्यं मध्ये मध्ये यन्त्रे अवनीय सव्यञ्जनेन अन्नेन सर्वभूतबलिं प्रदाय होमशेषं समाप्य गुरवे सुवर्णशृङ्गालङ्कृतां गां वसनाभरणानि च प्रदाय देवीमुद्वास्य कुमारीं योगिनीं ब्राह्मणांश्च भोजयेत् । इमां च यन्त्रप्रतिष्ठां गुर्वादिना वा कारयेत् ॥ इति वामकेश्वरतन्त्रीयो यन्त्रप्रतिष्ठापनविधिः ॥

यन्त्रभेदेन अर्चनकालावधिः

सौवर्णे यावज्जीवं, रौप्ये द्वाविंशतिवत्सराः, ताम्रे द्वादश, भूर्जपत्रे लिखिते तु षट् । एतेषां उक्तकालातिक्रमे पुनः प्रतिष्ठा । स्फटिकादौ तु सकृदेव प्रतिष्ठापनं सर्वदा पुरुषपरम्परयाऽभ्यर्चनं चेति । यन्त्रस्य श्वचण्डालाद्यस्पृश्यस्पर्शाद्युपघाते पुनः प्रतिष्ठापनम् । प्रमादादिना यन्त्रे दग्धे स्फुटिते नष्टे चोराद्यपहृते वा एकदिनोपवासं अयुतमूलमन्त्रजपं तद्दशांशं होमादिकं च कृत्वा पुनर्यन्त्रान्तरं प्रतिष्ठापयेत् । लुप्तचिह्नस्फुटितार्धदग्धादींस्तु तीर्थोदके निक्षिपेत् ॥ इति ॥

श्रीचक्रमहिमा

श्रीचक्राभिषेकोदकेन शिरःप्रोक्षणं पानं च ब्रह्माण्डोदरगतगङ्गाऽऽदितीर्थसहस्रस्नानकोटिफलदम् । श्रीचक्रदर्शिनस्तु—

सम्यक् शतक्रतून् कृत्वा यत्फलं समवाप्नुयात् ।
तत्फलं लभते कृत्वा भक्त्या श्रीचक्रदर्शनम् ॥

इति वचनादुक्तं फलं भवति । इत्यलं विस्तरेणेति शिवम् ॥

सपर्याप्रकरणं द्वितीयं समाप्तम्

होमप्रकरणम्

तत्र पूजामण्टपस्य ईशानभागे चतुरश्रकुण्डं अथवा हस्तायाममङ्गुष्ठोन्नतं स्थण्डिलं कृत्वा, सामान्यार्घ्योदकेन प्रोक्ष्य, उदक्संस्थाः प्राचीस्तिस्रो रेखाः तदुपरि प्राक्संस्था उदीचीश्च लिखित्वा तासु रेखासु क्रमेण—

ऐं ह्रीं श्रीं ऐं क्लीं सौः ब्रह्मणे नमः, यमाय, सोमाय, रुद्राय, विष्णवे, इन्द्राय नमः ॥

इति गन्धाक्षतपुष्पैरभ्यर्च्य

ऐं ह्रीं श्रीं सहस्रार्चिषे हृदयाय नमः, स्वस्तिपूर्णाय शिरसे स्वाहा, उत्तिष्ठपुरुषाय शिखायै वषट्, धूमव्यापिने कवचाय हुम्, सप्तजिह्वाय नेत्रत्रयाय वौषट्, धनुर्धराय अस्त्राय फट् ॥

इति स्वाङ्गेषु षडङ्गं न्यसेत् । तेनैव षडङ्गेन अग्नीशासुरवायव्येषु मध्ये दिक्षु च कुण्डमभ्यर्च्य तत्र अष्टकोणषट्कोणत्रिकोणात्मकमग्निचक्रं प्रवेशरीत्या विलिख्य त्रिकोणे दिगष्टकं विभाव्य तत्र स्वाग्रादिप्रादक्षिण्येन दिक्षु मध्ये च क्रमात्—

ऐं ह्रीं श्रीं पीतायै नमः, श्वेतायै, अरुणायै, कृष्णायै, धूम्रायै, तीव्रायै, स्फुलिङ्गिन्यै, रुचिरायै, ज्वालिन्यै नमः ॥

इति पीठशक्तीः समर्च्य, पीठमध्य एव—

ऐं ह्रीं श्रीं तं तमसे नमः, रं रजसे, सं सत्वाय, आं आत्मने, अं अन्तरात्मने, पं परमात्मने, ज्ञं ज्ञानात्मने नमः ॥

इत्युपर्युपरि पूजयेत् । ततः तत्र त्रिकोणे ऐं ह्रीं श्रीं ह्रीं वागीश्वरीवागीश्वराभ्यां नमः इति मन्त्रेण जनिष्यमाणस्य वह्नेः पितरौ वागीश्वरीवागीश्वरौ सम्पूज्य, तयोर्मिथुनीभावं भावयित्वा, अरणेः सूर्यकान्ताद्वा वह्निमुत्पाद्य द्विजगृहाद्वा आनीय मृत्पात्रे ताम्रपात्रे वा अग्निं आग्नेय्यां नैर्ऋत्यां वा दिशि निधाय, तस्मात्क्रव्यादांशमेकमग्निशकलं नैर्ऋत्यां निरस्य मूलेन निरीक्षणप्रोक्षणे अस्त्रेण कुशैः ताडनमवकुण्ठनामृतीकरणे चेत्येतैः विशोध्य, ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहेति मूलाधारोद्गतं संविदग्निं ललाटनेत्रद्वारा निर्गमय्य तं बाह्याग्नियुक्तं वागीश्वर-बीजस्य वागीश्वरीयोन्यां प्रवेशबुद्ध्या वह्निचक्रे पातयेत् । ततः कवचाय हुं इति मन्त्रेण इन्धनैः आच्छाद्य,

ऐं ह्रीं श्रीं अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णमनलं समिद्धं विश्वतोमुखम् ॥

इत्युपस्थाय, ३ उत्तिष्ठ पुरुष हरितपिङ्गल लोहिताक्ष सर्वकर्माणि साधय मे देहि दापय स्वाहा इति वह्निमुत्थाप्य, ३ चितिपिङ्गळ हन हन दह दह पच पच सर्वज्ञ आज्ञापय स्वाहा इति प्रज्वाल्य, वागीश्वरीगर्भे धृतं ध्यात्वा, ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं नमः अस्य होमाग्नेः पुंसवनकर्म कल्पयामि नमः । तथा अस्य होमाग्नेः सीमन्तकर्म, जातकर्म, श्रीललिताग्निरिति नाम्ना नामकरणकर्म कल्पयामि नमः । एवं तत्तत्क्रमेषु वह्नेः तत्तद्देवतानाम योज्यम् । अस्य होमाग्नेरितिपदस्य एतावत्पर्यन्तमनुवृत्तिः, इतः परं ललिताऽग्नेरिति । ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं नमः श्रीललिताऽग्नेः अन्नप्राशनकर्म कल्पयामि नमः, चौळकर्म, उपनयनकर्म, गोदानकर्म, विवाहकर्म कल्पयामि नमः । इति तत्तत्कर्माणि भावनया विदध्यात् । ततः सामान्यजलेन परिषेचनम्, प्रागग्रैरुदगग्रैश्च कुशैः परिस्तरणम्, त्रिभिः परिधिभिः प्राग्वर्जं परिधानं च कृत्वा,

त्रिणयनमरुणजटाबद्धमौळिं सशुक्लां-
शुकमरुणमनेकाकल्पमम्भोजसंस्थम्।
अभिमतवरशक्तिं स्वस्तिकाभीतिहस्तं
नमत कनकमालालङ्कृतांसं कृशानुम् ॥

इति ध्यायेत् ॥

शारदातिलके—

वैश्वानरं स्थितं ध्यायेत् समिद्धोमेषु देशिकः ।
शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु ॥

इति ध्यानविशेष उक्तः । अथाष्टकोणे स्वाग्रादिप्रादक्षिण्येन—

ऐं ह्रीं श्रीं जातवेदसे नमः, सप्तजिह्वाय, हव्यवाहनाय, अश्वोदराय, वैश्वानराय, कौमारतेजसे, विश्वमुखाय, देवमुखाय नमः ॥

इति षट्कोणे च पूर्ववत् षडङ्गं अभिपूज्य, त्रिकोणे—ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति मन्त्रेण—अग्निमर्चयेत् । अथाज्यं मूलेन सप्तवारं अभिमन्त्रणेन संशोध्य पुरतो दर्भेषु निधाय स्रुवं च मूलेन प्रक्षाळ्य तदुत्तरतो निवेश्य अग्निं पुष्पाक्षतैः अलङ्कृत्य स्रुवेण आज्यमादाय,

ऐं ह्रीं श्रीं हिरण्यायै नमः स्वाहा । हिरण्याया इदं न मम ॥
कनकायै, रक्तायै, कृष्णायै, सुप्रभायै, अतिरक्तायै, बहुरूपायै, नमः स्वाहा ।
बहुरूपाया इदं न मम ॥

इति अग्नेः सप्तजिह्वासु एकैकामाज्याहुतिं कुर्यात् नमोऽन्ताम् । पादुकाऽन्तानिति सूत्रं तु प्रकरणान्तरमन्त्रान्तिमनमःपदापोहकं न तु वह्निजिह्वामन्त्रनमसः, अन्यत्र विनियोगादर्शनात् । जिह्वास्थानानि तु—

रुद्रेन्द्रवह्निमांसादवरुणानिलदिग्गताः ।
हिरण्याद्याः क्रमान्मध्ये बहुरूपा व्यवस्थिता ॥ इति ॥
बहुरूपाऽऽख्यजिह्वायां होमः सर्वार्थसाधकः ।
इतरासु हुनेत् क्रूरकर्मस्वभिमतेषु च ॥ इति कादिमते ॥

ततः,

ऐं ह्रीं श्रीं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा ॥

३ ॐ उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्ष सर्वकर्माणि साधय मे देहि दापय स्वाहा ॥

३ ॐ चित्पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा ॥

इत्यादिभिः प्रागुक्तैः त्रिभिर्मन्त्रैः अग्नेस्तिस्र आहुतीः जुहुयात् । अथ अग्नेर्मध्यभागे स्थितायां दक्षिणोत्तरायतायां बहुरूपाऽऽख्यजिह्वायां आवाहनमन्त्रेण—

ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्ल्रीं ह्स्रौः
महापद्मवनान्तःस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

इति श्रीदेवीमावाह्य उपचारमन्त्रैः गन्धादीन् पञ्चोपचारानाचर्य प्रथमं अङ्गदेवीनित्यौघत्रयावरणदेवताचक्रेश्वरीणां एकैकामाज्याद्यन्यतमाहुतिमुद्देशत्यागपूर्वं कृत्वा अथ प्रधानदेवतायाश्च तथैव दशाहुतीर्जुहुयात् । पुरश्चरणादिहोमाहुतयस्तु इत उत्तरं कार्याः । तत्र नित्यासु चक्रेश्वरीषु अङ्गदेवीषु च तत्तन्मन्त्रान्ते चतुर्थ्यन्तं तत्तन्नामोत्तरं स्वाहापदप्रयोगः । वशिन्यादिष्वायुधेषु चोक्तमन्त्रगतं नमःशब्दमपोह्य स्वाहाशब्दयोजनम् । अवशिष्टेषु ओघत्रयाणिमाऽऽदिषु दैवतेषु चतुर्थ्यन्तं तत्तन्नामोत्तरं स्वाहापदसम्बन्धः इति विशेषः । यथा—

ऐं ह्रीं श्रीं अं ऐं स क ल ह्रीं नित्यक्लिन्ने मदद्रवे सौः अं कामेश्वरीनित्यायै स्वाहा । कामेश्वरीनित्याया इदं न मम ॥ इत्यादि ॥

३ अं आं सौः त्रिपुराचक्रेश्वर्यै स्वाहा । त्रिपुराचक्रेश्वर्या इदं न मम ॥ इत्यादि ॥

३ अं आं इं ईं उं ऊं ऋं ॠं लं ॡं एं ऐं ॐ औं अं अः र्ब्लूं वशिनीवाग्देवतायै स्वाहा । वशिनीवाग्देवताया इदं न मम ॥ इत्यादि ॥

३ द्रां द्रीं क्लीं ब्लूं सः सर्वजम्भनेभ्यो बाणेभ्यः स्वाहा । सर्वजम्भनेभ्यो बाणेभ्य इदं न मम ॥ इत्यादि ॥

३ हृदयदेव्यै स्वाहा । हृदयदेव्या इदं न मम ॥ इत्यादि ॥

३ परप्रकाशानन्दनाथाय स्वाहा । परप्रकाशानन्दनाथाय इदं न मम ॥ इत्यादि ॥

३ अणिमासिद्ध्यै स्वाहा । अणिमासिद्ध्या इदं न मम ॥ इत्यादिरीत्येति ॥

प्रधानदेवताहोमे तु पञ्चदशनित्योत्तरं कामेश्वर्यादित्रितयान्ते त्रिपुराम्बोत्तरं प्रधानहोमदशके तदन्ते तस्या एव महाचक्रेश्वरीत्वेन पुनर्होमे चेत्येवं त्रयोदशसु होमेषु मूलमन्त्रान्ते—ललितायै स्वाहा ललिताया इदं न मम इति विवेकः, "न तत्र मन्त्रदेवताभेदः कार्यः" इति सूत्रेण नामान्तरनिषेधात् । सर्वत्र ज्वालामालिन्यादिषु स्वाहाऽन्तेषु मन्त्रेषु तु पुनः स्वाहाशब्दान्तरयोजनं कर्तव्यमेव—

मन्त्रान्ते या वह्निजाया सा तु मन्त्रस्वरूपिणी ।
तदन्तेऽन्यां प्रयुञ्जीत सा होमाङ्गतया मता ॥

इति शक्तिसङ्गमतन्त्रवचनात् ॥[1]

होमद्रव्याणि तु आज्यान्नपायसतिलतण्डुलतदुभयरक्तपुष्पसुगन्धिकुसुमफलाद्यन्यतमानि । अन्नादिषु त्रिमधुयोगः केवलाज्ययोगो वा । अन्नादितिलतण्डुलान्तं निष्कामानाम् । प्रसूनं फलं चैकैकम् । लघु चेत् द्वित्र्याद्यपि । संस्कारस्तु आज्याक्त एव । एवं क्रमान्तरेष्वपि विपश्चिद्भिः ऊहनीयमिति दिक् । अथ पूर्वोक्तप्रकारेण बलिं दत्वा—

ऐं ह्रीं श्रीं ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा । अग्नये पृथिव्यै महत इदं न मम ॥

३ ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा । वायवे अन्तरिक्षाय महत इदं न मम ॥

३ ॐ सुवरादित्याय च दिवे च महते च स्वाहा । आदित्याय दिवे महत इदं न मम ॥

[1] स्वाहाऽन्तमन्त्रे स्वाहाऽन्तरयोजनं नास्तीति प्राचीनानां लेखः अमूलत्वात् अनादर्तव्यः— इत्यधिकः (भ, अ) पुस्तकयोः.

३　ॐ भूर्भुवः सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा । चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो महत इदं न मम ॥

इति चतुर्भिः मन्त्रैः महाव्याहृतिहोमं आज्येन कृत्वा, ऐं ह्रीं श्रीं ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यत् कृतं यदुक्तं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा इति मन्त्रेण ब्रह्मार्पणाहुतिं विधाय, परब्रह्मण इदं न मम इत्युक्त्वा, परिस्तरणपरिधीनपसार्य, परिषेचनालङ्करणे कृत्वा, प्रागुक्तेन—

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥

इति मन्त्रेणोपस्थाय चिदग्निं देवतां च आत्मन्युद्वासयामि नमः इत्युद्वास्य तद्भूतितिलकं धारयेत् त्र्यायुषमिति मन्त्रेणेति शिवम् ॥

इति होमप्रकरणं तृतीयं समाप्तम्

मुद्राप्रकरणम्

श्रीगुरुवन्दनमुद्राः

विकसितकल्प उत्तानाञ्जलिः सुमुखम् । इदमेव मुष्टीकृतं सुवृत्तम् । ऊर्ध्वाधःस्थितयोः दक्षवामकरतलयोः अंगुलीनां मिथो मणिबन्धसम्बन्धे चतुरश्रम् । अधरोत्तरस्य वामदक्षमुष्टियुगस्य स्वाभिमुख्येन योजने मुद्गरः । तिर्यङ्मिळिताग्रयोः मध्यमयोः पश्चात् ऊर्ध्वाधःस्थिते वामदक्षानामिके तिरः प्रसारिते तर्जनीभ्यां निपीड्य वामकनिष्ठां दक्षिणया धृत्वा अङ्गुष्ठाग्रयोः मध्यमापुरोमध्यपर्वद्वयसम्बन्धे योनिः ॥ इति श्रीगुरुवन्दनमुद्राः ॥

अर्घ्यस्थापनमुद्राः

अधोमुखप्रसारितं वामदक्षकरतलयुगमधरोत्तरं विधायाङ्गुष्ठद्वयचालने मत्स्यः। लक्ष्यमभितः छोटिकां दत्वा दक्षमध्यमातर्जनीभ्यां [1]अधिवामकरतलं त्रिस्ताडने अस्त्रम्। अधोमुखस्य दक्षवाममुष्टिद्वयस्य प्रसारितयोः तर्जन्योः स्वस्वभागमारभ्य क्रमेण लक्ष्यं परितः प्रादक्षिण्यवामावर्ताभ्यां परिभ्रमणे अवकुण्ठनम्। अभिमुखमन्योन्यग्रथितानां दक्षवामकराङ्गुलीनां क्रमेण कनिष्ठानामे तर्जनीमध्यमे च संयोज्य अधोमुखीकरणे धेनुः। योनिरुक्तैव। उत्तानस्य वामकरस्य विरळं आकुञ्चितैः अनामामध्यमातर्जन्यग्रैः अधोमुखस्य दक्षस्य वक्रीकृतानि तानि संयोज्य कनिष्ठाङ्गुष्ठाग्राणां मिथः सम्बन्धे गालिनी॥

अर्चने मुद्राः

विततोत्तान ऊर्ध्वाधोव्यापारितोऽञ्जलिः आवाहनी। तथाविधो न्युब्जाञ्जलिः [2]संस्थापनी। उदङ्गुष्ठयोः मुष्ट्योरभिमुखयोगे संनिधापनी। सैवाकनिष्ठामूलं अन्तःप्रविष्टाङ्गुष्ठमिथःस्पृष्टनखा संनिरोधिनी। संनिधापन्येव तिरः प्रयोजिता सम्मुखीकरणी। अवकुण्ठनी उक्तैव। उदङ्गुलिनोः करतलयोः योजने वन्दनं प्रसिद्धम्। धेनुयोनी उक्ते एव। वामानामाङ्गुष्ठयोगे तत्त्वमुद्रा। दक्षाङ्गुष्ठतर्जनीयोगो ज्ञानमुद्रा॥

सङ्क्षोभिण्यादिमुद्राः

उत्तानयोः करतलयोः प्रसारिततर्जनीकं संहतकनिष्ठानामामध्यमाग्राण्यन्योन्याभिमुख्येन संयोज्य स्वस्वकनिष्ठोपर्यङ्गुष्ठाग्रसम्बन्धे सर्वसङ्क्षोभिणी। सैव प्रसारितमध्यमाऽपि सर्वविद्राविणी। इयमेव मध्यमातर्जन्योराकुञ्चने [3]सर्वाकर्षणी। परस्परग्रथिताङ्गुलिस्पृष्टनखाग्राङ्गुष्ठयोः मुष्ट्योः योगे सर्ववशङ्करी। अधरोत्तरं तिर्यक्प्रसारिते वामदक्षिणकनिष्ठे मध्यमाभ्यां धृत्वा तयोरग्रे अंगुष्ठाभ्यां निपीड्य अनामातर्जन्यग्राणां पार्श्वतो मिथः संस्पर्शे सर्वोन्मादिनी। एषैव अनामयोराकुञ्चने तर्जन्योः किञ्चित् भुग्नत्वे च सर्वमहाङ्कुशा। दक्षभुजमध्यसन्धिस्थापितवाम-

[2] संस्थापिनी—अ, अ१.

[1] अधोमुखाभ्यां वाम—श्री.

[3] सर्वाकर्षिणी—अ, ब३.

कूर्परमामणिबन्धं पाणी परिवर्त्य स्वाभिमुखमन्योन्यस्पृष्टाग्रयोः मध्यमयोः पृष्ठतोऽधरोत्तरं तिरःप्रसारितानि दक्षवामानामाकनिष्ठाग्राणि तर्जनीभ्यां धृत्वा पुरोऽङ्गुष्ठयोरन्योन्यसम्बन्धे सर्वखेचरी। ऊर्ध्वाधस्तिरःप्रसृते वामदक्षकनिष्ठाग्रे अनामाभ्यां धृत्वा अर्धचन्द्राकृतियोजितेषु तर्जन्यङ्गुष्ठेषु मिथः श्लिष्टाभ्यामृजुभ्यां मध्यमाभ्यां तर्जन्योः सम्बन्धे सर्वबीजम्। योनिरुक्तैव। अस्यामेव ऋजूकृतयोः कनिष्ठयोः मध्यमयोरङ्गुष्ठयोश्च पृथङ्मिथः संस्पर्शे सर्वत्रिखण्डा। उदग्राणां विरळानां वामकराङ्गुलीनां ईषदाकुञ्चने ग्रासः। मध्यमातर्जन्यङ्गुष्ठयोगे प्राणमुद्रा। मध्यमानामाऽङ्गुष्ठमेळने अपानस्य। कनिष्ठाऽनामाऽङ्गुष्ठसम्बन्धे व्यानस्य। तर्जन्यनामाऽङ्गुष्ठमिश्रणे उदानस्य। सर्वाङ्गुलिसंश्लेषे समानस्य। वाममुष्टेरङ्गुष्ठाग्रचुम्बितमूलपर्वणि तर्जन्यामीषदधोमुखप्रसृतायां नाराचः। व्यत्ययेन वामदक्षकरकनिष्ठाङ्गुष्ठाग्रयोः योगे अन्यासां वैरळ्येन प्रसारणे च चक्रम्॥

न्यासे मुद्राः

संहताभिः चतसृभिः अङ्गुलीभिः मुखस्पर्शे मुखम्। सम्पुटीकृतयोः करयोः मिथोऽभिमुखप्रश्लेषे करसम्पुटम्। किञ्चिदाकुञ्चिताङ्गुल्यग्रयोः स्वाभिमुखं करयोरन्योन्यसम्बन्धे अञ्जलिः। तर्जनीमध्यमानामाऽग्रैः हृदयस्पर्शे हृदयम्। मध्यमाऽनामाऽग्रयोः ब्रह्मरन्ध्रसम्बन्धे शिरः। अङ्गुष्ठाग्रचूळीयोगे शिखा। व्यत्यस्तयोरधरोत्तरं वामदक्षकरयोः सर्वाङ्गुलीभिः अंससम्बन्धे कवचम्। तर्जनीमध्यमाऽनामाऽग्रैः नेत्रयुगमध्यस्पर्शे नेत्रम्। अस्त्रं उक्तचरम्। एताः षडङ्गन्यास एव। अङ्गुष्ठमिळितया अनामिकया तत्तदङ्गस्पर्शे न्यासमुद्रा। वामहस्तमुष्टिं बद्ध्वा सरळया तर्जन्या [1]अंसकर्णमभितो भ्रामणे सौभाग्यदण्डिनी। सैव गर्भिताङ्गुष्ठवामपादतलं न्यस्ता रिपुजिह्वाग्रहा। अन्त्यमिदं मुद्रायुगळं श्रीषोडशाक्षरीविषयम्॥

जपे मुद्राः

मुख-करसम्पुट-षडङ्गमुद्राः प्रोक्तचर्य एव। परस्परमनभिमुखग्रथिताकुञ्चितानामामध्यमाकनिष्ठं करौ परिवर्त्य प्रसारिततर्जनीयुगाग्रसम्बन्धे शक्त्युत्थापनी।

[1] असंकीर्ण—श्री, अ१.

सर्वसङ्क्षोभिण्यादयो दश दर्शितचर्यः । अभिमुखाभ्यां दक्षमध्यमातर्जनीभ्यां पराङ्मुखयोः वाममध्यमातर्जन्योः अवपीड्याकर्षणेऽन्यासामङ्गुलीनां आकुञ्चने च पाशः । उदग्रायां दक्षमध्यमायां तन्मध्यपर्वस्पर्शिमध्यपर्वणस्तर्जन्याकुञ्चने अनामाकनिष्ठाग्रयोश्चाङ्गुष्ठाग्रनिपीडने अंकुशः । उत्तानदक्षमध्यमाऽग्रेण तादृशतर्जन्यग्रपरिग्रहे चापः । बाणस्तु नाराचपदेनोक्तचर एव ॥

आहत्य अपुनरुक्ता मुद्राः पञ्चाशत् । एतासां प्रकारभेदोऽपि तन्त्रान्तरेषु दृश्यत इति शिवम् ॥

इति मुद्राप्रकरणं चतुर्थं समाप्तम्

न्यासप्रकरणम्

एतन्मुद्राः मुद्राप्रकरणे उक्तपूर्वाः । तत्रादौ मातृकान्यासः—

अस्य श्रीमातृकान्यासमहामन्त्रस्य ब्रह्मणे ऋषये नमः (शिरसि), गायत्र्यै छन्दसे नमः (मुखे), श्रीमातृकासरस्वत्यै देवतायै नमः (हृदये), हल्भ्यो बीजेभ्यो नमः (गुह्ये), स्वरेभ्यः शक्तिभ्यो नमः (पादयोः), बिन्दुभ्यः कीलकेभ्यो नमः (नाभौ), मम श्रीविद्याऽङ्गत्वेन न्यासे विनियोगाय नमः (करसम्पुटे) । सर्वमातृकया त्रिर्व्यापकं सर्वाङ्गे अञ्जलिना ।

ऐं ह्रीं श्रीं ऐं क्लीं सौः अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः । हृदयाय नमः ॥

६ इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः । शिरसे स्वाहा ॥

६ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः । शिखायै वषट् ॥

६ एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः । कवचाय हुं ॥

६ ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् ॥

६ अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां नमः ॥ अस्त्राय फट् ॥

ध्यानम्—

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
[1]देशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणामब्जसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तं प्रादक्षिण्येन आयुधस्थितिः । चिन्तालिखितं नाम पुस्तकम् । इति ध्यात्वा मनसा पुष्पाञ्जलिं दत्वा, मातृकाः त्रितारीबालपूर्विकाः स्वाङ्गेषु न्यसेत् । यथा—

ऐं ह्रीं श्रीं ऐं क्लीं सौः अं नमः शिरसि, आं नमः मुखवृत्ते, इं नमः दक्षनेत्रे, ईं नमः वामनेत्रे, उं नमः दक्षकर्णे, ऊं नमः वामकर्णे, ऋं नमः दक्षनासापुटे, ॠं नमः वामनासापुटे, ऌं नमः दक्षगण्डे, ॡं नमः वामगण्डे, एं नमः ऊर्ध्वोष्ठे, ऐं नमः अधरोष्ठे, ओं नमः ऊर्ध्वदन्तपङ्क्तौ, औं नमः अधोदन्तपङ्क्तौ, अं नमः शिरसि मुखान्ततः जिह्वाग्रे, अः नमः मुखान्ते कण्ठे, कं नमः दक्षबाहुमूले, खं नमः तन्मध्यसन्धौ दक्षकूर्परे, गं नमः तन्मणिबन्धे, घं नमः तदङ्गुलीमूले, ङं नमः तदङ्गुल्यग्रे, चं नमः वामबाहुमूले, छं नमः तन्मध्यसन्धौ, जं नमः तन्मणिबन्धे, झं नमः तदङ्गुलिमूले, ञं नमः तदङ्गुल्यग्रे, टं नमः दक्षोरुमूले, ठं नमः तज्जानुनि, डं नमः तज्जङ्घापादसंधौ तद्गुल्फे, ढं नमः तदङ्गुलिमूले, णं नमः तदङ्गुल्यग्रे, तं नमः वामोरुमूले, थं नमः तज्जानुनि, दं नमः तज्जङ्घापादसंधौ तद्गुल्फे, धं नमः तदङ्गुलिमूले, नं नमः तदङ्गुल्यग्रे, पं नमः दक्षपार्श्वे, फं नमः वामपार्श्वे, बं नमः पृष्ठे, भं नमः नाभौ, मं नमः जठरे, यं नमः हृदि, रं नमः दक्षकक्षे, दक्षस्कन्धे, लं नमः अपरगले, गलपृष्ठे, ककुदि, वं नमः वामकक्षे, वामस्कन्धे, शं नमः हृदयादिदक्षकराङ्गुल्यन्तं, षं नमः हृदयादिवामकराङ्गुल्यन्तं, सं नमः हृदयादिदक्षपादाङ्गुल्यन्तं, हं नमः हृदयादिवामपादाङ्गुल्यन्तं, ळं नमः

[1] देहां—अ.

हृदयादिगुह्यान्तं (नित्याषोडशिकार्णवे कव्यादिपादाङ्गुल्यन्तं), क्षं नमः हृदयादिमूर्धान्तं (नित्याषोडशिकार्णवे कव्यादिब्रह्मरन्ध्रान्तम्) ॥

अत्र मातृकाणां बिन्दुमत्त्वं—वाग्देवताऽष्टकन्यासस्थान् सबिन्दूनचः सर्वत्र वर्गाणां बिन्दुयोग इति ज्ञापकात्—सिद्धम् ॥

इति मातृकान्यासः । अयमेक एव सूत्रोक्तः ॥

करशुद्धिन्यासः

ऐं ह्रीं श्रीं अं मध्यमाभ्यां नमः, आं अनामिकाभ्यां, सौः कनिष्ठिकाभ्यां, अं अङ्गुष्ठाभ्यां, आं तर्जनीभ्यां, सौः करतलकरपृष्ठाभ्यां नमः ॥

आत्मरक्षान्यासः

ऐं ह्रीं श्रीं ऐं क्लीं सौः महात्रिपुरसुन्दरि आत्मानं रक्ष रक्ष, इति हृदये अञ्जलिं दद्यात् ॥

चतुरासनन्यासः

ऐं ह्रीं श्रीं ह्रीं क्लीं सौः देव्यात्मासनाय नमः । इति स्वस्य मूलाधारे न्यस्य ॥

३ हैं ह्क्लीं ह्सौः श्रीचक्रासनाय नमः ।

३ ह्सैं, ह्स्क्लीं ह्स्सौः सर्वमन्त्रासनाय नमः ।

३ ह्रीं क्लीं ब्लें साध्यसिद्धासनाय नमः ।

इति त्रिभिः मन्त्रैः मुहुर्मुहुः पुष्पक्षेपेण चक्रमन्त्रदेवताऽऽसनानि श्रीचक्रे न्यसेत् ॥

बालाषडङ्गन्यासः

ऐं ह्रीं श्रीं ऐं हृदयाय नमः, क्लीं शिरसे स्वाहा, सौः शिखायै वषट्, ऐं कवचाय हुम्, क्लीं नेत्रत्रयाय वौषट्, सौः अस्त्राय फट् ॥

वशिन्यादिन्यासः

ऐं ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः ब्लूँ वशिनीवाग्देवतायै नमः । शिरसि ॥

३ कं खं गं घं ङं क्ल्ह्रीं कामेश्वरीवाग्देवतायै नमः । ललाटे ॥

३ चं छं जं झं ञं न्व्लीं मोदिनीवाग्देवतायै नमः । भ्रूमध्ये ॥

३ टं ठं डं ढं णं य्लूं विमलावाग्देवतायै नमः । कण्ठे ॥

३ तं थं दं धं नं ज्म्रीं अरुणावाग्देवतायै नमः । हृदि ॥

३ पं फं बं भं मं ह्स्ल्व्यूं जयिनीवाग्देवतायै नमः । नाभौ ॥

३ यं रं लं वं झ्म्र्यूं सर्वेश्वरीवाग्देवतायै नमः । लिङ्गे ॥

३ शं षं सं हं ळं क्षं क्ष्म्रीं कौळिनीवाग्देवतायै नमः । मूलाधारे ॥

इति न्यसेत् ॥

मूलविद्यावर्णन्यासः

अस्य च ऋष्यादिन्यासस्तु कृताकृतः । करणे तु तत्प्रकारो जपप्रकरणे द्रष्टव्यः ॥

ऐं ह्रीं श्रीं कं नमः शिरसि, एं नमः मूलाधारे, ईं नमः हृदि, लं नमः दक्षनेत्रे, ह्रीं नमः वामनेत्रे, हं नमः भ्रूमध्ये, सं नमः दक्षश्रोत्रे, कं नमः वामश्रोत्रे, हं नमः मुखे, लं नमः दक्षभुजे, ह्रीं नमः वामभुजे, सं नमः पृष्ठे, कं नमः दक्षजानुनि, लं नमः वामजानुनि, ह्रीं नमः नाभौ ॥

इति कादिपञ्चदशीवर्णन्यासः । एवमेव हादिपञ्चदश्यपि ॥

श्रीषोडशाक्षरीन्यासः

ॐ ऐं ह्रीं श्रीं मूलविद्या नम इति दक्षमध्यमानामाभ्यां शिरसि न्यसेत् । अथ तत्र तां दीपाभां स्रवत्सुधारसां महासौभाग्यदां ध्यात्वा, पुनस्तथैव तामुच्चार्य महासौभाग्यं मे देहि परसौभाग्यं दण्डयामीति सौभाग्यदण्डिन्या मुद्रया वामकर्णोस-वेष्टनपूर्वकं आमस्तकचरणं वामाङ्गे न्यसेत् । पुनस्तथैव तामुच्चार्य मम शत्रून्

निगृह्णामीति रिपुजिह्वाग्रया मुद्रया वामपादाधो न्यसेत् । पुनस्तथैव तामुच्चार्य त्रैलोक्यस्याहं कर्तेति त्रिखण्डां फाले न्यसेत् । पुनस्तथैव तां उच्चार्य वदने वेष्टनत्वेन न्यसेत् । पुनस्तथैव तां उच्चार्य दक्षकर्णादिवामकर्णान्तं मुखवेष्टनत्वेन न्यसेत् । पुनस्तथैव तामुच्चार्य गळोर्ध्वमाशिरो न्यसेत् । पुनस्तथैव तामाद्यन्तप्रणवमुच्चार्य मस्तकात् पादपर्यन्तं पादादामस्तकं च न्यसेत् । पुनस्तथैव तामुच्चार्य योनिमुद्रया मुखे न्यस्य, पुनस्तथैव तामुच्चार्य योनिमुद्रया ललाटे न्यसेत् ॥

सम्मोहनन्यासः

ततः श्रीविद्यां स्मृत्वा तत्प्रभया जगदरुणं विभावयन् अनामिकां ऊर्ध्वे परिभ्राम्य, उच्चार्य मुहुर्मुहुः मूलविद्यां ब्रह्मरन्ध्रे मणिबन्धद्वितये फाले च विन्यसेत् ॥ एष सम्मोहनो नाम न्यासोऽन्वर्थः ॥

संहारन्यासः

अथ चतुस्तारीनमस्सम्पुटितान् मूलविद्याषोडशार्णान् क्रमेण पादयोः जङ्घयोः जान्वोः कटिभागद्वये पृष्ठे लिङ्गे नाभौ पार्श्वयोः स्तनयोः अंसयोः कर्णयोः मूर्ध्नि मुखे नेत्रयोः कर्णयुगसन्निधौ कर्णवेष्टनयोश्च न्यसेत् । अत्र कूटत्रयस्य वर्णत्रयत्वेन षोडशार्णत्वव्यपदेशः । पादादिषु प्रथमं दक्षः ततो वाम इति बोध्यम् ॥

सृष्टिन्यासः

पुनस्तथैव विद्याऽर्णान् क्रमेण ब्रह्मरन्ध्रे फाले दृशोः कर्णयोः घ्राणपुटयोः गण्डयोः दन्तपङ्क्त्योः ऊर्ध्वाधरोष्ठयोः जिह्वायां चोरकूपे पृष्ठे सर्वाङ्गे हृदि स्तनयोरुदरे लिङ्गे च न्यस्य मूलेन व्यापकं कुर्यात् ॥

स्थितिन्यासः

अथ पूर्वक्रमेणैव अङ्गुष्ठादिकनिष्ठान्तकराङ्गुलिषु मूर्ध्नि मुखे हृदि नाभेः पादद्वयावधि कण्ठादानाभि मूर्ध्नं आकण्ठं पूर्ववत् पादाङ्गुलिषु च न्यसेत् । अत्र दक्षवामकरचरणाङ्गुलिषु द्वयोर्द्वयोरेकैकमक्षरम् ॥

एते पञ्चैव ज्ञानार्णवमते । तन्त्रान्तरेषु तु अन्येऽपि पञ्च उपलभ्यन्ते ॥

लघुषोढान्यासः

अस्य श्रीलघुषोढान्यासस्य दक्षिणामूर्तये ऋषये नमः—शिरसि। गायत्र्यै छन्दसे नमः—मुखे। गणेशग्रहनक्षत्रयोगिनीराशिपीठरूपिण्यै श्रीमहात्रिपुरसुन्दर्यै देवतायै नमः—इति हृदि। श्रीविद्याऽङ्गत्वेन न्यासे विनियोगाय नमः—इति करसम्पुटे॥

ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं ऐं अङ्गुष्ठाभ्यां नमः॥
३ इं चं छं जं झं ञं ईं क्लीं तर्जनीभ्यां नमः॥
३ उं टं ठं डं ढं णं ऊं सौः मध्यमाभ्यां नमः॥
३ एं तं थं दं धं नं ऐं ऐं अनामिकाभ्यां नमः॥
३ ओं पं फं बं भं मं औं क्लीं कनिष्ठिकाभ्यां नमः॥
३ अं यं रं लं वं शं षं सं हं ळं क्षं अः सौः करतलकरपृष्ठाभ्यां नमः॥

एवं हृदयादिन्यासः। ध्यानम्—

उद्यत्सूर्यसहस्राभां पीनोन्नतपयोधराम्।
रक्तमाल्याम्बरालेपां [1]रक्तभूषणभूषिताम्॥
पाशाङ्कुशधनुर्बाणभास्वत्पाणिचतुष्टयाम्।
लसन्नेत्रत्रयां स्वर्णमकुटोद्भासिमस्तकाम्॥
गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम्।
देवीं पीठमयीं ध्यायेन्मातृकां सुन्दरीं पराम्॥

आयुधक्रमस्तु सपर्याप्रकरण एवोक्त इहानुसन्धेयः। इति श्रीदेवीं समष्टिरूपेण यात्वा, गणेशादिव्यष्टिरूपेण च ध्यायेत्॥

गणेशन्यासः

तरुणादित्यसङ्काशान् गजवक्त्रांस्त्रिलोचनान्।
पाशाङ्कुशवराभीतिकरान् शक्तिसमन्वितान्॥

[1] रत्न—अ, श्री.

तास्तु सिन्दूरवर्णाभाः सर्वालङ्कार[1]भूषिताः ।
एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः ॥

वामोर्ध्वकरमारभ्य वामाधःकरपर्यन्तं गणेशानां पाशादिध्यानम् । शक्तीनां तु वामकरे कमलं दक्षिणे च प्रियाश्लेष इति ध्यात्वा, मातृकास्थानेषु त्रितारीमातृकापूर्वकं गणेशान् न्यसेत् । यथा—

ऐं ह्रीं श्रीं अं श्रीयुक्ताय विघ्नेशाय नमः । शिरसि ॥
३ आं ह्रीयुक्ताय विघ्नराजाय नमः । मुखवृत्ते ॥
३ इं तुष्टियुक्ताय विनायकाय नमः । दक्षनेत्रे ॥
३ ईं शान्तियुक्ताय शिवोत्तमाय नमः । वामनेत्रे ॥
३ उं पुष्टियुक्ताय विघ्नहृते नमः । दक्षकर्णे ॥
३ ऊं सरस्वतीयुक्ताय विघ्नकर्त्रे नमः । वामकर्णे ॥
३ ऋं रतियुक्ताय विघ्नराजे नमः । दक्षनासापुटे ॥
३ ॠं मेधायुक्ताय गणनायकाय नमः । वामनासापुटे ॥
३ ऌं कान्तियुक्ताय एकदन्ताय नमः । दक्षगण्डे ॥
३ ॡं कामिनीयुक्ताय द्विदन्ताय नमः । वामगण्डे ॥
३ एं मोहिनीयुक्ताय गजवक्त्राय नमः । ऊर्ध्वोष्ठे ॥
३ ऐं जटायुक्ताय निरञ्जनाय नमः । अधरोष्ठे ॥
३ ओं तीव्रायुक्ताय कपर्दभृते नमः । ऊर्ध्वदन्तपङ्क्तौ ॥
३ औं ज्वालिनीयुक्ताय दीर्घमुखाय नमः । अधोदन्तपङ्क्तौ ॥
३ अं नन्दायुक्ताय शङ्कुकर्णाय नमः । जिह्वाऽग्रे ॥
३ अः सुरसायुक्ताय वृषध्वजाय नमः । कण्ठे ॥
३ कं कामरूपिणीयुक्ताय गणनाथाय नमः । दक्षबाहुमूले ॥
३ खं सुभ्रयुक्ताय गजेन्द्राय नमः । दक्षकूर्परे ॥
३ गं जयिनीयुक्ताय शूर्पकर्णाय नमः । दक्षमणिबन्धे ॥
३ घं सत्यायुक्ताय त्रिलोचनाय नमः । दक्षकराङ्गुलिमूले ॥

[1] शोभिताः—अ१, ब२, ब३.

३ ङं विघ्नेशीयुक्ताय लम्बोदराय नमः । दक्षकराङ्गुल्यग्रे ॥
३ चं सुरूपायुक्ताय महानादाय नमः । वामबाहुमूले ॥
३ छं कामदायुक्ताय चतुर्मूर्त्तये नमः । वामकूर्परे ॥
३ जं मदविह्वलायुक्ताय सदाशिवाय नमः । वाममणिबन्धे ॥
३ झं विकटायुक्ताय आमोदाय नमः । वामकराङ्गुलिमूले ॥
३ ञं पूर्णायुक्ताय दुर्मुखाय नमः । वामकराङ्गुल्यग्रे ॥
३ टं भूतिदायुक्ताय सुमुखाय नमः । दक्षोरुमूले ॥
३ ठं भूमियुक्ताय प्रमोदाय नमः । दक्षजानुनि ॥
३ डं शक्तियुक्ताय एकपादाय नमः । दक्षगुल्फे ॥
३ ढं रमायुक्ताय द्विजिह्वाय नमः । दक्षपादाङ्गुलिमूले ॥
३ णं मानुषीयुक्ताय शूराय नमः । दक्षपादाङ्गुल्यग्रे ॥
३ तं मकरध्वजायुक्ताय वीराय नमः । वामोरुमूले ॥
३ थं वीरिणीयुक्ताय षण्मुखाय नमः । वामजानुनि ॥
३ दं भ्रुकुटीयुक्ताय वरदाय नमः । वामगुल्फे ॥
३ धं लज्जायुक्ताय वामदेवाय नमः । वामपादाङ्गुलिमूले ॥
३ नं दीर्घघोणायुक्ताय वक्रतुण्डाय नमः । वामपादाङ्गुल्यग्रे ॥
३ पं धनुर्धरायुक्ताय द्विरण्डकाय नमः (नित्याषोडशिकार्णवे —द्वितुण्डकाय नमः) । दक्षपार्श्वे ॥
३ फं यामिनीयुक्ताय सेनान्ये नमः । वामपार्श्वे ॥
३ वं रात्रीयुक्ताय ग्रामण्ये नमः । पृष्ठे ॥
३ भं चन्द्रिकायुक्ताय मत्ताय नमः । नाभौ ॥
३ मं शशिप्रभायुक्ताय विमत्ताय नमः । जठरे ॥
३ यं लोलायुक्ताय मत्तवाहनाय नमः । हृदये ॥
३ रं चपलायुक्ताय जटिने नमः । दक्षस्कन्धे ॥
३ लं ऋद्धियुक्ताय मुण्डिने नमः । गलपृष्ठे—ककुदि ॥
३ वं दुर्भगायुक्ताय खड्गिने नमः । वामस्कन्धे ॥
३ शं सुभगायुक्ताय वरेण्याय नमः । हृदयादिदक्षकराङ्गुल्यन्तम् ॥

३ षं शिवायुक्ताय वृषकेतनाय नमः । हृदयादिवामकराङ्गुल्यन्तं ॥
३ सं दुर्गायुक्ताय भक्ष्यप्रियाय नमः । हृदयादिदक्षपादाङ्गुल्यन्तं ॥
३ हं [1]कालीयुक्ताय गणेशाय नमः । हृदयादिवामपादाङ्गुल्यन्तं ॥
३ ळं कालकुब्जिकायुक्ताय मेघनादाय नमः । हृदयादिगुह्यान्तं ॥
३ क्षं विघ्न[2]हारिणीयुक्ताय गणेश्वराय नमः । हृदयादिमूर्धान्तम् ॥

ग्रहन्यासः

ध्यानम्—

रक्तं श्वेतं तथा रक्तं श्यामं पीतं च पाण्डरम् ।
कृष्णं धूम्रं धूम्रधूम्रं भावयेद्रविपूर्वकान् ॥
कामरूपधरान् देवान् दिव्याभरणभूषितान् ।
वामोरुन्यस्तहस्तांश्च दक्षहस्तवरप्रदान् ॥
शक्तयोऽपि तथा ध्येयाः वराभयकराम्बुजाः ।
स्वस्वप्रियाङ्कनिलयाः सर्वाभरणभूषिताः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः
रेणुकायुक्ताय सूर्याय नमः । हृदयाधः, हृज्जठरसन्धौ ॥
३ यं रं लं वं अमृतायुक्ताय चन्द्राय नमः । भ्रूमध्ये ॥
३ कं खं गं घं ङं धर्मायुक्ताय भौमाय नमः । नेत्रयोः ॥
३ चं छं जं झं ञं यशस्विनीयुक्ताय बुधाय नमः । [3]श्रोत्रकूपाधः ॥
३ टं ठं डं ढं णं शाङ्करीयुक्ताय बृहस्पतये नमः । कण्ठे ॥
३ तं थं दं धं नं ज्ञानरूपायुक्ताय शुक्राय नमः । हृदि ॥
३ पं फं बं भं मं शक्तियुक्ताय शनैश्चराय नमः । नाभौ ॥
३ शं षं सं हं कृष्णायुक्ताय राहवे नमः । मुखे ॥
३ ळं क्षं धूम्रायुक्ताय केतवे नमः । गुदे ॥

[2] कारिणी—भ१.

[1] कालिका—अ१.

[3] चोरकूपाधः—अ, ब२, ब३, श्री, भ.

नक्षत्रन्यासः

ध्यानम्—

ज्वलत्कालानलप्रख्या वरदाभयपाणयः ।
नतिपाण्योश्विनीपूर्वाः सर्वाभरणभूषिताः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं अं आं अश्विन्यै नमः । ललाटे ॥
३ इं भरण्यै नमः । दक्षनेत्रे ॥
३ ईं उं ऊं कृत्तिकायै नमः । वामनेत्रे ॥
३ ऋं ॠं लृं ॡं रोहिण्यै नमः । दक्षकर्णे ॥
३ एं मृगशिरसे नमः । वामकर्णे ॥
३ ऐं आर्द्रायै नमः । दक्षनासापुटे ॥
३ ओं औं पुनर्वसवे नमः । वामनासापुटे ॥
३ कं पुष्याय नमः । कण्ठे ॥
३ खं गं आश्लेषायै नमः । दक्षस्कन्धे ॥
३ घं ङं मघायै नमः । वामस्कन्धे ॥
३ चं पूर्वफल्गुन्यै नमः । पृष्ठे ॥
३ छं जं उत्तरफल्गुन्यै नमः । दक्षकूर्परे ॥
३ झं ञं हस्ताय नमः । वामकूर्परे ॥
३ टं ठं चित्रायै नमः । दक्षमणिबन्धे ॥
३ डं स्वात्यै नमः । वाममणिबन्धे ॥
३ ढं णं विशाखायै नमः । दक्षहस्ते ॥
३ तं थं दं अनूराधायै नमः । वामहस्ते ॥
३ धं ज्येष्ठायै नमः । नाभौ ॥
३ नं पं फं मूलाय नमः । कटिबन्धे ॥
३ बं पूर्वाषाढायै नमः । दक्षोरौ ॥
३ भं उत्तराषाढायै नमः वामोरौ ॥

३ मं श्रवणाय नमः । दक्षजानुनि ॥
३ यं रं धनिष्ठायै नमः । वामजानुनि ॥
३ लं शततारकायै नमः । दक्षजङ्घायाम् ॥
३ वं शं पूर्वभाद्रपदायै नमः । वामजङ्घायाम् ॥
३ षं सं हं उत्तरभाद्रपदायै नमः । दक्षपादे ॥
३ ळं क्षं अं अः रेवत्यै नमः । वामपादे ॥

योगिनीन्यासः

ध्यानम्—

कण्ठस्थाने विशुद्धौ नृपदलकमले श्वेतवर्णां त्रिणेत्रां
हस्तैः खट्वाङ्गखड्गौ त्रिशिखमपि महाचर्म सन्धारयन्तीम् ।
वक्त्रेणैकेन युक्तां पशुजनभयदां पायसान्नैकसक्तां
त्वक्स्थां वन्देऽमृताद्यैः परिवृतवपुषं डाकिनीं वीरवन्द्याम् ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं डां डीं डमलवरयूं डाकिन्यै नमः । ३ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः मां रक्ष रक्ष त्वगात्मानं नमः ॥

इति मन्त्रेण कण्ठस्थषोडशदलविशुद्धिकमलकर्णिकायां डाकिनीं न्यस्य, तद्दलेषु पुरोभागादिप्रादक्षिण्येन तदावरणशक्तीः न्यसेत् । यथा—

ऐं ह्रीं श्रीं अं अमृतायै नमः, आं आकर्षिण्यै, इं इन्द्राण्यै, ईं [1]ईशान्यै, उं उमायै, ऊं ऊर्ध्वकेश्यै, ऋं ऋद्धिदायै, ॠं [2]ॠकारायै, ऌं ऌकारायै, ॡं [3]ॡकारायै, एं एकपदायै, ऐं ऐश्वर्यात्मिकायै, ओं ओङ्कारायै, औं औषध्यै, अं अम्बिकायै, अः अक्षरायै नमः ॥ इति ॥

ततः ध्यानम्—

हृत्पद्मे भानुपत्रे द्विवदनलसितां दंष्ट्रिणीं श्यामवर्णां
अक्षं शूलं कपालं डमरुमपि भुजैर्धारयन्तीं त्रिणेत्राम् ।

[1] ईश्वर्यै—अ१, ब२, ब३.
[2] ॠषायै—श्री.
[3] ॡषायै—श्री.

रक्तस्थां कालरात्रीप्रभृतिपरिवृतां स्निग्धभक्तैकसक्तां
श्रीमद्वीरेन्द्रवन्द्यां अभिमतफलदां राकिणीं भावयामः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं रां रीं रमलवरयूं राकिण्यै नमः । ३ कं खं गं घं ङं चं छं जं झं ञं टं ठं मां रक्ष रक्ष असृगात्मानं नमः ॥

इति हृदयस्थितद्वादशदलानाहतनलिनकर्णिकायां राकिणीं न्यस्य, तद्दलेषु प्राग्वत् तदावृतिशक्तीर्न्यसेत् । यथा—

ऐं ह्रीं श्रीं कं कालरात्र्यै नमः, खं खण्डितायै, गं गायत्र्यै, घं घण्टाकर्षिण्यै, ङं ङार्णायै, चं चण्डायै, छं छायायै, जं जयायै, झं झङ्कारिण्यै, ञं ज्ञानरूपायै, टं टङ्कहस्तायै, ठं ठङ्कारिण्यै नमः ॥ इति ॥

अथ—

दिक्पत्रे नाभिपद्मे त्रिवदनलसितां दंष्ट्रिणीं रक्तवर्णां
शक्तिं दम्भोलिदण्डावभयमपि भुजैर्धारयन्तीं महोग्राम् ।
डामर्याद्यैः परीतां पशुजनभयदां मांसधात्वेकनिष्ठां
गौडान्नासक्तचित्तां सकलसुखकरीं लाकिनीं भावयामः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं लां लीं लमलवरयूं लाकिन्यै नमः । ३ डं ढं णं तं थं दं धं नं पं फं मां रक्ष रक्ष मांसात्मानं नमः ॥

इति नाभिगतदशदलमणिपूरकसरोजकर्णिकायां लाकिनीं न्यस्य, तद्दलेषु पूर्ववत् तत्परिवारशक्तीः न्यसेत् । यथा—

ऐं ह्रीं श्रीं डं डामर्यै नमः, ढं ढङ्कारिण्यै, णं णार्णायै, तं तामस्यै, थं स्थाण्व्यै, दं दाक्षायण्यै, धं धात्र्यै, नं नार्यै, पं पार्वत्यै, फं फट्कारिण्यै नमः ॥

तदनु—

स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिणेत्रां
हस्ताब्जैर्धारयन्तीं त्रिशिखगुणकपालाङ्कुशानात्तगर्वाम् ।
मेदोधातुप्रतिष्ठामलिमदमुदितां बन्धिनीमुख्ययुक्तां
पीतां दध्योदनेष्टामभिमतफलदां काकिनीं भावयामः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं कां कीं कमलवरयूं काकिन्यै नमः । ३ वं भं मं यं रं लं मां रक्ष रक्ष मेदआत्मानं नमः ॥

इति गुह्यस्थानगतषड्दलस्वाधिष्ठानसरसिजकर्णिकायां काकिनीं न्यस्य, तद्दलेषु तदावरणशक्तीः प्राग्वत् न्यसेत् । यथा—

ऐं ह्रीं श्रीं बं बन्धिन्यै नमः, भं भद्रकाल्यै, मं महामायायै, यं यशस्विन्यै, रं रक्तायै, लं लम्बोष्ठ्यै नमः ॥

ततः—

मूलाधारस्थपद्मे श्रुतिदललसिते पञ्चवक्त्रां त्रिणेत्रां
धूम्राभामस्थिसंस्थां सृणिमपि कमलं पुस्तकं ज्ञानमुद्राम् ।
बिभ्राणां बाहुदण्डैः सुललितवरदापूर्वशक्त्यावृतां तां
मुद्गान्नासक्तचित्तां मधुमदमुदितां साकिनीं भावयामः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं सां सीं समलवरयूं साकिन्यै नमः । वं शं षं सं मां रक्ष रक्ष अस्थ्यात्मानं नमः ॥

इति पायूपस्थमध्यगतचतुर्दलमूलाधारकमलकर्णिकायां साकिनीं न्यस्य, तद्दलेषु पूर्ववत् तदावृतिशक्तीः न्यसेत् । यथा—

ऐं ह्रीं श्रीं वं वरदायै नमः, शं श्रियै, षं षण्डायै, सं सरस्वत्यै नमः ॥

अथ—

भ्रूमध्ये बिन्दुपद्मे दलयुगकलिते शुक्लवर्णां कराब्जैः
बिभ्राणां ज्ञानमुद्रां डमरुकममलामक्षमालां कपालम् ।

षड्वक्त्रां मज्जसंस्थां त्रिणयनलसितां हंसवत्यादियुक्तां
हारिद्रान्नैकसक्तां सकलसुखकरीं हाकिनीं भावयामः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं हां हीं ह म ल व र यूं हाकिन्यै नमः ३ हं क्षं मां रक्ष रक्ष मज्जात्मानं नमः ॥

इति भ्रूमध्यगतद्विदलाज्ञाकमलकर्णिकायां हाकिनीं न्यस्य तद्दक्षवामदलयोः क्रमेण—

ऐं ह्रीं श्रीं हं हंसवत्यै नमः, क्षं क्षमावत्यै नमः ॥

इति तच्छक्तिद्वयं न्यसेत् । तदनु—

मुण्डव्योमस्थपद्मे दशशतदलके कर्णिकाचन्द्रसंस्थां
रेतोनिष्ठां समस्तायुधकलितकरां सर्वतोवक्त्रपद्माम् ।
आदिक्षान्तार्णशक्तिप्रकरपरिवृतां सर्ववर्णां भवानीं
सर्वान्नासक्तचित्तां परशिवरसिकां याकिनीं भावयामः ॥

इति ध्यात्वा—

ऐं ह्रीं श्रीं यां यीं य म ल व र यूं याकिन्यै नमः । ३ अं . . . क्षं (५१) मां रक्ष रक्ष शुक्रात्मानं नमः ॥

इति ब्रह्मरन्ध्रगतसहस्रदलसरसिजकर्णिकायां याकिनीं न्यस्य तद्दलेषु प्रतिविंशतिदलं तदावरणशक्तीः अमृताद्याः क्षमावत्यन्ताः पूर्वोक्ताः प्राग्वत् न्यसेत् ॥

राशिन्यासः

रक्तश्वेतहरित्पाण्डुचित्रकृष्णपिशङ्गकान् ।
कपिशबभ्रुकिम्मीरकृष्णधूम्रान् क्रमात् स्मरेत् ॥

राशीनिति शेषः । इति ध्यात्वा—

ऐं ह्रीं श्रीं अं आं इं ईं मेषाय नमः । दक्षपादे ॥
३ उं ऊं वृषभाय नमः । लिङ्गदक्षभागे ॥

३ ॠं ॠं ऌं ॡं मिथुनाय नमः । दक्षकुक्षौ ॥
३ एं ऐं कर्काय नमः । हृदयदक्षभागे ॥
३ ओं औं सिंहाय नमः । दक्षबाहुमूले ॥
३ अं अः शं षं सं हं ळं कन्यायै नमः । दक्षशिरोभागे ॥
३ कं खं गं घं ङं तुलायै नमः । वामशिरोभागे ॥
३ चं छं जं झं ञं वृश्चिकाय नमः । वामबाहुमूले ॥
३ टं ठं डं ढं णं धनुषे नमः । हृदयवामभागे ॥
३ तं थं दं धं नं मकराय नमः । वामकुक्षौ ॥
३ पं फं बं भं मं कुम्भाय नमः । लिङ्गवामभागे ॥
३ यं रं लं वं क्षं मीनाय नमः । वामपादे ॥

पीठन्यासः

सितासितारुणश्यामहरित्पीतान्यनुक्रमात् ।
पुनः क्रमेण देवेशि पञ्चाशत्पीठसञ्चयः ॥

इति भावयित्वा, मातृकाभिः समं पूर्वोक्तेषु तासां स्थानेषु पीठानि क्रमेण विन्यसेत् । यथा—

ऐं ह्रीं श्रीं अं कामरूपाय नमः । शिरसि ॥
३ आं वाराणस्यै नमः । मुखवृत्ते ॥
३ इं नेपालाय नमः । दक्षनेत्रे ॥
३ ईं पौण्ड्रवर्धनाय नमः । वामनेत्रे ॥
३ उं पुरस्थिरकाश्मीराय नमः । दक्षकर्णे ॥
३ ऊं कान्यकुब्जाय नमः । वामकर्णे ॥
३ ऋं पूर्णशैलाय नमः । दक्षनासापुटे ॥
३ ॠं अर्बुदाचलाय नमः । वामनासापुटे ॥
३ ऌं आम्रातकेश्वराय नमः । दक्षगण्डे ॥
३ ॡं एकाम्राय नमः । वामगण्डे ॥

३ एं त्रिस्रोतसे नमः । ऊर्ध्वोष्ठे ॥

३ ऐं कामकोटये नमः । अधरोष्ठे ॥

३ ओं कैलासाय नमः । ऊर्ध्वदन्तपङ्क्तौ ॥

३ औं भृगुनगराय नमः । अधोदन्तपङ्क्तौ ॥

३ अं केदाराय नमः । जिह्वाग्रे ॥

३ अः चन्द्रपुष्करिण्यै नमः । कण्ठे ॥

३ कं श्रीपुराय नमः । दक्षबाहुमूले ॥

३ खं ओङ्काराय नमः । दक्षकूर्परे ॥

३ गं जालन्धराय नमः । दक्षमणिबन्धे ॥

३ घं मालवाय नमः । दक्षकराङ्गुलिमूले ॥

३ ङं कुलान्तकाय नमः । दक्षकराङ्गुल्यग्रे ॥

३ चं देवीकोटाय नमः । वामबाहुमूले ॥

३ छं गोकर्णाय नमः । वामकूर्परे ॥

३ जं मारुतेश्वराय नमः । वाममणिबन्धे ॥

३ झं अट्टहासाय नमः । वामकराङ्गुलिमूले ॥

३ ञं विरजायै नमः । वामकराङ्गुल्यग्रे ॥

३ टं राजगेहाय नमः । दक्षोरुमूले ॥

३ ठं महापथाय नमः । दक्षजानुनि ॥

३ डं कोलापुराय नमः । दक्षगुल्फे ॥

३ ढं एलापुराय नमः । दक्षपादाङ्गुलिमूले ॥

३ णं कालेश्वराय नमः । दक्षपादाङ्गुल्यग्रे ॥

३ तं जयन्तिकायै नमः । वामोरुमूले ॥

३ थं उज्जयिन्यै नमः । वामजानुनि ॥

३ दं चित्रायै नमः । वामगुल्फे ॥

३ धं क्षीरिकायै नमः । वामपादाङ्गुलिमूले ॥

३ नं हस्तिनापुराय नमः । वामपादाङ्गुल्यग्रे ॥

३ पं उड्डीशाय नमः । दक्षपार्श्वे ॥

३ फं प्रयागाय नमः । वामपार्श्वे ॥
३ बं षष्टीशाय नमः । पृष्ठे ॥
३ भं मायापुर्यै नमः । नाभौ ॥
३ मं जलेशाय नमः । जठरे ॥
३ यं मलयाय नमः । हृदये ॥
३ रं श्रीशैलाय नमः । दक्षस्कन्धे ॥
३ लं मेरवे नमः । गलपृष्ठे ॥
३ वं गिरिवराय नमः । वामस्कन्धे ॥
३ शं महेन्द्राय नमः । हृदयादिदक्षकराङ्गुल्यन्तम् ॥
३ षं वामनाय नमः । हृदयादिवामकराङ्गुल्यन्तम् ॥
३ सं हिरण्यपुराय नमः । हृदयादिदक्षपादाङ्गुल्यन्तम् ॥
३ हं महालक्ष्मीपुराय नमः । हृदयादिवामपादाङ्गुल्यन्तम् ॥
३ ळं ओड्याणाय नमः । हृदयादिगुह्यान्तम् ॥
३ क्षं छायाछत्राय नमः । हृदयादिमूर्धान्तम् ॥

इति षडवयवकः षोढान्यासः समाप्तः

महाषोढान्यासस्तु श्रीषोडशाक्षरीविषयकः । तदुपासकैः तत्कर्तव्यतापक्षे तन्त्रान्तरात् ज्ञातव्यः । इह ग्रन्थविस्तरभिया न लिखितः ॥

श्रीचक्रन्यासः

अस्य श्रीचक्रन्यासेत्यनन्तरं जपप्रकरणे वक्ष्यमाणेन विधिना ऋष्यादीन् न्यस्य, आह्निकप्रकरणोक्तवत् ध्यात्वा, श्रीदेव्या उपचारमन्त्रेण पुष्पाञ्जलिं दत्वा,

शरीरं चिन्तयेदादौ निजं श्रीचक्ररूपकम् ।
त्वगाद्याकारनिर्मुक्तं ज्वलत्कालाग्निसन्निभम् ॥

ऐं ह्रीं श्रीं समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनीचक्रदेवताभ्यो नमः—इति सर्वाङ्गे व्यापकं न्यस्य,

ऐं ह्रीं श्रीं गं गणपतये नमः । दक्षोरौ ॥
३ क्षं क्षेत्रपालकाय नमः । दक्षांसे ॥
३ यां योगिनीभ्यो नमः । वामांसे ॥
३ वं वटुकाय नमः । वामोरौ ॥
३ लं इन्द्राय नमः । पादाङ्गुष्ठद्वयाग्रे ॥
३ रं अग्नये नमः । दक्षजानुनि ॥
३ टं यमाय नमः । दक्षपार्श्वे ॥
३ क्षं निर्ऋतये नमः । दक्षांसे ॥
३ वं वरुणाय नमः । मूर्ध्नि ॥
३ यं वायवे नमः । वामांसे ॥
३ सं सोमाय नमः । वामपार्श्वे ॥
३ हं ईशानाय नमः । वामजानुनि ॥
३ हं सः ब्रह्मणे नमः । मूर्ध्नि ॥
३ अं अनन्ताय नमः । मूलाधारे ॥

त्रैलोक्यमोहनचक्रन्यासः

ऐं ह्रीं श्रीं अं आं सौः त्रैलोक्यमोहनचक्राय नमः—इति व्यापकं न्यस्य,

ततः ३ आद्यचतुरश्ररेखायै नमः—इति दक्षांसपृष्ठादिवक्ष्यमाणेषु स्थानेषु अञ्जलिना व्यापकं न्यस्य,

ऐं ह्रीं श्रीं अणिमासिद्ध्यै नमः । दक्षांसपृष्ठे ॥
३ लघिमासिद्ध्यै नमः । दक्ष[1]पाण्यङ्गुल्यग्रेषु ॥
३ महिमासिद्ध्यै नमः । दक्षोरुसन्धौ ॥
३ ईशित्वसिद्ध्यै नमः । दक्षपादाङ्गुल्यग्रेषु ॥

[1] दोःपृष्ठे—ब२, ब३.

३ वशित्वसिद्ध्यै नमः । वामपादाङ्गुल्यग्रेषु ॥
३ प्राकाम्यसिद्ध्यै नमः । वामोरुसन्धौ ॥
३ भुक्तिसिद्ध्यै नमः । वामपाण्यङ्गुल्यग्रेषु ॥
३ इच्छासिद्ध्यै नमः । वामांसपृष्ठे ॥
३ प्राप्तिसिद्ध्यै नमः । शिखामूले ॥
३ सर्वकामसिद्ध्यै नमः । शिरःपृष्ठे ॥

ऐं ह्रीं श्रीं चतुरश्रमध्यरेखायै नमः—इति वक्ष्यमाणाङ्गेषु व्यापकं न्यस्य,

ऐं ह्रीं श्रीं ब्राह्म्यै नमः । पादाङ्गुष्ठद्वये ॥
३ माहेश्वर्यै नमः । दक्षपार्श्वे ॥
३ कौमार्यै नमः । मूर्ध्नि ॥
३ वैष्णव्यै नमः । वामपार्श्वे ॥
३ वाराह्यै नमः । वामजानुनि ॥
३ इन्द्राण्यै नमः । दक्षजानुनि ॥
३ चामुण्डायै नमः । दक्षांसे ॥
३ महालक्ष्म्यै नमः । वामांसे ॥

ऐं ह्रीं श्रीं चतुरश्रान्त्यरेखायै नमः—इति वक्ष्यमाणाङ्गेषु व्यापकं न्यस्य,

ऐं ह्रीं श्रीं सर्वसङ्क्षोभिण्यै नमः । पादाङ्गुष्ठद्वये ॥
३ सर्वविद्राविण्यै नमः । दक्षपार्श्वे ॥
३ सर्वाकर्षिण्यै नमः । मूर्ध्नि ॥
३ सर्ववशङ्कर्यै नमः । वामपार्श्वे ॥
३ सर्वोन्मादिन्यै नमः । वामजानुनि ॥
३ सर्वमहाङ्कुशायै नमः । दक्षजानुनि ॥
३ सर्वखेचर्यै नमः । दक्षांसे ॥
३ सर्वबीजायै नमः । वामांसे ॥
३ सर्वयोनये नमः । द्वादशान्ते ॥

३ सर्वत्रिखण्डायै नमः । पादाङ्गुष्ठद्वये ॥

३ अं आं सौः त्रैलोक्यमोहनचक्रेश्वर्यै त्रिपुरायै नमः । हृदये ॥

एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्ताः सन्त्विति हृदि चक्रसमर्पणं न्यस्य ॥

सर्वाशापरिपूरकचक्रन्यासः

ऐं क्लीं सौः सर्वाशापरिपूरकचक्राय नमः—इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं कामाकर्षिण्यै नित्याकलायै नमः । दक्षकर्णपृष्ठे ॥

३ बुद्ध्याकर्षिण्यै नमः । दक्षांसे ॥

३ अहङ्काराकर्षिण्यै नमः । दक्षकूर्परे ॥

३ शब्दाकर्षिण्यै नमः । दक्षकरपृष्ठे हस्ततलपृष्ठयोः ॥

३ स्पर्शाकर्षिण्यै नमः । दक्षोरौ, दक्षस्फिजि ॥

३ रूपाकर्षिण्यै नमः । दक्षजानुनि ॥

३ रसाकर्षिण्यै नमः । दक्षगुल्फे ॥

३ गन्धाकर्षिण्यै नमः । दक्षपादतले, दक्षप्रपदे ॥

३ चित्ताकर्षिण्यै नमः । वामपादतले, वामप्रपदे ॥

३ धैर्याकर्षिण्यै नमः । वामगुल्फे ॥

३ स्मृत्याकर्षिण्यै नमः । वामजानुनि ॥

३ नामाकर्षिण्यै नमः । वामोरौ, वामस्फिजि ॥

३ बीजाकर्षिण्यै नमः । वामकरपृष्ठे, वामकरतलपृष्ठयोः ॥

३ आत्माकर्षिण्यै नमः । वामकूर्परे ॥

३ अमृताकर्षिण्यै नमः । वामांसे ॥

३ शरीराकर्षिण्यै नमः । वामकर्णपृष्ठे ॥

३ ऐं क्लीं सौः सर्वाशापरिपूरकचक्रेश्वर्यै नमः । हृदये ॥

एताः गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्रा इत्यादि प्राग्वत् ॥

ो ॥

शक्तयः

सर्वसङ्क्षोभणचक्रन्यासः

ऐं ह्रीं श्रीं ह्रीं क्लीं सौः सर्वसङ्क्षोभणचक्राय नमः—-इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं अनङ्गकुसुमायै नमः । दक्षशङ्खे ॥ (शङ्खो नाम ललाटास्थि)
३ अनङ्गमेखलायै नमः । दक्षजत्रुणि ॥ (जत्रु नाम बाहुमूलसन्धिः)
३ अनङ्गमदनायै नमः । दक्षोरौ ॥
३ अनङ्गमदनातुरायै नमः । दक्षगुल्फे ॥
३ अनङ्गरेखायै नमः । वामगुल्फे ॥
३ अनङ्गवेगिन्यै नमः । वामोरौ ॥
३ अनङ्गाङ्कुशायै नमः । वामजत्रुणि ॥
३ अनङ्गमालिन्यै नमः । वामशङ्खे ॥
३ ह्रीं क्लीं सौः सर्वसङ्क्षोभणचक्रेश्वर्यै नमः । हृदये ॥

एताः गुप्ततरयोगिन्यः सर्वचक्रे समुद्रा इत्यादि प्राग्वत् ॥

सर्वसौभाग्यदायकचक्रन्यासः

ऐं ह्रीं श्रीं हैं ह्क्लीं ह्सौः सर्वसौभाग्यदायकचक्राय नमः—इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं सर्वसङ्क्षोभिण्यै नमः । ललाटमध्ये ॥
३ सर्वविद्राविण्यै नमः । ललाटदक्षभागे ॥
३ सर्वाकर्षिण्यै नमः । दक्षगण्डे ॥
३ सर्वाह्लादिन्यै नमः । दक्षांसे ॥
३ सर्वसम्मोहिन्यै नमः । दक्षपार्श्वे ॥
३ सर्वस्तम्भिन्यै नमः । दक्षोरौ ॥
३ सर्वजृम्भिण्यै नमः । दक्षजङ्घायाम् ॥
३ सर्ववशङ्कर्यै नमः । वामजङ्घायाम् ॥
३ सर्वरञ्जिन्यै नमः । वामोरौ ॥
३ सर्वोन्मादिन्यै नमः । वामपार्श्वे ॥
३ सर्वार्थसाधिन्यै नमः । वामांसे ॥
३ सर्वसम्पत्तिपूरिण्यै नमः । वामगण्डे ॥

३ सर्वमन्त्रमय्यै नमः । ललाटवामभागे ॥

३ सर्वद्वन्द्वक्षयङ्कर्यै नमः । शिरःपृष्ठे ॥

३ हैं ह्क्लीं ह्सौः सर्वसौभाग्यदायकचक्रेश्वर्यै त्रिपुरवासिन्यै नमः । हृदये ॥

एताः सम्प्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राः इत्यादि समर्पणं न्यसेत् ॥

सर्वार्थसाधकचक्रन्यासः

ऐं ह्रीं श्रीं ह्सैं ह्स्क्लीं ह्स्सौः सर्वार्थसाधकचक्राय नमः—इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं सर्वसिद्धिप्रदायै नमः । दक्षनेत्रे, दक्षनासापुटे ॥

३ सर्वसम्पत्प्रदायै नमः । नासामूले, दक्षसृक्किणि ॥

३ सर्वप्रियङ्कर्यै नमः । वामनेत्रे, दक्षस्तने ॥

३ सर्वमङ्गलकारिण्यै नमः । वामबाहुमूले, दक्षवृषणे ॥

३ सर्वकामप्रदायै नमः । वामोरुमूले, सीविन्या दक्षभागे ॥

३ सर्वदुःखविमोचिन्यै नमः । वामजानुनि, सीविन्या वामभागे ॥

३ सर्वमृत्युप्रशमन्यै नमः । दक्षजानुनि, वामस्तने ॥

३ सर्वविघ्नविनाशिन्यै नमः । गुदे, वामवृषणे ॥

३ सर्वाङ्गसुन्दर्यै नमः । दक्षोरुमूले, वामसृक्किणि ॥

३ सर्वसौभाग्यदायिन्यै नमः । दक्षबाहुमूले, वामनासापुटे ॥

३ ह्सैं ह्स्क्लीं ह्स्सौः सर्वार्थसाधकचक्रेश्वर्यै त्रिपुराश्रियै नमः । हृदये ॥

एताः कुलोत्तीर्णयोगिन्यः सर्वार्थसाधके चक्रे समुद्रा इत्यादि पूर्ववत् ॥

सर्वरक्षाकरचक्रन्यासः

ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्राय नमः—इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं सर्वज्ञायै नमः । दक्षनासापुटे ॥

३ सर्वशक्त्यै नमः । दक्षसृक्किणि (ओष्ठप्रान्तः) ॥

३ सर्वैश्वर्यप्रदायिन्यै नमः । दक्षस्तने ॥

३ सर्वज्ञानमय्यै नमः । दक्षमुष्के ॥

३ सर्वव्याधिविनाशिन्यै नमः । [1]सीविन्याम्, सीविन्या दक्षभागे ॥
(सीविनी—अण्डद्वयमध्यवर्तिनी सिरा) ॥

३ सर्वाधारस्वरूपायै नमः । वाममुष्के (वामवृषणे), सीविन्या वामभागे ॥

३ सर्वपापहरायै नमः । वामस्तने ॥

३ सर्वानन्दमय्यै नमः । वामसृक्किणि ॥

३ सर्वरक्षास्वरूपिण्यै नमः । वामनासापुटे ॥

३ सर्वेप्सितफलप्रदायै नमः । नासाग्रे ॥

३ ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्रेश्वर्यै त्रिपुरमालिन्यै नमः । हृदि ॥

एताः निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्रा इत्यादि प्राग्वत् ॥

सर्वरोगहरचक्रन्यासः

ऐं ह्रीं श्रीं ह्रीं श्रीं सौः सर्वरोगहरचक्राय नमः—इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं अं . . . अः (१६) ब्लूं वशिनीवाग्देवतायै नमः । दक्षचिबुके ॥

३ कं . . . ङं (५) क्ल्ह्रीं कामेश्वरीवाग्देवतायै नमः । दक्षकण्ठे ॥

३ चं . . . ञं (५) न्व्लीं मोदिनीवाग्देवतायै नमः । हृदयदक्षभागे ॥

३ टं . . . णं (५) य्लूं विमलावाग्देवतायै नमः । नाभिदक्षभागे ॥

३ तं . . . नं (५) ज्म्रीं अरुणावाग्देवतायै नमः । नाभिवामभागे ॥

३ पं . . . मं (५) ह्स्ल्व्यूं जयिनीवाग्देवतायै नमः । हृदय वामभागे ॥

३ यं . . . वं (४) झ्म्र्यूं सर्वेश्वरीवाग्देवतायै नमः । वामकण्ठे ॥

[1] एतदादिषु स्थानेषु तत्र तत्र कोशेषु व्यत्यासो दृश्यते.

३ शं . . . क्षं (६) क्ष्म्रीं कौलिनीवाग्देवतायै नमः । वामचिबुके ॥

३ ह्रीं श्रीं सौः सर्वरोगहरचक्रेश्वर्यै त्रिपुरासिद्धायै नमः । हृदि ॥

एताः रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादि पूर्ववत् ॥

आयुधन्यासः

अथ हृदि त्रिकोणं विभाव्य तत्र प्रागादिदिक्षु क्रमेण आयुधानां चतुष्टयं न्यसेत् । यथा—

ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः सर्वजम्भनेभ्यो बाणेभ्यो नमः । त्रिकोणपृष्ठे ॥

३ धं सर्वसम्मोहनाय धनुषे नमः । त्रिकोणदक्षे, वामे ॥

३ ह्रीं सर्ववशीकरणाय पाशाय नमः । त्रिकोणाग्रे, ऊर्ध्वभागे ॥

३ क्रों सर्वस्तम्भनाय अङ्कुशाय नमः । त्रिकोणवामे, दक्षभागे ॥

सर्वसिद्धिप्रदचक्रन्यासः

ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्ल्रीं ह्स्रौः सर्वसिद्धिप्रदचक्राय नमः—इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं मूलप्रथमकूटं कामरूपपीठस्थायै महाकामेश्वर्यै नमः । त्रिकोणाग्रकोणे ॥

३ मूलद्वितीयकूटं पूर्णगिरिपीठस्थायै महावज्रेश्वर्यै नमः । तद्दक्षकोणे ॥

३ मूलतृतीयकूटं जालन्धरपीठस्थायै महाभगमालिन्यै नमः । तद्वामकोणे ॥

३ मूलं ओड्याणपीठस्थायै महात्रिपुरसुन्दर्यै नमः । तन्म . ॥

अथ तदन्तस्सपर्याप्रकरणोक्तप्रकारेण षोडशस्वरान् विभाव्य षोडशनित्या न्यसेत् । यथा—कामेश्वरीनित्यामन्त्रमुच्चार्य कामेश्वरीनित्यायै नमः । एवंप्रकारेण अवशिष्टाश्चतुर्दश नित्या विन्यस्य मध्ये मूलमुच्चार्य षोडशीं न्यसेत् ॥

ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्ल्रीं ह्स्रौः सर्वसिद्धिप्रदचक्रेश्वर्यै त्रिपुराम्बायै नमः । हृदि ॥

एताः अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्रा इत्यादि प्राग्वत् चक्रसमर्पणं न्यसेत् ॥

सर्वानन्दमयचक्रन्यासः

ऐं ह्रीं श्रीं मूलं सर्वानन्दमयचक्राय नमः—इति व्यापकं न्यस्य,

ऐं ह्रीं श्रीं मूलं श्रीललितायै नमः । हृदयमध्ये ॥

३ एषा परापररहस्ययोगिनी सर्वानन्दमये चक्रे समुद्रा ससिद्धिः सायुधा सशक्तिः सवाहना सपरिवारा न्यस्ताऽस्तु ॥

३ मूलं सर्वानन्दमयचक्रेश्वर्यै श्रीललितायै नमः इति हृदि न्यस्य योनिमुद्रां प्रदर्श्य मूलं जप्त्वा पुनः कराङ्गन्यासं कुर्यात् ॥

इति नित्यार्णवोक्तश्रीचक्रन्यासः । इमौ षोढाचक्रन्यासौ श्रीषोडशाक्षर्या अपि साधारणौ ॥

इति न्यासप्रकरणं पञ्चमं समाप्तम् ॥

जपप्रकरणम्

अथ यौवनोल्लासे जपप्रकरणं षष्ठमारभ्यते । अत्र सूत्रकृतः पुरश्चरणादिकं न विधित्सितम्, काम्यकर्मण्येव तस्यावश्यकत्वात् । "मपञ्चकालाभेऽपि नित्यक्रम-प्रत्यवमृष्टिः," "पञ्चपर्वसु विशेषार्चा च" इत्येताभ्यां सूत्राभ्यां नित्यनैमित्तिकावेव क्रमावभिधाय "यदि काम्यमीप्सेत्" इति होमखण्डसूत्रगतेन यदिपदेन काम्यहोम-कर्मणः कृताकृतत्वज्ञापनात् । युक्तं चैतत् । तथा हि—

शुभं वाऽप्यशुभं वाऽपि काम्यं कर्म करोति यः ।
तस्याखिलं व्रजेन्मन्त्रो न तस्मात्तत्परो भवेत् ॥

काम्यकर्मप्रसक्तानां तावन्मात्रं भवेत् फलम् ।
निष्कामं भजतां देवमखिलाभीष्टसिद्धयः ॥ इति ॥

देवेत्युपलक्षणं देव्या अपि । काम्यकर्मविधिश्च दुस्साधश्चेत् कस्यचित्काम्यफललिप्सा, तेन तदा श्यामाक्रमोक्तं पुरश्चरणादिकं काम्यहोमद्रव्यं च अनुसन्धेयम् । आभिचारादौ कर्तव्ये तु सामान्यक्रमोक्तं मन्त्रारित्वादिकं च ॥

जपविधिः

श्रीविद्याजपपूर्वाङ्गमन्त्राः । जपोपयुक्ता मुद्रास्तु उक्तपूर्वा एव । तत्रादौ श्रीदेव्यै उपचारमन्त्रेण पुष्पाञ्जलिं दत्वा पूर्ववत् प्राणानायम्य ऋष्यादि न्यसेत् । यथा—

अस्य श्रीमहात्रिपुरसुन्दरीपञ्चदशाक्षरीमहामन्त्रस्य ३ आनन्दभैरवाय ऋषये नमः—शिरसि । ३ पङ्क्त्यै छन्दसे नमः—मुखे । ३ श्रीमहात्रिपुरसुन्दर्यै देवतायै नमः—हृदि । ३ ऐं बीजाय नमः—गुह्ये । ३ सौः शक्तये नमः—पादयोः । ३ क्लीं कीलकाय नमः—नाभौ । (उक्तबीजशक्तिकीलकानि नाभिगुह्यपादेषु प्रायशो न्यस्तव्यानीति, मूलविद्याखण्डत्रयेणापि न्यस्तव्यानीति च केषांचिदभिमतम्) । ३ श्रीललितामहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे जपे विनियोगः—करसम्पुटे ॥

ऐं ह्रीं श्रीं मूलविद्यया सर्वाङ्गे त्रिः व्यापकम् ॥
३ क ए ई ल ह्रीं अङ्गुष्ठाभ्यां नमः ॥
३ ह स क ह ल ह्रीं तर्जनीभ्यां स्वाहा ॥
३ स क ल ह्रीं मध्यमाभ्यां वषट् ॥
३ क ए ई ल ह्रीं अनामिकाभ्यां हुं ॥
३ ह स क ह ल ह्रीं कनिष्ठिकाभ्यां वौषट् ॥
३ स क ल ह्रीं करतलकरपृष्ठाभ्यां फट् ॥

एवं हृदयादिन्यासः, यथा—

ऐं ह्रीं श्रीं क ए ई ल ह्रीं हृदयाय नमः ॥
३ ह स क ह ल ह्रीं शिरसे स्वाहा ॥

३ स क ल ह्रीं शिखायै वषट् ॥

३ क ए ई ल ह्रीं कवचाय हुम् ॥

३ ह स क ह ल ह्रीं नेत्रत्रयाय वौषट् ॥

३ स क ल ह्रीं अस्त्राय फट् ॥

भूर्भुवस्सुवरों इति दिग्बन्धः ॥

अथ ध्यानम् । तच्च पूर्वोक्तमेव ॥

श्रीषोडशाक्षर्यास्तु—दक्षिणामूर्तिः ऋषिः । करषडङ्गन्यासयोः तत्कूटषट्कमिति विशेषः ॥

ततः शक्त्युत्थापनमुद्रया स्वदेहे शून्यतां विभाव्य बिन्दुत्रयसपरार्धरूपां कामकलां विचिन्त्य तस्याः स्वात्मतया परिणामं श्रीगुरुमुखावगतं विभाव्य श्रीगुरुदेवतामन्त्रात्मनामैक्यं भावयेत् । अथ मूर्ध्नि शिरोमुद्रां न्यस्य ३ ऐं क्लीं ह्रीं त्रिपुरे भगवति स्वाहा इति द्वादशाक्षरीं कुरुकुल्लाविद्यां ततो हृदयमुद्रया (हृदि हस्तं दत्वा) ३ ॐ इत्येकाक्षरं सेतुं, अथ कण्ठे न्यासमुद्रया ३ ह्रीं इत्येकाक्षरं महासेतुं, तदनु नाभौ पूर्वमुद्रयैव ३ ॐ अं मूलं ऐं अं . . . क्षं (५१) ॐ इति ससत्यक्षरं निर्वाणमन्त्रं च त्रिस्त्रिः जपेत् ॥

[1]ऐं ह्रीं श्रीं क्लीं इति कामेश्वरीमन्त्रं स्वाधिष्ठाने त्रिः जपेत् ॥

[1]३ ईं इति कामकलामन्त्रं मूलाधारे त्रिः जपेत् ॥

[1]३ समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलोत्तीर्णनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनीभ्यो नमः । इति समष्टिमन्त्रम् ॥

३ ई ए[2] क ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं ॥ इति पञ्चदशाक्षरमुत्कीलनं सप्तवारं जपेत् ॥

३ विद्युदक्षीं परां विद्यां कालिकां देशभाषिणीम् ।
खड्गमुण्डविकाराख्यां व्याघ्रचर्मविभूषिताम् ॥
रक्तमाल्याम्बरधरां घोररूपां चतुर्भुजाम् ।
खड्गं शूलं कपालं च दधतीं तीक्ष्णनासिकाम् ॥
सिद्ध्यर्थं चिन्तयेद्देवीं सर्वविद्यासु जीविनीम् ॥

[1] एते अंशाः (श्री, अ१) कोशयोरेव दृश्यन्ते.

[2] हल—ब२, ब३, अ.

इति सञ्जीविनीं ध्यात्वा पञ्चधोपचर्य, ३ श्रीं क्लीं क्लीं हैं हैं क ल ह्रीं सौः ल स क ह्रीं क्लीं क्लीं ह्रीं श्रीं इति सप्तदशाक्षरं सञ्जीविनीमन्त्रं सप्तवारं जपेत् ॥

[1]ऐं ह्रीं श्रीं ह्रीं श्रीं हं सः क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं हं सः ह्रीं श्रीं इति त्रयोविंशत्यक्षरं प्राणमन्त्रं सप्तवारं जपेत् ॥

३ ॐ श्रीं ऐं क्लीं ह्रीं क ए ई ल ह्रीं ॐ ह्रीं श्रीं क्लीं ऐं ह स क ह ल ह्रीं ॐ ऐं श्रीं क्लीं ह्रीं ह क ल ए ह्रीं ह क ह ल ह्रीं ह ए क ल ह्रीं ॐ ऐं क्लीं श्रीं ह्रीं क ह ल ए ह्रीं क ह ए ल ह्रीं क ह ह ल ह्रीं हं सः ॐ ह्रीं श्रीं हं सः सोहं स क ल ह्रीं इति सप्तत्यक्षरं(?)दीपिनीमन्त्रं च प्रत्येकं सप्तवारं जपेत् ॥

इमे मन्त्राः पञ्चदशीषोडशीनां साधारणाः ॥

षोडशाक्षर्या असाधारणाः पञ्च मन्त्राः । यथा—

[1]ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ ह्रीं श्रीं ह स क्ष म ल व र यूं स ह क्ष म ल व र यीं य र ल व क्ष म ल व र यूं ॐ ॐ ह्रीं श्रीं ॐ सौः क्लीं ऐं इति महाकामेश्वरमन्त्रं दशवारं जपेत् ॥

३ (पञ्चदशी) क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं— त्रिवारं जपेत् ॥

३ (षोडशी) श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं सौः ऐं क्लीं ह्रीं श्रीं— त्रिवारं जपेत् ॥

३ ऐं क्लीं सौः बालायै नमः । ऐं क्लीं उच्छिष्टचाण्डालि सुमुखि देवि महापिशाचिनि ह्रीं ठः ठः ठः स्वाहा—त्रिवारं जपेत् ॥

[1] अस्य मन्त्रस्य विविधाः पाठाः ईषद्भिन्नाः तत्तत्कोशेषु दृश्यन्ते.

३ ॐ ह्रीं स्त्रीं हूं क्रीं श्रीं उग्रतारे सौः क्लीं ह्रीं श्रीं स्वाहा—
त्रिवारं जपेत् ॥

एते पञ्च मन्त्राः पञ्चरत्नपदेन उच्यन्ते ॥

ततः सूतकनिवारणाय प्रणवसम्पुटितां मूलविद्यां (पञ्चदशीं) दशवारमावर्त्य अनन्तरं विघ्नहरान् षण्मन्त्रान् त्रिस्त्रिर्जपेत् ॥ यथा—

ऐं ह्रीं श्रीं इ रि मि लि कि रि कि लि प रि मि रोम् ॥
३ ॐ ह्रीं नमो भगवति महात्रिपुरभैरवि मम त्रैपुररक्षां कुरु कुरु ॥
३ संहर संहर विघ्नरक्षोविभीषकान् कालय हुं फट् स्वाहा ॥
३ ब्लूं रक्ताभ्यो योगिनीभ्यो नमः ॥
३ सां सारसाय बह्वाशनाय नमः ॥
३ दु मु लु षु मु लु षु ह्रीं चामुण्डायै नमः ॥

एते कुल्लुकाद्या विघ्नहरान्ता जपस्य पूर्वाङ्गमन्त्राः । त्रितारीपूर्वकत्वं तु सर्वेषां सिद्धमेव ॥

ततः पेशीछन्नां सुवर्णरत्नस्फटिकमणिपुत्रजीवरुद्राक्षाद्यन्यतमनिर्मितां मालां श्यामाक्रमे वक्ष्यमाणेन संस्कारविधिना संस्कृतामादाय, क्वचित्पात्रे वामपाणौ वा निधाय, सामान्यार्घ्योदकेन शुद्धोदकेन वा मूलेनाभ्युक्ष्य,

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥

इति प्रार्थ्य, ह्रीं सिद्ध्यै नमः इति मन्त्रेण पुनः पुनः आवृत्तेन गन्धादिभिः पञ्चभिः गन्धपुष्पाभ्यामेव वा सम्पूज्य, ऐं ह्रीं श्रीं गं

अविघ्नं कुरु माले त्वं करे गृह्णामि दक्षिणे ।
जपकाले तु सततं प्रसीद मम सिद्धये ॥

इति दक्षिणहस्तेन मालां गृहीत्वा, मध्यमामध्यपर्वावलम्बिनीं तां तर्जन्या वामहस्तेन चास्पृशन् एकमणिग्रहणे अन्यमनुपाददानः क्रमादङ्गुष्ठाग्रेण मणीन् परिवर्तयन् , माला जृम्भाक्षुताद्यकुर्वन् अनिद्राणः, एतेषां सम्भवे आचम्य देवताऽऽत्मत्वं भावयन् , माला

मपातयन् प्रमादपतितायामुक्तसंस्कारं कृत्वा खटखटाशब्दमकुर्वाणः अश्लिष्टमनुच्चारयन् असम्भाषमाणो मालामप्रदर्शयन् अन्यदप्युक्तमाचरन् श्रीगुरुमुखादवगतं षडर्थाद्यन्यतममर्थं चतुर्विधैक्यशून्यषट्कावस्थापञ्चकविषुवत्सप्तकमन्त्रचैतन्यादिरहस्यजातं चानुसन्दधानो यथाऽधिकारं मनसोपांशुना वा सहस्रं त्रिशतं शतं वा मूलविद्यामारम्भे प्रोक्तसङ्ख्याऽवधौ च प्रणवपुटितां सकृज्जपित्वा उत्तराङ्गमन्त्रान् जपदशमांशमावर्तयेत् ॥

जपोत्तराङ्गमन्त्राः

ते तु त्रिपुराद्यष्टचक्रेश्वरीमन्त्रा अष्टौ—

ऐं ह्रीं श्रीं अं आं सौः, ३ ऐं क्लीं सौः, ३ ह्रीं क्लीं सौः, ३ हैं ह्क्लीं ह्सौः, ३ ह्सैं ह्स्क्लीं ह्स्सौः, ३ ह्रीं क्लीं ब्लें, ३ ह्रीं श्रीं सौः, ३ ह्स्रैं ह्स्क्लीं ह्स्सौः ॥

मूलमेकं—ऐं ह्रीं श्रीं क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं ॥

तत्तत्तिथिनित्याविद्या—ताश्च शुक्लपक्षे कामेश्वर्यादिचित्राऽन्ताः । कृष्णपक्षे तु चित्राऽऽदिकामेश्वर्यन्ताः । तिथिवृद्धावेकां नित्यां दिनद्वये, तिथिक्षये एकस्मिन् दिवसे नित्याद्वयं, इति क्रमेण जप्याः । यथा—

ऐं ह्रीं श्रीं अं ऐं स क ल ह्रीं नित्यक्लिन्ने मदद्रवे सौः ॥

३ आं ऐं भग भुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जें ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशं आनय स्त्रीं हर ब्लें ह्रीम् ॥

३ इं ॐ ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा ॥

३ ईं ॐ क्रों भ्रों क्रौं झ्रौं छ्रौं ज्रौं स्वाहा ॥

३ उं ॐ ह्रीं वह्निवासिन्यै नमः ॥

३ ऊं ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं ॥

३ ऋं ह्रीं शिवदूत्यै नमः ॥

३ ॠं ॐ ह्रीं हुं खे च चे क्षः स्त्रीं हुं क्षें ह्रीं फट् ॥

३ ऌं ऐं क्लीं सौः ॥

३ ॡं हसकलरडैं हसकलरडीं हसकलरडौः ॥

३ एं ह्रीं फ्रें स्रूं क्रों आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फ्रें ह्रीम् ॥

३ ऐं भ्म्र्यौं ॥

३ ओं स्वौं ॥

३ औं ॐ नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहार-
कारिके जातवदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल
ह्रां ह्रीं ह्रूं र र र र र र र ज्वालामालिनि हुं फट् ॥

३ अं च्क्रौम् ॥

अङ्गोपाङ्गप्रत्यङ्गीभूता बाला अन्नपूर्णा अश्वारूढा मन्त्रास्त्रयो वक्ष्यमाणा इति च त्रयोदश ॥

ऐं ह्रीं श्रीं ऐं क्लीं सौः सौः क्लीं ऐं ऐं क्लीं सौः । इति श्रियोऽङ्गबाला ॥

३ ह्रीं श्रीं क्लीं ॐ नमो भगवति अन्नपूर्णेश्वरि ममाभिलषितमन्नं
देहि स्वाहा । इति श्रिय उपाङ्गमन्नपूर्णा ॥

३ ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा । इति
श्रीप्रत्यङ्गमश्वारूढा ॥

कालनित्या तु सूत्रकृताऽनुपात्ता ॥

अथ पुनः ऋष्यादिमानसपूजाऽन्तं विधाय, सबीजाः सर्वसङ्क्षोभिण्यादिमुद्राः आयुधमुद्राश्च प्रदर्श्य,

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥

इति श्रीदेव्या वामकरे सामान्यार्घ्यसलिलप्रक्षेपेण जपं निवेद्य—

त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ।
शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥

इति मालां प्रार्थ्य, निगूढं निधाय, श्रीगुरुपादुकामन्त्रं मुहुरुच्चारयन् गुरुपरमगुरुपरमेष्ठिगुरून् तत्तन्नामपूर्वं प्रणमेत् ॥ इति जपविधिः ॥

रश्मिमालामन्त्राः

(तत्र वैदिकेषु स्वरपूर्वं पाठः)

ॐ भूर्भुवः सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ इति त्रिंशद्वर्णा गायत्री ॥ मूलाधारे ॥ १ ॥

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि ॥
स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः ॥

इत्यैन्द्री विद्या सप्तषष्ट्यर्णा सङ्कटे भयनाशिनी ॥ हृदये ॥ २ ॥

ॐ घृणिः सूर्य आदित्योम् ॥ इत्यष्टार्णा गौरी तेजोदा ॥ फाले ॥ ३ ॥

ॐ ॥ इति प्रणवः केवलो ब्रह्मविद्या मुक्तिप्रदा ॥ ब्रह्मरन्ध्रे ॥ ४ ॥

ॐ परोरजसे सावदोम् ॥ इति नवार्णा तुरीयगायत्री स्वैक्यनिमर्शिनी ॥ द्वादशान्ते ॥ ५ ॥

रश्मिपञ्चकमेतत् मूलाधारहृत्फालविधिबिलद्वादशान्तस्थानबीजतया भावनीयम् । द्वादशान्तस्थानं तु ललाटस्योत्तरभागः ॥

ॐ सूर्याक्षितेजसे नमः । खेचराय नमः । असतो मां सद्गमय । तमसो मां ज्योतिर्गमय । मृत्योर्मामृतं गमय । उष्णो भगवान् शुचिरूपः । हंसो भगवान् शुचिरप्रतिरूपः ॥

विश्वरूपं घृणिनं जातवेदसं हिरण्मयं ज्योतिरेकं तपन्तम् ।
सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥

ॐ नमो भगवते सूर्याय । अहोवाहिनि वाहिन्यहोवाहिनि वाहिनि स्वाहा ॥

वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाथमानाः ।
अपध्वान्तमूर्णुहि पूर्धिचक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥

पुण्डरीकाक्षाय नमः । पुष्करेक्षणाय नमः । अमलेक्षणाय नमः । कमलेक्षणाय नमः । विश्वरूपाय नमः । श्रीमहाविष्णवे नमः । इति षोडशमन्त्रसमष्टिरूपिणी चक्षुष्मतीविद्या दूरदृष्टिसिद्धिप्रदा ॥ मूलाधारे ॥ ६ ॥

ॐ गन्धर्वराज विश्वावसो ममाभिलषितां कन्यां प्रयच्छ स्वाहा ॥ इत्युत्तमकन्याविवाहदायिनी ॥ हृदय ॥ ७ ॥

ॐ नमो रुद्राय पथिषदे स्वस्ति मां संपारय ॥ इति मार्गसङ्कट-हारिणी । फाले ॥ ८ ॥

ॐ तारे तुत्तारे तुरे स्वाहा । इति जलापच्छमनी ॥ ब्रह्मरन्ध्रे ॥ ९ ॥

अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः ॥ इति महाव्याधिशमनी नामत्रयीविद्या ॥ द्वादशान्ते ॥ १० ॥

एतद्रश्मिपञ्चकं मूलाधारादिपरिकरतया ज्ञेयम् ॥

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा ॥ इति महागणपतिवि... प्रत्यूहशमनी ॥ मूलाधारे ॥ ११ ॥

ॐ नमः शिवायै । ॐ नमः शिवाय ॥ इति द्वादशार्णा शिवतत्त्वविमर्शिनी ॥ हृदये ॥ १२ ॥

ॐ जुं सः मां पालय पालय ॥ इति दशार्णा मृत्योरपि मृत्युरेषा विद्या ॥ फाले ॥ १३ ॥

ॐ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ॐ ॥ इति श्रुतिधारिणी विद्या ॥ ब्रह्मरन्ध्रे ॥१४॥

अं . . . क्षं (५१) ॥ इति सबिन्दुरकारादिक्षकारान्तवर्णात्मिका मातृका सर्वज्ञताकरी द्वादशान्ते ॥ १५ ॥

पञ्चेमा रश्मयो मूलादिरक्षात्मकतया द्रष्टव्याः ॥

ह स क ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं ॥ इति लोपामुद्राविद्या स्वस्वरूपविमर्शिनी ॥ मूलाधारे ॥ १६ ॥

क्लीं हैं ह्सौः स्हौः हैं क्लीं ॥ इति षट्कूटा सम्पत्करी विद्या ॥ हृदये ॥ १७ ॥

सं सृष्टिनित्ये स्वाहा हं स्थितिपूर्णे नमः रं महासंहारिणि कृशे चण्डकालि फट् रं ह्स्ख्फ्रें महानाख्ये अनन्तभास्करि महाचण्डकालि फट् रं महासंहारिणि कृशे चण्डकालि फट् हं स्थितिपूर्णे नमः सं सृष्टिनित्ये स्वाहा ह्स्ख्फ्रें महाचण्डयोगेश्वरि ॥ इति विद्यापञ्चकरूपिणी कालसङ्कर्षिणी [1]परमायुःप्रदा ॥ फाले ॥ १८ ॥

ऐं ह्रीं श्रीं ह्स्ख्फ्रें ह्सौः अहमहं अहमहं ह्सौः ह्स्ख्फ्रें श्रीं ह्रीं ऐं ॥ इति [2]शुद्धज्ञानदा शाम्भवी विद्या ॥ ब्रह्मरन्ध्रे ॥ १९ ॥

सौः ॥ इयं पराविद्या । द्वादशान्ते ॥ २० ॥

एताः पञ्च रश्मयो मूलाद्यधिष्ठानतया कलनीयाः ॥

ऐं क्लीं सौः सौः क्लीं ऐं ऐं क्लीं सौः ॥ इति नवाक्षरी श्रीदेव्यङ्गभूता बाला ॥ २१ ॥

ह्रीं श्रीं क्लीं ॐ नमो भगवति अन्नपूर्णे ममाभिलषितं अन्नं देहि स्वाहा ॥ इति श्रीदेव्या उपाङ्गभूता अन्नपूर्णा ॥ २२ ॥

ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा ॥ इयं श्रीदेवीप्रत्यङ्गभूता अश्वारूढा ॥ २३ ॥

श्रीविद्यागुरुपादुकामन्त्रस्तु आह्निकप्रकरणे एवोक्त इह पठितव्यः । तद्यथा—

ऐं ह्रीं श्रीं ह्स्ख्फ्रें ह स क्ष म ल व र यूं स ह क्ष म ल व र
यीं ह्सौं स्हौः अमुकानन्दनाथश्रीगुरुश्रीपादुकां पूजयामि नमः ॥ २४ ॥

अथ मूलविद्या । सा च गुरुमुखादवगता कादिनाम्नी—क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं ॥ २५ ॥

बाला अन्नपूर्णा अश्वारूढा श्रीपादुका चेत्येताभिश्चतसृभिः युक्ता मूलविद्या साम्राज्ञी मूलाधारे विलोचनीया ॥

[1] परमार्थप्रदा—अ१, भ, ब२, ब३.   [2] चतुर्दशार्णा शु—अ, ब२, ब३.

ऐं नमः उच्छिष्टचाण्डालि मातङ्गि सर्ववशङ्करि स्वाहा ॥ इति श्यामाङ्गभूता लघुश्यामा ॥ २६ ॥

ऐं क्लीं सौः वदवद वाग्वादिनि स्वाहा ॥ इयं श्यामोपाङ्गभूता वाग्वादिनी ॥ २७ ॥

ॐ ओष्ठापिधाना नकुली दन्तैः परिवृता पविः ॥

सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥ २८ ॥

इयं श्यामाप्रत्यङ्गभूता नकुलीविद्या ॥

श्रीविद्यागुरुपादुकैव प्रथमबीजत्रयस्थाने बालासहिता श्यामागुरुपादुका भवति । यथा—

ऐं क्लीं सौः ह्स्ख्फ्रें ह स क्ष म ल व र यूं स ह क्ष म ल व र यीं ह्सौं स्हौः अमुकानन्दनाथश्रीगुरुश्रीपादुकां पूजयामि नमः ॥ २९ ॥

ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीमातङ्गीश्वरि सर्वजनमनोहारि सर्वमुखरञ्जिनि क्लीं ह्रीं श्रीं सर्वराजवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वसत्त्ववशङ्करि सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं ॥ ३० ॥

इत्यष्टनवतिवर्णा राजश्यामला पूर्वोक्ताभिः अङ्गोपाङ्गप्रत्यङ्गपादुकेत्येताभिश्चतसृभिः विद्याभिः सहिता हृच्चक्रे यष्टव्या ॥

ॡं वाराहि-ॡं उन्मत्तभैरविपादुकाभ्यां नमः ॥ इयं वार्ताल्यङ्गभूता लघुवार्ताली ॥ ३१ ॥

ॐ ह्रीं नमो वाराहि घोरे स्वप्नं ठः ठः स्वाहा ॥ इयं स्वप्ने शुभाशुभवक्त्री वार्ताल्या उपाङ्गभूता स्वप्नवाराही ॥ ३२ ॥

ऐं नमो भगवति महामाये पशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु हुं फट् स्वाहा । इयं वार्तालीप्रत्यङ्गभूता तिरस्करिणी ॥ ३३ ॥

ऐं ग्लौं ह्स्ख्फ्रें ह स क्ष म ल व र यूं स ह क्ष म ल व र यीं ह्सौं स्हौः अमुकानन्दनाथश्रीपादुकां पूजयामि नमः ॥ एषा वार्तालीगुरुपादुका ॥ ३४ ॥

ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि अन्धे अन्धिनि नमः । रुन्धे रुन्धिनि नमः । जम्भे जम्भिनि नमः । मोहे मोहिनि नमः । स्तम्भे स्तम्भिनि नमः । सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भनं कुरु कुरु शीघ्रं वश्यं ऐं ग्लौं ठः ठः ठः ठः हुं अस्त्राय फट् ॥ इति द्वादशोत्तरशताक्षरो महावाराहीमन्त्रः ॥ ३५ ॥

पूर्वोक्ताभिश्चतसृभिः युक्ता इयं महावाराही आज्ञाचक्रे परिपूज्या ॥

प्रथमद्वितीयकूटयोः हृल्लेखावर्जं पञ्चदश्येव त्रयोदशाक्षरी श्रीपूर्तिविद्या ब्रह्मरन्ध्रे यष्टव्या । तद्यथा—

क ए ई ल ह स क ह ल स क ल ह्रीं—इयं कादिपूर्तिविद्या ॥ ह स क ल ह स क ह ल स क ल ह्रीं—इयं हादिपूर्तिविद्या ॥ ३६ ॥

प्रथमत्रिकस्थाने त्रितारीकुमारीवाक् ग्लौं इत्यष्टबीजपूर्वा श्रीगुरुपादुकैव महापादुका सर्वमन्त्रसमष्टिरूपिणी स्वैक्यविमर्शिनी महासिद्धिप्रदायिनी द्वादशान्ते वरिवस्या । यथा—

ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं ग्लौं ह्स्ख्फ्रें ह स क्ष म ल व र यूं स ह क्ष म ल व र यीं ह्सौं स्हौः अमुकानन्दनाथश्रीगुरुश्रीपादुकां पूजयामि नमः ॥ ३७ ॥

इति रश्मिमाला सम्पूर्णा ॥

आहत्य रश्मिमालामन्त्राः सप्तत्रिंशत् । एते ब्राह्मे मुहूर्ते सकृदावर्तनीया इत्युक्तमेव प्राक् । श्रीक्रमोक्ताः सर्वे एते अन्ये च मन्त्राः साधकेषु परमप्रेम्णा प्रकटीकृत्य लिखिताः श्रीगुरुमुखादवगम्यैव पठिताः महते श्रेयसे नान्यथेति श्रीशिवशासनम् ॥

पुस्तके लिखितान् मन्त्रानवलोक्य जपेत्तु यः ।
स जीवन्नेव चण्डालो मृतः श्वानो भविष्यति ॥

इति साङ्ख्यायनतन्त्रवचनेन गुरुमुखागमं विना जपस्य निषेधात् ॥

[1]रश्मिमालामन्त्राणां ऋष्यादयः

अथ रश्मिमालायाः ऋष्यादयो लिख्यन्ते—

तत्र प्रथमं गायत्र्याः ऋष्यादयस्तु आगतपूर्वा एव ॥ १ ॥

अभयंकरमन्त्रस्य गृत्समद ऋषिः । त्रिष्टुप् छन्दः । अभयंकरो देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

आरूढो वारणेन्द्रं दशशतनयनश्यामलः कोमलाङ्गः
वर्मी वीरः प्रतापी प्रतिभटदहनप्रज्वलच्चक्रपाणिः ।
दोर्भिर्दिव्यायुधाढ्यैर्मणिगणखचितैर्देवमन्त्रीसनाथो
दत्वाऽभीष्टानि शश्वत् परिहृतदुरितः पातु विश्वं महेन्द्रः ॥ २ ॥

सौरमन्त्रस्य देवभार्गव ऋषिः । गायत्री छन्दः । सूर्यो देवता । तत्प्रसाद सिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

धृतपद्मद्वयं भानुं तेजोमण्डलमध्यगम् ।
सर्वाधिव्याधिशमनं छायाश्लिष्टतनुं भजे ॥ ३ ॥

प्रणवस्य ब्रह्मा ऋषिः । गायत्री छन्दः । परमात्मा देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

ओंकारवाच्यमुच्चण्डचण्डांशुसदृशप्रभम् ।
वासुदेवाभिधं ब्रह्म विश्वगर्भमुपास्महे ॥ ४ ॥

तुरीयगायत्रीमन्त्रस्य विश्वामित्र ऋषिः । गायत्री छन्दः । सविता देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

देवीं तुरीयगायत्रीं तुर्यातीतपदाश्रयाम् ।
परोरजःप्रकाशात्मचितिरूपामहं भजे ॥ ५ ॥

[1] सर्वोऽप्ययं खण्डः एकस्मिन् (अ) कोश एवोपलब्धः तत्र तत्र अपपाठग्रन्थपातादिदोषाशङ्कितोऽपि प्रमेयातिशयदृष्ट्या अत्र संयोजित इत्यावेद्यते.

चक्षुष्मतीमन्त्रस्य भार्गव ऋषिः । नाना छन्दांसि । चक्षुष्मती देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

चक्षुस्तेजोमयं पुष्पकन्तुकं बिभ्रतीं करैः ।
रौप्यसिंहासनारूढां देवीं चक्षुष्मतीं भजे ॥ ६ ॥

विश्वावसुमन्त्रस्य संमोहन ऋषिः । गायत्री छन्दः । विश्वावसुर्देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

रक्ताङ्गरागारुणभूषणाढ्यं वीणाधरं वीटिकयोल्लसन्तम् ।
गन्धर्वकन्याजनगीयमानं विश्वावसुं सद्गृहतीं नमामि ॥ ७ ॥

पथिविद्रुद्रमन्त्रस्य वामदेव ऋषिः । पङ्क्तिश्छन्दः । पथिविद्रुद्रो देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

आत्तसज्यधनुर्बाणं कणं वृषभसंस्थितम् ।
अन्नपूर्णासमाश्लिष्टं पथिविद्रुद्रमाश्रये ॥ ८ ॥

तारामन्त्रस्य मत्स्य ऋषिः । विराट् छन्दः । ताराम्बा देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

नौकसिंहासनारूढां शाक्यदर्शनदेवताम् ।
जलापच्छमनीं वन्दे तारां वारिदमेचकाम् ॥ ९ ॥

नामत्रयमन्त्रस्य काश्यपात्रिभरद्वाजा ऋषयः । अनुष्टुप् छन्दः । श्रीमहाविष्णुर्देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

समस्तदुस्तरव्याधिसंघध्वंसपटीयसे ।
अच्युतानन्तगोविन्दनाम्ने धाम्ने नमो नमः ॥ १० ॥

महागणपतिमन्त्रस्य गणक ऋषिः । नृचद्गायत्री छन्दः । श्रीमहागणपतिर्देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

बीजापूरगदेक्षुकार्मुकरुजा चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।

ध्येयो वल्लभया सपद्मकरया श्लिष्टोज्ज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नेश्वरोऽभीष्टदः ॥ ११ ॥

शिवशक्त्यात्मकपञ्चाक्षरमन्त्रस्य वामदेव ऋषिः । पङ्क्तिश्छन्दः । उमामहेश्वरो देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

वामांसन्यस्तवामेतरकरकमलायास्तथा वामहस्त-
न्यस्तारक्तोत्पलायाः स्तनभरविलसद्वामहस्तः प्रियायाः ।
सर्पाकल्पाभिरामः श्रितपरशुमृगेष्टः करैः काञ्चनाभः
ध्येयः पद्मासनस्थः स्मरललितवपुः संपदे पार्वतीशः ॥ १२ ॥

अमृतमृत्युञ्जयमन्त्रस्य कहोळक ऋषिः । विराट् छन्दः । अमृतमृत्युञ्जय-सदाशिवो देवता । तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्—

स्फुटितनळिनसुस्थं मौळिबद्धेन्दुरेखा-
स्रवदमृतरसार्द्रं चन्द्रवह्न्यर्कनेत्रम् ।
स्वकरकलितमुद्रापाशवेदाक्षमालं
स्फटिकरजतमुक्तागौरमीशं नमामि ॥ १३ ॥

श्रुतधारिणीमन्त्रस्य भार्गव ऋषिः । अनुष्टुप् छन्दः । ब्रह्मा देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

चतुराननमम्भोजनिषण्णं भारतीसखम् ।
अक्षमालावराभीतिकमण्डलुधरं भजे ॥ १४ ॥

मातृकामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । मातृकासरस्वती देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

पञ्चाशता मातृकया ह्यारसाखिलदेहया ।
समस्तविद्यारूपिण्या धन्योऽहं मातृकाम्बया ॥ १५ ॥

श्रीहादिलोपामुद्रामन्त्रस्य दक्षिणामूर्तिः ऋषिः । पङ्क्तिश्छन्दः । श्रीमहा-त्रिपुरसुन्दरी देवता । ह ५ बीजं, ह ६ शक्तिः, स ४ कीलकम् । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । बालया षडङ्गम् । ध्यानम्—

श्रीदेवीभूषितोत्सङ्गं सान्द्रसिन्दूररोचिषम् ।
हकारादिमनोर्वाच्यं वन्दे कामेश्वरं हरम् ॥ १६ ॥

संपत्करीमन्त्रस्य कण्ठ ऋषिः । गायत्री छन्दः । संपत्सरस्वती देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

अनेककोटिमातङ्गतुरङ्गरथपत्तिभिः ।
सेवितामरुणाकारां वन्दे सम्पत्सरस्वतीम् ॥ १७ ॥

चण्डयोगेश्वरीमन्त्रस्य ईश्वर ऋषिः । नाना छन्दांसि । चण्डयोगेश्वरी देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

सृष्टिस्थितिभ्यां संहृत्या नाख्यया भासया श्रिताम् ।
कूलकन्था(?)कपालाढ्यां चण्डयोगेश्वरीं भजे ॥ १८ ॥

परशंभुनाथमन्त्रस्य वामदेव ऋषिः । पङ्क्तिश्छन्दः । परशंभुनाथो देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

पूर्णाहन्तास्वरूपाय तस्मै परमशंभवे ।
आनन्दताण्डवोद्दण्डपण्डिताय नमो नमः ॥ १९ ॥

परामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । परा सरस्वती देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

अकळङ्कशशाङ्काभा त्र्यक्षा चन्द्रकलावती ।
मुद्रापुस्तलसद्बाहा पातु मां परमा कला ॥ २० ॥

बालामन्त्रस्य दक्षिणामूर्तिः ऋषिः । गायत्री छन्दः । बाला त्रीपुरसुन्दरी देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

अरुणकिरणजालैरञ्चिताशावकाशा
विधृतजपवटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकल्हारसंस्था
निवसतु हृदि बाला नित्यकल्याणशीला ॥ २१ ॥

अन्नपूर्णेश्वरीमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । अन्नपूर्णेश्वरी देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

आदाय दक्षिणकरेण सुवर्णदर्वीं
दुग्धान्नपूर्णमितरेण च रत्नपात्रम् ।
अन्नप्रदाननिरतां नवहेमवर्णां
अम्बां भजे कनकभूषणमाल्यशोभाम् ॥ २२ ॥

अश्वारूढामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । अश्वारूढा देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

बद्ध्वा पाशेनाङ्कुशेन कृष्यमाणाश्वसाध्यकम् ।
घ्नन्तीं वेत्रेण फालस्थपाणिमश्वासनां भजे ॥

ध्यानान्तरम्—

अश्वारूढा कराग्रे नवकनकमयीं वेत्रयष्टिं दधाना
दक्षेऽन्ये धारयन्ती स्फुरति धनुर्लतापाशहस्ता सुसाध्या ।
देवी नित्यप्रसन्ना शशिशकलतसत्केशपाशा त्रिणेत्रा
दद्यादद्यानवद्यां श्रियमखिलसुखप्राप्तिहृद्यां श्रियै नः ॥ २३ ॥

श्रीविद्यागुरुपादुकामन्त्रस्य दक्षिणामूर्तिः ऋषिः । पङ्क्तिश्छन्दः । श्रीविद्या-गुरुपादुका देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

तेजोमयमहाविद्यां शेखराञ्चितमस्तकाम् ।
रक्तां चतुर्भुजां वन्दे श्रीविद्यागुरुपादुकाम् ॥ २४ ॥

श्रीललिताया . . . . . . ॥ २५ ॥

लघुश्यामामन्त्रस्य मतङ्ग ऋषिः । विराट् छन्दः । श्रीलघुश्यामाम्बा देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

स्मरेत् प्रथमपुष्पिणीं रुधिरबिन्दुशोणाम्बरां
गृहीतमधुपात्रिकां मदविघूर्णनेत्राञ्चलाम् ।

घनस्तनभरालसां गळितचूळिकां श्यामलां
करस्फुरितवल्लकीविमलशङ्खताटङ्किनीम् ॥
माणिक्यवीणामुपलालयन्तीं मदालसां मञ्जुळवाग्विलासाम् ।
माहेन्द्रनीलद्युतिकोमलाङ्गीं मातङ्गकन्यां मनसा स्मरामि ॥ इति वा ॥ २६ ॥

वागीश्वरीमन्त्रस्य कण्व ऋषिः । विराट् छन्दः । वागीश्वरी देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

अमलकमलसंस्था लेखिनीपुस्तकोद्यत्-
करयुगळसरोजा कुन्दमन्दारगौरा ।
धृतशशधरखण्डोल्लासिकोटीरचीटा
भवतु भवभयानां भङ्गिनी भारती नः ॥ २७ ॥

नकुलीवागीश्वरीमन्त्रस्य कहोळक ऋषिः । गायत्री छन्दः । नकुलीवागीश्वरी देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

नकुली वज्रदन्ताळी साध्यजिह्वाऽहिदंशिनी ।
भक्तवक्तृत्वजननी भावनीया सरस्वती ॥ २८ ॥

श्यामागुरुपादुकामन्त्रस्य मतङ्ग ऋषिः । पङ्क्तिश्छन्दः । श्यामागुरुपादुका देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

वन्दे गुर्वङ्घ्रिमकुटां श्यामलां शुकपाणिनीम् ।
समस्तसिद्धिजननीं श्यामलागुरुपादुकाम् ॥ २९ ॥

श्रीराजश्यामलामन्त्रस्य स्पष्टम् ॥ ३० ॥

लघुवाराहीमन्त्रस्य नारद ऋषिः । पङ्क्तिश्छन्दः । लघुवाराही देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

महार्णवे निपतितामुद्धरन्तीं वसुंधराम् ।
महादंष्ट्रां महाकायां नमाम्युन्मत्तभैरवीम् ॥ ३१ ॥

स्वप्नवाराहीमन्त्रस्य अग्निः ऋषिः । गायत्री छन्दः । स्वप्नवाराही देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

स्वप्ने शुभाशुभं भावि शासन्तीं भक्तकार्ययोः ।
दुःस्वप्नहारिणीं वन्दे वाराहीं स्वप्ननायिकाम् ॥ ३२ ॥

तिरस्करिणीमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । तिरस्करिणी देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

मुक्तकेशीं विवसनां सर्वाभरणभूषिताम् ।
स्वयोनिदर्शनान्मुह्यत्पशुवर्गां नमाम्यहम् ॥ ३३ ॥

वाराहीगुरुपादुकामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । वाराहीगुरुपादुका देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

देशिकाङ्घ्रिलसन्मौलिं खड्गिनीं च कपालिनीम् ।
भावयामि घनच्छायां पञ्चमीगुरुपादुकाम् ॥ ३४ ॥

श्रीमहावाराहीमन्त्रस्य स्पष्टम् ॥ ३५ ॥

श्रीपूर्तिविद्यामन्त्रस्य दक्षिणामूर्तिः ऋषिः । पङ्क्तिश्छन्दः । श्रीपूर्तिविद्या देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः ॥ ३६ ॥

महापादुकामन्त्रस्य दक्षिणामूर्तिः ऋषिः । पङ्क्तिश्छन्दः । श्रीमहापादुकाम्बा देवता । तत्प्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

सर्वविद्यामयीं सर्वशक्तिपीठस्वरूपिणीम् ।
कराग्रे हृदये मूले देशिकाङ्घ्रियुगत्रयम् ॥
दधतीं दीप्तभूषाढ्यां श्रीमहापादुकां नुमः ॥ ३७ ॥

इति रश्मिमालाया ऋष्यादयः ॥

इति जपप्रकरणं षष्ठं समाप्तम्

नैमित्तिकप्रकरणम्

पर्वसु नैमित्तिकार्चनविधः

उक्तेन क्रमेण नित्यक्रमनिरतः साधकः प्रतिमासं पञ्चपर्वसु नैमित्तिकमर्चनमाचरेत्—

नित्यार्चनरतैः सिद्धैः कार्यं नैमित्तिकार्चनम् ॥

इति तन्त्रराजवचनात् । तच्च नित्यार्चनाधिकसाधनविशेषकरणकम् । पर्वाणि तु कृष्णाष्टमी कृष्णचतुर्दशी दर्शः पूर्णिमा सङ्क्रान्तिश्चेति कुलार्णवोक्तानि । तत्र कालस्य कर्तव्यतायाश्च निर्णयः । सङ्क्रान्तिव्यतिरिक्तपर्वार्चनं सूर्यास्तमयोत्तरं दशघटिकाऽऽत्मके रात्रिपूर्वभागे कार्यम् । सङ्क्रमणसपर्या तु तत्तत्सङ्क्रान्तिपुण्यकालोपलक्षितासु घटिकासु । तदुक्तम्—

प्रागूर्ध्वं च दशैव मेषतुलयोः सिंहे वृषे वृश्चिके
कुम्भे षोडशपूर्वतोऽथ मिथुने मीने धनुःकन्ययोः ।
ऊर्ध्वाः षोडश कीर्तिताः प्रथमतस्त्रिंशत्तु कर्काटके
चत्वारिंशदथो परास्तु मकरे पुण्यप्रदा नाडिकाः ॥ इति ॥

नाडिकाः घटिकाः । अष्टमीचतुर्दशीदर्शपूर्णिमानां स्वस्वदिने पूजाकालव्याप्तौ न विवादः । दिनद्वये एकदेशव्याप्तौ यत्राधिका सा तिथिर्ग्राह्या । समव्याप्तौ परैव । तिथिवृद्धिह्रासवशेन चतुर्दशीदर्शयोः एकस्मिन्नेव दिने पूजाकालव्याप्तौ नैमित्तिकद्वयस्य तन्त्रेणानुष्ठानम् । तदा सङ्क्रान्तियोगे तु तत्र तस्यापि दिवासङ्क्रमणे सति नित्यार्चनस्य प्रासङ्गिकी सिद्धिः । यत्र चतुर्णां नैमित्तिकार्चनानां एकस्मिन्नेव काले सन्निपातः सम्भाव्यते तत्र तेषामप्येकतन्त्रतैव । यथा दमनसमर्पणस्य मुख्यकाले चैत्र्यां पूर्णिमायामसम्भवे तत्कृष्णचतुर्दशीदर्शादिज्येष्ठकृष्णचतुर्दशीदर्शान्ते गौणकाले । यथा च पवित्रारोपणस्य श्रावण्यामलाभे आ मिथुनसङ्क्रमणं आ च तुलासङ्क्रान्ति प्रोक्तासु तिथिषु आश्विनशुक्लाष्टमीनवमीचतुर्दशीपूर्णासु च तत्कृष्णचतुर्दशीदर्शयोश्च तादृशि विषये पूजाद्वयं त्रयं चतुष्टयं वा करिष्य इति सङ्कल्पयेदिति दिक् ॥

नित्यक्रमात् नैमित्तिके विशेषः

तत्र परिगणितेषु पर्वसु प्रातः नित्यक्रमं निर्वर्त्य रात्रौ अमुकपर्वप्रयुक्तं नैमित्तिकमर्चनं करिष्य इति सङ्कल्प्य यथाविभवं समारम्भविशेषेण मपञ्चककरणक एव क्रमो निर्वर्तनीयः । न तु "मपञ्चकालाभेऽपि नित्यक्रमप्रत्यवमृष्टिः" इति सूत्रेण नित्यक्रम इव प्रतिनिधिनाऽपि वा । चैत्राद्यासु पौर्णमासीषु तु वक्ष्यमाणेन विधिना तन्त्रान्तरोक्तेन दमनकादिसमर्पणमपि । सति सम्भवे आश्वयुज्यां तत्प्रतिपदादिपर्वान्तप्रयोगोऽप्यनुष्ठेयः, "पञ्चपर्वसु विशेषार्चा" इति सूत्रस्य नानाविधाऽङ्गशाल्यर्चाबोधकत्वात्, विविधाः शेषाः कालद्रव्यक्रियाऽऽदिरूपाण्यङ्गानि यस्यां तादृश्यर्चेति विग्रहात् ॥

निवेदने पक्षभेदाः

तत्र द्रवद्रव्यनिवेदने त्रयः पक्षा भवन्ति । पृथक् पृथक् पात्रस्थं हिमोदकादिकं ऐं ह्रीं श्रीं अमुकदेवताया अमुकं कल्पयामि नम इति तत्तन्नामघटितेनोपचारमन्त्रेण प्रधानदेव्यादिभ्यो नवमचक्रेश्वर्यन्ताभ्यस्त्रिपञ्चाशदुत्तरशतसङ्ख्याकाभ्यो देवताभ्यः प्रत्येकं निवेदयेत् । इह प्रधानदेव्या सह नित्याः षोडश, महाकामेश्वर्यादयश्चतस्रः, त्रिपुरादयः चक्रेश्वर्यो नव, कामेश्वरायुधदेव्यः चतस्र इति विवेकः । यदि वा प्रधानदेवतानिवेदनोत्तरं २ अङ्गदेवीभ्यो नित्याभ्यो अमुकौघायौघत्रयाय अणिमाऽऽदिभ्यो मातृभ्यो मुद्रादेवीभ्यो अणिमाऽऽदिभ्यो वा कामेश्वर्यादिनित्याकलाभ्यः अनङ्गकुसुमादिभ्यः सर्वसङ्क्षोभिण्यादिभ्यः सर्वसिद्धिप्रदाभ्यः सर्वज्ञादिभ्यो वशिन्यादिभ्यः आयुधदेवीभ्यो महाकामेश्वर्यादिभ्यः त्रिपुरादिचक्रेश्वरीभ्योऽमुकं कल्पयामीति तत्समष्ट्यै निवेदयेत् । अथवा प्रधानदेवतायै पृथङ् निवेद्य ऐं ह्रीं श्रीं हृदयदेव्यादिभ्यो नवचक्रेश्वर्यन्ताभ्योऽमुकं कल्पयामीति सर्वसमष्ट्यै निवेदयेदित्येकः ॥

अनेकपात्रासम्भवे अष्टादश चतुर्दश वा पात्राणि तत्तद्द्रव्यसम्भृतानि उपहृत्य पूर्वोक्तान्यतमेन प्रकारेण निवेदयेदिति द्वितीयः । अत्रौघत्रयसिद्धिमातृमुद्राणां पार्थक्यतदन्यत्वाभ्यां पात्राणामष्टादशत्वं चतुर्दशत्वं च ज्ञेयम् ॥

तत्राप्यसम्भवे प्रथमद्वितीययोः प्रकारयोः महति पात्रे सम्भृतं हिमोदकादिकमुपपात्रेण आदायादाय निवेद्य निवेद्य पात्रान्तरे निक्षिपेत् । अन्त्ये तु प्रकारे महापात्रस्थं सर्वाभ्यो देवताभ्यो युगपन्निवेदयेदिति तृतीयः ॥

कठिनद्रव्यनिवेदने पक्षद्वयम्। तत्र फलादिकमुक्तदेवतासमसङ्ख्याकमुक्तान्यतमेन प्रकारेण तत्तद्देवतायै निवेदयेदित्येकः । तदशक्तौ यथासम्भवमुपहृत्येति द्वितीयः ॥

पवित्रारोपणे दीपदाने च प्रथमपक्षीयः प्रथमप्रकार एव नान्यो हिमोदकादौ। सङ्कोचपक्षाश्रयणे बीजमशक्तिरवसराभावो वा। तन्त्रान्तरोक्तानां चतुराम्नायपञ्चसिंहासनपञ्चपञ्चिकाषड्दर्शनाङ्गदेवीभूतशक्तिसमयदेवतानामप्यर्चने अभ्युदय एवेति दिक् ॥

दमनविधिः

अथादौ दमनार्चनम् । चैत्रशुक्लचतुर्दश्यां सायं स्वयं दमनारामं गत्वा—

ॐ शिवप्रसादसम्भूत अत्र सन्निहितो भव ।
देवीकार्यं समुद्दिश्य नेतव्योऽसि शिवाज्ञया ॥

इति दमनमामन्त्र्य अस्त्रमन्त्रेण समूलं दमनलताः सपर्यापर्याप्ता उत्पाट्य, तदलाभे तद्गुच्छान्वा शस्त्रेण छित्वा स्वातन्त्र्याभावे [1]विक्रेतुरनुमत्या क्रयक्रीता वा आनीयानाय्य वा पवित्रे वंशादिपात्रे निधाय मूलविद्यया शुद्धाभिरद्भिः अभ्युक्ष्य ऐं ह्रीं श्रीं दमनाय अमुकं कल्पयामि नमः इत्यादिरीत्या उपचारमन्त्रैः गन्धपुष्पधूपदीपनैवेद्याख्यान् पञ्चोपचारान् आचर्य, सूक्ष्मनववस्त्रेण आच्छाद्य, यागमन्दिर एव क्वचन शुचिनि स्थले निधाय जागृयात् । जागरणं त्वभ्युदयाय । इत्यधिवासनम् । इदं च सद्योऽपि वा कार्यम् । समानमेतदुत्तरत्रापि कुसुमानाम् । दुग्धान्नादिनिवेद्यस्य तु सद्य एवोचितमधिवासनम् । अथ पूर्णिमायां रात्रौ प्रधानदेवीपूजोत्तरं आवरणार्चने—

षोडशार्णे जगन्मातः वाञ्छितार्थफलप्रदे ।
हृत्स्थान् पूरय मे कामान् देवि कामेश्वरेश्वरि ॥

इति देवीं प्रार्थ्य, नित्यार्चनक्रमेणैव श्रीदेव्याद्याः देवताः चतुराम्नायादिसमयान्तदेवताश्च दमनैः समभ्यर्च्य नित्यहोमत्रिगुणितं होमं कृत्वा मूलमन्त्रं च तथा जप्त्वा अङ्गमन्त्रांश्च तद्दशांशं श्रीगुरुमभिपूज्य शक्तिसामयिकान् सम्भाव्य तैः सह अन्यैश्च ब्राह्मणैः भुञ्जीत । एतस्य मुख्यकाले कर्तुमसम्भवे चैत्रवैशाखज्येष्ठानां कृष्णाष्टमीकृष्णचतुर्दश्योः वैशाखज्येष्ठयोश्च वा कुर्यात् ॥ इति दमनविधिः ॥

[1] अवीरक्रयक्रीतावा आनीय—भ.

चैत्रपूर्णिमाकृत्यम्

अस्यामेव पूर्णिमायां वसन्तोत्सवोऽपि विहितः । तत्र दमनार्पणवसन्तोत्सवौ तन्त्रेण करिष्ये इति सङ्कल्प्य तत्कालसम्भवानि सकल्हाराणि कर्पूरचन्दनोक्षितानि कुसुमानि पूर्ववत् अधिवास्य तैर्दमनकैश्च युगपदर्चयेत् ॥ इति चैत्रपूर्णिमाकृत्यम् ॥

वैशाखीकृत्यम्

अथ वैशाख्यां पूर्णिमायां नैवेद्यावसरे प्राग्वदधिवासितं हेमन्तकाले सङ्गृहीतं तुषारोदकं तदलाभे कर्पूरमृगनाभिसुरभिळं शीतळं सलिलं वा पूर्वोक्तान्यतमेन पक्षेण सावरणायै देवतायै निवेदयेत् । अवशिष्टं प्राग्वत् ॥ इति वैशाखकृत्यम् ॥

ज्येष्ठकृत्यम्

अथ ज्येष्ठायां प्राग्वदधिवासितानि कदलीपनसाम्रादीनि फलानि उक्तया रीत्या कयाचित् उक्तमन्त्रैः प्रधानदेव्यादिभ्यो निवेदयेत् । तैः अर्चयेदिति केचित् । अन्यत् समानम् ॥ इति ज्येष्ठकृत्यम् ॥

आषाढकृत्यम्

अथाषाढ्यां प्राग्वदधिवासनपूर्वकं श्रीदेव्यै कुङ्कुममिश्रं चन्दनं समर्प्य जातीकुसुमैः सावरणामभ्यर्च्य ताम्बूलावसरे लवङ्गैलाकङ्कोलानि उक्तेन प्रकारेण केनापि निवेदयेत् । शेषं पूर्ववत् ॥ इत्याषाढकृत्यम् ॥

पवित्रारोपणविधिः

तदनु श्रावण्यां पूर्णिमायां पवित्रारोपणम् । तानि च सुवर्णरौप्यताम्रान्यतमतन्तुपट्ट[1]सूत्रसरीपद्मदर्भमुञ्जशाणवल्कलकार्पासान्यतमसूत्रविनिर्मितानि । कार्पाससूत्रं तु सुवासिनीकर्तृकम् । उक्तान्यतमेन नवगुणितेन सूत्रेण निर्मितैः षोडशाङ्गुलायामैः तावत्सङ्ख्याकैः सरैः सम्पन्नं तावत्संङ्ख्याग्रंथिमदेकं पवित्रमित्येकः पक्षः । नवाङ्गुलायामसरग्रन्थिकं वेति द्वितीयः । तत्तदावरणगतशक्तिसमसङ्ख्याकाङ्गुलायामसर-

[1] सूत्रत्रिसरी—अ१. सूत्रत्रसरी—ब१, ब२, भ.

ग्रन्थिकं वेति तृतीयः । आदिमपक्षद्वये पवित्राणि सर्वेषां साधारणानि । अन्तिमे तु पक्षे मूलदेव्याः षोडशनवान्यतराङ्गुलायामसरग्रन्थिकम्, महाकामेश्वर्यादीनां तिसृणां त्र्यङ्गुलायामादिकम्, अङ्गदेवीनां षण्णां तत्सङ्ख्याकाङ्गुलायामादिकम्, नित्यानां पञ्चदशानां पञ्चदशाङ्गुलायामादिकम्, गुरुपङ्क्तित्रयस्य तत्तदोघसमसङ्ख्याङ्गुलायामादिकम्, आयुधदेवीनां चतुरङ्गुलायामादिकमिति विशेषः । पक्षत्रयेऽपि व्याप्तस्य श्रीगुरोः प्रधानदेवीवत् । जीवतस्तस्य स्वस्य च क्रमागमज्ञशिष्यशक्तिसामयिकानां च कण्ठादिनाभ्यन्तायाममङ्गीकृतपक्षान्यतमसङ्ख्यसरग्रन्थिकं एकग्रन्थिकं वा । क्रमः कालनित्याक्षरक्रमः । आगमः कादिकालीमतादिः । अन्येषां शक्तिसामयिकानां कण्ठादिनाभ्यन्तमानं नवसरमेकग्रन्थिकं च । वितानाद्देवताविष्टरायाममष्टोत्तरशतसरग्रन्थिकम् । शक्त्यावतारकं नाम मण्टपस्य तत्परिधिसमप्रमाणमेकसरग्रन्थिकम् । होमाग्नेः षोडशनवान्यतराङ्गुलायाममेकसरमेकग्रन्थिकं च पवित्रं कुर्यात् । ग्रन्थिः सूत्रवेष्टनरूपः । वेष्टनसङ्ख्या तूत्तमादिभेदेन षट्त्रिंशच्चतुर्विंशतिद्वादशात्मिका ऐच्छिकी वा । तन्मन्त्रस्तु बाला वा कवचं वा । उक्तपक्षत्रये एकतमस्यैवाश्रयणीयत्वं, मानसांकर्यं अनिष्टापादकं सर्वथा नाचरेदिति स्थितिः । इत्थमुपकल्पितानि गोरोचनकुङ्कुमरक्तचन्दनमृगमदपङ्कालिप्तानि लाक्षागैरिकान्यतरचित्रितग्रन्थिकानि पवित्राणि प्राग्वदधिवास्य श्रावण्यां रात्रौ शक्त्यवतारकं पवित्रं वितानालम्बयित्वा मण्टपं तत्सूत्रेणावेष्ट्य प्रधानदेवीपूजान्ते ज्ञानमुद्रोपात्तैः पुष्पैः समं श्रीदेव्याद्यावरणान्तदेवताभ्यः तत्तत्पादुकया पृथक् पृथक् समर्प्य अग्नये च पुरो निधाय श्रीगुरुशक्तिसामयिकेभ्यः प्रदाय स्वयं धृत्वा शिष्येभ्यो दद्यात् । एतावत्कर्तुमसम्भवे षण्णवत्यङ्गुलायामसरग्रन्थिकानि त्रीणि पवित्राणि कृत्वा श्रीदेव्यै समर्पयेत् । शेषं पूर्ववत् । एतन्मुख्यकालातिक्रमे मिथुनादितुलान्तसङ्क्रान्तिगतासु कृष्णाष्टमीकृष्णचतुर्दशीपूर्णिमासु वा कार्यम् ॥ इति पवित्रारोपणविधिः ॥

भाद्रपदकृत्यम्

ततो भाद्रपद्यां पूर्ववदधिवासितेनैकैकेन केतकीपुष्पेणालाभे पत्रेण वा ज्ञानमुद्रया सर्वाः देवता अर्चयेत् । पुष्पं तु निष्कासितकेसरमिति श्रीगुरुमुखागमः । शेषं समानम् ॥ इति भाद्रपदकृत्यम् ॥

आश्वयुजकृत्यम्

अथाश्वयुज्यां पुष्पविशेषं निवेद्य विशेषकरणकः क्रमः प्रवर्तनीयः । अथवा—

आश्वयुज्यां विशेषस्तु दर्शान्तप्रतिपत्तिथिम् ।
आरभ्य पूजयेत् देवीं गन्धपुष्पोपहारकैः ॥

इति तन्त्रराजवचनात् तच्छुक्लप्रतिपदादिपूर्णावधिकः प्रयोगोऽनुष्ठेयः । तत्र प्रतिपद्रात्रौ विशेषतः पुष्पं नैवेद्याद्युपचारैः क्रमं प्रवर्त्य प्रधानदेवतायै शतमाज्याहुतीः आवरणदेवताभ्यः तद्दशांशं हुत्वा जपं होमसमसङ्ख्याकं विधाय अविवाहिताक्षतां प्राङ्निमन्त्रितां कन्यामेकां अभ्यक्तस्नातां आसने उपवेश्य तस्यां देवीं आवाह्य बालया पञ्चधा उपचर्य यथाविभवं वसनाभरणानि दद्यात् । एवं द्वितीयादिचतुर्दश्यन्तं द्विशतादिहोमजपकन्याद्वयादिपूजनानि कृत्वा पूर्णिमायां वृद्ध्या शतेन सह षोडशशतहोमजपषोडशकन्यापूजनानि कुर्यादिति एकः पक्षः । प्रतिपदि प्रकृतिहोमः शतमाहुतयो वृद्धिहोमश्च शतं एवं जपः कन्यके द्वे । द्वितीयादिषु त्रिशतादिहोमजपौ त्र्यादिकन्यका इत्यपरः । एनयोरेकमाश्रयेत् । तिथिवृद्धौ प्रतिपदादिक्रमेण शतादिहोमादिकम् । तिथिह्रासे तु तस्मिन्नेव दिने तद्द्वितयकृत्यं, एकस्मिन्नेव काले होमादिकं च कुर्यात् । अवशिष्टमविशिष्टम् । एवं कृते विद्या सिद्धा भवति । राजा च साधकस्य अर्चको भवति । अथवा—कुलार्णवोक्तनवरात्रपक्षोऽपि एकोत्तरवृद्ध्या वा तदसम्भवे यथोक्तक्रमेणैव वा कर्तव्यः । अयं स्वतन्त्रो न तु पूर्णिमाऽङ्गम् । तत्पक्षे पूर्णिमापूजाऽपि प्रत्येकमुक्तरीत्या कर्तव्येति दिक् ॥ इत्याश्वयुजकृत्यम् ॥

कार्तिककृत्यम्

अथ कार्तिक्यां प्राग्वदधिवासितं कुङ्कुमं सावरणायै देव्यै समर्प्य गोधूमादिपिष्टप्रकृतिकैः घृतपूरितैः प्रज्वालितकर्पूरवर्तिभिः प्रदीपैः नित्यहोमक्रमेण तत्तद्देवताभ्यो हुत्वा देव्याः पुरः शुचिनि भूतले षोडश दीपान् दत्वा अङ्गदेवीभ्यो नित्याभ्यः ओघत्रयगुरुभ्यः तत्तत्स्थाने निवेश्य तदभितस्त्रिकोणादिचतुरश्रान्ताकृत्या च निधाय प्रतिदेवतमेकैकं दीपं निवेदयेत् । एतावदसम्भवे एकस्मिन्नेव भाजने मध्ये एकं तदभितो नव वा नवयोनिचक्राष्टदलकमलान्यतमालङ्कृते वा तत्र मध्ये एकं कोणेषु

दलेषु वाऽष्टौ दीपान् प्रज्वाल्य देव्यै मूलेन सप्रसूनं निवेदयेत् । शेषमभिहितवत् ॥ इति कार्तिककृत्यम् ॥

मार्गशीर्षकृत्यम्

अथ मार्गशीर्षपूर्णिमायां सावरणां श्रीदेवीं सुगन्धिभिः कुसुमैरभ्यर्च्य माषपिष्टापूपान् कर्पूरसुरभिलं नारिकेलोदकं च प्रागुक्तान्यतमया भङ्ग्या सर्वाभ्यो देवताभ्यो निवेदयेत् । अन्यदविशेषम् ॥ इति मार्गशीर्षकृत्यम् ॥

पौषकृत्यम्

ततः पौष्यां प्राग्वदधिवासपूर्वकं शर्करया गुडेन वा साकं गव्यं दुग्धं उक्तेन केनचित्प्रकारेण निवेदयेत् । अन्यदविशेषम् ॥ इति पौषकृत्यम् ॥

माघकृत्यम्

तदनु माघ्यां प्राग्वदधिवासितैः शुक्लैस्तिलैः अलाभे रक्तकृष्णैर्वा शुद्धैस्सकुसुमैरभ्यर्च्य शर्करादुग्धापूपान् निवेदयेत् । अत्रापूपाः गोधूमादिपिष्टप्रकृतिका इति सम्प्रदायः । इतरत् समानम् ॥ इति माघकृत्यम् ॥

फाल्गुनकृत्यम्

अथ फाल्गुन्यां सौवर्णराजतपुष्पैः पङ्कजैः कल्हारैः आम्रकुसुमैः मधूकैश्च यथासम्भवं मिलितैः प्राग्वदधिवासितैः सावरणां श्रीदेवीं वरिवस्येत् ॥ इति फाल्गुनकृत्यम् ॥

अयमेव नैमित्तिकार्चनविधिः गणपतिश्यामावार्तालीनां सामान्यक्रमोक्तानां देवतानाम् । सर्वत्रामुकपौर्णिमायां अमुकेन द्रव्यविशेषेण अमुकदेवतां पूजयिष्ये इति सङ्कल्पः ॥

अत्राधिकमासापाते एकमासकृत्यस्य मासद्वये आवृत्तिः । क्षयमासप्रसक्तौ त्वेकस्मिन् मासे मासद्वयकृत्यमपि कार्यं भवति । नैमित्तिकार्चनमुख्यगौणकालातिक्रमे मूलविद्यासहस्रजपः प्रायश्चित्तमाम्नातं तन्त्रराजे—

नैमित्तिकातिक्रमणे सहस्रं प्रजपेत्तथेति ॥ इति ॥

इति पञ्चपर्वार्चनविधिः ॥

तन्त्रान्तरोक्तेषु युगमन्वादिषु विशेषदिवसेष्वपि श्रीदेव्यर्चनं अभ्युदयायैव । सूत्रकारेण काम्यहोमस्यैवोक्तत्वात् तत्पूजाऽनुक्तिरिति शिवम् ॥ इति यौवनोल्लासे नैमित्तिकप्रकरणम् ॥

यथामति मयाऽकारि स्वयं श्रीक्रमपद्धतिः ।
श्रमं प्रमादस्खलितं क्षमयन्त्विह साधवः ॥

इति श्रीमद्भासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेन उमानन्दनाथेन विरचिते कल्पसूत्रानुसारिणि नित्योत्सवनिबन्धे अभिनवे यौवनोल्लासः तृतीयः सम्पूर्णः

प्रौढोल्लासः चतुर्थः—श्यामाक्रमः

उपोद्घातः

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
प्रधीरुमानन्दनाथः प्रौढोल्लासं तनोत्यमुम् ॥
यत्र श्रीमन्महाराज्ञीमन्त्रिण्याः क्रम ईरितः ।
प्रधानानुस्मृतिद्वारा न्याय्यं हि नृपसेवनम् ॥
त्रितार्या वालया चेह बालया वाऽऽदितोऽन्विताः ।
मन्त्राः क्रमजुषो दीक्षा त्वारम्भोल्लास ईरिता ॥

काल्यकृत्यं आह्निकं च

श्रीमान् साधकः श्यामलां देवीं आरिराधयिषुः श्रीक्रमोक्तक्रमेण काल्यकृत्याह्निके निर्वर्तयेत् । अत्र विशेषः—श्रीगुरुपादुकायामादौ त्रितारीस्थाने बालायोगः । सर्वकारणभूतायाः संविदश्चिन्तनं मूलाधारादिद्वादशान्ताख्यललाटोर्ध्वभागावधिकमेव । रश्मिस्रगननुस्मरणम् । तत्र तत्र यथोचितं सम्बुद्ध्यादीनामूहः । आदित्यमण्डले वक्ष्यमाणया भङ्ग्या सङ्गीतयोगिन्या भावनम् । मूलेन अर्घ्यदानम् । वक्ष्यमाणमृष्यादिन्यासत्रयं चेति । इदं चाह्निकं स्वतन्त्रोपास्तौ पुरश्चरणकाले च, न तु श्रीक्रमाङ्गत्वेन सहानुष्ठाने ॥

यागमन्दिरप्रवेशः

अथापराह्णे यागमन्दिरमागत्य द्वारस्थण्डिलं गोमयेनोपलिप्य यागगृहं च रङ्गवल्लीपुष्पमालावितानकादिभिश्चालङ्कृत्य द्वारस्य दक्षवामशाखयोः ऊर्ध्वभागे च क्रमेण—

ऐं क्लीं सौः भद्रकाल्यै नमः, ३ भैरवाय, ३ लम्बोदराय नमः ॥

इति तिस्रो द्वारदेवताः सम्पूज्य अन्तः प्रविष्टः ३ रक्तद्वादशशक्तियुक्ताय दीपनाथाय नमः इति पुष्पाञ्जलिना भूमौ दीपनाथमिष्ट्वा सपर्यासामग्रीं स्वस्य दक्षभागे निधाय दीपानभितः प्रज्वाल्य गन्धमाल्यादिभिः अलङ्कृतात्मा ताम्बूलेन जातीपत्रफललवङ्गैला-कर्पूराख्यपञ्चतिक्तेन वा सुरभिलवदनः सुप्रसन्नमनाः स्वास्तीर्णे ऊर्णामृदुनि शुचिनि बालातृतीयबीजेन द्वादशवारमभिमन्त्रिते मूलमन्त्रोक्षिते आसने ३ आधारशक्ति-कमलासनाय नमः इति प्राङ्मुख उदङ्मुखो वा पद्मासनाद्यन्यतमेन आसनेनोपविश्य ३ समस्तगुप्तप्रकटसिद्धयोगिनीचक्रदेवताश्रीपादुकाभ्यो नमः इति मूर्ध्नि बद्धाञ्जलिः स्ववामदक्षपार्श्वयोः क्रमेण गुरुपादुकया श्रीगुरुं महागणपतिमन्त्रेण च गणपतिं प्रणम्य ३ ऐं ह्रः अस्त्राय फट् इति मन्त्रेण मुहुरावृत्तेन अङ्गुष्ठादिकरतलान्तं कूर्परयोश्च विन्यस्य देहे च व्यापकं कृत्वा स्वस्य देवतैक्यं भावयन्—

ऐं क्लीं सौः अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

इति मन्त्रं सकृदुच्चार्य युगपद्वामपार्ष्णिभूतलत्रिराघातकरास्फोटत्रयक्रूरदृष्ट्यवलोकनपूर्वकं तालत्रयेण भौमान्तरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् । तालत्रयं नाम दक्षतर्जनीमध्यमाभ्यामधोमुखाभ्यां वामकरतले सशब्दमुपर्युपरि त्रिरभिघातः ॥

प्राणायामः

अथ ३ नम इत्यङ्गुष्ठमन्त्रमुच्चार्य अंकुशेन शिखां बद्ध्वा श्रीक्रमोक्तप्रकारेण भूतशुद्धिं आत्मप्राणप्रतिष्ठां च विधाय मूलेन विंशतिधा षोडशधा दशधा सप्तधा त्रिधा वा प्राणानायम्य ॥

षडंगादिन्यासपञ्चकम

तेजोरूपदेवीमयं भावयन्नात्मानं निजदेहे न्यासजालात्मकं वज्रकवचं आमुञ्चेत् ।

यथा—

ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं सर्वजनमनोहरि हृदयाय नमः ॥
७ सर्वमुखरञ्जिनि शिरसे स्वाहा ॥

७ क्लीं ह्रीं श्रीं सर्वराजवशङ्करि शिखायै वषट् ॥
७ सर्वस्त्रीपुरुषवशङ्करि कवचाय हुम् ॥
७ सर्वदुष्टमृगवशङ्करि नेत्रत्रयाय वौषट् ॥
७ सर्वसत्ववशङ्करि सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा अस्त्राय फट् ॥

इति मन्त्रान् हृदयादिषु न्यसेत् इति षडङ्गन्यासः ॥ १ ॥

अथ श्रीक्रमोक्तमातृकान्यासं कृत्वा ॥ २ ॥

ऐं क्लीं सौः रत्यै नमः इति मूलाधारे, ३ प्रीत्यै नमः इति हृदये, ३ मनोभवाय नमः इति मुखे न्यसेत् ॥ इति रत्यादिन्यासः ॥ ३ ॥

ऐं क्लीं सौः ऐं ह्रीं श्रीं ऐं क्लीं सौः नमः । ब्रह्मरन्ध्रे ॥
३ ॐ नमो नमः । ललाटे ॥
३ भगवति नमः । भ्रूमध्ये ॥
३ श्रीमातङ्गीश्वरि नमः । दक्षनेत्रे ॥
३ सर्वजनमनोहरि नमः । वामनेत्रे ॥
३ सर्वमुखरञ्जिनि नमः । मुखे ॥
३ क्लीं नमः । दक्षश्रोत्रे ॥
३ ह्रीं नमः । वामश्रोत्रे ॥
३ श्रीं नमः । कण्ठे ॥
३ सर्वराजवशङ्करि नमः । दक्षांसे ॥
३ सर्वस्त्रीपुरुषवशङ्करि नमः । वामांसे ॥
३ सर्वदुष्टमृगवशङ्करि नमः । हृदये ॥
३ सर्वसत्ववशङ्करि नमः । दक्षस्तने ॥
३ सर्वलोकवशङ्करि नमः । वामस्तने ॥
३ अमुकं मे वशमानय नमः । नाभौ ॥
३ स्वाहा नमः । स्वाधिष्ठाने ॥
३ सौः क्लीं ऐं श्रीं ह्रीं ऐं नमः । मूलाधारे च न्यसेत् ॥

इति मूलखण्डसप्तदशकन्यासः ॥ ४ ॥

एतानेव प्रतिलोममूलमन्त्रखण्डान् मूलाधारस्वाधिष्ठाननाभिवामस्तनदक्षस्तन-हृदयवामदक्षांसकण्ठवामदक्षश्रोत्रमुखवामदक्षनेत्रभ्रूमध्यललाटब्रह्मरन्ध्रेषु क्रमात् न्यसेत् । यथा—

ऐं क्लीं सौः सौः क्लीं ऐं श्रीं ह्रीं ऐं नमः । मूलाधारे ॥
३ स्वाहा नमः । स्वाधिष्ठाने ॥
३ अमुकं मे वशमानय नमः । नाभौ ॥
३ सर्वलोकवशङ्करि नमः । वामस्तने ॥
३ सर्वसत्ववशङ्करि नमः । दक्षस्तने ॥
३ सर्वदुष्टमृगवशङ्करि नमः । हृदये ॥
३ सर्वस्त्रीपुरुषवशङ्करि नमः । वामांसे ॥
३ सर्वराजवशङ्करि नमः । दक्षांसे ॥
३ श्रीं नमः । कण्ठे ॥
३ ह्रीं नमः । वामश्रोत्रे ॥
३ क्लीं नमः । दक्षश्रोत्रे ॥
३ सर्वमुखरञ्जिनि नमः । मुखे ॥
३ सर्वजनमनोहरि नमः । वामनेत्रे ॥
३ श्रीमातङ्गीश्वरि नमः । दक्षनेत्रे ॥
३ भगवति नमः । भ्रूमध्ये ॥
३ ॐ नमो नमः । ललाटे ॥
३ ऐं ह्रीं श्रीं ऐं क्लीं सौः नमः । ब्रह्मरन्ध्रे ॥

इति प्रतिलोममूलमन्त्रखण्डन्यासः ॥ ५ ॥

मन्दिरार्चनम्

अथामृताम्भोनिधिमध्यस्थमणिद्वीपमध्यगते कदम्बोद्याने मुक्ताकुसुममालिका-हरितपट्टवितानास्तरणवन्दनमालिकाद्यलङ्कृतं धूपधूपितं प्रज्वलत्प्रदीपपरंपरं चतुर्द्वारं मरकतमण्टपं विचिन्त्य तस्य प्रागादिषु द्वारेषु—

ऐं क्लीं सौः सां सरस्वत्यै नमः, लां लक्ष्म्यै, शं शङ्खनिधये, पं पद्मनिधये नमः ॥

इति सम्पूज्य—

ऐं क्लीं सौः लां इन्द्राय वज्रहस्ताय सुराधिपतये
ऐरावतवाहनाय सपरिवाराय नमः । पूर्वे ॥
३ रां अग्नये शक्तिहस्ताय तेजोऽधिपतये
अजवाहनाय सपरिवाराय नमः । आग्नेये ॥
३ [1]टां यमाय दण्डहस्ताय प्रेताधिपतये
महिषवाहनाय सपरिवाराय नमः । दक्षिणे ॥
३ क्षां निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये
नरवाहनाय सपरिवाराय नमः । नैर्ऋते ॥
३ वां वरुणाय पाशहस्ताय जलाधिपतये
मकरवाहनाय सपरिवाराय नमः । पश्चिमे ॥
३ यां वायवे ध्वजहस्ताय प्राणाधिपतये
रुरुवाहनाय सपरिवाराय नमः । वायव्ये ॥
३ सां सोमाय शङ्खहस्ताय नक्षत्राधिपतये
अश्ववाहनाय सपरिवाराय नमः । उत्तरे ॥
३ हां ईशानाय त्रिशूलहस्ताय विद्याधिपतये
वृषभवाहनाय सपरिवाराय नमः । ऐशान्ये ॥

इति प्रागादिषु अष्टासु दिक्षु शक्रादीनभ्यर्च्य,

ऐं क्लीं सौः ॐ ब्रह्मणे पद्महस्ताय लोकाधिपतये हंसवाहनाय सपरिवाराय
नमः । इति इन्द्रेशानयोः मध्ये ॥
३ श्रीं विष्णवे चक्रहस्ताय नागाधिपतये गरुडवाहनाय सपरि-
वाराय नमः । इति निर्ऋतिवरुणयोः दिगन्तरे ॥
३ ॐ वास्तुपतये ब्रह्मणे नमः । इति वास्तुनि चार्चयेत् ॥

[1] यं—ब२, ब३.

यन्त्रोद्धारः

अथ चन्दनपङ्कप्रकृतिके मण्डले क्षीरमिश्रितेन सिन्दूरादिना बिन्दुत्रिकोणपञ्चकोणाष्टदलषोडशदलाष्टपत्रचतुष्पत्रचतुरश्रात्मकं चक्रं विलिख्य विलेख्य वा सुवर्णरजतताम्रस्फटिकमरकतरत्नाद्युत्कीर्णं वा तत्समास्तीर्णपट्टवसने श्रीखण्डरक्तचन्दनादिनिर्मिते पीठे निवेश्य यन्त्रप्राणप्रतिष्ठां कुर्यात् । यथा—

ऐं क्लीं सौः श्यामायन्त्रस्य प्राणा इह प्राणाः,
३ श्यामायन्त्रस्य जीव इह स्थितः,
३ श्यामायन्त्रस्य सर्वेन्द्रियाणि,
३ श्यामायन्त्रस्य वाङ्मनःप्राणाः इहायान्तु स्वाहा ॥

इति मन्त्रेण लिखितयन्त्रप्राणप्रतिष्ठां विदध्यात् । सुवर्णादिकृतस्य यन्त्रस्य तु प्राणप्रतिष्ठा श्रीक्रमोक्ता अत्राप्यनुसन्धेया । अत्र देवतानामाद्यूहस्त्वावश्यक एव । एवं देवताऽन्तरक्रमेष्वपि । ततो मूलेन चक्रे पुष्पाञ्जलिं विकीर्य ॥

अर्घ्यशोधनम्

श्रीक्रमोक्तक्रमेण सामान्यविशेषार्घ्ये आसादयेत् । अत्र चोभयोरप्यर्घ्ययोः प्रवेशरीत्या अन्तरन्तश्चतुरश्रादिबिन्द्वन्तमण्डलकरणम् ॥

ऐं क्लीं सौः अं आत्मतत्त्वाय आधारशक्तये वौषट् इत्याधारस्थापनम् ॥
३ उं विद्यातत्त्वाय पद्मासनाय वौषट् इति पात्रनिधानम् ॥
३ मं शिवतत्त्वाय सोममण्डलाय नमः इति शुद्धजलापूरणमेकत्र ॥

ब्रह्माण्डखण्डसम्भूतमशेषरससम्भृतम् ।
आपूरितं महापात्रे पीयूषरसमावह ॥

इति क्षीरपूरणमन्यत्र । उक्तं षडङ्गं, मूलेन दशधा अभिमन्त्रणम्, चतुर्णवतिमन्त्राभिमन्त्रणाभावश्च विशेषः । ततो विशेषार्घ्यबिन्दुभिः सम्प्रोक्ष्य वरिवस्यावस्तूनि ॥

चक्रदेवीपूजा

ऐं क्लीं सौः आधारशक्तिकमलासनाय नमः इति पीठं पुष्पैरभ्यर्च्य, बिन्दुमध्ये ३ श्रीमातङ्गीश्वरीमूर्तये नमः इति देव्या मूर्तिं भावयित्वा, हृदि वक्ष्यमाणरूपां देवीं सञ्चिन्त्य ३ श्रीमातङ्गीश्वर्यै लं पृथिव्यात्मकं गन्धं कल्पयामि नम इत्यादिताम्बूलान्तं मानसोपचारैरभ्यर्च्य, तां तेजोरूपेण परिणतां ब्रह्मरन्ध्रं प्रापय्य वहन्नासापुटद्वारा कृतविनिर्गमां कुसुमगर्भिते अञ्जलौ सन्निहितां देवीं ३ श्रीमातङ्गीश्वरि अमृतचैतन्यमावाहयामीति चक्रे भावितायां मूर्त्यां आवाह्य मूलान्ते श्रीमातङ्गीश्वरि आवाहिता भव इत्यादिरीत्या आवाहन-संस्थापन-संनिधापन-संनिरोधन-संमुखीकरणावकुण्ठनानि तत्तन्मुद्राप्रदर्शनपूर्वकं विधाय, वन्दनधेनुयोनिमुद्राश्च प्रदर्शयेत् । तत्प्रकारश्च श्रीक्रमतो ज्ञातव्यः । ततः ऐं क्लीं सौः श्रीमातङ्गीश्वर्यै पाद्यं कल्पयामि नम इत्यादिभङ्ग्या पाद्यार्घ्याचमनीयस्नानवासोगन्धपुष्पधूपदीपनीराजनछत्रचामरयुगलदर्पणनैवेद्यपानीयताम्बूलान्तान् षोडशोपचारान् परिकल्पयेत् । नैवेद्याङ्गत्वेन पूर्वोत्तरापोशनकरप्रक्षालनगण्डूषाचमनीयानि च दत्वा ताम्बूलं समर्पयेत् । नैवेद्ये त्रिकोणवृत्तचतुरश्रमण्डलकरणम् । मूलमन्त्रेण प्रोक्षणम् । वमित्यमृतबीजेनाभिमन्त्रणपूर्वं धेनुमुद्रया अमृतीकरणम् । मूलेन सप्तवारमभिमन्त्रणं प्राणादिमुद्राप्रदर्शनं च कार्यम् । अथ मूलमन्त्रान्ते श्रीमातङ्गीश्वरीश्रीपादुकां पूजयामीति वामकरतत्त्वमुद्रासन्दष्टद्वितीयशकलगृहीतक्षीरबिन्दुसहसमर्पितैः दक्षकरोपात्तैः कुसुमैः देवीं त्रिस्सन्तर्प्य देव्या अग्नीशासुरवायव्यभागेषु मौलौ प्रागादिदिक्षु च प्रागुक्तषडङ्गमन्त्रान्ते क्रमेण—

ऐं क्लीं सौः हृदयाय नमः हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ शिरसे स्वाहा शिरःशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ शिखायै वषट् शिखाशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कवचाय हुं कवचशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ नेत्रत्रयाय वौषट् नेत्रशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ अस्त्राय फट् अस्त्रशक्तिश्रीपादुकां पूजयामि तर्पयापि नमः ॥

इति लयाङ्गत्वेन अङ्गदेवता आराध्य ॥

गुर्वोघत्रयपूजा

देव्याः पश्चात् प्रागपवर्गरेखात्रये दक्षिणसंस्थाक्रमेण गुर्वोघत्रयं वरिवस्येत्। यथा—

दिव्यौघः

ऐं क्लीं सौः परप्रकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, परमेशानन्द, परशिवानन्द, कामेश्वर्यम्बाश्रीपादुकां, मोक्षानन्द, कामानन्द, अमृतानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति दिव्यौघः ॥

ऐं क्लीं सौः ईशानानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, तत्पुरुषानन्द, अघोरानन्द, वामदेवानन्द, सद्योजातानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सिद्धौघः ॥

ऐं क्लीं सौः पञ्चोत्तरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, परमानन्द, सर्वज्ञानन्द, सर्वानन्द, सिद्धानन्द, गोविन्दानन्द, शङ्करानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति मानवौघः ॥

आवरणार्चनम्

त्र्यश्रे देव्यग्रकोणादिप्रादक्षिण्यक्रमेण—

ऐं क्लीं सौः रतिश्रीपादुकां पूजयामि तर्पयामि नमः, प्रीति, मनोभवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति प्रथमावरणम् ॥

पञ्चारस्याराणां मूलेषु प्राग्वत्—

ऐं क्लीं सौः द्रां द्रावण[1]बाणश्रीपादुकां पूजयामि तर्पयामि नमः, [2]द्रीं शोषणबाण, क्लीं बन्धनबाण, ब्लूं मोहनबाण, सः उन्मादनबाणश्रीपादुकां पूजयामि तर्पयामि नमः ॥

[1] बाणाय श्री इत्यत्र सर्वपर्यायेषु—अ, ब२, ब३, भ.

[2] ह्रीं—भ. श्रीं—अ.

पञ्चारस्याराणामग्रेषु च—

ऐं क्लीं सौः ह्रीं कामराजश्रीपादुकां पूजयामि तर्पयामि नमः, क्लीं मन्मथ, ऐं कन्दर्प, ब्लूं मकरकेतन, स्त्रीं मनोभवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति द्वितीयावरणम् ॥

अष्टदलस्य दलानां मूलेषु पूर्ववत्—

ऐं क्लीं सौः आं ब्राह्मीश्रीपादुकां पूजयामि तर्पयामि नमः, ईं माहेश्वरी, ऊं कौमारी, ॠं वैष्णवी, ॡं वाराही, ऐं माहेन्द्री, औं चामुण्डा, अः चण्डिकाश्रीपादुकां पूजयामि तर्पयामि नमः ॥

अष्टदलस्य दलानां अग्रेषु च—

ऐं क्लीं सौः लक्ष्मीश्रीपादुकां पूजयामि तर्पयामि नमः, सरस्वती, रति, प्रीति, कीर्ति, शान्ति, पुष्टि, तुष्टिश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति तृतीयावरणम् ॥

षोडशदले प्राग्वत्—

ऐं क्लीं सौः वामाश्रीपादुकां पूजयामि तर्पयामि नमः, ज्येष्ठा, रौद्री, शान्ति, श्रद्धा, सरस्वती, क्रियाशक्ति, लक्ष्मी, सृष्टि, मोहिनी, प्रमथिनी, आश्वासिनी, वीचि, विद्युन्मालिनी, सुरानन्दा, नागबुद्धिकाश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति चतुर्थावरणम् ॥

द्वितीयाष्टदले प्राग्वत्—

ऐं क्लीं सौः अं असिताङ्गभैरवश्रीपादुकां पूजयामि तर्पयामि नमः, इं रुरु, उं चण्ड, ऋं क्रोध, लं उन्मत्त, एं [1]कपालि, ओं भीषण, अं संहारभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति पञ्चमावरणम् ॥

चतुर्दले प्राग्वत्—

ऐं क्लीं सौः मातङ्गीश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः, सिद्धलक्ष्मी, महामातङ्गी, महासिद्धलक्ष्मीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति षष्ठावरणम् ॥

[1] कपाल—अ.

चतुरश्रस्यान्तराग्नेयादिकोणेषु क्रमेण—

ऐं क्लीं सौः गं गणपतिश्रीपादुकां पूजयामि तर्पयामि नमः, दुं दुर्गा, वं वटुक, क्षं क्षेत्रपालश्रीपादुकां पूजयामि तर्पयामि नमः ॥

देव्यग्रादिद्वारेषु प्रागाद्यास्वेकादशसु दिक्षु च—

ऐं क्लीं सौः सां सरस्वत्यै नमः इत्यादि ऐं वास्तुपतये ब्रह्मणे नमः इत्यन्तैः मन्त्रैः प्रागुक्तैः वास्तुपतिपर्यन्तदेवताः समभ्यर्च्य, पूर्वरेखायां च—

ऐं क्लीं सौः हंसमूर्तिश्रीपादुकां पूजयामि तर्पयामि नमः, परप्रकाश, पूर्ण, नित्य, करुणश्रीपादुकां पूजयामि तर्पयामि नमः इति सम्प्रदायगुरूंश्च पूजयेत् ॥ इति सप्तमावरणम् ॥

सर्वा अप्यावरणदेवताः देव्या अभिमुखासीनाः स्वयं तत्तदभिमुखः पूजयामीति भावयेत् ॥

गुरुपादुकापूजा

अथ स्वशिरसि ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं ग्लौं ह्स्ख्फ्रें ह स क्ष म ल व र यूं स ह क्ष म ल व र यीं ह्सौं स्हौः श्रीशिवादिगुरुश्रीपादुकाः पूजयामीति सामान्यपादुकया शिवादिगुरून्, ऐं क्लीं सौः ह्स्ख्फ्रें ह स क्ष म ल व र यूं स ह क्ष म ल व र यीं ह्सौं स्हौः अमुकाम्बासहितामुकानन्दनाथश्रीगुरुश्रीपादुकां पूजयामीति च स्वगुरुमभ्यर्च्य ॥

देव्याः पुनःपूजा

पुनर्देवीं त्रिः सन्तर्प्य प्राग्वत् षोडशधा चोपचरेत् ॥

बलिदानम्

ततः श्रीक्रमोक्तेन क्रमेण होमं कृत्वा कारयित्वा वा (अकृत्वा वा इति पाठान्तरम्) शुद्धजलेन त्रिकोणवृत्तचतुरश्रमण्डलत्रयं विधाय ऐं व्यापकमण्डलाय नम इति पुष्पैः समभ्यर्च्य अर्धान्नसलिलपूर्णं सक्षीरोपादिममध्यमं सगन्धकुसुमं साधारं पात्रं निधाय ऐं क्लीं सौः श्रीमातङ्गीश्वरि इमं बलिं गृह्ण गृह्ण हुं फट् स्वाहा, ऐं क्लीं

सौः श्रीमातङ्गीश्वरि शरणागतं मां त्राहि त्राहि हुं फट् स्वाहा, ऐं क्लीं सौः क्षेत्रपालनाथ इमं बलिं गृह्ण गृह्ण हुं फट् स्वाहा,—इति मन्त्रान् क्रमेण पठन् देव्या दक्षिणभागे बलित्रयं प्रदाय तत्त्वमुद्रास्पृष्टं क्षीरं बल्युपरि निषिच्य, वामपार्ष्णिघात-करास्फोटान् कुर्वाणः समुदञ्चितवक्त्रो नाराचमुद्रया बलिं भूतैः ग्राहयित्वा, पाणी प्रक्षाल्य देव्यै प्रदक्षिणनतीः विधाय पुष्पाञ्जलिं समर्प्य जपेत् ॥

मातङ्गीश्वरीमन्त्रजपः

यथा—अस्य श्रीमातङ्गीश्वरीमहामन्त्रस्य दक्षिणामूर्त्यृषये नमः—शिरसि। गायत्रीछन्दसे नमः—मुखे। श्रीमातङ्गीश्वरीदेवतायै नमः—हृदये। ऐं बीजाय नमः—गुह्ये। सौः शक्तये नमः—पादयोः। क्लीं कीलकाय नमः—नाभौ। मम अभीष्टसिद्धये विनियोगाय नमः—इति करसम्पुटे न्यस्य मूलेन त्रिर्व्यापकं कृत्वा न्यासोक्तैरङ्गमन्त्रैः कराङ्गन्यासौ कृत्वा ध्यानम्—

मातङ्गीं भूषिताङ्गीं मधुमदमुदितां नीपमालाढ्यवेणीं
सद्व्रीणां शोणचेलां मृगमदतिलकामिन्दुरेखाऽवतंसाम्।
कर्णोद्यच्छङ्खपत्रां स्मितमधुरदृशा साधकस्येष्टदात्रीं
ध्यायेद्देवीं शुकाभां शुकमखिलकलारूपमस्याश्च पार्श्वे ॥

इति ध्यात्वा मनसा पञ्चधोपचर्य पुरश्चरणे वक्ष्यमाणपूर्वोत्तराङ्गमन्त्रसहितं मूलं श्रीक्रमोक्तेन विधिना यथाशक्ति जप्त्वा पुनः न्यासादि विधाय

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥

इति देव्या वामहस्ते सामान्यार्घ्यसलिलेन जपं समर्प्य स्तुवीत ॥

मातङ्गीस्तुतिः

यथा—

मातङ्गि मातरीशे मधुमदमथनाराधिते महामाये।
मोहिनि मोहप्रमथिनि मन्मथमथनप्रिये नमस्तेऽस्तु ॥

स्तुतिषु तव देवि विधिरपि पिहितमतिर्भवति विहितमतिः ।
तदपि तु भक्तिर्मामपि भवतीं स्तोतुं विलोभयति ॥
यतिजनहृदयनिवासे वासववरदे वराङ्गि मातङ्गि ।
वीणावादविनोदिनि नारदगीते नमो देवि ॥
देवि प्रसीद सुन्दरि पीनस्तनि कम्बुकण्ठि घनकेशि ।
मातङ्गि विद्रुमोष्ठि स्मितमुग्धाक्ष्यम्ब मौक्तिकाभरणे ॥
भरणे त्रिविष्टपस्य प्रभवसि तत एव भैरवी त्वमसि ।
त्वद्भक्तिलब्धविभवो भवति क्षुद्रोऽपि भुवनपतिः ॥
पतितः कृपणो मूकोऽप्यम्ब भवत्याः प्रसादलेशेन ।
पूज्यः सुभगो वाग्मी भवति जडश्चापि सर्वज्ञः ॥
ज्ञानात्मिके जगन्मयि निरञ्जने नित्यशुद्धपदे ।
निर्वाणरूपिणि शिवे त्रिपुरे शरणं प्रपन्नस्त्वाम् ॥
त्वां मनसि क्षणमपि यो ध्यायति मुक्तामणीवृतां श्यामाम् ।
तस्य जगत्त्रितयेऽस्मिन् कास्ता ननु याः स्त्रियोऽसाध्याः ॥
साध्याक्षरेण गर्भितपञ्चनवत्यक्षराञ्चिते मातः ।
भगवति मातङ्गीश्वरि नमोऽस्तु तुभ्यं महादेवि ॥
विद्याधरसुरकिन्नरगुह्यकगन्धर्वयक्षसिद्धवरैः ।
आराधिते नमस्ते प्रसीद कृपयैव मातङ्गि ॥
वीणावादनवेळानर्तदलाबुस्थगितवामकुचम् ।
श्यामलकोमलगात्रं पाटलनयनं स्मरामि महः ॥
अवटुतटघटितचूलीताडिततालीपलाशताटङ्काम् ।
वीणावादनवेळाकम्पितशिरसं नमामि मातङ्गीम् ॥
माता मरकतश्यामा मातङ्गी मदशालिनी ।
कटाक्षयतु कल्याणी कदम्बवनवासिनी ॥
वामे विस्तृतिशालिनि स्तनतटे विन्यस्तवीणामुखं
तन्त्रीं तारविराविणीमसकलैरास्फालयन्ती नखैः ।

अर्धोन्मीलदपाङ्गमंसवलितग्रीवं मुखं बिभ्रती
माया काचन मोहिनी विजयते मातङ्गकन्यामयी ॥
वीणावाद्यविनोद[1]गीतनिरतां लीलाशुकोल्लासिनीं
बिम्बोष्ठीं नवयावकार्द्रचरणामाकीर्णकेशा[2]ळिकाम् ।
हृद्याङ्गीं सितशङ्खकुण्डलधरां शृङ्गारवेषोज्ज्वलां
मातङ्गीं प्रणतोऽस्मि सुस्मितमुखीं देवीं शुकश्यामलाम् ॥
स्रस्तं केसरदामभिः वलयितं धम्मिल्लमाबिभ्रती
तालीपत्रपुटान्तरेषु घटितैस्ताटङ्किनी मौक्तिकैः ।
मूले कल्पतरोर्महामणिमये सिंहासने मोहिनी
काचित् गायनदेवता विजयते वीणावती वासना ॥
वेणीमूलविराजितेन्दुशकलां वीणानिनादप्रियां
क्षोणीपालसुरेन्द्रपन्नगवरैराराधिताङ्घ्रिद्वयाम् ।
एणीचञ्चललोचनां सुवसनां वाणीं पुराणोज्ज्वलां
श्रोणीभारभरालसामनिमिषां [षः] पश्यामि विश्वेश्वरीम् ॥
मातङ्गीस्तुतिरियमन्वहं प्रजप्ता
जन्तूनां वितरति कौशलं क्रियासु ।
वाग्मित्वं श्रियमधिकां च गानशक्तिं
सौभाग्यं नृपतिभिरर्चनीयतां च ॥

इति मन्त्रकोशे तृतीयपटलीयो मातङ्गीस्तवः सम्पूर्णः ॥

सुवासिनीपूजाऽऽदि शेषकृत्यम्

अथ श्यामलां शक्तिमाहूय श्रीक्रमोक्तक्रमेण पञ्चमवर्जं तामुपचर्य तच्छेषमुररीकृत्य हविःप्रतिपत्त्यादिक्रमशेषं समापयेत् । हविःप्रतिपत्तौ मूलेन सर्वेण तत्त्वत्रयशोधनं विशेषः ॥

[1] नैकनि—श्री.

[2] वलिम्—श्री.

श्यामोपासकनियमाः

एतदुपासकस्यावश्यानुष्ठेयाः नियमाः यथा—

कदम्बतरुं न छिन्द्यात् । वाचा [1]कालीति पदं नोच्चारयेत् । वीणावेणुवादन-नर्तनगाधागोष्ठीषु प्रवर्तमानासु पराङ्मुखो न भवेत् । गायकान् न निन्द्यात् इति ॥

पुरश्चरणसंकल्पः

एवं नित्यसपर्यां निर्वर्तयन् पुरश्चरणमाचरेत् । तच्च जपहोमतर्पणब्राह्मणभोजना-ख्याङ्गचतुष्टयसमष्टिरूपम् । तत्प्रकारस्तु—दीक्षाप्रकरणोक्तकाले श्रीगुर्वनुज्ञातो ब्राह्मणैः स्वस्ति वाचयित्वा आचम्य प्राणानायम्य अमुकशर्मवर्मादिरहं श्यामामन्त्रसिद्धिकामो लक्षसङ्ख्याकं जपं, प्रकृते कलियुगत्वात् तच्चतुर्गुणितं, तद्दशांशहवन-तद्दशांशतर्पण-तद्दशांशब्राह्मण[2]भोजनानि च करिष्य इति सङ्कल्पयेत् । एवं तत्तन्मन्त्रेषु तत्र तत्र प्रोक्तजप[3]सङ्ख्याऽऽदिसङ्कल्पो ज्ञेयः ॥

मन्त्रजपः

अथ सति सम्भवे तन्त्रान्तरदृष्टेन विधिना ग्रामात् बहिः क्रोशे नगराच्च क्रोशद्वये क्षेत्रं परिगृह्णीयात् । अथवा समुद्रमहानदीतीरयोः पश्चिमाभिमुखवृष-शून्यशिवायतनयोः विष्णुगृहपुण्यक्षेत्रतीर्थारण्यपर्वतशिखराश्वत्थबिल्वमूलविविक्तनिज-गृहगोष्ठानां श्रीगुरुस्वेष्टदेवतासन्निध्योश्चान्यतमं देशमासाद्य दीपस्थानविन्यस्ते व्याघ्रचर्ममृगाजिनचित्रकम्बलकुशकटरक्तपटपट्टवसनोर्णावस्त्राद्यन्यतमे आसने उपविश्य विघ्नानुत्सार्य प्राणानायम्य सङ्कल्प्य वक्ष्यमाणलक्षणया अक्षमालया वक्ष्यमाणसंस्कारया रुद्राक्षाद्यन्यतमया वा मालया पूर्वाङ्गमन्त्रपूर्वकं प्रत्यहं सहस्रसङ्ख्याकं मूलमन्त्रं तद्दशांशान् उत्तराङ्गमन्त्रांश्च जप्त्वा पुनर्न्यासादिकं कृत्वा । पूर्वाङ्गमन्त्रो यथा—

[1] कमलिनीपदं—भ.

[2] भोजनतद्दशांशमार्जनानि च करिष्ये इति संकल्पयेत् । जपसंख्या १०००००, तद्दशांशहोमसंख्या १००००, तद्दशांशतर्पणसंख्या १०००, तद्दशांशब्राह्मणभोजनसंख्या १००, तद्दशांशमार्जनसंख्या १० ॥ एवं—ब२.

[3] संख्यऽऽदिकल्पो—अ१.

हसन्ति हसितालापे मातङ्गिपरिचारिके । मम भयविघ्ननाशं कुरु कुरु ठः ठः ठः हुं फट् स्वाहा ॥ इति ॥

मूलमन्त्रश्च—न्यासोक्तसप्तदशखण्डसमष्टिरूपः ॥

उत्तराङ्गमन्त्रास्तु—ऐं नमः उच्छिष्टचाण्डालि मातङ्गि (हुं फट् स्वाहा इति पाठान्तरम्) सर्ववशङ्करि स्वाहा—इति श्यामाङ्गं लघुश्यामा ॥

ऐं क्लीं सौः वद वद वाग्वादिनि स्वाहा—इति तदुपाङ्गं वाग्वादिनी ॥

ॐ ओष्ठापिधाना नकुली दन्तैः परिवृता पविः ।
सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥

इति तत्प्रत्यङ्गं नकुली ॥

जपकालः

अयं च जपो अपराह्णे कर्तव्यः, अपराह्णे श्यामेति सूत्रेण अपराह्णस्य पूजाकालत्वविधानात् । अन्ये त्वामध्यन्दिनमेव । देशोपप्लवादिसम्भावनायामासायाह्नमपीति स्थितिः ॥

स्त्रीशूद्रयोः प्रणवप्रत्याम्नायः

द्विजातीनां जपाद्यन्तयोः प्रणवोच्चारः । स्त्रीशूद्रयोस्तु सबिन्दुकचतुर्दशस्वर उच्चार्यः ॥

पुरश्चरणांगहोमः

एवं जपोत्तरं तस्मिन्नेवाहनि श्रीक्रमोक्तेन विधिना कुण्डस्थण्डिलान्यतरप्रतिष्ठापितेऽग्नौ देव्या उपचारान्ते सर्वासामावरणदेवतानां एकैकाहुतिं तत्तन्मन्त्रैः प्रधानदेवतायाः दशाहुतीश्च स्वाहाऽन्तमूलेन उद्देशत्यागपूर्वकं एकैकेन त्रिमध्वक्तेन पलाशकुसुमेन हुत्वा अथ जपदशांशं च हुत्वा होमशेषं समापयेत् ।

मन्त्रान्ते या वह्निजाया सा तु मन्त्रस्वरूपिणी ।
तदन्तेऽन्यां प्रयुञ्जीत सा होमाङ्गतया मता ॥

इति शक्तिसङ्गमतन्त्रवचनात् स्वाहाऽङ्गमन्त्रेष्वपि पुनः स्वाहाप्रयोगः कार्यः ॥

इदं च द्रव्यं इह इन्द्रियकामाग्निहोत्राङ्गदधिवन्नित्यं काम्यं च, संयोगपृथक्त्वात् । तिलैः शान्त्या इत्यादिविधीनामन्यतःसिद्धहोमाश्रयेण, गोदोहनस्य तादृशप्रणयनाश्रयेणेव, फलायगुणविधिरूपत्वात्, सत्यां कामनायां अयमेव होमो द्रव्यान्तरैरपि वक्ष्यमाणैः कार्यः, काम्यस्य नित्यबाधकत्वात् ॥

पुरश्चरणांगं तर्पणम्

ततो नद्यादौ चतुरश्रमण्डलं विधाय तत्र चिन्तिते श्यामायन्त्रे देवीमावाह्य पञ्चधा उपचर्य सुरभिलेन सुवर्णरजतताम्रादिपात्रगृहीतेन सलिलेन मूलान्ते श्रीमातङ्गीश्वरीं तर्पयामीति होमदशांशं तर्पयेत् । सत्यानुकूल्ये जपस्थान एव वा पूजाचक्रे तंर्पयेत् । "तर्पणेऽपि तथैव स्यान्नमसोन्ते पुनर्नमः" इति शक्तिसङ्गमतन्त्रोक्तेः नमोन्तेष्वपि मन्त्रेषु पुनः नमस्तर्पयामीति प्रयोगः । तन्त्रान्तरानुसारिणो मार्जनपक्षेऽपि नमोयोजनं तत्रैवोक्तम् ॥

पुरश्चरणांगं भोजनम्

ततः तर्पणदशांशसङ्ख्याकानेतद्विद्यादीक्षितानलाभे यथासम्भवं तत्तन्मन्त्रदीक्षितान्वा सदाचारान् प्रातः निमन्त्रिताभ्यञ्जितान् ब्राह्मणान् सुवासिनीः कुमारीश्च यथाविभवं वस्त्रगन्धादिभिः देवताधियाऽभ्यर्च्य मृष्टान्नेन भोजितान् ताम्बूलदक्षिणापरितोषितान् प्रदक्षिणीकृतनमस्कृतानाशिषो गृहीत्वा विसृजेत् ॥

तर्पणदशांशब्राह्मणभोजनाशक्तौ तु तर्पणोक्तवज्जले देवतामावाह्य उपचर्य च मूलान्ते आत्मानमभिषिञ्चामि नमः इति कुम्भमुद्रया तर्पणदशांशवारं मूर्धन्यभिषेकं वा कुशैः मार्जनं वा विधाय तद्दशांशं ब्राह्मणान् भोजयेत् ॥

इत्येकः पक्षः । प्रतिलक्षान्ते सर्वान्ते वा होमादि कुर्यादित्यपरौ ॥

होमप्रत्याम्नायो जपः

होमाशक्तौ ब्राह्मणानां पुरश्चरणजपसङ्ख्याद्विगुणो जप इति मुख्यः पक्षः । होमसङ्ख्याद्विगुणो जप इति गौणः । क्षत्रियादीनां त्रयाणां त्रिगुणादिर्जपः । एवं

तर्पणेऽपि । द्विजभक्तस्य शूद्रस्य द्विजस्त्रीणामपि होमप्रतिनिधिः जप एव । तेषां होमे तु नाधिकारः । ब्राह्मणभोजनस्य तु न क्वापि प्रतिनिधिः ॥

आरब्धस्य पुरश्चरणादेः आशौचेऽपि कार्यत्वम्

इदं च पुरश्चरणमारब्धं सत् आशौचप्राप्तावपि कार्यम् । नित्यार्चनादि च । तदुक्तम्—

जपो देवार्चनविधिः कार्यो दीक्षान्वितैर्नरैः ।
नास्ति पापं यतस्तेषां सूतकं वा यतात्मनाम् ॥

इति देवीयामले ।

सूतके मृतके चैव नित्यं विष्णुमयस्य च ।
सानुष्ठानस्य विप्रेन्द्र सद्यः शुद्धिः प्रजायते ॥

इति नारदपाञ्चरात्रे ।

शिवविष्ण्वर्चने दीक्षा यस्य चाग्निपरिग्रहः ।

इति तस्येति शेषः ।

ब्रह्मचारियतीनां च शरीरे नास्ति सूतकम् ॥

इति विष्णुयामले ।

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ।
पूजां गृह्णामि शूद्राणां स्वाचारनिरतात्मनाम् ॥
यज्ञव्रतविवाहेषु श्राद्धे होमार्चने जपे ।
आरब्धे सूतकं न स्यादनारम्भे च सूतकम् ॥
आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥

इति विष्णुवचनम् । ब्राह्मणस्येत्युपलक्षणं क्षत्रियवैश्ययोः ।

नचैवापूज्य भुञ्जीत शिवलिङ्गं महेश्वरि ।
सूतके मृतके चापि न त्याज्यं शिवपूजनम् ॥

इति लिङ्गपुराणे । पराशरोऽपि—

उपासने तु विप्राणामङ्गशुद्धिः प्रजायते ॥

इति च । एवमन्यान्यपि वचनानि तन्त्रान्तरेषु बहुलं उपलभ्यमानानि विस्तरभयान्नेह लिखितानि । सूतकादौ नैमित्तिककाम्ययोः अनधिकार एव, साधकस्य प्रतिबन्धक-बाहुल्यात् ॥

सिद्धिपर्यन्तं पुरश्चरणस्य अभ्यासः

एकेन पुरश्चरणेन यदि न मन्त्रः सिध्यति तदा तस्य द्वयं त्रयं वा कुर्यात् । तथाऽपि तदसिद्धौ सिद्धिकारकाः प्रयोगाः ग्रन्थान्तरोक्ताः ग्राह्याः । सिद्धिसूचकानि चान्यतो ज्ञेयानि, इह तु विस्तरभयान्न लिखितानि ॥

सम्यक्सिद्धैकमन्त्रस्य पञ्चाङ्गोपासनेन हि ।
सर्वे मन्त्राश्च सिध्यन्ति तत्प्रभावात् कुलेश्वरि ॥
सम्यक्सिद्धैकमन्त्रस्य नासाध्यं विद्यते क्वचित् ।
बहुमन्त्रवतः पुंसः का कथा शिव एव सः ॥

अतः पुरश्चरणमावश्यकमिति ॥

पुरश्चरणप्रत्याम्नायाः

अथ सङ्क्षेपतः पुरश्चरणप्रत्याम्नायाः कतिचित् लिख्यन्ते । शशिसूर्योपरागे त्रिरात्रमेकरात्रं वा पूर्वमुपोष्य एक[1]भुक्तं वा विधाय ग्रहणारम्भे घटिकार्धात् प्रागेव स्नातः समुद्रगाया नद्यास्तटाकादेर्वा नाभिमात्रजले तिष्ठन्, अशक्तौ तु तट एवोपविष्टः, आचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्य, ॐ अमुकराशिगते सवितरि सोमस्य सूर्यस्य वा ग्रहणे अमुकगोत्रोऽमुकशर्मवर्मादिरहं अमुकविद्यासिद्धिकामः स्पर्शमारभ्य विमुक्तिपर्यन्तं जपं करिष्य इति सङ्कल्प्य जपेत् । ततोऽपरेद्युः

[1] भक्तं—ब२, ब३.

ग्रहणकालीनस्य जपस्य समसङ्ख्याकं तद्दशांशं वा होमं, [1]तद्दशांशं तर्पणं, तत्समसङ्ख्याकं तद्दशांशं वा ब्राह्मणभोजनं च कुर्यात् । यद्वा—ग्रहणपुण्यकाल एव मन्त्रानुसारेण जपस्य तत्समांशस्य तद्दशांशस्य वा होमस्य तदनुगुणस्य तर्पणस्य च कालं विभज्य जपाद्याचरेत् । परेद्युः तर्पणसमसङ्ख्याकं तद्दशांशं वा ब्राह्मणभोजनं कारयेदित्येकः प्रकारः ॥

कृष्णाष्टम्यां प्रातः कृतनित्यक्रियः पूर्ववत् सङ्कल्प्य अयुतचतुष्टयं जपं सप्तधा विभज्य प्रत्यहं चतुर्दशोत्तरसप्तशताधिकसहस्रपञ्चकसङ्ख्यया (५७१४) तत्कृष्णत्रयोदशीपर्यन्तं (६×५७१४=३४,२८४) जप्त्वा चतुर्दश्यां षोडशोत्तरसप्तशताधिकसहस्रपञ्चकं (५७१६;५७१६+३४२८४=४००००) जपेत् । सङ्कल्पे चाद्य कृष्णाष्टमीमारभ्य एतच्चतुर्दशीपर्यन्तमिति विशेषः । होमादिविधिस्तु तद्दशांश एवेत्यन्यः ॥

प्रातः नित्यक्रियोत्तरं प्राग्वत् सङ्कल्प्य अकारादिक्षकारान्तान् मातृकावर्णान् आनुलोम्येनोच्चार्य मूलं च सकृदुच्चार्य पुनर्मातृकावर्णान् विलोमानुच्चारयेत् । इत्येवंरीत्या प्रत्यहमष्टोत्तरशतसङ्ख्यया मासमात्रं जप्त्वा होमादि कुर्यात् । सङ्कल्पस्तु एतदनुगुण एवोह्यः इत्यपरः ॥

यथासम्भवं अनयोः प्रत्याम्नाययोः जपस्य चतुर्गुणितत्वं तर्पणादेश्च तद्दशांशत्वं बोध्यम् । प्रत्यहं रात्रौ त्रिकालं सर्वोपचारैरिष्टदेवतां साङ्गां सावरणां अर्चयेत् । एवं षण्मासान् [2]मासमात्रं वा पूजयितुः पुरश्चरणमन्तरेणापि विद्यासिद्धिः भवति । सङ्कल्पश्चैतदनुरूप एवोह्यः इति चापरः ॥

सूर्योदयं समारभ्य यावत्सूर्योदयावधि ।
तावज्जप्त्वा निरातङ्कः सर्वसिद्धीश्वरो भवेत् ॥
सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च ।
केवलं देवभावेन जप्त्वा सिद्धीश्वरो भवेत् ॥

इति चान्यः ॥

प्रकारान्तराणि च ग्रन्थान्तरेषु द्रष्टव्यानीति दिक् ॥

[1] तत्समसंख्याकं तद्दशांशं वा तर्पणं—अ.

[2] मासत्रयं इत्यधिकः—अ.

कूर्मचक्रलक्षणम्

समीकृते भूतले प्राक्प्रत्यगायताः दक्षिणोत्तरायताश्चतस्रश्चतस्रो रेखा विलिख्य नवकोष्ठानि विधाय तत्र पूर्वादिप्रादक्षिण्यक्रमेण अष्टसु कोष्ठेषु क च ट त प य श ळा ख्यान् अष्टवर्गान् अकारादिस्वरद्वयं च विलिख्य मध्यकोष्ठे श्रीकारं विलिखेत् । इदं च कूर्मचक्रं क्षेत्रग्रामगृहभेदात् त्रिविधम् । तत्र क्षेत्रग्रामयोः तत्तन्नामाद्यक्षरयुक्तं कोष्ठं मुखं कूर्मस्य । एतदेवास्य दीपस्थानमुच्यते । गृहे तु गृहपतेः नामाद्यक्षरयुक् कोष्ठं मुखम् । तत्पार्श्वद्वयगतकोष्ठद्वयं हस्तौ । तदधःस्थितं कुक्षिः । तदधःस्थितौ तु चरणौ । कुक्षिमध्यगतं कोष्ठं पृष्ठम् । चरणमध्यगतं कोष्ठं च पुच्छं इति विवेकः । एवमुक्तप्रकारस्य क्षेत्रादौ विभावितस्य कूर्मस्य मुखे पृष्ठे वा जपे होमे च सर्वार्थसिद्धिः । करयोः तनौ कोष्ठान्तराणि अनुपयुक्तानीति कूर्मचक्रानावश्यकतोक्ता कतिपयेषु स्थलेषु । यथा—

> कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ।
> महाकाळे च काश्यां च दीपस्थानं न चिन्तयेत् ॥

इति । दीपस्थानोपलक्षितत्वात् कूर्मचक्रमपि दीपस्थानमित्युक्तम् । इह चक्रे चोक्तेषु कोष्ठेषु रिपुस्थानं विचिन्त्य तत्त्यागपूर्वकमवशिष्टं मित्रस्थानमुपादेयम् । अरिमित्रविचारो यथा—

> अद्वयस्य ठकारेण ठकारस्यापि तेन च ।
> लृद्वयस्य पकारेण पकारस्यापि तेन च ॥
> ओद्वयस्य षकारेण षकारस्यौयुगेन च ।
> जकारस्य टकारेण झकारस्य खकारतः ॥
> उकारस्य लकारेण फकारस्य धकारतः ।
> भकारस्य तु रेफेण यकारस्य सकारतः ॥
> अरित्वमेषां वर्णानां अन्येषां मित्रभावना ॥ इति ॥

मालासंस्कारः

ताश्च अकारादिक्षकारान्तमातृकावर्णरुद्राक्षमुक्ताफलमाणिक्यस्फटिकप्रवाळस्वर्ण-रजतशङ्खरक्तचन्दनोपादानकमणिपुत्रजीवपद्मबीजकुशग्रन्थ्यादिमय्यः ॥

अक्षमालायाः संस्कारानपेक्षा

अक्षमाला हि ब्रह्मरन्ध्रस्य दक्षभागादिनाभिमभिव्याप्य वामभागपर्यन्तमवरोहारोहणक्रमेण ब्रह्मनाड्यां अन्योन्याभिमुखत्वेन ग्रथितैः आनुपूर्व्येणोच्चारितैः अकारादिभिः ळकारान्तैः पुनः प्रातिलोम्येनोच्चारितैः च ळकारादिभिः अकारान्तैः वर्णैः शतबीजात्मिका भवति । क्षकारस्य मेरुस्थानीयस्य ळकारद्वयस्य मध्य उच्चारणमात्रम् । न तु जपसङ्ख्याऽन्तर्गणना । अत्रानुलोम्येन अवरोहारोहयोः प्रथमं मातृका ततो मन्त्रः । प्रातिलोम्येन अवरोहारोहयोस्तु प्रथमं मन्त्रः ततो मातृकेति तत्त्वम् । शतान्ते अ क च ट त प य शाख्यवर्गाष्टकादित्वेन जपस्य अष्टोत्तरशतत्वं ज्ञेयम् । एवं सहस्रादौ च । अस्या मालाया न संस्कारापेक्षा ॥

रुद्राक्षमालासंस्कारः

अष्टोत्तरशतं रुद्राक्षान् षड्गुणिते वक्ष्यमाणान्यतमे सूत्रे सप्रणवैकैकमातृकोच्चारणपूर्वकमन्तरान्तरा सग्रन्थिकं अन्योन्याभिमुखं गोपुच्छाकारेण सर्पाकारेण वा ग्रथयित्वा स्थूलमेकं रुद्राक्षमेकीकृते सूत्राग्रद्वये मेरुत्वेन ग्रथयित्वा नवसङ्ख्याकैः अश्वत्थपत्रैः अष्टदलपद्मं विरच्य तत्र मालां निवेश्य मूलमन्त्रान्ते गोमूत्रगोमयगव्यदुग्धदधिघृताख्येन पञ्चगव्येन, ॐ सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः । भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः ॥—इति मन्त्रान्ते कुशोदकेन च प्रक्षाळ्य, ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः—इति मन्त्रान्ते चन्दनागरुकर्पूरादिभिराघर्षणं विधाय, ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥—इति मन्त्रेण धूपयित्वा, ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥—इति मन्त्रेण चन्दनकस्तूरीकुङ्कुमकर्पूरैः लेपयित्वा, अक्षमालां वामकरपुटे निधाय, ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥—इति मन्त्रेण अष्टोत्तरशतवारमभिमन्त्र्य, रुद्राक्षमालायाः प्राणाः इह प्राणाः । रुद्राक्षमालायाः जीव इह स्थितः । रुद्राक्षमालायाः सर्वेन्द्रियाणि रुद्राक्षमालायाः वाङ्मनःप्राणाः इह आयान्तु

स्वाहा ॥—-इति मन्त्रेण प्राणप्रतिष्ठां कृत्वा, उपास्यदेवतां तत्रावाह्य, मूलेन पञ्चधा उपचर्य, तेन मातृकावर्णैश्चाभिमन्त्र्य, होमप्रकरणोक्तरीत्या अग्निमुखं विधाय, मूलेन अष्टोत्तरशताज्याहुतीः हुत्वा, सम्पाताज्यं मालायां निक्षिपेत् । अशक्तौ तु होमसङ्ख्याद्विगुणं मूलमन्त्राभिमन्त्रणं इति ॥

मालाऽन्तरसंस्कारः

अथान्यासां मालानां संस्कारः—उक्तरीत्या ग्रथितां मालां प्रासादमन्त्रेण पञ्चगव्ये क्षणं निक्षिप्य, तस्मादुद्धृत्य, कुशोदकेन प्रक्षाल्य, चन्दनादिभिरुपलिप्य, पात्रे निधाय, पञ्चायतनदेवताः तत्तन्मन्त्रेणावाह्य, पञ्चधोपचर्य, प्रासादेन शतवारानभिमन्त्र्य, सूर्यादीन् ग्रहानिन्द्रादीन् दिक्पालांश्च तत्तन्मन्त्रेण सम्पूज्य, सघृतैः तिलैः यथाशक्तिवारं मूलेनाग्नौ जुहुयात् । अशक्तौ अभिमन्त्रयेत् । ततो यथाविभवं काञ्चनं गुरवे दक्षिणां दत्वा, ब्राह्मणांश्च भोजयेत् । इति ॥

संस्कारान्तरं यथा—सूत्रं मणींश्च पञ्चगव्ये दिनत्रयं संस्थाप्य, चतुर्थदिने उद्धृत्य, अस्त्रेण प्रक्षाल्य, हृन्मन्त्रेण स्वेष्टमन्त्रेण वा प्रत्येकं आवृत्तेन मणीनन्योन्याभिमुखं ग्रथयित्वा, स्थण्डिले स्वेष्टदेवतासपर्यामण्डलं विधाय, तत्र तामभ्यर्च्य, मूलमष्टोत्तरशतसङ्ख्यं जप्त्वा, तत्तत्कल्पोक्तपुरश्चरणहोमद्रव्येण घृतेन वा यथाशक्ति हुत्वा, मण्डले मालां निधाय, तस्यामस्त्रमन्त्र-मूलमन्त्र-षडङ्गमन्त्रांश्च विन्यस्य, तां स्वेष्टदेवतारूपां विभाव्य, सम्पूज्य, सर्वभूतबलिं दत्वा, आचार्यं दक्षिणाऽऽदिभिः परितोष्य ब्राह्मणान् भोजयेदिति ॥

उक्तसंस्कारविधिः त्रैवर्णिकविषयः । स्त्रीशूद्राणां तु उपास्यमूलमन्त्रेणैव सर्वं कार्यम् ॥

यन्मन्त्रजपार्थं या माला संस्कृता तया तस्यैव जपः कार्यो नान्यस्य । अत्र च विशेषः—

> शिवमन्त्रेण संग्रथ्य शक्तिमन्त्रं जपेदपि ।
> शक्तिमन्त्रेण संग्रथ्य शिवमन्त्रं जपेच्छिवे ॥
> ध्रुवेण मातृकाभिर्वा ग्रथ्यन्ते मणयो यदि ।
> तदा सर्वेऽपि जप्तव्या मनवो मालया तया ॥ इति ॥

ध्रुवः प्रणवः ॥

देवताभेदेन सूत्रभेदः

देवताभेदेन सूत्रभेद उक्तः । यथा—देव्या रक्तपट्टसूत्रम् । शिवस्योर्णाभवं श्वेतं वा वल्कलं वा । सूर्यगणेशयोः कार्पासजम् । तच्च सुवासिन्या ब्राह्मण्या कर्तितम् । स्वसमानजातीययोषित्कर्तितं वा । त्रिगुणं त्रिगुणीकृतम् । यत्र ब्राह्मणीकर्तितं न मिलति तत्र वर्णान्तरीयकेवलसुवासिनीकर्तितं ग्राह्यम् । अन्येषु सूत्रेषु स्वैच्छिकं गुणस्थौल्यं मानं च ॥

मालासंस्कारकालः

मालासंस्कारकालस्तु—विष्णोः द्वादश्यां पूर्वाह्णः । शक्तेः अष्टमीनवमी-चतुर्दशीनां रात्रिः । शिवस्य त्रयोदशीदिवा । सूर्यस्य सप्तमीदिवा इति ॥

मालाभेदेन फलभेदः

मालाभेदेन फलभेदो यथा—मातृकाऽक्षमाला क्षिप्रं मन्त्रसिद्ध्यै । रुद्राक्षमाला मोक्षाय । मौक्तिकमाणिक्यमय्यौ साम्राज्याय । स्फाटिकी सर्वेभ्यः कामेभ्यः । पुत्रजीवमयी सम्पत्सारस्वतावाप्त्यै । पद्मबीजमयी श्रीयशोभ्याम् । रक्तचन्दनमयी वश्यभोगाभ्याम् । इत्यन्यासामपि फलानि ग्रन्थान्तरेषु द्रष्टव्यानि ॥

सूत्रजीर्णतादौ प्रायश्चित्तम्

सूत्रे जीर्णे नवेन ग्रथयित्वा मूलेनाष्टोत्तरशतवारानभिमन्त्रयेत् । जपसमये प्रमादात् करगलितायां छिन्नायां वा मालायां निषिद्धस्पर्शे वा अष्टोत्तरशतमूलमन्त्रजपः प्रायश्चित्तम् ॥

जपभेदाः

अथ जपभेदाः । ज्ञानार्णवे—

निगदेनोपांशुना वा मानसेनाथवा जपेत् ।
निगदः परमेशानि स्पष्टं वाचा निगद्यते ॥
अव्यक्तश्च स्फुरद्वक्त्र उपांशुः परिकीर्तितः ।
मानसस्तु वरारोहे चित्तेनान्तररूपवान् ॥

निगदेन तु यज्जप्तं लक्षमात्रं वरानने ।
उपांशुस्मरणेनैव तुल्यं भवति शैलजे ॥
उपांशुलक्षमात्रं तु यज्जप्तं कमलेक्षणे ।
मानसस्मरणेनैव तुल्यमेकेन सुन्दरि ॥ इति ॥

स्वच्छन्दतन्त्रसारे तु—

जपस्तु षड्विधः प्रोक्तस्तत्प्रकारोऽयमुच्यते ।
वाचिकं मानसं चैव यौगिकं योगवाचिकम् ॥
योगमानसिकं चैव वाङ्मानसिकयौगिकम् ।
वाचा केवलयोच्चार्य मन्त्रं [1]देवीं विभाव्य च ॥
जपेद्यत् परमेशानि वाचिकं तत्प्रकीर्तितम् ।
देव्या रूपं च सञ्चिन्त्य सावधानेन चेतसा ॥
मन्त्रस्याप्यनुसन्धानं मानसं परिकीर्तितम् ।
त्रिस्थानेन त्रिबीजानि क्रमात् सञ्चिन्त्य मार्गतः ॥
आरोहो यौगिकं प्रोक्तमुच्यते योगवाचिकम् ।
लक्ष्ये मनः समायोज्य वाचा मन्त्रं जपेच्छिवे ॥
योगवाचिकमेतत् स्याद्योगमानसिकं शृणु ।
लक्ष्येण मानसं पूर्वं संयोज्य मनसा जपम् ॥
योगमानसिकं विद्यादथान्यदपि चोच्यते ।
मनसाऽपि जपेन्मन्त्रं बीजानारोहणक्रमात् ॥
वाङ्मानसिकयोगाख्यं जपमेतदनुत्तमम् ।
वाचिकेन जपेनैव केवला वाक् प्रवर्तते ॥
मानसाच्छ्रियमाप्नोति यौगिकाद्योगसिद्धयः ।
वाङ्मानसजपेनैव वाज्ज्ञानैश्वर्यसिद्धयः ॥
भवन्ति परमेशानि योगमानसिकेन तु ।
अणिमादीनि चान्यानि सर्वाणि लभते ध्रुवम् ॥

[1] देवि—ब२, ब३, अ.

वाङ्मानसिकयोगाख्यजपेन परमेश्वरि ।
वागाद्यकुलपर्यन्तमचिराल्लभते नरः ॥
येन केन जपेनैव ह्रस्वदीर्घप्लुतक्रमात् ।
जप्ता विद्याश्च मन्त्राश्च सर्वे सर्वार्थदायिनः ॥
भवन्ति गुरुवक्त्रेण लब्धाः सर्वाङ्गसुन्दरि ।
स्वयं निरीक्ष्य ये कोशं मन्त्रं विद्यामथापि वा ॥
गृह्णीयुर्ये व्रजेयुस्ते रौरवं नरकं शिवे ।
तस्मादास्तिक्यसंयुक्तः साधको देशिकाज्ञया ॥
शिवागमान्निरीक्षेत नान्यथा वीरवन्दिते ॥ इति ॥

होमे वह्निस्थितिविचारः

तत्र मुहूर्तचिन्तामणौ—

सैका तिथिर्वारयुता कृताप्ता शेषे गुणेऽभ्रे भुवि वह्निवासः ।
सौख्याय होमः शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च ॥

अस्यार्थः — शुक्लप्रतिपदादिहोमदिनसङ्ख्ययैकमधिकमङ्कमादित्यादिवारसङ्ख्यां च मेलयित्वा चतुर्भिर्हरणेन त्रये शिष्टे शून्ये वा वह्निर्भुवि वसति । तदा होमः सुखाय भवति । एकस्मिन् द्वये वा शेषे क्रमाद्दिवि पाताळे च वह्निवासः । तदानीं होमेन प्राणार्थनाशौ भवतः इति ॥

तत्रैव ग्रहविचारो रुद्रयामळे—

तेषां स्थितिक्रमं वक्ष्ये नक्षत्रेषु यथा स्थिताः ।
सूर्यो बुधो भृगुश्चैव शनिश्चन्द्रो महीसुतः ॥
जीवो राहुश्च केतुश्च नवैते देवि खेचराः ।
सूर्यभाच्चन्द्रभं यावत् गणयेच्च महेश्वरि ॥
त्रीणि त्रीणि च ऋक्षाणि रविभादीनि [1]दापयेत् ।
सूर्यादीनां फलं देवि शृणु वक्ष्ये यथाक्रमम् ॥

[1] भावयेत्—ब२.

आदित्ये तु भवेच्छोको बुधे चैव धनागमः ।
शुक्रे लाभं विजानीयाच्छनौ पीडा न संशयः ॥
चन्द्रे लाभो महान् देवि भौमे चैव तु बन्धनम् ।
गुरुणा च धनप्राप्तिः राहौ हानिस्तथैव च ॥
केतुना जायते मृत्युः फलमेवं महेश्वरि ।
क्रूरहोमस्तथा देवि क्रूरग्रहमुखो भवेत् ॥ इति ॥

सूर्यभं सूर्याक्रान्तं नक्षत्रं, चन्द्रभं तद्दिवसनक्षत्रम् । दापयेत् सूर्यादिभ्यः इति शेषः । सूर्यनक्षत्रादिचन्द्रनक्षत्रपर्यन्तं नक्षत्राणां त्रयं त्रयं सूर्यादिस्वामिकमित्यर्थः । क्रूरहोमो मारणोच्चाटनादिफलकः । शेषं सुगमम् । एवं वह्निस्थितिं ग्रहांश्च विचार्य, सौम्यहोमः सौम्यग्रहेषु क्रूरश्च क्रूरग्रहेषु कार्यः ॥

कुण्डस्थण्डिलयोःपरिमाणम्

तत्र एकोनपञ्चाशत्सङ्ख्याकाहुतिपर्यन्तं स्थण्डिलमेव । तच्च अष्टादशाङ्गुलप्रमाणं परितः अङ्गुष्ठोन्नतम् । अग्रे कुण्डेन सह विकल्पोऽशक्तिशक्तिभ्यां व्यवस्थितिः । पञ्चाशदादिनवनवतिसङ्ख्याहुतिपर्यन्तं मुष्टिमात्रम् । मुष्टिः अरत्निः । शतादिनवनवत्यधिकनवशत्याहुतिपर्यन्तं अरत्निमितम् । निष्कनिष्ठमुष्टिर्हस्तोऽरत्निः । सहस्रादिहोमे हस्तमात्रम् । अयुतादौ द्विहस्तम् । लक्षादौ चतुर्हस्तम् । दशलक्षादौ षड्ढस्तम् । कोटिहोमादौ अष्टहस्तं दशहस्तं वा । चतुर्विंशत्यङ्गुलैः हस्तः । अङ्गुलं तु तिर्यङ्निहिताष्टयवप्रमाणं स्वमध्यमामध्यपर्वमितं वा ज्ञेयम् । मुष्ट्या वा चतुरङ्गुलानि । अर्धयवोनचतुस्त्रिंशताङ्गुलैः द्विहस्तम् । सार्धैकचत्वारिंशता त्रिहस्तम् । अष्टचत्वारिंशता चतुर्हस्तम् । पादोनचतुःपञ्चाशता पञ्चहस्तम् । पादोनैकोनषष्ट्या षड्ढस्तम् । सार्धत्रिषष्ट्या सप्तहस्तम् । अष्टषष्ट्या यवोनया अष्टहस्तम् । द्विसप्तत्या नवहस्तम् । षट्सप्तत्या दशहस्तं कुण्डं स्थण्डिलं वा भवति । कुण्डाङ्गानां व्यासखातनाभिकण्ठमेखलायोनीनां सम्यज्ज्ञान एव कुण्डं युक्तम् । अन्यथा अत्यन्तमनिष्टम् । स्थण्डिलं चतुरश्रमङ्गुलोत्सेधं चतुरङ्गुलोत्सेधं वा । स्थूलद्रव्यहोमे तत्तत्परिमाणस्यापर्याप्तौ स्वोत्तरपरिमाणमपि ग्राह्यम् ॥

होमे इतिकर्तव्यताविशेषः

बहु-ऋत्विक्कर्तृके होमे यथाकालं प्रत्याहुत्युद्देशत्यागयोः कर्तुमशक्यत्वात् यजमानो देवतां द्रव्यं च मनसा ध्यात्वा अमुकदेवताया इदं सर्वहोमद्रव्यजातं न ममेति त्यजेत् ॥

ऋत्विजस्त्वाचान्ताः कृतप्राणायामाः प्रत्येकं देशकालौ सङ्कीर्त्य अमुकेन वृतोऽहं अमुकसङ्ख्याकहोममध्ये अमुकांशेन यजमानोपकल्पितामुकद्रव्येण होमं करिष्ये इति सङ्कल्प्य आसनविधिं भूतशुद्ध्यादिकं तत्तद्देवतर्ष्यादिन्यासत्रयं कृत्वा अग्नौ देवताध्यानमानसपूजाऽन्ते प्राङ्मुखा वोदङ्मुखा वा जुहुयुः । होमसङ्ख्यासमाप्तौ परिधिपरिस्तरणान्तःपतितं हविः सर्वमग्नौ प्रक्षिपेत् । तद्बहिःपतितं तु न ॥

अनेकदिनसाध्ये तु होमे प्रतिदिवसं कयाचित् सङ्ख्यया संस्थाप्य वह्निरक्षण-पूर्वकं शुभदिने समाप्तिं कुर्यात् । प्रतिदिनं होमाद्यन्तयोः प्रधानदेवतां अङ्गदेवताश्च गन्धपुष्पादिभिः अग्निमध्ये पूजयेत् । आरम्भे समाप्तिदिने अग्निमूलमन्त्रेण स्वाहास्व-धासहितमग्निं पूजयेत् । तत्र गन्धादिकं बहिरेव अग्नये दद्यात् ॥

यत्र होम एव प्रयोगविशेषे फलप्रदत्वात् प्रधानं न पुनर्जपाङ्गं तत्र ब्राह्मणभोजनसङ्ख्या तन्त्रे विशेषानुक्तौ स्मृत्युक्ता ग्राह्या । तत्र लक्षहोमे षष्ट्यधिका नवशती मुख्यः पक्षः । विंशत्यधिका पञ्चशती मध्यमः । दशाधिका त्रिशती अधमः ॥

यत्र प्रधानदेवताऽङ्गत्वेन स्मृतितन्त्रोक्तयोरविरोधे समुच्चयपक्षमाश्रित्य ग्रहा अपि पूज्यन्ते तत्र तदङ्गब्राह्मणभोजनमपि कार्यम् । तत्रोत्तमे पक्षे विंशत्यधिका सप्तशती ब्राह्मणानां भोजनीया । मध्यमपक्षे चत्वारिंशदुत्तरं शतत्रयम् । अधमे च दशाधिकं शतमिति ॥

काम्यहोमद्रव्याणां मानं फलं च

तिलैश्चुलुकमितैः शतसङ्ख्याकैर्वा प्रत्याहुतिहोमः शान्त्यै, आज्येन च कर्षप्रमाणेन । ग्रासमितैरन्नैरन्नाय । अमृतासमिद्भिः कनिष्ठास्थूलाभिः चतुरङ्गुल-प्रमाणाभिः ज्वरोपशमनाय चूतपल्लवैश्च । दूर्वाभिः तिसृभिस्तिसृभिरायुषे । कृतमालकुसुमैः धनाय । उत्पलैः भोगाय । बिल्वदलैः राज्याय । समग्रैः पद्मैः

साम्राज्याय । मुष्टिमितैः लाजैः कन्यायै । नन्द्यावर्तैः कवित्वाय । [1]वञ्जुळमल्लिका-जातीपुन्नागैः भाग्याय । बन्धूकजपाकिंशुकमधूकैः ऐश्वर्याय । कदम्बैः वश्याय । लवणैः शुक्तिप्रमाणैः आकर्षणाय । शालितण्डुलैः अर्धमुष्टिमितैः धान्याय । कुङ्कुमगोरोचनादिभिः गुञ्जामितैः सौभाग्याय । पलाशपुष्पैः तेजसे कपिलाघृतेन चोक्तमानेन। धुत्तूरकुसुमैरुन्मादाय । [2]विषवृक्षनिम्बश्लेष्मातकविभीतकसमिद्भिः दशाङ्गुलप्रमाणाभिः शत्रुनाशाय । निम्बतैलाक्तैः [3]लवणैः उक्तमानैः मारणाय । काकोलूकपक्षैर्णैकैकेन विद्वेषणाय । तिलतैलाक्तैः मरीचैः विंशत्या कासश्वासप्रशमनाय इति । पुष्पेषु स्थूलमेकैकं, अल्पानि द्वित्रीणि इति वा विवेकः । एतानि द्रव्याणि काम्यजपाङ्गेषु होमेषु तत्तज्जपदशांशसङ्ख्याकानि । प्राधान्येन होमे तु सङ्ख्याऽनुक्तौ सहस्रसङ्ख्याकानि । इह च प्रथमं अभीष्टदेवतायै विज्ञाप्य अमुककर्मसिद्ध्यर्थं एतावदाहुतीः करिष्यामीति सङ्कल्पयेत् । कर्षस्तु दशगुञ्जामितमाषषोडशकप्रमाणः । शुक्तिः कर्षद्वयम् । मुष्टिस्तु पलम् ॥

पुरश्चरणकाले विहितानि

मनःस्थैर्यशौचमौनमन्त्रार्थचिन्तननिर्वेदश्रद्धोत्साहक्रोधाभावसन्तोषेन्द्रियनिग्रह-ब्रह्मचर्यगुरुप्रणतिसुगन्धामलकस्नानसुवसनसुरभिळानुलेपनमध्यपत्रवर्जपलाशपत्रावलिमितैकवारभोजनप्रक्षाळितदर्भास्तीर्णधौतवस्त्रशयनत्रिषवणस्नानादीनि । अशक्तौ तु प्रातःस्नानमात्रम् ॥

निषिद्धानि

अप्रियानृतभाषणकरञ्जविभीतकार्कस्नुहिछायाक्रमणप्रतिग्रहादीक्षितस्त्रीशूद्रपतितनास्तिकसंभाषणबह्वेकमलिनवस्त्रधारणकाम्यकर्माविहितकर्मकांस्यभोजनासत्सङ्गोष्णजलस्नानकञ्चुकोष्णीषधारणप्राणिहिंसापादुकायानशय्याऽऽरोहणनग्नत्वकुशरहितकरत्वादीनि अतिभोजनं च ॥

भोज्यानि

शुक्लैकविधान्नं हैमन्तनीवारकङ्कुषष्टिका यवाः शूद्रानवहताः गुडवर्जितमैक्षवं कृष्णतिलमुद्गकलायकन्दविशेषनारिकेळकदळीलवलीपनसाम्रामलकार्द्रकसामुद्रलवणानुद्धृतसारगव्यपिप्पलीजीरकनारङ्गादीनि ॥

[1] वकुल—अ. [2] तिलतैलाक्तैः इत्यधिकः—अ. [3] भक्तल—अ.

अभोज्यानि

गुडकृत्रिमलवणपर्युषितनिस्स्नेहकीटादिदूषितकाञ्जिकग्रञ्जनबिल्वकरञ्जलशुनमृणाळकोद्रवतैलपक्कमाषमसूरचणकगोधूमदेवधान्यादीनि ॥

भोजनपर्यायः

स्वेष्टदेवतायै निवेदितं सव्यञ्जनमन्नं मूलेन प्रोक्ष्य सप्तवारं प्रतिद्रव्यमभिमन्त्र्य अश्नीयात् । उदकं द्वात्रिंशद्वारं मूलाभिमन्त्रितं पिबेत् ॥

जपादिसमय आवश्यकोपाधौ शुचौ देशे तं निवर्त्य स्नात्वा शेषं समापयेत् । अशक्तौ तु मन्त्रभस्मान्यतरस्नानवस्त्रपरिवर्तने केवलं कुर्यादिति ॥

इत्थं कृतपुरश्चरणः सिद्धमनुः देवताप्रसादसम्पन्नः स्वातन्त्र्येणोपास्तौ श्रीक्रमोक्तेन क्रमेण नैमित्तिकार्चनपरः सति कामे काम्यमनुतिष्ठन् पूर्णमनोरथः सुखी विहरेदिति शिवम् ॥

इति श्रीभासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेनोमानन्दनाथेन निर्मिते अभिनवे कल्पसूत्रानुसारिणि नित्योत्सवनिबन्धे श्यामाक्रमनिरूपणं नाम प्रौढोल्लासश्चतुर्थः समाप्तः ॥

तदन्तोल्लासः पञ्चमः—दण्डिनीक्रमः

उपोद्घातः

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
तनोत्युमानन्दनाथः तदन्तोल्लासमद्भुतम् ॥
अत्र संविन्महाराज्ञीदण्डनाथाक्रमः स्मृतः ।
दुष्टनिग्रहशिष्टानुग्रहौ यस्या वशंवदौ ॥
प्रसाद्य सचिवेशानीं पञ्चमीक्रममाचरेत् ।
वाग्ग्लौमुपक्रमा यत्र सर्वाङ्गमनवो मताः ॥
दीक्षाविधिरिहापेक्ष्यः आरम्भोल्लास ईक्ष्यताम् ।
सन्ध्या तु तान्त्रिकी न स्यात् सूत्रकारैरसूत्रणात् ॥
निशीथे किं तु कुर्वीत बालया प्रातराह्निकम् ।
तस्याः खल्विष्टमन्त्रत्वात् प्रागुपदेष्टव्यता यतः ॥

काल्यकृत्यं आह्निकं च

साधकस्तावन्निशीथे प्रबुद्धः श्रीक्रमोक्तेन क्रमेण श्रीगुरुध्यानादिप्राणायामान्तं विधिं विदध्यात् । तत्र च श्रीगुरुपादुकायां [1]आदौ त्रितारीस्थाने वाक् ग्लौं इति बीजद्वयं योज्यम् । ततो हृदयपरमाकाशे स्फुरतः अखण्डानन्ददायिनः परसंवित्परिणतेः अनाहतस्य नादस्य अनुसन्धानेन भस्मितनिखिलकश्मलो मूलं मनसा दशवारमावर्त्य उत्थाय निर्वर्तितावश्यको गृह एव वारुण-मान्त्र-भास्मनस्नानेष्वन्यतमं कुर्यात् । वारुणे मूलेन त्रिरुदकाञ्जलिदानं शिरसि, त्रिराचमनं, त्रिः प्रोक्षणं च विदध्यात् ।

[1] इह ललिताङ्गत्वेन वाराह्या निशीथोपास्तावाह्निकं दिवा सपर्या चानुष्ठेयैव । इत्यधिकः—

मान्त्रभास्मनस्नाने स्मृत्युक्ते एव। अथ वाससी धौते परिधाय विधृतपुण्ड्रः मूलेन त्रिराचम्य द्विः परिमृज्य सकृदुपस्पृश्य चक्षुषी नासिके श्रोत्रे अंसे नाभिं हृदयं शिरश्चावमृशेत् ॥

यागमन्दिरप्रवेशः

एवं त्रिराचम्य यागमन्दिरमासाद्य गोमयेनोपलिप्तद्वारस्थण्डिलं द्वारस्य दक्षवामोर्ध्वभागेषु क्रमेण—

ऐं ग्लौं भद्रकाल्यै नमः, भैरवाय, लम्बोदराय नमः ॥

इति तिस्रो द्वारदेवताः समर्च्य अन्तःप्रविष्टो रङ्गवल्लीपुष्पमालावितानकादिभिरलङ्कृत्य यागमन्दिरं, ऐं ग्लौं रक्तद्वादशशक्तियुक्ताय दीपनाथाय नमः इति पुष्पाञ्जलिना भूमौ दीपनाथमिष्ट्वा, सपर्यासामग्रीं दक्षभागे निधाय, दीपानभितः प्रज्वाल्य, गन्धमाल्यादिभिरात्मानमलङ्कृत्य, ताम्बूलसुरभिलवदनो जातीपत्रफललवङ्गैलाकर्पूराख्यपञ्चतिक्तामोदितवदनो वा प्रसन्नमनाः स्वास्तीर्णे ऊर्णामृदुनि शुचिनि बालान्त्यबीजेन द्वादशवारमभिमन्त्रिते मूलमन्त्रोक्षिते आसने ऐं ग्लौं आधारशक्तिकमलासनाय नमः इति प्राङ्मुख उदङ्मुखो वा पद्मासनाद्यन्यतमेनासनेनोपविश्य, ऐं ग्लौं शिवादिश्रीगुरुभ्यो नमः ऐं ग्लौं समस्तगुप्तप्रकटसिद्धयोगिनीचक्रश्रीपादुकाभ्यो नमः इति मूर्धनि बद्धाञ्जलिः स्ववामदक्षपार्श्वयोः क्रमेण गुरुपादुकया श्रीगुरुं महागणपतिमन्त्रेण च गणपतिं प्रणम्य ऐं ग्लौं ऐं हः अस्त्राय फट् इति मन्त्रेणावृत्तेन अङ्गुष्ठादिकरतलान्तं कूर्परयोः देहे [1]च क्रमेण न्यासव्यापके कृत्वा स्वस्य देवतैक्यं भावयन्,

ऐं ग्लौं अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥

इति मन्त्रं सकृदुच्चार्य युगपद्वामपार्ष्णिभूतलत्रिराघातकरास्फोटत्रितयक्रूरदृष्ट्यवलोकनपूर्वकं तालत्रयेण भौमान्तरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत्। तालत्रयं नाम दक्षमध्यमातर्जनीभ्यामधोमुखाभ्यां वामकरतले सशब्दमुपर्युपरि त्रिरभिघातः ॥

[1] च व्यापकं कृत्वा—श्री, अ.

प्राणायामः

अथ नमः इति अङ्गुष्ठमन्त्रमुच्चार्य अंकुशेन शिखां बद्ध्वा श्रीक्रमोक्तेन क्रमेण भूतशुद्धिं आत्मप्राणप्रतिष्ठां च विधाय मूलेन प्राग्वत् विंशतिधा षोडशधा दशधा सप्तधा त्रिधा वा प्राणानायम्य ॥

द्वितारीन्यासः

तेजोरूपदेवीमयं भावयन्नात्मानं स्वदेहे न्यासजालात्मकं वज्रकवचमामुञ्चेत् । तत्रादौ अं ऐं ग्लौं अं नमः शिरसि । आं ऐं ग्लौं आं नमः मुखवृत्ते । इत्यादिरीत्या क्षान्तमातृकासम्पुटितमुक्तबीजद्वयं मातृकास्थानेषु न्यसेत् ॥ इति द्वितारीन्यासः ॥

करषडंगन्यासौ

ऐं ग्लौं अन्धे अन्धिनि नमः अङ्गुष्ठाभ्यां नमः ॥
२ रुन्धे रुन्धिनि नमः तर्जनीभ्यां नमः ॥
२ जम्भे जम्भिनि नमो मध्यमाभ्यां नमः ॥
२ मोहे मोहिनि नमः अनामिकाभ्यां नमः ॥
२ स्तम्भे स्तम्भिनि नमः कनिष्ठिकाभ्यां नमः ॥

इति पञ्चभिः मन्त्रैः अङ्गुष्ठादिकनिष्ठान्तं न्यस्य,

ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि हृदयाय नमः ॥
२ वाराहि वाराहि शिरसे स्वाहा ॥
२ वराहमुखि वराहमुखि शिखायै वषट् ॥
२ अन्धे अन्धिनि नमः कवचाय हुम् ॥
२ रुन्धे रुन्धिनि नमः नेत्रत्रयाय वौषट् ॥
२ जम्भे जम्भिनि नमः अस्त्राय फट् ॥

इति मन्त्रैः हृदयादिषु न्यसेत् ॥ इति करषडङ्गन्यासौ ॥

नेह करन्यासे अस्त्रमन्त्रः, तेन करतलन्यासो न भवति ॥

अर्घ्यशोधनम्

ततः श्रीक्रमोक्तेन क्रमेण सामान्यविशेषार्घ्ये आसादयेत् । अत्र चोभयोरप्यर्घ्ययोः प्रवेशरीत्या अन्तरन्तश्चतुरश्रादिमण्डलकरणम्, २ अं आत्मतत्त्वाय आधारशक्तये वौषट् इत्याधारस्थापनम्, २ उं विद्यातत्त्वाय पद्मासनाय वौषट् इति पात्रनिधानम्, २ मं शिवतत्त्वाय सोममण्डलाय नम इति शुद्धजलापूरणम्,

ऐं ग्लौं ब्रह्माण्डाखण्डसम्भूतमशेषरससम्भृतम् ।
आपूरितं महापात्रं पीयूषरसमावह ॥

इति क्षीरपूरणे मन्त्रान्तरं चोक्तम्, षडङ्गं, चतुर्नवतिमन्त्राभिमन्त्रणाभावः, मूलेन दशधा अभिमन्त्रणं च विशेषः । अथ विशेषार्घ्यबिन्दुभिः सपर्यासामग्रीं पावयित्वा ॥

सप्तार्णमन्त्रपञ्चकन्यासः

अन्धे अन्धिनि नमः इत्यादीन् पञ्चमन्त्रान् उक्तबीजद्वयादिकान् शिरोवदनहृदयगुह्यपादेषु न्यस्य,

अष्टखण्डन्यासः

मूलस्य खण्डैरष्टभिः वक्ष्यमाणेषु स्थानेषु न्यसेत् । यथा—

ऐं ग्लौं ऐं नमो भगवति वार्ताळि वार्ताळि वाराहि वाराहि वराहमुखि वराहमुखि नमः इति पादादिजानुपर्यन्तम् ॥

२ अन्धे अन्धिनि नमः इत्याजानुकटि ॥

२ रुन्धे रुन्धिनि नमः इत्याकटिनाभि ॥

२ जम्भे जम्भिनि नमः इत्यानाभिहृदयम् ॥

२ मोहे मोहिनि नमः इत्याहृदयकण्ठम् ॥

२ स्तम्भे स्तम्भिनि नमः इत्याकण्ठभ्रूमध्यम् ॥

२ सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भनं कुरु कुरु शीघ्रं वश्यं नमः इत्याभ्रूमध्यललाटम् ॥

२ ऐं ग्लौं ठः ठः ठः ठः हुं अस्त्राय फट् इत्याललाटब्रह्मरन्ध्रं चेति ॥

मातृकास्थानेषु मूलपदन्यासः

ततो मूलमन्त्रस्य द्विचत्वारिंशत्पदानि [1]मातृकास्थानेषु न्यसेत् । यथा—

ऐं ग्लौं ऐं नमः शिरसि, ग्लौं मुखवृत्ते, ऐं नेत्रयोः, नमो कर्णयोः, भगवति नासापुटयोः, वार्तालि कपोलयोः, वार्तालि ओष्ठयोः, वाराहि दन्तपङ्क्त्योः, वाराहि [2]ब्रह्मरन्ध्रे, वराहमुखि [3]मुखान्तः, वराहमुखि दक्षदोर्मूले, अन्धे तन्मध्यसन्धौ, अन्धिनि तन्मणिबन्धे, नमो तदङ्गुलिमूले, रुन्धे तदङ्गुल्यग्रे, रुन्धिनि वामदोर्मूले, नमो तन्मध्यसन्धौ, जम्भे तन्मणिबन्धे, जम्भिनि तदङ्गुलिमूले, नमो तदङ्गुल्यग्रे, मोहे दक्षोरुमूले, मोहिनि तज्जानुनि, नमो तत्पादसन्धौ, स्तम्भे तदङ्गुलिमूले, स्तम्भिनि तदङ्गुल्यग्रे, नमो वामोरुमूले, सर्वदुष्टप्रदुष्टानां वामजानुनि, सर्वेषां तत्पादसन्धौ, सर्ववाक्चित्त-चक्षुर्मुखगतिजिह्वास्तम्भनं तदङ्गुलिमूले, कुरु तदङ्गुल्यग्रे, कुरु पार्श्वयोः, शीघ्रं पृष्ठे, वश्यं नाभौ, ऐं जठरे, ग्लौं हृदि, ठः दक्षकक्षे, ठः अपरगळे, ठः वामकक्षे, ठः हृदादिहस्तयोः, हुं हृदादिपादयोः, अस्त्राय हृदादिपाय्वन्तम्, ऐं ग्लौं फट् नमः— हृदादिमूर्धान्तम् ॥ इति ॥

तत्त्वाष्टकन्यासः

ततः ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि इत्यादिरीत्या प्रागुक्तानां अष्टानां खण्डानां प्रत्येकमन्ते क्रमेण ह्लां शर्वाय क्षितितत्त्वाधिपतये नमः, ह्लीं भवाय अम्बुतत्त्वाधिपतये नमः, ह्लूं रुद्राय वह्नितत्त्वाधिपतये नमः, ह्लैं उग्राय वायुतत्त्वाधिपतये नमः, ह्लौं ईशानाय भानुतत्त्वाधिपतये नमः, सों महादेवाय सोमतत्त्वाधिपतये नमः, हं पशुपतये यजमानतत्त्वाधिपतये नमः, भौं भीमाय आकाशतत्त्वाधिपतये नमः, इति उक्तेषु पादादिजान्वित्यादिषु अष्टसु स्थानेषु तत्त्वाष्टकं न्यसेत् ॥

[1] स्वांगेषु न्यसेत्—ब२, ब३, अ.
[2] जिह्वाग्रे—श्री.
[3] कण्ठे—श्री.

यन्त्रप्राणप्रतिष्ठा

अथ व्यापकत्रयं मूलेन कृत्वा स्वपुरतः श्वेतपटपट्टदुकूलान्यतमे लिखिते लेखिते वा सुवर्णरजतताम्रचन्दनपीठादौ लिखिते उत्कीर्णे वा दृष्टिमनोहरे भूपुरत्रय-सहस्रपत्रशतपत्राष्टपत्रषडरपञ्चारत्र्यश्रबिन्दुमये चक्रे कुसुमाञ्जलिं विकीर्य

ऐं ग्लौं वार्तालियन्त्रस्य प्राणाः इह प्राणाः, ऐं ग्लौं वार्तालियन्त्रस्य जीव इह स्थितः, ऐं ग्लौं वार्तालियन्त्रस्य सर्वेन्द्रियाणि, ऐं ग्लौं वार्तालियन्त्रस्य वाङ्मनःप्राणाः इहायान्तु स्वाहा ॥

इति यन्त्रप्राणप्रतिष्ठां विदध्यात् ॥

पीठपूजा

ऐं ग्लौं स्वर्णप्राकाराय नमः, सुराब्धये, वराहद्वीपाय, वराहपीठाय, आं आधारशक्तये, कुं कूर्माय, कं कन्दाय, अं अनन्तनाळाय नमः ॥ इति पीठस्य मध्ये ॥

ऐं ग्लौं ऋं धर्माय नमः, ॠं ज्ञानाय, ऌं वैराग्याय, ॡं ऐश्वर्याय नमः ॥ इति तस्य आग्नेयादिदिक्षु ॥

ऐं ग्लौं ऋं अधर्माय नमः, ॠं अज्ञानाय, ऌं अवैराग्याय, ॡं अनैश्वर्याय नमः ॥ इति प्रागाद्यासु दिक्षु चाभ्यर्च्य ॥

ऐं ग्लौं त्र्यरपञ्चारषडरदळाष्टकशतपत्रसहस्रारपद्मासनाय नमः इति चक्रमनुना चक्रमिष्ट्वा ॥

ऐं ग्लौं वह्निमण्डलाय नमः, सूर्यमण्डलाय, सोममण्डलाय, सं सत्वाय, रं रजसे, तं तमसे, आं आत्मने, अं अन्तरात्मने, पं परमात्मने, ह्रीं ज्ञानात्मने नमः ॥ इति च तत्रैव वरिवस्येत् ॥

स्वर्णप्राकाराय नमः इत्याद्याः ह्रीं ज्ञानात्मने नमः इत्यन्ताः एते सप्तविंशतिः पीठमनवो ज्ञेयाः ॥

आसनपूजा

ततः २ ह्रौं प्रेतपद्मासनाय सदाशिवाय नमः इति पुष्पैः बिन्दौ देव्यासनमभिपूज्य,

मूर्तिकल्पनम्

तत्र २ ॡ षा ई वराहमूर्तये ठः ठः ठः ठः हुं फट् ग्लौं ऐं इति मूर्तिकरण्या विद्यया चक्रे देव्या मूर्तिं सङ्कल्प्य,

देवीध्यानम्

हृदि देवीं ध्यायेत् । यथा—

पाथोरुहपीठगतां पाथोधरमेचकां कुटिलदंष्ट्राम् ।
कपिलाक्षित्रितयां घनकुचकुम्भां प्रणतवाञ्छितवदान्याम् ॥
दक्षोर्ध्वतोरिखड्गौ मुसलमभीतिं तदन्यतस्तद्वत् ।
शङ्खं खेटहलवरान् करैर्दधानां स्मरामि वार्तालीम् ॥

अरिः सुदर्शनम् ॥

देव्याः षोडशोपचारपूजा

अथ वक्ष्यमाणेन प्रकारेण देव्यै मनसा पञ्चोपचारानर्पयित्वा भक्तानुग्रहात्तेजोरूपेण परिणतां ब्रह्मरन्ध्रं प्राप्य वहन्नासापुटद्वारा निर्गतां कुसुमगर्भिते निजाञ्जलौ सन्निहितां तां मूर्तौ मूलविद्यया आवाह्य आवाहिता भवेत्यादिरीत्या तत्तन्मुद्राप्रदर्शनपूर्वकं आवाहन-संस्थापन-सन्निधापन-सन्निरोधन-सम्मुखीकरण-अवकुण्ठनानि विधाय वन्दन-धेनुयोनिमुद्राश्च प्रदर्शयेत् । मुद्राप्रकारस्तु श्रीप्रकरणे उक्तोऽनुसन्धेयः । ततः—ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि हृदयाय नमः इत्यादिकान् प्रागुक्तान् षडंगमन्त्रान् २ अन्धे अन्धिनि नमः इत्यादिकान् पंचांगमन्त्रांश्च न्यासोक्तभङ्ग्या देव्याः तत्तदङ्गे कुसुमेन विन्यस्य, ऐं ग्लौं वाराह्यै पाद्यं कल्पयामि नमः इत्यादिरीत्या देव्यै पाद्यार्घ्याचमनीयस्नानवासोगन्धपुष्पधूपदीपनीराजनछत्रचामरयुगळदर्पणनैवेद्य - पानीयताम्बूलाख्यान् षोडशोपचारान् कृत्वा, नैवेद्याङ्गत्वेन पूर्वोत्तरापोशनकरप्रक्षाळन-गण्डूषाचमनीयानि च प्रदद्यात् । नैवेद्ये त्रिकोणवृत्तचतुरश्रमण्डलकरणम्, मूलेन प्रोक्षणम्, वं इति धेनुमुद्रया चामृतीकरणम्, मूलेन सप्तवारमभिमन्त्रणम्, प्राणादिमुद्राप्रदर्शनं च विधेयम् ॥

देवीतर्पणम्

अथ मूलान्ते वार्ताळीश्रीपादुकां पूजयामि तर्पयामीति वामकरतत्त्वमुद्रासन्दष्ट-द्वितीयशकलगृहीतक्षीरबिन्दुसहपतितैः दक्षकरोपात्तकुसुमक्षेपैः देवीं दशवारं सन्तर्प्य पूर्वोक्तानां षडङ्गमन्त्राणां अन्ते—हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः, शिरःशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः, शिखाशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः, कवचशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः, नेत्रशक्तिश्रीपादुका पूजयामि तर्पयामि नमः, अस्त्रशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः, इति क्रमेण देव्यङ्गे अग्नीशासुरवायुकोणेषु मौळौ प्रागादिदिक्षु च षडङ्गानि सम्पूज्य ॥

ओघत्रययजनम्

पृष्ठतः प्रागपवर्गरेखात्रये दक्षिणसंस्थाक्रमेण गुर्वोघत्रयं यजेत् । यथा—

ऐं ग्लौं परप्रकाशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, परमेशानन्द, परशिवानन्द (परसिद्धानन्द इति पाठान्तरं), कामेश्वर्यम्बानन्द, मोक्षानन्द, कामानन्द, अमृतानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति दिव्यौघः ॥

ऐं ग्लौं ईशानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, तत्पुरुषानन्द, अघोरानन्द, वामदेवानन्द, सद्योजातानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सिद्धौघः ॥

ऐं ग्लौं पञ्चोत्तरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, परमानन्द, सर्वज्ञानन्द, सर्वानन्द, सिद्धानन्द, गोविन्दानन्द, शङ्करानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति मानवौघः ॥

आहत्य एकोनविंशतिगुरवः ॥

आवरणार्चनम्

अङ्गाद्यावरणान्तानां अर्चनप्रकारस्तु देव्यर्चनोक्त एव ॥

त्र्यश्रे देव्यग्रकोणमारभ्य प्रादक्षिण्यक्रमेण—

ऐं ग्लौं जम्भिनीश्रीपादुकां पूजयामि तर्पयामि नमः, मोहिनी, स्तम्भिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति प्रथमावरणम् ॥

पञ्चारे प्राग्वत्—

ऐं ग्लौं अन्धिनीश्रीपादुकां पूजयामि तर्पयामि नमः, रुन्धिनी, जम्भिनी, मोहिनी, स्तम्भिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति द्वितीयावरणम् ॥

षट्कोणस्य कोणमूलेषु प्राग्वत्—

ऐं ग्लौं आ क्षा ई ब्राह्मीश्रीपादुकां पूजयामि तर्पयामि नमः, ई ळा ई माहेश्वरी, ऊ हा ई कौमारी, ॠ सा ई वैष्णवी, ऐ शा ई इन्द्राणी, औ वा ई चामुण्डाश्रीपादुकां पूजयामि तर्पयामि नमः इति सम्पूज्य,

तस्यैव कोणाग्रेषु मध्ये च प्राग्वत्—

ऐं ग्लौं य म र यूं यां यीं यूं यैं यौं यः याकिनि जम्भय जम्भय मम सर्वशत्रूणां त्वग्धातुं गृह्ण गृह्ण अणिमाऽऽदि वशं कुरु कुरु स्वाहा याकिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

२ र म र यूं रां रीं रूं रैं रौं रः राकिनि जम्भय जम्भय मम सर्वशत्रूणां रक्तधातुं पिब पिब अणिमाऽऽदि वशं कुरु कुरु स्वाहा राकिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

२ ल म र यूं लां लीं लूं लैं लौं लः लाकिनि जम्भय जम्भय मम सर्वशत्रूणां मांसधातुं भक्षय भक्षय अणिमाऽऽदि वशं कुरु कुरु स्वाहा लाकिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

२ ड म र यूं डां डीं डूं डैं डौं डः डाकिनि जम्भय जम्भय मम सर्वशत्रूणां मेदोधातुं ग्रस ग्रस अणिमाऽऽदि वशं कुरु कुरु स्वाहा डाकिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

२ क म र यूं कां कीं कूं कैं कौं कः काकिनि जम्भय जम्भय मम सर्वशत्रूणां अस्थिधातुं भञ्जय भञ्जय अणिमाऽऽदि वशं कुरु कुरु स्वाहा काकिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

२ स म र यूं सां सीं सूं सैं सौं सः साकिनि जम्भय जम्भय मम सर्वशत्रूणां मज्जाधातुं गृह्ण गृह्ण अणिमाऽऽदि वशं कुरु कुरु स्वाहा साकिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

२ ह म र यूं हां हीं हूं हैं हौं हः हाकिनि जम्भय जम्भय मम सर्वशत्रूणां शुक्लधातुं पिब पिब अणिमाऽऽदि वशं कुरु कुरु स्वाहा हाकिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

इति धातुनाथानिष्ट्वा,

षडरस्य दक्षवामपार्श्वयोः क्रमेण—

ऐं ग्लौं क्रोधिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

२ स्तम्भिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

तत्रैव—

२ स्तम्भनमुसलायुधाय नमः ॥

२ आकर्षणहलायुधाय नमः ॥

षडरात् बहिः देव्याः पुरतः—

ऐं ग्लौं क्षौं क्रौं चण्डोच्चण्डाय नमः ॥ इति तृतीयावरणम् ॥

अष्टदले प्राग्वत्—

ऐं ग्लौं वार्ताळीश्रीपादुकां पूजयामि तर्पयामि नमः, वाराही, वराहमुखी, अन्धिनी, रुन्धिनी, जम्भिनी, मोहिनी, स्तम्भिनीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

तद्बहिः पुरतो देव्याः—

ऐं ग्लौं महामहिषाय देवीवाहनाय नमः ॥ इति चतुर्थावरणम् ॥

शतपत्रे देवीपुरतोऽष्टत्रिंशद्दलसन्धिषु—

ऐं ग्लौं जम्भिन्यै नमः, इन्द्राय, अप्सरोभ्यः, सिद्धेभ्यः, द्वादशादित्येभ्यः, अग्नये, साध्येभ्यः, विश्वेभ्यो देवेभ्यः, विश्वकर्मणे, यमाय, मातृभ्यः, रुद्रपरिचारकेभ्यः, रुद्रेभ्यः, मोहिन्यै, निर्ऋतये, राक्षसेभ्यः, मित्रेभ्यः, गन्धर्वेभ्यः, भूतगणेभ्यः, वरुणाय, वसुभ्यः, विद्याधरेभ्यः, किन्नरेभ्यः, वायवे, स्तम्भिन्यै, चित्ररथाय, तुम्बुरवे, नारदाय, यक्षेभ्यः, सोमाय, कुबेराय, देवेभ्यः, विष्णवे, ईशानाय, ब्रह्मणे, अश्विभ्यां, धन्वन्तरये, विनायकेभ्यो नमः ॥

तद्बहिः—

ऐं ग्लौं रौं क्षौं क्षेत्रपालाय नमः ॥

२ सिंहवराय देवीवाहनाय नमः ॥

तद्बहिः—

ऐं ग्लौं महाकृष्णाय मृगराजाय देवीवाहनाय नमः ॥ इति पञ्चमावरणम् ॥

सहस्रारे अष्टधा विभक्ते प्रतिपञ्चविंशत्युत्तरशतदळं प्राग्वत् क्रमेण—

ऐं ग्लौं ऐरावताय नमः, पुण्डरीकाय, वामनाय, कुमुदाय, अञ्जनाय, पुष्पदन्ताय, सार्वभौमाय, सुप्रतीकाय नमः ॥

एते दिग्गजाः सुराब्धेर्बहिर्वा प्रागाद्यासु यष्टव्याः । बाह्यप्राकारस्याष्टासु प्रागाद्यासु दिक्षु अध ऊर्ध्वे च क्रमेण प्राग्वत्—

ऐं ग्लौं क्षौं हेतुकभैरवक्षेत्रपालाय नमः । हेतुकभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥

३ त्रिपुरान्तकभैरवक्षेत्रपालाय नमः । त्रिपुरान्तकभैरवश्री०

३ अग्निभैरवक्षेत्रपालाय नमः । अग्निभैरवश्री०

३ यमजिह्वभैरवक्षेत्रपालाय नमः । यमजिह्वभैरवश्री०

३ एकपादभैरवक्षेत्रपालाय नमः । एकपादभैरवश्री०

३ कालभैरवक्षेत्रपालाय नमः । कालभैरवश्री०

३ कराळभैरवक्षेत्रपालाय नमः । कराळभैरवश्री०

३ भीमरूपभैरवक्षेत्रपालाय नमः । भीमरूपभैरवश्री०

३ हाटकेशभैरवक्षेत्रपालाय नमः । हाटकेशभैरवश्री०

३ अचलभैरवक्षेत्रपालाय नमः । अचलभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति षष्ठावरणम् ॥

सर्वा अप्यावरणदेवताः देव्यभिमुखासीनाः, स्वयं च तत्तदभिमुखः पूजयामि इति भावयेत् ॥

देवीपुनःपूजाऽऽदि बलिदानान्तम्

इत्थं षडावरणीमभ्यर्च्य पुनर्देवीं त्रिवारं सन्तर्प्य पुनः षोडशभिः उपचारैः उपचर्य श्रीक्रमोक्तेन विधिना होमं तदन्ते बलिदानं च कुर्यात् ॥

होमाकरणपक्षे—देव्याः पुरतो वामभागे हस्तमात्रं सामान्योदकेनोपलिप्य, त्रिकोणवृत्तचतुरश्रात्मकं मण्डलं परिकल्प्य, रुधिरान्नहरिद्रान्नमाहिषद्वितयसक्तुशर्करा-हेतुफलत्रयमाक्षिकमुद्गत्रयमाषचूर्णदधिक्षीरघृतैः शुद्धोदनं संमर्द्य, कुक्कुटाण्डप्रमाणान् दश पिण्डान् कपित्थफलमानं च एकं पिण्डं विधाय तत्र निधाय, तत्समीपे सादिमसद्वितीयतृतीयं चषकं च निक्षिप्य, ऐं ग्लौं क्षौं हेतुकभैरवक्षेत्रपालाय नमः इत्यादिभिः पूर्वोक्तैः दशभिः मन्त्रैः हेतुकादिभ्योऽचलान्तेभ्यो दशभ्यः क्रमेण दश पिण्डान् दशदिक्षु दत्त्वा, मध्ये स्थूलमेकं पिण्डं चषकं च ऐं ग्लौं क्षौं क्रौं [1]चण्डोच्चण्डाय नमः इति मन्त्रेण तस्मै दद्यात् ॥

फलत्रयम्—त्रिफला । मुद्गत्रयं—हरितं [2]कृष्णं पीतम् ॥

अथ पाणिं प्रक्षाल्य देव्यै पुष्पाञ्जलित्रयं दत्त्वा प्रदक्षिणनमस्कारोत्तरं जपेत् ॥

वाराहीमन्त्रजपः

यथा—

अस्य श्रीवाराहीमहामन्त्रस्य ब्रह्मणे ऋषये नमः इति शिरसि, गायत्र्यै छन्दसे नमः इति मुखे, वाराह्यै देवतायै नम इति हृदये, ऐं ग्लौं बीजाय

[1] चं चण्डो—अ१, श्री.

[2] कृष्णं पीतं वा—ब२, ब३. कृष्णं सूक्ष्मं पीतं वा—अ. कृष्णां सूक्ष्मं च—अ१. कृष्टां कृष्टा सूक्ष्मं च—भ.

नमः इति गुह्ये, फट् शक्तये नमः इति पादयोः, ठः ठः ठः ठः कीलकाय नमः इति नाभौ, मम सर्वाभीष्टसिद्ध्यर्थे विनियोगाय नमः इति करसम्पुटे च न्यस्य, मूलेन त्रिः व्यापकं कृत्वा, अन्धे अन्धिनि नमः इत्यादिभिः पञ्चभिः मन्त्रैः पूर्वोक्तैः अङ्गुष्ठादिकनिष्ठान्तं, २ ऐं नमो भगवति वार्तालि वार्तालि हृदयाय नमः इत्यादिभिश्च हृदयादिषु न्यासं विधाय, उक्तप्रकारेण ध्यात्वा, मनसा २ श्रीवाराह्यै लं पृथिव्यात्मकं गन्धं कल्पयामि नमः, २ श्रीवाराह्यै हं आकाशात्मकं पुष्पं कल्पयामि नमः, २ श्रीवाराह्यै यं वाय्वात्मकं धूपं कल्पयामि नमः, २ श्रीवाराह्यै रं अग्न्यात्मकं दीपं कल्पयामि नमः, २ श्रीवाराह्यै वं अमृतात्मकं नैवेद्यं कल्पयामि नमः, नैवेद्याङ्गत्वेन च २ श्रीवाराह्यै सं सर्वात्मकं ताम्बूलं कल्पयामि नमः, इति पञ्चोपचारानाचर्य, विघ्नदेव्यङ्गोपाङ्गप्रत्यङ्गसहितं मूलमन्त्रमष्टोत्तरशतवारान् यथाशक्ति वा श्रीक्रमोक्तेन विधिना जपेत् ॥

स्तं स्तम्भिन्यै नमः इति वाराह्या विघ्नदेवीमन्त्रः । एतं जपारम्भे त्रिवारं जपेत् । मूलमन्त्रश्च न्यासोक्ताष्टखण्डसमष्टिरूपः । लं वाराही लृं उन्मत्तभैरवीपादुकाभ्यां नमः इति वाराह्यङ्गं लघुवाराही । ॐ ह्रीं नमो वाराहि घोरे स्वप्नं ठः ठः स्वाहा इति तदुपाङ्गं स्वप्नवाराही । ऐं नमो भगवति महामाये पशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु हुं फट् स्वाहा इति तत्प्रत्यङ्गं तिरस्करिणी । एतान् त्रीन् मन्त्रान् मूलजपान्ते तद्दशांशं जपेत् । पुनः न्यासध्यानादि कृत्वा जपं निवेद्य स्तुवीत ॥

वाराहीस्तोत्रम्

यथा—

कुवलयनिभा कौशेयार्धोरुका मकुटोज्ज्वला
हलमुसलिनी सद्भक्तेभ्यो वराभयदायिनी ।
कपिलनयना मध्ये क्षामा कठोरघनस्तनी
जयति जगतां मातः सा ते वराहमुखी तनुः ॥ १ ॥

तरति विपदो घोरा दूरात्परिह्रियते भय-
स्खलितमतिभिर्भूतप्रेतैः स्वयं व्रियते श्रिया ।
क्षपयति रिपूनीष्टे वाचां रणे लभते जयं
वशयति जगत्सर्वं वाराहि यस्त्वयि भक्तिमान् ॥ २ ॥
स्तिमितगतयस्सीदद्वाचः परिच्युतहेतयः
क्षुभितहृदयास्सद्यो नश्यद्दृशो गळितौजसः ।
भयपरवशा भग्नोत्साहाः पराहतपौरुषाः
भगवति पुरस्त्वद्भक्तानां भवन्ति विरोधिनः ॥ ३ ॥
किसलयमृदुर्हस्तः क्लिश्येत कन्तुकलीलया
भगवति महाभारः क्रीडासरोरुहमेव ते ।
तदपि मुसलं धत्से [1]हस्ते हलं समयद्रुहां
हरसि च तदाघातैः प्राणानहो तव साहसम् ॥ ४ ॥
जननि नियतस्थाने त्वद्वामदक्षिणपार्श्वयोः
मृदुभुजलतामन्दाक्षेपप्रणर्तितचामरे ।
सततमुदिते गुह्याचारद्रुहां रुधिरासवै-
रुपशमयतां शत्रून् सर्वानुभे मम दैवते ॥ ५ ॥
हरतु दुरितं क्षेत्राधीशः स्वशासनविद्विषां
रुधिरमदिरामत्तः प्राणोपहारबलिप्रियः ।
अविरतचटत्कुर्वद्दंष्ट्रास्थिकोटिरटन्मुखो
भगवति स ते चण्डोच्चण्डः सदा पुरतः स्थितः ॥ ६ ॥
क्षुभितमकरैर्वीचीहस्तोपरुद्धपरस्परै-
श्चतुरुदधिभिः क्रान्ता कल्पान्तदुर्ललितोदकैः ।
जननि कथमुत्तिष्ठेत् पाताळसर्पबिलादिला
तव तु कुटिले दंष्ट्राकोटी न चेदवलम्बनम् ॥ ७ ॥
तमसि बहुळे शून्याटव्यां पिशाचनिशाचर-
प्रमथकलहे चोरव्याघ्रोरगद्विपसङ्कटे ।

[1] धत्से—भ, ब२, ब३.

क्षुभितमनसः क्षुद्रस्यैकाकिनोऽपि कुतो भयं
सकृदपि मुखे मातस्त्वन्नाम सन्निहितं यदि ॥ ८ ॥
विदितविभवं हृद्यैः पद्यैर्वराहमुखीस्तवं
सकलफलदं पूर्णं मन्त्राक्षरैरिममेव यः ।
पठति स पटुः प्राप्नोत्यायुश्चिरं कवितां प्रियां
सुतसुखधनारोग्यं कीर्तिं श्रियं जयमुर्वराम् ॥ ९ ॥ इत्यनुग्रहाष्टकम् ॥
देवि क्रोडमुखि त्वदङ्घ्रिकमलद्वन्द्वानुषक्तात्मने
मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः ।
[1]तस्याद्य त्वदयोऽग्रनिष्ठुरहलाघातप्रभूतव्यथा-
पर्यस्यन्मनसो भवन्तु वपुषः प्राणाः प्रयाणोन्मुखाः ॥ १ ॥
देवि त्वत्पदपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि
प्रादुर्भूतनृशंसभावमलिनां वृत्तिं विधत्ते मयि ।
यो देही भुवने तदीयहृदयान्निर्गत्वरैर्लोहितैः
सद्यः पूरयसे कराब्जचषकं वाञ्छाफलैर्मामपि ॥ २ ॥
चण्डोच्चण्डमखण्डदुष्टहृदयप्रोक्षिप्तरक्तच्छटा-
हालापानमदाट्टहासजनिताटोप[2]प्रतापोत्कटम् ।
मातर्मत्परिपन्थिनामपहृतैः प्राणैस्त्वदङ्घ्रिद्वय-
ध्याना[3]द्दामरवैभवोदयवशात् सन्तर्पयामि क्षणात् ॥ ३ ॥
वाराहि व्यथमानमानसगळत्संज्ञं त्वदाज्ञाबलात्
सीदद्धैर्यमपाकृताद्ध्यवसितं प्राप्ताखिलार्थाहतिम् ।
क्रन्दद्बन्धुजनं कळङ्कितकुलं कण्ठे व्रणोद्यत्कृमिं
पश्यामि प्रतिपक्षमाशु सततं श्रान्तं लुठन्तं पुनः ॥ ४ ॥
वाराहि त्वमशेषजन्तुषु पुनः प्राणात्मिका स्पन्दसे
शक्तिव्याप्तचराचरामिह खलु त्वामेतदभ्यर्थये ।
त्वत्पादाम्बुजसङ्गिनो मम सकृत् पापं चिकीर्षन्ति ये
तेषां मा कुरु शङ्करप्रियतमे देहान्तरावस्थितिम् ॥ ५ ॥

[1] तस्याशु—श्री, अ१. [2] स्फुरद्रक्षसम्—ब२, ब३, अ, भ. [3] ड्डामरवैभ—ब१, ब२, अ,

उन्मनोल्लासः षष्ठः—परापद्धतिः

उपोद्धातः

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
गृणात्युमानन्दनाथ उन्मनोल्लासवैभवम् ॥
आराधनपदं यत्र परा श्रीहृदयात्मिका ।
पदे पदे सुखानि स्युः प्रभुचित्तविदो न किम् ॥
दीक्षाविधिरिहापेक्ष्य आरम्भोल्लास ईक्ष्यताम् ।
न तु सन्ध्योपास्तिरुक्ता सूत्रकारैरसूत्रणात् ॥
पञ्चमीमभिराध्याथ पराक्रमपरो भवेत् ।
एतस्मिन् मनवः सर्वे शक्तिबीजादिमाः स्मृताः ॥

काल्यकृत्यं आह्निकं च

श्रीमान् साधकः कल्ये प्रबुद्धः शयन एव स्थितः श्रोत्राचमनभस्मधारणे विधाय, श्रीक्रमोक्तेन क्रमेण श्रीगुरोर्ध्यानं वक्ष्यमाणया मूलपूर्विकया सामान्यपादुकया उक्तसुमुखादिमुद्राप्रदर्शनपूर्वकं वन्दनं च विधाय, वक्ष्यमाणया रीत्या प्राणानायम्य ब्रह्मरन्ध्रसम्बन्धिनि सहस्रदलकमले सुखासीनाया वक्ष्यमाणध्यानोक्तमूर्त्याः शक्तिबीजाभिन्नायाः पराऽम्बायाः चरणयुगळविगळदमृतरसविसरपरिप्लुतं ध्यात्वा आत्मानं, मूलं मनसा दशवारमावर्त्त्य, वहन्नाडीपार्श्वपदमुत्थाय, निर्वर्तितावश्यकः उक्तया भङ्ग्या विहितदन्तधावनादिस्नानश्च शुचिवासो वसानः विधृतपुण्ड्रः सर्वेण मूलेन त्रिराचम्य द्विः परिमृज्य सकृदुपस्पृश्य चक्षुषी नासिके श्रोत्रे अंसे नाभिं हृदयं शिरश्चावमृशेत् ॥

यागमन्दिरप्रवेशः

एवं त्रिराचम्य, यागमन्दिरमासाद्य, द्वारस्थण्डिलं गोमयेनोपलिप्य, यागगृहं च रङ्गवल्लीपुष्पमालिकावितानादिभिश्चालङ्कृत्य द्वारस्य दक्षवामशाखयोः ऊर्ध्वभागे च क्रमेण—

सौः भद्रकाल्यै नमः, भैरवाय, लम्बोदराय नमः ॥

इति तिस्रो द्वारदेवताः सम्पूज्य, अन्तः प्रविष्टः सौः रक्तद्वादशशक्तियुक्ताय दीपनाथाय नमः इति पुष्पाञ्जलिना भूमौ दीपनाथमिष्ट्वा, सपर्यासामग्रीं स्वदक्षिणभागे निधाय, प्रज्वालितदीपो गन्धमाल्यादिभिरलङ्कृतात्मा जातीपत्रफलैलालवङ्गकर्पूराख्यपञ्चतिक्त-नामोदितवदनः प्रसन्नमनाः स्वास्तीर्णे ऊर्णामृदुनि शुचिनि मूलेन द्वादशवारमभिमन्त्रिते सकृत्प्रोक्षिते चासने सौः आधारशक्तिकमलासनाय नमः इति प्राङ्मुख उदङ्मुखो वा पद्मस्वस्तिकाद्यन्यतमेन आसनेनोपविश्य, सौः समस्तगुप्तप्रकटसिद्धयोगिनीचक्रदेवता-श्रीपादुकाभ्यो नमः इति मूर्धनि बद्धाञ्जलिः सौः ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं ग्लौं ह्स्ख्फ्रें ह स क्ष म ल व र यूं स ह क्ष म ल व र यीं ह्सौं स्हौः अमुकाम्बा-सहितामुकानन्दनाथश्रीगुरुश्रीपादुकां पूजयामीति मन्त्रेण मस्तके निजदेशिकमभिवन्द्य गं गणपतये नमः इति मूर्धनि बद्धाञ्जलिः

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥

इति मन्त्रं सकृदुच्चार्य युगपद्वामपार्ष्णिभूतलत्रिराघातकरास्फोटत्रितयक्रूरदृष्ट्यव-लोकनपूर्वकं ताळत्रयेण भौमान्तरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् । ताळत्रयलक्षणं तु पूर्वोक्तमेव ग्राह्यम् ॥

प्राणायामः

अथ श्रीक्रमोक्तेन विधिना भूतशुद्धिमात्मप्राणप्रतिष्ठां च विधाय सौः-वर्णपूर्वकं मातृकावर्णैः श्रीक्रमोक्तेन क्रमेण बहिर्मातृकान्यासं कृत्वा षोडशवारमावृत्तेन मूलेन पूरकं चतुःषष्टिवारमावृत्तेन कुम्भकं द्वात्रिंशद्वारमावृत्तेन रेचकं इति विंशतिधा षोडशधा दशधा सप्तधा त्रिधा वा प्राणानायम्य ॥

अङ्गन्यासः

तेजोरूपदेवीमयं भावयन्नात्मानं मुहुरावृत्तेन सौः नमः इति नमोऽन्तेन मूलेन शिरोमुखहृन्मूलाधारेषु न्यासं विधाय, सर्वाङ्गे च व्यापकं कृत्वा, सौः स् हृदयाय नमः, सौः औ शिरसे स्वाहा, सौः : शिखायै वषट्, सौः स् कवचाय हुम्. सौः औ नेत्रत्रयाय वौषट्, सौः : अस्त्राय फट्, इति मूलमन्त्रावयवैर्द्विरावृत्तैः वर्णषडङ्गं, सर्वेण मूलेन षड्वारमावृत्तेन मन्त्रषडङ्गं च कुर्यात् । इह मूलमन्त्रस्य तृतीयोऽवयवः केवलो विसर्गो न त्वकारविशिष्ट इति च ज्ञेयम् ॥

चिदग्नौ सर्वतत्त्वविलापनम्

अथ काकचञ्चूपुटाकृतिना मुखेन बाह्यमनिलमन्तराकृष्य संस्तभ्य, मूलं सप्तविंशतिवारमावर्त्य, वक्ष्यमाणक्षित्यादिशिवान्तषट्त्रिंशत्तत्त्वात्मकं वेद्यं नाभौ मुद्रितं विभाव्य, पुनः प्रोक्तवारं मूलं जप्त्वा, नम इति शिखाबन्धोत्तरं पुनरेवत् अनिलमापूर्य, तेन सर्वकारणचिद्रूपमग्निमुद्दीप्य, तत्र प्राङ्मुद्रितस्य वेद्यस्य विलयनं भावयित्वा ॥

अर्घ्यशोधनम्

श्रीक्रमोक्तेन क्रमेण सामान्यविशेषार्घ्ये आसादयेत् । अत्र चोभयोरप्यर्घ्ययोः प्रवेशरीत्या अन्तरन्तश्चतुरश्रादिबिन्द्वन्तमण्डलकरणम्, अं आत्मतत्त्वाय आधारशक्त्यै वौषडित्याधारस्थापनम्, उं विद्यातत्त्वाय पद्मासनाय वौषडिति पात्रनिधानम्, मं शिवतत्त्वाय सोममण्डलाय नम इति शुद्धसलिलापूरणम् ।

ब्रह्माण्डखण्डसम्भूतमशेषरससंभृतम् ।
आपूरितं महापात्रे पीयूषं अर्घ्यमावह ॥

इति क्षीरपूरणम्, हृदयशक्तिश्रीपादुकां पूजयामीत्याद्यस्त्रान्तं प्रागुक्तषडङ्गद्वयम्, मूलेन दशधा अभिमन्त्रणम्, चतुर्नवतिमन्त्राभिमन्त्रणाभावश्च विशेषः । ततो विशेषार्घ्यबिन्दुभिः सम्प्रोक्ष्य वरिवस्यावस्तूनि ॥

तत्त्वकदम्बस्य हृत्पद्मस्थापनम्

पूर्वं नाभौ मुद्रयित्वा तप्तायोद्रवमिव चिदग्नौ विलापितं षट्त्रिंशत्तत्त्वकदम्बरूपं वेद्यं हृत्सरोजमानीय स्थापयेत् ॥

पराचक्रनिर्माणम्

अथ सकुसुमक्षेपैः मूलपूर्वकैः वक्ष्यमाणैः मन्त्रैः पराम्बायाश्चक्ररूपं आसनं निर्मिमीत । यथा—

सौः पृथ्वीयोगपीठाय नमः, अप्, तेजः, वायु, आकाश, गन्ध, रस, रूप, स्पर्श, शब्द, उपस्थ, पायु, पाद, पाणि, वाक्, घ्राण, जिह्वा, चक्षुः, त्वक्, श्रोत्र, अहङ्कार, बुद्धि, मनः, प्रकृति, पुरुष, नियति, काल, विद्या, कला, राग, माया, शुद्धविद्या, ईश्वर, सदाशिव, शक्ति, शिवयोगपीठाय नमः ।'

पराचक्रं निर्माय ॥

चक्रे देव्याः पूजा

ब्रह्मरन्ध्रे—

अकळङ्कशशाङ्काभा त्र्यक्षा चन्द्रकलावती ।
मुद्रापुस्तलसद्बाहा पातु मां परमा कला ॥

इति ध्यातां सादाख्यचन्द्रकलारूपां श्रीपराम्बां मूलेन हृदयगते पराचक्रे आवाह्य, मूलान्ते श्रीपराम्बाऽऽवाहिता भव इत्यादिरीत्या तत्तन्मुद्राविधानपूर्वकं आवाहनाद्यवगुण्ठनान्तं कृत्वा, वन्दनधेनुयोनिमुद्राः प्रदर्श्य, मूलेन पुनः पुनरावृत्तेन श्रीपरादेव्यै पाद्यं कल्पयामि नमः इत्यादिरीत्या पाद्यार्घ्याचमनीयस्नानवासोगन्धपुष्पधूपदीपनीराजनछत्रचामरयुगदर्पणनैवेद्यपानीयताम्बूलाख्यान् षोडशोपचारान् विधाय, नैवेद्याङ्गत्वेन पूर्वोत्तरापोशने हस्तप्रक्षाळनगण्डूषाचमनीयानि च दद्यात् । नैवेद्ये त्रिकोणवृत्तचतुरश्रमण्डलकरणम्, मूलेन प्रोक्षणम्, वं इति धेनुमुद्रया अमृतीकरणम्, प्राणादिमुद्राप्रदर्शनं चानुष्ठेयम् । ततो वामकरतत्त्वमुद्रामूलेन सप्तवाराभिमन्त्रणम्, दक्षकरोपात्तैः कुसुमैः, सौः स सन्दष्टद्वितीयशकलगृहीतक्षीरबिन्दुसहपतितैः

प्रकाशरूपिणीपराभट्टारिकाश्रीपादुकां पूजयामि तर्पयामि नमः, सौः औ विमर्श-रूपिणीपराभट्टारिकाश्रीपादुकां पूजयामि तर्पयामि नमः, सौः : प्रकाशविमर्शरूपिणी-पराभट्टारिकाश्रीपादुकां पूजयामि तर्पयामि नमः, इति त्रिभिः मन्त्रैः क्रमेण देव्या मूलाधारहृन्मुखेष्वभ्यर्च्य, सौः महाप्रकाशविमर्शरूपिणीपराभट्टारिकाश्रीपादुकां पूजयामि तर्पयामि नमः इति मन्त्रेण देवीं दशवारं सन्तर्प्य ॥

देव्यां अखिलतत्त्वहोमभावनम्

तामेव कालाग्निकोटिदीप्तां ध्यात्वा, तस्यां सौः पृथ्वीं जुहोमि स्वाहा, सौः अपो जुहोमि स्वाहा, इत्यादिरीत्या प्राग्विलाप्य हृदये स्थापितं षट्त्रिंशत्तत्त्वकदम्बकं पृथक् पृथक् मनसा जुहुयात् ॥

इह क्रमे अयमेव होमः ॥

गुर्वोघत्रययजनम्

ततो मूलपूर्विकयोक्तया श्रीगुरुपादुकया मस्तकस्थं श्रीगुरुं त्रिः सम्पूज्य पुनश्चिदग्निमुद्दीप्तं विभाव्य देव्याः पश्चात् प्रागपवर्गे रेखात्रये दक्षिणसंस्थाक्रमेण गुर्वोघत्रयं यजेत् । यथा—

सौः पराभट्टारिकादेव्यम्बाश्रीपादुकां पूजयामि तर्पयामि नमः, अघोरानन्दनाथश्री°, श्रीकण्ठानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति दिव्यौघः ॥

सौः शक्तिधरानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, क्रोधानन्द-नाथश्री°, त्र्यम्बकानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सिद्धौघः ॥

सौः आनन्दानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः, प्रतिभा-देव्यम्बानन्द, [1]वीरानन्द, संविदानन्द, मधुरादेव्यम्बानन्द, ज्ञानानन्द, श्रीरामानन्द, योगानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति मानवौघः ॥

[1] परा—अ.

बलिदानम्

ततः त्रिकोणवृत्तचतुरश्रमण्डलं कृत्वा ऐं व्यापकमण्डलाय नमः इति पुष्पेणाभ्यर्च्य, अर्धान्नं सलिलपूर्णं सक्षीरोपादिममध्यमं च पात्रं निधाय, ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहेति त्रिः पठित्वा बलिं दत्त्वा, तत्त्वमुद्रास्पृष्टं क्षीरं बल्युपरि निषिच्य, वामपार्ष्णिघातकरास्फोटौ कुर्वाणः समुदञ्चितवक्त्रो नाराचमुद्रया बलिं भूतैः ग्राहयित्वा, पाणी प्रक्षाल्य, मानसिकीः प्रदक्षिणनतीः विधाय, देव्यै पुष्पाञ्जलिं दद्यात् ॥

परामनुजपः

अथ अस्य श्रीपराभट्टारिकामहामन्त्रस्य भैरवाय ऋषये नमः इति शिरसि, गायत्र्यै छन्दसे नमः इति मुखे, पराऽम्बायै देवतायै नमः इति हृदये, सं बीजाय नमः इतिं गुह्ये, [1]औः शक्तये नमः इति पादयोः [2](कीलकाय नमः इति नाभौ), मम सर्वाभीष्टसिद्धये विनियोगाय नमः इति करसम्पुटे च न्यस्य, मूलेन त्रिर्व्यापकं कृत्वा,

सां अङ्गुष्ठाभ्यां (हृदयाय) नमः, सीं तर्जनीभ्यां नमः (शिरसे स्वाहा), सूं मध्यमाभ्यां नमः (शिखायै वषट्), सैं अनामिकाभ्यां नमः (कवचाय हुं), सौं कनिष्ठिकाभ्यां नमः (नेत्रत्रयाय वौषट्), सः करतलकरपृष्ठाभ्यां नमः (अस्त्राय फट्) इति मन्त्रैः कराङ्गन्यासौ कृत्वा,

अकळङ्केति ध्यात्वा,

सौः परादेव्यै लं पृथिव्यात्मकं गन्धं समर्पयामि, सौः परादेव्यै हं आकाशात्मकं पुष्पाणि पूजयामि, सौः परादेव्यै यं वाय्वात्मकं धूपमाघ्रापयामि, सौः परादेव्यै रं अग्न्यात्मकं दीपं दर्शयामि, सौः परादेव्यै वं अमृतात्मकं नैवेद्यं निवेदयामि, सौः परादेव्यै सं सर्वात्मकं ताम्बूलादिसर्वोपचारान् समर्पयामि इति षडुपचारैः मनसा अभ्यर्च्य,

मूलं सहस्रं त्रिशतं शतं वा श्रीक्रमोक्तेन विधिना जप्त्वा स्तुवीत ॥

[1] सौः—अ, अ१.

[2] अयं कुण्डलितो भागः (श्री) कोश एव.

परास्तुतिः

यथा—-

याऽघोरादिभिरेतैः पारम्पर्यक्रमागतैर्नाथैः ।
प्रथते तां विश्वमयीं विश्वातीतां स्वसंविदं नौमि ॥ १ ॥
आनन्दचरणकमलामकळङ्कशशाङ्कमण्डलच्छायाम् ।
तन्मण्डलाधिरूढां तत्कलया कलितचित्कलां नौमि ॥ २ ॥
इच्छादिशक्तिशूलांबुजमूलां मूलकुण्डलीरूपाम् ।
नित्यामप्यणुरूपामणोश्च महतो महीयसीं नौमि ॥ ३ ॥
मौक्तिकमणिगणरुचिरां शशाङ्कनिर्मोकनिर्मलं क्षौमम् ।
निवसानां परमेशीं नमामि सौवर्णसम्पुटान्तःस्थाम् ॥ ४ ॥
भक्तजनभेदभञ्जनचिन्मुद्राकलितदक्षपाणितलाम् ।
पूर्णाहन्ताकारणपुस्तकवर्येण रुचिरवामकराम् ॥ ५ ॥
सृष्टिस्थितिलयकृद्भिर्नयनाम्भोजैश्शशीनदहनाख्यैः ।
मौक्तिकताटङ्काभ्यां मण्डितमुखमण्डलां परां नौमि ॥ ६ ॥
षड्गतिषडूर्मिषडरीन् धिक्कृत्याशु स्वभक्तवर्गस्य ।
कञ्चुकपञ्चकनोदनसञ्चितसंवित्प्रकाशिनीं नौमि ॥ ७ ॥
अध्वातीतं बुद्ध्वा बुधाः प्रबुद्धाः परं पदं यस्याः ।
कैवल्यं यान्ति हठात् कटाक्षपातेन तां परां नौमि ॥ ८ ॥
यः पठतीदं स्तोत्रं पात्रं स भवेच्च पञ्चवर्गस्य ।
गुरुचरणकमलभाजा सहजानन्देन योगिनाऽभिहितम् ॥ ९ ॥

इति परास्तुतिः सम्पूर्णा ॥

हविःशेषस्वीकरणम्

अथ—

सौः आत्मतत्त्वं शोधयामि नमः स्वाहा ॥
सौः विद्यातत्त्वं शोधयामि नमः स्वाहा ॥
सौः शिवतत्त्वं शोधयामि नमः स्वाहा ॥

इति मन्त्रैः तत्त्वत्रयशोधनपूर्वकं हविःशेषं स्वीकृत्य, मूलेन देवीं विसृज्य, तेनैव ब्रह्मरन्ध्रं नीत्वा विशेषार्घ्यपात्रमामस्तकमुद्धृत्य, "आर्द्रं ज्वलति" इति मन्त्रेण तदर्घ्यमात्मनः कुण्डलिन्यग्नौ हुत्वा कामकलाऽऽत्मकं देवीरूपं भावयन्नात्मानं कृतकृत्यो भवेत् ॥

मन्त्रसाधनम्

एवं नित्यक्रमं निर्वर्तयन् श्यामाक्रमोक्तक्रमेण लक्षजपं पुरश्चरणं कलौ तच्चतुर्गुणितं प्रत्यहमयुतसङ्ख्यया ग्रहणादिजपप्रत्याम्नायान्वा कृत्वा, होमतर्पण-ब्राह्मणभोजनानि क्रमेण दशांशतः कुर्यात् । होमद्रव्यस्य तन्त्रान्तरेष्वदर्शनात्, आज्यमेव । ततः सिद्धमनुः काम्यलिप्सुर्यदि श्यामाक्रमोक्तैरेव द्रव्यैः हुत्वा पूर्णमनोरथः सुखी विहरेत् । एतदेकविश्रान्तिमभिलषतोऽपि अयमेवोपास्तिक्रमः इति शिवम् ॥

इति भासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेन उमानन्दनाथेन
निर्मिते अभिनवे कल्पसूत्रानुसारिणि नित्योत्सवनिबन्धे
पराक्रमनिरूपणो नाम उन्मनोल्लासः षष्ठः सम्पूर्णः ॥

अनवस्थोल्लासः सप्तमः—साधारणक्रमः

उपोद्घातः

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
नन्दत्युमानन्दनाथोऽनवस्थोल्लासकल्पनात् ॥
साधारणो यत्र सर्वोपास्यानां क्रम ईरितः ।
आरम्भोल्लासगीता स्यादिह दीक्षा पृथक् पृथक् ॥
सत्रितार्या बालया च सर्वेऽङ्गमनवो मताः ।
मन्त्रेऽनुक्तषडङ्गे तु मायाषड्दीर्घजातियुक् ॥

तत्र तावदुक्तगुणः साधकः उक्ते काले सद्गुरोः अवाप्तदीक्षाविधिः एतत्क्रमान्ते वक्ष्यमाणेन प्रकारेण शोधितसिद्धसाध्यारिभावं अवमृष्टऋणधनादिकं च स्वेष्टमन्त्रमासाद्य तत्प्रतिपाद्यदेवताक्रमं यावज्जीवं निर्वर्तयेत् ॥

काल्यकृत्यं आह्निकं च

इह प्रकृतिभूतात् श्रीक्रमतः काल्यकृत्याह्निकयोः विशेषो यथा—श्रीगुरुपादुकायामादौ त्रितार्युत्तरं बाला वाक् ग्लौमिति पञ्चबीजयोजनम्, हृदि रविबिम्बे च तत्तद्देवताध्यानम्, रश्मिस्रगननुस्मरणम्, यथोचितं तत्र तत्र सम्बुद्ध्यादीनामूहः, मूलेनार्घ्यदानम्, तन्त्रान्तरोक्तं तत्तदृष्यादिन्यासत्रयं षडङ्गं च, अनुक्तौ तु वक्ष्यमाणं चेति ॥

यागमन्दिरप्रवेशः

अथ यागमन्दिरमागत्य, द्वारस्थण्डिलं गोमयेनोपलिप्य, देवताऽऽयतनं च रङ्गवल्लीपुष्पमालावितानादिभिश्चालङ्कृत्य, द्वारस्य दक्षवामशाखयोरूर्ध्वभागे च क्रमेण—

ऐं ह्रीं श्रीं ऐं क्लीं सौः भद्रकाल्यै नमः, भैरवाय नमः, लम्बोदराय नमः ॥

इति तिस्रो द्वारदेवताः सम्पूज्य, अन्तः प्रविष्टः ६ रक्तद्वादशशक्तियुक्ताय दीपनाथाय नमः इति पुष्पाञ्जलिना भूमौ दीपनाथमिष्ट्वा, सपर्यासामग्रीं स्वस्य दक्षिणतो निधाय, दीपानभितः प्रज्वाल्य, दीपौ वा, गन्धमाल्यादिभिः अलङ्कृतात्मा ताम्बूलेन जातीपत्रफललवङ्गैलाकर्पूराख्यपञ्चतिक्तेन वा सुरभिळवदनः प्रसन्नचेताः स्वास्तीर्णे ऊर्णामृदुनि शुचिनि बालातृतीयबीजेन द्वादशवारमभिमन्त्रिते मूलमन्त्रोक्षिते आसने ६ आधारशक्तिकमलासनाय नमः इति प्राङ्मुख उदङ्मुखो वा पद्मस्वस्तिकाद्य-न्यतमेनासनेनोपविश्य, ६ समस्तगुप्तप्रकटसिद्धयोगिनीचक्रदेवताश्रीपादुकाभ्यो नमः इति मूर्धनि बद्धाञ्जलिः स्ववामदक्षपार्श्वयोः क्रमेण, ६ गुं गुरुभ्यो नमः, ६ गं गणपतये नमः, इति श्रीगुरुं गणपतिं च प्रणम्य, ६ ऐं ह्रः अस्त्राय फट् इति मन्त्रेण मुहुर्मुहुरावृत्तेन अङ्गुष्ठादिकरतलान्तं कूर्परयोश्च विन्यस्य, देहे च व्यापकं कृत्वा, आत्मनो देवतैक्यं भावयन्, ६ "अपसर्पन्तु" इति मन्त्रं सकृदुच्चार्य, युगपद्वाम-पार्ष्णिभूतलत्रिराघातकरास्फोटत्रितयक्रूरदृष्ट्यवलोकनपूर्वकं ताळत्रयेण भौमान्तरिक्ष-दिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् । ताळत्रयं तूक्तमेव ॥

प्राणायामः

ततो ६ नमः इत्यङ्गुष्ठमन्त्रमुच्चार्य, [1]अंकुशेन शिखां बध्वा, श्रीक्रमोक्तक्रमेण भूतशुद्धिं आत्मप्राणप्रतिष्ठां च विधाय, मूलेन प्रागुक्तवद्विंशतिधा षोडशधा दशधा सप्तधा त्रिधा वा प्राणानायम्य ॥

मातृकाषडंगन्यासौ

तेजोमयदेवतारूपं भावयन् आत्मानं त्रितारीबालापूर्वकं मातृकान्यासं तन्त्रान्तरोक्तं तत्तद्देवताषडङ्गन्यासं च कृत्वा, अनुक्तौ तु ६ ह्रां हृदयाय नमः, ६ ह्रीं शिरसे स्वाहा, ६ ह्रूं शिखायै वषट्, ६ ह्रैं कवचाय हुम्, ६ ह्रौं नेत्रत्रयाय वौषट्, ६ ह्रः अस्त्राय फट्, इति [2]षडङ्गं न्यस्य ॥

[1] 'कुशेन' इति बहुकोशपाठः.

[2] करषडंगन्यासौ कृत्वा—अ.

अर्घ्यशोधनम्

श्रीक्रमोक्तेन क्रमेण सामान्यविशेषार्घ्ये आसादयेत् । अत्र चोभयोरप्यर्घ्ययोः प्रवेशभङ्ग्याऽन्तरन्तश्चतुरश्रादिबिन्द्वन्तमण्डलकरणम्, ६ अं आत्मतत्त्वाय आधारशक्तये वौषडित्याधारस्थापनम्, ६ उं विद्यातत्त्वाय पद्मासनाय वौषट् इति पात्रनिधानम्, ६ मं शिवतत्त्वाय सोममण्डलाय नमः इति शुद्धजलपूरणम्,

ऐं ह्रीं श्रीं ऐं क्लीं सौः ब्रह्माण्डखण्डसम्भूतमशेषरससम्भृतम् ।
आपूरितं महापात्रे पीयूषं अर्घ्यमावह ॥

इति क्षीरपूरणम्, तत्तद्देवताषडङ्गं, उक्तषडङ्गं वा, मूलेन दशधा अभिमन्त्रणम्, चतुर्नवतिमन्त्राभिमन्त्रणाभावश्चेति विशेषः । अथ विशेषार्घ्यबिन्दुभिः सम्प्रोक्ष्य वरिवस्यावस्तूनि,

यन्त्रोद्धारः

उपलिप्तायां भुवि क्षीरमिश्रेण सिन्दूरादिना बिन्दुत्रिकोणषट्कोणाष्टदळ-चतुर्दळचतुरश्रात्मकं चक्रं विलिख्य विलेख्य वा, चामीकररजतपञ्चलोहरत्नस्फटिका-द्युत्कीर्णे वा रक्तचन्दनादिनिर्मिते पीठे निवेश्य, ६ अमुकयन्त्रस्य प्राणा इह प्राणाः, ६ अमुकयन्त्रस्य जीव इह स्थितः, ६ अमुकयन्त्रस्य सर्वेन्द्रियाणि, ६ अमुकयन्त्रस्य वाङ्मनःप्राणाः इहायान्तु स्वाहा इति यन्त्रप्राणप्रतिष्ठां विदध्यात् । इह मन्त्रे तत्तद्देवतानामपदोहज्ञापकममुकेतिपदं ज्ञेयम् । अथ ६ आधारशक्तिकमलासनाय नमः इति मन्त्रेण तत्र पीठे पुष्पाञ्जलिं समर्प्य ॥

चक्रे प्रधानदेवतायाः तदंगदेवतानां च पूजा

स्वहृदि तत्तद्देवतां ध्यात्वा, ६ अमुकायै लं पृथिव्यात्मकं गन्धं कल्पयामि नमः इत्यादि सं सर्वात्मकं ताम्बूलं इत्यन्तषड्उपचारैरुपचर्य, ततस्तां देवतां भक्तानुग्रहात्तेजोरूपेण परिणतां ब्रह्मरन्ध्रं प्राप्य वहन्नासापुटद्वारा बहिर्निर्गतां कुसुमगर्भिते अञ्जलौ सन्निधाय मूर्तिमतीं च मूलेन बिन्दौ आवाह्य, "आवाहिता भव" इत्यादिरीत्या यथालिङ्गं आवाहनसंस्थापनसन्निधापनसन्निरोधनसम्मुखीकरणाव-

गुण्ठनानि तत्तन्मुद्रया कृत्वा, वन्दनधेनुयोनिमुद्राः प्रदर्श्य, सामान्यार्घ्योदकेन ६ अमुकायै पाद्यं कल्पयामि नमः इत्यादिरीत्या पाद्यार्घ्याचमनीयस्नानवासोगन्धपुष्पधूपदीपनीराजनछत्रचामरयुगदर्पणनैवेद्यपानीयताम्बूलाख्यान् षोडशोपचारान्, नैवेद्याङ्गत्वेन पूर्वोत्तरापोशने हस्तप्रक्षाळनगण्डूषकरणाचमनीयानि च दद्यात् । नैवेद्ये त्रिकोणवृत्तचतुरश्रमण्डलकरणम्, मूलेन प्रोक्षणम्, वं इति धेनुमुद्रया अमृतीकरणम्, मूलेन सप्तवाराभिमन्त्रणम्, प्राणादिमुद्राप्रदर्शनं चानुष्ठेयम् । ततो मूलान्ते अमुकदेवताश्रीपादुकां पूजयामि इति मन्त्रेण वामकरतत्त्वमुद्रासन्दष्टद्वितीयशकलगृहीतक्षीरबिन्दुसहपतितैः दक्षकरोपात्तकुसुमैः प्रधानदेवतां त्रिः सन्तर्प्य, तस्याग्नीशासुरवायुषु मौळौ प्रागादिदिक्षु च क्रमेण तत्तद्देवताषडङ्गमन्त्रैः ६ हृदयाय नमः हृदयशक्तिश्रीपादुकां पूजयामि इति क्रमेण षडङ्गमन्त्रैः अङ्गदेवताः समभ्यर्च्य ॥

गुर्वोघत्रययजनम्

प्रधानदेवतायाः पश्चात् प्रागपवर्गं दक्षिणसंस्थाक्रमेण तत्तत्तन्त्रोक्तं गुर्वोघत्रयं यजेत् । तदज्ञाने तु—

ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं गुरुभ्यो नमः, ६ ऐं गुरुपादुकाभ्यो नमः । इति दिव्यौघः ॥

६ ऐं परमगुरुभ्यो नमः, ६ ऐं परमगुरुपादुकाभ्यो नमः । इति सिद्धौघः ॥

६ ऐं आचार्येभ्यो नमः, ६ ऐं आचार्यपादुकाभ्यो नमः, ६ ऐं पूर्वसिद्धेभ्यो नमः, ६ ऐं पूर्वसिद्धपादुकाभ्यो नमः । इति मानवौघः ॥

इति गुर्वोघत्रयम् ॥

आवरणार्चनम्

त्र्यश्रे देवताऽग्रकोणमारभ्य प्रादक्षिण्यक्रमेण—

ऐं ह्रीं श्रीं ऐं क्लीं सौः इच्छाशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः, ज्ञानशक्तिश्री०, क्रियाशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति प्रथमावरणम् ॥

षडश्रे प्राग्वत् तन्त्रान्तरोक्तोपलब्धतत्तद्देवताषडङ्गमन्त्रोत्तरं हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः । तदज्ञाने ६ ह्रां हृदयाय नमः हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः इत्यादिरीत्या अङ्गदेवतापूजनं वा ॥ इति द्वितीयावरणम् ॥

अष्टदले पारिभाषिकपश्चिमादिदिक्षु वाय्वादिविदिक्षु च प्रादक्षिण्यक्रमेण—

ऐं ह्रीं श्रीं ऐं क्लीं सौः आं ब्राह्मीश्रीपादुकां पूजयामि तर्पयामि नमः, ईं माहेश्वरी, ऊं कौमारी, ॠं वैष्णवी, ॡं वाराही, ऐं माहेन्द्री, औं चामुण्डा, अः महालक्ष्मीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति तृतीयावरणम् ॥

चतुर्दले देव्यग्रदळादिप्रादक्षिण्यक्रमेण—

ऐं ह्रीं श्रीं ऐं क्लीं सौः गणपतिश्रीपादुकां पूजयामि तर्पयामि नमः, दुर्गा, वटुक, क्षेत्रपालश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति चतुर्थावरणम् ॥

चतुरश्ररेखायां यथास्थितप्रागादिप्रादक्षिण्यक्रमेण—

ऐं ह्रीं श्रीं ऐं क्लीं सौः लां इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावतवाहनाय सपरिवाराय नमः ॥

६ रां अग्नये शक्तिहस्ताय तेजोऽधिपतये अजवाहनाय सपरिवाराय नमः ॥

६ टां यमाय दण्डहस्ताय प्रेताधिपतये महिषवाहनाय सपरिवाराय नमः ॥

६ क्षां निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये नरवाहनाय सपरिवाराय नमः ॥

६ वां वरुणाय पाशहस्ताय सलिलाधिपतये मकरवाहनाय सपरिवाराय नमः ॥

६ यां वायवे ध्वजहस्ताय प्राणाधिपतये रुरुवाहनाय सपरिवाराय नमः ॥

६ सां सोमाय शङ्खहस्ताय नक्षत्राधिपतये अश्ववाहनाय सपरिवाराय नमः ॥

६ हां ईशानाय त्रिशूलहस्ताय विद्याऽधिपतये वृषभवाहनाय सपरिवाराय नमः ॥

इत्यभ्यर्च्य ॥ इति पञ्चमावरणम् ॥

देवतायाः पुनःपूजा

अथ पुनर्मूलेन देवतां त्रिः सन्तर्प्य, पुनः धूपदीपनैवेद्यताम्बूलानि दत्वा ॥

होमः

सति सम्भवे श्रीक्रमे होमप्रकरणोक्तेन क्रमेण स्थण्डिलकल्पनादिप्रधानदेवता-पञ्चोपचारान्ते– ६ इच्छायै स्वाहा इच्छाया इदं न मम इत्यादिरीत्या—आवरणदेवताक्रमेण इच्छाऽऽदिभ्यः ईशानान्ताभ्यो देवताभ्यः एकैकामाज्याहुतिं मूलेन प्रधानदेवतायै दशवारं च हुत्वा विधिशेषं निर्वर्तयेत् ॥

होमाकरणपक्षे बलिमात्रं दद्यात् । यथा—देवताया दक्षिणतः त्रिकोणवृत्त-चतुरश्रात्मकं मण्डलं कृत्वा, ६ ऐं व्यापकमण्डलाय नमः इति पुष्पैरभ्यर्च्य, अर्धभक्तपूरितोदकं सक्षीरादित्रयं पात्रं तत्र विन्यस्य, ६ ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा इति मन्त्रं त्रिः पठित्वा, बलिं प्रदाय, दक्षकरार्पितं वामकरतत्त्वमुद्रास्पृष्टं क्षीरं बल्युपरि निषिच्य समुदञ्चितवक्त्रः ताळत्रयं कुर्वन् बाणमुद्रया बलिं भूतैः ग्राहयित्वा, योनिमुद्रया प्रणमेत् इति ॥

प्रदक्षिणनतिमूलमन्त्रजपाः

अथ प्रक्षाळितपाणिः प्रदक्षिणनतीर्विधाय, तत्तत्तन्त्रोक्तर्ष्यादिन्यासलय-कराङ्गन्यासध्यानान्ते देवतायै पुष्पाञ्जलिं दत्त्वा, मूलमष्टोत्तरशतवारं जप्त्वा, पुनर्न्यासादि कृत्वा, गुह्यातिगुह्येति मन्त्रेण देवतावामहस्ते सामान्यजलेन जपं समर्पयेत् । देवतापुंस्त्वे तु गोप्ता त्वं देवेति वाच्यम् । देव्या वामकरो देवस्य दक्षकरश्च जपसमर्पणाधिकरणम् ॥

ऋष्यादीनामज्ञाने—अस्य श्रीअमुकमन्त्रस्य ब्रह्मणे ऋषये नमः इति शिरसि, गायत्र्यै छन्दसे नमः इति मुखे, अमुकदेवतायै नमः इति हृदये, ॐ बीजाय नमः इति गुह्ये, ह्रीं शक्तये नमः इति पादयोः, मम सर्वाभीष्टसिद्धये विनियोगाय नमः इति करसम्पुटे च न्यस्य, मूलेन त्रिर्व्यापकं कृत्वा, उक्तषडङ्गं कराङ्गयोः विन्यस्य, तत्तद्देवताऽनुगुणं ध्यात्वा, श्यामाक्रमोक्तान्यतमया मालया श्रीक्रमोक्तविधिना जप्त्वा स्तुवीत ॥

देवतास्तुतिः

यथा—

सच्चित्सुखैकरूपं सकलजगद्भाससंश्रयीभूतम् ।
भक्तेष्वनुग्रहवशात् बहुधोपास्यात्मकं भजे वस्तु ॥ १ ॥
पीतारुणादिभासं फलदानायाभिसन्धिभेदेन ।
आसेचनकावयवामासेवे देवतामिहोपास्याम् ॥ २ ॥
द्विचतुःप्रमुखैर्दोर्भिर्विधृतवराभीतिशूलचक्राद्यैः ।
पालितविश्वत्रितयः पायान्मां कोऽपि निरवधिर्भूमा ॥ ३ ॥
बिन्दुत्रिकोणषडरद्विपदळवेदच्छदैः सचतुरश्रैः ।
चारुणि विहारशीलं चक्रे कलयामि किञ्चन ज्योतिः ॥ ४ ॥
इच्छाऽऽदिभिः तथाऽङ्गैः ब्राह्म्याद्याभिर्गणेश्वरप्रष्ठैः ।
इन्द्रादिभिश्च पञ्चभिरावरणैः स्तौमि दैवतं सेव्यम् ॥ ५ ॥
एकार्णादिशतार्णावधिकैर्मनुभिर्निरुच्यमानात्मा ।
यन्त्रमनुदेशिकस्वोपासकभेदातिगा चिदाविः स्यात् ॥ ६ ॥
कल्पोक्तसङ्ख्यजपतद्दशांशहोमादिमोदितस्वान्तम् ।
वाञ्छितदायि विपक्षव्ययदक्षं भातु साधकश्रेयः ॥ ७ ॥
दीनाधीनदयारसवशंवदस्मेरसुन्दरापाङ्गा ।
मूर्तिमती मम मुनिभिर्महनीया भाग्यधोरणी जयति ॥ ८ ॥
साधारणमपि तदिदं स्तोत्रमसाधारणप्रभावाढ्यम् ।
पठतां क्रमावसाने प्रथते पुंसां मनीषितमशेषम् ॥ ९ ॥

इति श्रीभासुरानन्दनाथान्तेवासिना शुभा ।
कृतोमानन्दनाथेन साधकश्रेयसे स्तुतिः ॥

सुवासिनीपूजादि विशेषार्घ्यविसर्जनान्तम्

अथ श्रीक्रमोक्तेन क्रमेण पञ्चमवर्जं यथार्हपञ्चमसहितं वा सुवासिनीपूजनम्, तत्त्वत्रयशोधनम्, हविःप्रतिपत्तिं च निर्वर्त्य, मूलेन देवतामावाहनविलोमक्रमेण आत्मन्युद्वास्य, विशेषार्घ्यं विसृजेत् ॥

मन्त्रसाधनम्

एवं नित्यसपर्यां कुर्वन् श्यामाक्रमोक्तेन क्रमेण पुरश्चरणजपं तत्तत्कल्पोक्तसङ्ख्याकं, अनुक्तावक्षरलक्षसङ्ख्याकं, कलौ तच्चतुर्गुणितं, प्रत्यहं त्रिसहस्रादिक्रमेण कृत्वा, होमतर्पणब्राह्मणभोजनानि तत्तद्दशांशं कुर्यात् । होमश्च द्रव्यविशेषादर्शने आज्येनैव । अथ सिद्धमन्त्रः श्रीक्रमोक्तेन क्रमेण नैमित्तिकार्चनपरो यदि काम्यमभिलषेत् तदुक्तप्रकारेण जपादिकं विदध्यात् ॥ इति सर्वदेवतासाधारणक्रमः ॥

मन्त्राणां जातिनिर्णयः अधिकारिभेदश्च

अत्रोपदेश्यानां मन्त्राणां सामान्यतो जातिनिर्णयोऽधिकारिभेदश्च निरूप्यते । सौत्रामणितन्त्रे—

मायाबीजं ब्राह्मणः स्याच्छ्रीबीजं क्षत्रियः स्मृतम् ।
कामबीजं भवेद्वैश्यो वाग्भवं शूद्र ईरितम् ॥
चतुर्बीजपरित्यक्तो मन्त्रः पौलस्त्यसंज्ञकः ।
चतुर्बीजं ब्राह्मणानां क्षत्रियाणां त्रिबीजकम् ॥
बीजद्वयं तु वैश्यानां शूद्राणां त्वेकबीजकम् ॥ इति ॥

अस्यार्थः—मा ये ति हृल्लेखा । श्रीकामबीजवाग्भवैः प्रत्येकं सम्बद्धा मन्त्राः क्रमेण ब्राह्मणादयः स्युः इत्यर्थः । च तु र्बी ज प रि त्य क्तः उक्तबीजचतुष्टयरहितः । च तु रिति प्रत्येकं प्रणवादिबीजचतुष्टयसम्बद्धाः मन्त्राः इत्यर्थः । दातव्या इति शेषः । इदं च पदं

प्रत्येकमिति च पदं उत्तरत्राप्यनुषज्यते । त्रि बी ज कं श्र्यादिबीजत्रययुक्ता इत्यर्थः । बीजद्वयं कामबीजवाग्भवयुक्ता इत्यर्थः । ए क मिति वाग्भवबीजयुक्ता इत्यर्थः ॥

अथ मन्त्रविशेषाणां अधिकारिणः । कुलमूलावतारे---

उमामहेश्वरं चैव दक्षिणामूर्त्त्यघोरकम् ।
हयग्रीवं च वाराहमष्टाक्षरमतः परम् ॥
प्रणवाद्यं वासुदेवं लक्ष्मीनारायणं तथा ।
वर्णत्रये तु दातव्यं नान्यवर्णे कदाचन ॥
नारसिंहं पाशुपतं तथा चैव सुदर्शनम् ।
वर्णद्वये च दातव्यं नान्ययोश्चैव कर्हिचित् ॥
अग्निमन्त्राश्च ये केचित् सूर्यमन्त्राश्च ये तथा ।
तारादिघृणिमन्त्राश्च दातव्याश्च त्रिवर्णके ॥
आनुष्टुभं शक्तिमन्त्रास्तथा विन्ध्यनिवासिनी ।
समनीलसरस्वत्या दातव्याश्चादिवर्णके ॥
मातङ्गिन्युग्रतारा च कालिका श्यामळा तथा ।
छिन्नमस्ता च बाला च दातव्या सर्ववर्णके ॥
तारादिस्तु गणेशस्य हरिद्रासंज्ञकस्तथा ।
त्रिवर्णेष्वेव दातव्यः कथितः सर्वसिद्धिदः ॥
त्रिपुरायाश्च ये मन्त्राः ये मन्त्रा वटुकादयः ।
सर्ववर्णेषु दातव्याः पुरन्ध्रीणां विशेषतः ॥
हृदादिहुंफट्कारादि सङ्कराणां प्रशस्यते ॥ इति ॥

कलौ सिद्धमन्त्राः

अथ कलौ सिद्धमन्त्राः—

त्र्यर्ण एकाक्षरोऽनुष्टुप् त्रिविधो नरकेसरी ।
एकाक्षरोऽर्जुनोऽनुष्टुब्द्विविधस्तुरगाननः ॥
चिन्तामणिः क्षेत्रपालो भैरवो यक्षनायकः ।
गोपालो गजवक्त्रश्च चेष्टका यक्षिणी तथा ॥

मातङ्गी सुन्दरी श्यामा ताराकर्णपिशाचिनी ।
शबर्येकजटा वामा काळी नीलसरस्वती ॥
त्रिपुरा काळरात्रिश्च कलाविष्टप्रदा इमे ॥ इति ॥

गुरुशिष्ययोः वर्णाश्रमादिव्यवस्था

नारदपाञ्चरात्रे—

ब्राह्मणः सर्वकालज्ञः कुर्यात् सर्वेष्वनुग्रहम् ।
तदभावे द्विजश्रेष्ठः शान्तात्मा भगवन्मयः ॥
क्षत्रविट्शूद्रजातीनां क्षत्रियोऽनुग्रहक्षमः ।
क्षत्रियस्यापि च गुरोरभावादीदृशो यदि ॥
वैश्यः स्यात्तेन कार्यो वै द्वये नित्यमनुग्रहः ।
सजातीयेन शूद्रेण तादृशेन महामते ॥
अनुग्रहाभिषेकौ च कार्यौ शूद्रस्य सर्वथा ।
वर्णोत्तमेऽथ च गुरौ सति वाऽपि श्रुतेऽपि वा ॥
स्वदेशतोऽथवाऽन्यत्र नेदं कार्यं शुभार्थिना ।
क्षत्रविट्शूद्रजातीयः प्रातिलोम्यं न दीक्षयेत् ॥ इति ॥

रुद्रयामळे—

न पत्नीं दीक्षयेत् भर्ता न पिता दीक्षयेत् सुताम् ।
न पुत्रं च तथा भ्राता भ्रातरं नैव दीक्षयेत् ॥ इति ॥

योगिनीतन्त्रे—

निर्वीर्यं तु पितुर्मन्त्रं तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥ इति ॥

कनिष्ठस्य स्वापेक्षया न्यूनवयस्कस्य यस्य कस्यापि ॥

गणेशविमर्शिन्याम्—

प्रमादाच्च तथाऽज्ञानात् पितुर्दीक्षां समाचरन् ।
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ॥ इति ॥

पितुरित्युपलक्षणं मातामहादीनामपि । प्रायश्चित्तं तु अयुतसावित्रीजपः सर्वत्र, तथा दर्शनात् । सिद्धमन्त्रग्रहणे तु नायं निषेधः ॥

तथा च सिद्धयामळे—

यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये ।
तदैव तां तु दीक्षेत त्यक्त्वा गुरुविचारणाम् ॥ इति ॥

"सिद्धमन्त्रो न दुष्यति" इति तन्त्रान्तरवचनाच्च । पुण्यतीर्थे उपरागे सति पित्रादेरपि इष्टमन्त्रो ग्राह्य एव । तथाच वैशम्पायनसंहितायां व्यासवचनं शौनकं प्रति—

प्रसन्नहृदयः स्वस्थः पिता मे करुणानिधिः ।
कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान् ॥ इति ॥

प्रकरणात् मन्त्रमिति सम्बध्यते । शैवागमेऽपि—

भिक्षुभ्यश्च वनस्थेभ्यो वर्णिभ्यश्च महेश्वरि ।
गृहस्थो भोगमोक्षार्थी मन्त्रदीक्षां न चाचरेत् ॥
त्यक्ताग्नयः क्रियाहीनाः यतयो ह्यपरिग्रहाः ।
वनस्थास्तादृशा एव वर्णी न्यूनाश्रमी यतः ॥

वर्णी ब्रह्मचारी न्यूनाश्रमी गृहस्थापेक्षया । एवं गृहस्थाद्यतिभिरपि मन्त्रो न ग्राह्य इत्यवगम्यते ॥

वयोभेदेन सिद्धिप्रदा मन्त्राः

अथ बाल्ययौवनवार्धक्येषु सिद्धिप्रदाः मन्त्राः क्रमेण—

बीजमन्त्रास्तथा मन्त्रा मालामन्त्रा इति त्रिधा ।
बीजमन्त्रा दशार्णान्तास्ततो मन्त्रा नखावधि ॥
विंशत्यधिकवर्णा ये मालामन्त्रास्तु ते स्मृताः ॥ इति ॥

एत एव अवस्थान्तरेष्वपि द्विगुणजपात् सिध्यन्ति ॥

मन्त्राणां व्यक्तिविशेषाः

पुंस्त्रीनपुंसकाः प्रोक्ता मनवस्त्रिविधा बुधैः ।
वषडन्ताः फडन्ताश्च पुमांसो मनवः स्मृताः ॥
वौषट्स्वाहाऽन्तिमा नार्यो हुंनमोन्ता नपुंसकाः ॥ इति ॥

एतेषां विनियोगस्तु—

वश्योच्चाटनरोधेषु पुमांसः सिद्धिदायकाः ।
क्षुद्रकर्मरुजां नाशे स्त्रीमन्त्राः शीघ्रसिद्धिदाः ।
आभिचारे स्मृताः क्लीबा एवं ते मनवस्त्रिधा ॥ इति ॥

सिद्धारिशोधनप्रकारः

अथाशङ्कादीनां बहूनां विचार्यत्वेऽप्यावश्यकमात्रं लिख्यते। तत्र सिद्धारिशोधनप्रकारः—

ऊर्ध्वाभिश्च तिरश्चीभिः रेखाभिः पञ्च पञ्चभिः ।
कोष्ठषोडशकं कृत्वा मातृकार्णैः प्रपूरयेत् ।
एकत्रिरुद्रनवदृङ्निगमार्कपंक्ति-
षण्णागभूपमनुबाणहयेषु तिथ्याम् ॥
कामे क्रमादकथहप्रभृतीन् मनीषी
वर्णान् समालिखतु षोडशषोडशत्रीन् ॥

अस्यार्थः—रुद्रः एकादशकोष्ठम् । दृक् द्वितीयम् । निगमाः चतुर्थम् । अर्कः द्वादशम् । पंक्तिः दशमम् । नागः अष्टमम् । भूपः षोडशम् । मनवः चतुर्दशम् । बाणाः पञ्चमम् । हयाः सप्तमम् । तिथिः पञ्चदशम् । कामः त्रयोदशं चेत्यर्थः । एकादितिथ्यन्तेषु कोष्ठेषु प्रथमं क्रमात् अकारादीन् स्वरान् विलिख्य, ततः कादितान्तान्, ततः थादिसान्तान् वर्णान् विलिख्य, ततः प्रथमकोष्ठे तृतीये एकादशे च हळक्षान् विलिखेत् इति ॥

विदिग्गतेषु कोष्ठानां चतुष्केषु चतुर्ष्विह ।
यत्र साधकनामादिवर्णस्तत्सिद्धिसंज्ञकम् ॥

प्रादक्षिण्यक्रमेणास्माच्चतुष्कत्रितयं परम् ॥
साध्यं तथा सुसिद्धं च शत्रुश्चेत्यभिधीयते ॥
एकैकस्मिन् चतुष्केऽपि यस्मिन् कोष्ठे तदक्षरम् ।
तदाद्युक्तक्रमेणैव सिद्धसाध्यादिकल्पना ॥
एवं साध्यचतुष्कादौ तत्तुल्यस्थानकोष्ठतः ।
साध्यसिद्धः साध्यसाध्यः इत्याद्याख्याः क्रमान्मताः ॥
[1]सिद्धसिद्धप्रभृत्यर्थं न तत्षोडशसद्मसु ।
यत्र यस्य मनोराद्यो वर्णः सोऽपि तदाह्वयः ॥

स्पष्टोऽर्थः ॥

अथैतेषां फलानि कुलमूलावतारे—

सिद्धः सिध्यति कालेन साध्यः सिध्यति वा न वा ।
सुसिद्धस्तत्क्षणादेव अरिर्मूलं न कृन्तति ॥ इति ॥

तन्त्रराजे—

सिद्धसिद्धो जपात् सिध्येत् द्विगुणात् सिद्धसाध्यकः ।
सिद्धः सुसिद्धः संप्राप्तेः सिद्धारिर्हन्ति गोत्रजान् ॥
साध्यसिद्धोऽतिसंक्लेशात् साध्यसाध्योऽतिदुःखकृत् ।
साध्यसुसिद्धो भजनात् साध्यारिः स्वस्त्रियं हरेत् ॥
सुसिद्धसिद्धोऽर्धजपात फलं दद्यात् यथेप्सितम् ।
सुसिद्धसाध्यो जापाद्यैः सिद्धये स्यादतोऽन्यथा ॥
सुसिद्धे च सुसिद्धस्तु पूर्वजन्मकृतश्रमः ।
तस्मात् तं सर्वसिद्धीनां साधने योजयेन्मनुम् ॥
सुसिद्धारिरशेषेण स्वकुलं मारयेत् ध्रुवम् ।
अरिसिद्धः सुतं हन्यादरिसाध्यस्तु कन्यकाम् ॥
तत्सुसिद्धस्तु पत्नीं स्वामर्यरिः साधकापहः ॥ इति ॥

संप्राप्तेः प्राप्तिमात्रात् । जापाद्यैरित्याद्यशब्देन होमतर्पणब्राह्मणभोजनानि गृह्यन्ते ॥

[1] सिद्धसाध्यप्रभृत्यर्णः यन्त्रषोडशसद्मसु—अ१.

ऋणधनशोधनप्रकारः

द्विगुणीकृत्य साध्यस्थं स्वरव्यञ्जनमण्डलम् ।
साधकाख्याजुषा तेन मेळयित्वाऽष्टभिर्हरेत् ॥
शेषः साध्यस्य राशिः स्याद्योजयेत् [1]साधकेऽन्यथा ।
साधकाधिकशेषस्तु ऋणी साध्यः शुभावहः ॥
शोधितो न्यूनशेषस्तु वर्णलक्षजपाच्छुभः ॥ इति ॥

साध्यो मन्त्रः, तेन स्वरव्यञ्जनसमुदायेन । अन्यथेति साधकनामगतं स्वरव्यञ्जनसमूहं द्विगुणीकृत्य साध्यगतस्वरव्यञ्जननिकरेण सम्मेळ्य अष्टभिः हरेत् । शेषं साधकराशिं जानीयादित्यर्थः । शोधित इति—उक्तेन सिद्धारिक्रमेण शोधितोऽनुकूलो मन्त्रो यदि साधकान्न्यूनशेषः स्यात्तदा यावत्या वर्णसङ्ख्यया न्यूनता तावल्लक्षजपादिना ऋणमपाकृत्य पुरश्चरणादिकं कुर्यादित्यर्थः । प्रकारान्तराणि चान्यतो ज्ञातव्यानीति दिक् ॥

[2]ऋणीधनीचक्रम्

कोष्ठान्येकादशान्येव वेदेन पूरितानि च ।
अकारादिहकारान्तं लिखेत् कोष्ठेषु तत्त्ववित् ॥
प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु ।
द्वयं द्वयं लिखेत्तत्र विचारे खलु साधक ॥
शेषेष्वेकैकवर्णांस्तु क्रमतस्तु लिखेत् सुधीः ।
षट्कालकालवियदग्निसमुद्रवेद-
खाकाशशून्यदहनाः खलु साध्यवर्णाः ।
युग्मद्विपञ्चवियदम्बरयुक्शशाङ्क-
व्योमाब्धिवेदशशिनः खलु साधकार्णान् ॥
नामाज्झलादकटबाद्गजभुक्तशेषं
ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात् ॥

[1] साधको—अ, भ.
[2] अयं खण्डः (श्री) कोश एवोपलभ्यते.

अस्यार्थः—साध्यवर्णान् स्वरव्यञ्जनरूपेण पृथक् पृथक् तान् षट्कलाद्यङ्कैः गणितान् तथा साधकनामाक्षरान् युग्माद्यङ्कैः गणयित्वा, अष्टसङ्ख्याभिः हृत्वा उभयोश्च साध्यसाधकयोः अधिकं ऋणं शेषं धनं ज्ञात्वा मन्त्रं दद्यात् ॥

यदा मन्त्रश्चेदृणी भवति तदा मन्त्रः शुभदायको भवति ।
धनी चेन्मन्त्रे यद्यधिकाङ्कः स्यात् तदा मन्त्रं जपेत् सुधीः ॥
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिकम् ।
शून्ये मृत्युं विजानीयात् तस्माच्छून्यं परित्यजेत् ॥

रुद्रयामळे—

इन्द्वर्क्षनेत्ररविपञ्चदशर्तुवेद-
वह्न्यायुगाष्टनवभिर्गणितांश्च साध्यान् ।
दिग्मुर्गिरिः[?]श्रुतिगजाग्निमुनीषुवेद-
षड्वह्निभिस्तु गणितानथ साधकार्णान् ॥

नामाज्झलादित्यादिवचनं विष्णुविषयम्, रामार्चनचन्द्रिकोद्धृतत्वात् इति केचित् । वस्तुतस्तु—पूर्वस्यैव विचारणं हृतशेषं इन्द्वर्क्षर[?]मित्यादिनामाक्षरमारभ्य यावत् साधकाक्षरं भवेत् तावत्सङ्ख्यं सप्तगुणं कृत्वा त्रिभिः हरेत् । यद्वा—

साध्यनामाद्विगुणितं साधकेन समन्वितम् ।
अष्टभिश्च हरेच्छेषं तदन्यद्विपरीतकम् ॥

अस्यार्थः—साध्यनामाद्विगुणितं साधकाक्षरसमन्वितम् । अष्टभिश्च हरेत्तदन्यत् । साधकनामानं स्वरव्यञ्जनभेदेन द्विगुणीकृत्य साध्येन युक्तं कृत्वा अष्टभिः हरेत् ॥ इति ऋणीधनीचक्रम् ॥ इति कुलाकुलचक्रविचारः ॥

कुलाकुलचक्रविचारापवादः

अथ तदपवादः—कुलार्णवसोमसिद्धान्तरत्नसागररुद्रयामळकुलमूलावतारागस्त्य-संहितासिद्धान्तशेखरादिवचनगतोऽपुनरुक्तः संगृह्यते—

एकाक्षरे तथा कूटे त्रैपुरे स्त्रीसमर्पिते ।
स्वप्नलब्धे नृसिंहार्कवराहाणां मनुष्वपि ॥

प्रासादे प्रणवे तद्वत् सपिण्डाक्षरसन्त्रके ।
मृत्युञ्जये च पाशाद्ये वैष्णवे चण्डनायके ॥
व्योमव्यापिनि मायायां मालामन्त्रेष्वघोरके ।
एकत्रिपञ्चषट्सप्तेभाङ्करुद्राक्षरेषु च ॥
नपुंसके च दन्तार्णे काळिकाश्यामळामनौ ।
सिद्धकाळीचण्डिकयोः मन्त्रे राममनुष्वपि ॥
गोपालमातृकामन्त्रे हरवल्लभया सह ।
श्रीविद्या सिद्धविद्या च मातङ्गी भुवनेश्वरी ॥
पद्मावती मधुमती दत्तात्रेयश्च पार्वती ।
मित्रेशोड्डीशषष्ठीशचर्यानन्दमनुष्वपि ॥
सप्तप्रणवमन्त्राणां हरिद्रोच्छिष्टयोरपि ।
आसुरी सुमुखी चैव रेणुका च सरस्वती ॥
कुम्भोद्भवाणवश्चैव मतङ्गगणिकस्य च ।
शाबराणां च मन्त्राणां वृद्धजप्तमनुष्वपि ॥
कुलागतानां मन्त्राणां सिद्धारीन्नैव शोधयेत् ।
बहुरूपाह्वये मन्त्रे जैनबौद्धमनुष्वपि ॥
सिद्धारित्वादि धनितामृणितां च न शोधयेत् ॥

कूटे कूटाक्षरे मन्त्रे । स्त्रीसमर्पिते स्त्रीविशेषसमर्पिते इत्यर्थः । तथा च तन्त्रान्तरे—

साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ।
सर्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता ।
गुरुयोग्या भवेत् सा हि विधवा परिवर्जिता ।
स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता ॥ इति ॥

स्वप्नलब्ध इत्यत्र च कर्तव्यताविशेषो यथा—

स्वप्नलब्धे तु कलशे गुरोः प्राणं निवेश्य च ।
वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं शुभम् ।
ततः शुद्धिमवाप्नोति ह्यन्यथा विफलं भवेत् ॥ इति ॥

इदं तु सद्गुरोरभावे । तत्संभवे तु तत एव गृह्णीयात् इति । प्रासादे प्रासादबीजाद्ये । पाशः पाशबीजम् । व्योमव्यापिनि हकारादौ । मायायां हृल्लेखायाम् । अङ्के नवाक्षरे । दन्तार्णे द्वात्रिंशदक्षरे । हरिद्रोच्छिष्टयोः तत्तद्गणपत्योः । अणुः मन्त्र इति । केषांचिन्मन्त्राणां शापाभाव उक्तो वातुलागमे—

पुरा शापविहीनं च वर्तते मन्त्रपञ्चकम् ।
श्रीविद्यासाळुवं मन्त्वं नृसिंहार्कवराहकम् ॥ इति ॥

तन्त्रान्तरे तु—

मन्त्रादिषु च सर्वेषु हृल्लेखाकामबीजकम् ।
श्रीबीजं वा विनिक्षिप्य जपेन्मन्त्रस्य सिद्धये ।
तारसम्पुटितो वाऽपि दुष्टमन्त्रोऽपि सिध्यति ॥ इति ॥

हिरण्यगर्भसंहितायाम्—

स्वनामादिवर्णैः स्वमित्राक्षरैर्वा
मनुं सम्पुटीकृत्य येऽनुस्मरन्ति ॥

स मन्त्रस्तेषां सिध्यतीति शेषः । अनुस्मरणं जपः । तन्त्रान्तरे तु—

यत्र यस्य भवेत् भक्तिविशेषः स मनूत्तमः ।
वैरिकोष्ठमनुप्राप्तः सिद्धिदस्तस्य जायते ॥
गुरोरनुज्ञामात्रेण दुष्टमन्त्रोऽपि सिध्यति ।
गुरुं विलङ्घ्य शास्त्रेऽस्मिन्नाधिकारः सुरेश्वरि ॥ इति ॥

अथापि रिपोरनुकूलेन मन्त्रेण आभिचारादौ क्रियमाणे साधकस्यैवानिष्टापत्त्या सिद्धार्यादिविचारः कर्तव्य इति तन्त्रराजमतम् । वस्तुतस्तु—

नित्यनैमित्तिकान्मुक्तिः काम्यादैहिकमेव हि ।
प्रयोगात् परलोकस्य हानिरेव तु जायते ॥

इति वचनात् नित्यनैमित्तिकमात्रपरो भवेत् इत्युचितमिति दिक् ॥

मन्त्राणां संस्काराः

छिन्नत्वादिकपञ्चाशद्दोषशान्त्यै निरूप्यते ।
संस्कारदशकं सप्तकोटिमन्त्रगणे क्रमात् ॥
जननं जीवनं पश्चात् ताडनं बोधनं तथा ।
अथाभिषेको विमलीकरणाप्यायने पुनः ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥

जननं यथा—

भूर्जपत्रे लिखेत् सम्यक् त्रिकोणं रोचनादिभिः ।
वारुणं कोणमारभ्य सप्तधा विभजेत् समम् ॥
एवमीशाग्निकोणाभ्यां जायन्ते तत्र योनयः ।
नववेदमितास्तत्र विलिखेन्मातृकाः क्रमात् ॥
अकारादिहकारान्तामीशादिवरुणावधि ।
देवीं तत्र समावाह्य पूजयेच्चन्दनादिभिः ॥
ततः समुद्धरेन्मन्त्रं जननं तदुदीरितम् ॥

दीपनं यथा—

जपो[1]हंसपुटस्यास्य सहस्रं दीपनं स्मृतम् ॥
(हंसः+मन्त्रः+सोऽहम् ॥)

बोधनं यथा—

नभोवह्नीन्दुयुक्तार्घी सम्पुटस्य जपो मनोः ।
सहस्रपञ्चकमितो बोधनं तत् स्मृतं बुधैः ॥
(ह्रूं+मन्त्रः+ह्रूम् ॥)

ताडनं यथा—

सहस्रं प्रजपेदस्त्रपुटितं ताडनं तु तत् ॥
(फट्+मन्त्रः+फट् ॥)

[1] हंसंपु—ब२, ब३, श्री.

अभिषेको यथा—

वाग्घंसतारैर्जप्तेन सहस्रं पाथसा मनुम् ।
अभिषिञ्चेत वागाद्यैरभिषेकोऽयमीरितः ॥
(ऐं हंसः ॐ इति ॥)

विमलीकरणं यथा—

हरिर्वह्न्यन्वितस्तारी वषडन्तो ध्रुवादिकः ।
सहस्रं तत्पुटं जप्याद्विमलीकरणं मनोः ॥
(ॐ त्रों वषट्+मन्त्रः+वषट् त्रों ॐ ॥)

जीवनं यथा—

स्वधावषट्पुटं जप्यात् सहस्रं जीवने मनुम् ॥
(स्वधा वषट्+मन्त्रः+वषट् स्वधा ॥)

तर्पणं यथा—

क्षीराज्ययुतपाथोभिस्तर्पणे तर्पयेन्मनुम् ॥

गोपनं यथा—

जपेन्मायापुटं मन्त्रं सहस्रं गोपनं हि तत् ॥
(ह्रीं+मन्त्रः+ह्रीम् ॥)

आप्यायनं यथा—

बालातार्तीयबीजेन गगनाद्येन सम्पुटम् ।
सहस्रं प्रजपेन्मन्त्रमेतदाप्यायनं मतम् ॥
(ह्सौः+मन्त्रः+ह्सौः)
संस्कारदशकं प्रोक्तं मनूनां दोषनाशकम् ॥

अस्यार्थः—वि भ जे त् तिर्यग्रेखाभिरित्यर्थः । एवं सप्तधा । तत्र पृथुत्रिकोणे योनयोऽल्पानि त्रिकोणानि । न व वे द मि ताः एकोनपञ्चाशत् । ई शा दि ईशानकोणादि । व रु णा व धि स्वाग्रवारुणकोणपर्यन्तम् । दे वीं मातृकां देवतां स्वोपास्य-

मन्त्रदेवतां वा । चन्दनादिभिः—आदिशब्देन पुष्पादीनि गृह्यन्ते । पञ्चोपचारैः इत्यर्थः । समुद्धरेत् स्वोपास्यमन्त्रवर्णान् क्रमेण तत्तत्कोष्ठेभ्यो गृहीत्वा पत्रान्तरे लिखेदित्यर्थः । जननं जननाख्यसंस्कारः । एवमेव दीपनादयोऽपि । हंसपुटस्य आद्यन्तयोः हंसमन्त्रसम्पुटितस्य । अस्य स्वोपास्यमन्त्रस्य । नभो हकारः, वह्निः रकारः, इन्दुः बिन्दुः, तैर्युक्तोऽर्घी ऊकारः, तेन ह्रूं एतेन सम्पुटितस्य मन्त्रस्य सहस्रपञ्चकजपेन बोधनमित्युक्तम् । अस्त्रं फट्कारं, तत्पुटितेन मन्त्रेण सहस्रजप्तेन ताडनमित्युक्तम् । वागिति ऐं हंसः ओं इति त्रिभिरभिषिञ्चेत् । पत्रान्तरे लिखितं मनुं कुशाग्रतोयबिन्दुभिः प्रोक्षयेदित्यर्थः । हरिः तकारः, वह्न्यन्वितो रकारयुतः, तारी प्रणवयुतः, त्रोम् । ध्रुवस्तारः तदादिकः ॐ त्रों वषट् । तत्पुटं एभिः सम्पुटितम् । माया ह्रींकारः । बाला तृतीयबीजं सौः, गगनं ह, ह्सौरित्यनेन । शेषं सुगममिति । तन्त्रसारादिषु तु संस्काराणां प्रयोगभेदोऽपि दृश्यते । एतेषां संस्काराणां सकृदेवानुष्ठानम्, नत्वभ्यासः इति दिक् ॥

पुष्पविचारः

अथ प्राक्चिकीर्षितः पुष्पविचारः—

पुष्पाणि तावत् पञ्चधा—परं अपरं उत्तमं मध्यमं अधमं चेति । मणिरत्नसुवर्णादिनिर्मितं कुसुमं परं, तच्च न कदाचिन्निर्माल्यम् । चित्रवसनादिकर्तनजं अपरम्, तच्च प्रतिदिनप्रोक्षणेन शुध्येत् । उत्तमं वृक्षभवं, तच्च प्रातरपचितं तत्सन्ध्यात्रितयावधि न निर्माल्यम् । मध्यमं फलरूपम् । अधमं पत्रजलरूपम् । एते च तत्तत्काल एवार्पणार्हे इति प्रयोगपारिजाते नारदः ॥

देवतायोग्यानि पुष्पादीनि

भविष्यपुराणे—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः ।
अपर्युषितनिच्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ॥
आत्मारामोद्भवैर्वाऽपि भक्त्या सम्पूजयेत् सुरान् ॥

विष्णुधर्मोत्तरे—

धर्मार्जितधनक्रीतैः यः कुर्याद्देवतार्चनम् ।
उद्धरिष्यत्यसन्देहात् सप्त पूर्वान् तथा परान् ॥

इति विप्रातिरिक्तविषयम्,

समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ।
शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः ॥

इति भविष्योक्तेः । अयं च निषेधो ब्राह्मणस्य नित्यार्चन एव, न तु नैमित्तिके काम्ये च ॥

लक्षपुष्पार्चनादौ तु क्रयक्रीतमपीष्यते ।

इति मन्त्रकोशकारोक्तेः । परोपवनादेः चौर्येणापि कुसुममादेयम् ॥

देवतार्थे च कुसुममस्तेयं मनुरब्रवीत् ॥

इति वचनात् । याचितपुष्पार्चनस्य वराहपुराणे अपराधेषु गणितत्वाच्च याचनमपि जलोपान्त एव निषिद्धम्, तीरादन्यत्र याचने तु न दोष इति प्रयोगपारिजातोक्तेः । तत्रैव स्वजात्याहृतं पुष्पं द्रव्येण आत्मीयं कृत्वा पूजयेदिति । अनेन विप्रस्यापि क्रयक्रीतार्चनाभ्यनुज्ञा दृष्टा ॥

वर्जनीयानि

कृमिकीटावपन्नानि शीर्णपर्युषितानि च ।
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥

उपहतिस्तु मलादिना ।

निर्गन्धं केशकीटादिदूषितं चोग्रगन्धकम् ।
मलिनं तुच्छसंस्पृष्टमाघ्रातं स्वविकासितम् ॥
अशुद्धभाजनानीतं स्नात्वा नीतं च याचितम् ॥

स्नात्वेति मध्याह्नस्नानोत्तरमानयने निषेधः। निर्गन्धेष्वपि केषां चिदुपादानमुक्तं स्वच्छन्दसारे—

निर्गन्धपुष्पजातीषु पलाशकुसुमैरपि ।
जपाबन्धूकपुष्पैश्च मन्दारैरपि पूजयेत् ॥ इति ॥

पुष्पसारसुधानिधौ—

पुष्पं वस्त्रे न बध्नीयात् शिरसा न वहेद्बुधः ।
नयेत् पत्रपुटेनैव पाणिनाऽऽलम्ब्य वाग्यतः ॥

आश्वलायनः—

नाग्निना सह पुष्पं वा जलं चान्नं न चानयेत् ।
जलाग्निगन्धपुष्पान्नं न मूर्ध्नाऽसेन वाहयेत् ॥

ग्रन्थान्तरे—

देहोपरि धृतं यच्चाप्यधोवस्त्रधृतं च यत् ।
वामहस्ते धृतं यच्च जलेन क्षाळितं च यत् ॥
देवतास्तन्न गृह्णन्ति पुष्पं निर्माल्यतां गतम् ।
समित्पुष्पकुशादीनि वहन्तं नाभिवादयेत् ॥
तद्धारी चैव नान्यान् हि निर्माल्यं तत् भवेत्तयोः ।
शुष्कं पर्युषितं कृष्णं भूमिगं नार्पयेत् सुमम् ॥
चम्पकं कमलं त्यक्त्वा कलिकामपि वर्जयेत् ॥ इति ॥

सर्वदेवतासाधारणानि विहितानि च

भविष्यपुराणे—

जातीशमीकुशाः कङ्कुमल्लिकाकरवीरजम् ।
नागपुन्नागकाशोकरक्तनीलोत्पलानि च ॥
चम्पकं वकुळं चैव पद्मं बिल्वं पवित्रकम् ।
एतानि सर्वदेवानां विहितानि समानि च ॥

कङ्कु कुटजकम् । दुर्गाया विहितानि देवीपुराणे---

ऋतुकालोद्भवैः पुष्पैः मल्लिकाजातिपुष्पकैः ।
किंशुकैश्चम्पकैश्चैव [1]किंकरातैश्च पाटलैः ॥
वकुलैश्चैव मन्दारैः कुन्दपुष्पैस्तिरीटकैः ।
करवीरार्कपुष्पैश्च शिंशुपैश्चापराजितैः ॥
सितै रक्तैस्तथा पीतैः कृष्णैश्चैव चतुर्विधैः ।
सितरक्तैस्तथा पुष्पैः पद्मैश्चापाण्डुरैस्तथा ॥
दमनैः सिन्दुवारैश्च सुरभिमरुवकैस्तथा ।
मञ्जरीभिः कुशानां च बिल्वपत्रैः सुशोभनैः ॥
रक्तान्वितैस्तथा सर्वैः जलजैः स्थलसम्भवैः ।
पत्रपुष्पैर्यथान्यायं सर्वौषधिमयैः शुभैः ॥
धान्यानां सर्वपत्रैश्च पुष्पैश्चैव प्रपूजयेत् ॥ इति ॥

रक्तो रक्तवर्णः । बिल्वपत्रैः पूजने राजसूयफलम् । करवीरस्रजा अग्निष्टोमफलम् । वकुळस्रजा वाजपेयफलम् इति प्रयोगपारिजाते पुष्पसारसुधानिधौ च ।

शिवार्चने निषिद्धानि पत्रपुष्पफलानि च ।
तानि देव्याः प्रशस्तानि अनुक्तानि विशेषतः ॥

इति ताराभक्तिसुधाऽर्णवे । रुद्रयामळशक्तियामळयोः---

सुन्दरीभैरवीकाळीताराब्रह्मविवस्वताम् ।
विना तुळस्या या पूजा सा पूर्णा न कदाचन ॥
सावित्रीं च भवानीं च दुर्गादेवीं सरस्वतीम् ।
योऽर्चयेत् तुळसीपत्रैः सर्वैः कामैः स ऋध्यति ॥ इति ॥

"बिल्वैर्वा तुळसीपुष्पैः" इति रहस्यनामसाहस्रे ललितार्चने स्मर्यते ॥

केषांचित्कालावधिः

तत्र हेमाद्रौ---

पङ्कजं पञ्चरात्रं स्याद्दशरात्रं तु बिल्वकम् ।
तुळस्येकादशाहं तु पुनः प्रक्षाल्य पूजयेत् ॥

[1] किंकिरा---अ, ब१, ब२.

बोपदेवः—

बिल्वापामार्गजातीतुळसिशमिशताकेतकीभृङ्गदूर्वा-
कुंदांभोजाहिदर्भा मुनितिलतगरा ब्रह्मकल्हारमल्लः ।
चम्पा चारातिकुम्भी दमनमरुवका बिल्वतोहानि शस्ताः
त्रिंशस्त्र्यङ्कार्यरीशोदधिनिधिवसुभू भूयसा भूय एवम् ॥

त्रिंशादयो बिल्वप्रभृतीनां दिनसङ्ख्यावाचकाः । मुहुरावर्त्त्याश्च ॥

विहितनिषिद्धानि

पाटला च शमीपत्रं दुर्गायास्तु हिताहितम् ॥

विहितनिषिद्धमित्यर्थः ॥

तिलकं मालती बाणस्तुळसी भृङ्गराजकम् ।
तमालं शिवदुर्गार्थे निषिद्धविहितं भवेत् ॥

बाणो भाषया करसाला ॥

जयः काशः श्वेतपद्मं श्वेतमन्दारकं तथा ।
दुर्गायाश्चैव विष्णोश्च निषिद्धविहितं भवेत् ॥

जयः जयन्ती ॥

अगस्तिरतिमुक्तं च तिरीटं च हरे हरौ ।
अपामार्गस्य पुष्पं च दुर्गायाश्च हिताहितम् ॥

अतिमुक्तो माधवीलता । तिरीटं लोध्रम् ॥

निषिद्धानि

अक्षतानर्कधुत्तूरौ विष्णोर्नैवार्पयेत् सुधीः ॥

अक्षतनिषेधः सालग्रामपर एव न तु मूर्त्त्यामिति हेमाद्रिः ॥

बन्धूकं केतकी कुन्दं केसरं कुटजं जपाम् ।
शङ्करे नार्पयेत् विद्वान् मालतीं यूथिकामपि ॥

शक्तौ दूर्वार्कमन्दारान् मालूरं तगरं रवौ ।
विनायके तु तुळसीं नार्पयेत् जातुचिद्बुधः ॥

इहार्कनिषेधो दुर्गेतरविषयः, विहितेषु तस्याप्युपादानात् ॥

मध्यमं फलरूपं कुसुमम्

जम्बूदाडिमजम्भीरचिञ्चिणीबीजपूरकाः ।
रम्भा धात्री च बदरी रसालः पनसोऽपि च ॥
एषां फलैर्यजेद्देवं . . . . ॥

देवमित्युपलक्षणं देव्या अपि ॥

अधमम्

तुळसी वकुळो वृक्षः चम्पकश्च सरोजिनी ।
विल्वकल्हारदमनास्तथा मरुवकं कुशः ॥
दूर्वाह्विवल्ल्यपामार्गा विष्णुक्रान्ता मुनिद्रुमः ।
धात्रीयुतानामेतेषां पत्रैः कुर्यात् सुरार्चनम् ॥

इह तुळस्यादीनां पूर्वोक्तानां केषां चित् वकुळादिपत्रप्रायपाठेऽपि नाधमत्वम् । पत्रैरित्युपलक्षणं फलस्यापि ॥

पर्युषितकुसुमविचारः

भविष्यत्पुराणे—

न पर्युषितदोषोऽस्ति जलजोत्पलचम्पके ।
तुळस्यगस्त्यवकुळे बिल्वे गङ्गाजले तथा ॥

अन्यत्र—

तुळस्यां बिल्वपत्रे च जलजेषु च सर्वशः ।
न पर्युषितदोषोऽस्ति मालाकारगृहेषु च ॥ इति ॥

पर्युषितापवादः

पारिजाते—

जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च ।
तुळस्यगस्त्यबिल्वानि गाङ्गं वारि न दुष्यति ॥ इति ॥

स्कान्दे—

तस्य माला भगवतः परमप्रीतिकारिणी ।
शुष्का पर्युषिता वाऽपि न दुष्टा भवति क्वचित् ॥

तस्येत्युपक्रमात् दमनकस्य । भगवत इत्युपलक्षणं भगवत्या अपि ॥

पर्युषितमात्रस्यापि ग्राह्यत्वम्

प्रयोगपारिजाते—

यद्वा पर्युषितैश्चापि पुष्पाद्यैरविकारिभिः ।
गन्धोदकेन चैतानि त्रिः प्रोक्ष्यैव प्रपूजयेत् ॥ इति ॥
अथवा बिल्वतुळसीपत्रैर्वकुळपुष्पकैः ।
शुष्कैरपि पूजयेत् . . . . ॥ इति ॥

सर्वस्यैतस्यापवादः

ग्रन्थान्तरे—

देवीपूजा सदा कार्या जलजैः स्थलजैरपि ।
विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसा
सर्वपुष्पैः सदा पूजा विहिताविहितैरपि ।
कर्तव्या सर्वदेवानां भक्तिरेवात्र कारणम् ॥ इति ॥

इतोऽपि विस्तारोऽन्यत्र द्रष्टव्यः इति दिक् ॥

निबन्धाध्ययनमहिमा

एतन्निबन्धाध्ययनेनापि सर्वदेवतोपास्तिफलं भवति । तदुक्तं भगवता सूत्रकृता—

य इमां दशखण्डीं महोपनिषदं महात्रैपुरसिद्धान्तसर्वस्वभूतामधीते स सर्वेषु यज्ञेषु यष्टा भवति । यं यं क्रतुमधीते तेन तेनास्येष्टं भवति इतीह श्रूयते इत्युपनिषदिति शिवम् ॥ इति ॥

अत्राधीते इत्यध्ययनविधेः अर्थज्ञानभाव्यकतया अस्य निबन्धस्य खण्डदशकार्थावगमकत्वात् इति शिवम् ॥

ग्रन्थकर्तृप्रशस्तिः

नित्योत्सवो निबद्धोऽयं यथाधीविभवं मया ।
भ्रमप्रमादस्खलितं समादधतु तद्विदः ॥
अनेन वागध्वरेण समाराध्या कथंचन ।
प्रीयतां देशिकात्मा मे देवी श्रीललिताऽम्बिका ॥
विश्वाश्चर्यतपोमयविश्वामित्रर्षिगोत्रतिलकेन ।
श्रीबालकृष्णविद्वत्सुतेन लक्ष्म्यम्बयोपलाल्येन ॥
श्रुतपेटवोपनाम्ना चोळाधिपभोसलेन्दुमान्येन ।
नाटककाव्यादिकृता महितमहाराष्ट्रजातिहीरेण ॥
त्र्यन्ततत्त्वशीलनदळित[1]जगच्छत्र[च्छास्त्र]जालमोहेन
भारत्युपाख्यभास्करमखिदेशिकलब्धदैक्षनाम्नायम् ॥
आम्नायतन्त्रजालालोकपरेणार्यसम्प्रदायजुषा ।
ललितापदाब्जरोलम्बेन जगन्नाथपण्डितवरेण ।
कल्यब्देषु रसार्णवकरिवेदमितेष्विह व्यतीतेषु ।
नव्यः क्रोधनशरदि न्यबन्धि नित्योत्सवः शिवप्रीत्यै ॥

इति श्रीमद्भासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेन उमानन्दनाथेन निर्मिते अभिनवे कल्पसूत्रानुसारिणि नित्योत्सवनिबन्धे साधारणक्रमनिरूपणो नाम अनवस्थोल्लासः सप्तमः समाप्तिमगमत् ॥

इति नित्योत्सवनिबन्धः समाप्तः

श्रीगुरुचरणारविन्दार्पणमस्तु

---

[1] जगच्छक्र—व१, व३ ; जगच्छक्ति—अ१ ; जगज्जाकृच्छमूहेन—भ.

नित्योत्सवोदाहृतग्रन्थग्रन्थकारसूची

ग्रन्थनाम	पुटसङ्ख्या
अगस्त्यसंहिता	२१२
आश्वलायनः	२१९
कादिमतम्	८७
कुलमूलावतारः	२०६, २१०, २१२
कुलार्णवः	४१, १३६, १४१, २१२
गणेशविमर्शिनी	२०७
ग्रन्थान्तरम्	२१९, २२३
ज्ञानार्णवः	१४, ४४, ९१, ७२, ९७, १६६
डामरम्	७९
तन्त्रराजः	६, १३६, १४२, २१०, २१४
तन्त्रसारः	११, २१७
तन्त्रान्तरम्	४, १४३, २१३, २१४–२
ताराभक्तिसुधार्णवः	२२०
देवीपुराणम्	२२०
देवीयामलम्	२६०
नारदपाञ्चरात्रम्	१६०, २०७
पराशरः	१६१
पारिजातः	२२२
पुष्पसारसुधानिधिः	२१९, २२०
प्रयोगपारिजातः	२१७, २१८, २२०, २२३
बोपदेवः	२२१
भविष्यपुराणम्	२१७, २१८, २१९, २२२
मन्त्रकोशः	१९६
मन्त्रकोशकारः	२१८
मन्थानभैरवतन्त्रम्	२
मुहूर्तचिन्तामणिः	१६८
योगिनीतन्त्रम्	२०७
रत्नसागरः	२१२
रहस्यनामसाहस्रम्	२२०
रुद्रयामलम्	१६८, २०७, २१२–२, २२०
लिङ्गपुराणम्	१६१
वराहपुराणम्	२१८
वातुलागमः	२१४
वामकेश्वरतन्त्रम्	८४
विद्यार्णवः	९८
विष्णुः	१६०
विष्णुधर्मोत्तरम्	२१८

ग्रन्थनाम	पुटसङ्ख्या	ग्रन्थनाम	पुटसङ्ख्या
विष्णुयामलम्	१६०	सिद्धयामलम्	२०८
वैशम्पायनसंहिता	३,२०८	सिद्धान्तशेखरः	२१२
शक्तियामलम्	२२०	सुन्दरीमहोदयः	१४,७०
शक्तिसंगमतन्त्रम्	४२, ८९, १९८, १९९	सोमसिद्धान्तः	२१२
शारदातिलकम्	८७	सौत्रामणितन्त्रम्	२०९
शैवागमः	२०८	सौभाग्यचन्द्रोदयः	९
श्यामाक्रमः	७८	स्कान्दम्	२२३
श्यामारहस्यम्	९०,७०	स्वच्छन्दतन्त्रसारः	१६७, २१९
साङ्ख्यायनतन्त्रम्	१२८	हिरण्यगर्भसंहिता	२१४
सारसङ्ग्रहः	२—२	हेमाद्रिः	२२०, २२१

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.